प्रभाते पूर्णचन्द्रस्य मध्याह्ने पङ्कजस्य च ।
बिभर्ति तव किं वक्त्रं वपुर्मम मनोहरम् ॥
किमर्थं कौङ्कुमं वासो महारजतमेव च ।
नानुगृह्णासि सुश्रोणि शुक्लं वासोऽनुगृह्यते ॥
वासस्येते तवाभीष्टे महारजतकौङ्कुमे ।
देवाभिगमनादूर्ध्वं शुक्लं नेष्टं हि ते प्रिये ॥
किं चानाभरणं गात्रं सुगात्रि तव कथ्यताम् ।
चित्रकस्थानमाक्रान्तं कस्माच्च वरवर्णिनि ॥
श्वेतेन तव पट्टेन वाससा प्रियदर्शने ।
ललाटं सेव्यते कस्माच्चन्दनेन सुगन्धिना ॥
सरसेनायतापाङ्गि कान्तेन हृदयप्रिये ।
प्रभोपमर्दः केनाथ कारणेनाननस्य च ।
करोषि मम चात्यर्थं मनो ग्लापयसि प्रिये ॥
प्रसृतश्चन्दनरसः कपोलप्रणयी तव ।
पत्रलेखासपत्नत्वं प्राप्तो नातिविराजते ॥
रत्नस्याभरणैर्मुक्ता तव ग्रीवा न शोभते ।
ग्रहनक्षत्ररहिता द्यौरिवाव्यक्तशारदी ॥
पूर्णचन्द्रसपत्नेन स्मेरेणाबहुभाषिणा ।
किमु नाभाषसे माद्य मुखेनोत्पलगन्धिना ॥

शुभा) — (L 165) $K_{1\ 3\ 4}$ V_1 $D_{1\ 2\ 4\ 5}$ वामा (for वामां) B_1 उत्क्षिप्त-, Bom Poona eds G(ed) विक्षिप्य (for उत्क्षिप्य) $Ñ_1$ D_1 लोचनम् (for लोचने) V_2 सम्य गुत्क्षिप्तलोचना (for ^{b}) — (L 166) V_1 प्रविश्य (for निवेश्य) K_2 सत्यभामा, $D_{1\ 2}$ शोचन्तीति, T_2 $G_{1\ 4}$ शोभ यन्ती (for °सीति) — K_2 om lines 168–169 — (L. 169) K_3 समुत्पतज्, D_5 T_{1-3} $G_{1\ 3-5}$ M_4 °पेत्य (for °त्पत्य) $B_{1\ 3}$ तत कृष्णः (for जलं तत्र) $Ñ_1$ अश्रुधर्मव्रजस्तं तु, D_1 समुत्सृज्य जल तत्तु, D_6 °पेत्य तत· कृष्ण (for ^{a}) $K_{1\ 3\ 4}$ $Ñ_2$ V $D_{1\ 2\ 4\ 5}$ पतन्तं, $Ñ_1$ B Ds D_6 $T_{2\ 3}$ G M_4 पतत्तद् (for पतितं) — (L 170) $K_{2\ 4}$ $V_{1\ 3}$ B_1 Dn $D_{1-4\ 6}$ सत्वर (for °रम्) $Ñ_1$ B_2 Ds_1 D_5 $T_{1\ 4}$ $G_{2\ 3}$ कराभ्यामतिसत्वर· (for ^{b}) — (L 171) $K_{1\ 3}$ V_1 Dn D_{1-4} स (V_1 D_4 च) तत्तोयं, K_4 स्थितं तोयं ; V_3 [अ]पतत्तोयं; $D_{2\ 3}$ गतं तोयं (for पतत्तोयं) D_6 अथात्मोरसि तत्तोयं (for ^{a}) —(L 172) D_3 प्रियाया नयनं देव· (for ^{a}) $K_{2\ 3}$ $Ñ_2$ B Ds D_4 परिगृह्य ; V_1 विसृज्य (for परिमृज्य) — After line 172, K_2 ins an addl. colophon mentioning adhy name सत्यभामाकोपः — Before line 173, K_2 ins वैशपायन· — (L 173) V_2 Cal ed पद्माक्षि (for -पत्राक्षि) B_3 Cal ed किमिदं तव भाविनि (for ^{b}) — (L 175) T_{1-3} $G_{1\ 3-5}$ M_4 भास्करस्य (for पङ्कजस्य) — (L 176) $T_{2\ 3}$ G_1 तावकं (for तव किं) G_2 रूप (for वक्त्रं) K_4 D_5 $T_{1\ 4}$ वपुस्तव ; V_1 °र्नाम, D_6 (marg as above), G_3 M_4 रूपं मम, T_2 $G_{1\ 4\ 5}$ उपमानं, T_3 वपुर्मानं (for °र्मम) $Ñ_1$ मनोहरे (for °हरम्) — (L 177) K_4 कथं वा, T_4 किमद्य (for °र्थं) D_3 किमथैकान्तसंचासो —(L 178) K_2 शुष्कं (for शुक्लं) G_1 शुक्लवासो निगृह्यते (for ^{b}) — (L 179) D_4 वाससी तव चाभीष्टे (for ^{a}) — (L 180) $K_{1\ 3\ 4}$ V_1 Dn Ds D_5 तत्स्त्रिया, $Ñ_2$ तत्प्रिये, V_3 न स्त्रिय, D_1 ते प्रियम् ; D_2 मे प्रिये (for ते प्रिये) D_4 शुक्लं श्रेष्ठ हि तत्स्त्रियः (for ^{b}) — (L 181) G_1 M_4 गात्रे (for गात्रं) K_1 कथ्यते, D_6 (marg) कङ्कणम् (for कथ्यताम्) — (L. 182) $T_{1\ 3}$ $G_{3\ 5}$ चित्रकस्थानमात्रं त्वं (G_5 तं) (for ^{a}), Ds_1 अमर-, D_1 तद्वर- (for च वर-) — (L 183) D_1 $T_{2\ 3}$ $G_{1\ 4\ 5}$ नव (for तव) K_3 Dn_1 T_4 पादेन (for पट्टेन) — (L 185) D_3 सरसेनापि तन्वङ्गि (for ^{a}) $Ñ_2$ om lines 185^{b}–186^{a} — K_4 om (hapl) lines 186–187 — (L 186) V_2 B Dn Ds D_5 G_2 प्रभोपमर्दं ; D_6 प्रासोपमर्द·, T_2 $G_{1\ 4}$ M_4 प्रभावमर्दं (M_4 °र्दं) (for प्रभोप°) K_3 $Ñ_1$ V_1 D_1 $T_{1\ 4}$ G_3 प्रभोपमर्दं केनापि, T_3 °मर्दंनेनाथ (for ^{a}) —(L 187) D_3 दुनोषि (for करोषि) — (L 188) K_4 प्रसिक्तश्च, B_1 D_6 प्रभूतश्च ; D_2 प्रसू° (for प्रसृ°) $T_{2,\ 3}$ $G_{1\ 4\ 5}$ न च (for तव) — (L. 189) T_{1-3} $G_{1\ 3-5}$ M_4 -वृतत्वं वा (for -सपत्नत्वं) — (L. 190) D_5 $T_{2\ 3}$ $G_{4\ 5}$ M_4 रहसि, $T_{1\ 4}$ $G_{1\ 3}$ रत्नैश्च (for रत्नस्य) D_2 श्रोणी (for ग्रीवा) $Ñ_1$ V_3 $B_{1\ 3}$ D_6 श्रोणिस्ते नातिशोभने (V_3 D_6 °शोभिता, B_3 °शोभना) — (L 192) K_4 -सवर्णेन, D_4 -प्रसन्नेन (for सपत्नेन) K_2 स्वरेण ; K_3 D_4 स्मरेण (for स्मे°) D_1 बहु- (for [अ]बहु-) $D_{2\ 3}$ स्मयता- (D_3 °रता)द्भुतभाषिणा, G_2 M_4 स्व(M_4 स्म)रेण बहु°, G_5 स्मरणे बहु° (for ^{b}) — (L. 193) $Ñ_1$ Dn T_2 नो भाषसे

अर्धाक्ष्णापि हि तावन्मां किमर्थं न निरीक्षसे ।
मुञ्चस्येव सनिःश्वासं तोयमञ्जनदुर्दिनम् ॥
अलमिन्दीवरश्यामे रुदितेन मनस्विनि ।
जलमञ्जनकल्माषं मा मोक्षीराननद्विपम् ॥
त्वदीयोऽहं यदा देवि ख्यातो जगति किंकरः ।
नाज्ञापयसि मां किं त्वं पुरेव वरवर्णिनि ॥
किमकार्षमहं देवि विप्रियं तव भामिनि ।
येनातिमात्रमात्मानमायासयसि सुन्दरि ॥
मनसा कर्मणा वाचा न त्वामतिचराम्यहम् ।
सर्वथा सर्वचार्वङ्गि सत्यमेतद्ब्रवीम्यहम् ॥
बहुमानो ममान्यासु स्त्रीषु सर्वासु शोभने ।
स्नेहश्च बहुमानश्च त्वामृतेऽन्यासु नास्ति मे ॥
नैव त्वां मदनो जह्यादमृते मयि मामकः ॥
इति मे निश्चितं विद्धि चेतः सुरसुतोपमे ॥
क्षमादयश्च मेदिन्यां शब्दाद्याश्चाम्बरे गुणाः ।
ध्रुवं पङ्कजगर्भाभे त्वयि स्नेहस्तथा मम ॥
रुचिरग्नौ यथा दिव्या प्रभा चैव दिवाकरे ।
कान्तिश्च शाश्वती चन्द्रे स्नेहस्त्वयि तथा मम ॥
एवंवादिनमात्मेष्टं सत्यभामा जनार्दनम् ।
शनैरुवाच नेत्राभ्यां प्रमृज्य सुभगा जलम् ॥
मदीयस्त्वमिति ह्यासीन्मम नित्यं मनः प्रभो ।
अद्य साधारणस्नेहस्त्वमित्यवगता ह्यहम् ॥
नाज्ञासिषमहं पूर्वमनित्यं कालपर्ययम् ।
अद्य लोकगतिं कृत्स्नामवगच्छामि न ध्रुवाम् ॥
अमृताया द्वितीयं हि जन्मेदं मम सर्वथा ।
किमत्र बहुनोक्तेन हृदयं वेत्ति तेऽच्युत ॥
वाङ्मात्रमिव पश्यामि माधुर्यं संप्रयुज्यते ।
मयि स्नेहश्च कृतकस्तवान्यत्र न कृत्रिम. ॥

(for नाभा°) D_9 मे (for मा) K_2 किं त्वमाभाषसे नाद्य, $\tilde{N}_2$ V_3 $D_{1.3}$ D_6 T_4 किं मामाभाषसे नाद्य, $D_{2\ 3}$ किमु मां भाषसे नाद्य (D_3 न त्वं), D_4 M_4 किमु नो भाषसे नाद्य (for ^{a}) — (L 194) $T_{1\ 3}$ $G_{4\ 5}$ M_4 मा देवि (for तावन्मां). D_3 सुलोचनाभ्यां तावन्मां (for ^{a}) — (L 195) V_1 वि-, M_4 च (for स-) — (L 197) B_1 (marg) G_5 M_4 अलम् (for ज°) T_2 $G_{1\ 4}$ अलमम्बुजकल्माषं (for ,^{a}). D_4 कार्षीर् (for मोक्षीर्) $T_{1\ 2}$ G_3 मा मोक्षीराननाम्बुजात्, $G_{1.4\ 5}$ M_4 मा त्याक्षीराननाम्बुजात् (for ^{b}) — (L 198) M_4 ऽस्मि तव (for जगति) — (L 199) K_1 B_2 G_2 न ज्ञापयसि मां किं तु (B_2 नु) (for ^{b}) — V_3 om line 200 — (L 200) K_3 महादेवि (for अहं देवि) D_2 किमकारि मया देवि (for ^{a}). — K_3 M_4 om (hapl) line 203 — (L 203) K_1 Dn D_4 $T_{2\ 3}$ $G_{1\ 3-5}$ सर्वथा चारुसर्वाङ्गि (for ^{a}). — For line 203, K_4 subst

6** द्वितीयं न हि मे किंचिदुक्तं यन्मेति नागरे (310)।

— (L 204) V_3 बहुमान्या (for °नो) $\tilde{N}_2$ न च (for मम) D_3 बहुश्त्वन्यासु मान्यासु, T_{1-3} $G_{1\ 3-5}$ °मान्यासु सर्वासु (for ^{a}) K_2 $\tilde{N}_2$ $B_{1\ 2}$ Ds D_{2-5} T $G_{1\ 3-5}$ M सर्वाङ्ग (for °सु) V_1 स्त्रीषु सर्वाङ्गशोभिनि, B_3 D_6 सर्वासु स्त्रीषु शोभने (for ^{b}) — (L 205) G_1 स्नेहाच्च बहुमानाच्च (for ^{a}) — (L 206) T_3 सुमनो (for मदनो) D_6 T_4 दह्याद् (for ज°) $\tilde{N}_1$ B D_2 मृतेऽपि, D_5 ऋतेऽपि, G_2 महते (for अमृते) — For line 207, D_3 subst

7** निश्चितं विद्धि चेतो मे त्वयि नित्यं सुनिश्चलम् ।

— (L 208) K_2 B_2 D_4 गुणो गन्धश्, $B_{1\ 3}$ Dn $D_{5\ 6}$ $T_{2\ 3}$ $G_{1\ 3-5}$ M_4 क्षमा गन्धश् (for क्षमादयश्) K_3 क्षमा यथा च मेदिन्या (for ^{a}) $K_{1\ 3\ 4}$ $\tilde{N}_2$ Dn D_1 यथा, $\tilde{N}_1$ [अ]परे (for [अ]म्बरे). D_2 खे शब्दाद्या यथा गुणा (for ^{b}) — For line 208, D_3 subst

8** गन्धो गुणश्च मेदिन्या खे शब्दश्च यथा गुण ।

— (L 209) Dn ध्रुवा (for ध्रुवं) — T_1 G_3 om (hapl.) lines 210–211 — (L 210) $K_{1\ 4}$ तथा, $G_{4\ 5}$ प्रभा (for यथा) $\tilde{N}_1$ नित्यं (for दिव्या) $G_{4.5}$ यथा (for प्रभा) — (L 212) G_2 आलोक्य (for आत्मेष्टं) — (L 213) V_2 प्रगृह्य; Ds_2 प्रयुज्य, D_3 प्रसृज्य (for प्रमृज्य) — (L 214) $\tilde{N}_2$ आसि (for इति) D_3 मतिः (for मन.) D_1 मनसीति मम प्रभो (for ^{b}) — (L 215) T_4 अन्य- (for अद्य) K_4 $\tilde{N}_1$ $T_{1\ 2}$ $G_{1.3\ 5}$ अद्य साधारणं स्नेहं (for ^{a}) K_4 B_1 D_4 T_1 G_3 त्वयि तावद्गता ह्य(T_1 G_3 °तास्म्य)हम्, M_4 त्वयीत्यवगतास्म्यहम् (for ^{b}) — (L 216) D_3 अनित्यं कामपर्यये; $T_{2\ 3}$ $G_{1\ 4\ 5}$ नित्यं कालविपर्ययम् (for ^{b}) — For line 217, D subst

9** अद्यालोक्य गतिं कृत्स्नां मैवं जानामि वा ध्रुवम् ।

— (L 218) D_3 अमृतायां (for °ताया) $K_{1.3\ 4}$ $\tilde{N}_1$ Dn $K_{1\ 3\ 4}$ $\tilde{N}_1$ Dn द्वितीयोऽपि, V_1 °योऽहं; V_2 B_3 $D_{1\ 5\ 6}$ °योऽयं; D_5 °यो हि (for °य हि) $K_{1\ 4}$ $\tilde{N}_1$ Dn $D_{1.5\ 6}$ जन्मो ($\tilde{N}_1$ Dn °न्मौ) हि, K_3 जननो, V_1 जन्माहो, $B_{2.3}$ जन्मापि; D_1 जन्मेह, D_5 जन्मोऽद्य, G_2 जन्म ते (for जन्मेदं). D_3 तव (for मम). — (L. 219) $\tilde{N}_1$ D_3 T G M_4 वेद्मि (for वेत्ति) ;

ऋजुस्वभावां भक्तां च सर्वथा पुरुषोत्तम ।
अवजानासि जानन्मां कैतवी वृत्तिमास्थितः ॥
एतावत्खलु पर्याप्तं दृष्टं द्रष्टव्यमद्य यत् ।
श्रुतं वाप्यथ वा श्राव्यं दृष्टः स्नेहफलोदयः ॥ [225]
यदि त्वहमनुग्राह्या मामनुज्ञातुमर्हसि ।
तपस्येयं परं कृत्वा निश्चयं पुरुषोत्तम ॥
भर्तुश्छन्देन नारीणां तपो वा व्रतकानि वा ।
निष्फलं खलु यद्भर्तुरच्छन्देन क्रियेत यत् ॥
इतीदमुक्त्वा पुनरेव शोभना [230]
मुमोच तोयं नयनोद्भवं सती ।
प्रहाय पीतं हरिवाससः शुभा
पटान्तमाधाय मुखे शुचिस्मिता ॥

Colophon.

वैशंपायन उवाच ।
नारायणः सत्यभामां पुनरेवाथ भारत ।
प्रोवाच प्रणयात्क्रुद्धामभिमानवतीं सतीम् ॥ [235]
दहतीव ममाङ्गानि शोकः कमललोचने ।
किमु तत्कारणं येन त्वमेवमतिविक्लवा ॥
शापितासि मम प्राणैराचक्ष्वानत्ययो यदि ।
श्रोतव्यं यदि भक्तेन भर्त्रा सर्वाङ्गशोभने ॥
ततः प्रोवाच भर्तारं सत्या सत्यव्रते स्थितम् । [240]
बाष्पगद्गदया वाचा तथैवाधोमुखी स्थिता ॥
त्वयैव स्थापितं पूर्वं सौभाग्यं मम मानद ।
जगत्यमलपत्राक्ष तत्ख्यातं केशिनाशन ॥
शिरो वहामि चेष्टत्वात्तवाहं देव गर्विता ।
सर्वसीमन्तिनीमध्ये स्पृहणीयास्मि सर्वथा ॥ [245]
साहमद्यावहास्यास्मि सपत्नीनां जनस्य च ।

— (L 220) $\tilde{N}_1$ D_1 $T_{3\ 4}$ $G_{3\ 5}$ एव , V_3 अपि (for इव). D_n यत्प्र- , D_2 प्रिय (for संप्र-) K_3 -योजितम् , $\tilde{N}_1$ T_1 G_{1-3} -युज्यसे (for °ते) — (L 222) K_2 रक्तां च , $\tilde{N}_1$ V_1 $B_{1\ 3}$ D_6 मा भक्तां , D_1 भक्ता मा (for भक्तां च) — (L 223) K_3 कपोती- , K_4 $\tilde{N}_1$ D_{s1} D_5 कैतवां , D_{s1} °वी- (for °वी) T_{1-3} G_{3-5} आश्रित· (for आस्थित) — (L 224) T_4 पर्यन्तं (for पर्याप्तं) D_4 द्रष्टुं (for दृष्टं) $K_{1\ 3\ 4}$ V_3 B_2 D_n D_1 $T_{1\ 4}$ G_2 अव्ययम् (for अद्य यत्) $T_{2\ 3}$ $G_{1\ 4\ 5}$ द्रष्टव्यं दृष्टमद्य तत् (for ^{b}) — (L 225) $K_{1\ 2\ 4}$ $\tilde{N}_{1\ 2}$ $V_{1\ 2}$ B_3 D_s $D_{1\ 4-6}$ T_4 G_2 यच्छ्राव्यं ; V_3 यच्छेषं , B_2 D_2 यच्छ्रव्यं (for वा श्राव्यं) B_1 श्रुतं यच्चाप्यथ श्रव्यं (for ^{a}) — (L 227) K_2 $\tilde{N}_{1\ 2}$ V B D_n D_s $D_{5\ 6}$ T_1 G_1 तपस्येऽहं (for °स्येयं) K_4 T_2 ज्ञात्वा (for कृत्वा) D_2 तपस्येऽहं परं कृत्वा ; D_3 तपश्चर्तुं परं ज्ञात्वा (for ^{a}) — (L 229) D_3 क्रिया कृतम् (for क्रियेत यत्) K_4 अच्छेदेन क्रियेत हि (for ^{b}) — (L 232) K_2 $V_{2\ 3}$ B_3 $D_{2\ 3\ 5}$ जग्राह , D_3 (before corr) आदाय (for प्रहाय) V_3 D_1 वाससं (for °स). $\tilde{N}_2$ $D_{3\ 4}$ शुभं (for शुभा) T_3 $G_{1\ 3-5}$ M_4 प्रहादपेता ($G_{3\ 4}$ M_4 °तं) हरिवासस. शुभा , G_2 जग्राह पीतं हरिवाससं शुभं — (L 233) $T_{3,\ 4}$ $G_{1\ 4\ 5}$ आदाय (for आधाय)

COLOPHON — *Mention of the Epic* K_3 D_{s2} T_3 — *Mention of Khila* · K_3 V B D_s D_1 — *Adhy name* · K $\tilde{N}_1$ V B D_n D_s $D_{1\ 3\ 4-6}$ $T_{2\ 3}$ G_1 पारिजात(K_1 °जातक , T_3 G_1 °जाताप)हरणम् , D_3 T_1 G_4 पारिजात(G_4 °जाताप)हरणे सत्यभामासान्त्वनम् (D_3 °भामाकोप·); T_4 G_3 सत्यभामासान्त्वनम् — *Adhy no* K_3 (marg) 120 , $\tilde{N}_1$ 123 , V_1 126 , V_2 125 , V_3 124 , B_2 T_4 128 ; D_n D_{s2} D_4 121 , D_1 118 , D_3 130 , T_1 $G_{3\ 4}$ M_4 135 , T_2 G_1 137 , T_3 144 , G_2 127 , G_5 138

— (L 234) K_4 D_1 [ए]ष (for [अ]थ) V_3 D_2 पुनरेवाभ्यभाषत (for ^{b}) — (L 235) T_3 $G_{1\ 4\ 5}$ सखीम् (for सतीम्) — Before line 236, some Mss ins वासुदेव., some कृष्ण , some भगवान् — (L 236) $\tilde{N}_1$ V_1 B_2 D_{s2} दंदहीति , D_2 दंदह्यते , D_5 दंदहन्ति , T_1 $G_{2\ 4\ 5}$ M_4 दहन्तीव (for °तीव) — G_3 om lines 237–239. — (L 237) V_3 B_3 M_4 किं तु (M_4 नु) तत् , D_3 किमेतत् (for किमु तत्) — (L 238) K_4 समतासि , T_{1-3} $G_{1\ 4\ 5}$ प्रियासि च (for शापितासि) M_4 प्रियासि मम च प्राणैर् (for ^{a}) K_2 वचनं , $D_{1\ 2\ 5}$ [अ]नुग्रहो , T_2 G_1 [अ]न्यमितो , G_2 प्रणयो (for [अ]नत्ययो) D_3 आचक्ष्व न भयं क्वचित् (for ^{b}) — (L 239) K_4 -शोभिना , $\tilde{N}_2$ -शोधने (for -शोभने) — (L 240) D_2 G_2 स्थिता (for स्थितम्) K_2 सत्या सत्यप्रतिष्ठितम् ; D_3 सत्यभामा व्रते स्थिता (for ^{b}) — (L 242) $\tilde{N}_2$ B_1 D_{n2} D_{s1} D_{4-6} G_5 ख्यापितं , M_4 [आ]ख्या° (for स्था°) — (L 243) K_2 $\tilde{N}_2$ $D_{3\ 4}$ [उ]त्पल- (for [अ]मल-). V_2 T_2 G_1 -पद्माक्ष (for -पत्राक्ष) K_3 जगत्कमलपत्राक्ष (for ^{a}) K_2 तत्कृतं ; D_3 प्रख्यातं , $T_{1\ 4}$ यत्ख्यातं (for त°) — (L 244) T_3 $G_{1\ 5}$ M_4 गिरा वदामि चेष्टं त्वां (for ^{a}). D_6 (marg) तेन (for देव) — (L 245) B_3 सर्वसीमन्तिनीना च (for ^{a}).

इति प्रेष्याभिराख्यातं श्रुत्वा तथ्यं ततस्ततः ॥
यत्पारिजातकुसुमं दत्तवान्नारदस्तव ।
तत्किलेष्टजने दत्तं त्वयाहं परिवर्जिता ॥
रत्नातिशयदानेन तस्यामभ्यधिकः किल ।
स्नेहश्च बहुमानश्च प्रकाशं गमितस्त्वया ॥
तामस्तौषीत्समक्षं ते प्रियां स किल नारदः ।
तमश्रौषीश्च हृष्टस्त्वं प्रियायाः संस्तवं किल ॥
स्तोतव्या यदि तावत्सा नारदेन तवाग्रतः ।
दुर्भगोऽयं जनस्तत्र किमर्थमनुशब्दितः ॥
प्रणयस्य रसं दत्त्वा पश्चात्तापः प्रभो यदि ।
अनुज्ञां मे प्रयच्छस्व तपः कर्तुं प्रसीद मे ॥
स्वप्नेनापि न दृष्टाहं श्रद्दध्यां पुष्करेक्षण ।
यदन्यदेव निर्वृत्तमश्रौषं पश्यतस्तव ॥
कामः कामं तु तस्यैव मुनेरतुलतेजसः ।
अत्र मन्युस्तु मे देव सांनिध्यं तव तत्र यत् ॥
मानार्थं जीव्यते लोके सद्भिरित्युक्तवानसि ।
तदेवं सति नेच्छामि जीवितुं मानवर्जिता ॥
ममाभवद्यतो रक्षा भयमद्य ततो मम ।
सर्वतो रक्षते यो मां स मां नाद्याभिरक्षति ॥
हा गतिं कां गमिष्यामि त्यक्ता देव त्वया विभो ।
कुमुद्वतीगतां नूनं गतिं यास्याम्यसंगता ॥
किमकार्षमहं मोहादीश्वराणां प्रियाप्रियम् ।
प्रिया भूत्वाप्रिया भूता यदहं तव मानद ॥
वसन्तकुसुमैश्चित्रं सदा रैवतकं गिरिम् ।
प्रिया भूत्वाप्रिया भूता कथं द्रक्ष्याम्यहं पुनः ॥
परपुष्टस्वनोन्मिश्रं पुष्पगन्धवहं शुचिम् ।
कथं नामानिलं द्वेष्या सेवेयं दुर्भगा सती ॥
जलक्रीडां तवाङ्कस्था देव कृत्वा महोदधौ ।

— (L 246) K_{1} $\tilde{N}_{1\ 2}$ $V_{2\ 3}$ $B_{1\ 2}$ Dn T_{4} G_{2} [अ]वहास्यामि (for °स्मि) T_{1-3} $G_{1\ 3-5}$ M_{4} सा(T_{1} अ)हं मान्यापहास्यामि (T_{3} G_{4} °स्मि) (for ^{a}) V_{3} जनेश्वर (for जनस्य च) — (L 247) D_{1} दासीभिर् (for प्रेष्या°) D_{6} G_{4} सत्यं (for तथ्य). B_{1} D_{3} वचस् (for ततस्) — (L 248) $K_{1\ 3\ 4}$ D_{1} G_{2} तत् (for यत्) T_{3} G_{4} तदा (for तव) K_{2} D_{4} नारदस्तव दत्तवान् (for ^{b}) — (L 249) K_{4} वृत्तं (for दत्तं) D_{3} -वञ्चिता (for वर्जिता) — (L 250) D_{3} रत्नपुष्पप्रदानेन , D_{5} रत्नातिश्रेष्ठदा° (for ^{a}) $\tilde{N}_{2}$ अद्याधिकः , D_{2} अत्य° , G_{4} अभ्यधिकं (for °कः). G_{2} कृत. (for किल). — (L 251) T_{2} $G_{1\ 4\ 5}$ प्रकामं (for °शं) — (L 252) V_{1} किल स (by transp.) D_{5} मानद (for नारद). — (L 253) $D_{2\ 5}$ अस्तौषीश् (for अश्रौषीश्) — (L. 254) D_{6} T_{1} M_{4} ते यत्सा ; $T_{2\ 3}$ $G_{1,\ 4}$ ते भार्या (for तावत्सा). T_{4} G_{3} स्तोतव्यो यदि तावत्स (for ^{a}). — (L 255) D_{3} मादृशो (for दुर्भगो) D_{3} -शंसित ; $T_{2,\ 3}$ $G_{1,\ 3-5}$ M_{4} -वन्दित. (for -शब्दितः). K_{1} किमर्थं शब्दितस्त्वया (for ^{b}). — (L 256) $\tilde{N}_{1\ 2}$ $V_{2\ 3}$ B_{1} D_{3} D_{6} T_{1-3} $G_{1\ 3-5}$ M_{4} प्रणयं परमं ($\tilde{N}_{2}$ V_{3} B_{1} D_{6} तु परं) दत्त्वा , G_{2} प्रणयं स्वजने कृत्वा (for ^{a}) D_{6} परो (for प्रभो). K_{3} V_{3} $T_{2,\ 3}$ $G_{4,\ 5}$ पश्चात्तापपरो यदि (for ^{b}). — (L. 257) Dn_{2} प्रयच्छ त्वं (for °च्छस्व) $\tilde{N}_{2}$ $B_{1\ 3}$ Dn D_{3} $D_{3\ 5\ 6}$ T_{3} चर्तुं (for कर्तुं) — (L 258) $\tilde{N}_{1}$ स्वप्नेऽपि नैव तद्दृष्टा ; $\tilde{N}_{2}$ V_{1} B_{1} $D_{5\ 6}$ स्वप्नेऽपि नैतद्दृष्टाहं , D_{2} स्वप्नेऽपि नान्तरं दृष्टा, D_{6} (marg) $T_{2\ 3}$ $G_{1\ 3\ 5}$ M_{4} स्नेहेनाहं न दृष्टापि ; T_{1} स्वप्नं- नाहं न दृष्टापि (for ^{a}) D_{5} सद्दध्यां (for श्रद्दध्यां) — D_{3} om. lines 260–261 — (L 260) $\tilde{N}_{1}$ B_{2} D_{3} D_{5} G_{2} कामं कामोस्तु तस्यैव (for ^{a}) — (L. 262) K_{4} मानार्थं जीवते लोक. (for ^{a}) K_{4} D_{5} सद्भिरित्युक्तमेव हि ; D_{3} °त्युच्यते सदा (for ^{b}) — (L 263) D_{3} तेनाहमेव नेच्छामि (for ^{a}) $V_{1\ 2}$ D_{2} T_{3} जीवितं (for °तुं) T_{2} जीवितं मानवर्जितम् (for ^{b}) — (L 264) K_{3} Dn पुरा (for मम) D_{4} राज्यं (for रक्षा) — (L 266) $T_{1\ 2}$ $G_{1\ 4\ 5}$ M_{4} भो (for हा). D_{4} कां गतिं (by transp) $\tilde{N}_{2}$ श्रयिष्यामि (for गमि°) V_{2} प्रभो (for विभो) — (L 267) $\tilde{N}_{2}$ B_{1} D_{3} D_{4} -गता (for -गतां) K_{3} कुमद्वती गता नूनं (for ^{a}). G_{4} यास्यति (for यास्यामि) $\tilde{N}_{1}$ [अ]सद्भवाम् , $\tilde{N}_{2}$ $D_{3\ 4}$ T_{3} G_{2} सगता ; M_{4} [अ]सगतम् (for °ता). — (L 268) V_{3} महा- (for अहं) T_{1-3} $G_{1\ 3-5}$ ईश्वरस्य (for °राणां). D_{3} ईश्वरेऽहं त्वयि प्रियं (for ^{b}) — (L. 269) T_{2} $G_{1\ 3\ 4}$ M_{4} जाता (for भूता) T_{3} वदाहं (for यदहं) — (L 270) T_{1-3} $G_{1\ 3-5}$ M_{4} -मारुतैश् (for -कुसुमैश्). — K_{2} om. line 271 — (L 271) D_{2} [अ]परा (for [अ]प्रिया). — (L. 272) G_{4} शुभम् (for शुचिम्). — (L 273) $\tilde{N}_{1}$ व्योमानिलं (for ना°) $\tilde{N}_{2}$ सहेयं (for सेवेयं) $\tilde{N}_{1}$ सुभगा (for दुर्भगा) — (L 274) D_{3} त्वयि गते (for तवाङ्कस्था). $V_{1\ 2}$ जलक्रीडान्तराङ्कस्था (for ^{a}). D_{3} देव कर्तुं ; $D_{5\ 6}$ कृत्वा देव (by transp) — (L 275) G_{2} कथं दौर्भाग्यसंपन्ना (for ^{a}) $T_{2\ 3}$ $G_{1\ 4\ 5}$ M_{4} प्रिय (for अपि) T_{1} G_{3} पश्येम प्रिय सं(G_{3} °सा)गरम् (for ^{b}). — (L 276) K_{1} V_{2} त्वत्तो नास्तीति यद्धि मां (for ^{b}) — (L 277) V_{3} क्वचिद्यातम् ; D_{2} क्व तथ्यं तद् ; T_{2-4} G_{4} M_{4} कृतघ्नस्त्वं (M_{4}

कथं दौर्भाग्यमापन्ना पश्येयमपि सागरम् ॥
सात्राजिति प्रिया नान्या त्वत्तो मेऽस्तीति विद्धि माम् ।
त्वमवोचः क तद्यातमथ वा कः स्मरिष्यति ॥
यदद्राक्षीद्धि मां श्वश्रूर्बहुमानेन नन्दिनीम् ।
अवज्ञाता त्वया राज्ञी नूनं दौर्भाग्यकीर्तिता ॥
किं तु गूढेन मे प्रेम्णा सुस्निग्धेनापि मानद ।
यत्समानां जनैर्देवो मां न पश्यति नित्यदा ॥
नाहं त्वां कितवं धूर्तमज्ञासिषमरिंदम ।
अद्य ज्ञातोऽसि तत्पक्षश्चञ्चलो जनवञ्चकः ॥
स्वरवर्णेङ्गिताकारैर्निगूढो देव यत्नतः ।
चोर ज्ञातोऽसि तत्पक्षो वाङ्मात्रमधुरः शठः ॥
एवमीर्ष्यावशं प्राप्तां देवीं सात्राजितीं हरिः ।
अभिमानवती देवः सान्त्वपूर्वमथाब्रवीत् ॥
मैवं पद्मपलाशाक्षि ममेश्वरि वद प्रिये ।
किमत्र बहुनोक्तेन त्वदीयमवगच्छ माम् ॥
तत्पारिजातकुसुमं तस्या देवि ममाग्रतः ।
नारदो मत्प्रियं कुर्वन्मुनिरक्लिष्टकर्मकृत् ॥
दाक्षिण्यादनुरोधाच्च दत्तवान्नात्रसंशयः ।
प्रसीदैकापराधं मे मर्षयस्व शुचिस्मिते ॥
पारिजातस्य पुष्पाणि यदीच्छस्यतिकोपने ।
तदा दातास्मि सुश्रोणि सत्यमेतद्ब्रवीमि ते ॥
स्वर्गास्पदादानयित्वा पारिजातं द्रुमेश्वरम् ।
गृहे ते स्थापयिष्यामि यावत्कालं त्वमिच्छसि ॥
एवमुक्ता तु हरिणा प्रोवाच हरिवल्लभा ।
यद्येवं स द्रुमः शक्य इहानयितुमच्युत ॥
मन्युरेष प्रमृष्टो हि भवेद्बहुगुणो मम ।
सीमन्तिनीनां सर्वासामधिका स्यामधोक्षज ॥
तथास्तु प्रथमः कल्प इति तां मधुसूदनः ।
प्रोवाचाप्रतिमो देवो जगतः प्रभवोऽव्ययः ॥
तथेत्युक्तेऽथ कृष्णेन तुतोष समितिंजय ।
सत्यभामा सतामिष्टा कंसनाशनवल्लभा ॥
ततः स्नातो जगन्नाथः सर्वेशः सर्वभावनः ।

°श्चेद्) (for क तद्यातम्) T_1 $G_{1.3.5}$ यदवोचः कृतप्रस्त्वं (for ^{a}) D_3 मां (for वा). D_{s2} D_2 (*sup lin* as above) $_6$ M_4 करिष्यति (for स्म°) — For line 277, K_1 subst

10** मामुवाच भवांस्तथ्यं न नूनमिति चिन्तये ।

— (L 278) V_2 वर्धमानेन (for बहु°) — (L. 279) K_3 B_1 $D_{2.4}$ अवज्ञातां त्वया राज्ञीं ; $\tilde{N}_2$ V $B_{2.3}$ D_6 T $G_{1.3.5}$ °ज्ञातां त्वयाद्राक्षीन् (G_2 °साहं), M_4 °ज्ञातां स्वयं द्राक्षीन् (for ^{b}). K_3 $V_{2.3}$ D_2 कीर्तिताम् ; $\tilde{N}_{1.2}$ V_1 B $D_{5.6}$ $T_{1.4}$ G_{3-5} M_4 -कर्शिताम् , $T_{2.3}$ G_1 -दर्शिताम् ; G_2 -चेष्टितम् (for -कीर्तिता) — (L 280) K_4 T_1 G_3 किं तु (T_1 G_3 न) मूढेन मे प्रेम्णा , V_1 किं त्वगूढेन मे प्रेम्णा , D_3 किं नु स्तवेन ते प्रेम्णा (for ^{a}) D_3 (by corr on marg) धिग्देहेन , G_3 संसिद्धेन (for सुस्निग्धेन) $\tilde{N}_2$ कीर्तिता (for मानद) — (L 281) D_4 यत्स मां स्व- (for यत्समानां) $\tilde{N}_1$ यत्समानो जनो देवो (for ^{a}) $T_{1.3}$ $G_{3.4}$ M_4 पश्यसि (for °ति). — (L 282) B_3 (marg as above) हि (for [अ]हं) V_1 पूर्वम् , G_2 मूर्खम् (for धूर्तम्) — (L 283) K_3 तत्त्वेन ; $\tilde{N}_3$ तत्पक्षे , V_2 तत्प्रेक्ष ; V_3 मत्पक्ष , D_1 तत्पक्षं , G_2 प्रत्यक्षं (for तत्पक्षश्) V_1 B_1 चपलो (for चञ्चलो). K_3 बत (for जन-) — (L 284) T_2 $G_{1.4.5}$ स्वरवर्णेङ्गिताकारो (for ^{a}). V_3 निगूढेनैव यत्नत (for ^{b}) — (L 285) $K_{1.3}$ $\tilde{N}_1$ B_3 Dn $D_{1.4}$ $T_{2.4}$ G_1 M_4 तत्पक्ष , K_2 तत्त्वज्ञो ; D_3 सुव्यक्तो , D_6 यत्पक्षो (for तत्पक्षो) — (L 286) K_2 D_1 ईर्ष्या च सं- , D_6 ईर्ष्यावशां (for °वशं) — (L 287) B_3 T_4 देवीं (for देव·) V_1 T_3 साम- , V_2 शम- (for सान्त्व-). — Before line 288, K_3 ins श्रीकृष्ण — (L 288) T_{1-3} G_3 न (for मा) $T_{1.4}$ G_5 प्राणेश्वरि (for ममे°). — (L. 290) V_1 $B_{1.3}$ D_5 यत् (for तत्) — (L 291) B_3 T_{1-3} $G_{1.4.5}$ ऽदात्प्रियं , D_3 यत्प्रियं (for म°). K_3 D_4 कर्तुं (for कुर्वन्) $\tilde{N}_3$ -कर्मवित् (for °कृत) — (L 292) D_4 तत्तथा (for दत्तवान्) — (L 293) D_1 हर्षयस्व (for म°) — (L 294) T_4 M_4 पारिजातकपुष्पाणि (for ^{a}) V_3 D_4 च कोपने ; D_3 [अ]तिशोभने (for [अ]तिकोपने) K_2 यदिच्छसि च कोपने ; V_1 B_1 $D_{5.6}$ त्वं यदीच्छसि कोपने ; D_2 यदिच्छस्यतिशोभने (for ^{b}) — (L 295) D_4 प्रसीद मे (for ब्रवीमि ते) — (L. 296) K_2 स्वर्गादानयित्वा वै (submetric), $\tilde{N}_3$ V_1 $B_{1.2}$ $D_{5.6}$ स्वर्गादिहानयित्वा वा (for ^{a}) $K_{1.3.4}$ Dn Ds D_1 पारिजातद्रु(Dn Ds °तं द्रु)मं परम् (for ^{b}) — (L 297) T_1 तं (for ते) — Before line 299, K_3 ins सत्यभामा उवाच — (L 300) K_1 V_3 प्रनष्टो (for प्रमृष्टो) K $\tilde{N}_2$ V B Dn Ds D_{1-5} T_4 गुणं (for -गुणो) — (L. 303) T_2 G_1 प्रीतिमान् (for [अ]प्रतिमो). K_1 $\tilde{N}_{1.2}$ G_3 जगत प्रभवाव्यय ; T_3 $G_{4.5}$ °तः प्रथमोऽव्यय , G_2 °त प्रभुरव्यय· (for ^{b}).

चकारावश्यकं सर्वं सर्वकामप्रदः सताम् ॥
दध्यौ च नारदं देवः स्नातो देवमुनिं नृप ।
अभ्याजगाम स्नानान्ते मुनिश्रेष्ठो महोदधौ ॥
तमागतं नरपते सतां गतिरधोक्षजः ।
सत्यया सह धर्मात्मा यथाविधिमपूजयत् ॥
पादौ प्रक्षालयांचक्रे मुनेः सात्राजिती स्वयम् ।
जलं देवः स्वयं कृष्णो भृङ्गारेण ददौ तदा ॥
अथोपकल्पयामास सुखासीनाय केशवः ।
परमान्नं स मुनये प्रयतात्मा जगद्गुरुः ॥
तल्लोककर्त्रा सत्कृत्य दत्तं मुनिरुदारधीः ।
बुभुजे वदतां श्रेष्ठः श्रद्धया परयान्वितः ॥
उपस्पृश्य ततस्तृप्तः प्रददौ चाशिषः प्रभोः ।
ताश्च प्रीतेन मनसा प्रतिजग्राह केशवः ॥
ततः सात्राजिती देवीं प्रणतां नारदोऽब्रवीत् ।
प्रसार्य दक्षिणं हस्तं सजलं जलजेक्षणाम् ॥
यथेदानीं तथैव त्वं भव देवि पतिव्रता ।
सविशेषं च सुभगा भव त्वं तपसो बलात् ॥
इत्युक्ता मुनिमुख्येन सत्यभामा हरिप्रिया ।
उत्तस्थौ महता युक्ता हर्षेण तु नराधिप ॥
स कृष्णोऽप्यभ्यनुज्ञां तु लब्ध्वा मुनिवरात्तदा ।
बुभुजे विघसं धीमानप्रमेयपराक्रमः ॥
ततस्त्वावश्यकं कृत्वा सत्यभामापि भारत ।
अनुज्ञया तदा भर्तुर्विवेशान्तर्गृहं मुदा ॥
ततो विनिर्गता देवी कृष्णस्यैवाभ्यनुज्ञया ।
स्थिता पार्श्वे च कृष्णस्य नमस्कृत्वा महात्मने ॥
ततो मुहूर्तमासित्वा नारदः कृष्णमब्रवीत् ।
आपृच्छे त्वां गमिष्यामि शक्रलोकमधोक्षज ॥
तत्राद्य देवामीशानं नमस्कृत्य महेश्वरम् ।
गास्यन्ति देवगन्धर्वास्तथैवाप्सरसां वराः ॥
मासि मास्युचितं ह्येतन्महेन्द्रसदने विभो ।
पूजार्थं देवदेवस्य गान्धर्वं नृत्यमेव च ॥
अन्तर्हितो देवदेवः सोमः सप्रवरो विभुः ।

— Before line 304, some Mss ins वैशंपायन —(L. 304) K_2 B_2 D_2 [उ]क्त्वा (for [उ]क्ते) K_2 B_2 D_4 G_2 तुतोष जनमेजय (for ^{b}) —(L 305) D_3 सती रुष्टा (for सतामिष्टा) —(L 306) $\tilde{N}_{1\ 2}$ V_1 $B_{1\ 3}$ $D_{5\ 6}$ सर्वात्मा, D_1 सर्वीर्यः, T_{1-3} $G_{1,\ 3-5}$ M_4 सर्वग (for सर्वेशः) —(L 307) D_6 (marg) $T_{2\ 3}$ $G_{1,\ 3-5}$ M_4 कर्म (for सर्वं) T_3 -प्रदं (for -प्रदः) —(L 308) K_2 $\tilde{N}_2$ V_2 $B_{1\ 3}$ $D_{5\ 6}$ ध्यातो (for स्नातो). K_{2-4} $\tilde{N}_{1,\ 2}$ $V_{1\ 2}$ B Dn Ds $D_{1\ 4-6}$ T $G_{1-3,\ 5}$ M_4 देवमुनिर् (for °मुनिं) —(L. 309) $\tilde{N}_1$ स्नात्वा स; $\tilde{N}_2$ V_1 $B_{2\ 3}$ $D_{2\ 5\ 6}$ स स्नात्वा, V_3 सुस्नातो, T_{1-3} $G_{1\ 3\ 5}$ M_4 स्नात्वा तु (for स्नानान्ते). G_2 महातपाः (for महोदधौ). —(L 311) K_1 Dn Ds D_3 $T_{1\ 4}$ G_6 M_4 यथाविधि (for °विधिम्) K_3 पूजयेत्तं यथाविधि, K_4 यथाविधिः पूजयन्, D_2 स यथाविध्यपूजयत्, $T_{2\ 3}$ G_1 यथाविध्यभ्यपूजयत्, G_3 °विधि चापूजयत् (for ^{b}) —(L 315) $\tilde{N}_2$ परमात्मा, D_2 स पूतात्मा (for प्रय°) —(L 316) $\tilde{N}_2$ -भर्त्रा (for कर्त्रा) —(L 317) D_4 G_4 युत (for [अ]न्वित) K_4 श्रिया परमयान्वित (for ^{b}) —(L 318) K T_1 अप स्पृश्य, D_6 उपश्रुत्य (for °स्पृश्य) K_4 तत्र (for तृप्त) $\tilde{N}_1$ D_6 (marg as above) $_6$ प्रयुयोजाशिष प्रभो, T_2 $G_{1\ 4\ 5}$ प्रददौ चाशिषं प्रभो (for ^{b}) G_3 om lines 319^b–322^a —(L 321) D_4 G_2 M_4 जलजेक्षणः (for °णाम्) —(L. 322) D_3 (before corr. as above) यथेन्द्राणी (for °दानीं) —(L 323) $\tilde{N}_{1\ 2}$ V B Dn Ds D_6 $T_{1\ 4}$ G_2 मत्तपसो, $D_{2\ 3}$ मे त° (for त्वं त°). K_4 भव त्व कृष्णवल्लभे (for ^{b}) —(L 325) K D_1 (marg) T_3 मुनिना (for महता) —(L 326) K_1 अथ कृष्णोऽभ्यनुज्ञां तु, $\tilde{N}_{1\ 2}$ V_1 B $D_{2,\ 6}$ कृष्णोऽभ्यनुज्ञां कौरव्य, D_3 स कृष्णोऽथाभ्यनुज्ञातो (for ^{a}). —(L 327) $\tilde{N}_1$ V_2 $B_{1\ 3}$ $D_{5\ 6}$ पायसं (for विघसं). $D_{2\ 3}$ श्रीमान् (for धी°). V_1 बुभुजे पायसं श्रीमान्, $T_{2\ 3}$ $G_{1\ 4\ 5}$ M_4 °जे विघसान्नं तद् (for ^{a}). —(L. 328) $K_{3\ 4}$ T_3 नारद, D_2 भामिनी (for भारत.) —(L 329) B_3 अनुज्ञाप्य; G_2 °ज्ञाता (for °ज्ञया). T_2 $G_{1\ 4}$ [अ]पि सा, G_3 [अ]थ सा (for तदा) T_1 G_3 [अ]न्तःपुरं (for [अ]न्तर्गृहं) K_1 V_3 G_5 तदा (for मुदा). V $T_{2\ 3}$ $G_{1\ 4}$ M_4 विवेशान्त पुरं तदा (for ^{b}) —(L 330) K_1 विसर्जिता, D_2 सत्राजिती (for विनिर्गता); K_3 ततो विनिर्गतां देवीं (for ^{a}). —(L 331) K_2 स्थितां (for स्थिता) $\tilde{N}_2$ D_5 G_2 नमस्कृत्य (for °त्वा). B_1 (marg) महामुनिम्, T_4 °त्मन (for °त्मने) D_3 नमस्कृत्य महामुनेः (for ^{b}) —(L. 333) $\tilde{N}_{1\ 2}$ V_1 B_1 D_6 आमन्त्र्य (for आपृच्छे) D_3 अरिंदम (for अधोक्षज) —(L. 334) $\tilde{N}_1$ $B_{1\ 3}$ पुरस्कृत्य, D_2 T_2 $G_{1\ 2}$ नमस्कृत्या (for °स्कृत्य). — $\tilde{N}_2$ om line 335. —(L 335) K_1 देवं (for देव-). $\tilde{N}_1$ [अ]प्सरसो (for °सां). $K_{3,\ 4}$ B Dn $D_{1,\ 4\ 6}$ गणाः (for

पश्यत्यमरमुख्येन कृतं भक्त्याद्रिघातिना ॥
निमन्त्रितोऽहं पूर्वेद्युः पुष्पं दातुं महाद्युते ।
पारिजातस्य भद्रं ते तरुराज्ञो महात्मनः ॥
यदेतदाहृतं स्वर्गात्तत्त्वदर्थं मया विभो ।
देवोपभोग्यमेतद्धि तरुराजसमुद्भवम् ॥
इष्टः स वृक्षः सततं शच्याः पुष्करलोचन ।
सौभाग्यमावहत्येव पूज्यमानोऽपि नित्यशः ॥
पुण्यं कर्तुं तदा सृष्टः पारिजातो महाद्रुमः ।
अदित्या धर्मनित्येन कश्यपेन महात्मना ॥
पुरादित्या महातेजास्तोषितः किल कश्यपः ।
वरेण च्छन्दयामास मारीचस्तपसो निधिः ॥
सोवाच सुभगा येन भवेयं मुनिसत्तम ।
स्वलंकृता कामतश्च सर्वैरेव विभूषणैः ॥
ईप्सितं गीतनृत्यं च भवेन्मम तपोधन ।
कुमारी नित्यदा चैव भवेयं तपसां निधे ॥
विरजाः शोकरहिता भवेयमपि नित्यदा ।
पतिभक्तिमती चैव धर्मशीला तथैव च ॥
पारिजातं ततोऽस्राक्षीददित्याः प्रियकाम्यया ।
सर्वकामप्रदैः पुष्पैरावृतं दिव्यगन्धदैः ॥
त्रिशाखं सर्वदा दृश्यं सर्वभूतमनोहरम् ।
सर्वपुष्पाणि दृश्यन्ते तस्मिन्नेव महाद्रुमे ॥
ईदृशान्यस्य पुष्पाणि बिभर्त्येकातिरूपिणी ।
बहुरूपाणि चाप्यन्या पद्मानि च तथापरा ॥
मन्दारादपि वृक्षाच्च सारमुद्धृत्य कश्यपः ।
तस्मादेष तरुश्रेष्ठः सर्वेषां श्रेष्ठतां गतः ॥
ततस्तत्र निबध्याथ कश्यपं प्रददौ शुभा ।
अदितिर्मम पुण्यार्थं सौभाग्यार्थं तथैव च ॥
निष्क्रयेण मया मुक्तः कश्यपस्तु तपोधनः ।
इन्द्रो दत्तस्तथेन्द्राण्या सौभाग्यार्थं ततो मम ॥
सोमश्चाप्यथ रोहिण्या ऋद्ध्या च धनदस्तथा ।
एवं सौभाग्यदो वृक्षः पारिजातो न संशयः ॥
पारिजातो विष्णुपत्न्याः पारिजातेति शब्दितः ।

वराः) — (L 336) D_4 Bom ed माहेन्द्र- (for म°) D_3 भवने (for -सदने) — (L 337) B_2 देवराजस्य (for °देवस्य) V_2 क्रियते (for गान्धर्वं) K_1 गन्धर्वैर्नृत्तमेव च (for ^{b}) — (L 338) K_3 सपार्षदो (for सप्रवरो) K_4 V_3 हरि- (for विभु-) — (L 339) D_3 -राजेन (for -मुख्येन) D_{2-4} M_4 [अ]रि- (for [अ]द्रि-) D_3 कृत शक्त्या-रिघातिना (for ^{b}) — (L 340) $K_{1\ 3}$ $\tilde{N}_1$ V_3 D_{1-3} $T_{1\ 4}$ G_5 दत्तं, $V_{1\ 2}$ B_2 Dn D_5 दत्त्वा (for दातुं) $\tilde{N}_2$ महामते (for °द्युते) — (L 341) V_1 वृक्ष- (for तरु-) — (L 342) $\tilde{N}_1$ D_2 त्वदर्थं (D_2 °र्थे) भो , $\tilde{N}_2$ B_2 D_5 D_6 T_1 G_3 त्वदर्थं तु , V_1 तवार्थं च , $B_{1\ 3}$ D_6 तवार्थं भो (for तत्त्वदर्थं). V_2 त्वदर्थं भो मया प्रभो (for ^{b}) — (L 343) $K_{1\ 3\ 4}$ V_3 B_3 (marg) D_5 D_1 -समुद्गतम् (for °द्भवम्) — (L 344) D_4 पङ्कज- (for पुष्कर-) — For line 345, T_{1-3} $G_{1,\ 3-5}$ M_4 subst .

11** सौभाग्यार्थं तवैवाहं पुष्पमाहृतवांस्ततः ।

— (L 346) K_1 यदा सृष्ट- , T_{1-3} $G_{1,\ 3-5}$ समादिष्ट. (for तदा सृष्टः) — (L 348) B_3 D_6 महातेजाः पुरादित्या (for ^{a}) D_3 प्रार्थित (for तोषित) — (L 349) K_2 कश्यपो , V_1 D_{1-5} T $G_{1,\ 2\ 4\ 5}$ तपसां (for °सो) D_3 बलात् (for निधि) — (L 351) V_1 D_3 अलंकृता (for स्व°) D_{3} रत्न- , $T_{2\ 3}$ $G_{1\ 4}$ अपि (for एव) — (L 352) V_3 गन्ध-नृत्यं , B_2 D_3 T_3 नृत्यगीतं , $T_{1\ 2\ 4}$ $G_{3\ 4}$ गीतनृत्तं , $G_{1\ 5}$ नृत्तगीतं (for गीतनृत्यं) — (L 353) K_2 D_4 $T_{2\ 3}$ G_{1-4} M_4 भवेयं तव संनिधौ (for ^{b}) — (L 354) D_6 विजरा , T_4 विरुजा (for विरजा) — (L 356) G_2 साक्षाद् (for ऽस्राक्षीद्) — (L 357) T_4 Bom Poona Cal eds G(ed) नित्य (for दिव्य-) K_2 गन्धजैः , B_3 °कैः , D_6 T_{1-3} $G_{1\ 3-5}$ M_4 -गन्धिभिः (for गन्धदैः) — (L 360) $T_{2\ 3}$ $G_{1\ 3-5}$ रूपाणि (for पुष्पाणि) V_1 D_4 ईदृशान्येव (D_4 °न्यति) रूपाणि , M_4 °शान्यन्यरूपाणि (for ^{a}) — (L 361) $\tilde{N}_2$ $B_{1,\ 2}$ D_6 -वर्णानि (for -रूपाणि) V_1 $D_{2\ 3}$ [अ]न्यानि ; D_1 [अ]प्येतत् (for [अ]प्यन्या) D_3 बिभर्ति च तथापरम् (for ^{b}) — (L 362) T_{1-3} $G_{1\ 3-5}$ M_4 मन्दा(G_5 °न्द)राणां तु वृक्षाणां (G_4 °क्ष)(for ^{a}) — (L 363) G_2 देव (for [ए]ष) V_1 D_6 ज्येष्ठतां (for श्रेष्ठतां) — After line 363, T_{1-3} $G_{1\ 3-5}$ M_4 ins

12** अदित्यै प्रददौ श्रीमान्पारिजातं महाद्रुमम् ।

— (L 364) V_3 निवेश्य (for निबध्य). $K_{1\ 3}$ V_3 Dn $D_{1\ 5}$ T $G_{1\ 3-5}$ शुभे (for शुभा) — (L 365) K_3 ततो मम (for तथैव च) — After line 365, Bom Poona eds G(ed) ins

13** अदित्या कश्यपो दत्तः पुण्यार्थं च ततो मम ।
पुष्पदाम्ना वेष्टयित्वा कण्ठे पुण्यार्थमात्मवान् ॥

मन्दारपुष्पैर्युक्तो मन्दारस्तेन कथ्यते ॥
कोऽप्ययं दारुरित्याहुरजानन्तो यतो जनाः ।
कोविदार इति ख्यातः संततः स महातरुः ॥
मन्दारः कोविदारश्च पारिजातश्च नामभिः ।
स वृक्षो ज्ञायते दिव्यो यस्यैतत्कुसुमोत्तमम् ॥

Colophon

वैशंपायन उवाच ।

ततो जिगमिषुं तत्र नारदं मुनिसत्तमम् ।
प्रोवाच भगवान्विष्णुरप्रमेयपराक्रमः ॥
महर्षे धर्मतत्त्वज्ञ स्वर्गं गत्वा त्वयानघ ।
दृष्ट्वा सदस्यान्देवस्य त्रिपुरघ्नस्य धीमतः ॥
अनुज्ञया मद्वचनाद्विज्ञाप्यः पाकशासनः ।
संवर्णयित्वा भ्रातृत्वं पौराणं वेत्सि यन्मुने ॥
यदस्राक्षीन्मुनिश्रेष्ठो भगवान्कश्यपस्तरुम् ।
पारिजातं पुरादित्याः प्रियार्थं धर्मवित्तम ॥
स पुण्यमतिसौभाग्यं ददाति तरुसत्तमः ।
तव दत्तं पुरा दानं व्रते च तरुसत्तमम् ॥
देवीभिर्धर्मनित्याभिर्धर्मार्थममरोत्तम ।
दत्तं श्रुत्वाभिकाङ्क्षन्ति दातुं पत्न्यो मम प्रभो ॥
पुण्यार्थं दानधर्मार्थं मम प्रीत्यर्थमेव च ।
आनाय्य च द्वारवतीं पारिजातं महातरुम् ॥
दत्ते दाने पुनः स्वर्गं तत्र तं नाययिष्यसि ।
स वाच्य एवं भगवान्बलभिद्भगवंस्त्वया ॥

— (L 366) K_2 स (for तु) — (L 367) D_2 ममानया (for ततो मम) — (L 368) T_1 पुलोम्या (for ऋद्ध्या च) — (L 370) $T_{2\ 3}$ $G_{1\ 4\ 5}$ विष्णुपद्या, M_4 °पत्न्या (for °पद्या·) $\tilde{N}_2$ विश्रुत (for शब्दित·) — (L 371) D_3 युक्तोऽयं; D_4 यस्मिन्को (for यद्युक्तो) D_3 चोच्यते (for कथ्यते) — (L 372) D_3 [ए]वं (for [आ]हुर्) V_1 जानन्तोऽपि, D_3 प्राहुरेनं (for अजानन्तो) D_2 यतो नरा, T_4 महाजना· (for यतो जना) — (L 373) K_1 D_3 तत स तु, K_2 $\tilde{N}_2$ V_1 B_3 D_4 तत्त्वत· स, K_3 $\tilde{N}_1$ V_2 $B_{1\ 2}$ Dn Ds $D_{1\ 5\ 6}$ T_1 G_2 तत. स सु·, V_3 ततश्च सु·; D_2 तत· सत्सु, T_4 ततस्तु सु· (for संतत· स) K_4 तत स समुदाहृतः (for ^{b}) — (L. 375) T_2 G_4 तत् (for [ए]तत्) D_3 पुष्पित कुसुमोत्तम (for ^{b})

Colophon — *Mention of the Epic* · K_3 Ds_2 T_3 — *Mention of Khila* $K_{3\ 4}$ $\tilde{N}_{1\ 2}$ V B Dn_2 Ds D_1 — *Adhy name* K $\tilde{N}_1$ V B Dn Ds $D_{1\ 2\ 4-6}$ $T_{1\ 2\ 4}$ $G_{1\ 4}$ पारिजात($T_{2\ 4}$ G_1 °जातप)हरणम्, D_3 पारिजातहरणे नारदवाक्यम्. — *Adhy no* K_3 (marg) 121, $\tilde{N}_1$ 123, V_1 127, V_2 B_2 126, V_3 125, Dn Ds_2 D_4 122, D_1 119, T_1 $G_{3\ 4}$ M_4 136, T_2 G_1 138, T_3 145, T_4 129, G_2 128, G_5 139

(L 377) D_3 उवाच (for प्रो°) — (L 378) T_{1-3} $G_{1\ 3-5}$ M_4 महर्षे सर्वधर्मज्ञ (for ^{a}) D_3 स्वर्गं गच्छ त्वनिन्दित (for ^{b}) — (L 379) D_6 सदसि, T_4 °स्यं (for °स्यान्) D_2 देवर्षे (for °स्य) D_3 दृष्ट्वा सदस्तु देवर्षे (for ^{a}) — (L. 380) K_3 D_{3-5} ममाज्ञया, $\tilde{N}_{1\ 2}$ V B Dn Ds T_4 अना°, D_6 तदा°, T_1 अनुज्ञातुं, G_3 °ज्ञाय (for °ज्ञया) $K_{1\ 4}$ ममाज्ञया स भवता (for ^{a}). — (L 381) K_4 संवर्णयामि त्वां चाह; D_1 T_4 संभावयित्वा भ्रातृत्वं (for ^{a}) — (L 382) Dn Ds $D_{2-4\ 6}$ T G M_4 यम् (for यद्) K_2 तु तम् (for तरुम्). — (L 383) $K_{1\ 4}$ $\tilde{N}_2$ धर्मसत्तम·; $K_{2\ 3}$ $\tilde{N}_1$ B_1 Dn Ds D_{2-4} G_2 °वित्तम·, $B_{2.\ 3}$ $D_{5\ 6}$ $T_{3\ 4}$ M_4 °भृत्तमः (for °वित्तम) D_1 $T_{1\ 2}$ $G_{1\ 3-5}$ सुखार्थं धर्मभृ(T_1 °वि)त्तम· (for ^{b}) — B_3 om line 384 — (L 384) $T_{1\ 2}$ $G_{1\ 3}$ ददाति तरुरुत्तम (for ^{b}) — D_1 T_2 G_1 om (hapl) line 385 — (L 385) $\tilde{N}_2$ $B_{1\ 3}$ D_5 तत्र दत्तं, T_1 $G_{3\ 4}$ M_4 तवाकृत (for तव दत्तं). T_3 तवाकृत पुरा तेन (for ^{a}) K_4 V_1 D_2 G_2 व्रतं (for व्रते) K_1 $\tilde{N}_2$ $V_{2\ 3}$ $B_{1\ 2}$ $D_{5\ 6}$ व्रतं च तरुसत्तमे, $\tilde{N}_1$ B_3 G_5 व्रतेन तरुमुत्तमम्, $T_{1\ 4}$ संप्राप्ते (T_4 वृतेन) तरुसत्तम; T_3 $G_{3\ 4}$ M_4 प्राक्तेन तरुसत्तमम् (for ^{b}) — (L 386) D_1 ·निष्ठाभिर् (for ·नित्या°) B_2 देवीधर्मार्थनित्याभिर्, D_2 देवीभिर्नित्यविधा° (for ^{a}) D_6 T_4 अमरोपम, T_{1-3} $G_{1,\ 3-5}$ M_4 अमराधिप (for °रोत्तम). — (L 387) G_2 पत्नी (for पत्न्यो) — (L 388) K_2 पुण्यार्थं धर्मदानार्थं (for ^{a}). —(L 389) K $\tilde{N}_1$ $V_{1\ 2}$ B Dn Ds $D_{4\ 5}$ G_2 आनाययद्; $\tilde{N}_2$ °ययस्व, V_3 D_6 आनीय यद्; D_3 T_1 G_3 आनीय त (for आनाय्य च). D_1 आनीय द्वारकां चैव; D_2 आनीय द्वारवतीं च (for ^{a}) K_2 $\tilde{N}_{1\ 2}$ V_2 B_3 Dn Ds D_{2-6} T G M_4 महाद्रुमम् (for °तरुम्) — (L 390) K_1 $\tilde{N}_1$ V_2 $B_{1\ 3}$ D_5 T_4 तरु तं, $\tilde{N}_2$ तरु ते, V_1 तं तरु, B_2 तरुं त्वं (for तत्र तं). K_{2-4} $D_{3\ 4}$ तरु तं प्रा(D_3 स्था)पयिष्यसि, V_3 D_3 तरु त्वं प्राप°, D_1 तरु त्वं नेतुमर्हसि; T_{1-3} $G_{1\ 3-5}$ M_4 तरु तं ता(T_1 धा)रयिष्यसि, G_2 तरुं तं प्रापयस्व मे (for ^{b}) — (L 391) $K_{2\ 3}$ $\tilde{N}_{1\ 2}$ V B Dn Ds D_{3-6} T_{1-3} $G_{1,\ 2\ 4\ 5}$ M_4 प्र· (for स) K_1 एवं वाच्य स भगवान् (for ^{a}) — (L 392) K_3 प्रयत्नेन; G_4 प्रयुक्तश्च (for प्रयत्नश्च). $K_{1,\ 3,\ 4}$ V_3 D_1 कार्योऽपि (K_1 °र्योऽयं) मुनिसत्तम;

तथा तथा प्रयत्नश्च कार्यो मुनिवर त्वया ।
यथा तरुवरं दद्यात्पारिजातं सुरेश्वरः ॥
तत्र दूतगुणं तावत्पश्यामस्ते तपोधन ।
संभाव्या सर्वकृत्यानां संपद्धि त्वयि मे मता ॥
एवं नारायणेनोक्तो नारदो भगवानृषिः ।
प्रहस्योवाच केशिघ्नमिदं वाक्यं तपोधनः ॥
बाढमेवं प्रवक्ष्यामि यदुमुख्य सुरेश्वरम् ।
न तु दास्यति देवेन्द्रः पारिजातं कथंचन ॥
मन्दरं पर्वतश्रेष्ठ दानवैस्त्रिदशैस्तथा ।
निक्षिप्य तोयधौ पूर्वं पारिजातः समाहृतः ॥
मन्दरं पर्वतश्रेष्ठं नयितुं प्रेषितः पुरा ।
पारिजातं हरेणापि लोककर्त्रा जनार्दन ॥
स्वयं विज्ञापितो गत्वा ततः शक्रेण शंकरः ।
आक्रीडद्रुम उद्याने शच्याः स्यादिति याचितः ॥
तथास्त्विति वरो दत्तो महादेवेन चानघ ।
न च नीतः पारिजातो मन्दरं चित्रकन्दरम् ॥
क्रीडावृक्षः स शच्येति व्यपदेशेन मोक्षितः ।
महेन्द्रेण महाबाहो पारिजातस्तरुः पुरा ॥
प्रियार्थमुमयास्राक्षीत्पारिजातवनं हरः ।
गव्यूतिमात्रविस्तीर्णं मन्दरस्यैककन्दरे ॥
न तत्र सूर्यभाः कृष्णः प्रविशन्ति नगोत्तमे ।
न च चन्द्रप्रभाः शीता नैव कृष्ण सदागतिः ॥
शीतोष्णे छन्दतस्तत्र शैलपुत्र्या भवन्ति हि ।
स्वयंप्रभं वनं तद्धि महादेवस्य तेजसा ॥
वर्जयित्वा महादेवं सगणं यदुवर्धन ।
मां चान्यस्तद्वनं दिव्यं न प्रयाति कथंचन ॥
स्रवन्ति तत्र वार्ष्णेय पारिजाताः समन्ततः ।
सर्वरत्नानि मुख्यानि मनसा काङ्क्षितानि वै ॥
गणास्तान्युपभुञ्जन्ति प्रवराणां महात्मनाम् ।
आज्ञया देवदेवस्य लोकनाथस्य केशव ॥

Bom Poona eds G(ed) कार्योऽस्मिन्मुनिसत्तम (for ^{b}) — (L 393) V_1 $B_{2\,3}$ D_6 यथा तरुं (for तरुवरं) — (L 394) V_2 अत्र दूत-, D_8 तत्तु दूते, T_1 तत्तद्दूत- (for तत्र दूत-) K_1 V_1 $B_{2\,3}$ $D_{2\,4\,6}$ -गुणांस्, $K_{2\,3}$ B_3 D_1 M_4 -गणांस् (for गुणं) — G_2 om (hapl) lines 395–397 — (L 395) K_4 समाधिस्, D_6 सम्यग्धीस् (for संपद्धि) K_2 संपदस्त्वयि मे मता, K_4 सम्यक्त्वं त्वयि मे मतम्, T_{1-3} $G_{1\,3-5}$ सम्यक्त्वमस्ति मे मत (T_3 °ति) — Before line 396, Dn ins वैशंपायन — (L 396) K_4 भगवान्नारदो मुनि (for ^{b}) — (L 398) K_3 $\tilde{N}_1$ V_3 D_2 T_1 G_5 सुरेश्वर (for °श्वरम्) — (L 399) V_1 न प्रदास्यति गोविन्द (for ^{a}) — $G_{4\,5}$ repeat line 400 after 401 — (L. 400) B_3 पर्वतं (for °त-) $\tilde{N}_1$ D_3 om. (hapl) lines 401^{b}–402^{a}. — (L 401) D_2 वारिधौ (for तोयधौ) — (L 402) K_3 D_5 मन्दरे पर्वतश्रेष्ठे ; G_3 °रात्पर्वतश्रेष्ठान् (for ^{a}) K_4 नेतु सं-, T_1 नायकं, $T_{2\,3}$ $G_{1,\,4}$ नायितुं (for न°) $V_{1,\,2}$ B प्रेषितुं, G_4 पृष्ठतः (for प्रेषित.) D_3 नयितुं प्रेषिता. सुराः (for ^{b}) — (L 403) Dn G_2 पारिजातो (for °तं) V_2 भर्त्रा (for -कर्त्रा) — (L 404) K_4 ज्ञात्वा, G_5 देव (for गत्वा) D_6 $T_{3\,4}$ $G_{4\,5}$ M_4 तत्र (for तत). — (L 405) D_5 आक्रीडं (for °ड-) D_2 आक्रीडश्च समोद्याने (for ^{a}) T_4 G_2 योजित- (for याचित-) $\tilde{N}_1$ शच्या इति प्रयाचित (for ^{b}) — (L 407) D_2 नासौ नीतः, T_{1-3} $G_{1,\,4\,5}$ तेनानीतः (for न च नीत) T_3 मन्दराच् (for °रं). T_1 G_3 चित्रकन्दरात् (for °रम्). T_2 $G_{1\,4\,5}$ मन्दराच्चित्रकन्दरात् (for ^{b}) — (L 408) $T_{2\,3}$ $G_{1\,3-5}$ M_4 शच्यास्तु (for शच्येति) V_3 मोचित, T_4 वै स्थित (for मोक्षित) — (L 409) Dn_2 ततः पुनः (for तरु पुरा). — (L 410) K_1 B_2 Dn_1 $T_{1\,2}$ $G_{1,\,4\,5}$ साक्षात् (for [अ]स्राक्षीत्) K_2 उमाप्रियार्थमस्राक्षित् (for ^{a}) T_3 पुर (for हर) — (L 411) $V_{1\,2}$ B_2 $G_{2\,3}$ शत- (for -मात्र-) $K_{1\,4}$ $\tilde{N}_1$ V_3 B_1 D_8 $D_{1\,2}$ गव्यूतिम(V_3° मि)तिविस्तीर्णं (D_1 °र्णे) (for ^{a}) $\tilde{N}_1$ D_1 मन्दरस्यैव कन्दरम् (D_1 °र) (for ^{b}) — (L 412) T_4 नक्षत्र- (for न तत्र) $K_{1\,4}$ $V_{1\,2}$ B_3 D_2 T G M_4 नगोत्तमम्, K_2 D_3 नरोत्तम, D_6 (marg as above) वनोत्तमे (for नगो°) — (L 413) V_1 B_1 D_6 न चन्द्रस्य प्रभा शीता (for ^{a}). — (L 414) V_2 D_1 G_5 M_4 शीतोष्णं (for °ष्णे) V_1 छन्दशस् (for °तस्). T_{1-3} G M_4 भवत्विति (for °न्ति हि) — (L 415) K_2 स्वप्रकाश-, $\tilde{N}_2$ $G_{2\,3}$ स्वयंप्रभ-, D_1 स्वयंभवं (for °प्रभं) — (L 416) $K_{2\,3}$ $\tilde{N}_1$ Dn T_4 महादेवौ (for °वं) $K_{2\,3}$ $\tilde{N}_1$ Dn सगणौ (for °णं) B_1 D_8 D_{2-5} T_{1-3} G M_4 -नन्दन (for -वर्धन). V_2 T_4 सगणौ यदुनन्दन (for ^{b}) — (L 417) B_3 मदन्यस्तद्, D_2 न चा°, D नान्यस्तच्च (for मा चान्यस्तद्) D_2 रम्यं (for दिव्यं) D_3 T_2 G_1 सं- (for न) D_2 संप्रयाति कदाचन (for ^{b}) — (L 418) V_1 तत्र स्रवति वार्ष्णेय (for ^{a}) V_1 पारिजातः, T_1 °जातात् (for °जाता) K_1 सहस्रश (for समन्तत.). — (L 419) V_4 दिव्यानि ; T_{1-3} $G_{1\,3-5}$ रम्याणि (for मुख्यानि) T_3 काङ्क्षितेन (for °तानि) — (L 420)

पारिजाताद्बहुगुणं फलं तेषां तथा धनम् ।
अभिमानं प्रभा चैव गुणा भूरिगुणास्तथा ॥
मूर्तिमन्तश्च ते वृक्षाः सोमं देवं वृषध्वजम् ।
उपतिष्ठन्ति सततं प्रवरैः सह केशव ॥
रौद्रेण तेजसा जुष्टा हीना दुःखैः सुखान्विताः ।
तरवो मन्दरे ते हि दयिताः शैलकन्यया ॥
प्रविवेशान्धको नाम घोरस्तत्र महाबलः ।
दैतेयो वरदानेन दर्पितः पापनिश्चयः ।
स हतो देवदेवेन हरेणामित्रघातिना ।
अवध्यः सर्वभूतानां वृत्राद्दशगुणं बली ॥
एवं दुःखेन ते देव पारिजातं प्रदास्यति ।
पुष्कराक्ष सहस्राक्षः सत्यमेतद्ब्रवीमि ते ॥
सततं सहितो देव्या शच्या स हि वरद्रुमः ।
सर्वकामप्रदः कृष्ण तथेन्द्रस्यामितौजसः ॥

वासुदेव उवाच ।
मुने तद्युज्यते साधु महादेवेन धीमता ।
यच्छची कारणं कृत्वा न नीतः स तरुः पुरा ॥
स ज्येष्ठः सर्वभूतानां लोककृत्प्रभवोऽव्ययः ।
पारावर्यस्य सदृशं कृतवानिति मे मतिः ॥
अहं यवीयान्देवस्य सर्वथा बलघातिनः ।
लालनीयश्च भगवञ्जयन्त इव सत्तम ॥
सर्वथा भगवांस्तावदुपायैर्बहुविस्तरैः ।
करोतु यत्नं प्रीत्यर्थं शक्तो ह्यसि तपोधन ॥
मया मुने प्रतिज्ञातं पुण्यार्थं सत्यभामया ।
स्वर्गादिहानयिष्यामि पारिजातमिति प्रभो ॥
मया तदनृतं शक्यं कथं कर्तुं तपोधन ।
नानृतं हि वचो विप्र प्रोक्तपूर्वं मयानघ ।
मयि भग्नप्रतिज्ञे हि लोकानां संप्लवो भवेत् ॥

V2 -भुञ्जन्ते, T2-3 G1 4 5 M4 युञ्जन्ति (for -भुञ्जन्ति) D3 6 प्रमथानां, T2 G1 प्रवराणि (for °णा). — (L 422). K2 महाधनम्; Ñ1 2 V1 3 B Ds D5 6 G2 5 तथा वनम्; V2 तपोधन, D2 विशिष्यते (for तथा धनम्) — (L 423) Ñ1 महिमानं, D2 6 अभिमान., D3 अतिमानं (for अभि°) K2 अभिमानप्रभावौ च (for ᵃ). D4 बहुगुणास्, G3 5 M4 मणिग° (for भूरिगु°) T2 G1 4 गुणान्मणिगणास्तथा (for ᵇ) — (L. 425) K1 प्रवर; D3 6 (marg) G2 प्रमथैः (for प्रवरैः). — (L 426) K1 (*sup lin.* as above). 4 Ñ2 B3 T1-3 G3.4 युक्ता, K3 D4 5 (marg) पुष्टा, V3 हृष्टा, D5 रुष्टा (for जुष्टा) K1 3 4 Ñ2 V3 Dn D1 2 दुःखेनापि; T1 G3 M4 दुःखैर्हीनाः (by transp); T2 3 G1 5 दुःखहीना; T4 दुःखभीताः; G2 हीनदुःखा. G4 दुःखहीना सुदुःखिता (for ᵇ) — (L 427) K2 Ñ2 V2 B2 D2 4 T1 3 तर्पिता., G1. 4. 5 दर्पिता (for दयिताः) — (L 429) T1 तर्जितः, G4 तर्पित. (for द°) — (L 430) V2 महता (for स हतो). Ñ1 V1 B1 3 D6 हरेणामिततेजसा (for ᵇ). — (L 431) B3 D6 -देवानां (for भूतानां) D3 गुणो (for -गुण). — (L. 432) Dn T4 दुःखं न, G2 पृष्टेऽपि (for दुःखेन) Ñ1 देवः स (for ते देव) — (L 434) T1 G3 5 च (for स-) D1 स हित सततं देव्या, D4 सततं दयितो देव्याः (for ᵃ). V2 T1-3 G1 3-5 वरो द्रुम; D4 महातरुः (for वरद्रुम) — G4 om line 435 — (L 435) T4 [अ]मितौजसे (for °सः) K Ñ2 V3 Dn Ds D1-4 G2 तथेन्द्रायामितौजसे, Bom Poona eds G(ed) °न्द्राय महौजसे (for ᵇ)

— After line 435, D3 ins. an addl colophon, mentioning Khila, adhy name पारिजातहरणे नारदवाक्यम् and adhy no. 132 — Some Mss कृष्ण, some भगवान् (for वासुदेव) — (L 436) K3 तद्युज्यतां, Ñ1 ऽन्यताकृतं, V1 B D6 तेन कृतं, D5 यद्युज्यते (for त°) — (L 437) T2 G1 4 वर्णित (for न नीतः) — (L 438) K Ñ2 V2 B2 D1 5 T3 D2 प्रभवाव्यय., D4 °वोऽप्यय, M4 °वाप्यय (for °वोऽव्यय) — (L 439) D2 परं धैर्येण, D3 परधैर्येण; G1 परावरस्य (for पारावर्यस्य). B1 सततं (for सदृशं) V3 अपि (for इति). — (L 441) K4 पालनीयश् (for ला°) V3 सर्वथा (for सत्तम) K2 जयन्त इति सर्वश. (for ᵇ) — (L 442) M4 तात (for तावद्) V3 उपायैर्बहुभिः स्तवैः (for ᵇ) — (L 443) B1 स्थित्यर्थं (for प्री°). — (L 444) K2 पुण्यार्थे (for °र्थं) K1 4 सत्यायाः पुरतो वच. (for ᵇ) — (L 446) K4 वाक्यं; B3 D6 T G1 3-5 M4 कर्तुं (for शक्यं) B3 D6 T G1 3. 5 M4 शक्यं (for कर्तुं) — (L. 447) T G1 4. 5 M4 अनृतं (for ना°) K1 वदे (for वचो) D2 वाचा हि नानृतं विप्र (for ᵃ) Ñ1 2 V3 B1 3 Ds2 D3-5 प्रोक्तं पूर्वं; T1-3 G1 3 4 M4 नोक्तपूर्वं, G5 पूर्वं नोक्तं (for प्रोक्तपूर्वं) — (L 448) T2 3 G1 4 सशयो (for संप्लवो) — (L 449) K1. 3 B1 G3 लोकधर्मं, Ñ1 Ds2 D5 6 G6 लोका धर्मा, Ñ2 V3 T1 2 4 G1 लोकधर्मा, G2 लोके धर्म- (for लोका धर्म-). — Ñ1 om line 450 — (L 450) K2 Dn D2-4 परिधार्याः, Ñ2 V2 3 B1 Ds T1 G1 3 °वार्या; B3 D1 °चर्याः (for °पाल्याः). K1. 4 V1 B2 D5. 6 T4 G5 M4 परिवार्या-

यन्मया हि मुनिश्रेष्ठ लोका धर्मगुणान्विताः ।
परिपाल्याः स्थितौ सर्वे स कथं ह्यनृतं वदेत् ॥
न देवगन्धर्वगणा न राक्षसा
न चासुरा नैव च यक्षपन्नगाः ।
मम प्रतिज्ञामपहन्तुमुद्यताः
सुखाय जीवन्ति चिरं महामुने ॥
स पारिजातं यदि न प्रदास्यति
प्रयाच्यमानो भवतामरेश्वरः ।
ततः शचीव्यामृदितानुलेपने
गदां विमोक्ष्यामि पुरंदरोरसि ॥
इति प्रवाच्यो यदि सामपूर्वकं
प्रयाच्यमानो न तरुं प्रयच्छति ।
सुनिश्चितं मामवगम्य सर्वथा
त्वयापि कार्यः खलु तत्र निश्चयः ॥

Colophon.

वैशंपायन उवाच ।

नारदोऽथ मुनिर्गत्वा महेन्द्रसदनं प्रभुः ।
तां रात्रिमवसत्तत्र ददृशे च महोत्सवम् ॥
तत्रादित्या महात्मानो वसवश्च सुरोत्तमाः ।
राजर्षयश्च विद्वांसः स्वर्गताः कर्मभिः शुभैः ॥
नागा यक्षाश्च सिद्धाश्च चारणाश्च तपोधनाः ।
ब्रह्मर्षयश्च शतशो देवर्षिमनवस्तथा ॥
सुपर्णाश्च महात्मानो मरुतश्च महाबलाः ।
दिवौकसा निकायाश्च शतशोऽन्ये समागताः ॥
उपर्युपरि सर्वेषां सोमो देवो महेश्वरः ।
तस्थावमितविक्रान्तः स्वैर्गणैः परिवारितः ॥
देवर्षिभिर्मुनिश्रेष्ठैः संवृतः सर्वभावनः ।
कल्पान्तरसहस्रेषु क्षयो येषां न विद्यते ॥
यानर्चयन्ति सततं देवा देवेश्वरोपमाः ।
आत्मज्ञा नावलेपान्धा ये च धर्मपथे स्थिताः ॥

स्थिताः सर्वे, $T_{2\ 3}$ $G_{2\ 4}$ °धार्या स्थिता सर्वे (for ^{a}) —(L 451) D_4 चासुरा (for राक्षसा) —(L 452) K_2 दैत्यसंघा न (for चासुरा नैव) G_2 पन्नगोत्तमा (for यक्षपन्नगा) — For lines 451–452, K_4 subst

14** न देवगन्धर्वगणा राक्षसा नैव चासुरा ।
नैव यक्षपिशाचाश्च न च सर्वेऽपि पन्नगा ॥

—(L 453) K V_2 Dn $D_{1\ 2\ 5}$ G_2 उपहन्तुम्, D_8 अभि°, D_4 उपहर्तुम्, G_4 अपहर्तुम् (for °हन्तुम्) —(L 454) K_2 दु खाय, D_2 G_2 सुखे न (for सुखाय) $\tilde{N}_{1\ 2}$ $V_{1\ 3}$ B Dn Ds_1 (marg as above) $_2$ $D_{5\ 6}$ मुने समर्था. खलु सत्य(Dn D_8 भद्र)मस्तु ते —(L 456) D_1 प्रसाद्यमानो (for प्रयाच्य°) K_2 $\tilde{N}_2$ V_1 $D_{4\ 5}$ G_2 सुरेश्वर, $\tilde{N}_1$ महेश्वर, D_3 महेन्द्र (for [अ]मरेश्वर) —(L 459) K_4 V_3 प्रयाच्यो, $D_{2\ 3}$ प्रबोध्यो (for प्रवाच्यो) —(L 460) $\tilde{N}_2$ $V_{2\ 3}$ G_2 प्रदास्यति (for प्रयच्छति) —(L 461) K_3 V_1 D_1 सुनिश्चयं (for °श्चितं) V_3 B_2 G_5 M_4 मद्गमनाय (for मामवगम्य) K_2 $\tilde{N}_3$ V_2 Dn Ds D_{2-4} T_1 G_3 सुनिश्चयं (K_2 मुने स्वयं) मद्गमनाय सर्वथा, $T_{2\ 3}$ G_1 स्वनिश्चितं मद्गमनाय सर्वदा —(L 462) V_1 $B_{1\ 3}$ D_6 निश्चयस्तथा (for तत्र निश्चयः).

Colophon — *Mention of the Epic* K_3 Ds_2 T_3 — *Mention of Khila* $\tilde{N}_2$ V B Dn_2 Ds D_1. — *Adhy name* $K_{1,2\ 4}$ $\tilde{N}_1$ V B Dn Ds $D_{1\ 2\ 4-6}$ $T_{1\ 3}$ $G_{1\ 3}$ पारिजात(T_3 G_1 °जाताप)हरणम्, D_3 पारिजातहरणे कृष्णसंवाद., T_4 पारिजातोत्पत्तिकथनम् — *Adhy no* K_3 (marg) 122, V_1 128, V_2 127, V_3 B_3 126, Dn Ds_2 D_4 123, D_1 120, D_3 133, T_1 G_3 137, T_2 G_1 139; T_3 146, T_4 130, G_2 129, G_5 140

(L 463) D_4 ऽयं (for ऽथ) $\tilde{N}_2$ $B_{2\ 3}$ Ds $D_{5\ 6}$ नृप; V_2 Dn D_{2-4} T $G_{1\ 3-5}$ M_4 प्रति (for प्रभु) $\tilde{N}_1$ महेन्द्रसदने नृप (for ^{b}) —(L 464) D_3 च वसंस् (for अवसत्). G_2 ददर्श (for ददृशे) —(L 465) T_2 वासव स सुरोत्तम (for ^{b}) —(L 466) G_3 विक्रान्ता (for विद्वांस) $K_{1\ 4}$ स्वकै (for शुभै) —(L 467) D_3 गन्धर्वाश् (for सिद्धाश्च) —(L 468) K_1 $D_{2\ 3}$ -मुनयस् (for -मनवस्) —(L. 469) V_3 महाबाहो (for °त्मानो) —(L 471) Ds_2 D_6 T_1 $G_{1,3}$ सोम- (for सोमो) —(L 472) $T_{2\ 3}$ $G_{1\ 4\ 5}$ M_4 विदित- (for अमित-) $\tilde{N}_1$ T_4 G_5 M_4 स्वर्गणैः, $\tilde{N}_2$ V_1 B_1 $D_{1\ 4}$ स्वैर्गुणै, D_2 T_2 G_4 स्वगणै (for स्वैर्गणैः) —(L 473) $\tilde{N}_1$ देवदेवैर् (for °र्षिभिर्) $D_{3\ 4}$ देवर्षिमुनिभि श्रेष्ठैः (for ^{a}) —(L 475) K_2 D_4 यम्, $\tilde{N}_1$ ताव्; V_2 B D_6 तेऽपि (for यान्) $\tilde{N}_2$ G_2 यमर्चयन्त सततं, D_3 ते तमर्चन्ति स°, M_4 विराजन्तश्च स° (for ^{a}) $\tilde{N}_2$ V_1 D_4 M_4 देव-, V_2 देवं (for देवा) K_2 देवा देवं नरोत्तमा., Ds देवा देवेश्वरोपमान्, D_3 देवं देववरोपमा (for ^{b}) —(L 476) D_1 -लेपा ये (for लेपान्धा) $\tilde{N}_1$ अलोपका सत्यसधास्, $\tilde{N}_2$ V B_2 $D_{2,3\ 5}$ T G M_4 आत्मज्ञानबलोपेता, B_2 (marg) $_3$ Ds D_6 °ज्ञा सत्यसंधाश्च, D_4 °धर्मावलोकेन (for ^{a}) $\tilde{N}_1$ ते हि, D_4

रुद्राश्च काश्यपा देवमध्युपासन्त भारत ।
स्कन्दश्च भगवान्रौद्रिर्गङ्गा च सरितां वरा ॥
अर्चिष्मांस्तुम्बुरुश्चैव भारिश्च वदतां वरः ।
नेतारो देवदेवानामेते हि तपसान्विताः ॥
एताननुविधीयन्ते सर्वदेवगणा नृप ।
धर्मनित्यास्तपोनित्याः सतां मार्गमुपाश्रिताः ॥
ये त्विमे मानुषा देवानर्चयन्ति शुभार्थिनः ।
तानर्चयन्ति ह्यमरास्तथा राजञ्शुभार्थिनः ॥
पितृकृत्येषु देवानां संन्यासं ये त्वनुष्ठिताः ।
स्वाध्यायवन्तः कौरव्य सदा नियमचारिणः ॥
गन्धर्वाधिपतिः श्रीमांस्तत्र चित्ररथो नृप ।
सपुत्रो वादयामास देववाद्यानि हृष्टवत् ।
ऊर्णायुश्चित्रसेनश्च हाहा हूहूस्तथैव च ।
डम्बरस्तुम्बुरुश्चैव जगुरन्ये च तद्गणाः ॥
उर्वशी पूर्वचित्तिश्च हेमा रम्भा च भारत ।
हेमदन्ता घृताची च सहजन्या तथैव च ॥
जुजोष भगवान्देवस्तदुपस्थानमात्मवान् ।
वृत्तेन तुष्टः शक्रस्य जगाम जगतः पतिः ॥
गते भूतपतौ सर्वे नृपा जग्मुर्यथागतम् ।
महेन्द्रेणार्चिता देवाः स्वानेव निलयान्गताः ॥
ततः सर्वेषु यातेषु सुखासीनं पुरंदरम् ।
सदस्यैः स्वैः सहासीनं नारदोऽभ्याययौ मुनिः ॥
तमिन्द्रः पूजयामास समुत्थाय तपोधनम् ।
दिदेश कुशगर्भं च पीठमात्मासनोपमम् ॥
नारदोऽथ महातेजा महेन्द्रमिदमब्रवीत् ।
दूतोऽहममरश्रेष्ठ विष्णोरतुलतेजसः ॥
किंचित्कार्यं पुरस्कृत्य प्रेषितोऽस्मि महात्मना ।
आनर्तादार्तिहरणं तस्यैवानघतेजसः ॥
प्रीतिवाक्यानि हृद्यानि प्रयुज्य मुनये तदा ।
ततः प्रहृष्टो भगवानब्रवीत्पाकशासन. ॥

स्वे च (for ये च) K1 3 Ñ1 2 Dn D1 4 -पथि (for पथे) — (L 477) B1 8 D6 गन्धर्वास्ते स्म भारत, D2 3 अभ्युपासत भारत, G2 यमुपासन्त भारत (for ᵇ) — (L 478) K1 4 तत्र, Ñ2 Dn2 T1 3 4 G5 अग्निर्, D1 रुद्रो, D2 सौरिर्, D8 रौद्रो, G2 देवो (for रौद्रिर्). — (L 479) V1 आयुष्मास् (for अर्चि°) K1 3 4 D1 G3 डम्बरश्, V2 D2–5 तुम्बरश्, T2 3 G1 4 5 M4 शम्बरश् (for तुम्बुरुश्) Ñ2 भारश्च, V1 ऋषिश्च, D8 रुचिश्च, D4 भास्करो, T2 G4 हरिश्च, T3 G1 3 5 M हारिश्च, G2 भानुश्च (for भारिश्च) — (L 480) G2 -लोकानाम् (for -देवा°) D2 नेतारो देवतानां च (for ᵃ) D1 येऽन्ये हि, D4 नियते (for एते हि) — (L. 481) D2 एते तमनुतिष्ठन्ति (for ᵃ) Ñ1 देव-, V2 Dn1 Ds1 D1 सर्वे, B1 8 देवान् (for सर्व-) V1 देवान्सर्वगणान्नृप (for ᵇ) — (L 482) K2 तपोनिष्ठा· (for °नित्यास्) V3 B2 Ds D2 3 उप(V3 °पा)स्थिता (for उपाश्रिताः) Ñ1 2 V1 B2 D6 सन्त सन्मार्गमाश्रिता· (for ᵇ) — After line 482, D2 reads line 486 — (L 483) V2 B D6 यथेमे, T1–3 G1 3–5 M4 यानिमान् (for ये त्विमे). — D3 G4 om. line 484 — (L 484) Ñ2 B1 3 तम् (for तान्). — (L 485) K3 -कृत्ये तु (for -कृत्येषु) K4 सत्यानां, T2 G4 सांनिध्ये, T3 G1 5 सानिध्यं (for संन्यास) Ñ1 V1 साध्या. सन्तो भवन्ति ते (for ᵇ) — (L. 486) Ñ1 V1 B D5 सततं धर्मचारिण· (for ᵇ) — (L 488) D4 स देवो (for सपुत्रो) — (L 489) Ñ1, 2 V1 B1, 8 D6 च भारत (for तथैव च). — (L. 490) K1 डम्बरुस्तुम्बरश्चैव, K2 जुबोष भगवाश्चैव (for ᵃ) K2 ऽथ यद्गुणान्, K3 Ñ1 2 V B Dn Ds D1 3 4 6 T1 4 G2 च षड्गुणान्, D6 (marg) ऽत्र तद्गुणान्, G5 ऽथ षड्गुणान्, T2 3 G1 3–5 M4 च मागधा. (for च तद्गणा) — (L 491) Ñ1 2 V D3 T4 G1 3 विप्रचित्तिश् (for पूर्व°) T G1 4 5 तथैव च (for च भारत) — (L 493) Ñ1 V2 D2 4, 6 T1 जुगोप; G2 तुतोष (for जुजोष) — (L 494) D1 2 नृत्येन (for वृत्तेन) K1 Ñ1 2 V B Dn Ds D1 2 5 6 G2 गति, D6 (also marg) जनि: (for पति·) — (L 495) V3 शूलपतौ; Ds2 चमू° (for भूत°) V3 यथाविधि (for °गतम्) — (L. 496) V1 हृष्टा (for देवा.) K1 4 D4 स्वमेव निलयं गताः (for ᵇ) — (L 498) Ñ2 सुखासीनं, V3 T2 G1 3–5 M4 समा° (for सहा°) K V B2 Dn Ds D1–5 T4 G2 ऽभिययौ, Ñ1 B1 3 D6 ऽभिगतो, Ñ2 ऽभिमुखो (for ऽभ्याययौ) — (L. 499) T2 G1 तमुत्थाय (for स°) — M4 om line 500 — (L. 500) D6 -भद्रं (for -गर्भं). — (L 501) D4 (marg) महाराज (for °तेजा) — (L 502) D2 T2 G1 4 अमित- (for अतुल-) — (L 503) V3 समुद्दिश्य (for पुरस्कृत्य) G4, 5 ऽहं (for ऽस्मि) — B1 om line 504 — (L 504) K2 V3 आर्तानाम्, G2 अनर्थाद् (for आनर्ताद्) Ñ1 -रहितं, V1 -हरणे, D6 T1–3 G1 3 4 M4 -हरणात् (for -हरण) D3 [अ]मित- (for [अ]नघ-) D2 तस्यैवामिततेजसा, T1–3 G1. 3–5 M4 तस्मादाकर्ण्य तद्वच (for ᵇ) — Ñ1 om. line 505 Before line 505, some Mss. ins. वैशंपायन उवाच·

किमाह पुरुषश्रेष्ठः शीघ्रमाचक्ष्व मे मुने ।
चिरस्य खलु कृष्णेन संस्मृताः स्म महात्मना ।
प्रियवाक्यानि हृद्यानि ब्रूहि धर्मभृतां वर ॥

नारद उवाच ।

महेन्द्रेन्द्रानुज द्रष्टुं गतोऽहं भ्रातरं तव ।
द्वारकां पुरुषश्रेष्ठ काश्यपानां यशस्करम् ॥
तं तु रैवतकेऽद्राक्षं तदासीनमरिंदमम् ।
रुक्मिण्या सहितं वीरमुमयेव वृषध्वजम् ॥
पारिजाततरोः पुष्पं तस्य दत्तं मयानघ ।
विस्मापनार्थं देवेश पत्नीनामुरुतेजसः ॥
तद्दृष्ट्वा तस्य पत्न्यस्तु विस्मयं परमं ययुः ।
बहुकामप्रदं पुष्पं वृक्षराजसमुद्भवम् ॥
गुणास्तासां मयाख्यातास्तस्य पुष्पस्य मानद ।
सृष्टिश्च पारिजातस्य कश्यपेनातितेजसा ॥
अदित्या कश्यपो दत्तः पुण्यार्थं च यथा मम ।
पुष्पदाम्ना वेष्टयित्वा कण्ठे पुण्यार्थमात्मवान् ॥
त्वं च दत्तो यथा शच्या देवाश्चान्ये सुरेश्वर ।
निष्क्रयश्च यथा दत्तः कश्यपाद्यैर्महात्मभिः ॥
तच्छ्रुत्वा तस्य पत्न्येका सत्यभामेति विश्रुता ।
पुण्यकार्थं मनश्चक्रे दयिता ते यवीयसः ॥
तया चाभ्यर्थितो भर्ता देव्या देवगणेश्वरः ।
प्रतिजज्ञे स धर्मात्मा यवीयांस्तत्र मानद ॥
ततो मामुक्तवान्वीरो विष्णुर्बलवतां वरः ।
यथावत्सुरमुख्येश ब्रुवतः शृणु भावन ॥
लालनीयो यवीयांस्तु प्रणिपत्याच्युतोऽब्रवीत् ।
आनायय सुरश्रेष्ठ पारिजातं वरद्रुमम् ॥
मनोरथोऽस्तु सफलो वध्वास्तेऽसुरसूदन ।
धर्मकृत्ये विशेषेण वध्वास्तेऽमरसत्तम ॥

— (L 458) $K_{1\ 3\ 4}$ V_2 B_3 Dn Ds D_5 M_4 अददात्पाण्डवेभ्यश्च (for ^{a}) D_5 प्रीतात्मा गरुडध्वज (for ^{b}) — (L 459) D_3 तथा सर्वं (for [अ]थ प्रवरं) D_3 यदु (for पुर-). — (L 460) D_3 -वर प्रभु· (for वरध्वज) — (L 461) $\tilde{N}_2$ -गदासिभृत् (for °धर) — (L 462) K_3 क्षिप्रं, K_4 -क्षात्रं; T_1 सर्वं (for क्षत्रं) K_2 D_4 G_2 महाबलान् (for °बल) — $T_{2.3}$ $G_{1.4}$ om (hapl) lines 463–467. — (L 463) K_2 [अ]र्थे (for [अ]थ) — (L 464) $K_{1\ 3}$ मासपूपशताकीर्णं, $\tilde{N}_2$ B_3 Ds_1 $D_{2\ 5}$ T_1 °सूपशताकीर्णं, V_1 °राशिशताकीर्णं, D_1 °यूषसमाकीर्णं — (L 468) $T_{2\ 3}$ $G_{1\ 4}$ प्रति (for पुरीम्) — (L 469) K_1 V_1 B_1 D_3 T_4 G_5 M_4 प्र- (for स) — (L 470) V B_2 D_4 T_2 $G_{2\ 3}$ -रथां, D_8 -रथाद् (for -पथां) T_1 पुष्पच्छत्ररथां वीरो (for ^{a}) $K_{1\ 4}$ वर्ण्यमानो $D_{3\ 5}$ वीक्ष्यमाणो (for वन्द्यमानो) D_6 ऽमरैः (for नरैः) K_3 पूज्यमानो नर पथि (for ^{b}) — (L 472) Dn_2 D_6 युद्धे जयमवाप्नुयात् (for ^{b}) — (L 473) K_3 निर्धनो (for अधनो) $\tilde{N}_2$ विन्दते (for लभते) — (L 474) $\tilde{N}_2$ V_3 $B_{2\ 3}$ T_1 रोगी (for रोगाद्) K_2 D_4 मुच्येत (for चाप्यथ) — $G_{1\ 4}$ om lines 476–480 — (L 476) D_2 श्राद्धे च (for श्राद्धेषु) $\tilde{N}_3$ D_5 शुभम् (for स्मृतम्) — (L 477) $T_{1\ 4}$ G_6 इमम् (for इदम्) $K_{2\ 3}$ Dn Ds $D_{5\ 6}$ G_3 भारत (for °ते) — (L 478) $\tilde{N}_2$ -वरस्य, T_4 -जयस्य (for -बलस्य) — G_2 om lines 479–484 D_4 T_4 om lines 479–480. — (L 479) Dn इदं (for इह) — (L 481) D_6 गण-

29C

K $\tilde{N}_2$ V B D T G M_4 cont

जनमेजय उवाच ।

श्रुतोऽयं षट्पुरवधो रम्यो मुनिवरोत्तम ।
पुरोक्तमन्धकवधं वैशंपायन कीर्तय ॥
भानुमत्याश्च हरणं निकुम्भस्य वधं तथा ।
प्रब्रूहि वदतां श्रेष्ठ परं कौतूहलं हि मे ॥

वैशंपायन उवाच ।

दितिर्हतेषु पुत्रेषु विष्णुना प्रभविष्णुना ।
तपसाराधयामास मारीचं कश्यपं पुरा ॥
तपसा कालयुक्तेन तथा शुश्रूषया मुनेः ।
आनुकूल्येन च तथा माधुर्येण च भारत ॥
परितुष्टः कश्यपस्तु तामुवाच तपोधनाम् ।
परितुष्टोऽस्मि ते भद्रे वरं वरय सुव्रते ॥

दितिरुवाच ।

हतपुत्रास्मि भगवन्देवैर्धर्मभृतां वर ।
अवश्यं पुत्रमिच्छामि देवैरमितविक्रमम् ॥

कश्यप उवाच ।

अवध्यस्ते सुतो देवि दाक्षायणि भवेदिति ।
देवानां संशयो नात्र कश्चित्कमललोचने ॥
देवदेवमृते रुद्रं तस्य न प्रभवाम्यहम् ॥
आत्मा ततस्ते पुत्रेण रक्षितव्यो हि सर्वथा ॥
अन्वालभत तां देवी कश्यपः सत्यवागथ ।
अङ्गुल्योदरदेशे तु सा पुत्रं सुषुवे ततः ॥
सहस्रबाहुं कौरव्य सहस्रशिरसं तथा ।
द्विसहस्रेक्षणं चैव तावच्चरणमेव च ॥
स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत ।
तमन्धकोऽयं नाम्नेति प्रोचुस्तत्रनिवासिनः ॥
अवध्योऽस्मीति लोकान्स सर्वान्बाधति भारत ।
हरत्यपि च रत्नानि सर्वाण्यात्मबलाश्रयात् ॥
वासयत्यात्मवीर्येण निगृह्याप्सरसां गणान् ।
स वेश्मन्यूर्जितोऽत्यर्थं सर्वलोकभयंकरः ॥
परदारापहरणं पररत्नविलोपनम् ।
चकार सततं मोहादन्धकः पापनिश्चयः ॥

(for -कनक-) D_3 मणिवरकनकविचित्रपादैर् —(L 482) K_2 D_3 [अ]नादिमध्य ; Dn [आ]दिनाथः, $T_{2\ 3}$ $G_{1\ 4}$ M_4 [अ]तिमेध्यः (for [आ]दिमध्य) —(L 483) $K_{2\ 3}$ चतुर्विधाता (for °त्मा) —(L 484) V_3 जगति जगत्प्रवरः सहस्रनाम

COLOPHON — *Mention of the Epic* Ds_2 T_3. — *Mention of Khila* K_{2-4} V B Dn Ds $D_{1\ 4}$ — *Adhy name* K $\tilde{N}_2$ V B Dn Ds $D_{1\ 3-5\ 6}$ T G_{1-3} षट्पुरवधः. — *Adhy no.*. V_1 144, V_2 143, V_3 B_2 142; Dn Ds_2 140; D_3 149, D_4 T_4 139; T_1 $G_{3\ 4}$ 153; T_2 G_1 M_5 155, T_3 162; G_5 156.

29 C

(L 1) T_2 G_1 कृतो (for श्रुतो) T_1 सम्यग् (for रम्यो). — (L. 2) G_2 पुरोक्तं तं त्वं धर्मज्ञ (for ^{a}) — (L 3) $\tilde{N}_2$ भानुमत्यापहरणं (for ^{a}) $T_{1\ 2\ 4}$ $G_{1\ 3\ 4}$ अन्धकस्य (for निकुम्भस्य). $\tilde{N}_2$ D_3 वधस् (for वधं) D_6 T_3 अन्धकस्य वधस्तथा (for ^{b}). — (L 4) B_1 प्रब्रूहि मुनिशार्दूल (for ^{a}) $\tilde{N}_2$ हि न॰, Ds_2 D_1 (*sup lin*) मम, D_4 प्रिय (for हि मे) — (L. 5) V_1 B_1 हतेषु तेषु पुत्रेषु (for ^{a}) V_3 $B_{2\ 3}$ D_6 तेषु तेषु च दैत्येषु निहतेषु च विष्णुना —(L 6) $V_{1\ 3}$ B D_6 दितिः ; D_5 पतिम् (for पुरा) — (L 7) $K_{1.\ 4}$ काम- (for काल-). K_2 V_1 B_2 मुनिः (for मुने) —(L 9) D_3 स (for तु) K_2 V_3 Dn Ds_2 $D_{1\ 4\ 5}$ T_1 $G_{1\ 2\ 4\ 5}$ M_4 तपोधन (for °धनाम्) — (L 10) D_4 वरं वरय भद्रे तं परितुष्टोऽस्मि सुव्रते — (L 11) $T_{2\ 3}$ $G_{1\ 4}$ [अ]हं देव (for भगवन्) — (L 13) $T_{1\ 2}$ $G_{1\ 3\ 4}$ भूयाद् (for देवि) T_1 सुमध्यमे (for भवेदिति) — (L 14) T_1 न देवानां संशयोऽत्र (for ^{a}) K_2 D_4 कच्चिच्च कमलेक्षणे (for ^{b}) — (L. 15) G_3 नित्यं (for रुद्र) D_3 भवाहते च भद्रं ते (for ^{a}). D_4 प्रत्ययामि (for प्रभवामि) — (L 16) B_3 यतस् (for त°). T_1 $G_{3\ 5}$ रुद्रेण, $T_{2\ 3}$ $G_{1\ 4}$ रुद्राणां (for पुत्रेण). — (L 21) T_1 अन्धको हीति भारत (for ^{b}). —(L 22) G_5 ऊचुस् (for प्रो°) — (L 23) T_2 त्रीन् (for स). T_4 G_5 M_4 हरति (for बाधति) D_3 सर्वान्बाधितवांस्तदा ; D_5 स सर्वान्बाधते भृशम् (for ^{b}) —(L 24) $K_{1\ 4}$ पूर्वाणि (for स°) — (L 25) D_4 नाशयति, T_4 बाध° (for वास°) —(L 26) K_1 $\tilde{N}_2$ $V_{2\ 3}$ $B_{2.\ 3}$ Dn Ds_1 $D_{4\ 6}$ $T_{2.\ 4}$ स्व- (for स) B_1 नित्यं (for ऽत्यर्थं) K_2 D_1 स्ववेश्मपूजि(D_1 °वर्धि)-तोऽत्यर्थं ; D_3 सर्वेषामूर्जितोऽत्यर्थं, D_5 स्ववेश्मन्पूजितोऽत्यर्थं (for ^{a}) — (L 27) D_5 -द्रव्य-, G_2 -वित्त- (for -रत्न-).

त्रैलोक्यविजयं कर्तुमुद्यतः स तु भारत ।
सहायैरसुरैः सार्धं बहुभिः सर्वधर्षिभिः ॥
तं श्रुत्वा भगवाञ्शक्रः कश्यपं पितरं ब्रवीत् ।
अन्धकेनेदमारब्धमीदृशं मुनिसत्तम ॥
आज्ञापय विभो कार्यमस्माकं समनन्तरम् ।
यवीयसः कथं नाम सोढव्यं स्यान्मुने मया ॥
इष्टपुत्रे प्रहर्तव्यं कथं नाम मया विभो ।
इहात्रभवती कुर्यान्मन्युं मयि हते सुते ॥
देवेन्द्रवचनं श्रुत्वा कश्यपोऽथाब्रवीन्मुनिः ।
वारयिष्यामि देवेन्द्र सर्वथा भद्रमस्तु ते ॥
अन्धकं वारयामास दित्या सह तु कश्यपः ।
त्रैलोक्यविजयाद्वीर कृच्छ्रकृच्छ्रेण भारत ॥
वारितोऽपि स दुष्टात्मा बाधत्येव दिवौकसः ।
तैस्तैरुपायैर्दुष्टात्मा प्रमथ्य च तथा परान् ॥
बभञ्ज कानने वृक्षानुद्यानानि च दुर्मतिः ।
उच्चैःश्रवःसुतानश्वान्बलादप्यानयद्दिवः ॥
नागान्दिशागजसुतान्दिव्यानपि च भारत ।
बलाद्धरति देवानां पश्यतां बलदर्पितः ॥
देवानाप्याययन्ते तु ये यज्ञैस्तपसा बलात् ।
तेषां चकार विध्वंसं दुष्टात्मा देवकण्टकः ॥
नेजुर्यज्ञैस्त्रयो वर्णास्तेपुर्नैव तपांस्यपि ।
अन्धकस्य भयाद्राजन्यज्ञविघ्नानि कुर्वतः ॥
तस्येच्छया वाति वायुरादित्यश्च तपत्युत ।
चन्द्रमाश्च सनक्षत्रो दृश्यते नैव वा पुनः ॥
न भजन्ति विमानानि विहायसि प्रभां प्रभो ।
अन्धकस्यातिघोरस्य बलदृप्तस्य दुर्मतेः ॥
निरोंकारवषट्कारं जगद्वीर तदाभवत् ।
अन्धकस्यातिघोरस्य भयात्कुरुकुलोद्वह ॥
कुरूनथोत्तरान्पापो द्रावयामास भारत ।
भद्राश्वान्केतुमालांश्च जम्बुद्वीपास्तथैव च ॥

— (L 29) G_2 उद्युक्त (for उद्यत) T_{1-3} $G_{1\,3\,4}$ उद्यतः पापनिश्चय· (for ^{b}) —(L 30) D_5 T_3 सर्वदर्शिभि , M_4 धर्मधर्षिभिः (for सर्व°) — (L 31) $T_{2\,3}$ $G_{1\,4}$ दृष्ट्वा (for श्रुत्वा) D_4 प्रणत (for कश्यपं). K_2 D_3 प्रणत (D_3 °श्य) पितुरब्रवीत्, T_1 काश्यपं पितरमब्रवीत् (hypermetric), T_2 $G_{1\,2\,4}$ कश्यपं वाक्यमब्रवीत्, G_3 काश्यं पितरमब्र° (for ^{b}). — (L 32) D_2 समारब्धम् (for [इ]दमा°) — (L 33) T_1 अस्माकं हि तपोधन, $T_{2\,3}$ $G_{1\,3\,4}$ °कं मुनिसत्तम (for ^{b}) — (L 34) V_3 महामुने (for मुने मया) — (L. 35) $D_{1\,2}$ G_2 इष्टे (for इष्ट-) — (L 36) K_4 D_4 G_2 भगवान्, V_3 D_6 -भवतां (for -भवती) K_2 इह त्रिभुवने कुर्यान्; D_5 इहात्रभवतां कार्यं (for ^{a}) $D_{5\,6}$ मन्युर् (for मन्युं) K_1 V_2 मम (for मयि). G_3 मृते (for हते) — $T_{2,3}$ $G_{1\,4}$ om lines 37–40 — (L 39) K_2 D_4 सह स, D_8 सार्धं च (for सह तु) — (L 40) K_2 $\tilde{N}_2$ V_2 B_1 Dn $D_{3.6}$ $T_{1\,4}$ $G_{2\,3,5}$ M_4 वीरं, V_1 वीरो (for वीर). D_1 महाकृच्छ्रेण, D_5 कृच्छ्रेणैव च, D_6 कृच्छ्रंकृच्छ्रेति, M_4 -कृच्छ्रात्कृच्छ्रेण (for कृच्छ्रकृ°) — (L 41) K_2 B_1 G_3 सुदुष्टात्मा, D_4 दुरात्मा स (for स दुष्टात्मा) $D_{3\,5}$ बाधते च (for °त्येव) — (L 42) K_2 D_1 $T_{1\,2}$ $G_{1\,3\,4}$ सुरान्, K_3 [आ]त्मजान्; K_4 Dn D_2 $T_{3\,4}$ [अ]मरान् (for परान्). D_6 बाधत्येव दिवौकस ; M_4 प्रमथ्य तु चराचरान् (for ^{b}) — (L 43) T_4 G_5 बहुशः (for बभञ्ज) $\tilde{N}_2$ सुदुर्मति , D_3 च भारत (for च दुर्मति·), D_3 काननानि घनानि च (for ^{b}). — (L. 45) $K_{1\,2}$ $V_{1\,3}$ $B_{1\,2}$ Dn $D_{2\,4\,6}$ (marg) दिशां गज-, K_4 Ds_2 D_3 दिशो गज-, D_5 दीप्तान्गज-, T_4 दिशागत· (for °ज). — (L 46) B_3 G_5 वर- (for बल-) — (L 47) K_4 वै याजयन्ते, V_1 आप्याययंस्ते (for °ययन्ते) K_2 देवानाप्याययन्त्येते, T_4 M_4 °ययामासु·, G_2 °ययन्तं च, G_5 °ययामास (for ^{a}) K_2 Ds_2 $D_{2\,4}$ यज्ञैश्च (for ये यज्ञैश्) — (L 48) K_3 च वधं, K_3 Dn $D_{2\,6}$ $T_{1\,3}$ $G_{1\,3-5}$ M_4 विघ्नं स ; K_4 विघ्नांस्तु, $V_{2\,3}$ B_2 विस्रम्भं, B_1 D_5 विश्रब्धं ; B_3 $D_{1.4}$ विश्रम्भं, T_4 विघ्नान्स, G_2 विष्टम्भं (for विध्वंसं). G_2 दुरात्मा (for दुष्टात्मा) D_5 ब्रह्म- (for देव-) — (L 49) T_{1-3} $G_{1\,3\,4}$ नेष्टुर् (sic) (for नेजुर्) — (L 50) D_3 यज्ञे (for यज्ञ-) — (L 51) Ds_2 वायुर्वाति (by transp) D_2 भयात्पुन. (for तपत्युत) —(L 52) $G_{3.5}$ चन्द्रमा सह नक्षत्रैर् (for ^{a}) — (L 53) B_2 व्रजन्ति ; $G_{1\,4}$ भवन्ति (for भजन्ति). K_2 D_4 स्वकां प्रभाम्; $\tilde{N}_2$ D_8 प्रभां विभो, B_2 Ds $G_{1\,2\,4}$ भयात्प्रभो, $T_{2\,3}$ महाप्रभो, G_6 M_4 विशां पते (for प्रभां प्रभो) — (L 54) D_6 om. (hapl) lines 54^{b}–56^{a} T_1 -दुर्मद- (for -दृप्तस्य) — (L. 55) D_5 एतद् , $G_{1\,4}$ विप्र (for वीर) V_2 (marg) कृत्स्नमेव तदाभवत, T_2 जगद्विप्र तथा भवेत् (for ^{b}). — (L 56) K (*sup lin.* as above) तथा (for भयात्). — In M_4 lines 57–125 are lost on a missing folio —(L 57) D_1 दृप्तो, T_1 G_3 पापी (for पापो) G_6 नाशयामास (for द्राव°) D_2 भूतले (for भारत). — (L 58) $T_{1,2}$ G_3

मानयन्ति च तं देवा दानवाश्च दुरासदाः
भूतानि च तथान्यानि समर्थान्यपि सर्वथा ॥
ऋषयो वध्यमानास्तु समेता ब्रह्मवादिनः ।
अचिन्तयन्नन्धकस्य वधं धर्मभृतां वर ॥
तेषां बृहस्पतिर्मध्ये धीमानिदमथाब्रवीत् ।
नास्य रुद्रादृते मृत्युर्विद्यते च कथंचन ॥
तथा वरे दीयमाने कश्यपेनापि शब्दितः ।
नाहं रुद्रात्परित्रातुं शक्त इत्येव धीमता ॥
तदुपायं चिन्तयामः शर्वो येन सनातनः ।
जानीयात्सर्वभूतानि पीड्यमानानि शंकरः ॥
विदितार्थो हि भगवानवश्यं जगतः प्रभुः ।
अश्रुप्रमार्जनं देवः करिष्यति सतां गतिः ॥
व्रतं हि देवदेवस्य भवस्य जगतो गुरोः ।
सन्तोऽसज्यो रक्षितव्या ब्राह्मणास्तु विशेषतः ॥
ते वयं नारदं सर्वे प्रयामः शरणं द्विजम् ।
उपायं वेत्स्यते तत्र वयस्यो हि भवस्य सः ॥
बृहस्पतिवचः श्रुत्वा सर्वे तेऽथ तपोधनाः ।
त्राणार्थे नारदं प्रोचुस्तांस्तथेति स चोक्तवान् ॥
ऋषिष्वथ प्रयातेषु तत्कार्यं नारदो मुनिः ।
विचार्य मनसा विद्वानिति कार्यं स दृष्टवान् ॥
स देवदेवं भगवान्द्रष्टुं मुनिरथाययौ ।
मन्दारवनमध्यस्थो यत्र नित्यं वृषध्वजः ॥
स तत्र रजनीमेकामुषित्वा मुनिसत्तमः ।
मन्दाराणां वने रम्ये दयितः शूलपाणिनः ॥
आजगाम पुनः स्वर्गं लब्ध्वानुज्ञां वृषध्वजात् ।
मन्दारपुष्पैः सुकृतां मालामाबध्य भारत ॥
ग्रथितां सविशेषां तां सर्वगन्धोत्तमोत्तमाम् ।
संतानमाल्यदामं च सर्वैस्तैः कुसुमैः कृतम् ॥
तच्च कण्ठे समासज्य महागन्धं नराधिप ।
आययावन्धको यत्र दुरात्मा बलदर्पितः ॥
अन्धकस्त्वथ तं दृष्ट्वा गन्धमाघ्राय चोत्तमम् ।
संतानकानां स्रङ्मालां महागन्धां महामुनेः ॥

जम्बुमालांश् (for केतु°). K_2 D_5 जम्बुद्वीपं (for °द्वीपांस्). — (L 59) T_{1} $_2$ G_2 $_5$ मानवाश् (for दा°) K_2 $_4$ दुरासदम् (for °सदा) — T_1 om line 60 — (L 60) D_6 समस्तानि (for समर्थानि). D_2 $_3$ सर्वाण्यपि च सर्वथा (for ^{b}). — (L 61) T_1 $_2$ G_1 $_4$ मुनयो (for ऋषयो) K_2 ये चान्ये (for समेता) — (L 62) D_3 महात्मानो (for अन्धकस्य) D_3 G_4 $_5$ नरा (for वर) — Before line 63, K_3 ins बृहस्पतिरुवाच — (L 63) D_6 श्रीमान् (for धी°) — (L 64) $Ñ_2$ [अ]न्यो, D_5 [अ]स्ति (for [अ]स्य). V_3 D_5 ऽस्य, T_4 G_5 ऽत्र (for च) — (L 65) D_5 शब्दितम् (for °त) — (L 66) T_1 G_1 $_3$ धीमतः (for °ता) D_3 शक्त इत्यवधीयताम् (for ^{b}) — (L 67) K_2 D_3 चिन्तयध्वं (for °याम.) G_2 तमुपायं चिन्तयध्व (for ^{a}) — (L 69) T_3 $_4$ G_5 विदितार्थं (for °र्थो) — (L 70) T_4 श्रुत्वा प्रमार्जनं देव. (for ^{a}) — (L 71) T_4 शिवस्य (for भ°) D_1 जगतां (for °तो) T_{1-3} G_1 $_{3-5}$ जगतो (T_2 °तां) रक्षणं गुरो (for ^{b}) — (L 72) K_2 D_4 सदा (for ऽसज्यो) — (L 73) G_2 प्रयता (for प्रयाम) V_1 द्विजा (for द्विजम्) — (L 74) K_1 $_4$ उपायान्वक्ष्यते तत्र (for ^{a}) G_5 वधेऽस्य (for वयस्यो) G_4 om lines 75^b–116^a — After line 75, D_{s1} (marg) Bom Poona eds. G(ed.) ins .

1** तावद्ददृशुराकाशे प्राप्तं देवर्षिसत्तमम् ।
पूजयित्वा यथान्यायं सत्कृत्य विधिवन्मुनिम् ॥
देवा ऊचु ।
देवर्षे भगवन्साधो कैलासं व्रज सत्वरम् ।
विज्ञप्तुमर्हसे देवमन्धकस्य वधे हरम् ॥
[D_{s1} ऋषय (for देवा)]

— (L 76) D_4 आत्मार्थे, Poona ed G(ed) त्राणार्थे (for °र्थे) D_3 तान्सर्वान्स तथोक्तवान् (for ^{b}) — (L 79) K_1 वरदं (for भगवान्) D_4 देवदेवं च भगवान् (for ^{a}). D_2 इत्थं (for द्रष्टुं) K_4 V_1 D_{n1} D_s D_3 दृष्टुं मुनिरथो (K_4 °वरो) ययौ (for ^{b}) — (L 82) D_2 वनं रम्यं (for वने रम्ये) D_2 दयितं (for °त) K_1 निवेद्य शूलपाणिनि, D_3 पूजयित्वा जगाम स (for ^{b}) — (L 83) D_3 नारद पुनरेवाथ (for ^{a}) D_4 G_2 लब्धानुज्ञो (for लब्ध्वानुज्ञा) — (L 84) K_4 सकृता, $Ñ_2$ सुरचिता (hypermetric), T_2 ग्रथितां (for सुकृतां) T_1 G_1 $_3$ मन्दारपुष्पग्रथितां (for ^{a}) — (L 85) B_1 सर्वगन्धमनोरमाम् (for ^{b}) — (L 86) V_2 संतानदाममाल्यं च, T_{1-3} G_1 $_{3-5}$ °मालाग्रथितां (for ^{a}) K_3 $_4$ V_1 D_5 $_6$ T_1 $_3$ कृताम् (for कृतम्). — (L 87) B_2 समावेश्य, B_3 D_2 °साद्य (for °सज्य) D_5 T_1 $_3$ G_1 $_5$ महागन्धां (for °गन्ध) — (L 88) T_2 $_3$ G_1 आधावति (for आययाव्). D_4 वर- (for बल-). — (L 89) V_3 B_3 D_s D_6

कुतोऽयं पुष्पजातिर्वा कमनीया तपोधन ।
गन्धान्वर्णाञ्शुभांस्तान्हि भोः पुष्यति मुहुर्मुहुः ॥
स्वर्गे संतानकुसुमान्यतिवर्तन्ति सर्वथा ॥
कः प्रभुस्तस्य देशस्य यः स सुकृतवान्मुने ।
आचक्ष्व यद्यनुग्राह्या वयं ते देवतातिथे ॥
तमुवाच मुनिश्रेष्ठः प्रहसन्निव भारत ।
प्रहाय दक्षिणे हस्ते महतस्तपसो निधिः ॥
मन्दरः पर्वतश्रेष्ठो वीर कामगमं वनम् ।
तत्र चैवंविधं पुष्पं भोः सृष्टिः शूलपाणिनः ॥
न तु तत्र वनं कश्चिदच्छन्देन महात्मनः ।
प्रवेष्टुं लभते तद्धि रक्षन्ति प्रमथोत्तमाः ॥
नानाप्रहरणा घोरा नानावेषा दुरासदाः ।
अवध्याः सर्वभूतानां महादेवाभिरक्षिताः ॥
नित्यं प्रक्रीडते तत्र सोमः सप्रवरो हरः ।
मन्दारद्रुमषण्डेषु सर्वात्मा सर्वभावनः ॥
तपोविशेषैराराध्य हरं त्रिभुवनेश्वरम् ।
शक्य मन्दारपुष्पाणि प्राप्तुं कश्यपवंशज ॥
स्त्रीरत्नमणिरत्नानि यानि चान्यानि चाप्यथ ।
काङ्क्षितानि फलन्ति स्म ते द्रुमा हरवल्लभाः ॥
न तत्र सूर्यः सोमोऽथ तपत्यतुलविक्रम ।
स्वयंप्रभ तरुवनं तद्धो दुःखविवर्जितम् ॥
तत्र गन्धाः स्रवन्त्यन्ये रत्नान्यन्ये महाद्रुमाः ।
वासांसि विविधान्यन्ये सुगन्धीनि महाबल ॥
भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यं तथैव च ।

T3 G5 ता (for त) — (L 90) K1 2 4 ता मालां, D1 सन्मालां, D3 सा माला, D5 पुष्पाणा (for स्रङ्मालां) T3 सतानमाल्यग्रथितां, T4 °तरुपुष्पाणां (for ^{a}) D4 मुनेर्गले (for महामुने) — Before line 91, D4 ins अन्धक उवाच — (L 91) K2 D6 क्व चेयं, K8 B1 T2–3 G1 कुतोऽसौ, V1 3 B2 G2 कुत्रेय, T4 कुतो या, Bom Poona eds G(ed) कुत्रायं (for कुतोऽय) D4 कमनीयं (for °या) D5 द्विजोत्तम (for तपोधन) — (L 92) G3 वल्गून् (for वर्णान्) B2 3 D6 च तास्, D5 तु तास् (for शुभास्) V1 गन्धान्वर्णांश्च तांस्तानि, D2 °र्णान्प्रभावास्तान्, D3 गन्धमाघ्राय मालाया.; T4 गन्धान्बहून्प्रशस्तान्वा, G5 गन्धान्वल्गून्प्रशान्तान्हि (for ^{a}) D8 पुष्पाणां स (for भो· पुष्यति) — (L 93) D3 स्वर्गेऽपि यानि कुसुमानि (for ^{a}) K3 om lines 93^{b}–95^{a} D4 प्रतिवर्तन्ति, D6 न निव° (for [अ]तिव°) K1 [अ]जातान्यति सर्वथा, T1 2 G3 [उ]द्भूतानीव स°, T3 [उ]द्भूतानि च स°, G1 न्यग्भूतानि च स°, G5 व्यतिक्रमनि स° (for ^{b}) — T1–3 G1 3 om lines 94–97 — (L 94) Ñ2 देवस्य, B1 Dn वृक्षस्य (for देशस्य) D3 क प्रभुस्तानि देवेषु (for ^{a}) K1 4 देश· (for यः स) K2 देव शक्रोऽथ वा मुने, Ñ2 V B D8 D6 T4 G5 शक्यं वा(B1 °क्यस्त्वा)नयितुं मुने, Dn G2 देशः स क्व नु वा मुने, D1 गन्तुं शक्यं न वा मुने, D2 देव कृत्स्नं भवान्मुने, D3 शक्तो धारयितुं मुने, D5 देश· क· स महामुने (for ^{b}) — For line 95, K1 4 subst

2** आचक्ष्व मे मुने सर्वं संदिशस्व वरं हि वै ।

K4 cont

3** यद्यदिष्टं ममापि स्यात्तद्देयं देवतातिथौ ।

— (L 97) K1 2 4 जग्राह, D2 3 5 गृहीत्वा, G5 निधाय, Bom Poona eds G(ed) आदाय (for प्रहाय) D6 T4 G5 महर्षिस्तपसा निधि (for ^{b}) — Before line 98, T1 3 G1 3 ins नारद — (L 98) Ñ2 V1 B1 2 Dn T G1–3 5 मन्दरे प(V1 °न्दारप)र्वतश्रेष्ठे (for ^{a}) K1 3 4 D5 काम्यं महद् (for कामगमं) D3 वीर कामगकानन, G3 वीर कामनमासनम् (for ^{b}). — (L 99) K4 D2 3 G5 भो सृ(D3 संसृ)ष्टं शूलपाणिना (for ^{b}) — (L 100) V3 B3 D8 6 वने, T2 G1 जन (for वनं) D5 स्वच्छन्देन (for अच्छ°) — (L 101) K2 पुरुषोत्तमा, K3 Ñ2 V B Dn D5 D1 4–6 प्रवरो°, T1 G3 प्रमदो° (for प्रमथो°) K1 4 व्रजन्ति प्रवरोत्तमा (for ^{b}) — (L 102) V2 नानारणविशारदाः, B3 °वेषधरा सदा (for ^{b}) — (L 103) Ds2 -देवाना (for -भूतानां) G2 नानादेवाभिरक्षिता (for ^{b}) — (L 104) T2 3 G1 सोमधरो (for सप्रवरो) G5 विभु (for हर) — (L 106) D4 विशेषाद् (for °षैर्) — (L 107) D3 पुष्पं तु (for पुष्पाणि) V2 om lines 107^{b}–108^{a}. K2 T1 3 G1 3 -नन्दन, B3 -वंशजम्, D3 -पूर्वजम् (for -वशज) — (L 108) K1 3 4 T3 तानि च, T2 रत्नानि (for यानि च) D3 प्रोच्छ्रितान्यमितान्यथ (for ^{b}) — (L 109) T1 3 G1 3 प्रयच्छन्ति, T4 G5 प्रस्रवन्ति (for फलन्ति स्म) D3 त उमा- (for ते द्रुमा) T3 G5 ते वैते द्रुमवल्लभा (for ^{b}) — (L 110) K1–3 B3 Ds2 D1 3–5 T G1 3–5 -विक्रम (for °म) — (L 111) T2 3 G1 5 स्वयंप्रभुं (for °भं) D3 तत्तु वनं (for तरुवनं) T2 3 G1 तत्प्रभो दु खवर्जितम् (for ^{b}) — K1 om line 112 — (L 112) K4 V2 3 B2 3 D1 5 6 वस्त्राणि, B1 वज्राणि, Dn D5 नीराणि, T1 4 G3 5 वसूनि, T2 3 G1 वसून् (for रत्नानि) — Ñ2 om line 113 — (L 113) K3 T2 G1 सुगन्धानि महाद्रुमा. (K3 °वने) (for ^{b}). — (L 114)

तरुभ्यः स्रवते तेभ्यो विविधं मनसेप्सितम् ॥
पिपासा वा बुभुक्षा वा ग्लानिश्चिन्तापि वानघ ।
न मन्दारवने वीर भवतीत्युपधार्यताम् ॥
न ते वर्णयितुं शक्या गुणा वर्षशतैरपि ।
गुणा ये तत्र वर्तन्ते स्वर्गाद्बहुगुणोत्तराः ॥
अतीव विजयेल्लोकान्समहेन्द्रान्न संशयः ।
एकाहमपि यस्तत्र वसेद्वै दितिजोत्तम ॥
स्वर्गस्यापि हि तत्स्वर्ग सुखानामपि तत्सुखम् ।
बभूव जगतः सर्वमिति मे धीयते मनः ॥

Colophon.

वैशंपायन उवाच ।

अन्धको नारदवचः श्रुत्वा तत्त्वेन भारत ।
मन्दरं पर्वतं गन्तुं मनो दध्रे महासुरः ॥
सोऽसुरान्सुमहातेजाः समानीय महाबलः ।
जगाम मन्दरं क्रुद्धो महादेवालयं तदा ॥
तं महाभ्रप्रतिच्छन्नं महौषधिसमाकुलम् ।
नानासिद्धसमाकीर्णं महर्षिगणसेवितम् ॥
चन्दनागरुवृक्षाढ्यं सरलद्रुमसंकुलम् ।
किंनरोद्गीतरम्यं च बहुनागकुलाकुलम् ॥
वातोद्धूतैर्वनैः फुल्लैर्नृत्यन्तमिव च क्वचित् ।
प्रस्रुतैर्धातुभिश्चित्रैर्विलिप्तमिव च क्वचित् ॥
पक्षिस्वनैः सुमधुरैर्नदन्तमिव च क्वचित् ।
हंसैः शुचिपदैः कीर्णं संपतद्भिरितस्ततः ॥
महाबलैश्च महिषैश्चरद्भिर्दैत्यनाशनैः ।
चन्द्रांशुविमलैः सिंहैर्भूषितं हिमसंचयम् ॥
मृगराजशताकीर्णं मृगवृन्दनिषेवितम् ॥
स मन्दरं गिरिं प्राह रूपिणं बलदर्पितः ।

$T_{2\,3}$ G_{1} लेह्यं (for पेयं) $T_{2\,3}$ G_{1} पेयं (for लेह्यं) —(L 115) G_{3} सूयते (for स्रवते) D_{3} तत्तुल्यं प्रस्रवत्येभ्यो (for ᵃ) T_{3} G_{5} विधेय (for विविधं) —(L 116) T_{1-3} G_{3} तापो (for चिन्ता) G_{5} पुन· (for [अ]नघ) —(L 117) $T_{2\,3}$ $G_{1\,3\,4}$ भवेदिति (for भवतीति) —(L. 118) Dn वक्तुं (for गुणा) —(L 119) K_{1-3} $\tilde{N}_{2}$ $B_{1\,2}$ Dn Ds D_{4} T_{1} $G_{1\,3\,4}$ वर्धन्ते (for वर्तन्ते) V_{1} गुणास्तत्र प्रवर्धन्ते, D_{3} गुणोपवर्णन तत्र (for ᵃ) —(L 120) T_{1-3} $G_{1\,3\,4}$ [अ]तिशयो (for विजयेल्) K_{2} D_{4} महेन्द्रादीन् (for समहेन्द्रान्) —(L 121) K_{1} वसते (for वसेद्वै) —(L 122) D_{1} तत्सर्वं, D_{3} स स्वर्गं, G_{6} तत्स्वर्गः (for तत्स्वर्गं) $T_{2\,3}$ अधिकं (for अपि तत्) —(L 123) $K_{1\,4}$ T_{3} बभूवुर् (for बभूव). V_{1} स्वर्गम्, Dn G_{2} पूर्वम् (for सर्वम्) $K_{1\,4}$ B_{1} $D_{4\,5}$ मति (for मन.) D_{5} इति संधीयते मति. (for ᵇ)

Colophon om. in M_{4} — *Mention of the Epic* Ds_{2} T_{3} — *Mention of Khila* V B Ds $D_{1\,3}$ — *Adhy name* K $\tilde{N}_{2}$ V B Dn Ds D_{1-5} T_{4} G_{2} अन्धकवध, D_{6} अन्धकासुरवध, $T_{2\,3}$ $G_{1\,3}$ अन्धकनारदवाक्यम् — *Adhy. no* K_{3} 139, V_{1} T_{4} G_{5} 145, V_{2} 144, V_{3} B_{2} 143, Dn Ds_{2} 141, D_{1} 130, D_{3} 163, D_{4} 140, T_{1} $G_{3\,4}$ 154, T_{2} G_{1} 156, T_{3} 163

(L. 124) T_{3} G_{5} तथ्येन (for तत्त्वेन) —(L 125) K_{3} गुसं (for गन्तुं) V_{1} दध्यौ (for दध्रे) D_{3} महाबल· (for °सुरः) —(L. 126) D_{3} दानवान् (for सोऽसुरान्) T_{4} $G_{3\,5}$ महाघोरान् (for °तेजा) D_{3} महाबलान् (for °बलः) —(L 127) K_{3} सुभृशं, K_{4} [अ]तिसुखं (for मन्दरं) —(L 128) D_{2} महौषधि-, T_{1-3} $G_{1\,3-4}$ तं भवान्या (for त महाभ्र-) T_{4} तं महाभूपतिच्छन्नं (for ᵃ) K_{1} $T_{2\,4}$ $G_{1\,3\,4\,5}$ महोदधि (for महौषधि-) B_{1} -महाकुलम् (for -समा°) — B_{1} om (hapl) lines 129–131. —(L 129) K_{1} तत, $T_{2\,4}$ $G_{3\,5}$ M_{4} नाग- (for नाना-). —(L 130) Dn_{1} -वृक्षाभं (for °ढ्यं) D_{3} चम्पकागुरुवृक्षाढ्यं (for ᵃ). K_{2} D_{4} T $G_{1\,4\,5}$ -सेवितम्, G_{2} -शोभितम् (for -संकुलम्) G_{3} सतालद्रुमसेवितम् (for ᵇ) —(L. 131) D_{3} बद्ध- (for बहु) D_{4} T $G_{1\,3-5}$ M_{4} समाकुलम् (for -कुला°) —(L. 132) V_{1} वरै, G_{2} घनै· (for वनै·) K_{3} V_{1} B_{1} D_{4} G_{2} पुष्पैर्, V_{2} पूर्णै (for फुल्लैर्) G_{2} $\tilde{N}_{2}$ प्रनृत्यन्तमिव क्वचित् (for ᵇ) — G_{1} om lines 133–136. G_{5} om. (hapl) lines 133–134 Ds_{2} G_{2} om (hapl) lines 133 —(L. 133) D_{3} T_{4} प्रसूतैर्, D_{4} प्रस्रवैर्, D_{6} (marg as above) प्रसूनैर् (for प्रस्रुतैर्) D_{5} तद्वनम् (for च क्वचित्) V_{1} G_{3} विलपन्तमिव क्वचित्, D_{4} अवलिप्तमिव क्व°, T_{2} अविविक्तमिव क्व° (for ᵇ) — T $G_{3\,4}$ M_{4} om. (hapl) line 134 —(L 134) D_{1} सर्वत (for च क्वचित्) —(L 135) $K_{2.3}$ प्रपतद्भिर्, $\tilde{N}_{2}$ V_{1} B_{2} (marg) $D_{3\,4}$ T_{2-4} $G_{2.3\,5}$ M_{4} तपस्य° (for संपत°) K_{1} नदद्भिश्च समंतत. (for ᵇ) —(L. 136) D_{3} बृहद्भिर् (for चर°) D_{6} -दानवै. (for -नाशनैः). —(L. 137) $G_{1.4}$ प्रसुप्तैर् (for चन्द्रांशु) K_{1} तदसंशयम्, K_{4} च न सश°, V_{2} B_{1} Dn D_{2} T_{2} हेमसंच°, Ds_{2} रत्नसंच°; D_{3}

वेत्सि त्वं हि यथावध्यो वरदानादहं पितुः ॥
मम चैव वशे सर्वं त्रैलोक्यं सचराचरम् ।
प्रतियोद्धुं न मां कश्चिदिच्छत्यपि गिरे भयात् ॥
पारिजातवनं चास्ति तव सानौ महागिरे ।
सर्वकामप्रदैः पुष्पैर्भूषितं रत्नमुत्तमम् ॥
तदाचक्ष्वोपभोक्ष्यामि तद्वनं तव सानुजम् ॥
किं करिष्यसि क्रुद्धस्त्वं मनो हि त्वरते मम ॥
त्रातारं नानुपश्यामि मया खल्वर्दितस्य ते ।
इत्युक्तो मन्दरस्तेन तत्रैवान्तर्हितोऽभवत् ॥
ततोऽन्धकोऽतिरुषितो वरदानेन दर्पितः ।
मुमोच नादं सुमहदिदं वचनमब्रवीत् ॥
मया नाम याच्यमानो यस्मान्न बहु मन्यसे ।
अहं चूर्णीकरोमि त्वां बलं पर्वत पश्य मे ॥
एवमुक्त्वा गिरेः शृङ्गमुत्पाट्य बहुयोजनम् ।
निष्पिपेष गिरेस्तस्य शृङ्गेऽथान्यत्र वीर्यवान् ।
सह तैरसुरैः सर्वैर्वरदानेन दर्पितः ॥
तं प्रच्छन्ननदीजालं भज्यमानं महागिरिम् ।
विदित्वा भगवान्रुद्रश्चकारानुग्रहं गिरेः ॥
सविशेषतरं वीर मत्तद्विपमृगायुतम् ।
नदीजालैर्बहुतरैराचितं चित्रकाननम् ।
नभश्च्युतैः पुरा यद्वत्तद्वदेव विराजते ॥
अथ देवप्रभावेन शृङ्गाण्युत्पाटितानि तु ।
क्षिप्तानि चासुरानेव घ्नन्ति घोराणि भारत ॥
क्षिप्त्वा ये प्रपलायन्ते शृङ्गाणि तु महासुराः ।
शृङ्गैस्तैस्तैः स्म वध्यन्ते पर्वतस्य जनाधिप ॥
ये स्वस्थास्त्वसुरास्तत्र तिष्ठन्ति गिरिसानुषु ।

जनमेजय (for हिमसंचयम्) K_1 रुषित तदसंशयम् (for ^{b}) —(L 138) K_2 -गणाकीर्णं , B_3 Dn D_1 $T_{2\ 3}$ $G_{1\ 2\ 4}$ समा° (for -शता°) D_2 चित्रैर्मृगै समाकीर्ण (for ^{a}) D_2 वृष- (for मृग-) D_3 द्वंद्व- , G_2 -बद्ध- (for -वृन्द-) V_2 -विलोडितम् (for -निषेवि°) — After line 138, V_2 ins

4** चमरीगणसंकीर्णं शबरीगणसंकुलम् ॥

—(L 139) K_2 $V_{1\ 2}$ $B_{2\ 3}$ T_4 G_5 मन्दर- (for °रं) K_1 D_3 -दर्पितम् (for °त) —(L 140) D_3 मां त्वं तथा (for त्वं हि यथा) —(L 141) K_3 $\tilde{N}_2$ V_1 वशं , B_1 रणे (for वशे) —(L 142) K_2 इच्छेदपि महाभयात् (for ^{b}) —(L 144) $\tilde{N}_2$ D_4 वनम् (for रत्नम्) K_1 भूषित रत्नसंयुतम् (for ^{b}) —(L 145) $K_{1\ 3\ 4}$ [अ]द्य (for [उ]प-) —(L 146) D_3 क्रुद्धस्ते , T_{1-3} $G_{1\ 3\ 4}$ रुष्टस्त्व , G_2 सक्रुद्धो , G_5 M_4 रुद्धस्त्वं (for क्रुद्धस्त्वं) K_2 $V_{1\ 3}$ $B_{1\ 2}$ (marg) $_3$ रमते (for त्वरते) D_3 रुद्रः साहाय्यमीश्वर (for ^{b}) —(L 147) V_2 B_3 $T_{2\ 3}$ G_{3-5} [अ]त्र , D_2 प्र- , D_3 (marg) [ए]व , $G_{2\ 4}$ [अ]धि- (for [अ]नु-) D_3 मनागपि न पश्यामि , D_4 त्राता नात्र प्रप° (for ^{a}) D_3 हतस्य (for [अ]र्दितस्य) —(L 148) K_3 इत्युक्ते (for °क्तो) —(L 149) T_1 $G_{1\ 3\ 4}$ -कुपितो (for -रुषितो) T_{1-3} $G_{1\ 4}$ गर्वित (for दर्पित) —(L 151) K_1 (marg) $_2$ D_4 त्वं वै , K_4 मानाद , Dn $T_{3\ 4}$ वै त्वं , D_1 न मां , D_3 गिरे (for नाम) D_2 त्वं वै मया याच्यमानो , D_6 $T_{1,\ 2}$ $G_{1\ 3-5}$ M_4 मया तु याच्यमानोऽथ , G_2 मया त्वं याच्यमानो वै (for ^{a}) K_2 V_1 D_4 यन्मा , T_4 G_5 M_4 यस्त्वं (for यस्मान्) —(L 154) K_3 शृङ्गं , T_1 तत्र (for तस्य) K_3 B_1 Dn_2 T $G_{1\ 4}$ M_4 शृङ्गेषु , $\tilde{N}_2$ D_5 शृङ्गं च (for शृङ्गेऽथ) D_2 शृङ्गाण्यन्यानि वीर्यवान् , D_3 शृङ्गाण्यस्य स वीर्य° (for ^{b}) —(L 155) K_3 V_2 $T_{1\ 2\ 4}$ $G_{3\ 5}$ M_4 सहितैर् (for सह तैर्) K_4 सहितै सोऽसुरै सर्वैर् (for ^{a}) —(L 156) V_1 $B_{1\ 3}$ D_6 प्रस्विन्न- (for प्रच्छन्न-) T $G_{1\ 3-5}$ -लताजालं , M_4 महा° (for -नदी°) D_6 (marg) तं प्रच्छिन्नलताजालं (for ^{a}) Dn_1 Bom Poona eds G(ed) मन्यमान (for भज्य°) D_6 (marg as above) T $G_{1\ 3-5}$ महाद्रुमम् (for °गिरिम्) M_4 मन्यमान लताद्रुमम् (for ^{b}) —(L 157) T_2 $G_{1\ 4}$ शंभुश् (for रुद्रश्) — T_2 om line 158 —(L 158) $\tilde{N}_2$ घोरं , Dn_2 T_1 $G_{3\ 5}$ M_4 वीरं (for वीर) V $B_{2\ 3}$ $D_{1\ 6}$ $G_{1\ 3}$ M_4 -द्विज- (for -द्विप-) K_2 -गणायुतम् , D_5 -समाकुलम् (for मृगायुतम्) $\tilde{N}_2$ मत्तद्विजगणाकुलम् , B_1 D_5 D_4 मत्तद्विजगणायुतम् , D_3 मत्तद्विजगणैर्युतः (for ^{b}) —(L 159) B_3 T_2 -जलैर् (for -जालैर्) D_2 बहुविधैर् , G_3 °वृत्तैर् (for °तरैर्) D_3 नदीजलैर्बहुविधै (for ^{a}) K_{1-3} $V_{2\ 3}$ B Dn $D_{2\ 4\ 5}$ G_2 आयुतं , D_1 आवृतं , D_6 आप्लुतं (for आचितं) D_3 T $G_{3\ 5}$ आप्लु(D_3 शोभि- , T_1 G_3 आवृ- , T_2 आचि)तश्चित्रकाननः (for ^{b}) —(L 160) K_2 नभश्चरै. , T_4 नगैश्चित्रै (for नभश्च्युतै) D_3 नभश्चरै पुरा युद्धाद् (for ^{a}) D_3 गिरिशृङ्गैर् , M_4 तत्तदेव (for तद्व°) Dn विराजितम् , Ds_1 हि राजते , Ds_2 हि राजितम् (for विराजते) —(L 161) D_3 M_4 -प्रसादेन (for -प्रभावेन) D_3 [अ]भ्युदितानि ; $T_{1\ 2}$ [उ]त्पादि° (for [उ]त्पाटि°) —(L 162) K_4 M_4 [अ]सुरैरेव , D_5 °रैणैव (for °रानेव) Bom Poona eds G(ed) वीराणि (for घो°) —(L 163) $K_{1\ 4}$ $\tilde{N}_2$ V_1 $D_{1\ 2}$ प्रपलायन्ति (for °यन्ते) D_5 क्षिप्त्वा शीघ्रं पलायन्ति (for ^{a}) —(L 164) K_2 D_6 T_4 G_5 M_4 एव ; V D_3 $D_{3\ 5}$ ते स्म,

शृङ्गैस्ते तस्य बध्यन्ते मन्दरस्य महागिरेः ॥
ततोऽन्धकस्तदा दृष्ट्वा सेनां तां सूदितां तथा ।
रुषितः सुमहानादं नदित्वेदं तदाब्रवीत् ॥
आह्वयैतं वनं यस्य युद्धार्थमुपतिष्ठतु ।
किं त्वयाचल युद्धेन हताः स्म च्छद्मना रणे ॥
एवमुक्ते त्वन्धकेन वृषभेण महेश्वरः ।
संप्राप्तः शूलमुद्यम्य देवोऽन्धकजिघांसया ॥
प्रमथानां गणैर्धीमान्वृतो वै बहुलोचनः ।
तथा भूतगणैश्चैव धीमान्भूतगणेश्वरः ॥
प्रचकम्पे ततः कृत्स्नं त्रैलोक्यं रुषिते हरे ।
सिन्धवश्च प्रतिस्रोतमूहुः प्रज्वलितोदकाः ॥
जग्मुर्दिशोऽभिदाहं च सर्वतो हरतेजसा ।
युयुधुश्च ग्रहाः सर्वे विपरीता जनाधिप ॥
चेलुश्च गिरयस्तत्र काले कुरुकुलोद्वह ।
प्रववर्षाथ पर्जन्यः सधूमाङ्गारवृष्टिमान् ॥
उष्णभाश्चन्द्रमाश्चासीत्सूर्यः शीतप्रभस्तथा ।
न ब्रह्म विविदुस्तत्र मुनयो ब्रह्मवादिनः ॥
वडवाः सुषुवुर्गाश्च गावोऽश्वानपि चानघ ।
पेतुर्वृक्षाश्च मेदिन्यामच्छिन्ना भस्मसात्कृताः ॥
बाधन्ते वृषभा गाश्च गावश्चारुरुहुर्वृषान् ।
राक्षसा यातुधानाश्च पिशाचाश्चापि सर्वशः ॥
विपरीतं जगद्दृष्ट्वा महादेवस्तथा गतम् ।
मुमोच भगवाञ्शूलं प्रदीप्ताग्निसमप्रभम् ॥
तत्पपात हरोत्सृष्टमन्धकोरसि दुर्धरम् ।
भस्मसाच्चाकरोद्रौद्रमन्धकं साधुकण्टकम् ॥
ततो देवगणाः सर्वे मुनयश्च तपोधनाः ।
शंकरं तुष्टुवुश्चैव जगच्छत्रौ निबर्हिते ॥
देवदुंदुभयो नेदुः पुष्पवृष्टिः पपात ह ।

T_3 ते च (for तै स्म) K_4 D_1 वध्यन्ति (for वध्यन्ते) K_1 $B_{1\,3}$ Dn शृङ्गैस्तैस्ते स्म बध्यन्ति , B_2 °स्तैर्वध्यमाना (for ^{a}) K_2 D_2 om (hapl) lines 164^b–166^a K_3 पर्वताश्च (for °तस्य) — (L 165) V_3 [अ]मरास् , D_4 [अ]व° (for [अ]सु°) — (L 166) $\tilde{N}_2$ $V_{1\,2}$ B Dn Ds $D_{1\,3\,5\,6}$ $T_{1\,3\,4}$ $G_{2\,5}$ M_4 तेन स्म , V_3 तैर्न स्म , D_4 तैस्तै स्म (for ते तस्य) — (L 167) D_2 G_4 स्वां (for तां) $\tilde{N}_2$ V B $D_{3\,5\,6}$ मृदितां , G_1 मर्दितां (for सूदितां). T_1 सेनां तां सादितां नृप (for ^{b}) — (L 168) G_2 मर्षित (for रुषित) K_4 नदन्नेव , $V_{1\,2}$ B_1 नर्दित्वेदं , D_2 T_1 G_2 नर्दित्वैवं , T_4 अचलं च (for नदित्वेद) $T_{2\,3}$ $G_{1\,3-5}$ नर्दित्वेदमथाब्रवीत् (for ^{b}) — (L 169) $K_{1\,3\,4}$ D_4 आह्वयैनं , Ds_1 T_3 °येत , $D_{4\,5}$ °यैतं , D_6 °यैतद् , G_1 °ये तु , G_5 M_4 °ये तद् (for °ये तं) V_1 बलं (for वन) — (L 170) K_4 किं त्वया बलयुक्तेन (for ^{a}) V_3 om (hapl) lines 170^b–171^a $T_{2,3}$ $G_{1\,4}$ महता (for हता स्म) K_3 ब्रह्मणा (for च्छद्मना) — T_1 om lines 171–174 — (L 171) D_5 उक्तस् (for उक्ते) $K_{1\,4}$ एवमुक्तेऽन्धकेनाशु (for ^{a}) V_3 महासुरम् (for महेश्वर) — (L 172) G_2 शैलम् (for शू°). — (L 173) V_3 B_2 (marg as above) $_3$ D_6 G_2 चैव (for धीमान्) G_2 om 173^b–174^a — (L 174) D_5 -गणावृतः (for -गणेश्वर) — (L 175) K_4 V_1 $D_{4\,5}$ कुपिते (for रुषिते) B_3 त्रैलोक्यं रुषितेन वै (for ^{b}) — (L 177) T_1 दानवाश्च (for ऽभिदाहं च) K_2 सर्वाश्च , K_4 सर्वा वै , $\tilde{N}_2$ G_2 सर्वत्र ; B_1 सर्वास्ता (for सर्वतो) — (L 178) D_2 नराधिप (for जना°) — (L. 179) B_3 गिरिजास् (for गिरयस्) T_4 G_5 M_4 सर्वे (for तत्र) G_5 M_4 तथा (for काले) — (L 180) D_4 ववर्षाथ च पर्जन्य (for ^{a}). K_1 D_5 (marg) वृष्टिभि , K_3 B D T G M_4 -वृष्टय , K_3 -वृष्टिक (for °मान्) K_4 सधूमोद्गारवृष्टय (for ^{b}) — (L 181) G_5 शीतभा सूर्य एव च (for ^{b}) — (L 182) D_4 न ब्राह्मण्य विदुस्तत्र , $\tilde{N}_2$ D_5 न च ब्रह्मविदस्तत्र (for ^{a}) — (L 183) $K_{1\,2\,4}$ $D_{2\,3\,5}$ $T_{1\,2}$ $G_{1\,3-5}$ M_4 गावो (for गाश्च) T_4 वाडवा सुषुवुर्गावो (for ^{a}) K_1 गाश्च (for गावो). D_4 (marg as above) $_5$ भारत (for चानघ). — K_3 om lines 184–186 — (L 184) D_3 अविच्छिन्ना , G_2 च मेदिन्या (for च मेदिन्याम्) $\tilde{N}_2$ सुच्छिन्ना , V_1 उच्छिन्ना , D_3 विनाग्निं , T_2 $G_{1\,4}$ अभिन्ना ; G_2 संछिन्ना , G_3 अर्चिषा (for अच्छिन्ना) — (L 185) $K_{1\,4}$ $V_{1\,3}$ B D_3 D_6 बाधन्ति (for °न्ते) T_3 $G_{1\,4\,5}$ M_4 गोभि ; T_4 गावो (for गाश्च) V_3 बाधयन्ति वृषा गाश्च , $D_{1\,4}$ बाध(D_4 धाव)न्ति वृषभानश्वा ; D_5 धावन्ति वृषभान्गावो , $T_{1\,2}$ G_3 बाध्यन्ते वृषभा गोभिर् (for ^{a}) — (L 186) K_3 राक्षस्यो (for °सा) $T_{1\,2}$ $G_{1\,3\,4}$ राक्षसा दानवाश्चैव (for ^{a}) — After line 186, $T_{1\,3}$ G_3 ins .

5** अन्धकं पुरतः कृत्वा परिवव्रुर्वृषध्वजम् ।
अन्धकोऽपि महातेजा बाणैरपि ववर्ष तम् ॥
[(L 1) T_3 परिवृत्य (for °वव्रुर्)]

— (L 189) V_1 उत्पपात हरोत्क्षिप्तं (for ^{a}) — (L. 190) D_3 रौद्र (for रौद्रम्) G_2 देव- (for साधु-) — (L. 191) D_2 ऋषयश् (for मुन°). — (L 192) D_3 निबर्हि-

त्रैलोक्यं निर्वृतं चासीन्नरेन्द्र विगतज्वरम् ॥
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।
जेपुश्च ब्राह्मणा वेदानीजुश्च क्रतुभिस्तथा ॥
ग्रहाः प्रकृतिमापेदुरूहुर्नद्यो यथा पुरा ।
न जज्वाल जले वह्निराशाः सर्वाः प्रसेदिरे ॥
मन्दरः पर्वतश्रेष्ठः पुरेव विरराज ह ।
श्रिया परमया जुष्टः सर्वतेजःसमुच्छ्रयात् ॥
रेमे सोमश्च भगवान्पारिजातवने हरः ।
सुप्रचारान्सुरान्कृत्वा शक्रादीन्धर्मतः प्रभुः ॥

Colophon

29 D

K $\tilde{N}_2$ V B D T G M_4 cont

जनमेजय उवाच ।

मुनेऽन्धकवधः श्राव्यः श्रुतोऽयं खलु भो मया ।
शान्तिस्त्रयाणां लोकानां कृता देवेन धीमता ॥
निकुम्भस्य हतं देहं द्वितीयं चक्रपाणिना ।
यदर्थं च यथा चैव तद्भवान्वक्तुमर्हति ॥

वैशंपायन उवाच ।

श्रद्दधानस्य राजेन्द्र वक्तव्यं भवतोऽनघ ।
चरितं लोकनाथस्य हरेरमिततेजसः ॥
द्वारवत्यां निवसतो विष्णोरतुलतेजसः ।
समुद्रयात्रा संप्राप्ता तीर्थे पिण्डारके नृप ॥
उग्रसेनो नरपतिर्वसुदेवश्च भारत ।
निक्षिप्तौ नगराध्यक्षौ शेषाः सर्वे विनिर्गताः ॥
पृथग्बलः पृथग्धीमाल्लोकनाथो जनार्दनः ।
गोष्ठ्यः पृथक्कुमाराणां नृदेवामरतेजसाम् ॥
गणिकानां सहस्राणि निःसृतानि नराधिप ।
कुमारैः सह वार्ष्णेयै रूपवद्भिः स्वलंकृतैः ॥
दैत्याधिवासं निर्जित्य यदुभिर्दृढविक्रमैः ।
वेश्या निवेशिता वीर द्वारवत्यां सहस्रशः ॥
सामान्यास्ताः कुमाराणां क्रीडानार्यो महात्मनाम् ।
इच्छाभोज्या गुणैरेव राजन्या वेशयोषितः ।
स्थितिरेषा हि भैमानां कृता कृष्णेन धीमता ।
स्त्रीनिमित्तं भवेद्वैरं मा यदूनामिति प्रभो ॥

तम्, T_4 G_5 M_4 निपातिते (for निबर्हिते) K_2 $\tilde{N}_2$ जगच्छत्रोर्निबर्हणे (for ^{b}) — (L 193) V_1 -वर्षं (for वृष्टि) — (L 194) $G_{1\,4}$ विवृतं (for निर्वृतं) — (L 196) K_3 $D_{4\,5}$ जगुश् (for जेपुश्) T_4 जगाच्च ब्राह्मणा देवा (for ^{a}) T_4 ईजते (for ईजुश्च) — (L 197) T_4 आपन्ना (for आपेदुर्) D_3 सर्वमासीद्, $T_{2\,3}$ आसन्नद्यो (for ऊहुर्नद्यो) — (L 198) V_1 B_1 जले त्वग्निर्, D_2 G_3 जलेष्वग्निर् (for जले वह्निर्) B_1 $G_{1\,4}$ प्रपेदिरे, B_3 प्रसेहिरे (for °दिरे) — (L 199) $K_{2\,3}$ V_2 पुनरेव (for पुरेव वि-) D_4 पुनरेव ररास ह (for ^{b}) — (L 200) D_5 युक्तः (for जुष्टः) — (L 202) K_1 D_1 सुप्रवरान्, K_3 V_2 सप्रचा°, D_2 सप्रधानान्, D_6 संप्रचारान्, T_4 G_5 M_4 सुप्रसन्नान् (for °चारान्) D_4 प्रचरानसुरान्कृत्वा (for ^{a}) $K_{1\,3\,4}$ सर्वत·, D_1 क्रमत (for धर्मतः).

Colophon — *Mention of the Epic* Ds_2 T_3 — *Mention of Khila* V B Dn_2 Ds D_1 — *Adhy name* · K $\tilde{N}_2$ V B D T G_{1-3} अन्धकवध — *Adhy no* K_3 140, V_1 146, V_2 145, V_3 B_2 144, Dn Ds_2 142; D_1 138, D_3 T_4 151, D_4 141, T_1 $G_{3\,4}$ M_4 155, T_2 G_1 157, T_3 164, G_5 158

29 D

(L 1) T_{1-3} $G_{1\,3\,4}$ मृधे (for मुने) K_2 श्रुत्य, G_2 त्वत्त (for श्राव्य) M_4 ऽथ (for ऽय) K_2 यो, $D_{1\,5}$ [अ]तो (for भो) — (L 3) D_3 निकुम्भं निहतं वीरं (for ^{a}) V_1 त्वयोक्तं (for द्वितीयं) — (L 5) K_2 $\tilde{N}_2$ V B D_{1-6} $T_{1\,3\,4}$ G M_4 राजर्षे (for राजेन्द्र) B_1 M_4 मम, D_3 मया (for ऽनघ) — V_2 $T_{2\,3}$ G_3 om (hapl) line 7 — (L 7) D_2 (marg as above) $G_{1\,4}$ अमित- (for अतुल-) T_4 -वर्चस (for -तेजस·) D_3 हरेरुत्तमतेजस (for ^{b}) — (L 8) T_{1-3} $G_{1\,3\,4}$ पुण्यकरे (for पिण्डारके). — (L 11) D_4 पृथग्वर्गं, T_4 °ग्बलं (for °ग्बलः) V_1 पृथुर् (for पृथग्) D_3 श्रीमान् (for धी°) — (L 12) K_4 D_1 पृथु- (for पृथक्) $K_{1\,3\,4}$ $\tilde{N}_2$ V_2 Dn $D_{1\,3\,5}$ $T_{1\,2\,4}$ $G_{1\,3}$ [अ]मित·, D_6 [अ]सम· (for [अ]मर·) — (L. 13) V_2 निर्गतानि, T_1 निवृत्तानि (for निःसृतानि) — (L 14) $G_{1\,4}$ कुमारा (for °रैः) — (L 16) D_2 तीरे, D_5 वीरैर् (for वीर) D_3 वेश्या निवासितास्तत्र (for ^{a}) G_5 द्वारकायां (for °वत्यां) — (L 17) $K_{1\,3\,4}$ $D_{1\,3\,5}$ क्रीडनार्थं (K_3 °र्था, K_4 °र्थे, D_3 °य) (for क्रीडानार्यो) — (L 18) K_3 -भोज्य·, $\tilde{N}_2$ T $G_{1\,3-5}$ M_4 -भोग, V B Ds_1 $D_{2\,6}$ G_2 -भोग्या, D_5 -भोगा (for -भोज्या) K_2 पुरे चैव

रेवत्या चैकया सार्धं बलो रेमेऽनुकूलया ।
चक्रवाकानुरागेण यदुश्रेष्ठः प्रतापवान् ॥
कादम्बरीपानकलो भूषितो वनमालया ।
चिक्रीड सागरजले रेवत्या सहितो बलः ॥
षोडश स्त्रीसहस्राणि जले जलजलोचनः ।
रमयामास गोविन्दो वैश्वरूप्येण सर्वकृत् ॥
अहमिष्टा मया सार्धं जले वसति केशवः ।
इति ता मेनिरे सर्वा नारायणपराः स्त्रियः ॥
सर्वाः सुरतचिह्नाङ्क्यः सर्वाः सुरततर्पिताः ।
मानमूहुश्च ताः सर्वा गोविन्दे बहुमानजम् ॥
अहमिष्टाहमिष्टेति स्निग्धे परिजने तदा ।
नारायणस्त्रियः सर्वा मुदा शश्लाघिरे शुभा. ॥
करजद्विजचिह्नानि कुचाधरगतानि ताः ।
दृष्ट्वा दृष्ट्वा जहृषिरे दर्पणेष्वङ्गलक्षणम् ॥
गोत्रमुद्दिश्य कृष्णस्य जगिरे कृष्णयोषितः ।
पिबन्त्य इव कृष्णस्य नयनैर्वदनाम्बुजम् ॥
कृष्णार्पितमनोदृष्ट्यः कान्ता नारायणस्त्रियः ।
मनोहरतरा राजन्नभवन्नेकनिश्चयाः ॥
एकार्पितमनोदृष्ट्यो नेर्ष्या ताश्चक्रिरेऽङ्गनाः ॥
नारायणेन देवेन तर्प्यमाणमनोरथाः ॥
शिरांसि गर्वितान्यूहुः सर्वा निरवशेषतः ।
वाल्लभ्यं केशवमयं वहन्त्यश्चारुदर्शनाः ॥
ताभिस्तु सह चिक्रीड सर्वाभिर्हरिरात्मवान् ।
वैश्वरूप्येण विधिना समुद्रे विमले जले ॥
उवाह सर्वगन्धाढ्यं स्वच्छं वारि महोदधिः ।
तोयं चालवणं वीर वासुदेवस्य शासनात् ॥
गुल्फदघ्नं जानुदघ्नमूरुदघ्नमथापि वा ।
नार्यस्ताः स्तनदघ्नं वा जलं समभिकाङ्क्षितम् ॥
सिषिचुः केशवं पत्न्यो धारा इव महोदधिम् ।
सिषेच ताश्च गोविन्दो मेघः फुल्ललता इव ॥
अवलम्ब्यापराः कण्ठे हरिं हरिणलोचनाः ।
उपगूहस्व मां वीर पतामीत्यब्रुवन्स्त्रियः ॥

(for गुणैरेव) D_3 जात्या वै वारयोषित (for ^{b}) — (L 19) D_3 तेनेयं (for भैमानां). — (L 22) D_5 बलः (for यदु-) — (L 23) G_1 -काले (for -कलो). V_1 वर- (for वन-) — (L 26) $\tilde{N}_2$ $V_{1,2}$ B_2 D_5 D_6 T_4 -रूपेण (for -रूप्येण) K V_3 $B_{1,3}$ Dn D_{1-3} $_5$ T_{1-3} G_{1-4} M_4 विश्व- (G_3 बहु)रूपेण सर्वकृत् (K_3 °दा ; T_1 G_3 °दृक्); D_4 वैश्वरूपेण विश्वकृत् (for ^{b}) — T_2 om lines 27–29 — (L. 27) D_2 विशति (for वसति). — (L 28) D_3 om. lines 28^{b}–32^{a} B_1 M_4 -वर- (for -परा) K $\tilde{N}_2$ Dn D_1 G_2 रात्रौ (K_2 मुदा) नारायणस्त्रियः, D_5 रतौ नारायणे पराः (for ^{b}) — (L 29) D_4 -चिह्नाङ्गा ; D_6 -चित्राङ्कय·, D_5 -बद्धाङ्कयः, T_1 -चिह्नाढ्या (for °ङ्कय·) — (L 31) K_{3} $_4$ स्निग्धा· (for स्निग्धे) — (L. 32) D_3 सश्लेषिरे (for शश्लाघिरे) — T_4 om lines 33–37 — (L 33) T_{2} $_3$ G_1 $_3$ $_4$ मकरध्व(G_3 °द्वि)जच्चिह्नानि (for ^{a}) K_2 वक्त्राधर- (for कुचा°) — (L 34) K_4 D_4 जहर्षिरे (for जहृषिरे) D_3 T_3 G_5 दृष्ट्वा जहृषिरे देव्यो (D_3 राजन्) (for ^{a}) K_4 $\tilde{N}_2$ V_1 $_3$ B D_5 D_4 $_6$ T G_{1} $_{3-5}$ M_4 दर्पणे (K_4 B_3 D_4 °र्पेण) कमलेक्षणा., D_3 कामाकुलितमानसा (for ^{b}) — (L 35) D_3 दर्पणे गात्रमुद्दिश्य (for ^{a}). $K_{1,3}$ $_4$ om (hapl) lines 35^{b}–36^{a} — (L. 36) D_4 नयनैर्नयनाम्बुजम् (for ^{b}) — (L. 37) G_5 M_4 कृष्णायत्त- (for °र्पित-) — (L 38) K_4 ता भवान्तकनिश्चया· ; T_2 $G_{1,3}$ $_4$ क्रीडाकल्पि(G_3 °कुलि)-तनि° (for ^{b}) — (L 39) T_2 G_1 $_4$ $_5$ चक्रुर् (for चक्रिरे). K_3 मताः (for ऽङ्गना) — (L 41) T_4 (also as above) मनांसि (for शिरांसि) K_1 $_3$ $_4$ ग्रथितानि (for गर्वि°). T_{1-3} G_1 $_3$ $_4$ दिव्याननुभवन्भोगान् (for ^{a}) — (L 42) V_3 वल्लभ्यः, T_3 सुरागं (for वाल्लभ्यं) K_4 वर्णयन्त्य शिवमयं, D_3 वाल्लभ्यं कृष्णविषयं, T_1 $_2$ G_1 $_3$ $_4$ सुरागं (T_1 या रागं) केशवे नित्यं (for ^{a}) — (L 43) K_3 चिक्रीडे, G_3 विक्रीडन् (for चिक्रीड) — (L 44) D_3 उद्प्लवमथापि च (for ^{b}). — D_3 om lines 45–47 — (L 45) T_{1-3} G_1 $_4$ उपेत्य (for उवाह) K_3 $_4$ V_3 D_1 नीरं (for वारि) T_{1-3} G_1 $_3$ $_4$ स्वच्छं जलमथो दधौ (T_2 °दौ), G_5 M_4 स्वच्छं सलिलमम्बुधिः (for ^{b}) — T_{1-3} G_{1} $_{3,4}$ om (hapl.) lines 46–49 — (L 46) $\tilde{N}_2$ B_3 तोयं नारायणसृ(B_3 °णं सृ)ष्ट, V_3 तोयं च लावण सृष्टं, T_4 तोयं विलवण सृष्टं, G_5 तोयेषु लवण वीर (for ^{a}) — (L 47) D_5 उरोदघ्नम् (for ऊरु°) — (L 48) M_4 जलं सन्दिश्य काङ्क्षिण (for ^{b}). — (L 49) Bom ed G(ed) धीरा (for धारा) $\tilde{N}_2$ D_3 महागिरिम् (for महोदधिम्) T_4 धारा शुभमहोदधे (for ^{b}). — (L 50) K_2 सिषिचे (for सिषेच) T_{1-3} $G_{1,3}$ $_4$ ताभिश्च सह गोविन्दो (for ^{a}) K_4 कुललता, D_3 G_2 पुष्पलता (frr फुल्ल°) K_3 मेघाकुलजटा (*sup lin* °ना) इव (for ^{b}) — (L 51) G_2 काले (for कण्ठे) — (L 52) $\tilde{N}_2$ धीर (for वीर) K_2 पुषास्मि, K_4 भीतास्मि (for

काश्चित्काष्ठमयैस्तेरुः प्लवैः सर्वाङ्गशोभनाः ।
क्रौञ्चबर्हिणनागानामाकारसदृशैः स्त्रियः ॥
मकराकृतिभिश्चान्या मीनाभैरपि चापराः ।
बहुरूपाकृतिधरैः प्लुप्लुवुश्चापराः स्त्रियः ॥
स्तनकुम्भैस्तथा तेरुः कुम्भैरिव तथापराः ।
समुद्रसलिले रम्ये हर्षयन्त्यो जनार्दनम् ॥
रराम सह रुक्मिण्या जले तस्मिन्मुदा युत ।
येनैव कार्ययोगेन रमत्यमरसत्तमः ।
तत्तदेव हि ताश्चक्रुर्मुदा नारायणस्त्रियः ॥
तनुवस्त्रावृतास्तन्व्यो लीलायन्त्यस्तथापराः ।
चिक्रीडुर्वासुदेवस्य जले जलजलोचनाः ॥
यस्या यस्यास्तु यो भावस्तां तां तेनैव केशवः ।
अनुप्रविश्य भावज्ञो निनायात्मवशं वशी ॥
हृषीकेशोऽपि भगवान्हृषीकेशः सनातनः ।
बभूव वैश्वरूप्येण कान्तावशगतः प्रभुः ॥
कुलशीलसमोऽस्माकं योग्योऽयमिति मेनिरे ।
वैश्वरूप्येण वर्तन्तमङ्गनास्ता जनार्दनम् ॥
दक्षा दाक्षिण्ययुक्तं तं स्मितपूर्वाभिभाषिणम् ।
कृष्णं भार्याश्चकमिरे भक्त्या च बहु मेनिरे ॥
पृथग्गोष्ठ्यः कुमाराणां प्रकाशं स्त्रीगणैः सह ।
अलंचक्रुर्जलं वीराः सागरस्य गुणाकराः ॥
गीतनृत्यविधिज्ञानां तासां स्त्रीणां जनेश्वर ।
तेजसाप्याहृतानां ते दाक्षिण्यात्तस्थिरे वशे ॥
शृण्वन्तश्चारुगीतानि तथा स्वभिनयान्यपि ।
तूर्याण्युत्तमनारीणां मुमुदुर्यदुपुंगवाः ॥
पञ्चचूडास्ततः कृष्णः कौबेर्यश्च वराप्सराः ।
माहेन्द्रीश्चानयामास वैश्वरूप्येण हेतुना ॥
ताः प्रोवाचाप्रमेयात्मा सान्त्वयित्वा जगत्प्रभुः ।
उपस्थिताश्च प्रणताः कृताञ्जलिपुटास्तथा ॥
क्रीडायुवत्यो भैमानां प्रविशध्वमशङ्किताः ।
मत्प्रियार्थं वरारोहा रमयध्वं च यादवान् ॥
दर्शयध्वं गुणान्सर्वान्नृत्यगीतै रहःसु च ।

पतामि) D5 प्रिया (for स्त्रिय) — (L 53) K3 D2 चेरु , D3 स्वै स्वैः (for तेरु) M4 om (hapl) lines 53b–57a — (L 54) G2 -सदृशा (for °शै) — (L 55) T2 3 G1 4 कुसूलाकृतिभिश्चान्या , G3 कृकरा° (for a) — (L 57) K1 चेरु , D5 (before corr) पेतु (for तेरु) G3 काश्चित्काष्ठमयैस्तेरु (for a) — (L 58) Cal ed सलिले तु समुद्रस्य (for a) — D2 om line 59 — (L 59) K2 रामेण, K3 D5 T1–3 G1 3–5 M4 रेमे च (for रराम) K3 Dn3 पुन (for युत) — (L 60) T1–3 G1, 3, 4 येनैव देवकार्येण (for a). K3 Dn T1–3 G1–4 रमते (for °ति) — (L 61) V1 सर्वा (for मुदा) — (L 62) T2 G1 3 4 -वस्त्रधरास् (for -वस्त्रावृतास्) D6 लीलावन्त्यस् , D6 (marg) विवस्त्राश्च ; T1–3 G1 3–5 M4 लीलावत्यस् (for °यन्त्यस्). — (L 64) K4 यासा यासा (for यस्या यस्यास्). Ñ2 D3 तस्यास् (for ता तां) K2 तास्तास्तेनैव योषित. (for b) — (L 67) K1 देशकालज्ञ , K2 V1 2 D2 देश(V1 2 °व)-रूपेण , K3 4 Dn देशकालेन , V3 B Ds1 D6 T1–3 G1, 3–5 M4 वेषरूपेण ; D3 5 चैव रूपेण , T4 वररूपेण (for वैश्वरूप्येण) — (L 68) G5 रेमिरे (for मेनिरे). — (L 69) K B1 D2 देश- , Ñ2 Ds2 वश- , V B2 3 Dn Ds1 T4 वेश-, D6 T1–3 G1 3–5 M4 वेष- (for वैश्व-) D3 वेषरूपवयोभिस्तम् (for a) — (L 70) B2 Bom Poona eds. तदा (for दक्षा) K4 -युक्तानां (for -युक्तं तं) — (L 71) D1 हर्षाच्च् , T1–3 G1 3 भक्ताश् (for भक्त्या) — (L 72) V1 B2 प्रकाश- , T1–3 G1 4 5 M4 °मं (for °श) — (L. 74) K2 3 B2 Dn1 Ds2 D1 4 जनेश्वर , V1 नरेश्वर , G1 4 जनार्दन (for जनेश्वर) — (L 75) K2 V2 [आ]प्यायितानां , K3 [अ]थाहृ° , V3 D4 व्याहृ° , D3 [अ]प्याहृतास्ते (for °हृताना) — (L 76) Ñ2 शुद्ध- , V1 3 D3 D3 4 T1 2 4 स्वन- , V2 स्वस्व- , B1 2 D6 स्वनु- , D2 स्वर-, D5 तानि , T3 G1 4 5 M4 त्वनु- (for चारु-). K2 D1 शृण्वन्त्य. स्वर्ग(D1 °र)गीतानि (for a). B2 D2 3 ह्य(B2 स्व)भिनयान् , Ds2 D1 स्वाभिनयानि (for स्वभि°) — (L 77) K1 2 Ñ2 V2 B1 3 Dn D2 3 5 6 T2–4 G1–4 मुमुहुर् (for °दुर्) — T4 om lines 78–83 — (L 78) K1–3 Ñ2 V B Dn Ds D4 6 T1–3 G2 3–5 M4 पञ्चचूडा (for °चूडास्) V2 3 B Ds D6 G3 5 M4 कौबेरीश् , T2 3 G1 4 °र्यं (for °र्यश्) T1 कौबेर्यप्सरसस्तथा (for b) — (L 79) K2 D4 महेन्द्रस्य ; D1–3 महेन्द्राच्च (for माहेन्द्रीश्च). K2–4 Dn D3 G2 विश्वरूपेण हेतुना , T1–3 G1 3, 4 वैरूप्येण च हे° (for b) — (L 80) K1 V1 तां (for ता) — (L 81) K2 Ñ2 V1 3 B Ds D3 G1 2 उत्थापयित्वा प्रणता. (for a) — (L 82) D3 प्रविशन्त्वविशङ्किता (for b) — (L 83) T2 3 G4 वरयध्वं (for रम°) — (L. 85) V2 -योगैश्च , T2 3 G1 4 -भेदेषु (for -योगेषु) — (L 88) G1 3 4 प्रीत्या (for प्रति-). — (L 89) K1 V1, 3

तथाभिनययोगेषु वाद्येषु विविधेषु च ॥
एवं कृते विधास्यामि श्रेयो वो मनसेप्सितम् ।
मच्छरीरसमा ह्येते सर्वे निरवशेषतः ॥
शिरसाज्ञां तु ताः सर्वाः प्रतिगृह्य हरेस्तदा ।
क्रीडायुवत्यो विविशुर्भैमानामप्सरोवराः ॥
ताभिः प्रविष्टमात्राभिर्द्योतितः स महार्णवः ।
सौदामिनीभिर्नभसि घनवृन्द इवानघ ॥
ता जले स्थलवत्स्थित्वा जगुश्चाथाप्यवादयन् ।
चक्रुश्चाभिनयं सम्यक्स्वर्गवास इवाङ्गना ॥
गन्धैर्माल्यैश्च ता दिव्यैर्वस्त्रैश्चायतलोचनाः ।
हेलाभिर्हासभावैश्च जह्रुर्भैममनांस्यथ ॥
कटाक्षैरिङ्गितैर्हासैः कलरोषैः प्रसादितैः ।
मनोनुकूलैर्भैमानां समाजह्रुर्मनांसि ताः ॥
उत्क्षिप्योत्क्षिप्य चाकाशं वातस्कन्धान्वहूंश्च तान् ।
मदिरावशगा भैमा मानयन्ति वराप्सराः ।
कृष्णोऽपि तेषां प्रीत्यर्थं विजह्रे वियति प्रभुः ।
सर्वैः षोडशभिः सार्धं स्त्रीसहस्रैर्मुदान्वितः ॥
प्रभावज्ञास्तु ते वीराः कृष्णस्यामिततेजसः ।
न जग्मुर्विस्मयं भैमा गाम्भीर्यं परमास्थिताः ॥
केचिद्रैवतकं गत्वा पुनरायान्ति भारत ।
गृहानन्ये वनान्यन्ये काङ्क्षितान्यरिमर्दन ॥
अपेयः पेयसलिलः सागरश्चाभवत्तदा ।
आज्ञया लोकनाथस्य विष्णोरतुलतेजसः ॥
अधावन्स्थलवच्चापि जले जलजलोचनाः ।
गृह्य हस्ते तथा नार्यो युक्ता मज्जंस्तथापि च ॥
भक्ष्यभोज्यानि पेयानि चोष्यं लेह्यं तथैव च ।
बहुप्रकारं मनसा ध्याते तेषां भवत्युत ॥
अम्लानमाल्यधारिण्यस्ताः स्त्रियस्तानिन्दितान् ।

B1. 3 D5 6 भैमानां (for विविशुर्) K1 विविशुश्च, V1 3 B1. 3 D5 6 ता प्रविष्टा, V2 भीमानाम्, D4 प्रविष्टा हि (for भैमानाम्) K4 Ds2 T4 अप्सरोगणा (for °वराः) D1–3 भैमानप्सरसा वरा (for ^{b}) — (L 90) T1–3 G1 3 4 ज्योतिर्भि, T4 G5 M4 योषिद्भि (for द्योतित) — (L 91) T1 G1. 3 तमसि (for नभसि) K3 घनाघन, Ñ2 V3 B1 Dn Ds D3 T1–3 G1 4 5 घनवृन्दम्, V1 मेघवृन्दम् (for घनवृन्द) T1–3 G1 3. 4 [आ]बभौ (for [अ]नघ) — (L 92) K4 च स्थले (for स्थलवत्) V1 स्नात्वा (for स्थित्वा) K4 प्रजगु. स्थाप्य यादवान्, Ñ2 V B D6 जलवाद्यान्यवादयन् (for ^{b}). — (L 93) D2 रम्यं (for सम्यक्) T1–3 G1 3 4 स्वर्गवासा शुभाङ्ग(G3 °न)ना (for ^{b}) — (L 94) K2 दिव्यैश्च, V3 विविधैर्, G2 भैमाना (for ता दिव्यैर्) — (L 95) K1 3 4 V2 B1 3 Dn Ds1 D3 T1 G2 हास्यभावैश्; D2 हाव°; T2 3 G1 3 4 हसमानैश्, T4 भावभावैश् (for हास°) Ds2 हेलाभिर्विविधैर्भावैर् (for ^{a}) Bom Poona eds G(ed) ता (for [अ]थ) — (L 96) Ñ2 V1 3 B2 Dn Ds D2 3 T G1 4 M4 हास्यै, G6 नाट्यै. (for हासै.) Ñ2 केलिवाक्यै., V3 B1 D6 T1 G3 केलिरोषै, B2 3 केलिरोष-, Dn D2 3 G2 कलरावै-, G5 कलघोषै (for °रोषै) K3 प्रणोदितै ; D3 4 प्रसाधितै (for °दितै) — (L 97) T1–3 G3 जलवाद्यैश्च दसिता (for ^{b}) — (L 98) K1 वासं च ; K4 चात्रासान्, D3 चाकाशे (foı °शं) T1, 2 G3 निजबाहूं- (T2 हा°)श्च तास्तथा, G1 4 तलबाहूंश्च तांश्च ता (for ^{a}) — (L. 99) K2 V1 Ds1 G1 4 M4 भैमान् (for भैमा) K1 D1, 2, 6 T2–4 G2 मदिरावशगान्भैमान्, D3 महीमाकाशगान्भैमा (for ^{a}) K1 2 V1 Ds1 D6 आनयन्ति, D1 2 G2 रम°, D4 पात°, T1 4 G3 M4 आपतन्ति, T2 3 G1 4 आपतन्त (for मानयन्ति) V1 3 B D5 5 G2 वराङ्गना. (for °प्सरा) — (L 100) K2 D4 चैषा (for तेषां) K2 D3 जगत, Ds2 D4 जगति, T1–3 G1 3–5 M4 जलधौ (for वियति) — (L 101) D3 स तै (for सर्वैं) V1 M4 मदान्वित·, V2 मुदा युत (for मुदान्वित) — (L 102) B1 -चेतस· (for -तेजस) — T2 3 G1 4 om (hapl) lines 103–107 — (L 103) V1 भीमा, D2 वीरा (for भैमा) — (L 104) Ñ2 दृष्ट्वा (for गत्वा) T4 G5 यादवा (for भारत) — (L 107) T1 G3 पूजया (for आज्ञया) V2 B1 G2 3 M4 अमित- (for अतुल) — (L 108) D1 G5 M4 आधावन्, D4 अगाधे (for अधावन्) T1–3 G1 3 4 अधावंस्ता पयोधैश्च (for ^{a}) — (L 109) K2 हस्तांस्, D1 हस्त ; M4 हस्तै (for हस्ते) K1 V1 3 मुक्ता (for युक्ता). K2 युक्ता मज्जन्नथापि च; V2 युक्तलज्जास्तथापि च, D3 युक्ता मज्जन्त्यथापि च, D4 युक्ता मार्जन्त्यथोऽपि च (for ^{b}). — (L 111) K1 याते ; D5 ध्याने (for ध्याते) V2 तासां (for तेषां) K3 भवेत्फलम्, Ñ2 भवन्त्युत, D2 भवत्पुनः (for °त्युत) K4 यावत्तेषा महत्पुन (for ^{b}) — (L 112) D4 -माला-, G5 माल- (for -माल्य-) K1 4 अनिन्दिता . — (L 113) D2 -वशानुगा, T1 3 G1 2 4 -मतानुगा ; T2 -रतानुगान् (for °नुगा) D3 स्वर्गे देवानिवानुगा (for ^{b}). — (L 114) T4 G5 M4 बहु- (for गृह-) Ñ2 D3 5 प्रकाशाभिश् (for °राभिस्) — (L 115) K2 V1 3 B2 3 Ds1 D3, 4, 6 T1 3 G1 3 M4 -लिप्ता (foı लिप्त-). K1, 4

रहःसु रमयांचक्रुः स्वर्गे देवरतानुगाः ॥
नौभिर्गृहप्रकाराभिश्चिक्रीडुरपराजिताः ।
स्नातानुलिप्तमुदिताः सायाह्नेऽन्धकवृष्णयः ॥
आयताश्चतुरस्राश्च वृत्ताश्च स्वस्तिकास्तथा ।
प्रासादा नौषु कौरव्य विहिता विश्वकर्मणा ॥
कैलासमन्दरच्छन्दा मेरुच्छन्दास्तथैव च ।
तथा नानावयश्छन्दास्तथेहामृगरूपिणः ॥
वैदूर्यतोरणैश्चित्राश्चित्राभिर्मणिभक्तिभिः ।
मसारगल्वर्कमयैश्चित्रभक्तिशतैरपि ॥
प्रक्रीडगरुडच्छन्दाश्चित्रा कनकरीतिभिः ।
क्रौञ्चच्छन्दाः शुकच्छन्दा गजच्छन्दास्तथापरे ॥
कर्णधारैर्गृहीतास्ता नावः कार्तस्वरोज्ज्वलाः ।
सलिलं शोभयामासुः सागरस्य महोर्मिमत् ॥
समुच्छ्रितैः सितैः पोतैर्यानपात्रैस्तथैव च ।
नौभिश्च झिल्लिकाभिश्च शुशुभे वरुणालयः ॥
पुराण्याकाशगामीनि गन्धर्वाणामितस्ततः ।
बभ्रमुः सागरजले भैमयानानि भारत ॥
नन्दनच्छन्दयुक्तेषु यानपात्रेषु भारत ।
नन्दनप्रतिमं सर्वं विहितं विश्वकर्मणा ॥
उद्यानानि सभा वृक्षा दीर्घिकाः स्यन्दनानि च ।
निवेशितानि स्वल्पानि तादृशान्येव सर्वथा ॥
स्वर्गच्छन्देषु चान्येषु समासात्स्वर्गसंनिभाः ।
नारायणाज्ञया वीर विहिता विश्वकर्मणा ॥
वनेषु रुरुवुर्हृद्यं मधुरं चैव पक्षिणः ।
मनोहरतरं चैव भैमानाममितेजसाम् ॥
देवलोकोद्भवाः श्वेता विलेपुः कोकिलास्तदा ।
मधुराणि विचित्राणि यदूनां काङ्क्षितानि च ॥
चन्द्रांशुसमरूपेषु हर्म्यपृष्ठेषु बर्हिणः ।
ननृतुर्मधुरारावाः शिखण्डिगणसंवृताः ॥
पताका यानपात्राणां सर्वाः पक्षिगणायुताः ।

स्नानानुलेपनालिप्ता·, $D_{1\,2}$ स्नातानुलिप्ता मुदिता, T_4 स्नानातिरिक्तमुदिता (for ^{a}) —(L 116) V_2 आप्लुताश्, D_3 स्वाय°, M_4 आया° (for आय°) $\tilde{N}_2$ सुस्थितास् (for स्वस्तिकास्) — V_3 om line 118 —(L 118) $V_{1\,2}$ $B_{1\,3}$ -छन्ना (for -च्छन्दा) T_4 om (hapl) lines 118^b–119^a —(L 119) D_3 तथा नागहयच्छन्दास्, T_1 G_3 M_4 तथा नानाविधच्छन्दास् (for ^{a}) —(L 120) G_2 -मणिभिश् (for तोरणैश्) $D_{3\,6}$ चित्रैश्, T_4 अच्छैश् (for चित्राश्) K_2 V_3 $D_{3\,6}$ T_{1-3} G M_4 -भित्तिभि·, D_3 पङ्क्तिभि (for भक्तिभि·) — D_3 T_{1-3} om (hapl) lines 121–122 —(L 121) K_4 -गर्भार्कं (for -गल्वर्कं) D_1 शोभिता· कनककमलैश् (hypermetric), G_2 प्रसादकल्पकमयैश् (for ^{a}) K_2 $V_{1\,3}$ $B_{1\,3}$ D_3 $D_{1\,4\,5}$ चित्रा, G_5 M_4 चित्रैर् (for चित्र·) D_6 T_4 G_5 M_4 -भित्ति-, G_2 -पङ्क्ति (for भक्ति-) V_2 -समन्वितै (for शतैरपि) B_2 चित्रा भक्तगणैरपि (for ^{b}) —(L 122) V_2 Dn_2 आक्रीड- (for प्रक्रीड-) $B_{2\,3}$ -छन्नाश् (for -च्छन्दाश्) D_2 प्रक्रीडगहनच्छन्दाश्, T_4 विक्रीडद्गरुडच्छन्दाश् (for ^{a}) V $B_{1\,2}$ वीथिभि·, G_3 -भक्तिभि (for -रीतिभि·) K_2 चित्रकेतनरीतिभि· (for ^{b}) —(L 123) T_1 पिक-; $T_{2\,3}$ $G_{1\,3\,4}$ गज (for शुक-) T_{1-3} $G_{1\,3\,4}$ शुक- (for गज-). —(L 125) K_2 महोर्मिगम्, K_3 °मान्, $D_{4\,6}$ °वत्, T_{1-3} $G_{1\,3}$ °णः (for °मत्) —(L 126) G_1 Bom Poona eds G(ed) समुच्छ्रितः. T_{2-4} G_5 स्थितैः (for सितैः) V_3 T_4 G_6 पात्रैर्, Ds_1 पटैर्, $D_{2\,5}$ पीतैर्, D_3 G_3 पत्रैर् (for पोतैर्) —(L 127) K_1 $\tilde{N}_2$ D_2 मल्लिकाभिश्, V_2 झल्लिका°; D_3 मालिका°, G_5 M_4 कर्णिका° (for झिल्लिका°) K_2 T_{1-3} $G_{1\,3\,4}$ नौभि सलिलगाभिश्च (K_2 °लीनाभिः), D_4 नौभिश्च पुरुषव्याघ्र (for ^{a}) —(L 128) K_1 पुण्या आकाशगामीभिः, $\tilde{N}_2$ Dn $G_{2\,5}$ पुराण्याकाशगानीव (for ^{a}) T_{1-3} $G_{1\,3\,4}$ इवाग्रत (for इतस्तत) —(L 129) D_5 भ्रेमुर्; T_4 हैम- (for भैम-) K_1 Dn सर्वत (for भारत) —(L 130) V_1 $D_{1\,2}$ मन्दर-, D_5 मन्दार- (for नन्दन-) D_3 -युक्तेषु (for -पात्रेषु) — $G_{1\,2}$ om (hapl) lines 132–135 —(L 133) K_4 B शिल्पानि, $\tilde{N}_2$ D_3 $D_{1\,2}$ सर्वाणि; V_2 पुण्यानि, M_4 रम्याणि (for स्वल्पानि) D_6 निवेशनानि शिल्पानि (for ^{a}) —(L 134) V_3 देवेषु, B_3 (also as above) D_6 देशेषु, D_3 नान्येषु (for चा°). K_3 D_1 समानाः, V_1 °जा; D_2 °सन्, D_6 G_5 निवासा, M_4 निवासात् (for समा°) D_3 समाना स्वर्गसंपदा, T_{1-3} $G_{3\,4}$ देशेषु निलया शुभा (for ^{b}) —(L 136) $T_{1\,2}$ G_3 वनेषु नेदुर्हृद्य च (for ^{a}) G_2 D_5 मधुराश् (for °रं) —(L 137) K_3 D_2 G_2 -तेजसा (for °साम्) T_3 $G_{4\,5}$ M_4 भैमानाममितौजसाम् (for ^{b}) —(L 138) K_2 चैता (for श्वेता) T_{1-3} $G_{1\,3\,4}$ देवपक्ष(T_1 G_3 °क्षि)निभाश्चैव (for ^{a}) K_3 विनेदु (for विलेपु) —(L 141) $K_{1\,4}$ G_2 ननृतुर्मधुरावासा, T_{1-3} $G_{1\,3-4}$ °तुर्विविधा-(T_1 °र्विदिता)रावा (for ^{a}) $\tilde{N}_2$ -संभृताः, B_1 -सेविता (for -संवृता). —(L 142) $K_{1.\,4}$ पताकोद्यानपा(K_4 °प)त्राणां (for

भ्रमरैरुपगीताश्च स्रग्दामासक्तवासिभिः ॥
नारायणाज्ञया वृक्षाः पुष्पाणि मुमुचुर्भृशम् ।
ऋतवश्चानुरूपाणि विहायसिगतास्तदा ॥
ववौ मनोहरो वातो रतिखेदहरः सुखः ।
रजोभिः सर्वपुष्पाणां युक्तश्चन्दनशैत्यभृत् ॥
शीतोष्णमिच्छतां तत्र बभूव वसुधापते ।
वासुदेवप्रसादेन भैमानां क्रीडतां तदा ॥
न क्षुत्पिपासा न ग्लानिर्न चिन्ता शोक एव च ।
आविवेश तदा भैमान्प्रभावाच्चक्रपाणिनः ॥
अप्रशान्तमहातूर्या गीतनृत्योपशोभिताः ।
बभूवुः सागरक्रीडा भैमानाममितौजसाम् ॥
बहुयोजनविस्तीर्णं समुद्रं सलिलाशयम् ।
रुध्वा चिक्रीडुरिन्द्राभा भैमाः कृष्णाभिरक्षिताः ॥
परिच्छदस्यानुरूपं यानपात्रं महात्मनः ।
नारायणस्य देवस्य विहितं विश्वकर्मणा ॥
रत्नानि यानि त्रैलोक्ये विशिष्टानि विशां पते ।
कृष्णस्य तानि सर्वाणि यानपात्रेऽमितौजसः ॥
पृथक्पृथङ् निवासाश्च स्त्रीणां कृष्णस्य भारत ।
मणिवैदूर्यचित्रान्ताः कार्तस्वरविभूषिताः ॥
सर्वर्तुकुसुमाकीर्णाः सर्वगन्धाधिवासिनाः ।
यदुसिंहाः शुभैर्जुष्टाः शकुनैः स्वर्गवासिभिः ॥

Colophon

वैशंपायन उवाच ।

रेमे बलश्चन्दनपङ्कदिग्धः
कादम्बरीपानकलः पृथुश्रीः ।
रक्तेक्षणो रेवतिमाश्रयित्वा
प्रलम्बबाहुः स्खलितप्रयातः ॥
नीलाम्बुदाभे वसने वसान-
श्चन्द्रांशुगौरो मदिराविलाक्षः ।
रराज रामोऽम्बुदमध्यमेत्य

संस्थाप्य राज्ये हरिरुग्रसेनं
सांदीपनिं काश्यमुपागमद्यः ॥
विद्यामवाप्य सकलां दत्त्वा पुत्रं महामुनेः ।
साग्रजोऽथ जगामाशु मथुरां यादवीं पुरीम् ॥
हत्वा निशुम्भं नरकं महामतिः
कृत्वा सुघोरं कदनं जनार्दनः ।
ररक्ष विप्रान्मुनिवीरसंघा-
न्देवांश्च सर्वाञ्जगतो जगत्पतिः ॥
स एष भगवान्विष्णुरद्य दृष्टो जनार्दनः ।
कृतकृत्योऽस्मि संजातः सायुज्यं प्राप्नुयामहम् ॥

M_4 नागफणौ, D_6 °फणां (for °फणो) —(L 749) G_3 निक्षिप्यमाण (for निषेव्य°) D_6 गोपबालै (for °दारकैः) —(L 752) T_4 $M_{1\ 3}$ आचिनोत् (for अच्छिनत्). $T_{1,3}$ G_3 प्राच्छिनत्तत्फलै सह (for ^{b}) —(L 753) $M_{1\ 3}$ लोकान् (for गोपान्) —(L 754) T_1 G_{1-3} -पौरुषान् (for °षो). —(L 756) G_2 शत्रुबलं (for शक्र°) —(L 757) M_3 समाकुलं (for सगो°). —(L. 759) $T_{1\ 2}$ $G_{1\ 3}$ स्तनं तासां (for तदधरं) —(L 760) D_6 T_2 G_1 विविक्त , T_4 °क्तं (for °क्ते) —(L 761) T_2 G_1 योऽसौ (for रात्रौ) T_2 $G_{1\ 3}$ स्वयम् (for सुखम्) —(L. 762) D_6 G_2 रात्रौ (for तासां) T_1 G_3 क्षणान्तरेषु क्षणदासु तासां , T_2 G_1 स्तनान्तरे च क्षणदासु तासां —(L 764) D_6 M_4 गच्छति (for °न्हि) $T_{1\ 2}$ G M_2 तेन गच्छति यामुनम् (for ^{b}). —(L 765) T_1 यथैव (for स एव) —(L 768) $M_{1,3}$ हित्वा , M_2 छित्त्वा (for हृत्वा). D_6 यथेच्छम् (for °ष्टम्) —(L 769) T_2 G_3 योऽसौ (for ययौ) M_{1-3} मधु (M_3 °थु)-रापथ हरि , M_4 मथुरां महापुरीम् (for °रां पुरीं हरि) —(L 770) M_4 दत्त्वा (for लब्ध्वा) D_6 T_4 M_3 कामतो (for °दो) —(L 771) D_{s2} माल्यवते (for °कृते) — G_1 om lines 772–777 —(L 772) M_4 च (for [अ]नु-) —(L. 773) D_6 G_2 महार्घरूपाम् , T_4 महार्घ्यं° , M_{1-3} महर्घ्यं° (for महार्ह°) —(L 774) G_4 छित्त्वा मध्ये (by transp). —(L 776) D_6 उदार- (for उदग्र-) —(L 779) D_6 T_4 G_2 M_{1-3} उग्रमीड्य (for °वीर्यं) —(L 781) D_6 तु स (for [ए]व तु) —(L 782) D_6 -पातिनं (for घा°) —(L 785) G_5 उपागतो (for °गमद्) —(L 786) D_6 G_2 महात्मने ; G_1 °मुनिः , $M_{2\ 3}$ °त्मन (for °मुने) —(L 788) D_6 $M_{1\ 2}$ निसुन्दं , $T_{1\ 2}$ निकुम्भं , $G_{1\ 3-5}$ M_4 निसुम्भं (for निशुम्भं) —(L 789) D_6 T_4 च , T_3 $G_{1-3\ 5}$ M_4 स (for सु-). G_3 नरकं (for कदनं) —(L 790) D_5 मुनि-,

येन दृष्टो हरिः साक्षात्तस्य मुक्तिः करस्थिता ।
सोऽयमेष हरिः साक्षात्प्रत्यक्षमिह वर्तते ॥
को नु जन्मान्तरे पूर्वं धर्मः संचित एव मे ।
यस्य पाकः समुत्पन्नो येनासौ दृश्यते मया ॥
सर्वथा पुण्यवानस्मि नष्टसंसारबन्धनः ।
किमस्मै दीयते वस्तु किं नु वक्ष्यामि सांप्रतम् ।
करिष्ये किमहं विष्णो वदस्वाद्य यथेप्सितम् ॥
इत्युक्त्वा विस्वरं नादं ननाद बहुशस्तदा ।
जहास विकृतं भूयो ननर्त पिशिताशनः ॥
नमो नमो हरे कृष्ण यादवेश्वर केशव ।
प्रत्यक्षं च हरेस्तत्र ननर्त विविधं नृप ॥

Colophon

वैशंपायन उवाच ।

विहस्य विकृतं भूयः प्रनृत्य च यथाबलम् ।
ब्राह्मणस्य हतस्याथ शवमादाय सत्वरम् ॥
द्विधाकृत्य महाघोरं पिशितं केशशाड्वलम् ।
ततः खण्डं समादाय अद्भिरभ्युक्ष्य यत्नतः ॥
निधाय पात्रे सुशुभे नमस्कृत्य जनार्दनम् ।
इदं प्रोवाच देवेशं प्राञ्जलिः प्रणतः स्थितः ॥
गृहाणेदं जगन्नाथ भक्ष्यं योग्यं तव प्रभो ।
मवादृशैर्जगन्नाथ ग्राह्यं सर्वात्मना हरे ॥
भक्तिनम्रा वयं विष्णो नात्र कार्या विचारणा ।
दत्तं यद्भक्तिनम्रेण ग्राह्यं तत्स्वामिना हरे ॥
नवं सुसंस्कृतं भक्ष्यं ब्राह्मणं शवमुत्तमम् ।
अस्माकं पिशिताशानां शास्त्रे नियतमेव हि ।
ततो गृहाण भगवन्यदि दोषो न विद्यते ॥
इत्युक्त्वा विकृतं भूयो विहस्य स तु कामतः ।
दातुमैच्छत्तदा खण्डमस्पृश्यस्य शवस्य ह ॥
ततः प्रीतो हरिस्तस्मै मनसापूजयच्च तम् ।
अहोऽस्य स्नेहकारुण्यं मयि सर्वत्र वर्तते ॥
इति संचिन्त्य मनसा प्रोवाच यदुपुंगवः ।
अलमेतेन सर्वत्र पिशाच पिशितानन ।
अस्पृश्यं मादृशैरेतद्ब्राह्मणं शवमुत्तमम् ॥
ब्राह्मणः सर्वथा पूज्यो जन्तुभिर्धर्मकाङ्क्षिभिः ।
पिशाचा घोरकर्माणो यतन्ते ब्रह्महिंसने ॥
न हन्तव्याः सदा विप्रास्तद्धिंसा नरकावहा ।
तस्मादस्पृश्यमस्माभिर्नात्र कार्या विचारणा ॥
तस्मात्प्रीतोऽस्मि भद्रं ते मनोनिर्मलता यथा ।

संघांश्च सर्वान्, M_2 °वर्यसघान् (for °वीरसंघान्) — (L 793) Dn Ds_2 T_2 $G_{1\ 3-5}$ M_4 प्रासवान् (for प्राभुयाम्) — (L 794) Dn $T_{1\ 2}$ $G_{1\ 3}$ M_4 करे स्थिता ; D_6 G_2 पुरे दधे, T_4 पुर स्थिता (for करस्थिता) — (L 796) T_4 G_2 M_4 नूनं (for को नु) — Before line 801, Dn Ds_2 G_4 M_4 ins वैशंपायन उवाच — (L 801) $T_{1\ 4}$ G_{1-3} $M_{1\ 4}$ विस्तरं ; G_4 विस्वनं (for °रं) Dn Ds_2 T_4 G_{3-5} M_4 ननर्द (for ननाद) — (L. 803) M_4 विष्णो (for कृष्ण) — (L 804) D_6 विधिवन् (for विविध)

Colophon — *Mention of the Epic* Ds_2. — *Mention of Khila* Dn Ds_2 D_6 $T_{1\ 2\ 4}$ $G_{1\ 3-5}$ M. — *Subparvan* Dn Ds_2 D_6 $T_{2\ 4}$ कैलासयात्रा — *Adhy name* Dn Ds_2 $T_{1\ 2\ 4}$ $G_{1\ 3\ 4}$ घण्टाकर्णस्तुतिः — *Adhy no* Dn 167, Ds_2 268, T_1 G_3 193, T_2 G_1 195; T_4 162, G_4 M_4 194, $M_{2\ 3}$ 185.

(L. 805) Cal ed प्रहस्य (for प्रनृत्य) G_2 यथाकथम् (for °बलम्) — (L 806) Dn Ds_2 $T_{1\ 2}$ $G_{1,\ 3,\ 4}$ M_4 सत्वरः (for °रम्) D_6 om (hapl) lines 805^b–811^a. — (L 807) M_3 पिशाचं (for पिशितं) — (L 808) $M_{1\ 2}$ खड्गं (for खण्डं) T_2 $G_{1\ 3\ 5}$ स्वद्भिर् (for अद्भिर्) G_3 अभ्यर्च्य (for अभ्युक्ष्य) — (L 811) Dn Ds_2 T_2 $G_{1\ 4,\ 5}$ M_4 मे, T_1 G_3 [इ]मं (for [इ]दं) Dn_2 भोग्यं, T_1 भोज्यं (for योग्यं) — (L 815) T_4 च (for सु-) Dn_2 G_5 ब्रह्मण्यं (for ब्राह्मणं) — After line 815, T_1 G_2 M_3 ins ·

7** सर्वेषामेव वर्णानां शवं ब्राह्मणमुत्तमम् ।

— D_6 om lines 816–820 — (L 816) $M_{1\ 3}$ निश्चितम् (for निय°) T_4 G_2 शास्त्रैर्निश्चितमेव हि (for ^b) — (L 819) Dn Ds_2 $G_{2\ 5}$ M_4 अस्पृश्यं तु (for °श्यस्य) — (L 820) Dn Ds_2 $T_{1\ 2\ 4}$ G M_4 ऽभवत् (for हरिस्). — (L. 821) T_2 G_1 विद्यते (for वर्तते) — (L 822) D_6 G_3 M_{1-3} -नन्दन (for -पुंगव). — (L. 824) T_2 G_1 ब्राह्मणैर् ; $M_{1\ 3}$ मानुषैर् (for मादृशैर्) G_1 ब्राह्मं (for एतद्). D_6 G_2 $M_{1\ 3}$ मानुषं, $G_{4\ 5}$ ब्राह्मण्यं (for °णं). — (L 825) D_6 T_4 $M_{1\ 3}$ ब्राह्मणा सर्वथा पूज्या, G (ed) °णेन सदा पूज्यो (for ^a) G_4 M_4 सर्व- (for धर्म-). — (L. 826) D_6 (also

मनः शुद्धिं यदापन्नं ततः प्रीतोऽस्मि मांसप ॥
अस्मत्संकीर्तनाच्छश्वच्छुद्धं हि करणं तव ।
अतीव मनसा प्रीत इत्युक्त्वा भगवान्हरिः ॥
पस्पर्शाङ्गं तदा विष्णुः पिशाचस्याथ सर्वतः ।
करेण मृदुना देवः पापान्निर्मोचयद्धरिः ।
ततस्तस्य बभौ रूपं कामरूपसमप्रभम् ॥
दीर्घकुञ्चितकेशाढ्यो दीर्घबाहुः सुलोचनः ।
समाङ्गुलिः समनखः समवक्त्रः समुन्नसः ।
पद्माक्षः पद्मवर्णाभः पद्मकेसरभूषणः ॥
केयूरी चाङ्गदी चैव कौशेयवसनस्तदा ।
ज्ञानवान्सत्त्वसंपन्नः साक्षादिन्द्र इवापरः ।
गन्धर्व इव गायंस्तु सिद्धः सिद्ध इव स्वयम् ॥
साक्षात्स्पृष्टं तदा विष्णोः करेण मृदुपूर्वकम् ।
न नूनं तादृशं रूपमासीत्कल्पान्तरेष्वपि ॥
अद्यापि नैव मुनयो लभन्ते तादृशं वपुः ।
कृत्वा सुबहुशो घोरं तपः परमदुश्चरम् ॥
यच्च लब्धं तदा तेन पिशाचेन नृपोत्तम ।
को नु नाम जगन्नाथमाश्रितः सीदते नृप ॥
न हि सर्वत्र कल्याणो यो हि नित्यं जनार्दनम् ।
ध्यायन्पठञ्जपन्वापि तस्य किं नास्ति भूपते ॥
ततः प्रोवाच भगवान्स्थितं काममिवापरम् ।
अक्षयः स्वर्गवासस्ते यावदिन्द्रो भविष्यति ॥
तावत्स्वर्गी भवानस्तु शासनान्मम नान्यतः ।
नष्टे शक्रे ततः स्वर्गात्सायुज्यं मम गच्छतु ॥
योऽयं भ्राता तव स्वर्गी यावदिन्द्रो भवेत्तदा ।
वरं वरय भद्रं ते यत्ते मनसि वर्तते ।
दातास्मि सर्वत. सर्वं नात्र कार्या विचारणा ॥

घण्टाकर्ण उवाच ।

यश्चेमं संगमं देव संस्मरेन्नियतात्मवान् ।
भक्तिस्तस्याचला देव त्वयि भूयाज्जनार्दन ॥
मनःशुद्धिर्भवेत्तस्य मा भूत्कलुषता हरे ।
कालुष्यं मनसस्तस्य मा भूदेष वरो मम ॥
एवमस्त्विति देवेशः स्वर्गं गच्छेति केशवः ।
इन्द्रातिथिर्भवानस्तु त्वां प्रतीक्ष्य हरिः स्थितः ॥
इत्युक्त्वा भगवान्विष्णुस्ततो देशादपागमत् ।
यत्र ते मुनयः सिद्धा अग्निहोत्रमुपासते ।
स च स्वर्गी ततः स्वर्गमाज्ञया केशवस्य ह ॥
तस्मात्पठ सदा राजन्मनःशुद्धिं यदीच्छसि ।

---

as above) यजन्ते (for यतन्ते) D_6 $T_{1\ 4}$ $G_{2\ 3}$ $M_{2\ 3}$ -हिंसनम् (for °न्ते) — (L 829) Dn D_{S2} $T_{1\ 2}$ $G_{1\ 3-5}$ M_4 भक्त्या (for तस्मात्) — (L 830) T_4 $M_{1\ 3}$ शुद्धं (for शुद्धिं) T_1 समापन्नः, T_2 M_2 यदापन्नस्, T_4 यथा यत्नं, G(ed) तथापन्नं (for यदा°). $T_{1\ 2}$ मांसद (for °प) — (L 834) D_6 निर्मोचनं; T_4 M_{1-3} °चयन् (for °यद्). — (L 835) Dn D_{S2} [अ]भवद् (for बभौ). M_{1-3} कामप्रतिमसंनिभम् (for ^{b}). — (L 836) D_6 नील- (for दीर्घ-) — (L 237) $T_{1\ 2}$ G_3 समवर्ण. (for °वक्त्रः). T_2 समुन्नत (for °न्नसः). — (L 838) G_2 -वस्त्राभ. (for -वर्णाभः) G_2 -केयूर- (for -केसर-) — (840) G_4 रुद्र (for इन्द्र) — (L 841) $M_{1,3}$ [अ]पर. (for स्वयम्) — (L 842) D_6 पृष्टस्, T_4 $M_{1\ 3}$ स्पृष्टस् (for स्पृष्टं) D_6 करेणामृतपूर्वकम्, G_2 °ण मृदुपर्वणा (for ^{b}). — (L. 843) Dn D_{S2} D_6 $T_{1\ 2\ 4}$ G M_4 कालान्तरेषु (for कल्पा°) — (L 245) D_6 तीर्त्वा, M_{1-3} चीर्त्वा (for कृत्वा) Dn D_{S2} D_6 $T_{1,2\ 4}$ $G_{2\ 4,5}$ M_4 -दारुणम्, G_3 -धारणम् (for -दुश्चरम्) — (L 847) T_2 G_1 किं (for को) M_3 आश्रितं (for °तः). — (L, 848) D_6 M_3 स (for न) — (L 849) D_6 M_4 जपन्पठन् (by transp) G_1 नित्यं (for तस्य) D_6 G_2 भूतले (for भूपते) — (L 851) Dn D_{S2} D_6 $T_{1\ 2,4}$ $G_{1\ 3\ 4\ 5}$ M_2 वसिष्यति (for भवि°). — (L 852) G_4 M_4 नित्यतः (for नान्यतः). — (L 855) $T_{1,2,4}$ $G_{1\ 4\ 5}$ M_4 यस् (for यत्) — (L 856) Dn D_{S2} G_{2-5} $M_{3,4}$ दातास्मि सर्वं सर्वत्र (for ^{a}). — T_1 $G_{3,5}$ M स्वर्गी, T_2 $G_{1\ 4}$ om. (for घण्टाकर्ण) — (L 857) Dn_2 D_{S2} G_{2-5} संस्मरन् (for °रेन्) — (L 859) D_6 T_4 M_{1-3} मनः शुद्धं (for मन.शुद्धिर्) T_4 तस्मिन् (for तस्य) T_2 कालुष्यता (for कलुषता) — (L 861) D_6 T_4 देवेश (for °शः). — (L. 862) T_1 चन्द्रातिथिर् (for इन्द्रा°). — G_1 om. from line 863 to the end of the colophon — (L 863) Dn D_{S2} T_2 $G_{4\ 5}$ M_4 कृष्णस् (for विष्णुस्) Dn D_{S2} $T_{1,2}$ G_{3-5} M_4 उत्थाप्य ब्राह्मणं तदा (for ^{b}) — After line 863, Dn D_{S2} $T_{1\ 2}$ G_{3-5} M_4 ins.

8** तेन स्तुतो जगन्नाथः पूजयित्वा च तं द्विजम् ।
ततो विसृज्य गोविन्दस्तस्माद्देशादुपागमत् ॥

— (L. 864) Dn D_{S2} $T_{1,2}$ $G_{3,5}$ M_4 अग्निहोत्रसमन्विता·

मनश्च शुद्धं भवति पठतस्ते जगत्पते ॥

Colophon

वैशंपायन उवाच ।

ततः स भगवान्विष्णुर्मुनिभ्यस्तत्त्वमादितः ।
कथयामास यद्वृत्तं पिशाचस्य महात्मनः ॥
तच्छ्रुत्वा मुनयः सर्वे विस्मयं परमं गताः ।
अहोऽस्य कर्मणः पाकस्तव सदर्शनादिति ॥
अर्चितो मुनिभिः सर्वैः प्रीतः प्रीतिमतां प्रियः ।
ततः प्रभाते विमले सूर्ये चाभ्युदिते सति ॥
आरुह्य गरुडं विष्णुर्ययौ कैलासमुत्तमम् ।
भवद्भिस्तत्र गन्तव्यमित्युक्त्वा मुनिसत्तमान् ॥
यत्र विश्वेश्वराः सिद्धास्तपस्यन्ति यतव्रताः ।
यत्र वैश्रवणः साक्षादुपास्ते शंकरं सदा ।
यत्र तन्मानसं नाम सरो हंसालयं महत् ॥
यत्र भृङ्गी रिटिर्देवमुपास्ते शंकरं शिवम् ।
गाणपत्यमवाप्याथ नित्यं पार्श्वचरो हरे ॥
यत्र सिंहा वराहाश्च द्विपद्वीपिमृगैः सह ।
क्रीडन्ति वन्यरतयः परस्परहिते रताः ॥
यत्र नद्यः समुत्पन्ना गङ्गाद्याः सागरंगमाः ।
यत्र विश्वेश्वरः शंभुराच्छिनद्ब्रह्मणः शिरः ।
यत्रोत्पन्ना महावेत्रा भूतानां दण्डतां ययुः ॥
उमया यत्र सहितः शंकरो नीललोहितः ।
ऋषिभिः प्रार्थितः पूर्वं ददौ यत्र नगः सुताम् ।
शंकराय जगद्धात्रे शिवाय पृथिवीपते ॥
यत्र लेभे हरिश्चक्रमुपास्य बहुभिर्दिनैः ।
पुष्करैः शतपत्रैश्च नेत्रेण च जगत्पतिम् ॥
गुहां यत्र समाश्रित्य क्रीडन्ते सिद्धकिंनराः ।
प्रियाभिः सह मोदन्ते पिबन्ते मधु चोत्तमम् ॥
यमुद्धृत्य भुजैः सर्वैः पौलस्त्यो विरराम ह ।
तमारुह्य महाशैलं देवकीनन्दनो हरिः ।
मानसस्योत्तरं तीरं जगाम यदुनन्दनः ॥
तपश्चर्तुं किल हरिर्विष्णुः सर्वेश्वरः शिवः ।
जटी चीरी जगन्नाथो मानुषं वपुरास्थितः ।
तपसे धृतचित्तस्तु शुचौ भूमावुपाविशत् ॥
अवरुह्य ततो यानाद्गरुडाद्वेदसंमितात् ।
द्वादशाब्दं तपश्चर्तुं मनो दध्रे जगत्पतिः ॥
फाल्गुनेन तु मासेन समारेभे जनार्दनः ।
शाकभक्षः कृतजपो वेदाध्ययनतत्परः ॥
किमुद्दिश्य जगन्नाथस्तपश्चरति मानदः ।
तन्न विद्मो यथाकामं दुर्ज्ञेयेश्वरचिन्तना ॥

(for ^{b}) — (L 865) D_6 T_4 $G_{2\,4}$ तत (for स च) T_4 G_3 M_{1-3} गतः (for तत.). — $M_{2\,3}$ om line 667 — (L 867) $T_{1\,2}$ G_3 मन शुद्धिश्च भविता (for ^{a}) T_1 पठश्चेव (for °तस्ते)

COLOPHON — *Mention of the Epic* Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1\,2}$ G_{2-5} M. — *Sub-parvan* · Dn Ds_2 D_6 कैलासयात्रा — *Adhy name* Dn Ds_2 घण्टाकर्णमुक्तिप्रदानम्, $T_{1.2}$ $G_{3\,4}$ M_4 पिशाचदर्शनम् — *Adhy no* Dn 268, Ds_2 267, T_1 G_3 194, T_2 196; G_2 192, G_5 195, M_{1-3} 159

G_1 om the ref — (L 868) G_1 इत्युक्त्वा (for ततः स). — (L 871) G_2 युष्मत्सं- (for तव सं-) T_2 G_1 इतः (for इति). — (L 876) D_6 धृतव्रता. (for यत°) — (L 877) Ds_2 शिवम् (for सदा) — Ds_2 om. lines 878–879 —(L. 879) G_4 सदा (for शिवम्) — (L 880) D_6 ऽभवत् (for हरे) Dn Ds_2 $T_{1\,2}$ $G_{1\,3-5}$ M_4 हरपार्श्वचरः सदा (for ^{b}) — (L 882) G_2 -पशव (for -रतय) D_6 T_4 क्रीडन्ति वन्या. पशवः (for ^{a}) — (L 884) D_6 योऽच्छिनद्, T_4 आच्छि° (for अच्छि°) — (L 885) D_6 गता (for ययु) T_2 G_3 भूतानां दण्डपाणयः (for ^{b}) — (L 887) D_6 प्रार्थिभि (for °त) Dn Ds_2 T_2 G_4 M_4 गिरि (for नग.) — (L 888) Dn Ds_2 $G_{4\,5}$ $M_{2\,4}$ जगती (for पृथिवी-) M_{1-3} शिवाय परमात्मने (for ^{b}) — D_6 $T_{1\,3.4}$ G om (hapl) lines 889–890 — (L 890) M_3 जगत्पति (for °तिम्). — (L 891) M_1 यस्य (for यत्र) G_2 क्रीडन्तस् (for °न्ते) T_1 यक्ष- (for सिद्ध-) — (L 893) Ds_2 T_1 $M_{1\,3}$ विरराम, D_6 °राव (for °राम) — (L 895) G_2 मधुसूदन ; G_4 यदुपुंगव. (for °नन्दन.) — (L 896) $T_{1\,2}$ G_3 शुभ· (for शिव·) — (L. 898) G_5 शुचौ देशे उपागमत् (for ^{b}). — (L 9 0) Dn Ds_2 D_6 $T_{1\,2.4}$ G_{1-4} ततो हरि· (for जगत्पति) — (L 901) Dn Ds_2 D_6 $T_{1\,2\,4}$ G M_3 जगत्पतिः (for जनार्दन) — (L. 902) T_2 कृततपो (for °जपो) — (L 903) Dn Ds_2 T_2 $G_{1\,3-5}$ मानवः ; D_6 T_1 M_2 °द (for °दः). — (L. 906) Dn Ds_2 $T_{1.2}$ $G_{1.3-5}$ गरुड का($G_{1.4}$ क°)श्यपसुत,

तपस्यति तदा विष्णौ पर्वते भूतसेविते ।
गरुडस्ताक्ष्यंतनय इन्धनानि समाचिनोत् ।
होमार्थं वासुदेवस्य चरतस्तप उत्तमम् ॥
चक्रराजोऽथ पुष्पाणि संचिनोति तदा हरेः ।
दिक्षु सर्वासु सर्वत्र ररक्ष जलजस्तदा ॥
खड्ग आहृत्य यत्नेन कुशान्सुबहुशस्तदा ।
गदा कौमोदकी चैव परिचर्यां चकार ह ॥
धनुःप्रवरमत्युग्रं शार्ङ्गं दानवभीषणम् ।
स्थितं हि पुरतस्तस्य यथेष्टं भृत्यवत्स्वयम् ।
जुहोति भगवान्विष्णुरेधोभिर्बहुभिः सदा ॥
आज्यादिभिस्तदा हव्यैरग्निं संपूज्य माधवः ।
सप्तार्चिष. समाप्तिं च समस्तव्यस्ततः कृती ॥
एकस्मिन्नेकदा मासे भुञ्जानो नियतात्मवान् ।
द्वितीये त्वथ पर्याये भुञ्जन्नेकेन केनचित् ॥
एकस्मिन्वत्सरे भुञ्जंस्तथैवैकेन केनचित् ।
समाप्य वत्सरं सर्वमेवमेव जगत्पतिः ॥
द्वादशाब्दे तथा पूर्णे ऊनमासे जगत्पतिः ।
जुह्वन्नग्निं समाध्यायन्पठन्मन्त्राञ्जनार्दनः ॥
आरण्यकं पठन्विष्णुः साक्षात्सर्वेश्वरो हरिः ।
आस्ते ध्यानपरस्तत्र पठन्प्रणवमुत्तमम् ॥

Colophon

वैशंपायन उवाच ।

तत इन्द्रः स्वयं तत्र आरुह्य गजमुत्तमम् ।
द्रष्टुं सर्वेश्वरं विष्णुं तपस्यन्तं समाययौ ॥
ततो यमस्तु भगवानारुह्य महिषं वरम् ।
किंकरैश्च स्वयं साक्षादाययौ नगमुत्तमम् ॥
प्रचेता हंसमारुह्य वारुणैश्च समन्वितः ।
श्वेतच्छत्रसमायुक्तः श्वेतव्यजनवीजितः ।
ययौ कैलासशिखरं द्रष्टुं केशवमञ्जसा ॥
अन्येऽपि च तथा देवा आदित्या वसवस्तथा ।
रुद्राश्चैव तथा राजन्द्रष्टुं केशवमाययुः ॥
सिद्धाश्च मुनयश्चैव गन्धर्वा यक्षकिंनराः ।
सर्वाश्चाप्सरसो राजन्नृत्तगीतविशारदाः ॥
ततो देवगणः सर्वः कैलासं समपद्यत ।
पर्वतो नारदश्चैव तथान्ये मुनिसत्तमाः ।
विस्मयस्थितलोलाक्षाः सर्वे देवगणास्तथा ॥
आश्चर्यं खलु पश्यध्वं न भूतं न भविष्यति ।
योगिध्येयः स्वयं कृष्णो यत्तप्यति गुरुः स्वयम् ।

T4 तत. स गरुडस्ताक्ष्यंम्, G2 गरुडस्ताक्ष्यंतां यात (for °) —(L 909) Dn2 D6 T2 G1.2 4 5 M4 जलदस् (for °जस्) — T2 om line 910 —(L 915) D6 T4 दिव्यैर् (for हव्यैर्) G3 अयं (for अग्निं) —(L 916) D6 समाप्तिश् (for °प्तिं) G2 तत. (for कृती) D6 समस्तव्यस्तव्याहृती: (for ᵇ). —(L 918) T1 मध्याह्ने, Cal ed षण्मासे (for पर्याये) Dn Ds2 T2 G1 4 5 केशव (for केनचित्) M1 भुञ्जानो येन केनचित् (for ᵇ) —(L 919) Dn1 M2 वासरे (for वत्सरे). G5 केशव. (for केनचित्). —(L 920) Dn Ds2 T1.4 G4 5 तत्तप, Cal ed तु तत· (for वत्सरं) D6 सम्यग् (for सर्वम्) — T1 2 G1.4 om line 921. —(L 921) D6 माघमासे (for ऊन°). —(L 922) G4 समं ध्यायन् M3 सदा ध्यायन्, Bom Poona eds. G(ed) समास्थाय (for °ध्यायन्) D6 T2 G1 3–5 M1 मन्त्रं (मन्त्रान्). —(L 923) M4 लोके (for साक्षात्) D6 M1–3 लोकेश्वरो (for सर्वे°). G2 सर्वलोकेश्वरो हरि (for ᵇ) —(L. 924) G2 यदुवरस् (for ध्यानपरस्)

COLOPHON. — *Mention of the Epic*. Ds2 — *Mention of Khila* Dn Ds2 D6 T1 2 4 G M — *Sub-parvan* Dn Ds2 G4 M2–4 कैलासयात्रा — *Adhy no* Dn 269; Ds2 268, T1 G3 195, T2 G1 197, T4 164, G2 190, G4 194; G5 M4 196, M1–3 160

(L 925) D6 T1 2 4 G1 3.5 M शक्र (for तत्र) —(L. 927) D6 स भगवान्; T4 तु भवनाद्, G2 M2 3 स्वभवनाद् (for तु भगवान्) —(L 928) D6 T2 G1 5 M1–3 स्वकै· (for स्वयं) —(L 929) T1 G5 वारणैश् (for वारु°). (L 930) G4 वाल- (for श्वेत-) T3 सयुतम्; G1 -दीपित. (for -वीजित) — T2 G1 3 om (hapl) lines 932–933 G2 om lines 933–934 —(L 933) Dn2 अञ्जसा (for आययु) —(L 934) Cal ed तथान्ये मुनिसत्तमा. (for ᵇ) —(L 936) Dn2 D6 T1 2 G -गणा. सर्वे (for -गण: सर्व-) — G2 om lines 937–938. —(L. 939) T1 G3 5 -स्थिति (for स्थित) Dn2 D6 T1 4 G3 5 M4 सर्व· (for सर्वे) — After line 938, T4 G2 ins

9** को न्वत्र विस्मयो भूयादिति ते मेनिरे गणाः ।

— M om 939–940 —(L 940) T1 विष्णुर् (for कृष्णो).

को न्वत्र समयो भूयादिति ते मेनिरे गणाः ॥
ततः समाप्ते सकले जगत्पते-
र्व्रते समूले सकलेश्वरः शिवः ।
द्रष्टुं हरिं लोकहितैषिणं प्रभुं
ययौ भवान्या सह भूतसंघैः ॥
सार्धं कुबेरेण सगुह्यकेन
प्रियेण सख्या प्रभुरीश्वरः शिवः ।
स्वयं जटी भूतपिशाचसंवृतः
शरी च खड्गी शशिशेखरः शिवः ॥
करेण बिभ्रत्सह दर्भकुण्डिकां
करेण साक्षादपरेण दीपिकाम् ।
अन्येन बिभ्रन्महतीं सडिण्डिमां
शूलं च बिभ्रन्नपरेण बाहुना ॥
गुणान्सरुद्राक्षकृतान्समुद्वह-
ञ्जटाभिरापिङ्गलताम्रमूर्तिभिः ।
विराजमानः प्रभुरिन्दुशेखरो
वृषेण युक्तः सुसितेन शंकरः ॥
उमास्तनद्वंद्वसमर्पिताननः-
स्तया समाश्लिष्य निपीडिताधरः ।
गङ्गाम्बुविक्षालितचन्द्रशेखर-
स्तां चापि वीक्षन्बहुशस्तदा शिवः ॥
भस्माङ्गरागैरनुलेपिताननो
महोरगैर्बद्धजटः सनातनः ।
शिरःकपालैः परिशोभितस्तदा
द्रष्टुं हरिं केशवमभ्ययाच्छिवः ॥
यमाहुरग्र्यं पुरुषं महान्तं
पुरातनं सांख्यनिबद्धदृष्टयः ।
यस्यापि देवस्य गुणान्समग्रां-
स्तत्त्वांश्चतुर्विंशतिमाहुरेके ॥
यमाहुरेकं पुरुषं पुरातनं
कणादनामानमजं महेश्वरम् ।
दक्षस्य यज्ञं विनिहत्य यो वै
विनाश्य देवांश्च पुरा पुरातनः ॥
यं विदुर्भूततत्त्वज्ञं भूतं भूतेशभावनम् ।
वामदेवं विरूपाक्षमाहुस्तत्त्वविदो जनाः ॥
महादेवं सहस्राक्षं कालमूर्तिं चतुर्भुजम् ।
रुद्रं रोदननामानमाहुर्विश्वेश्वरं शिवम् ॥
अप्रमेयमनाधारमाहुर्माहेश्वरा जनाः ।
नग्नं नग्नपरीतं तु नागिनं नग्नवर्चसम् ।
आहुर्विश्वेश्वरं शान्तं शिवमादि सनातनम् ॥
तस्य मूर्तिरिमाः सर्वा धरायाः सकला नृप ॥
भूमिरापोऽनलो वायुः खं सूर्यश्च तथा शशी ।
अग्निश्च यजमानश्च प्रकृतिश्चैवमष्टधा ॥
महादेवो महायोगी गिरीशो नीललोहितः ।

T_4 हरि G_2 गिरौ (for गुरु॰) —T_4 G_2 om line 941 —(L 941) D_6 M विस्मयो (for समयो) —(L. 942) D_6 M_{1-3} सकले जगत्पातिर्, T_4 ऽहनि शंकरस्य (for सकले जगत्पतेर्) —(L 943) T_1 रत (for व्रते) D_6 वृत. स शौरि सकलेश्वरेश्वर — G_3 om (hapl) lines 944–949 —(L 944) T_3 $G_{1\ 6}$ हितं, T_4 सदा (हरि) —(L 945) T_2 G_1 सिद्धसंघै॰ (for भूत॰) —(L 947) Dn Ds_2 T_4 $G_{4\ 5}$ सख्या प्रियेण (by transp) — G_2 om (hapl) lines 948–949 —(L. 949) T_1 चर्मी (for शरी) Dn_1 Ds_2 G_4 शशिखण्डशेखर॰ (G_4 ॰मण्डनः) (for ॰शेखर शिव॰) —(L. 950) G_5 दण्ड- (for दर्भ-). —(L 951) D_6 अपरे प्र (for अपरेण) —(L 953) $M_{1\ 3}$ बिभ्रद् (for बिभ्रन्) G_4 पाणिना (for बाहुना). —(L. 954) D_6 गणान् (for गु॰) —(L. 955) $T_{1\ 3}$ $G_{1\ 3-5}$ ताम्रमूर्ति (for ॰र्तिभि.) —(L 957) T_1 सुगतेन (for सुसि॰) —(L 961) $M_{2,4}$ तया निरीक्षन् (for ता चापि वीक्षन्) D_6 G_2 सदा (for तदा) —(L. 964) D_6 बहु- (for परि) —(L 965) D_6 ययौ ; $M_{1\ 3}$ द्रुतं (for हरिं). — G_4 om lines 966–969 —(L 967) M_2 पुरातनाः (for ॰तनं) —(L 968) G_3 तस्य (for यस्य) —(L 970) M_3 एके (for एकं). —(L 973) Dn Ds_2 T_4 $G_{2\ 4}$ असुरान्सनातन॰, D_6 $T_{1\ 2}$ $G_{1\ 3\ 5}$ $M_{1,3}$ असुरान्पुरातनम् (T_3 $G_{1\ 3}$ ॰न) (for च पुरा सनातन) —(L 979) Dn Ds_2 $T_{1,2\ 4}$ त्वग्नि- (for नग्न). —(L 980) T_1 शंभुं (for शान्तं). —(L 981) D_6 पश्य (for तस्य) —(L 982) G_2 अग्निर् (for भूमिर्) Dn_1 ऽनिलो (for ऽनलो) —(L 983) M_4 तथैव (for अग्निश्च). —(L. 985) Dn_2 $T_{2,4}$ $G_{2,4}$ M_4 महाभर्ता;

आदिकर्ता महीभर्ता शूलपाणिरुमापतिः ।
द्रष्टुं विश्वेश्वरं विष्णुं भूतसंघैः समाययौ ॥

Colophon

वैशंपायन उवाच ।

तस्याग्रे समपद्यन्त भूतसंघाः सहस्रशः ।
घण्टाकर्णो विरूपाक्षः कुण्डभानुः कुमुद्वहः ॥
दीर्घलोमा दीर्घशिखो दीर्घबाहुर्निरञ्जनः ।
उरुवक्त्रः शतमुखः शतग्रीवः शतोदरः ॥
कुण्डोदरो महाग्रीवः स्थूलजिह्वो द्विबाहुकः ।
पार्श्ववक्त्रः सिंहमुख उन्नतांसो महाहनुः ।
त्रिबाहुः पञ्चबाहुश्च व्याघ्रवक्त्रः सिताननः ॥
एते चान्ये च बहवो दीर्घास्या दीर्घलोचनाः ।
नृत्यन्तः प्रहसन्तश्च स्फोटयन्तः परस्परम् ॥
तथान्ये घोररूपाश्च तथान्ये विकृताननाः ।
प्रेतभक्षाः प्रेतवहा मांसशोणितभोजनाः ॥
शवानि सुबहून्याशु भक्षयन्तस्ततस्ततः ।
पिबन्तो रुधिरं घोरं खण्डयन्तः शवं बहु ॥
कराला विनता दीर्घा धमनिस्नायुसंतताः ।
नग्नाश्चैव सचीराश्च शूलाग्रप्रोतमानुषाः ॥
शिरोमालावृताः केचिदान्त्रपाशावपाशिताः ।
डिण्डिमैरट्टहासैश्च नादयन्तो वसुंधराम् ।
कपालिनो भैरवाश्च जटिला मुण्डिनस्तथा ।
एवं बहुविधा घोराः पिशाचा विकृताननाः ॥
तथान्ये मुनिवीराश्च ध्यायन्तः परमेश्वरम् ।
पठन्तो वेदशास्त्राणि साङ्गानि विविधानि च ॥
कुण्डिकाक्षकराः केचित्केचित्कपिशचीरिणः ।
केचित्कौपीनवसनाः केचित्कर्पटसंवृताः ॥
स्तुवन्तः शंकरं भक्त्या स्तोत्रैर्माहेश्वरैस्तथा ।
एकत्र ते मुनिगणा अपरत्र गणास्तथा ॥
अन्यत्र सिद्धगन्धर्वाः प्रियाभिः सह संगताः ।
नृत्यन्ति नृत्यकुशला गायन्ति स्म च कन्यकाः ॥
विद्याधरास्तथान्यत्र स्तुवन्त. शंकरं शिवम् ।
ननृतुस्तस्य पुरतो गच्छन्तोऽप्सरसां गणाः ॥
एवमेतैर्महाघोरैः पिशाचैर्भूतकिनरैः ।
मुनिभिश्चाप्सरोभिश्च समं शर्वः समाययौ ॥
यत्र विश्वेश्वरो विष्णुस्तपस्तेपे सुदारुणम् ।
यत्र ते लोकपालाश्च तिष्ठन्ति स्म दिदृक्षया ।
उमया लोकभाविन्या गङ्गया चन्द्रशेखरः ॥

$M_{1\ 3}$ महीकर्ता (for °भर्ता) —(L. 986) M_{3} सहाययौ (for समा°)

COLOPHON — *Mention of the Epic* Ds_{2} —*Mention of Khila* Dn Ds_{2} D_{6} $T_{1\ 2\ 4}$ G M — *Sub-parvan* Dn Ds_{2} M_{2-4} कैलासयात्रा — *Adhy name* Dn 270; Ds_{2} 259 T_{1} G_{3} 196, T_{2} G_{1} 198, T_{4} 165, G_{2} 189, G_{4} 165, G_{4} 195, G_{5} M_{4} 197, $M_{2\ 3}$ 161

G_{3} om lines 987–1024 T_{4} om the ref —(L 988) Dn D_{6} $G_{1\ 2\ 4\ 5}$ कुण्डधारः, T_{1} कुमरश्च (for कुण्डभानु) T_{4} कुरूद्वह (for कुमु°) T_{2} कुन्दर सकुमुद्वह· (for ^{b}) —(L 989) Dn Ds_{2} T_{4} $G_{2\ 4}$ दीर्घभुजो, $T_{1\ 2}$ °शिरा; G_{1} °शिरो (for °शिखो) — G_{4} om lines 990–993 —(L. 990) Dn_{1} G_{2} उरुनेत्र., D_{6} उग्रवक्त्र (for उरु°). M_{4} शितोदर. (for शतो°) —(L 992) G_{1} सिंहमुखी (for °मुख) —(L 994) G_{5} द्विबाहु (for त्रि°) D_{6} शताननं ; $T_{1\ 2}$ $G_{1.\ 5}$ सनातन (for सिताननः). —(L. 996) M_{1-3} पिशाचा (for the second तथान्ये). D_{6} तथान्ये सुकृताननाः (for ^{b}). —(L 997) G_{2} प्रेतसंघाः ; M_{4} °रक्षा (for °भक्षा) Dn_{1} $T_{1\ 2}$ $G_{1\ 2.\ 4\ 5}$ प्रेतवाहा (for °वहा). —(L 998) T_{2} G_{1} शवान्सुबहुशस्तत्र (for ^{a}) — G_{4} om line 999 —(L 999) Dn Ds_{2} $T_{1\ 2}$ $G_{1\ 5}$ शवान्बहून् (for शवं बहु) —(L 1000) D_{6} T_{4} $M_{2\ 4}$ विकृता (for वितता) T_{2} घोरा (for दीर्घा) —(L 1001) Dn Ds_{2} T_{2} $G_{1\ 2.\ 4}$ नानाविधा., D_{6} भग्नाश्चैव (for नग्ना°) Dn Ds_{2} D_{6} $T_{2\ 4}$ $G_{1.\ 5}$ M_{4} सुचीराश्च (for सची°) T_{1} नग्नाश्च सुचिराश्चैव (for ^{a}). —(L 1002) T_{2} M_{2} शिला- (for शिरो-). D_{6} आन्त्रपाशैश्च पाशिताः, $M_{3\ 4}$ °पाशविपाशिताः (for ^{b}). —(L 1004) M_{1} कलापिनो (for कपालिनो) G_{4} जटिनो (for जटिला) —(L 1005) $T_{1\ 2}$ $G_{1\ 5}$ $M_{2\ 4}$ एव बहुविधाकाराः (for ^{a}) —(L 1007) Dn Ds_{2} $G_{2\ 4}$ -वाक्यानि (for -शास्त्राणि) —(L 1008) T_{1} कुण्डिकान्तकराः केचित्; G_{2} °स्थिकराः केचित् (for ^{a}) Dn Ds_{2} D_{6} $T_{1\ 2}$ $G_{1\ 2\ 5}$ केचित्कुशविचीरिण. (for ^{b}) —(L 1009) T_{4} $G_{2\ 4}$ कार्पास- (for कर्पट) —(L 1011) D_{6} $T_{1,\ 2}$ $G_{1\ 4\ 5}$ M मुनिवरा (for °गणा) —(L. 1012) Ds_{2} D_{6} $T_{1\ 4}$ M_{3} सिद्धा (for सिद्ध-) —(L 1013) Cal ed नृत्येऽपि कुशलाः सर्वे

स सर्वलोकप्रभवो हरिः शिवो
जटी च साक्षात्प्रणवात्मकः कृती ।
द्रष्टुं हरि विष्णुमुदारविक्रमो
ययौ यथेष्टं पिशिताशनैर्वृतः ॥

Colophon.

वैशंपायन उवाच ।

एवं बहुविधैर्भूतैः पिशाचैरुरगैः सह ।
आगत्य भगवान्रुद्रः शंकरो वृषवाहनः ॥
ददर्श विष्णुं देवेशं तपन्तं तप उत्तमम् ।
जुह्वानमग्निं विधिवद्द्रव्यैर्मेध्यैर्जगत्पतिम् ॥
गरुडाहृतकाष्ठं तु जटिलं चीरवाससम् ।
चक्रेणानीतकुसुमं खड्गानीतकुशं तथा ॥
गदाकृतसमाचारं देवदेवं जनार्दनम् ॥
इन्द्राद्यैर्देवसंघैश्च वृतं मुनिगणैः सह ।
अचिन्त्यं सर्वभूतानां ध्यायन्तं किमपि प्रभुम् ॥
अवरुह्य वृषाच्छर्वो भगवान्भूतभावनः ।
ततः प्रीतः प्रसन्नात्मा ललाटाक्ष उमापतिः ।
ततो भूतपिशाचाश्च राक्षसा गुह्यकास्तथा ।
मुनयो विप्रवर्याश्च जयशब्दं प्रचक्रिरे ॥
जय देव जगन्नाथ जय रुद्र जनार्दन ।
जय विष्णो हृषीकेश नारायण परायण ॥
जय रुद्र पुराणात्मञ्जय देव हरेश्वर ।
आदिदेव जगन्नाथ जय शंकर भावन ॥
जय कौस्तुभदीप्ताङ्ग जय भस्मविराजित ।
जय चक्रगदापाणे जय शूलिंस्त्रिलोचन ॥
जय मौक्तिकदीप्ताङ्ग जय नागविभूषण ।
इति ते मुनयः सर्वे प्रणाम चक्रिरे हरिम् ॥
तत उत्थाय भगवान्दृष्ट्वा देवमवस्थितम् ।
वृषध्वजं विरूपाक्षं शंकरं नीललोहितम् ।
ततो हृष्टमना विष्णुस्तुष्टाव हरमीश्वरम् ॥

भगवानुवाच ।

नमस्ते शितिकण्ठाय नीलग्रीवाय वेधसे ।
नमस्ते अस्तु शोचिषे नमस्ते उपवासिने ॥
नमस्ते अस्तु मीढुषे नमस्ते गदिने हर ।
नमस्ते विश्वमूर्तये वृषाय वृषरूपिणे ॥
अमूर्ताय च देवाय नमस्तेऽस्तु पिनाकिने ।

(for °). — (L 1017) T_4 मुनिभिश्चैव प्रमथै (for °) — (L 1021) D_6 $T_{1\ 2}$ $G_{1\ 2}$ $M_{1\ 2\ 4}$ हर· शिवो, T_4 भवो विभुर् (for हरि शिवो) — (L 1022) T_1 प्रणवात्मकं, $M_{1.4}$ °वाकृति ((for °वात्मक) — (L 1023) D_6 G_2 बिभ्रद् (for विष्णुम्) D_6 उदारविभ्रमं, $T_{1\ 2}$ M °विक्रमं (for °विक्रमो)

COLOPHON — *Mention of the Epic* Ds_2 —*Mention of Khila* Dn Ds_2 D_6 $T_{1\ 2\ 4}$ $G_{1\ 2\ 4\ 5}$ M — *Sub-parvan* Dn Ds_2 D_6 M कैलासयात्रा — *Adhy no*. Dn 271, Ds_2 270 · T_1 197, T_2 199, T_4 G_1 166, G_2 192; G_4 196, G_5 M_4 198, M_{1-3} 162

(L 1025) D_6 अनुगै· (for उरगैः) — (L 1028) D_6 G_2 जुह्वन्तम् (for जुह्वानम्) Dn $T_{1\ 4}$ G_{1-4} $M_{1\ 2\ 4}$ द्रव्यैर् (for मेध्यैर्) — T_4 om lines 1029–1032. — (L 1029) G_1 पीत- (for चीर-) — (L 1030) D_6 G_2 चक्रानीतकुशासनम् (G_2 °दिकम्) (for °). — (L 1032) T_1 -गन्धर्वैर् (for संघैश्च) G_5 तथा (for सह). — M_4 om. line 1033 M_{1-3} om line 1034 — (L 1037) $M_{1-2\ 4}$ -संघाश् (for -वर्याश्). — (L. 1040) M_4 रुद्र (for देव) T_2 $G_{1.\ 2.\ 4}$ M_4 हरे हर, G_3 M_{1-3} हरे हरे (for हरेश्वर) — (L 1043) D_6 T_4 G_2 M_{1-3} कपर्दिने (for त्रिलोचन) — (L 1045) T_2 [इ]मे (for ते) — (L 1046) $M_{2\ 4}$ देवेशो (for भगवान्) D_6 उमापतिम्, G_3 उपस्थितम् (for अवस्थि°) — (L 1048) D_6 ईश्वर (for °रम्) — D_6 कृष्ण (for भगवान्) — (L 1049) D_6 नीलकण्ठाय (for शिति°) G_5 नीलकण्ठाय (for °ग्रीवाय) — (L 1050) G_2 नमस्ते गदिने तुभ्यं, G_4 नमोऽस्तु शोचिषे तुभ्यं, Bom Poona eds G (ed) °स्ते शोचिषे अस्तु (for °) D_6 T_4 अस्तु मीढुषे, G_2 विश्वमूर्तये (for उपवासिने). — G_2 om line 1051 — (L 1051) T_2 नमस्ते हरये तुभ्यं; Bom Poona eds. G (ed) °स्ते मीढुषे अस्तु (for °). T_2 G_{2-5} हरे (for हर) D_6 T_4 नमस्ते विश्वमूर्तये (for °) —(L. 1052) Dn Ds_2 G_1 विश्वतनवे, T_1 °कर्त्रे ते, T_2 °मूर्ताय (for °मूर्तये) T_4 नमस्ते जटिने तुभ्यं (for °) D_6 वृषाय वृषसिंहाय वृषरूपाय ते नम; G_4 नमस्ते गदिने तुभ्यं नमस्ते विश्वमूर्तये — After line 1052, G_4 ins.

10** उपनिर्याय च नमो वृषाय वृषरूपिणे ।

— (L 1053) M_{1-3} अद्दकाय (for अमूर्ताय) T_1 मूर्ताय (for देवाय) — Afer line 1053, T_4 ins ;

नमः कुब्जाय कूपाय शिवाय शिवरूपिणे ॥
नमस्तुण्डाय तुष्टाय नमस्तुट्टितुटाय च ।
नमः शिवाय शान्ताय गिरिशाय च ते नमः ॥
नमो हराय हिप्राय नमो हरिहराय च ।
नमोऽघोराय घोराय घोरघोरप्रियाय च ॥
नमोऽघण्टाय घण्टाय नमो घटिघटाय च ।
नमः शर्वाय शान्ताय भूताधिपतये नमः ॥
नमो नमो विरूपाय पुराय पुरहारिणे ।
नम आद्याय बीजाय शुचये भस्मरूपिणे ॥
नमः पिनाकहस्ताय नमः शूलासिधारिणे ।
नमस्ते खट्वहस्ताय नमस्ते कृत्तिवाससे ॥
नमस्ते वामदेवाय नम आकाशमूर्तये ।
हराय हरिरूपाय नमस्ते तिग्मतेजसे ॥
भक्तप्रियाय भक्ताय भक्तानां वरदायिने ।
नमोऽभ्रमूर्तये देव जलमूर्तिधराय च ॥
नमश्चन्द्राय देवाय सूर्याय च नमो नमः ।
नमः प्रधानदेवाय भूतानां पतये नमः ॥
नमः करालमुण्डाय विकृताय कपर्दिने ।
अजाय च नमस्तुभ्यं भूतभावन भावन ॥
नमोऽस्तु हरिकेशाय पिङ्गलाय नमो नमः ।
नमस्तेऽभीशुहस्ताय भीरुभीरुहराय च ॥
हराय भीतिरूपाय घोराणां भीतिदायिने ।
नमो दक्षमखघ्नाय भगनेत्रापहारिणे ॥
उमापते नमस्तुभ्यं कैलासनिलयाय च ।
आदिदेवाय देवाय भवाय भवरूपिणे ॥
नमः कपालहस्ताय नमोऽजमथनाय च ।
त्र्यम्बकाय नमस्तुभ्यं त्र्यक्षाय च शिवाय च ॥
वरदाय वरेण्याय नमस्ते चन्द्रशेखर ।
नम इध्माय हविषे ध्रुवाय च कृशाय च ॥
नमस्ते शतयुग्राय नागपाशप्रियाय च ।
विरूपाय सुरूपाय भद्रपानप्रियाय च ॥
श्मशानरतये नित्यं जयशब्दप्रियाय च ।
खरप्रियाय खर्वाय खराय खररूपिणे ॥
भद्रप्रियाय भद्राय भद्ररूपधराय च ।

11** नमो घोराय घोराय घोरघोरप्रियाय च ।
— (L 1054) T_1 कक्ष्याय (for कूपाय). — M_1 om line 1055 — (L 1055) $G_{1\ 3\ 4}$ नमस्तुष्टाय (for °स्तुण्डाय) Dn Ds_2 G_4 तुष्याय , D_6 T_2 G_1 तुण्डाय , T_4 तुण्ड्याय ; G_8 कूप्याय (for तुष्टाय) D_6 नमस्तदितुडाय च , T_2 नमस्त्वपि तृणाय च (for ^{b}) —(L 1056) G_2 हरीशाय (for गिरि°) (L 1057) T_1 हिताय , T_4 हिरण्याय (hypermetric), G_2 ऽङ्गिराय ; $G_{3\ 5}$ $M_{1,\ 3\ 4}$ हिराय (for हराय) $T_{1\ 4}$ विप्राय (for हिप्राय) D_6 नामायाभिप्राय नमो (for ^{a}) $G_{3\ 5}$ $M_{3,\ 4}$ हिरिहिराय (for हरिह°) — (L. 1058) $T_{1\ 2}$ $G_{1\ 3-5}$ नमोऽस्तु (G_1 °मस्तु) घोरघोराय (for ^{a}) D_6 घोराघोर- ; T_1 $G_{3\ 5}$ नमो घोर- ; M_1 घोररूप- (for घोरघोर-). — (L 1059) G_1 घण्टघटाय (for घटि°) — (L 1060) T_1 शिवाय (for शर्वाय) — (L 1061) Dn Ds_2 T_1 नमो विरूपरूपाय (for ^{a}) — (L 1062) Dn Ds_2 $G_{1\ 4}$ शुचयेऽष्टस्वरूपिणे , T_4 °ये भस्मधारिणे (for ^{b}) — G_2 om (hapl) lines 1063^b–1064^a — (L 1064) $T_{1\ 2}$ $G_{1\ 3}$ खड्ग- (for खट्व-) Dn Ds_2 D_6 T_4 G_4 M नमः खड्गाङ्गहस्ताय (for ^{a}). — (L 1065) Dn Ds_2 T_4 नमस्ते देवदेवाय ; T_1 °स्ते मन्यवे देव , T_2 $G_{1\ 3-5}$ $M_{1\ 3}$ °स्ते वायवे देव (for ^{a}) — (L 1066) T_1 G_3 M_3 हररूपाय (for हरि°) — (L. 1067) D_6 भक्ति- (for भक्त-). D_6 प्रियकामिने , G_2 प्रियदायिने (for वर°) — T_1 om (hapl) lines 1068–1075 — (L 1068) $M_{1\ 3}$ भूमूर्तये (for ऽभ्रमू°) Dn Ds_2 T_4 G_4 जगन्मूर्ति (for जलमूर्ति-) — (L 1069) G_2 सूर्याय देवाय (by transp) — G_2 M_3 om line 1070 — (L 1071) M_3 -घोराय (for -मुण्डाय) Dn Ds_2 T_4 G_4 करालाय च मुण्डाय (for ^{a}) — (L 1072) Dn_1 यज्ञ (for भूत) G_2 -मूर्तये (for -भावन) — (1074) D_6 G_2 M -भयाय (for -हराय) — (L 1075) D_6 T_4 घोररूपाय , T_2 G_1 भीम° (for भीति°) G_2 M हरये घोररूपाय (for ^{a}) D_6 T_4 G_2 M भीरूणां (for घोराणा) M भीरु- (for भीति) — (L 1076) T_1 भृगु- (for भग) — $M_{2\ 4}$ om (hapl) lines 1078–1080 — (L 1078) G_2 देवाय , G_3 भाचाय (for भवाय) — T_2 G_1 om lines 1081–1085 G_2 om lines 1081–1083 — (L 1082) Dn_1 दध्याय (for इध्माय) D_6 $T_{1\ 4}$ G_3 स्रुवाय (for ध्रु°) Dn_2 D_6 G_3 कृशाय (for कु°) — G_4 om (hapl) lines 1083–1085 — (L 1083) Bom Poona eds G (ed) नमस्ते शक्तियुक्ताय (for ^{a}). G_3 om lines 1083^b–1087^a — (L 1084) D_6 विरूढाय (for विरूपाय) D_6 भद्रवादि- , T_4 $M_{2\ 4}$ °पाद- ; M_1 °वाद- (for °पान-) — D_6 M_3 om. (hapl) lines 1085–1091 — (L 1085) $M_{1\ 2\ 4}$ तुभ्यं (for नित्यं) — (L 1086) $T_{1\ 2}$ G_1 शर्वाय (for ख°)

विरूपाय सुरूपाय महाघोराय ते नमः ॥
घण्टाय घण्टनादाय घण्टभूपणभूपिणे ।
तीव्राय तीव्ररूपाय तीव्ररूपप्रियाय च ॥
नग्नाय नग्नरूपाय नग्नरूपप्रियाय च ।
भूतावास नमस्तुभ्यं सर्वावास नमो नमः ॥
नमः सर्वात्मने तुभ्यं नमस्ते भूतिदायिने ।
नमस्ते वामदेवाय महादेवाय ते नमः ॥
का नु वाक्स्तुतिरूपा ते को नु स्तोतुं प्रशक्नुयात् ।
कस्य वा स्फुरते जिह्वा स्तुतौ स्तुतिमतां वर ॥
क्षमस्व भगवन्देव भक्तोऽहं ध्याहि मां हर ।
सर्वात्मन्सर्वभूतेश ध्याहि मां सततं हर ॥
रक्ष देव जगन्नाथ लोकान्सर्वात्मना हर ।
ध्याहि भक्तान्सदा देव भक्तप्रिय सदा हर ॥

Colophon.

वैशंपायन उवाच ।

ततो वृषध्वजो देवः शूली साक्षादुमापतिः ।
करं करेण संस्पृश्य विष्णोश्चक्रधरस्य ह ॥
प्रोवाच भगवान्रुद्रः केशवं गरुडध्वजम् ।
शृण्वतां सर्वदेवानां मुनीनां भावितात्मनाम् ॥
किमिदं देवदेवेश चक्रपाणे जनार्दन ।
तपश्चर्या किमर्थं ते प्रार्थना तव का विभो ।
स्वयं विष्णुर्भवान्नित्यस्तपस्त्वं तपसां हरे ॥
पुत्रार्थं यदि ते देव तपश्चर्या जनार्दन ।
पुत्रो दत्तो मया देव पूर्वमेव जगत्पते ॥
शृणु तत्रापि भगवन्कारणं कारणात्मक ॥
तपश्चर्तुं प्रवृत्तोऽहं कुतश्चित्कारणाद्धरे ।
वर्षायुतं महाघोरं पुरा कृतयुगे तदा ॥
भवानी तत्र मे देव परिचर्तुं तदाभवत् ।
पित्रा नियुक्ता देवेश उमैपा वरवर्णिनी ।
भीत इन्द्रस्तदा देव मारं मां प्रैपयत्तदा ॥
मधुना सह संयुक्तो मारो मामागतस्तदा ।
लक्ष्यं मामकरोत्तत्र वाणस्य प्रेपितस्य ह ॥
एषा मां सेवते तत्र दानात्पुष्पादिना हरे ॥
ततः क्रुद्धोऽहमभवं दृष्ट्वा मारं तथाविधम् ।
क्रुध्यतो मम देवेश नेत्रादग्निः पपात ह ॥
सोऽयमग्निस्तदा मारं भस्मसात्कृतवांस्तदा ।
अचिन्तयं तदा विष्णो शक्रस्यैतच्चिकीर्षितम् ॥
ततःप्रभृति देवेश दया तं प्रति वर्तते ।

— G_2 om 1087^b–1088^a —(L 1088) T_1 घोररूपाय, M_2 महामेघाय (for °घोराय) —(L 1089) Dn Ds_2 T_4 घण्टभूषाय, G_4 °भूताय (for °नादाय) T_1 2 G_1 3 5 घण्टानादाय घण्टाय (for ^{a}) G_2 घण्टाघण्टाय ते नमः (for ^{b}) —G_4 om line 1091 —(L 1092) Dn Ds_2 D_6 T_4 भूतवास (for भूता°) D_6 लोकवास, G_2 M_3 सर्व° (for सर्वा°) — D_6 om (hapl) lines 1093–1094 —(L. 1093) Dn Ds_2 नमस्ते भूतिदायक, T_1 4 G_3 °स्ते भूतदायिने, G_4 °स्ते भूतदायक (for ^{b}) —(L 1095) D_6 सनिरूपा (for स्तुति°) —(L 1096) G_3 वाक् (for वा) T_1 स्फुरते कस्य जिह्वा तु (for ^{a}) G_3 कृतौ (for स्तुतौ) —(L 1097) Dn Ds_2 G_3 4 त्राहि (for ध्याहि) —(L 1098) Dn Ds_2 D_6 T_4 G_3 4 त्राहि (for ध्याहि) D_6 वर, G_2 हरे (for हर) — D_6 G_2 om (hapl) line 1099 —(L. 1099) T_2 सह; T_4 हरे (for हर) —(L. 1100) Dn Ds_2 D_6 T_1 2 G_4 त्राहि (for ध्याहि) T_2 भक्तं (for भक्तान्)

COLOPHON — *Mention of the Epic* · Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1,2,4}$ G_4 — *Sub parvan* · Dn Ds_2 D_6 T_4 G_4 M_4 कैलासयात्रा — *Adhy name*. G_3 कृष्णेन स्तुति, G_4 ईश्वरस्तुति, M_1 रुद्रस्तव. — *Adhy no*. Dn 272, Ds_2 271, T_1 G_3 198, T_2 G_1 200, T_4 167; G_2 193, G_4 197, G_5 199, M_{1-3} 163, M_4 199

T_2 G_1 om. the ref —(L 1101) G_4 शिव (for शूली) —(L 1102) G_5 करे वा (for करेण) —(L 1104) M_3 ऋषीणां (for मुनीनां) —(L 1107) Dn_1 D_6 T_4 G_3 नित्यं (for नित्यस्) D_6 T_4 M_1 3 तपतां (for तपसां) G_4 तपस्त्वं तपतां वर (for ^{b}) —(L. 1108) Cal ed प्रति (for यदि) —(L 1109) G_4 जनार्दन (for जगत्पते) —(L 1110) D_6 करुणात्मक (for कारणा°). —(L 1111) D_6 G_2 कारणान्तरे (for °णाद्धरे) —(L. 1112) Dn_1 ऽनघ (for तदा) —(L 1113) D_6 G_2 4 तपश्चर्तुं (for परिचर्तुं) D_6 गताभवत्, T_1 तथावहत् (for तदाभवत्) —(L 1114) G_3 4 मम (for उमा) — G_4 om lines 1116–1118 —(L 1117) G_2 कथं (for लक्ष्यं). —(L 1118) T_1 3 G_3 देवी (for दानात्) —(L 1121) Dn Ds_2 हरे (for तदा) —G_4 om. lines 1122–1124.

ब्रह्मणा च नियुक्तोऽसि प्रीतस्तत्र जनार्दन ॥
नियुक्तः पुत्ररूपेण स ते देव जगत्पते ।
ज्येष्ठस्तव सुतो देव प्रद्युम्नेत्यभिविश्रुतः ॥
स्मरं तं विद्धि देवेश नात्र कार्या विचारणा ।
इत्युक्त्वा पुनराहेदं याथात्म्यं दर्शयन्निव ।
मुनीनां श्रोतुकामानां याथात्म्यं तत्र सत्तम ॥
अञ्जलिं संपुटं कृत्वा विष्णुमुद्दिश्य शंकरः ।
उमया सार्धमीशानो याथात्म्यं वक्तुमैहत ॥
हरे कुर्वेति तत्रैवमञ्जलिं कुरुसत्तम ।
मुनयो देवगन्धर्वाः सिद्धाश्च सहकिंनराः ।
अञ्जलिं चक्रिरे विष्णौ देवदेवेश्वरे हरौ ॥

महेश्वर उवाच ।

यत्तत्कारणमाहुस्तत्सांख्याः प्रकृतिसञ्ज्ञितम् ।
त्रिधाभूतं जगद्योनि प्रधानं कारणात्मकम् ॥
सत्त्वं रजस्तमो विष्णो जगदण्डं जनार्दन ।
तस्य कारणमाहुस्त्वां सांख्यास्तत्त्वविदो हरे ।
तद्रूपेण भवान्विष्णो परिणम्याधितिष्ठति ॥
ततो महान्समुत्पन्नः प्रकृतिर्यस्य कारणम् ।
तस्मात्तु महतो घोरादहंकारो महानभूत् ।
स त्वमादौ जगन्नाथ परिणामस्तथा हि सः ॥
अहंकारात्प्रभो देव कारणानि महान्ति च ।
तन्मात्राणि तथा पञ्च भूतानि प्रभवन्त्युत ॥
तानि त्वामाहुरीशानं भूतानीति जगत्पते ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥
चक्षुर्घ्राणं तथा स्पर्शो रसना श्रोत्रमेव च ।
मनः षष्ठं तथा देव प्रेरकं तत्र तत्र ह ॥
कर्मेन्द्रियाणि चाप्याहुः पादादीनि जनार्दन ।
त्वमेव तानि सर्वाणि करोषि नियतात्मवान् ॥
स्वेषु स्वेषु जगन्नाथ विषयेषु तथा हरे ।
निवेशयसि देवेश योग्यामिन्द्रियपद्धतिम् ॥
यदा त्वं रजसा युक्तस्तदा भूतानि सृष्टवान् ।
यदा च सत्त्वयुक्तोऽसि तदा पाता जगत्त्रयम् ॥
यदा ते तम उत्कृष्टं तदा संहरसे जगत् ॥
त्रिभिरेव गुणैर्युक्तः सृष्टिरक्षाविनाशने ॥
वर्तसे विविधां भूतिमादाय नियतात्मवान् ।
इन्द्रियाणीन्द्रियार्थेषु नियोजयसि माधव ॥
प्राणिनामुपभोगार्थमन्तः स्थित्वा जगद्गुरो ।
तस्मात्सर्वत्र भूतेषु वर्तसे सर्वगो भवान् ॥
ब्रह्मा त्वं सृष्टिकाले तु स्थितौ विष्णुरसि प्रभो ।
संहारे रुद्रनामासि त्रिधामा त्वमिति प्रभो ॥
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
एताः प्रकृतयो देव भिन्नाः सर्वत्र ते हरे ॥

— (L 1122) D_6 M_{1-3} [इ]दं (for [ए]तच्) — (L 1123) G_3 परि- (for प्रति) — (L 1124) M_3 ऽस्मिन्प्रीतिस् (for ऽस्मि प्रीतस्) M तस्य (for तत्र) — (L 1127) G_4 मम (for विद्धि) — G_4 om lines 1128–1141 — (L 1128) Dn_2 G_3 om (hapl) lines 1128[b]–1129[a]. D_6 यथार्थं; G_2 M_4 याथार्थ्यं (for °त्म्यं). — (L 1129) T_1 $M_{2\ 4}$ याथार्थ्यं (for °त्म्यं) — (L 1131) D_6 M_4 याथार्थ्यं (for °त्म्य) — (L 1132) Dn Ds_2 हरेः (for हरे) Dn_1 Ds_2 कुर्वन्ति — (L 1134) $T_{1.\ 2\ 4}$ $G_{1\ 3\ 5}$ विष्णोर् (for विष्णौ) — G_2 महेश (for महेश्वर). — (L 1135) D_6 महत् (for यत्तत्) T_1 त्वां सख्यम् (for कारणम्) $M_{1\ 2\ 4}$ ते, M_3 तु (for तत्) Dn Ds_2 -सञ्ज्ञकम् (for -संज्ञितम्) — (L. 1140) $T_{1\ 2}$ $G_{1.\ 3\ 5}$ M प्रकृतेर्जन्मकारणम्; G_2 जगतो जन्मकारणम् (for [b]) — (L. 1144) T_1 मात्राणि (for भूतानि) D_6 G_2 कारणानि महा(G_2 भव)-न्त्युत (for [b]) — (L 1145) D_6 भूतानि जगत पते (for [b]) — (L 1147) D_6 $T_{1.\ 4}$ G M रसनं (for °ना). — (L 1149) Dn Ds_2 $M_{2\ 4}$ [अ]न्यानि (for [अ]प्याहुः) Dn Ds_2 $M_{2\ 4}$ वागादीनि; $T_{1\ 2}$ $G_{1\ 3-5}$ वाय्वा° (for पादा°). — (L 1152) D_6 M नियोजयसि (for निवेश°). — (L 1154) D_6 T_4 G_2 M जगद्यथा (for जगत्त्रयम्). — (L 1155) Dn Ds_2 T_2 G_{3-5} यदा त्वं तमसाकृष्टस्; T_1 G_1 यदा त्वं तमसा कृष्ण (for [a]) G_2 यथा त्वं नामसंभावं हरसे तत्तथा जगत् — (L 1157) D_6 T_4 $M_{2\ 3}$ भूमिम् (for भूतिम्). — (L 1159) Cal ed. अत्रं सृष्ट्वा (for अन्त. स्थित्वा); T_3 $G_{1\ 3}$ जगत्पते, T_4 °द्गुरुम् (for °द्गुरो) — (L 1162) D_6 त्रियामा (for त्रिधामा) Dn Ds_2 $T_{1\ 2\ 4}$ G असि (for इति) — (L. 1164) G_2 एतासां प्रकृतिर्देव (for [a]) G(ed) हिता (for भिन्नाः). G_2 नो भवान् (for ते हरे). — (L 1166) Dn Ds_2

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रोदरसाहस्री सहस्रात्मा दिवस्पतिः ॥
भूमिं सर्वामिमां प्राप्य सप्तद्वीपां ससागराम् ।
अणुः सर्वत्रगो भूत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥
त्वमेवेदं जगत्सर्वं यद्भूतं यद्भविष्यति ।
त्वत्तो विराट् प्रादुरभूत्सम्राट् चैव जनार्दन ॥
तव वक्त्राज्जगन्नाथ ब्राह्मणो लोकरक्षकः ।
प्रादुरासीत्पुराणात्मन्षट्कर्मनिरतः सदा ॥
राजन्यस्तु तथा बाह्वोरासीत्संरक्षणे रतः ।
ऊर्वोर्वैश्यस्तथा विष्णो पादाच्छूद्र उदाहृतः ।
एवं वर्णा जगन्नाथ तव देहात्सनातनात् ॥
मनसस्तव देवेश चन्द्रमाः समपद्यत ।
सुखकृत्सर्वभूतानां शीतांशुरमृतप्रभः ॥
अक्ष्णोः सूर्यः समुत्पन्नः सर्वप्राणिविलोचनः ।
यस्य भासा जगत्सर्वं भासते भानुमानसौ ॥
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।
नाभेरन्तरिक्षमुत्पन्नं तव देव जनार्दन ॥
द्यौरासीत्तु महाघोरा शिरसस्तव गोपते ।
पद्भ्यां भूमिः समुत्पन्ना दिशः श्रोत्राज्जगत्पते ।
एवं सृष्ट्वा जगत्सर्वं व्याप्य सर्वं व्यवस्थितः ॥
व्याप्य सर्वानिमाल्ँलोकान्स्थितः सर्वत्र केशव ।
ततश्च विष्णुनामासि धातोर्व्याप्तेश्च दर्शनात् ॥
नारा आपः समाख्यातास्तासामयनमादितः ।
यतस्त्वं भूतभव्येश तन्नारायणशब्दितः ॥
वसनाद्देवनाद्देव वासुदेवेति शब्दित. ।
हरसि प्राणिनो देव ततो हरिरिति स्मृतः ॥
शं करोषि सदा देव ततः शंकरनामवान् ।
बृहत्त्वाद्बृंहणत्वाच्च तस्माद्ब्रह्मेति शब्दितः ।
मधुरिन्द्रियनामेति ततो मधुनिषूदनः ॥
हृषीकाणीन्द्रियाण्याहुस्तेषामीशो यतो भवान् ।
हृषीकेशस्ततो विष्णो ख्यातो वेदेषु पठ्यते ॥
को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिषु ।
आवां तवाङ्गे संभूतौ ततः केशवनामवान् ॥
मा विद्या च हरे प्रोक्ता तस्या ईशो यतो भवान् ।
तस्मान्माधवनामासि धवः स्वामीति शब्दितः ॥
गौरेषा तु यतो वाणी तां च वेद यतो भवान् ।
गोविन्दस्तु ततो देव मुनिभिः कथ्यते भवान् ॥
त्रिरित्येव त्रयो वेदाः कीर्तिता मुनिसत्तमैः ।
क्रमते तांस्तथा सर्वांस्त्रिविक्रम इति स्मृतः ॥
अणुर्वामननामासि यतस्त्वं वामनाख्यया ।
मननान्मुनिरेवासि यमनाद्यतिरुच्यसे ॥
तपश्चरसि यस्मात्त्वं तपस्वीति च शब्दितः ।

सहस्रदारः साहस्री, D6 सहस्रोरुः सहस्राक्षी, G2 सहस्रोदरस्साहस्रः (for ^{a}) T2 सहस्राख्य- (for °स्रात्मा) —(L 1167) M2 व्याप्य (for प्राप्य) —(L 1168) M अध्यतिष्ठत् (for अत्य°) — G2 om lines 1171–1174 —(L 1172) M3 पुराणात्मा (for °त्मन्) —(L 1174) G3 शूद्रो (for विष्णो) D6 पादौ (for पादाच्). —(L 1175) M सनातन (for °तनात्) —(L 1177) M2 3 -जन्तूनां (for -भूतानां) Dn Ds2 T1 G2 4 M अमित- (for अमृत-) —(L 1178) G5 अक्ष्ण. (for अक्ष्णो) —(L 1179) D5 om. (hapl) 1179^{b}–1181^{a} T2 व्याप्य रूपं व्यवस्थित. (for ^{b}) —(L 1180) Submetric T4 स इन्द्रश्, M त इन्द्रश् (for इन्द्रश्). Dn Ds2 T2 G4 Cal ed मुखादिन्द्र- (Cal. ed °दप)श्च अग्निश्च (for ^{a}) —(L 1181) Hypermetric Dn Ds2 G3 नाभेरभूदन्तरिक्षं, T1 2 G1 3 5 °रथान्तरिक्ष च; T4 °र्व्योम समुत्पन्नं (for ^{a}). T1 2 G1 3 5 समुत्पन्नं (for तव देव) —(L 1182) G2 4 भूपते (for गोपते) —(L 1184) T1 2 G1 3 5 जगद्रूपं (for °त्सर्वं) —(L 1185) G5 व्याप्तः (for व्याप्य) D6 सर्वम् (for सर्वान्) D6 T4 एवं (for स्थित·) —(L 1186) M प्र- (for the second च) — Dn Ds2 T1 2 4 G om line 1189 —(L 1190) M1 हरति स्म नृणां पापं (for ^{a}) —(L 1191) महादेव (for सदा देव) Dn Ds2 T1 2 G1 3–5 ततः शंकरतां गत (for ^{b}) —(L. 1195) G4 om (hapl) lines 1195^{b}–1201^{a} M2. 5 केशव (for पठ्यते) Dn Ds2 M1 3 ख्यातो देवेषु केशव (for ^{b}) —(L 1196) Dn Ds2 D6 T1 2 4 G क इति ब्रह्मणो नाम (for ^{a}) Dn Ds2 D6 T1 2 4 G1–3. 5 M1 -देहिनाम् (for -देहिषु). —(L 1197) Dn Ds2 T1 2 4 G1 5 M3 तवाङ्ग- (for °ङ्गे) Dn Ds2 T2 3 G1 3 5 तस्मात् (for तत.) —(L 1198) D6 T4 G2 लक्ष्मीश् (for विद्या) —(L 1199) D6 T4 G2 त्वमिति (for स्वामीति) —(L.

वसन्ति त्वयि भूतानि भूतावासस्ततो हरे ॥
ईशस्त्वं सर्वभूतानामीश्वरोऽसि ततो हरे ।
प्रणवः सर्ववेदानां गायत्री छन्दसां प्रभो ॥
अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः ।
रुद्राणामहमेवास्मि वसूनां पावको भवान् ।
आदित्यानां भवान्विष्णुरिन्द्रो देवेश्वरो भवान् ।
अश्वत्थो वृक्षजातीनां ब्रह्मा लोकगुरुर्भवान् ।
मेरुस्त्वं पर्वतेन्द्राणां देवर्षीणां च नारदः ॥
दानवानां भवान्दैत्यः प्रह्लादो भक्तवत्सल ।
सर्पाणामेव सर्वेषां भवान्वासुकिसंज्ञकः ॥
गुह्यकानां च सर्वेषां भवान्धनद एव च ।
वरुणो यादसां राजा गङ्गा त्रिपथगा भवान् ॥
आदिस्त्वं सर्वभूतानां मध्यमन्तस्तथा भवान् ।
त्वत्तः समभवद्विश्वं त्वयि सर्वं प्रलीयते ॥
अहं त्वं सर्वगो देव त्वमेवाहं जनार्दन ।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ॥
नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥
त्वदुपासा जगन्नाथ सैवास्तु मम गोपते ।
यश्च त्वां द्वेष्टि देवेश स मां द्वेष्टि न संशयः ॥
त्वद्विस्तारो यतो देव अहं भूतपतिस्ततः ।
न तदस्ति विना देव यत्ते विरहितं हरे ॥
यदासीद्वर्तते यच्च यच्च भावि जगत्पते ।
सर्वं त्वमेव देवेश विना किंचित्त्वया न हि ॥
स्तुवन्ति देवाः सततं भवन्तं स्वैर्गुणैः प्रभो ।
ऋक्च त्वं यजुरेवासि सामासि सततं विभो ॥
किमुच्यते मया देव सर्वं त्वं भूतभावनः ।
नमः सर्वात्मने देव विष्णो माधव केशव ॥
नमस्करोमि सर्वात्मन्नमस्तेऽस्तु सदा हरे ।
नमः पुष्करनाभाय वन्दे त्वामहमीश्वर ॥

Colophon

वैशंपायन उवाच ।

इत्युक्त्वा देवदेवेशं मुनीनाह पुनः शिवः ।
एवं जानीत हे विप्रा ये भक्ता द्रष्टुमागताः ॥
एतदेव परं वस्तु नैतस्मात्परमस्ति वः ।
एतदेव विजानीध्वमेतद्वः परमं तपः ॥
एतदेव सदा विप्रा ध्येयं प्रयतमानसैः ।
एतद्वः परमं श्रेय एतद्वः परमं तपः ॥

1203) M_{1-2} क्रमसे (for °ते) G_{1} $_{5}$ श्रुत. (for स्मृत) — T_{1} $_{2}$ G_{1} om line 1208 — (L 1208) M तदा स्मृतः (for ततो हरे). — (L 1209) M भवान् (for प्रभो) — (L. 1210) G_{2} प्रभवो (for स्फोटस्त्वं) — Dn Ds_{2} G_{2} om line 1212 T_{1} om lines 1213–1218 — (L 1213) M देव- (for लोक-) D_{6} T_{4} कृतां (for -गुरुर्) — (L. 1215) Cal ed ज्ञानवान्दैत्यमध्ये तु (for ^{a}). — (L 1216) Dn Ds_{2} T_{3} G_{1} $_{3-5}$ -संज्ञित (for -संज्ञकः) — D_{6} om. lines 1221–1234 T_{2} G_{1} om (hapl) lines 1226–1229 G_{4} om line 1226 — (L 1226) M_{1} यश्च त्वां द्विषते देव (for ^{a}) — D_{6} om line 1227 — (L 1227) T_{4} त्वयि विस्तारितो देव (for ^{a}) G_{2} om (hapl) 1227^{b}–1233^{a} — (L 1228) D_{6} T_{4} क्वचित् (for हरे) — T_{2} G_{1} om line 1229 — (L. 1229) M_{3} भाति (for भावि) — (L 1230) T_{1} सह (for न हि) — (L 1231) D_{6} स्तुवन्ति सर्वे देवाश्च सततं स्वगुणैर्विभो — (L 1232) Dn Ds_{2} T_{2} G_{4} प्रभो (for विभो) — G_{4} om line 1233 — (L 1233) M किमुच्यसे जगन्नाथ (for ^{a}). G_{3} om. (hapl.) lines 1233^{b}– 1234^{a} — After line 1233, T_{2} ins

11** नमः सर्वात्मने देव मुनीनाह पुन शिवः ।
एवं जानीत हे विप्रा ये भक्ता द्रष्टुमागता· ।
एतदेव परं वस्तु नैतस्मात्परमस्ति वः ॥

— (L 1234) Dn Ds_{2} T_{1} $_{4}$ G_{2} $_{4}$ M_{2} $_{4}$ सर्वात्मना (for °त्मने) — (L 1236) T_{4} G_{1} $_{3}$ ईश्वरम् (for ईश्वर)

COLOPHON — *Mention of the Epic* Ds_{2} — *Mention of Khila* Dn Ds_{2} D_{6} T_{1} $_{2}$ G M — *Sub-parvan* Dn Ds_{2} D_{6} T_{4} G_{4} M कैलासयात्रा — *Adhy name* D_{6} T_{4} G_{4} कृष्णस्तुति· — *Adhy no* Dn 273, Ds_{2} 272; T_{1} G_{3} 199, T_{2} G_{1} 201, T_{4} 168, G_{2} 194, G_{4} 198; G_{5} 200; M_{1-3} 164, M_{4} 200

G_{3} om lines 1237-1276. — (L 1238) D_{6} G_{2} भो (for हे) D_{6} द्रष्टुमानसा· (for °गता.) — G_{2} om lines 1240–1245 — (L 1240) M_{2-4} एवम् (for the first एतद्) — (L 1241) Dn Ds_{2} T_{1} $_{4}$ G_{1} M_{4} सतत-, D_{6} च यत- (for प्रयत-) — (L 1242) D_{6} ज्ञेयम् (for श्रेय).

एतद्वो जन्मनः कृत्यमेतद्वस्तपसः फलम् ।
एष वः पुण्यनिचय एष धर्मः सनातनः ॥
एष वो मोक्षवशग एष मार्ग उदाहृतः ।
एष पुण्यप्रदः साक्षादेतद्वः कर्मणां फलम् ॥
एतदेव प्रशंसन्ति विद्वांसो ब्रह्मवादिनः ।
एषा त्रयीगतिर्विप्राः प्राध्यी ब्रह्मविदां सदा ॥
एतदेव प्रशसन्ति सांख्ययोगसमाश्रिताः ।
एष ब्रह्मविदां मार्गः कथितो वेदवादिभिः ॥
एवमेव विजानीत नात्र कार्या विचारणा ।
हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसस्थितैः ॥
ओमित्येवं सदा विप्राः पठध्वं ध्यात केशवम् ।
ततो निःश्रेयसप्राप्तिर्भविष्यति न संशयः ॥
एवं ध्यातो हरिः साक्षात्प्रसन्नो वो भविष्यति ।
भवनाशमयं देवः करिष्यति न संशयः ॥
सदा ध्यात हरिं विप्रा यदीच्छा प्राप्तुमीश्वरम् ।
एष संसारविभवं विनङ्क्ष्यति जगद्गुरुः ॥
स्मरध्वं सर्वदा विष्णुं पठध्वं त्रिशरीरिणम् ॥
मनःसंयमनं विप्राः कुरुध्वं यत्नतः सदा ।
शुद्धेऽन्तःकरणे विष्णुः प्रसीदति तपोधनाः ॥
ध्यात्वा मां सर्वयत्नेन ततो जानीत केशवम् ।
उपास्योऽयं सदा विप्रा उपायोऽस्मि हरे स्मृतौ ॥
उपायोऽयं मया प्रोक्तो नात्र संदेह इत्यपि ।
अयं मायी सदा विप्रा यतध्वं मायनाशने ॥
यथा वो बुद्धिरखिला शुद्धा भवति यत्नतः ।
तथा कुरुत विप्रेन्द्रा यथा देवः प्रसीदति ॥
एवमुक्तास्तत सर्वे यतयः पुण्यशालिनः ।
यथावदुपगृह्याना निरस्ताः संशयान्नृप ॥
एवमेवेति ते विप्राः प्राहुः प्राञ्जलयो हरम् ।
छिन्नो नः संशयः सर्वो गृहीतोऽर्थः स तादृशः ॥
एतदर्थं समायाता वयमद्य तवालयम् ।
संगमाद्युवयोः सर्वो नष्टो मोहो महानिह ।
यथा वदसि देवेश तथा नः श्रेयसे परम् ॥
यथाह भगवान्रुद्रो यतामः सततं हरौ ।
इति ते मुनयः प्रीताः प्रणेमुः केशवं हरिम् ॥

Colophon.

Dn Ds2 T1 2 G1 4 5 M4 धनम् (for तप.) — T2 G1 om line 1243 — (L 1244) Dn Ds2 T1 2 G1 4 5 -निलय (for -निचय) — (L 1245) Dn Ds2 T1 2 G1 4 5 -दाता च (for -वशग) Cal ed मोक्ष (for मार्ग) — D6 om line 1246 — (L 1248) D6 प्राप्या , T1 G4 M प्राथ्यों , G2 प्रेक्ष्यो (for प्राध्यी) — (L 1249) D6 T2 4 G2 4 साख्ययोगं , G1 सांख्यं योग (for साख्ययोग-). — (L. 1250) D6 G4 M1 ब्रह्म- (for वेद-) — (L 1251) D6 विजानीयान् (for °नीत). — (L 1252) M1 3 एष (for एक) Dn Ds2 G4 सत्त्वमास्थितै (for °सस्थितै). — After line 1252, Dn Ds2 T1. 2 G1 4 5 ins .

12** नान्यो जगति देवोऽस्ति विष्णोर्नारायणात्पर. ।

— (L 1253) Dn Ds2 G2 M4 पठत (for पठध्व) — (L 1254) D6 T1 G1. 4 M1-3 व· श्रेयस- (for नि श्रे°) — (L 1256) Dn Ds2 G2 M दृढ हरि (for न संशयः) — (L 1257) Dn Ds2 T2 G1 4 5 M4 अच्युतम् (for ईश्वरम्) T1 यदीह प्राप्तुरुत्तमम् (for ^{b}) — (L 1258) D6 व्यपोहति (for विनङ्क्ष्यति) Dn Ds2 T4 G4 विनाशयति वो गुरु (for ^{b}) — (L 1259) Dn Ds2 D6 T1 2, 4 G1, 2, 4 5 सततं (for सर्वदा) — G4 om line 1260 — (L 1260) G2 मननं श्रवणं विप्रा (for ^{a}) — (L 1261) G5 शुद्धान्त - (for शुद्धेऽन्त.-) — (L 1262) M3 [अ]मुं (for मां) — (L 1263) T1 2 G1. 4 5 हरि (for सदा) Dn1 om (hapl) lines 1263^b-1265^a Dn Ds1 T1 2 G1 2. 4 5 उपास्ये(T2 G5 °यो)ऽस्मिन्हरौ स्मृत (for ^{b}) — (L 1264) D6 संशय (for संदेह) T2 4 G1 इष्यते (for इत्यपि) — G2 om line 1265. — (L 1265) T1 ज्ञान (for मायी) Dn Ds2 अघ- ; T1 G4 मान- , (for माय-) — Before line 1268, some Mss ins. वैशंपायन उवाच — (L 1268) Dn Ds3 T4 G2 M2 मुनय (for यतय) — (L 1269) M1 2 4 संशयं (for °यान्) Dn Ds2 T1 2 4 G1, 4 5 निरस(T1 2 G1 °स्य)न्संशयं नृप (for ^{b}) — (L 1270) M1 विप्रेन्द्रा (for तं विप्राः). D6 T2 G2 4 5 M1-3 प्रोचु (for प्राहु.) T1 नृप (for हरम्) — (L 4271) T1 सदाशिव (for स तादृश·) — (L. 1273) T1 G5 M1-3 शर्वं (for सर्वो) — (L 1274) T4 G5 M पुरा (for परम्) — (L 1275) T4 हरे (for हरौ) — (L. 1276) M1-3 हरम् (for हरिम्)

COLOPHON. — *Mention of the Epic* . Ds2. — *Mention*

वैशंपायन उवाच ।
ततः स भगवान्रुद्रः सर्वान्विस्मापयन्निव ।
स्तुत्या प्रचक्रमे स्तोतुं विष्णुं विश्वेश्वरं हरिम् ।
अर्घ्याभिः श्रुतियुक्ताभिर्मुनीनां शृण्वतां तदा ॥
नमो भगवते तुभ्यं वासुदेवाय धीमते ।
यस्य भासा जगत्सर्वं भासते नित्यमच्युत ।
नमो भगवते देव नित्यं सूर्यात्मने नमः ॥
यः शीतयति शीतांशुर्लोकान्सर्वानिमान्प्रभुः ।
नमस्ते विष्णवे देव तुभ्यं सोमात्मने नमः ॥
यः प्रजाः प्राणयत्येको विश्वात्मा भूतभावनः ।
नमः सर्वात्मने देव नमो वाय्वात्मने हरे ॥
यो दधार करेणासौ कुशचीरादि यत्सदा ।
दधार वेदान्सर्वांश्च तुभ्यं ब्रह्मात्मने नमः ॥
सर्वान्संहरते यस्तु संहारे विश्वदृक्सदा ।
क्रोधात्मा विश्वरूपोऽसि तुभ्यं रुद्रात्मने नमः ॥
सृष्टौ स्रष्टा समस्तानां प्राणिनां प्राणदायिने ।
अजाय विष्णवे तुभ्यं स्रष्ट्रे विश्वसृजे नमः ॥
आदौ प्रकृतिमूलाय भूतानां प्रभवाय च ।
नमस्ते देवदेवेश प्रधानाय नमो नमः ॥
पृथिव्यां गन्धरूपेण संस्थितः प्राणिनां हरे ।
दृढाय दृढरूपाय तुभ्यं गन्धात्मने नमः ॥
अपां रसाय सर्वत्र प्राणिनां सुखहेतवे ।
नमस्ते विश्वरूपाय रसाय च नमो नमः ॥
तेजसा भास्वरो यस्तु गुणो जन्तुहितः सदा ।
तस्मै देव जगन्नाथ नमो भास्वररूपिणे ॥
वायोः स्पर्शो गुणो यत्र शीतोष्णसुखदुःखदः ।
नमस्ते वायुरूपाय नमः स्पर्शात्मने हरे ॥
आकाशेऽवस्थितः शब्दः सर्वश्रोत्रनिवेशनः ।
नमस्ते भगवन्विष्णो तुभ्यं शब्दात्मने नमः ॥
यो दधार जगत्सर्वं मायामानुषदेहवान् ।
नमस्तुभ्यं जगन्नाथ मायिनेऽमायदायिने ॥
नम आद्याय बीजाय निर्गुणाय गुणात्मने ।
अचिन्त्याय सुचिन्त्याय तस्मै चिन्त्यात्मने नमः ॥
हराय हरिरूपाय ब्रह्मणे ब्रह्मवादिने ।
नमो ब्रह्मविदे तुभ्यं ब्रह्मब्रह्मात्मने नमः ॥
नमः सहस्रशिरसे सहस्रचरणाय च ।
नमः सहस्रवक्त्राय सहस्रनयनाय च ॥
विश्वाय विश्वरूपाय विश्वकर्त्रे नमो नमः ।

---

of Khila Dn Ds$_2$ D$_6$ T$_{1\,2.4}$ G$_{1\,3\,4\,5}$ M — *Sub-parvan* Dn Ds$_2$ कैलासयात्रा — *Adhy no* DnDs$_2$ 272, T$_1$ 200; T$_2$ G$_1$ 202, T$_4$ 169, G$_2$ 195, G$_4$ 199; G$_5$ M$_{1.2\,4}$ 201, M$_3$ 165

(L 1277) M$_{1\,3}$ सर्वं (for सर्वान्) — (L 1278) T$_2$ G$_1$ सर्वेश्वरं (for विश्वे°) — (L 1279) D$_6$ अर्घ्याभि (for अर्घ्याभि·) T$_4$ G$_4$ अर्घ्याभिस्तु तदा वाग्भिर् (for ^{a}) — Before line 1280, Dn Ds$_2$ M ins महेश्वर उवाच — (L 1281) Dn$_2$ G$_3$ उच्यते (for अच्युत) — (L 1282) D$_6$ सूर्याय ते (for °त्मने) — G$_4$ om (hapl) lines 1283–1288. G$_3$ om lines 1283–1284 — (L 1283) D$_6$ सर्वं-लोकान् (for लोकान्सर्वान्) Dn Ds$_2$ M$_4$ त्रिभु (for प्रभु) — (L 1284) D$_5$ तुभ्यं, T$_4$ G$_2$ नित्यं (for देव) Dn Ds$_2$ D$_6$ T$_{1\,3}$ G$_1$ नित्यं (for तुभ्यं) — D$_6$ om (hapl) lines 1285–1290 — T$_2$ om (hapl) lines 1285–1288 — (L. 1285) M$_{1-3}$ प्राणान् (for प्रजा.) G$_2$ M$_4$ प्रीणयति (for प्राण°) — (L 1286) Ds$_2$ G$_2$ वागात्मने (for वाय्वा°) G$_3$ तव (for हरे). — (L. 1288) G$_1$ सर्वान्वेदांश्च (by transp). — (L. 1289) T$_4$ विश्वसृक्, M$_2$ °कृत (for °दृक्) — (L 1290) T$_{2\,4}$ G$_{1-3}$ रुद्ररूपो (for विश्व°) Dn Ds$_2$ क्रोधात्मासि विरू-पोऽसि (for ^{a}) M$_4$ विश्वात्मने (for रुद्रा°). — (L 1293) M$_{2\,4}$ -रूपाय (for -मूलाय) — G$_3$ om (hapl) lines 1295–1298 G$_4$ om (hapl) lines 1289–1301 — (L 1299) T$_2$ G$_{1\,5}$ M$_{1\,3}$ तेजसां (for तेजसा) Ds$_2$ T$_{1\,2\,4}$ G$_{1\,2\,5}$ M भास्करो (for भास्वरो) Dn Ds$_2$ D$_6$ G$_2$ घृणो, M$_3$ गुहो (for गुणो) — (L 1300) Ds$_2$ T$_{1\,2.4}$ G$_{1-3\,5}$ M$_3$ भास्कर-, D$_6$ भासुर- (for भास्वर-) — (L 1301) G$_1$ वायौ (for वायो.) Dn Ds$_2$ D$_6$ T$_{1\,2\,4}$ G (G$_4$ om) M स्पर्श- (for स्पर्शो) M$_3$ यश्च (for यत्र) — (L 1302) D$_6$ T$_4$ सर्वात्मने, T$_2$ स्पर्शात्मनो, G$_1$ °त्मना (for °त्मने) — (L 1303) D$_6$ G$_2$ G$_3$ M$_{1-3}$ य स्थित· (for ऽवस्थित.) T$_1$ सत्त्व- (for सर्व-) — (L 1304) G$_{1\,4\,5}$ सर्वात्मने (for शब्दा°) — (L 1306) D$_6$ ऽमायिमायिने; T$_2$ G$_1$ °यिदायिने (for °यदायिने) — (L. 1308) D$_6$ चिन्त्याय ते (for °त्मने) M$_2$ चिन्त्याचिन्त्यात्मने नमः (for ^{b}) — G$_3$ om (hapl) lines 1309–1313 — (L 1309) Dn Ds$_2$ D$_6$

विश्वहर्त्रे नमो नित्यं भूतावास नमो नमः ॥
इन्द्रियायेन्द्ररूपाय विषयाय सदा हरे ।
नमोऽश्वशिरसे तुभ्यं वेदाहरणरूपिणे ॥
अग्नयेऽग्निपते तुभ्यं ज्योतिषां पतये नमः ।
नमः सूर्याय भद्राय तेजसां पतये नमः ॥
नमः सोमाय सौम्याय नमः शीतात्मने हरे ।
नमो वषट्कृते तुभ्यं स्वधास्वाहास्वरूपिणे ॥
नमो यज्ञाय ईज्याय हविषे हव्यसंस्कृते ।
नमः स्रुवाय पात्राय यज्ञाङ्गाय पराय च ॥
नमः प्रणवदेहाय क्षरायाप्यक्षराय च ।
वेदाय वेदरूपाय शास्त्रिणे शास्त्ररूपिणे ॥
गदिने खड्गिने तुभ्यं शङ्खिने चक्रिणे नमः ।
शूलिने चर्मिणे नित्यं वरदाय नमो नमः ॥
बुद्धप्रियाय बुद्धाय प्रबुद्धाय सुखाय च ।
हरये विष्णवे तुभ्यं नमः सर्वात्मने गुरो ॥
नमस्ते सर्वलोकेश सर्वकर्त्रे नमो नमः ।
नमः स्वभावशुद्धाय नमस्ते यज्ञसूकर ॥
नमो विष्णो नमो विष्णो नमो विष्णो नमो हरे ।
नमस्ते वासुदेवाय वासुदेवाय धीमते ॥
नमः कृष्णाय कृष्णाय सर्वावास नमो नमः ।
नमो भूयो नमस्तेऽस्तु पाहि लोकाञ्जनार्दन ॥
इति स्तुत्वा जगन्नाथमुवाच मुनिसत्तमान् ।
इदं स्तोत्रमधीयाना नित्यं व्रजत केशवम् ।
शरण्यं सर्वभूतानां तत्र श्रेयो विधास्यति ॥
ये चेमं धारयिष्यन्ति स्तवं पापविमोचनम् ।
तेषां प्रीतः प्रसन्नात्मा पठतां शृण्वतां हरिः ।
श्रेयो दास्यति सर्वात्मा नात्र कार्या विचारणा ॥
अवश्यं मनसा ध्यात केशवं भक्तवत्सलम् ।
श्रेयः प्राप्तुं यदीच्छन्ति भवन्तः संशितव्रताः ॥
इत्युक्त्वा भगवान्रुद्रस्तत्रैवान्तरधीयत ।
सगणः शंकरः साक्षादुमया भूतभावनः ॥
ततस्ते मुनयः सर्वे परां निर्वृतिमाप्नुयुः ।

$T_{1\,2\,4}$ G (G_4 om) दायिने (for -वादिने) —(L 1310) Cal ed तुभ्यं (for ब्रह्म-) — (L 1311) $T_{1\,2\,4}$ $G_{1\,4}$ -किरणाय (for -चर°) G_2 om lines 1311^b–1312^a — (L 1314) D_6 G_1 भूतवास (for भूता°) G_4 विश्वाय विश्वरूपाय विश्वकर्मे नमो नम —(L 1315) Dn ऐन्द्रयरूपाय (for इन्द्र°) D_6 इन्द्राय इन्द्ररूपाय, T_4 इन्द्रियोपेन्द्रियोपेन्द्रा (for ^{a}). — G_3 om (hapl) lines 1316–1320 (L 1316) Dn Ds_2 T_4 G_2 वेदाभरणरूपिणे (for ^{b}) — G_1 om (hapl) lines 1317–1320 — (L 1317) D_6 नित्यं (for तुभ्यं) — $G_{2\,4}$ om (hapl) line 1318 —(L 1318) Dn Ds_2 D_6 $T_{1\,2\,4}$ G_5 सूर्याय सूर्यपुत्रा(D_6 °रूपा-, T_2 G_5 °भद्रा)य (for ^{a}) D_6 ज्योतिषा (for तेजसां) — (L 1319) T_1 शान्तात्मने (for शीता°) Dn_2 D_6 नम (for हरे). — After line 1319, D_6 ins

13** रुद्राय रुद्ररूपाय विषयाय सदा हरे ।

— (L 1320) D_6 T_4 स्वधास्वाहात्मरूपिणे (for ^{b}) — (L. 1321) T_1 हविषे (for ईज्याय) G_3 नमो विश्वरसेज्याय (for ^{a}) T_1 नित्यं कव्यं च संस्कृते (for ^{b}) — (L 1323) D_6 भयायाथ भयाय च (for ^{b}) — After line 1323, T_4 ins ·

14** वेदाय वेदरूपाय अक्षय्याय क्षयाय च ।

— D_6 reads line 1324 twice. — (L. 1324) D_6 (both times) $T_{1\,2\,4}$ G देवाय देवरूपाय, Cal ed वेदरूपाय वेदाय (for ^{a}) D_6 (first time) अक्षयाय क्षयाय च, Cal ed शास्त्राय शास्त्ररूपिणे (for ^{b}) — (L 1325) D_6 $T_{1\,2\,4}$ G चक्रिणे (for खड्गिने) G_4 om (hapl) lines 1325^b–1328^a D_6 $T_{1\,2\,4}$ $G_{1-3\,5}$ खड्गिने (for चक्रिणे) — (L 1327) D_6 $T_{2\,4}$ $G_{1-3\,5}$ M_{2-4} बुद्धिप्रियाय (for बुद्ध°) — (L 1329) D_6 T_4 G_3 नमोऽस्तु ते (for नमो नमः) —(L 1330) D_6 -शब्दाय (for शुद्धाय). — (L 1331) $M_{1\,3}$ जिष्णो (for the third विष्णो). T_2 G_1 हरे नम (by transp); G_4 हरे हरे — (L 1333) T_2 G_1 नीलाय (for the second कृष्णाय) — M_1 om line 1335 — (L 1336) Dn_2 Ds_2 D_6 T_4 $M_{1\,3}$ इम (for इदं). — (L 1337) D_6 $T_{1\,2}$ G M_{1-3} शरणं (for °ण्यं). — (L. 1838) -विमोचकम् (for °नम्) — (L. 1339) M_3 प्रपन्नात्मा (for प्रस°) — (L 1340) Dn Ds_2 $T_{1.2.4}$ $G_{1\,3-5}$ धर्मात्मा (for सर्वात्मा) — (L. 1341) D_6 ध्येयं; $T_{1\,2}$ ध्यात्वा, G_3 ध्यातं (for ध्यात) G(ed) अप्यह स्तोतुमिच्छामि (for ^{a}) — (L 1342) M_{1-3} -प्राप्तिं (for प्राप्तुं). D_6 यदिच्छन्ति (for यदी°) — Before line 1343, D_6 ins. वैशंपायन उवाच — (L. 1344) G_4 सह (for भूत-). — After line 1345, Dn Ds_2 $T_{1\,2}$ $G_{1\,3-5}$ ins :

15** तमेव परमं तत्त्वं मत्वा नारायणं हरिम् ।

विस्मयं परमं गत्वा मेनिरे स्वकृतार्थताम् ॥
लोकपालास्तदा विष्णुं नमस्कृत्य हरिं तदा ।
जग्मुः स्वान्यथ वेश्मानि गणैः सर्वैर्नृपोत्तम ॥
आरुह्य भगवान्विष्णुर्गरुडं पक्षिपुंगवम् ।
शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणीतलत्रवान् ॥
यथागतं जगन्नाथो ययौ बदरिकामनु ।
सायाह्ने पुण्डरीकाक्षो नित्यं मुनिनिषेविताम् ॥
तत्र गत्वा यथायोगं विश्रम्य हरिरीश्वरः ।
अर्चितो मुनिभिः सर्वैर्निषसाद सुखासने ॥

Colophon

वैशंपायन उवाच ।
एतस्मिन्नेव काले तु पौण्ड्रो नृपवरो नृप ।
बलवान्सत्त्वसंपन्नो योद्धा विपुलविक्रमः ॥
वृष्णिशत्रुस्तदा राजा कृष्णद्वेष्टा बलात्तदा ।
नृपान्सर्वान्समाहूय प्रोवाच नृपसंसदि ॥
जिता च पृथिवी सर्वा जिताश्च नृपसत्तमाः ।
वृष्णयस्ते बलोन्मत्ताः कृष्णमाश्रित्य गर्विताः ॥
न दास्यन्ति करं सर्वे मम ते कृष्णसंश्रयात् ।
स तु कृष्णश्च बलवान्मामवज्ञाय तिष्ठति ॥
अहं चक्रीति गर्वोऽभूत्तस्य गोपस्य सर्वदा ।
शङ्खी चक्री गदी शार्ङ्गी तूणीशरसहायवान् ।
एवमादिर्महागर्वस्तस्य संप्रति वर्तते ॥
लोके च मम यन्नाम वासुदेवेति नित्यशः ।
अगृह्णान्मम तन्नाम गोपो मदबलान्वितः ॥
तस्य चक्रस्य यच्चक्रं ममापि निशितं महत् ।
गर्वहन्तृ सदा तस्य बलि नाम्ना सुदर्शनम् ॥
सहस्रारं महाघोरं तस्य चक्रस्य नाशनम् ।
अनेन महता चक्रं गोपकस्य नृपोत्तमाः ॥
ममाप्येतद्धनुर्दिव्यं शार्ङ्गं नाम महावरम् ।
नाशयामि न संदेहश्चक्रं तस्य यदद्भुतम् ।
पाञ्चजन्यो महाशङ्खो महानादः सदा बभौ ।
तस्य शङ्खस्य जेतासौ पश्यध्वं नृपसत्तमाः ॥
गदा कौमोदकी नाम ममेयं महती दृढा ।
कालायससहस्रस्य भारेण सुकृता मया ॥
खड्गो नन्दकनामासौ ममायं विपुलो दृढः ।
अन्तकस्यान्तको घोरस्तस्य खड्गस्य नाशकः ॥

—(L 1346) G_2 M_2 स्म (for स्व-) M_3 मेनिरे परमार्थताम् (for ^{b}) —(L 1347) Dn_2 मुदा (for तदा) —(L 1350) G_1 शङ्खचक्र- (for शङ्खी चक्री) G_3 शङ्खी खड्गी गदी शार्ङ्गी (for ^{a}) $M_{1\ 3}$ शूली- (for तूणी-) —(L 1351) D_6 T_1 यथागतो (for °गतं) —(L 1352) M_3 -निषेवितः (for °ताम्) —(L. 1353) Dn Ds_2 T_4 G_2 विनम्य, T_1 M_3 विश्राम्य (for विश्रम्य) —(L 1354) G_3 (also as above) नित्यं मुनिनिषेविताम् (for ^{b})

Colophon. — *Mention of the Epic* Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1\ 2\ 4}$ G — *Sub-parvan* Dn Ds_2 D_6 M कैलासयात्रा — *Adhy no* Dn_1 Ds_2 274, T_1 G_3 201, T_2 G_1 203, G_2 196, G_4 M_4 200; G_5 202, M_{1-3} 166

T_2 G_1 om the ref —(L 1355) Dn Ds_2 $T_{1\ 2\ 4}$ G -वरोत्तम (for -वरो नृप) —(L 1357) T_4 G_1 कृष्णे (for वृष्णि-) D_6 $T_{2\ 4}$ $G_{1\ 5}$ सदा (for तदा) D_6 T_2 राजन् (for राजा). Dn Ds_2 $G_{2\ 3}$ कृष्णद्वेषी, T_1 °द्वेषाद् (for °द्वेष्टा) D_6 बली (for बलात्) —(L 1358) G_3 -सत्तम (for -संसदि) —(L 1360) D_6 $T_{1\ 2,4}$ $G_{1,4,5}$ दर्पिताः (for गर्विता.)

—(L 1361) Dn Ds_2 T_4 दास्यन्ति मे (for न दास्यन्ति). Dn_1 सर्वं (for सर्वे) D_6 G_3 M दास्यन्ति करसर्वस्वं (for ^{a}) Dn_1 Ds_2 T_1 G_2 M न हि ते, Dn_2 निहते; D_6 T_4 न हि मे (for मम ते) Cal ed न हि ते मम शत्रव. (for ^{b}) —(L 1362) Dn Ds_2 $G_{2\ 4}$ स तु कृष्णश्चक्रबलान्, Cal ed कृष्णश्चक्रबलान्मत्तो (for ^{a}) —(L 1363) G_2 ऽयं (for ऽभूत्) —(L 1364) Dn Ds_2 शरी तूणी (for तूणीशर-) —(L 1366) Dn Ds_2 विश्रुतम् (for नित्यश) —(L 1367) D_6 T_4 गोपालोऽति- (for गोपो मद-) $M_{1\ 2}$ गोपो बलमदान्वित (for ^{b}) —(L 1368) G_4 ममासीच्छ्रितं महत् (for ^{b}) —(L 1369) D_6 $G_{1\ 5}$ गर्वहर्तृ, T_4 °भङ्गं (for °हन्तृ) Dn Ds_2 $M_{1\ 3}$ नाम्ना चापि, D_6 बभौ नाम्ना, $M_{2\ 4}$ नाम चापि (for बलि नाम्ना) —(L. 1370) G_4 M_{2-4} नाशकम् (for °नम्) —(L 1371) Dn Ds_2 गोपजस्य (for °कस्य) M गोपस्य नृपसत्तमा (for ^{b}) — Dn Ds_2 M_3 om lines 1373–1375 —(L. 1376) D_6 $T_{1\ 4}$ $G_{2\ 3}$ चैव (for नाम) $T_{1,4}$ G_3 बृहती (for महती) —(L 1377) T_2 $G_{1\ 5}$ सुकृतं; G_3 °तो (for °ता) —(L 1379) D_6 T_2 $G_{3,4}$

ततश्चाहं गदी खड्गी शार्ङ्गी चक्री तलत्रवान् ।
युधि जेतास्मि कृष्णस्य नात्र कार्या विचारणा ॥
मां च ब्रूत नृपाश्चैवं गदिनं चक्रिणं तथा ।
शङ्खिनं शार्ङ्गिणं वीरं ब्रूत नित्यं नृपोत्तमाः ।
वासुदेवेति मां ब्रूत न तु गोपं यदूत्तमम् ॥
एकोऽहं वासुदेवो हि हत्वा तं गोपदारकम् ।
सख्युर्मम निहन्तारं नरकस्य महात्मनः ॥
मां तथा यदि न ब्रूत दण्ड्या भारं शतं शतम् ।
सुवर्णस्य च निष्कस्य धान्यानां बहुशस्तथा ॥
तथा ब्रुवति राजेन्द्रे मनसा दुःसहं तदा ।
केचिल्लज्जासमायुक्ता आसते वीर्यवत्तराः ।
रसज्ञा बलवीर्यस्य केशवस्य सदा नृपाः ॥
अपरे तु नृपा राजन्नेवमेवेति चुक्रुशुः ।
अन्ये बलमदोत्सिक्ता जेष्यामः केशवं रणे ॥

Colophon.

वैशंपायन उवाच ।
ततः कैलासशिखरान्निर्गतो मुनिसत्तमः ।
नारदः सर्वलोकज्ञः पौण्ड्रस्य नगरं प्रति ॥
अवतीर्य नभोमार्गात्प्रत्यागम्य नृपोत्तमम् ।
द्वाःस्थेन च समाज्ञप्तः प्रविवेश गृहोत्तमम् ॥
अर्घ्यादिसमुदाचारं नृपाल्लब्ध्वा महामुनिः ।
निषसादासने शुभ्रे स्वास्तृते शुभ्रवाससा ॥
कुशलं पृष्टवान्भूयो नृपस्य मुनिसत्तमः ।
उवाच नारदं भूयः पौण्ड्रको बलगर्वितः ॥
भवान्सर्वत्र कुशलः सर्वकार्येषु पण्डितः ।
प्रथितो देवसिद्धेषु गन्धर्वेषु महात्मसु ॥
सर्वत्रगो निराबाधो गन्ता सर्वत्र सर्वदा ।
अगम्यं तव विप्रेन्द्र ब्रह्माण्डेऽत्र न किंचन ॥
नारदैवं वद त्वं हि यत्र यत्र गतः सदा ।
तत्र तत्र तपःसिद्धो लोके प्रथितवीर्यवान् ॥
पौण्ड्र एव बली ख्यातो वासुदेवेति शब्दितः ।
शङ्खी चक्री गदी शार्ङ्गी खड्गी तूणीतलत्रवान् ॥
विजेता राजसिंहानां दाता दानस्य सर्वदा ।
भोक्ता राज्यस्य सर्वस्य शास्ता राज्ञां बलाद्बली ।
अजेयः शत्रुसैन्यानां रक्षिता स्वजनस्य ह ॥
योऽन्यो गोपकनामासौ वासुदेवेति शब्दितः ।

नाशन. (for °क·) — (L 1380) Dn_2 M_2 तत्रायं च, G_3 ततश्चायं (for °श्चाहं) D_6 M_{1-3} चक्री, G_2 शङ्खी (for खड्गी). T_4 ततश्चापाङ्गखड्गी च (for [a]) Ds_2 शङ्खी, T_4 चक्री, G_2 शङ्खी (for शार्ङ्गी) Dn शङ्खी, D_6 M_3 खड्गी, T_4 शार्ङ्गी (for चक्री) Dn Ds_2 तनुत्रवान् (for तलत्र°) —(L 1381) D_6 हन्ता च, T_4 पाता च (for जेतास्मि) —(L 1386) Dn Ds_2 D_6 T_4 M बलाद्धन्ता (for निहन्तारं) — (L. 1387) D_6 दण्डो (for दण्ड्या) Dn Ds_2 $M_{1\ 3}$ भारशतै ; $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 3}$ भारशतं (for भारं शतं) —(L. 1388) Dn Ds_2 $T_{1\ 4}$ $G_{2\ 3}$ M_2 धान्यस्य ; $M_{1\ 3}$ धनानां (for धान्यानां) —(L 1399) D_6 मनसा दु खसंयुता (for [b]) —(L 1390) G_2 om (hapl) 1390[b]-1393[a] M_4 श्चासंस्ते (for आसते) Ds_2 बलवत्तरा , D_6 T_4 G_4 वीर्यसत्तमा , G_3 M °वत्तमा (for °वत्तरा) — (L 1391) G_4 नृप (for नृपा·) Bom Poona eds G(ed) राजानस्ते सदा नृप (for [b])

COLOPHON — *Mention of the Epic* Ds_2 — *Mention of Khila* Dn Ds_3 D_6 $T_{1\ 2\ 4}$ G M — *Adhy name* . Dn Ds_2 M पौण्ड्रवध.. — *Adhy. no.* : Dn Ds_2 275, T_1 G_3 202 , T_2 G_1 204 , T_4 171 , G_3 197 ; G_4 201 , G_5 203 , M_{1-4} 167 , M_4 300.

T_4 om the ref — (L 1394) D_6 निर्गता मुनिसत्तमाः (for [b]) — G_1 om lines 1396–1399 — (L 1396) Dn_2 Ds_2 G_2 M_4 नभोभागात् (for °मार्गात्) M_1 प्रतिगम्य ; M_4 प्रत्युद्गम्य (for प्रत्यागम्य) Dn Ds_2 T_4 नरोत्तमम् (for नृपो°). — (L 1397) G_2 द्वारस्थेन (for द्वा स्थेन च). — (L 1399) D_6 $T_{1\ 4}$ $G_{1\ 3-5}$ शुद्धे (for शुभ्रे) Dn_1 Ds_2 M_3 ह्यास्तृते , $T_{1.\ 4}$ $G_{1\ 3-5}$ $M_{1\ 2\ 4}$ वि° (for स्वा°). —(L 1400) Dn Ds_2 नृप स मुनिसत्तमम् (for [b]) —(L 1401) T_2 $G_{1\ 5\ 4}$ वचनं (for नारदं) — (L 1403) D_6 प्रार्थितो (for प्रथितो) —(L 1405) न हि (for ऽत्र न) —(L. 1406) Dn Ds_2 भवान् (for सदा) — (L 1408) Dn Ds_2 T_4 च विख्यातो ; G_2 बलख्यातो (for बली ख्यातो) T_1 T शब्दयते (for शब्दित). — G_3 om lines 1410-1413. — (L 1409) G_1 शङ्खचक्रगदाशार्ङ्गी (for [a]) Dn Ds_2 -तनुत्रवान् (for -तलत्र°) — (L 1410) Dn Ds_2 सर्वस्य; T_1 धान्यस्य (for दानस्य) — (L. 1411) Dn Ds_2 राजा (for राज्ञां) — (L. 1413) Dn_1 ऽयं ; Dn_2 Ds_3 T_4 G_3 ऽद्य (for

तस्य वीर्यबले न स्तो नाम्नश्च मम धारणे ॥
स हि गोपो वृथा बाल्याद्धारयत्येव नाम मे ।
इदं निश्चिनु विप्रेन्द्र एक एव भवाम्यहम् ॥
वासुदेवो जगत्यस्मिन्निर्जित्य बलिनं यदुम् ।
वृष्णीन्सर्वान्बलाज्जित्वा निर्दहिष्ये च तां पुरीम् ।
द्वारकां वृष्णिनिलयां योद्धा चाहं महामते ॥
एते च बलिनः सर्वे नृपा मम समागताः ।
अश्वाश्च वेगिनः सन्ति रथा वायुजवा मम ।
नागा मत्ताः सहस्रं च शतं नियुतमेव च ॥
एतेनैव बलेनाजौ हनिष्ये केशवं रणे ।
तस्मादेवं सदा विप्र वद ब्रह्मन्पुरे मम ॥
इन्द्रस्यापि सदा विप्र वद नारद सांप्रतम् ।
प्रार्थनैषा मम विभो नमस्ये त्वां तपोधन ॥

नारद उवाच ।

सर्वत्रगः सदा चास्मि यावद्ब्रह्माण्डसंस्थितिः ।
अवार्यः सर्वलोकेषु गमने केनचिन्नृप ॥
किं तु वक्तुं तथा राजन्नोत्सहे नृपसत्तम ।
महीं शासति देवेशे चक्रपाणौ जनार्दने ॥
विष्णौ सर्वत्रगे देवे दुष्टान्हत्वा सबान्धवान् ।
वासुदेवेति को नाम तिष्ठत्यस्मिन्हराविति ।
को नाम वक्तुमेवं हि कृष्णे शासति गोपतौ ॥
अज्ञानाद्वक्तुमेवं चेत्समर्थः प्राकृतो जनः ।
हरिः सर्वत्रगो विष्णुर्दर्पं ते व्यनेष्यति ॥
अचिन्त्यविभवो विष्णुः शार्ङ्गधन्वा गदाधरः ।
आदिदेवः पुराणात्मा दर्पं ते व्यपनेष्यति ॥
हास्यमेतन्महाराजन्यच्चक्रं तव संस्थितम् ।
शार्ङ्गं शङ्खं तथा राजन्गदा घोरतरा हि ते ।
अतीव हासकालोऽयं तव संप्रति वर्तते ॥

Colophon.

वैशंपायन उवाच ।

ततः क्रुद्धो महाराज पौण्ड्रो बलमदान्वितः ।
नारदं विप्रवर्यं तं प्रोवाच नृपसंसदि ॥
मा मैवं वद देवर्षे राजाहं विजयी सदा ।
गच्छ त्वं काममद्यैव मुनिः शापप्रदः सदा ।
भीतस्त्वत्तो महाबुद्धे गच्छ त्वं काममत्र ह ॥
इत्युक्तो नृपवीर्येण तूष्णीमेव स नारदः ।

ऽन्यो) D6 T4 G2 -शरोऽसौ (for -नामासौ) —(L 1416) G2 वासुदेव (for एक एव) —(L 1417) D6 पदम् (for यदुम्) —(L 1418) Dn Ds2 क्षिप्त्वा, G2 जित्य (for जित्वा) Dn2 Ds2 M3 4 निहनिष्ये (for निर्दहिष्ये) —(L 1419) G1 4 M2 विष्णु (for वृष्णि-) G5 महामुने (for °मते) —(L 1421) D6 T4 बहवः (for वेगिनः) G2 तथा (for रथा) G1 वायुजिता (for °जवा) —(L 1422) M4 नानामत्ता (for नागा मत्ता) G5 नागा सहस्रमत्ताश्च (for ᵃ) Dn Ds2 गजा (for शत). —(L 1423) Dn Ds2 [अ]हं (for [ए]व) D6 T1 2.4 G [अ]हं (for [आ]जौ —(L 1426) M1 3 तपोधनम् —(L 1427) D6 सो (for च) —(L 1428) Dn Ds2 T2.4 G1.2 4 आचार्यः (for अवार्यं) Dn Ds2 D6 -कार्येषु (for -लोकेषु) —(L 1429) Dn Ds2 T2.4 G1-4 M1 नु (for तु) Dn Ds2 G1 2 G1-4 M4 उत्सहे (for नो°). —(L. 1432) D6 नृपाविह ; G2 नराधिप (for हराविति). —(L 1433) Dn Ds2 M गोमतीम् (for गोपतौ) —(L 1434) Dn Ds2 समर्था प्राकृता जना (for ᵇ) —(L 1438) Dn D6 T1.4 G1.4 M4 महाराज ; T2 महद्राजन्, M2 वहन्रा° (for महारा°). Dn तच्च (for तव) G2 चक्रं तव सुसंस्थितम् (for ᵇ) —(L 1439) Ds2 T1 4 G2 खड्गं, D6 M2 शङ्ख., G3 चक्रं (for शङ्खं) G1 गदा (for तथा) Dn शार्ङ्गखड्गं तथा राजन् (for ᵃ) D6 T4 M1-3 घोरतमा (for °तरा) Dn Ds2 महाघोरं न दाप्यते, T1 महाघोरतरा हि ते; G2 महाघोरं तमो हि ते (for ᵇ)

COLOPHON — *Mention of Khila* Dn Ds2 D6 T1 2 4 G M — *Adhy name* Dn Ds2 पौण्ड्रकनारदसंवाद, D6 M पौण्ड्रकवधः ; T4 पौण्ड्रवधः — *Adhy no* Dn3 Ds2 276 ; T1 G3 203, T2 G1 205, T4 172, G2 186, G4 202 ; G6 204, M1-3 168 M4 204

(L 1441) T2 G1 5 महातेजा· (for °राज). Dn Ds2 D6 T1 2 4 G1-6 M1 पौण्ड्रो मदबलान्वित· (for ᵇ) —(L. 1443) T1 विप्रर्षे (for देवर्षे) Dn2 किमिदं विप्र विप्रर्षे, Ds2 किमभिप्रेत्य विप्रर्षे, M2 मा चैवं वद विप्रर्षे (for ᵃ). M3 राजानं (for राजाहं) D6 T4 G3 सह (for सदा) Dn Ds2 राजाह च द्विजै. सह (for ᵇ) —(L 1444) Dn Ds2 अथ वा (for अद्यैव). Dn Ds2 मुने (for मुनि·) D6 T4 G3

जगामाकाशगमनो यत्र तिष्ठति केशवः ।
स गत्वा विष्णुसकाशं विष्णोः सर्वं शशंस ह ॥
तच्छ्रुत्वा भगवान्विष्णुर्यथेष्टं वदतामिति ।
गर्वं तस्यापनेष्यामि श्वोभूते मुनिसत्तम ।
इत्युक्त्वा विररामैव तस्मिन्बदरिकाश्रमे ॥
ततः पौण्ड्रो महावीर्यो बलैर्बहुभिरीश्वरः ।
अश्वैरनेकसाहस्रैर्गजैर्बहुभिरन्वितः ॥
सप्तकोटिरथैर्युक्त ईश्वरः सत्यसंगरः ।
अनेकशतसाहस्रैः पत्तिभिश्च समन्वितः ।
एकलव्यप्रभृतिभी राजभिश्च समन्वितः ॥
अष्टौ हयसहस्राणि नागानां नियुतं तथा ।
प्रयुतं पत्तिसाहस्रं तद्बलं समपद्यत ॥
एतेन तु बलेनाजो प्रस्फुरन्नृपसत्तम ।
विरराज महाराज उदयस्थो यथा रविः ॥
ययौ मध्यमरात्रेण नगरीं द्वारकामनु ।
पत्तयो दीपिकाहस्ता रात्रौ महति दारुणे ॥
ययुर्विविधशस्त्रौघाः सपतन्तो महाबलाः ।
द्वारकां वीर्यसंपन्नां महाघोरां नृपोत्तमाः ॥
रथं महान्तमारुह्य शस्त्रौघैश्च समन्वितम् ।
पट्टसासिसमाकीर्णं गदापरिघसंकुलम् ॥
शक्तितोमरसंकीर्णं ध्वजमालासमाचितम् ।
किंकिणीजालसंयुक्तं शरासिप्रासशोभितम् ॥
महाघोरं महारौद्रं युगान्तजलदोपमम् ।
धनुर्गदासमाकीर्णं महावातजवोपमम् ।
अभ्यर्कसदृशाकारं ययौ द्वारवतीमनु ॥
गृहीतदीपिको राजा वीर्यवान्बलवान्नृप ।
हन्तुमैच्छज्जगन्नाथ वृष्णींश्चैव समन्ततः ॥
आकर्षन्बलमुख्यांस्तान्राज्ञः सर्वान्महाद्युतिः ।
पूर्वद्वारं समागम्य बलं संस्थाप्य यत्नतः ।
इदं प्रोवाच राजा तु नृपान्सर्वानवस्थितान् ॥
ताड्यतामत्र भेरी तु नाम विश्राव्य मामकम् ।
युध्यतां युध्यतामत्र देयं वा प्रतिदीयताम् ॥
आगतः पौण्ड्रराजोऽयं युद्धार्थी वीर्यवत्तरः ।
हन्तुकामः समग्रान्वः कृष्णबाहुबलाश्रयान् ॥

भवान् (for सदा) —(L 1445) Dn Ds2 अद्य हि (for अत्र ह) — G3 om lines 1446–1448 — (L 1446) Ds2 D6 M2 5 इत्युक्तो नृपवर्येण (for ᵃ) —(L 1448) D6 T2 4 G1 4. 5 M गत्वा विष्णुसकाशं स, T1 गत्वा तत्र तथा विष्णोर् (for ᵃ) T1 यथा (for विष्णो) —(L 1450) Dn Ds2 D6 T4 G1 2 M दर्पं (for गर्वं) Dn Ds2 T1 2 4 G द्विज- (for मुनि-) —(L 1451) D6 T1 2 4 G1–4 आसिन्बदरिकावने (for ᵇ) —(L 1452) Dn Ds2 M2 महाबाहुर् (for °वीर्यो) — G2 om line 1453 G4 om lines 1454–1455. —(L 1454) T1 G2 3 शस्त्र- (for सप्त-) T1 G3 -घनैर्युक्तम्, T2 -घनैर्युक्त (for -रथैर्युक्त·) Dn Ds2 M शस्त्र- (M2 सप्त)कोटिसमायुक्त (for ᵃ) Dn Ds2 स राजा (for ईश्वर) —(L 1455) D6 पङ्क्तिभिश्च (for पत्ति°) —G1 om line 1456 —(L 1456) Dn Ds2 समन्ततः (for °न्वितः). —(L 1457) Dn Ds2 G2 रथ- (for हय-) Dn Ds2 G4 T4 G2 M1 4 अयुतं (for नियुतं) —(L 1458) Dn Ds2 अर्बुदं पत्तिसंघानां (for ᵃ) — —(L 1359) D6 M प्रत्वरन् (for प्रस्फुरन्) —(L 1460) D6 T2. 4 G1 3. 4. 5 M3 महावीर्यं (for °राज). Dn Ds2 M2 महारविः (for यथा रविः). —(L 1461) Dn Ds2 G4 स ययौ मध्यरात्रेण (for ᵃ) —(L 1462) M पत्तिनो (for पत्तयो). Dn Ds2 D6 तमसि (for महति) —(L 1463) Cal ed. -शस्त्राढ्या (for -शस्त्रौघा) —(L 1465) Dn Ds2 T4 समावृतम्, G1 निरन्तरम् (for समन्वितम्) —(L 1466) T1 2 G4 3–5 -शोभितम् (for -संकुलम्) G2 महाजलदसंनिभम् (for ᵇ) — G2 om lines 1467–1470 T4 om line 1467. —(L 1467) Dn1 -समन्वितम्, D6 -समाकुलम् (for °चितम्) T1 ध्वजमालाभिरञ्जितम् (for ᵇ) —(L 1468) G5 संकीर्णं (for -संयुक्तं) D6 T4 शक्त्यृष्टि-, T1. 2 गदासि-, (for शरासि-) Dn Ds2 -संयुतम्, D6 T4 M1 2 -तोमरम् (for -शोभितम्) —(L 1469) D6 T4 महाघोषं (for °घोरं) — D6 T1 2 4 G1. 3 om line 1470 —(L 1470) G4 5 समायुक्तं (for °कीर्णं) Dn Ds2 महावाद्योपम महत्, Cal ed महामेघोपम महत् (for ᵇ) —(L 1471) D5 T1 2 4 G3 अत्यर्क-, G4 5 अर्कस्य (for अभ्यर्क-). —(L 1472) M1 3 राजन् (for राजा) T4 M1–3 नृप (for नृप). —(L 1473) T1. 2 4 G वृष्णिवीरं (for वृष्णींश्चैव) —(L 1474) T1. 2 G1 3 5 राजा (for राज्ञः). D6 तत्र (for सर्वान्) T1. 2 G1 3. 4 महामतिः (for °द्युतिः) —(L 1475) Dn Ds2 पुरद्वारं समासाद्य (for ᵃ) —(L 1476) T1 उपस्थितान् (for अव°) —(L 1478) G5 वध्यताम्

इति ते प्रेषिताः सर्वे समाघ्नंस्तूर्यकान्बहून् ।
दीपिकाश्च प्रदीप्यन्ते बह्वयः शतसहस्रश. ॥
इतश्चेतश्च राजानो वर्तन्ते युद्धलालसाः ।
पुरी ते परितस्तस्थुः क्षत्रियाः शस्त्रिणस्तथा ।
सिंहनादं प्रकुर्वन्तः शस्त्रधारासमाकुलाः ।
कुतो नु वृष्णिप्रवरः कुतो राजा जगत्पतिः ॥
कुतश्च सात्यकिर्वीर. कुतो हार्दिक्य एव च ।
कुतो नु बलभद्रश्च सर्वयादवसत्तमः ।
इत्येवं कथयन्तो वै राजानः सर्व एव तु ॥
आदाय शस्त्राणि बहूनि सर्वतः
शरांश्च चापानि महान्ति सर्वे ।
युद्धाय संनाहनिबद्धदृष्टयो
ययुः पुरीं द्वारवतीं नृपोत्तमाः ॥

Colophon

वैशंपायन उवाच ।
ततश्च यादवाः सर्वे दृष्ट्वा सैनिकसंचयम् ।
रात्रौ च समनुप्राप्तं महाशस्त्रसमाकुलम् ॥
महावातसमुद्भूतं कल्पान्ते सागरोपमम् ।
अचिन्त्यं सर्वभूतानां कालान्तकयमोपमम् ॥
संनद्धाः समपद्यन्त शस्त्रिणो युद्धलालसाः ।
गृहीतदीपिकाः सर्वे यादवाः शस्त्रयोधिनः ॥
सात्यकिर्बलभद्रश्च हार्दिक्यो निशठस्तथा ।
उद्धवोऽथ महाबुद्धिरुग्रसेनो महाबलः ॥
अन्ये च यादवाः सर्वे कवचग्रग्रहे रताः ।
सामन्ता युद्धकुशला रात्रौ संनाहयोधिनः ॥
खड्गिनः शस्त्रिणश्चैव सर्वे शस्त्रसमाकुलाः ।
युद्धाय समपद्यन्त बह्वो बाहुशालिनः ॥
रथिनो गजिनश्चैव सादिनः सायुधास्तथा ।
नित्ययुक्ता महात्मानो धन्विनः पुरुषोत्तमाः ॥
निर्ययुर्नगरात्तूर्णं दीपिकाभिः समन्ततः ।
कुतः पौण्ड्रक इत्येव ब्रुवन्तः सर्वसात्वताः ॥
दीपिकादीपितो देशो निस्तमाः समपद्यत ।
ततो वितिमिरो देशः समन्तात्प्रत्यपद्यत ।
युद्धं समभवद्घोरं वृष्णीनां क्षत्रियैः सह ॥
ततो महान्समभवत्संनादो लोमहर्षणः ।
हया हयैः समायुक्ताः गजाश्च रथयूथपैः ॥

(for युध्यताम्) —(L 1479) Dn Ds_2 G_2 आगतः पौण्ड्रको राजा (for ^{a}) T_2 G_3 M_4 युद्धार्थं (for °र्थी) D_6 $T_{1,2}$ G M वीर्यसत्तम ; T_4 °वत्तम (for °वत्तर:) —(L 1480) $T_{1\ 2}$ G हत्वा वृष्णीन् (for हन्तुकाम) M_4 -बलाश्रितान् (for °श्रयान्) —(L 1481) Dn Ds_2 समीयु· सूर्यकान्बहून् ; G_2 सवनं सूचका° (for ^{b}) —(L. 1483) Dn Ds_2 युध्यन्ते, T_4 G_4 वर्धन्ते (for वर्तन्ते) —(L 1484) T_4 $G_{2\ 4}$ पुरतस् (for परितस्) T_1 तत्र (for तस्थुः) Dn Ds_2 पुरीं ते पुरतस्तत्र (for ^{a}) —(L 1488) M_3 स (for नु) —(L. 1489) Dn Ds_2 ते, M_4 च (for तु) —(L 1491) Dn Ds_2 बहूनि (for महान्ति) T_2 G_1 संयुगे (for सर्वे) —(L. 1492) Dn Ds_2 T_2 $G_{2,3}$ -निबद्धशो ययुर् (for °द्धदृष्टयो) —(L. 1493) Dn Ds_2 T_4 $G_{2\ 3}$ हरे , D_6 तत (for ययु·) G_1 नृपोत्तम·

Colophon — *Mention of the Epic* , D_{92} — *Mention of Khila* Dn Ds_2 D_6 $T_{1\ 2\ 4}$ G M — *Adhy name* Dn Ds_2 M पौण्ड्रकवध , T_1 G_5 पौण्ड्रकस्य द्वारकागमनम्, G_4 पौण्ड्रवध — *Adhy no* : Dn Ds_3 277 , T_1 G_3 204 ; T_2 G_1 206 ; T_4 173 , G_2 199 , G_5 205 , M 169

(L 1494) -सचयान् —(L 1495) Dn Ds_2 $G_{2\ 4}$ व्यसन (for समनु-) —(L 1496) D_6 $T_{1,2}$ G कल्पान्ते सागरं यथा , Bom Poona eds G(ed) °न्ते समरोपमम् (for ^{b}) —(L 1497) $G_{2\ 3-5}$ -शनोपमम् (for -यमो°) — Dn Ds_2 om line 1498 —(L 1498) T_1 सनाथा· (for संनद्धा.) G_1 शस्त्रेणायुधलालसा. (for ^{b}). —(L. 1499) G_3 गृहीत्वा (for गृहीत-) G_5 चित्र- (for शस्त्र) —(1501) D_6 T_4 G_2 स (for ऽथ). —(L 1502) D_6 T_4 कवचावृतमूर्तय. (for ^{b}) —(L 1503) Dn Ds_2 M_1 समस्त-, D_6 $T_{1\ 2}$ $G_{1\ 3-5}$ M_3 समन्ताद्, G_2 समर्था (for सामन्ता) —(L 1504) Dn Ds_2 T_1 शस्त्रिण खड्गिनश्चैव (for ^{a}) —(L 1506) D_6 $T_{1\ 2}$ $G_{1\ 3-5}$ M_{2-4} गदिनश् (for गजि°) G_2 वाजिन (for सादिन.) —(L 1509) Dn Ds_2 D_6 T_1 $G_{2\ 4}$ M_4 वदन्त· , T_2 कुर्वन्तः (for ब्रुवन्त.). —(L 1511) G_5 समपद्यत (for प्रत्य°) —(L 1512) D_6 पुन (for युद्धं) M वृष्णिभि (for वृष्णीनां). Dn Ds_2 वृष्णिभि शत्रुभि· सह (for ^{b}) —(L 1513) D_6 G_1 संचारो ; T_1 संनद्धो (for सनादो) —(L 1514) T_2 G_3 om (hapl.) 1514^b–1516^a. — Dn Ds_2 गज- (for रथ-). —(L.

रथा रथैः समायुक्ताः सादिनः सादिभिस्तथा ।
खड्गिभिः खड्गिनो राजन्गदिभिर्गदिनस्तथा ॥
परस्परव्यतिकरो रण आसीत्सुदारुणः ।
महाप्रलयसंक्षोभः शब्दस्तेषां महात्मनाम् ॥
आधावत प्रहरत द्रुतं विपरिधावत ।
निघ्नतैतानित्यवोचन्वृष्णयः सर्वतो नृपान् ॥
अयमेष महाबाहुः खड्गी पतति वीर्यवान् ।
अयमेष शरी घोरो वर्तते नः सुदारुणः ।
गदी चायं महावीर्यः सर्वान्नो बाधते नृपः ॥
अयं रथी शरी चापी गदी तूणीरवान्प्रभो ।
पट्टसी सर्वतो याति कुन्तपाणिरयं बली ॥
अयमत्र महाशूली संस्थितः सर्वतोदिशम् ।
गजोऽयं सुविषाणाग्रो वर्तते सर्वतः पथि ॥
अश्वी सर्वत्रगः शूरो वेगवान्वातसंनिभः ।
शरान्शरैः समाहन्ति दण्डान्दण्डैर्जगत्पते ॥
कुन्तान्कुन्तैः समाजघ्नुर्गदाभिश्च गदास्तथा ।
परिघान्परिघैश्चैव शूलाञ्शूलैः समन्ततः ॥
एवं तेषां महाराज कुर्वतां रणमुत्तमम् ।
संग्रामः सुमहानासीच्छब्दः समभवन्महान् ॥
तूर्याणि सुबहून्याजौ शब्दवन्ति महान्ति च ।
प्रादुरासन्सहस्राणि शङ्खानां चैव निस्वनाः ॥
रात्रौ प्रादुरभूच्छब्दः संग्रामे लोमहर्षणः ।
वर्तमाने महायुद्धे वृष्णीनां चैव तैः सह ॥
केचिद्धताः समापेतुः पृथिव्यां पृथिवीक्षितः ।
केचिन्मथितमस्तिष्का विप्रकीर्णशिरोधराः ।
पेतुरुर्व्यां महावीर्या राजानः शस्त्रपाणयः ॥
केचित्तु भिन्नवर्माणः समापेतुस्ततस्ततः ।
परस्परं समाहत्य परस्परवधैषिणः ॥
न्यस्तशस्त्रा महात्मानः समासारक्तविग्रहाः ।
पेतुर्गतासवः केचिद्यमराष्ट्रविवर्धनाः ।
एवं ते निहता राजन्राजानः सर्व एव तु ॥
एतस्मिन्नन्तरे शूर एकलव्यो निषादपः ।
धनुर्गृह्य महाघोरं कालान्तकयमोपमम् ॥
शरैरनेकसाहस्रैरर्दयामास यादवान् ।

1515) Dn Ds_2 D_6 $G_{3.4}$ $M_{2.4}$ सादिभि सादिनस्तथा (for ^{b}) — (L 1516) Dn Ds_2 T_2 $G_{1.3}$ खड्गिन· खड्गिभि सार्धं (for ^{a}) — T_1 om line 1517 — (L 1517) Dn Ds_2 T_4 -व्यतीकारो (for °करो) — (L 1518) G_4 -सघोष (for -संक्षोभ) — (L 1519) Dn Ds_2 धावन्तः प्रहरन्त्येतान् (for ^{a}) — (L 1520) Dn Ds_2 हन्तैतान् (for वृष्णय) — (L 1521) T_1 चरति (for पतति) — (L 1522) D_6 T_1 शरो ; G_3 महा- (for शरी) Dn Ds_2 ऽत्ति-, D_6 च, G_3 M_4 य. (for न.) T_2 $G_{3.4}$ सदा रणे, $G_{1.5}$ M_4 सुदारुणे (for °रुण.) T_1 वर्तते सर्वदा रणे (for ^{b}) — (L 1523) D_6 T_4 M बाधति नो (for नो बाधते). — (L 1524) T_4 $G_{1.3.5}$ transp रथी and शरी Dn Ds_2 तनुत्रवान्, M तलत्र° (for तूणीर°) — (L 1525) Bom Poona eds G(ed) यादश. (for पट्टसी). — (L 1526) Dn Ds_2 T_1 संश्रित· (for संस्थित) — (L 1527) Dn Ds_2 D_6 T_4 G_2 M_4 स- (for सु-) Dn Ds_2 T_4 M प्रति (for पथि) — (L 1529) D_6 G_2 M_{1-3} शरा (for शरान्) T_1 शरे (for शरै) G_2 M समाघ्नाता ; $T_{1.2}$ °जघ्नु (for °हन्ति) D_6 $T_{2.4}$ G_2 M_{1-3} दण्डं (for दण्डान्) — (L 1530) D_6 T_2 G_3 कुन्ता. कुन्तै — (L 1531) D_6 $T_{1.2.4}$ G_3 M_{1-3} परिघा (for °घान्) Dn Ds_2 सार्धं (for चैव) $T_{1.2}$ M_{1-3} शूलाः, G_2 शिलाः (for शूलान्).

— (L 1533) Dn Ds_2 G_4 $M_{1.3}$ शब्दश्चापि महानभूत् (for ^{b}) — (L 1534) Dn Ds_2 G_4 M_1 भूतानि, $T_{1.2}$ $G_{1.3.5}$ तूर्याणा (for तूर्याणि) — (L 1535) Dn सशस्त्राणि (for सहस्राणि) Dn Ds_2 D_6 T_4 M_{1-3} निस्वन G_2 शङ्खाना भीमनिस्वन (for ^{b}) — (L 1536) D_6 $T_{1.2.4}$ G_3 M घोर (for शब्द) Dn D_6 G_3 M संग्रामो (for °मे) — (L. 1537) $T_{1.2}$ $G_{1.3}$ -घोरे (for -युद्धे) Cal ed प्रावर्तत महायुद्धं (for ^{a}) — (L 1538) G_4 M_1 ग्रस्ताः (for हता) T_2 समाजघ्नु (for °पेतु.) — (L 1539) M_4 पतित- (for मथित-) G_3 -मूर्धानो (for -मस्तिष्का) Dn Ds_2 केचित्पतितमाश्लिष्टा (for ^{a}) $T_{1.2}$ $G_{1.3}$ M -शिरोरुहा (for °धरा) — (L 1541) Dn Ds_2 सहस्रशः (for ततस्तत) — (L 1542) Dn Ds_2 समाश्रित्य, G_2 °पत्य ; G_3 सत्यपराः (for समाहत्य) — (L 1543) Dn Ds_2 समन्तात्क्षतविग्रहा ; G_2 समरेष्वाततायिन· (for ^{b}) — (L 1544) G_5 गतासव पेतुरुर्व्यां (for ^{a}) — (L 1545) Dn Ds_2 योजिताः, T_1 योधिता· (for राजान) T_2 G_1 ते (for तु) — (L 1546) D_6 $T_{1.2.4}$ $G_{1.2.4.5}$ M महाबलः (for निषादपः) — (L 1547) Dn Ds_2 G_1 -यमोपम· (for °पमम्) — (L 1548) $M_{1.3}$ दारयामास (for अर्द°) D_6 वीर्यवान् (for याद°) — (L. 1549) Dn Ds_2 M_2 परं शतै., D_6 पृथक्शतै., T_1 परःशतं ;

परःशतैः शराणां तु निशितैर्मर्मभेदिभिः ॥
वृष्णिवीरबलं सर्वं पोथयामास सर्वतः ।
युध्यतः शस्त्रपाणींश्च क्षत्रियान्वीर्यवत्तमान् ॥
निशठं पञ्चविंशत्या शराणां नतपर्वणाम् ।
सारणं दशभिर्विध्वा हार्दिक्यं पञ्चभिः शरैः ॥
उग्रसेनं नवाशीत्या वसुदेवं च सप्तभिः ।
उद्धवं दशभिश्चैव अक्रूरं पञ्चभिः शरैः ॥
एवमेकैकशः सर्वान्निहत्य निशितैः शरैः ।
विद्राव्य यादवीं सेनां नाम विश्राव्य वीर्यवान् ॥
एकलव्यो यदूनाह वीर्यवान्बलवानहम् ।
इदानीं सात्यकिर्वीरः क्व यास्यति महाबलः ॥
मदमत्तो हली साक्षात्क यातीह गदाधरः ।
इत्याह सिंहनादेन सर्वान्विस्मापयन्निव ॥

Colophon

वैशंपायन उवाच ।

विद्रुतेषु च सैन्येषु वृष्णिवीरेषु चैव हि ।
भीतेष्वथ महाराज हतेषु युधि सर्वतः ॥
दीपिकासु प्रशान्तासु निःशब्दे सति सर्वतः ।
जितमित्येव तन्मत्वा वृष्णीनां बलमुत्तमम् ॥
ततः पौण्ड्रो महावीर्यो बभाषे सैनिकान्स्वकान् ।
शीघ्रं गच्छत राजेन्द्राष्टङ्कैः कुन्तैः पुरीमिमाम् ॥
कुठारैः कुन्तलैश्चैव पाषाणैः सर्वतोदिशम् ।
कर्पणस्थैश्च पाषाणैः सर्वतो यात भूमिपाः ॥
भिद्यन्तां प्राकारचयाः प्रासादाश्च समन्ततः ।
गृह्यन्तामश्वमुख्याश्च धनानि सुबहूनि च ॥
गृह्यन्तां कन्यकाः सर्वा दास्यश्चैव समन्ततः ।
गृह्यन्तामश्वमुख्याश्च धनानि सुबहून्यथ ॥
तथेति ते महात्मानो राजानः सर्व एव तु ।
कुठारैः सर्वतश्चैव चिच्छिदुः पौण्ड्रकाज्ञया ।
प्राकारांश्चैव सर्वत्र प्रासादान्रत्नसंचयान् ॥
अथ तत्र महाशब्दः प्रादुरासीत्समन्ततः ।
टङ्केषु पात्यमानेषु प्राकारेषु महाबलैः ।
पूर्वद्वारे महाराज भिन्नाः प्राकारसंचयाः ॥
श्रुत्वा शब्दं महाघोरं सात्यकिः क्रोधमूर्छितः ।

T_4 पर. शरै (for पर शतैः) — (L 1550) Dn Ds_2 G_2 वृष्णीनां च (for वृष्णिवीर-) — (L 1551) Dn Ds_2 वीर्यवत्तरान्, $T_{1\,2}$ $G_{1\,4\,5}$ °सत्तमान् (for °वत्तमान्). — G_3 om (hapl) lines 1552–1557 — (L 1552) T_2 निशितं, G_2 निस्त्रिंशं (for निशठ). G_2 -पर्वभि. (for °णाम्). — (L. 1553) D_6 T_4 पञ्चभिर् (for दश°) — (L 1554) Dn Ds_2 M_3 नवत्याशु, G_2 नवत्या च (for नवाशीत्या). — $T_{1\,2}$ $G_{1\,2\,4\,5}$ om line 1555 — (L 1556) Dn Ds_2 $T_{1\,4}$ सर्वे (for सर्वान्) Dn Ds_2 G_2 निहत्ता (for °त्य) — (L 1558) Dn Ds_2 D_6 T_4 M यदुवृषान्, G_2 यदून्वृष्णीन् (for °नाह). T_1 तदा, G_2 द्विष. (for अहम्) G_4 बलवान्वीर्यवानहम् (for ^{b}) — (L 1559) D_6 $T_{2\,4}$ G_1 M_{1-3} याति स्म (for यास्यति) — (L 1560) $T_{1\,2}$ G_1 हरि ; T_4 M बली (for हली). T_4 याति स्म; $G_{4\,5}$ यास्यति (for यातीह) — (L 1561) Dn Ds_2 T_1 G_2 सिंहान् (for सर्वान्)

Colophon — *Mention of the Epic* Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1\,2\,4}$ $G_{1,3-5}$ M — *Adhy name* Dn Ds_2 M पौण्ड्रकवध — — *Adhy no* Dn Ds_2 278 T_1 G_3 275, T_2 G_1 277; T_4 174; G_4 204; G_4 206, M 170.

T_2 om the ref — — (L 1562) D_6 तदा तेषु; $T_{1\,2}$ $G_{1\,3}$ च मुख्येषु (for च सैन्येषु) Dn Ds_2 निवृत्तेष्वथ सैन्येषु (for ^{a}) — (L 1564) G_4 नि शब्देषु समन्तत (for ^{b}) — (L 1566) D_6 प्रति (for स्वकान्) — (L 1568) G_2 कुठारैश्चैव कुन्तैश्च (for ^{a}) — (L 1569) Cal ed सुघोरैस्तान् (for च पाषाणै·) G_4 यान्तु (for यात) — (L 1570) $T_{1\,2}$ प्रासाद- (for प्राकार-) Ds_2 T_2 $G_{1\,3-5}$ प्राकाराश् (for प्रासादाश्) $G_{2\,3}$ M_4 ins after line 1570, $T_{2\,4}$ $T_{1.4}$ after 1572

16** योषितो वारमुख्याश्च नागाश्चैव समन्तत· ।

— T_4 G_4 om line 1572 — (L 1574) Dn Ds_2 ते तथेति (by transp) — (L 1576) D_6 प्राकार सर्वतश्चैव, G_2 °रान्सर्वतश्चैव (for ^{a}) Dn वरसंचयान्, Ds_2 नर°, D_6 नृपसत्तम, $T_{1\,2}$ $G_{1\,3}$ वित्तसंचयान्, G_2 नृप°; $G_{4\,5}$ गृह°, M_4 रुक्म° (for रत्न°) — T_1 om (hapl) lines 1577–1579. — (L 1578) D_6 M_3 प्रासादेषु (for प्राकारेषु). — (L. 1579) K_6 M_{1-3} पूर्वद्वारि (for °रे) D_6 T_2 $G_{1\,3\,5}$ $M_{2.4}$ छिन्ना (for भिन्ना.) T_2 $G_{1\,3}$ प्रासाद- (for प्राकार-). — (L 1580) T_4 G_4 -मूर्छितम् — (L 1582) Dn Ds_2 T_4 M_4 शंकरम्, $M_{1\,3\,4}$ ईशानम् (for ईश्वरम्) — G_2 om. line 1583 — (L 1583) Dn Ds_2 हि मर्यां (for सर्वथा).

मयि सर्वं समारोप्य केशवो यादवेश्वरः ।
गतः कैलासशिखरं द्रष्टुमीश्वरमव्ययम् ॥
अवश्यं सर्वथा रक्ष्या पुरी द्वारवती मया ।
इति संचिन्त्य मनसा धनुरादाय सत्वरम् ॥
रथं महान्तमारुह्य दारुकस्य महात्मनः ।
पुत्रेण संस्कृत घोरं यन्ता च स्वयमेव ह ॥
धनुर्महत्तमादाय शरांश्चाशीविषोपमान् ।
आमुच्य कवचं घोरं शस्त्रसंपातदुःसहम् ॥
अङ्गदी कुण्डली तूणी शरी चापी गदासिमान् ।
ययौ युद्धाय वेगेन संस्मरन्केशवं वच. ॥
दीपिकादीपिते देशे ययौ सात्यकिरुत्तम. ॥
तथा च बलदेवोऽपि रथमारुह्य भास्वरम् ।
गदी शरासिमान्वीरः प्रायाद्रणचिकीर्षया ॥
सिहनादं प्रकुर्वंस्तु विमुञ्चन्भैरवं रवम् ।
उद्धवोऽपि बली साक्षाद्गजमारुह्य सत्वरम् ॥
मत्तं महारवं घोरं संग्रामं नीतिमत्तरः ।
ययौ नीतिं विचिन्वानः परां प्रीतिं महाबलः ॥
अन्येऽपि वृष्णयः सर्वे ययुः संग्रामलालसाः ।
रथान्गजान्समारुह्य हार्दिक्यप्रमुखास्तदा ॥
दीपिकाभिश्च सर्वत्र पुरोवृत्ताभिरीश्वराः ।
सिहनादं प्रकुर्वन्तः स्मरन्तः केशवं वचः ॥
पूर्वद्वारि समागम्य वृष्णयो युद्धलालसाः ।
ते समेत्य यथायोगं स्थितास्तत्र महाबलाः ॥
स्थिते सैन्ये महाघोरे दीपिकादीपिते पथि ।
शिनिर्वीरः शरी चापी गदी तूणीरपाणिमान् ॥
वायव्यास्त्रं समादाय योजयित्वा महाशरम् ।
आकर्णपूर्णमाकृष्य धनुः प्रवरमुत्तमम ॥
मुमोच परसैन्येषु शिनिवीरः प्रतापवान ॥
वायव्यास्त्रेण ते सर्वे तत्रस्था नृपसत्तमाः ।
विद्रुता ह्यस्त्रवीर्येण यत्र तिष्ठति पौण्ड्रकः ॥
तत्र गत्वा स्थिताः सर्वे निर्धूता वातरंहसा ।
यत्र पूर्वं स्थिताः सर्वे विद्रुता राजसत्तमाः ॥
तत्र स्थित्वा स शैनेयः शरमादाय सत्वरम् ।
निशितं सर्पभोगाभं बभाषे सात्यकिस्तदा ॥
केदानीं स महाबाहुः पौण्ड्रको राजसंज्ञकः ।
स्थितोऽस्मि व्यवसायेन शरी चापी महाबलः ॥
यदि द्रष्टा दुरात्मानं ततो हन्ता नृपाधमम् ।
भृत्योऽस्मि केशवस्याहं जिघांसुः पौण्ड्रकं स्थितः ॥
छित्त्वा शिरस्तु तस्याहं सर्वक्षत्रस्य पश्यतः ।
दास्यामि वल्गृध्रेभ्यः श्वभ्यश्चैव दुरात्मनः ॥

Dn Ds2 त्वियम् (for मया) —(L 1584) D6 G1 3 सत्वर (for °रम्) —(L 1585) T1 2 G1 3 आदाय (for आरुह्य) —(L 1587) G5 आरुह्य (for आदाय) —(L 1588) Cal ed दृढं (for शस्त्र-) D6 -संघात- (for -संपात-) —(L 1590) Dn Ds2 शैनेय (for वेगेन) —(L 1592) G4 सत्वरम् (for भास्वरम्) —(L 1593) Dn Ds2 गदी शरी महावीर्यं ; G5 शरी गदासिमान्वीर· (for ^{a}) —(L 1594) Dn Ds2 T4 G2 प्रकुर्वन्तो , T2 G1 विसुञ्चंस्तु (for प्रकुर्वंस्तु) Dn Ds2 T4 मुञ्चन्वै ; T2 G1 प्रकुर्वन् , G2 सुञ्चन्तो (for विमुञ्चन्) G4 स्वरम् (for रवम्) —(L 1595) G4 5 गदी (for बली) D6 रथम् (for गजम्) Dn2 भास्वरम् , Cal ed समतम् (for सत्वरम्). —(L 1596) Cal ed कृत्वा (for मत्त) Ds2 G1 नीतिमत्तरम् , T1 G2, 3 °मत्तमः (for °मत्तरः) Dn T4 M4 संग्रामे नीतिमत्तरम् ; Cal. ed सर्वयादवसत्तम. (for ^{b}) —(L 1597) D6 T4 M1 3 परान्प्रति (for परां प्रीतिं) —(L. 1599) D6 T1, 2 4 G1–3 हयान् (for गजान्) —(L 1602) Dn Ds2 T1 पूर्वद्वारं (for °द्वारि). T1 4 G1–3 समावृत्य , T3 °श्रित्य , M °गत्य (for °गम्य) —(L 1603) G5 तै (for ते) —(L 1604) M1 3 महारौद्रे (for °घोरे) Cal ed तथा (for पथि) —(L 1605) Dn Ds2 M1 3 गदी तूणीरवान्विभो (for ^{b}) —(L 1607) T1 G3 M1 आकर्णं (for आकर्ण-). —(L 1609) Dn Ds2 नर- (for नृप-) Dn Ds2 T4 विजिता (for विद्रुता) —(L 1611) D6 T1, 2 4 G1, 3, 4 5 याता (for गत्वा) T2 G1 om (hapl) lines 1611^b–1612^a D6 M3 -रंहस (for °सा) —(L. 1615) Dn Ds2 T4 महाबुद्धि (for °बाहुः) Dn Ds2 D6 T4 G2 -सत्तमः ; T4 -संज्ञित· (for -संज्ञक) —(L 1616) G3 M4 ऽस्मि (for ऽस्मि) —(L 1617) T1, 2 G1 3–5 नराधमम् ; M3 नृपोत्तमम् (for नृपाधमम्) —(L. 1618) G4 जिघांसुः पौण्ड्रकस्य च (for ^{b}) — T4 om line 1619 —(L. 1619) D6 भित्त्वा (for छित्त्वा) Dn Ds2 [अ]थ , M1 3

को नु नामेदृशं कर्म चोरवच्च समाचरेत् ।
सुप्तेषु निशि सर्वत्र यादवेषु महात्मसु ॥
चोरोऽयं सर्वथा राजा न हि राजा बलान्वितः ।
यदि शक्तो न कुर्याच्च चौर्यमेतन्नृपाधमः ॥
अहोऽस्य बालता राज्ञश्चोरकार्यं प्रकुर्वतः ।
सर्वथा गमनं तस्य न हि पश्यामि सांप्रतम् ॥
इत्युच्चैः सात्यकिर्वीरः प्रजहास महास्वनम् ।
विस्फार्य सुदृढं चापं संदधे कार्मुके शरम् ॥
आकर्ण्य वचनं वीरः सात्यकेस्तस्य धीमतः ।
वासुदेवो महावीर्यः पौण्ड्रको नृपसत्तमः ॥
आदाय निशितं बाणमागत्य पुरतो यदोः ।
बभाषे वासुदेवस्तु हसन्बहुविधं नृपः ॥
सात्यके शृणु मे वाक्यं यदि योद्धुं व्यवस्थितः ।
क नु कृष्णः क गोपालः कुतः स इह वर्तते ॥
स्त्रीहन्ता पशुहन्ता च क च स्वामीति शब्द्यते ।
स इदानीं क वर्तेत गृहीत्वा मम नाम तत् ।
हन्ता सख्युर्महावीर्यो नरकस्य महात्मनः ॥
ममैव नाम तद्ब्रूयाद्धते तस्मिन्दुरात्मनि ।
गच्छ त्वं कामतो वीर योद्धुं न क्षमते भवान् ॥
अथ वा तिष्ठ किंचित्तु ततो द्रष्टासि मे बलम् ।
शिरस्ते पातयिष्यामि शरैर्घोरैर्दुरासदैः ॥
हतस्य तव वीरस्य भूमिः पास्यति शोणितम् ।
शोष्यते स तथा गोपो हतः सात्यकिरित्यपि ॥
यो गर्वस्तस्य गोपस्य सर्वदा वर्तते महान् ।
विनङ्क्ष्यति स तु क्षिप्रं हते त्वयि यदूत्तम ॥
त्वयि रक्षां समादिश्य गोपः कैलासपर्वतम् ।
गत इत्येवमस्माभिः श्रुतं पूर्वं महामते ॥
शरं गृहाण निशितं यदि शक्नोषि मत्पुरः ।
इत्युक्त्वा बाणमादाय योद्धुं व्यवसितः किल ॥

Colophon

वैशंपायन उवाच ।

ततः क्रुद्धो महाराज सात्यकिर्वृष्णिपुंगवः ।
उवाच वचनं राजन्वासुदेवं स्मयन्निव ॥
मा वोच ईदृशं वाक्यं वासुदेवं नृपाधम ।
को नाम जगतां नाथमित्थं ब्रूयाज्जिजीविषुः ॥
मृत्युस्त्वां सर्वथा याति वदन्तं तादृशं वचः ।

[अ]स्य, M$_{3\ 4}$ [अ]द्य (for [अ]हं). —(L 1620) Dn Ds$_2$ बलिं, T$_3$ G$_1$ तव, G$_2$ बहु- (for बळ-) —(L 1621) D$_6$ समारभेत् (for °चरेत्) —(L 1624) Dn Ds$_2$ T$_4$ G$_3$ M$_{1-4}$ एवं (for एतत्) M$_1$ नृपोत्तम (for नृपाधमः). —(L 1625) G$_3$ बलिनो (for बालता) —(L 1627) Dn Ds$_2$ T$_4$ M$_4$ [उ]क्त्वा (for [उ]च्चै) D$_6$ वीरै, T$_4$ वीरं (for वीर) Dn Ds$_2$ G$_{2\ 3}$ M$_2$ महाबल (for °स्वनम्) —(L 1628) T$_1$ कार्मुकी; T$_3$ G$_3$ °कं (for °के) —(L 1629) D$_6$ T$_1$ G$_2$ M$_{3\ 2}$ धीर (for वीर.) — Dn Ds$_2$ G$_2$ om. lines 1630–1633 —(L 1630) M$_4$ राजसत्तम (for नृप°) —(L 1631) D$_6$ आरुह्य (for आदाय). T$_2$ आगत· (for °त्य) —(L 1634) M$_{2\ 3}$ ऽद्येह (for इह) Dn Ds$_2$ G$_{2\ 4}$ M$_1$ कुत सोऽथ प्रवर्तते (for ^{b}) —(L 1635) D$_6$ M$_{1-3}$ सर्वं, T$_2$ G$_2$ स्वयं (for क च) Dn Ds$_2$ सेवित (for शब्द्यते) —(L 1636) T$_2$ नामकृत् (for नाम तत्) —(L 1648) Dn Ds$_2$ ममैव तात युद्धेऽस्मिन् (for ^{a}). —(L 1639) G$_3$ क्षमसे (for क्षमते) —(L 1641) G$_5$ शिरश्चोत्पातयिष्यामि (for ^{a}) T$_{1\ 2}$ G$_{1\ 2}$ महाबलै (for दुरासदैः) —(L 1642) Dn Ds$_2$ वीरेह (for वीरस्य). —(L 1643) D$_6$ ऽस्मात् (for स) —(L. 1644) T$_{1,2}$ G$_3$ सर्वदा श्लाघते भवान् (for ^{b}) —(L 1645) Dn$_1$ G$_{1\ 5}$ विनश्यति, Dn$_2$ Ds$_2$ °श्यतु (for °ङ्क्ष्यति) M$_{1\ 2\ 4}$ दुरात्मनि (for यदूत्तम) —(L 1646) G$_1$ समावेश्य (for °दिश्य) D$_6$ T$_4$ G$_{2\ 4}$ गत, M$_{1-3}$ पुर्याः (for गोप°) —(L 1648) D$_6$ शक्तोऽसि (for शक्नोषि) Dn Ds$_2$ यदि शक्तोऽसि सात्यके (for ^{b}) —(L 1649) Dn Ds$_2$ D$_6$ ययौ (D$_6$ पौण्ड्रो) योद्धुं व्यवस्थित (for ^{b})

Colophon — *Mention of the Epic* Ds$_2$ — *Mention of Khila* Dn Ds$_2$ D$_6$ T$_{1\ 2\ 4}$ G M — *Adhy name* Ds$_2$ M पौण्ड्रकवध — *Adhy no* Dn 279, T$_1$ G$_3$ 206, T$_2$ G$_1$ 208, T$_4$ 175, G$_2$ 201, G$_4$ 205, G$_5$ 207, M$_{1\ 3}$ 171

G$_4$ om the ref —(L 1650) G$_2$ -नन्दन (for -पुंगव) —(L 1651) Dn Ds$_2$ T$_1$ G$_3$ M$_4$ स्मरन् (for स्मयन्) —(L. 1652) Dn Ds$_2$ अवोचद् G$_2$ M$_{1\ 3\ 4}$ मा वोचं (for मा वोच) M$_4$ यादृशं (for ईदृश) D$_6$ T$_{1\ 4}$ G$_{3\ 4}$ M$_{1\ 2}$ वासुदेव (for °देवं) Dn Ds$_2$ नृपाधमम्, (for °धम) T$_1$ G$_1$ वासुदेवस्य माधव (for ^{b}) —(L 1653) D$_6$ जगतो (for जगतां) —(L 1154) G$_4$ M$_3$ मृत्युस्थं (for °स्त्वां)

जिह्वा ते शतधा दीर्याद्वदनस्तादृशं वचः ॥
एष ते पातयिष्यामि शिरः कायाच्च पौण्ड्रक ।
यन्नाम वासुदेवेति तव संप्रति वर्तते ॥
यावत्पतति कायात्तु शिरस्तावत्तु वर्तताम् ।
स एव श्वो हि भगवान्वासुदेवो भविष्यति ॥
एक एव जगन्नाथः कर्ता सर्वस्य सर्वगः ।
दुरात्मन्सर्वथा देवो भविष्यति न संशयः ॥
एष ते स्वशिरः कायात्पातयिष्यामि राजक ।
यद्यसौ भगवान्विष्णुर्नागमिष्यति सांप्रतम् ॥
अस्त्रं वीर्यं बलं चैव सर्वं दर्शय सांप्रतम् ।
नातः परं बलं राजन्वीर्यं तव च वर्तते ॥
सर्वं दर्शय यत्नेन स्थितोऽस्मि व्यवसायवान ।
शरी चापी गदी खड्गी सर्वथाहमुपस्थितः ॥
नेतो नगरमायासि सत्येनैतद्ब्रवीम्यहम् ।
सर्वथा कृतकृत्योऽस्मि दृष्ट्वा त्वां वासुदेवक ।
तवाङ्गं तिलशः कृत्वा श्वभ्यो दास्यामि राजक ॥
इत्युक्त्वा बाणमादाय वासुदेवं महाबलम् ।
आकर्णपूर्णमाकृष्य विव्याध निशितं शरम् ॥
स तेन विद्धो यदुना वासुदेवः प्रतापवान् ।
वमञ्शोणितमत्युष्णमङ्गान्नेत्रान्नृपोत्तम ॥
ततश्चुक्रोध स नृपो वासुदेवः प्रतापवान् ।
नवभिर्दशभिश्चैव शरैः संनतपर्वभिः ।
विव्याध सात्यकिं राजा नदंश्च बहुधा किल ॥
ततो नाराचमादाय निशितं यमसंनिभम् ।
धनुराकृष्य बलवान्वासुदेवो नृपोत्तमः ।
विव्याध सात्यकिं भूयो निशि प्रह्लादयन्स्वकान् ॥
नाराचेन समाविद्धः सात्यकिः सत्यसंगरः ।
ललाटे सुदृढं वीरो वृष्णीनामग्रणीस्तदा ।
निषसाद रथोपस्थे निश्चेष्ट इव सत्तम ॥
ततः स पौण्ड्रको राजा विध्वा दशभिराशुगैः ।
सारथिं पञ्चविंशत्या हयांश्च चतुरो दृढम् ॥
ते हया रुधिराक्ताङ्गाः सारथिश्च समन्ततः ।
विह्वलाः समपद्यन्त वासुदेवस्य पश्यतः ।
वासुदेवो रथी चापी सिंहनादं समाददे ॥
तेन नादेन तत्राभूद्विबुद्धः सात्यकिस्तदा ।
विद्धान्हयांस्तथा दृष्ट्वा सारथिं च तथागतम् ॥
शैनेयोऽथ महावीर्यो रुषितो नृपसत्तम ।
अरे द्रक्ष्यामि ते वीर्यमित्युक्त्वा बाणमाददे ।

—T_1 $G_{1, 2, 4}$ $M_{1, 3}$ om (hapl) line 1655 —(L 1655) D_6 $G_{3, 5}$ $M_{2, 4}$ दीर्यें (for दीर्याद्) —(L 1657) G_2 तव संपरिवर्तते (for ^{b}) —(L 1658) T_2 कायं (for कायात्) Dn Ds_2 T_3 $G_{1, 2}$ ते (for तु) Dn Ds_2 G_2 प्रवर्तते, G_4 प्रवर्तताम् M_4 तु वर्तते (for तु वर्तताम्) —(L 1659) Dn Ds_2 न; D_6 $G_{2, 3}$ ऽपि (for हि) Dn_1 T_4 $G_{1, 4, 5}$ M_4 भविष्यसि (for °ति) —(L 1662) Dn Ds_2 T_4 ऽहं (for स्व-) —(L 1663) Dn_1 Ds_2 $T_{2, 4}$ M_2 यद् (for यदि) — D_6 om line 1664 —(L 1664) Dn_1 Ds_2 $G_{1, 3}$ M_4 अस्त्र-, Dn_2 अत्र, T_1 अस्य (for अस्त्रं) G_2 मम द्रक्ष्यति सांप्रतम् (for ^{b}) —(L 1665) Dn Ds_2 G_1 परतरं (परं बलं) —(L 1667) D_6 खड्गी (for शरी) G_3 रथी (for गदी) D_6 T_4 तूणी, G_2 M बाणी (for खड्गी) —(L 1668) Dn Ds_2 नैतन् (for नेतो) Dn Ds_2 $T_{1, 2}$ $G_{1, 3}$ M_4 आयासीः (for °सि) M_3 न हि ते नगरं यासि (for ^{a}) Ds_2 T_1 $G_{2, 3}$ सत्यम् (for सत्येन) D_6 $T_{1, 2, 4}$ G_4 M शपामि (for ब्रवीमि) G_1 तेनैव तच्छपाम्यहम् (for ^{b}) —(L. 1671) Dn Ds_2 G_{3-5} M_4 महाबल —(L. 1672) D_6 G_2 विव्याध निशितैः शरैः (for ^{b}) — T_4 $G_{4, 5}$ om (hapl) lines 1674–1675 —(L. 1674) D_6 $T_{1, 2}$ G_2 अत्युग्रम् (for °ष्णम्) D_6 $T_{1, 2}$ G_1 M_{1-2} सुखान् (for अङ्गान्) —(L 1675) Dn Ds_2 G_1 नृपतिर्, T_2 च नृपो (for स नृपो) —(L 1677) $T_{1, 2, 4}$ G M_{1-3} बहुश· (for °धा) —(L 1679) Dn Ds_2 D_6 $G_{1, 2}$ भगवान् (for बलवान्) Dn $T_{1, 4}$ नृपोत्तम, Ds_2 °त्तमम् (for °त्तम·) —(L 1680) M_4 वीरो (for भूयो). —(L 1683) Ds_2 $T_{1, 4}$ $G_{1, 4, 5}$ $M_{1, 4}$ सत्तम — After line 1683, G_2 ins

17** ततस्तत्क्षणेनैव गतमोहः प्रतापवान् ।
सक्रुद्धः शिनिवीरोऽसौ प्रहसन्निदमब्रवीत् ।
पातयिष्यामि ते वीर्यमित्युक्त्वा बाणमाददे ॥

— G_2 om lines 1684–1692. —(L. 1685) Dn_1 नृपः; Dn_2 Ds_2 नृप (for दृढम्) —(L 1686) D_6 तदा (for हया) D_6 $T_{1, 2}$ M समं तदा (for समन्ततः). —(L. 1688) Dn Ds_2 $G_{1, 4}$ रथे (for रथी). T_1 $G_{1, 3, 5}$ समादधे; T_2 °दधन् (for °ददे) —(L 1689) D_6 प्रबुद्ध·, T_2 G_3 विवृद्धः (for विबुद्धः). Dn Ds_2 नृप; D_6 किल (for तदा)

विव्याध तेन बाणेन वक्षस्येनं महाबलम् ॥
ततश्चचाल तेनाजौ वासुदेवः शरेण ह ।
सुस्रुवे रुधिरं घोरमत्युष्णं वक्षसो नृप ॥
रथोपस्थे पपाताशु निःश्वसन्वहुशो नृप ।
कृत्यं चापि न जानाति केवलं निषसाद ह ॥
सात्यकिस्तु रथं विध्वा दशभिः सायकैस्तदा ।
ध्वजं चिच्छेद भल्लेन वासुदेवस्य वृष्णिपः ।
हयांश्च चतुरो हत्वा बाणैः सारथिमेव च ॥
युयुधानोऽथ राजेन्द्र भल्लेन निशितेन ह ।
सारथेश्च शिरः कायादहरत्सात्यकिस्तदा ।
रथग्रन्थिं च चिच्छेद हयाश्च व्यसवोऽभवन् ।
अश्वांश्च चतुरो हत्वा चतुर्भिः पत्रिभिस्तदा ।
चक्रं च तिलशः कृत्वा बाणैर्दशभिरञ्जसा ।
जहास विपुलं राजन्वासुदेवो महाबलः ॥
सात्यकिश्च तदा राजन्रथादाप्लुत्य सत्वरम् ।
धनुरादाय विपुलं तस्थौ भूमौ यदूत्तमः ॥
ततो भल्लेन तीक्ष्णेन ज्यां च चिच्छेद सत्वरम् ।
निमेषादिव वीरस्तु सात्यकिः सत्यविक्रमः ।
धनुश्चिच्छेद भल्लेन सर्वान्विस्मापयन्निव ॥
ततस्त्यक्त्वा महाचापमन्यद्घोरं महामृधे ।
अन्यत्कार्मुकमादाय विव्याध निशितैः शरैः ॥
वासुदेवोऽपि निःश्वस्य धनुरादाय सत्वरम् ।
शरांश्च कतिचिद्राजन्गदां खड्गं च यत्नतः ।
यावद्बलं समादाय ततो भूमौ व्यतिष्ठत ॥
भूमिष्ठो वासुदेवस्तु सात्यकिं सत्यविक्रमम् ।
शरैरनेकसाहस्रैरर्दयामास सत्वरम् ॥
सात्यकेर्ध्वजवंशं तु चिच्छेद रणमूर्धनि ।
रथं जघान निशितैः शरैर्दशभिराशुगैः ॥
सात्यकिः क्रूरकर्माणमिन्द्रो वृत्रवधे यथा ॥
ततश्च युयुधानस्तु वासुदेवं नृपोत्तम ।
दशभिर्दशभिश्चैव पञ्चभिः पञ्चभिस्तथा ॥
षड्भिः षड्भिस्तथाष्टाभिर्बिभेद रणमूर्धनि ।
यथा देवासुरे युद्धे बलिं बलिरिपुर्नृप ॥
स च चापं महाघोरं पौण्ड्रो यदुवृषस्य ह ।
मुष्टिदेशे द्विधा कृत्वा बाणैर्दशभिरञ्जसा ।
जहास विपुलं राजन्वासुदेवो महाबलः ॥
ततोऽपरं महच्चापं सात्यकिर्वृष्णिपुंगवः ।
सज्यं कृत्वा बली साक्षात्सर्वक्षत्रस्य पश्यतः ।
शरैः सप्ततिसाहस्रैरर्दयामास सत्वरम् ॥
ते शराः शलभाकारा निपेतुः सर्वतस्तदा ।

— (L 1691) T_2 महावीरो (for °र्यो). — (L 1692) Dn Ds_2 अलं (for अरे) — (L 1693) Dn_1 Ds_2 T_4 G_5 महाबलः (for °बलम्) — (L. 1695) $T_{1, 2}$ G M_4 सुस्राव (for सुस्रुवे). Dn Ds_2 T_2 $G_{1-3, 5}$ M वक्षसा (for °सो) M नृप· — (L 1696) Dn Ds_2 निःश्वसन्नुरगो यथा (for ^{b}). — (L 1701) Dn Ds_2 बाणैः सारथिमेव च, Bom Poona eds पौण्ड्रकस्य च पश्यत. (for ^{b}). — (L. 1702) T_1 स रथी; T_2 G_3 M_{1-3} सारथी (for सात्यकिस्) — (L 1703) D_6 $G_{2, 4, 5}$ M_{1-3} स, T_2 G_1 वि- (for च) G_2 हयांश्च विधमद्बली (for ^{b}) — Dn Ds_2 D_6 om. line 1704. — (L 1704) $G_{1, 4, 5}$ चतुर्भिश्चतुरस्तथा (for ^{b}) — (L 1705) M_3 चक्रे (for चक्रं) Dn Ds_2 om (hapl.) lines 1705^b–1727^a. — (L 1706) T_2 M_{1-3} राजा (for राजन्) $G_{2, 4}$ M_4 वासुदेवं (for °वो). — (L. 1707) D_6 $T_{2, 4}$ $G_{3, 5}$ M_1 सत्वर ; G_1 सर्वतः (for सत्वरम्). — (L. 1708) T_4 G_5 भुवि (for भूमौ) — (L 1709) $G_{4, 5}$ M_4 चिच्छेद स (for च चिच्छेद) — (L 1712) D_6 $T_{1, 2, 4}$ G महाघोरं (for °चापम्) D_6 $T_{1, 2, 4}$ $G_{1, 2, 4, 5}$ महाचाप (for अन्यद्घोरं) M_{1-3} महाहवे (for° मृधे) — (L 1713) D_6 T_4 M सज्यं (for अन्यत्) M_3 दशभि, (for निशितै) — G_4 om (hapl) lines 1715-1718. — (L 1715) G_2 सत्तम (for यत्नत) — (L 1719) D_6 M रथवशं, G_2 अग्निवर्ण (for ध्वजवंशं) — (L 1721) T_2 G_2 M_3 सात्यकिं (for °कि) D_6 D_2 $M_{2, 4}$ सत्य- (for क्रूर-)· — (L 1722) D_6 $T_{1, 4}$ $G_{1, 3-5}$ $M_{1, 2, 4}$ नृपोत्तमस् (for °त्तम) — (L 1723) M_3 om line 1723^a G_4 घोरै. (for चैव) T_2 दशभिश्चैव नाराचै (for ^{a}) — D_6 $T_{1, 2, 4}$ M om. lines 1725^b–1726^b — (L 1727) Dn Ds_2 अंहसा (for अञ्जसा) — (L 1728) Bom Poona eds G(ed) वासुदेवं (for °वो) — (L 1729) Dn Ds_2 परं (for ऽपरं). Dn Ds_2 महत्प्रायं, D_6 $T_{1, 2, 4}$ G_{2-4} M_{1-3} महाचापं (for महच्चापं). Dn Ds_2 D_6 T_4 $G_{2, 4}$ M -नन्दन (for -पुंगवः). — (L 1731) Dn Ds_2 $T_{2, 4}$ -संख्याकैर् (for -साहस्रैर्).

शिरस्तः पार्श्वतश्चैव पृष्ठतः पुरतस्तथा ॥
आस्ये चैव महाराज जङ्घयोर्जघने तथा ।
व्यथां च ददुरत्यन्तं वासुदेवस्य मर्मगाः ॥
संभ्रान्तः पर्वताकारो निश्चलः समपद्यत ।
केवलं धैर्यनिचयस्तृषार्तः शरवान्यथा ।
यथा मनस्वी रिक्तश्च तथा तिष्ठति पौण्ड्रकः ॥
ततश्चुक्रोध बलवान्वासुदेवः प्रतापवान् ।
अर्धचन्द्रं समादाय विव्याध युधि सात्यकिम् ।
विध्वा सप्तभिरायान्तं क्रोधेन प्रस्फुरन्निव ॥
विद्धोऽथ सात्यकिस्तेन शरैः पञ्चभिराशुगैः ।
चापं चिच्छेद पौण्ड्रस्य सिंहनादं व्यनीनदत् ॥
वासुदेवो गदां गृह्य भ्रामयित्वा पदात्पदम् ।
त्वरितं पातयामास सात्यकेर्वक्षसि प्रभो ॥
सव्येन तां समाकृष्य करेण यदुनन्दनः ।
शरं प्रगृह्य विव्याध सात्यकिर्युधि पौण्ड्रकम् ॥
तमन्तरे गृहीत्वाशु वासुदेवः प्रतापवान् ।
शक्तिभिर्दशभिश्चैव सात्यकिं निजघान ह ॥
ताभिर्विद्धो रणे वीरः सात्यकिः सत्यसंगरः ।
अपास्य धनुरत्नं तद्गदामादाय सत्वरम् ।
आजघान तदा वीरो वृष्णीनामग्रणीर्नृप ॥

Colophon.

वैशंपायन उवाच ।

ततः क्रुद्धो गदापाणिः सात्यकिर्वृष्णिनन्दनः ।
वासुदेवं जघानाशु गदया तीक्ष्णया नृप ।
सात्यकिं वासुदेवस्तु गदयाभ्यहनद्बली ॥
तावुद्यतगदौ वीरौ शुशुभाते तदा रणे ।
दृप्तौ यथा वने सिंहौ परस्परवधैषिणौ ॥
ततः स सात्यकिः क्रुद्धः सव्यं मण्डलमागमत् ।
जघ्नतुस्तौ तदा युद्धे गदाभ्यां गदिनौ नृप ॥
स्तनयोः पार्श्वयोः पृष्ठे ताडितौ गदधारिणौ ।
उभौ तौ रुधिराक्ताङ्गौ पुष्पिताविव किंशुकौ ॥
सिंहनादं प्रकुर्वन्तौ प्रावृषीव महाघनौ ।
तिष्ठ तिष्ठेति भाषन्तौ परस्परवधैषिणौ ॥
दक्षिणं वासुदेवस्तु तं जघान स्तनान्तरे ।
युयुधानोऽथ वीरस्तु बाह्वोर्मध्यमताडयत ॥
दृढं स ताडितो वीरो जानुभ्यामपतद्भुवि ।
तत उत्थाय भूयस्तु ललाटेऽभ्यहनद्यदुम् ॥
विषण्णः किंचिदायस्तस्तत उत्थाय सत्वरम् ।

— D_6 om lines 1732–1733 — (L 1733) Ds_2 T_4 M_3 शिरसः (for शिरस्त) $M_{1\,3}$ पार्श्वयोश् (for °तश्) $T_{1\,2}$ $G_{1\,3-5}$ M पृष्ठत स्तनमध्यत (for ^{b}) — Dn Ds_2 D_6 om lines 1734–1736 — (L 1737) G_5 तृणाक्त, M_4 तृष्णार्ता (for तृषार्त) D_6 T_2 $G_{1,4,5}$ सारवान् (for शर°) — (L 1738) T_2 $G_{1\,3\,4}$ मत्तश् (for रिक्तश्) — (L. 1741) $T_{1\,2}$ $G_{1,3-5}$ शरै. (for इव) — (L 1742) $G_{4\,5}$ आयसैः (for आशुगै.) — (L 1745) D_6 T_1 G_{3-5} प्रेषयामास (for पात°) — (L 1747) G_5 स तां (for शरं) — (L 1748) D_6 T_4 G_2 अन्तरेण (for तमन्तरे) — (L 1749) $T_{1\,2}$ $G_{1\,3}$ शरैश्च शक्तिभिश्चैव (for ^{a}) — (L. 1750) G_2 शूर (for वीर) G_2 सात्यकिर्वृष्णिनन्दन, G_5 °कि. सत्यविक्रम. (for ^{b}) — After line 1750, G_2 ins

18** वासुदेवं जगन्नाथं न्यहनत्सत्यसंगर· ।

— (L. 1751) Dn D_6 M_3 धनुरन्यत् (for °रत्नं). Dn Ds_2 T_4 $G_{1\,5}$ M_4 धनुर् (for गदाम्) — (L. 1752) G_4 ततो विद्धो (for तदा वीरो)

COLOPHON — *Mention of the Epic* Ds_2. — *Mention of Khila* Dn D_6 $T_{1\,2\,4}$ G M_{2-4} — *Adhy name* Dn G_4 M_{2-4} पौण्ड्रकवध, D_6 T_4 पौण्ड्रयुद्धम् — *Adhy no* · Dn 280, T_1 G_3 107, T_2 G_1 209, T_4 176; G_2 202; G_4 206, G_5 208, M_{2-4} 172

(L 1753) G_5 -पुंगव (for -नन्दनः) — (L 1755) T_2 ह्यहनद्, G_1 न्यह° (for [अ]भ्य°). — (L 1756) G_2 शूरौ (for वीरौ) Dn Ds_2 सुदारुणौ (for तदा रणे) — (L 1758) D_6 आगत ; T_4 आवहत् (for आगमत्) — (L 1759) M_2 महायुद्धे ; M_3 गदायुद्धे (for तदा युद्धे). D_6 तु तौ (for नृप) — D_6 om line 1760 — (L 1760) T_2 गदधारणे ; M_4 गदया रणे (for °धारिणौ) — (L. 1761) D_6 उभौ रुधिरसिक्ताङ्गौ (for ^{a}) — (L 1763) D_6 M_3 वाशन्तौ (for भाषन्तौ) — (L 1766) G_2 भृशं (for दृढं) — (L 1767) Dn Ds_2 वीरस् (for भूयस्). Dn Ds_2 गदाम्, T_1 दृढम् (for यदुम्) — (L. 1768) D_6 निर्विंग्न (for विषण्णः) D_6 आश्वस्य; G_2 आश्वस्तस् (for आयस्तस्) — (L 1769) T_2 G_3 -विक्रमम् (for -सत्तमम्) — (L 1770) $T_{1\,4}$ $G_{1,5}$ बलिर् (for बली). — (L 1772) $M_{1\,3}$ तत स (for स

गदयाभ्यहनद्वीरः सात्यकिः पौण्ड्रसत्तमम् ॥
वासुदेवो बली वीरः साक्षान्मृत्युरिवापरः ।
जघान गदया वृष्णिं निर्दहन्निव चक्षुषा ।
स तया ताडितो वृष्णिर्गदया बाहुमुक्तया ।
आलम्ब्य भूमिं सहसा मृत्योरङ्कगतो यथा ॥
संज्ञां पुनः समालम्ब्य पाणिभ्यां दृढमेव च ।
गदां तस्य महाराज गृहीत्वा प्रग्रहेण ह ॥
द्विधा कृत्वा महागुर्वीं गदां कालायसीं शुभाम् ।
उत्सृज्य सहसा वीरः सिंहनादं व्यनीनदत् ॥
तत उत्प्लुत्य राजा तु वासुदेवो महाबलः ।
सव्येन सात्यकिं गृह्य दक्षिणेन करेण ह ॥
मुष्टिं कृत्वा महाघोरां वासुदेवः प्रतापवान् ।
ताडयामास मध्ये तु स्तनयोः सात्यकिं नृप ॥
शैनेयो वृष्णिवीरस्तु गदामुत्सृज्य सत्वरम् ।
तलेनाभ्यहनद्वीरो वासुदेवं रणाजिरे ॥
तलेन वासुदेवोऽपि सात्यकिं सत्यसंगरम् ।
तयोरेवं महाघोरं तलयुद्धमवर्तत ॥
जानुभ्यां मुष्टिभिश्चैव बाहुभ्यां शिरसा तथा ।
उरसोरः समाहत्य जानुभ्यां शिरसा तथा ।
कराभ्यां करमाहत्य तौ युद्धं संप्रचक्रतुः ॥
तालयोस्तत्र राजेन्द्र वृक्षयोः संनिकृष्टयोः ।
वने यथाग्निरुत्पन्नस्तथैवासीत्सुदारुणः ॥
तावाजौ प्रथितौ वीरावुभौ पौण्ड्रकसात्यकी ।
निशि स्तिमितमूकायां शस्त्रं त्यक्त्वा महाबलौ ।
युयुधाते महारङ्गे मल्लौ द्वाविव विश्रुतौ ॥
उभे सेने महाराज संशयं जग्मतुस्तदा ।
किं नु स्यात्सात्यकिर्वीरो हतोऽनेन दुरात्मना ।
आहोस्विद्वासुदेवस्तु हतोऽनेन भविष्यति ॥
अथ चैतौ महावीरौ परस्परवधैषिणौ ।
हत्वा परस्परं वीरौ वीरस्वर्गं गमिष्यतः ।
अन्यथा नोपरम्येतां युद्धाद्वीरौ सुविश्रुतौ ॥
अहो वीर्यमहो धैर्यमेतयोर्बलशालिनोः ।
एतौ महाभटौ लोके नैतौ प्राकृतसंमतौ ॥
नैवं युद्धं महाघोरमासीद्देवासुरेष्वपि ।
न श्रुतो न च वा दृष्टः संग्रामोऽयं कदाचन ॥
एवं ते सैनिका ब्रूयुः सेनयोरुभयोरपि ।
रात्रौ निशातमे घोरे दृष्ट्वा युद्धं सुदारुणम् ॥
अथ तौ बाहुभिर्घोरैः संनिपेततुरोजसा ।
दशभिर्मुष्टिभिर्जघ्ने सात्यकिः पौण्ड्रनन्दनम् ।
पञ्चभिः सात्यकिं पौण्ड्रः समाजघ्ने महाबलः ॥

तया) — G_2 om lines 1774–1778 —(L 1774) D_6 T_4 $M_{2.3}$ समालभ्य (for °लम्ब्य) G_5 स संज्ञां पुनरालम्ब्य (for ^{a}). —(L 1776) D_6 कालमयीं (for कालायसीं) —(L 1777) D_6 T_4 उत्सृज्य तां गदा भग्ना (for ^{a}) D_5 व्यनादयत् (for व्यनीनदत्) —(L 1778) Dn Ds_2 $T_{1\ 2}$ $G_{1\ 3}$ $M_{1.\ 2\ 4}$ उत्सृज्य (for उत्प्लुत्य). —(L. 1782) T_1 नृप- (for वृष्णि-) G_3 सत्वरः. —(L 1785) Dn $T_{2\ 4}$ G_3 प्रवर्तत, Ds_2 G_1 °र्तते (for अवर्तत). —(L 1789) D_6 बद्धयोः (for वृक्षयो) Dn Ds_2 G_2 $M_{1.\ 3}$ संनिकर्षयोः (for °कृष्टयो.) —(L 1790) Dn_1 Ds_2 D_6 T_2 G_2 $M_{2.\ 5}$ निरुत्पन्नस् (for [अ]ग्निरु°) G_6 [अ]भूत् (for [आ]सीद्) D_6 G_2 सुदारुणम्, T_2 °रुणौ, M_3 महारणः (for सुदारुण) Dn Ds_2 $M_{1\ 2\ 4}$ तथैवाभून्महास्वन. ($M_{2\ 4}$ °रण.) (for ^{b}). —(L 1791) $M_{1.\ 4}$ उभौ तौ पौण्ड्रसात्यकी (for ^{b}) —(L 1772) G_5 महाबलम् (for °बलौ) —(1794) T_4 उत्सेधने (for उभे सेने) Dn Ds_2 G_4 महाराज्ञोः (for °राज). —(L 1795) Dn Ds_2 हतस्तेन भविष्यति (for ^{b}) —(L. 1796) $T_{1.\ 2}$ $M_{2\ 4}$ महात्मना, $G_{1\ 4}$ दृढात्मना, $G_{3\ 3}$ $M_{1\ 3}$ दुरात्मना (for भविष्यति) —(L 1797) Dn Ds_2 अद्य, D_6 तदा, T_4 G_2 हतौ (for अथ) T_2 नैतौ, $G_{1\ 4\ 5}$ द्वौ तौ (for चैतौ) D_6 $G_{2\ 4\ 5}$ M_3 महावीर्यौ (for °वीरौ) —(L 1798) $T_{1.\ 4}$ $G_{1-3\ 5}$ परस्परौ (for °स्परं) Dn Ds_2 नरौ (for वीर). —(L 1799) D_6 T_3 G_2 अथ वा (for अन्यथा) D_6 G_2 यथा (for युद्धाद्) Dn Ds_2 सुनिश्चितौ (for सुविश्रुतौ) —(L 1801) Dn Ds_2 $T_{1\ 2\ 4}$ $M_{1\ 3}$ महाबलौ (for °भटौ) T_3 तौ च (for नैतौ) Dn Ds_2 एतौ प्रकृतिसत्तमौ, $T_{1\ 2}$ G_1 M_1 नैतौ प्रकृतिसमतौ, T_4 एतौ प्रकृतसंमतौ; G_3 न तौ प्राकृतसंमितौ (for ^{b}) —(L 1804) T_4 एते वै (for एवं ते) $T_{1\ 2}$ $G_{1\ 3}$ उभयोः सेनयोरपि; $G_{4\ 5}$ उभयोरपि सेनयो (for ^{b}) —(L 1805) Dn Ds_2 रात्रौ निशीथे मेघौघे, T_2 $G_{1\ 2\ 5}$ रात्रौ तु तिमिरे घोरे (for ^{a}). —(L 1806) Dn Ds_2 वीरौ (for घोरैः) Dn Ds_2 T_4 G_3 अञ्जसा, G_2 आसने (for ओजसा) —(L 1807) Dn Ds_2 सात्यकिं पौण्ड्रकं तदा (for ^{b}). — (L.

तयोश्चटचटाशब्दो ब्रह्माण्डक्षोभणो महान् ।
प्रादुरासीत्तु सर्वत्र सर्वान्विस्मापयन्निव ॥

Colophon.

वैशंपायन उवाच ।

एतस्मिन्नन्तरे क्रुद्ध एकलव्यो निषादपः ।
बलभद्रमभिप्रेक्ष्य धनुरादाय सत्वरम् ।
आरुह्य स रथं वीरो ययौ यत्र हली स्थितः ॥
दृष्ट्वायान्तं निषादेशमेकलव्यं हली तदा ।
रथी गदी शरी भूत्वा तस्थौ तस्याग्रतो बली ॥
बलदेवं च विंशत्या जघान शरमालया ।
रथं दशभिराहत्य सूतं दशभिराशुगैः ॥
सिंहनादं प्रकुर्वाणो दशभिस्त्वथ सीरिणम् ।
धनुर्ज्यां दशभिश्छित्त्वा सिंहनादं व्यनीनदत् ॥
सज्यं च कार्मुकं कृत्वा बलदेवो निषादपम् ।
नाराचैर्दशभिर्विध्वा बाणैश्च दशभिः शितैः ।
चिच्छेद धनुरर्धं तत्सर्वक्षत्रस्य पश्यतः ॥
सूतं दशभिराहत्य रथं त्रिंशद्भिरेव च ।
ध्वजं चिच्छेद भल्लेन निषादस्य जगत्पते ॥
ततोऽपरं महच्चापं निषादो वीर्यवत्तमः ।
दृढमौर्वीसमायुक्तं दशतालप्रमाणतः ।
कामपालं शरेणाशु जघान स्तनदेशतः ॥
बलदेवो महावीर्यः शेषः सर्प इव श्वसन् ।
दशभिस्तद्धनुर्दिव्यं शरैः सर्वसहैर्बली ।
चिच्छेद मुष्टिदेशे तु माधवो माधवाग्रजः ॥
एकलव्यो निषादेशः खड्गमादाय सत्वरम् ।
प्राहिणोद्बलदेवाय निशितं घोरविग्रहम् ॥
तमन्तरे यदुवृषो वृष्णिवीरः प्रतापवान् ।
तिलशः पञ्चभिर्बाणैश्चकार यदुनन्दनः ॥
ततोऽपरं महाखड्गं सर्वकालायसं शुभम् ।
प्राहिणोत्सारथेः कायमालोक्याथ निषादपः ॥
तं चापि दशभिर्वीरो माधवो यदुपुंगवः ।
बाणैर्निमेषमात्रेण निर्बिभेद महारणे ॥
ततः शक्तिं समादाय घण्टामालाकुलां नृप ।
निषादो बलदेवाय प्रेषयित्वा महाबलः ।
सिंहनादं महाघोरमकरोत्स निषादराट् ॥
सा शक्तिः सर्वकल्याणी बलदेवमुपागमत् ॥

1810) D6 T4 G3 सर्वं (for सर्वान्).

Colophon — *Mention of the Epic* Ds2 — *Mention of Khila*. Dn Ds2 D6 T1 2 4 G M — *Adhy name* Dn Ds2 पौण्ड्रकसाल्वश्वियुद्धम्, G4 5 M पौण्ड्रयुद्धम् — *Adhy no* Dn Ds2 281; T1 G3, 208, T2 G1 210, T4 177, G2 202, G4 207, G5 209, M1 2, 4 209, M3 173

(L 1812) Dn1 अभिक्षिप्त (for °प्रेक्ष्य) — Dn om. (hapl) lines 1813–1820 — (L 1814) D6 T1 2 G M4 स्व- (for स) T1 G1 4 5 M घोरं, G3 वीर (for वीरो) T2 G1 4 हरि (for हली) — (L 1814) D6 तु लाङ्गली, T2 हरिस्तदा, G2 तदा हली (by transp) — (L 1815) T4 रथी शरी; G6 गदी रथी (by transp) D6 रथी शरी गदी खड्गी, G2 तदा रथी शरी खड्गी (for °) D6 T4 G2 भूत्वा (for तस्थौ) — G1 om lines 1816–1819 — (L 1817) D6 T2 G2 3 M आविध्य (for आहत्य) — (L 1819) M2 चैव (for छित्वा), D6 T4 G2 धनुर्ज्यां दशभिश्छित्त्वा (for °). — (L 1820) M4 स (for च) T2 G3 छित्त्वा (for कृत्वा) G1 5 निषादप° — (L 1821) Dn Ds2 T1 2 G1 3–5 M परै., T4 शतैः (for शितैः). — (L 1822) D6 T1, 2 M धनुरत्न, G2 °रात्तं (for °रर्धं) — (L 1824) Dn Ds2 T4 M1 3 जगत्पति (for °त्पते) — (L 1825) T2 G1 5 M1–3 महा (for महच्) G5 निषादो वीर्यवत्तमम्, Bom Poona eds G(ed) °दो वीर्यसमत (for °) — (L 1827) Bom Boona eds G (eds) -मौर्व्या (for -मौर्वी-) — (L 1827) Dn Ds2 जघान जनमध्यत (for °) — (L 1829) Dn -सहैर्बलैः, Ds2 समैर्बलैः, D6 T2 4 G1 2 4, 5 M -समैर्बली (for -सहैः°) — (L 1830) D6 माधवाग्रतः (for °ज.). — (L 1831) Dn Ds2 G3 सत्वर. (for °रम्) — (L 1832) G2 बलवीराय; Bom Poona eds G(ed) °देवाय) T1 घोरविक्रमं, T2 G1 °मुत्तमम्, G2 °विभ्रम (for °विग्रहम्) — (L 1833) Dn यदुर्वीरो, Ds2 यदुर्वीरो (for यदुवृषो) — (L. 1835) Dn ततो महत्परं खड्गं (for °) — (L 1836) D6 G2 समालोक्य (for आलोक्याथ) Bom Poona eds. G(ed) निषादज. (for °दप) — (L 1337) D6 चापं (for चापि) Dn Ds2 यदुनन्दन°, D6 T1 2 4 G1 2 5 M वृष्णिपुंगव. (for यदु°) — (L 1838) Dn Ds2 बाह्वोरन्तरयोश्चैव; D6 T1 2 4 G M बाणैरन्तर एवाशु (for °). — (L 1841) Dn Ds2 G2 निषादप (for °दराट्) — (L 1842) Cal. ed सा शक्तिः प्रेषिता तेन (for °). — (L 1843) Dn Ds2

उत्प्लुत्य तां महाघोरां बलभद्रः प्रतापवान् ।
आदायाथ निषादेशं सर्वान्विस्मापयन्निव ।
तयैव तं जघानाशु वक्षोदेशे स माधवः ॥
स तया ताडितो वीरः स्वशक्त्याथ निषादपः ।
विह्वलः सर्वगात्रेषु निपपात महीतले ।
प्राणसंशयमापन्नो निषादो रामताडितः ॥
निषादास्तस्य राजेन्द्र शतशोऽथ सहस्रशः ।
अष्टाशीतिसहस्राणि निषादाः शस्त्रयोधिनः ।
गदिनः सादिनश्चैव महेष्वासा महाबलाः ॥
शरैरनेकसाहस्रैः शक्तिभिश्च परश्वधैः ।
गदाभिः पट्टिसैः शूलैः परिघैः प्रासतोमरैः ॥
कुन्तैरथ कुठारैश्च व्यद्रवन्राममोजसा ।
शलभा इव राजेन्द्र दीप्यमानं हुताशनम् ।
ते शरैः पातयांचक्रू रामं राममिवापरम् ॥
केचित्कुठारैराजघ्नुः केचित्कुन्तैः परश्वधैः ।
गदाभिः केचिदायान्ति शक्तिभिश्च तथापरे ।
निजघ्नुः सहसा रामं स्फुरन्तं पावकं यथा ॥
ततः क्रुद्धो हली साक्षाद्धलमुद्यम्य सत्वरम् ।
सर्वांस्तान्कर्षयामास मुसलेन व्यपोथयत् ॥

ते हन्यमाना रामेण निषादाः पर्वताश्रयाः ।
निपेतुर्धरणीपृष्ठे शतशोऽथ सहस्रशः ॥
क्षणेन तान्महाराज हत्वा सर्वान्महाबलान् ।
सिंहवद्विनर्दंस्तत्र तस्थौ रामो महाबलः ॥
ततो रात्रौ महाघोराः पिशाचाः पिशिताशनाः ।
आकृष्य मांसयूथानि भक्षयन्तः समासते ।
पिबन्तः शोणितं कोष्णं संकृष्य च शवं बहु ॥

Colophon.

वैशंपायन उवाच ।

क्रव्यादाः सर्व एवाशु भक्षयन्तस्तदा शवम् ।
हसन्तो विविधं घोरं नादयन्तो वसुंधराम् ॥
राक्षसाः पिशिताशाश्च पिबन्तो रुधिरं बहु ।
आशिषं युञ्जते राजञ्शवस्य पिशिताशनाः ॥
नृत्यन्ति स्म तदा राजन्नगर्या रणतोषिणः ।
काका बळाश्च गृध्राश्च श्येना गोमायुकास्तथा ।
भक्षयन्तः प्रधावन्तस्ततश्चेतश्च दारुणम् ॥
एतस्मिन्नन्तरे वीरो निषादो लब्धसंज्ञकः ।
हतान्सर्वान्समालोक्य निषादानथ सीरिणा ॥
गदामादाय कुपितो राममेव जगाम ह ।

उत्पतत्तीं ; T_4 उत्पत्य तां (for उत्प्लुत्य तां) D_6 T_4 G_2 महाराज (for °घोरां) D_6 $T_{1\,4}$ $G_{2\,4}$ बलदेव (for °भद्र°) — (L 1844) G_2 तामादाय (for आदायाथ) — (L 1845) Dn Ds_2 D_6 T_2 $G_{2,5}$ तथैव (for तयैव) — T_1 om (hapl) lines 1849^b–1855^a G_3 om (hapl) lines 1850–1863 — (L 1850) Dn Ds_2 तस्य (for शस्त्र) — (L 1851) Dn Ds_2 खङ्गिनश् (for सादि°) — T_2 om (hapl) lines 1853–1857 — (L 1854) Dn Ds_2 यादवानां महौजसाम् ; G_2 बलभद्रं महौजसम् (for ^{b}) — (L 1858) Dn Ds_2 आघ्नन्ति (for आयान्ति) — (L 1861) Dn Ds_2 T_1 G_2 M_1 सर्वानाकर्षयामास (for ^{a}) Dn Ds_2 T_1 $M_{1\,3}$ हि पीडयन् , D_6 ह्ययोधयत् , G_2 ह्यपोथयत् , $M_{2\,4}$ निपीडयन् (for व्यपोथयत्). — (L. 1862) Dn Ds_2 राजेन्द्र (for रामेण). — (L 1865) व्यनदत् (for विनर्दंस्) — (L 1868) Dn Ds_2 M_4 कोष्ठात् ; $G_?$ क्षोभात् (for कोष्णं) Dn Ds_2 D_6 T_4 G_2 M_{1-3} (*inf lin* as above) संछिद्य , T_2 संगृह्य (for संकृष्य)

Colophon. — *Mention of the Epic* : Ds_2. — *Mention of Khila* Dn_2 Ds D_6 $T_{1\,2\,4}$ G M. — *Adhy name* : Dn Ds_2 एकलव्यसैन्यवध. — *Adhy no* Dn 283 , Ds_2 282 , T_1 G_3 209 , T_2 G_2 204 , G_4 $M_{1\,2,4}$ 210, M_3 174.

T_2 G_1 om the ref — (L 1869) $T_{1,2}$ $G_{1\,3-5}$ शवं बहु (for तदा शवम्) — (L 1870) Dn_2 हसन्ते (for °न्तो) $T_{1\,2}$ $G_{1\,3-5}$ नादं , M हास (for घोरं) — (L 1871) Bom Poona eds G(ed) च पिशाचास् (for पिशिताशास्) Dn Ds_2 G_3 शोणितं (for रुधिरं) — (L 1872) Dn Ds_2 $G_{1\,3\,4}$ $M_{1\,3}$ आशिषो (for °ष) Dn Ds_2 T_4 G_2 M_4 भुञ्जते (for युं°) T_1 राम , T_2 $G_{1\,3-5}$ रामे (for राजञ्). D_6 T_4 G_2 M रामस्य , $T_{1\,2}$ $G_{1\,3-5}$ जयेति (for शवस्य). — (L 1873) $T_{1\,2}$ $G_{1\,3\,4}$ M_3 -तोषिता (for °णः) — (L. 1874) Dn Ds_2 $G_{1\,5}$ बलाका , D_6 बकाश्च , T_1 व्यालाश्च ; G_3 M_4 बलाश्च (for बळाश्च) Dn Ds_2 D_6 $T_{1\,4}$ G_2 $M_{1\,3}$ गोमायवस् (for °युकास्) — (L 1875) Dn Ds_2 $T_{1\,2}$ $G_{1\,3\,4}$ M प्रवर्तन्ते (for प्रधावन्तस्) Dn Ds_2 D_6 इतस् (for ततस्) Dn Ds_2 राक्षसाश्चैव दारुणाः (for ^{b}). — (L 1876) T_2 -संज्ञित. , T_4 G_2 -संज्ञिकः (for -संज्ञकः).

जघान गदया राजञ्जत्रुदेशे निपादपः ॥
ततो रामो गदी राजन्निपादं बाहुशालिनम् ।
आजघ्ने गदया क्रूरं मदमत्तो हलायुधः ।
तयोश्च तुमुलं युद्धं गदाभ्यां समवर्तत ॥
आकाशे शब्द आसीत्तु तयोर्युद्धे महारवः ।
समुद्राणां यथा घोपः सर्वेषा सनिगच्छताम् ॥
कल्पक्षये महाराज शब्दः स तुमुलोऽभवत् ।
क्षुभितो नागलोकश्च नागाः क्षोभं समाययुः ।
पृथिवी चान्तरिक्षं च सर्वं शब्दमयं बभौ ॥
ततः स पौण्ड्रको राजा सात्यकि वृष्णिनन्दनम् ।
गदयैव जघानाशु सत्वरं रणकोविदः ।
युयुधानो वली राजन्वासुदेवं जघान ह ॥
तयोश्च तुमुलः शब्दः प्रादुरासीन्महारणे ।
चतुर्णा युध्यतां राजन्परस्परवधैपिणाम् ।
ब्रह्माण्डक्षोभणो राजञ्शब्द आसीत्सुभैरवः ॥
ततो रजः प्रादुरभूत्तस्मिन्संग्राममूर्धनि ।
तारका निष्प्रभा आसंस्तमस्येवं क्षयं गते ॥
उषसि प्रतिबुद्धायां तमो निःशेषतां ययौ ।
उदितो भगवान्सूर्यश्चन्द्रश्च क्षयमाययौ ॥
ततो युद्धं प्रादुरभूच्चतुर्णां बाहुशालिनाम् ।
देवासुरसमं राजन्नुदिते भास्करे महत् ॥

Colophon

वैशंपायन उवाच ।

ततः प्रभाते विमले भगवान्देवकीसुतः ।
गन्तुमैच्छज्जगन्नाथ. पुरीं बदरिकाश्रमात् ॥
नमस्कृत्य मुनीन्सर्वान्ययौ द्वारवतीं प्रभुः ।
आरुह्य गरुडं विष्णुर्वेगेन महता प्रभुः ॥
सुमहाञ्शुश्रुवे शब्दस्तेपां युद्धं प्रकुर्वताम् ।
गच्छता देवदेवेन पुरीं द्वारवतीं नृप ॥
अचिन्तयज्जगन्नाथः को न्वयं शब्द उत्थितः ।
संग्रामसंभवो घोर आर्यशैनेयसंयुतः ॥
व्यक्तमागतवान्पौण्ड्रो नगरीं द्वारकामनु ।
तेन युद्धं समभवत्पौण्ड्रकेण दुरात्मना ॥
यदूनां वृष्णिवीराणां युध्यतामितरेतरम् ।
शब्दोऽयं सुमहान्वृत्तो नात्र कार्या विचारणा ॥
इत्येवं चिन्तयित्वा तु दध्मौ शङ्खं महारवम् ।

— Dn2 om lines 1877–1878 —(L 1877) T2 एतान् (for हतान्) D6 शौरिणा, M4 सीरिणम् (for सीरिणा) Dn1 निषादान्नगदारिण, Ds2 °न्नगचारिण T2 °न्विद्धसीरणान् (for ^{b}) —(L 1878) T3 G1 [आ]जगाम (for जगाम) —(L. 1879) T1 2 G1 4 घोरं (for राजन्) Dn Ds2 M1 छत्रदेशे (for जत्रु°) —(L 1880) Cal ed द्वंद्वं (for गदी) —(L 1883) Dn Ds2 महाभुज, G4 सुदारुणम् (for महारव.) —(L 1884) D6 G2 महाघोर, G5 महाघोष. (for यथा घोष) —(L 1885) Dn Ds2 T1 2 4 M सु (for स) G4 महान् (for ऽभवत्) —(L 1886) D6 T4 G4 5 M4 क्षोभितो, G1 क्षुधितो (for क्षुभितो) Dn Ds2 G3 क्षो(G2 क्षु)भितो नागराजश्च (for ^{a}) M1 3 परं ययु· (for समाययु·) —(L 1887) T4 शस्त्रमयं (for शब्द°). D6 सर्वे लोका. सर्वदिश. (for ^{b}) —(L 1889) D6 T4 G2 -कोविदम् (for °द) —(L 1891) G2 समन्ततः (for महारणे) —(L 1893) Dn Ds2 T1 G3 4 सुदारुणः; M4 तु भैरवः (for सुभै°). —(L 1894) D6 G2 M रण. (for रजः) G5 M1 3 आसीत् (for अभूत्) —(L 1895) Dn Ds2 T1, 2 G1 M राजंस् (for आसंस्). G2 [इ]द (for [ए]व) —(L 1896) G5 उषना (for °सि) Dn Ds2 T2 G M4 ततो (for तमो) —(L 1897) D6 लयम् (for क्षयम्) —(L 1898) T1 2 G1 3 4 बलशालिनाम् (for बाहु°) — D6 T1 2 4 G om line 1899.

Colophon — *Mention of the Epic* Ds2 — *Mention of Khila* Dn Ds2 D6 T1 2 G M — *Adhy name* Dn Ds2 D6 पौण्ड्रकयुद्धम्, T4 G4 M1 2 4 पौण्ड्रकवध . — *Adhy no* Dn Ds2 283, T1 G3 210, T2 G1 5 M1. 3 4 211, T4 179, G2 205; G4 209, M3 175

T3 G1 2 om the ref —(L 1901) G2 om. (hapl) 1901^{b}–1906^{a}. Dn Ds2 M4 पुर (for पुरीं) —(L 1902) T3 G1 4 नमस्कृत्वा (for °स्कृत्य) Dn Ds2 G3 नृप, D6 प्रति, T3 G1 4 प्रभो; M1–3 हरि. (for प्रभु·) — G5 om. lines 1903–1905 —(L 1903) D6 T1 2 4 G1 4 5 हरि (for प्रभु.). —(L 1904) D6 T1 2 G1, 4 5 M1–3 श्रूयते (for शुश्रुवे) —(L 1906) M उत्तमः (for उत्थित.). —(L 1907) D6 T4 -संभ्रमो (for -संभवो) G5 -संवृतः (for -संयुतः) M3 शैनेयेन च संयुत (for ^{b}) —(L 1909)

पाञ्चजन्यं हरिः साक्षात्प्रीणयन्वृष्णिपुंगवान् ॥
रोदसी पूरयामास तेन शब्देन केशवः ।
यादवा वृष्णयश्चैव श्रुत्वा शङ्खस्य तं रवम् ॥
व्यक्तमायाति भगवान्पाञ्चजन्यरवो ह्ययम् ।
इति ते मेनिरे राजन्वृष्णयो यादवास्तथा ।
निर्भयाः समपद्यन्त वृष्णयो यादवा नृप ॥
तस्मिन्नेव क्षणे दृष्टस्तार्क्ष्यश्च पततां वरः ।
ततश्च देवकीसूनुर्हृष्टस्तैर्यादवेश्वरैः ॥
सूताश्च मागधाश्चैव पुरो यान्ति जगत्पतेः ।
स्तुत्या स्तोतुं हरिं विष्णुमीश्वरं कमलेक्षणम् ॥
ततश्च यादवाः सर्वे परिवव्रुर्जनार्दनम् ।
कृष्णस्तु गरुडं भूयो गच्छ त्वं मेरुमुत्तमम् ॥
इत्युक्त्वा गरुडं विष्णुर्विसृज्य यदुपुंगवः ।
दारुकं पुनराहेदं रथमानय मे प्रभो ॥
स तथेति प्रतिज्ञाय रथमानीय सत्वरम् ।
रथोऽयं भगवन्देव किमतः कृत्यमस्ति मे ।
इत्युक्त्वा रथमादाय प्रणम्याग्रे स्थितो हरेः ॥
गतेऽथ गरुडे विष्णू रथमारुह्य सत्वरम् ।
यत्र युद्धं समभवत्तत्र याति स केशवः ॥
तत्र गत्वा महारङ्गे युध्यतां च महात्मनाम् ।
पाञ्चजन्यं महाशङ्खं दध्मौ यदुवृषोत्तमः ॥
पौण्ड्रोऽथ वासुदेवस्तु कृष्णं दृष्ट्वा रणोत्सुकम् ।
सात्यकिं पृष्ठतः कृत्वा वासुदेवमुपागमत् ॥
क्रुद्धोऽथ सात्यकी राजन्वारयामास पौण्ड्रकम् ।
न गन्तव्यमितो राजन्नेष धर्मः सनातनः ॥
जित्वा मां गच्छ राजेन्द्र परं योद्धुं महारणे ।
क्षत्रियोऽसि महावीर स्थिते मयि रणोत्सुके ॥
एष ते गर्वमखिलं नाशयिष्यामि संयुगे ।
इत्युक्त्वा चाग्रतस्तस्थौ गच्छतो यादवेश्वरः ॥
पौण्ड्रस्य शिनिनप्ता तु पश्यतः केशवस्य ह ।
अवज्ञाय शिनेः पौत्रं कृष्णमेव जगाम ह ॥
निर्भर्त्स्य सहसा भूयः सात्यकिः क्रोधमूर्छितः ।
गदया प्राहरत्पौण्ड्रं वासुदेवस्य पश्यतः ।
यथाशक्ति यथायोगं सात्यकिः सत्यविक्रमः ॥
दृष्ट्वाथ भगवानेवं सात्यकिं प्रशशंस ह ॥
निवार्य सात्यकिं कृष्णो यथेष्टं क्रियतामसौ ।
उपारमद्यथायोगं सात्यकिः कृष्णवारितः ॥
ततः स पौण्ड्रको राजा वासुदेवमुवाच ह ।
भो भो यादवगोपाल इदानीं क्व गतो भवान् ॥
त्वां द्रष्टुमद्य संप्राप्तो वासुदेवोऽस्मि सांप्रतम् ॥
हत्वा त्वां सबलं कृष्ण बलैर्बहुभिरन्वितः ।
गतेऽथ यमलोकं तु त्वयि केशव बन्धुभिः ।
अहमेको भविष्यामि वासुदेवो जगत्पतिः ॥
यच्चक्रं तव गोविन्द प्रथितं सुप्रभं महत् ।

Cal. ed महात्मना (for दुरा°). — (L 1910) G_3 वृष्णिवर्याणां — (L 1911) Dn Ds_2 T_1 G_2 व्यक्तो (for वृत्तो). — (L 1912) T_2 प्रतापवान् (for महारवम्) — (L 1915) D_6 G_2 M_2 यदवो (for यादवा) Ds_2 T_2 ते (for तं) — (L 1916) G_3 -स्वनो (for -रवो) — (L 1918) G_2 निर्णयं समवाप्यन्त (for °) Dn Ds_2 T_1 G_3 M_1 3 च ते (for नृप). — (L 1920) Dn Ds_2 T_4 G_4 यादवेश्वर॰, T_1 °वैर्नृप (for °वेश्वरैः) — (L 1921) G_2 आगता (for सूताश्च). — (L 1922) Dn Ds_2 G_3 स्तुत, D_6 T_3 G_2 स्तुत्यं ; T_1 2 $G_{1,4}$ [अ]स्तुवन् (for स्तोतु) — (L 1923) T_1 4 G_{1-3} M_1 2, 4 गताश् (for ततश्) — (L 1924) Dn Ds_2 नाकम् (for मेरुम्) — (L 1925) D_6 T_4 G_2 व्यसृजद् (for विसृज्य) Dn Ds_2 M_1 3 -नन्दन (for -पुंगव.) — (L 1927) Dn Ds_2 T_2 G_3 M_2 (*inf. lin.* as above) आदाय (for आनीय) — (L 1929) T_4 हरि॰ (for हरे॰) — (L 1931) D_6 T_1 2 G_2 3 ततो (for तत्र) — (L 1932) Dn Ds_2 T_4 G_3 महाराज (for °रङ्गे) G_2 परस्परम् (for महात्मनाम्) — (L 1934) T_2 G_1 4 पौण्ड्रको (for पौण्ड्रोऽथ) — G_3 om lines 1935–1939 — (L 1942) Cal ed पौण्ड्रकस्य शिनेर्नप्ता (for °) — (L 1946) Dn Ds_2 यथाप्राण (for यथाशक्ति) D_6 T_1 2 G M यथाप्राणं (for यथायोगं) Cal ed सात्यकिः क्रोधमूर्छित (for °) — (L 1947) T_2 G_1 5 स, M_4 [आ]शु (for [आ]थ) T_2 G_1 2 5 सात्यकिः (for °किं) — (L. 1948) Dn_2 विष्णो (for कृष्णो) — (L 1949) G_1 -पालितः (for -वारित॰). — (L 1950) Dn Ds_2 M_1 3 स तत. (by transp) T_2 तत. स पौण्ड्रं राजा तु (for °) — Dn_2 Ds M_{1-3} om. line 1954 — (L. 1955) Dn Dn_2 G_1 2 महीतले (for जगत्पति). — (L.

अनेन मम चक्रेण पाटितोऽस्मि च तद्रणे ॥
चक्रमस्तीति यद्वीर्यं तव माधव सांप्रतम् ।
नाशयिष्यामि तत्सर्वं सर्वक्षत्रस्य पश्यतः ॥
शार्ङ्गीति मां विजानीहि न त्वं शार्ङ्गीति शब्दयसे ।
शङ्खी चाहं गदी चाहं चक्रीति च जनार्दन ।
मामेव हि सदा ब्रूयू राजानो वीर्यशालिनः ॥
आदौ त्वं बल्लवैर्वृद्धो हत्वा स्त्रीबालकान्बहून् ।
गाश्च हत्वा महागर्वस्तव संप्रति वर्तते ॥
तत्तेऽहं व्यपनेष्यामि यदि तिष्ठसि मत्पुरः ।
शस्त्रं गृहाण गोविन्द यदि योद्धुं व्यवस्थितः ।
इत्युक्त्वा बाणमादाय तस्थौ पार्श्वे जगत्पतेः ॥
एतद्वचनमाकर्ण्य वासुदेवस्य भाषितम् ।
स्मितं कृत्वा हरिः कृष्णो बभाषे पौण्ड्रकं नृपम् ॥
कामं वद नृप त्वं हि पातक्यस्मि सदा नृप ।
गोघाती बालघाती च स्त्रीहन्ता सर्वथा नृप ॥
चक्री भव गदी राजञ्शार्ङ्गी च सततं भव ।
नामासीद्यद्वृथा मह्यं वासुदेवेति च प्रभो ॥
शार्ङ्गी चक्री गदी शङ्खीत्येवमादि वृथा मम ।
किं तु वक्ष्यामि किंचित्तु शृणुष्व यदि मन्यसे ॥
क्षत्रिया बलिनो ये तु स्थिते मयि जगत्पतौ ।
तथा नु ब्रुवते त्वां हि जीवत्येव मयि प्रभो ॥
यत्ते चक्रं महाघोरं सर्वकालायसं महत् ।
तत्तुल्यं मम चक्रस्य वृत्ततो न तु वीर्यतः ।
आयुधेष्वथ सर्वत्र शब्दसादृश्यमस्ति ते ॥
गोपोऽहं सर्वदा राजन्प्राणिनां प्राणदः सदा ।
गोप्ता सर्वेषु लोकेषु शास्ता दुष्टस्य सर्वशः ॥
कत्थनं सर्वदा कार्यं जित्वा शत्रून्रणे नृप ।
अजित्वा किं भवान्ब्रूते स्थिते मयि च शङ्खिणि ॥
हत्वा मां ब्रूहि राजेन्द्र यदि शक्नोषि पौण्ड्रक ।
स्थितोऽहं चक्रमाश्रित्य रथी चापी गदासिमान् ॥
रथमारुह्य युद्धाय संनद्धो भव मानद ।
इत्युक्त्वा भगवान्विष्णुः सिंहनादं व्यनीनदत् ॥

Colophon

वैशंपायन उवाच ।

ततः शरं समादाय वासुदेवः प्रतापवान् ।
पौण्ड्रं जघान सहसा निशितेन शरेण ह ॥
पौण्ड्रोऽथ वासुदेवस्तु शरैर्दशभिराशुगैः ।
वासुदेवं जघानाशु वार्ष्णेयं वृष्णिनन्दनम् ॥
दारुकं पञ्चविंशत्या हयान्दशभिरेव च ।
सप्तत्या वासुदेवं तु यादवं वासुदेवक. ॥
ततः प्रहस्य सुचिरं केशवः केशिसूदनः ।
धृष्टोऽसीतीह मनसा संपूज्य यदुनन्दनः ॥

1957) पीडितो (for पाटितो) — (L 1960) Dn Ds2 शिष्यसे (for शब्दयसे) — (L 1962) Dn Ds2 जानन्तो (for राजानो) — T1 om line 1963 — (L 1963) Dn Ds2 आदौ त्वं बलवद्वृद्धान् ; G2 आदौ तु शल्यवेषस्त्वं (for ᵃ) — (L 1972) T2 G2 नृप (for भव) — (L 1973) Dn Ds2 T4 नामधेयं, G2 M4 नाममात्रं, M1–2 नामधेयो (for नामासीद्यत्). — G5 om lines 1974–1976. — (L 1974) Dn यथा (for वृथा) D6 T1, 2 4 G2 4 M2 नृप (for मम) — (L 1977) D6 T2 M1–3 न (for नु) — (L 1978) Ds2 असुरान्तकरं महत् (for ᵇ) — (L 1979) T1 2 G1 3 4 चक्रं तु, G2 M2 वीर्यस्य (for चक्रस्य) — (L 1980) T2 G1, 3–5 मे (for ते). — (L. 1981) G1 सर्वथा ; G4 5 प्राणिनां (for सर्वदा) G1, 5 सर्वदा (for प्राणिनां). D6 T4 G3 त्वमेव सर्वदा राजन्प्राणद सर्वदेहिनाम्. — (L. 1982) G4 5 गोप्ता सर्वस्य लोकस्य (for ᵃ) Dn Ds2 M सर्वदा (for सर्वश:) — (L 1983) Bom. Poona. eds G(ed) कत्थनं सर्वकार्यं हि (for ᵃ) Dn1 Ds2 नृपाधम (for रणे नृप) Dn2 जित्वा राजन्नृपाधम (for ᵇ) — (L 1984) T1 शत्रुणा ; G2 शार्ङ्गिणि (for शङ्खिणि). — (L 1985) Dn Ds2 G2 M2 4 शक्तोऽसि (for शक्नोषि). G1 5 शक्नोषि (G5 °क्तोऽसि) यदि पौण्ड्रक (for ᵇ) — (L 1986) T4 शरी (for रथी) — D6 T4 G2 om line 1988. — (L 1988) G4 5 M3 इत्युक्तो (for °क्त्वा). G4 5 कृष्ण (for विष्णु.).

Colophon — *Mention of the Epic* Ds2 — *Mention of Khila* Dn Ds2 D6 T1 2 4 G M — *Adhy name*. Dn Ds2 कृष्णपौण्ड्रकयुद्धम्, D6 T1 M2 4 पौण्ड्रकवधः. — *Adhy no* · Dn Ds2 284, T1 G3 201; T2 G1 213; T4 180, G2 206, G4 212, M1–3 176; M4 112.

(L 1992) D6 जगन्नाथं (for जघानाशु) — (L 1994) D6 T4 G2 यादवान् (for °वं) — (L 1995) G2 केवलं (for केशव). Dn2 -नाशनः (for -सूदनः). — (L 1996) Ds2

आकृष्य शार्ङ्गं बलवान्संधाय रिपुमर्दनः ।
नाराचेन सुतीक्ष्णेन ध्वजं चिच्छेद केशवः ॥
सारथेश्च शिरः कायादाहृत्य यदुपुंगवः ।
अश्वांश्च चतुरो हत्वा चतुर्भिः सायकोत्तमैः ॥
रथरज्जूः समाहत्य तथोभौ पार्ष्णिसारथी ।
चक्रं च तिलशः कृत्वा हसन्किंचिदवस्थितः ॥
पौण्ड्रको वासुदेवस्तु रथादाप्लुत्य सत्वरम् ।
आदाय निशितं खड्गं प्राहिणोत्केशवाय ह ॥
स खड्गं शतधा कृत्वा शरैर्दशभिरेव च ।
बालवत्केशवोऽतिष्ठन्निमील्य नयने हरिः ॥
ततः शक्तिं समादाय निशितां घोरविग्रहाम् ।
प्राहिणोद्वृष्णिवीराय सिंहनादं समाददे ॥
तां चापि तिलशः कृत्वा तूष्णीमासीत्स केशवः ॥
ततोऽपरं महाघोरं परिघं कालसंनिभम् ।
गृहीत्वा वासुदेवाय वासुदेवः प्रतापवान् ॥
प्राहिणोद्वृष्णिवीराय सर्वक्षत्रस्य पश्यतः ।
तद्द्विधा जगतां नाथश्चकार यदुनन्दनः ॥
ततश्चक्रं महाघोरं सहस्रारं महाप्रभम् ।
त्रिंशद्धारसमायुक्तमयसा निर्मितं महत् ।
आदायाथ महाराज केशवं वाक्यमब्रवीत् ॥
पश्येदं निशितं घोरं तव चक्रविनाशनम् ।
अनेन तव गोविन्द दर्पं दर्पवतां वर ।
अपनेष्यामि वार्ष्णेय सर्वक्षत्रस्य पश्यतः ॥
त्वामुद्दिश्य महाघोरं कृतं मम दुरासदम् ।
यदि शक्तो हरे कृष्ण दारयैनं महास्पदम् ॥
इत्युक्त्वा तच्छतगुणं भ्रामयित्वा महाबलः ।
चिक्षेपाथ महावीर्यः पौण्ड्रको नृपसत्तम ।
हरिमुद्दिश्य सहसा विनदन्भैरवं रवम् ॥
ततः प्रहस्य भगवानापतन्तं महायुधम् ।
गृहीत्वा बलवद्घोरं तेनैव प्राहिणोद्धरिः ॥
दृष्ट्वा तं महदायान्तं पौण्ड्रको नृपसत्तमः ।
अवप्लुत्य ततो देशात्तदुत्सृज्य महाबलः ।
सिंहनादं महाघोरं व्यनदद्वीर्यवांस्तदा ॥
ततो विस्मयमापन्नो भगवान्देवकीसुतः ।
अहो वीर्यमहो धैर्यमस्य पौण्ड्रस्य दुःसहम् ।
इति मत्वा जगन्नाथः स्थित एव रथोत्तमे ॥
ततः शिलाः समादाय प्रेषयामास केशवे ।
ताः शिलाः प्रेषयामास तस्मै यादवनन्दनः ॥

दृष्टो ; Cal. ed हृष्टो (for घृष्टो) Ds_2 G_3 $M_{1\ 3}$ ऽसाविति ; T_2 G_2 ऽसीति हि , $M_{2\ 4}$ ऽसीति च (for ऽसीतीह) G_5 मृदुना (for मनसा) — (L 1997) Dn Ds_2 $T_{2,4}$ $G_{1\ 5}$ $M_{1\ 2\ 4}$ -सूदन (for -मर्दन-) — T_2 om. line 1999 — (L 1999) G_3 om lines 1999^b–2001^a Dn Ds_2 आहत्य यदुनन्दनः (for ^{b}). — (L 2001) Dn Dn_2 रथं राज्ञ. ; D_6 रथरज्जुं , T_1 °रज्ज्वा ; T_2 °रथ्या (for रज्जू.) $M_{1\ 3\ 4}$ प्राष्टि- ; M_2 प्राष्टि- (for पार्ष्णि-) G_2 तस्थौ प्रातिष्ठसारथी (sic) (for ^{b}) — (L 2002) Dn_1 $T_{1\ 4}$ $G_{2\ 4}$ M इव स्थित , D_6 इवास्थित (for अव°) — (L 2003) G_2 $M_{1\ 4}$ उत्प्लुत्य (for आप्लुत्य) $G_{4\ 5}$ M_3 सत्वर- (for °रम्) Dn Ds_2 रथादुत्प्लुत्य सत्वर. (for ^{b}). — (L 2004) Dn Ds_2 स (for ह) — (L 2005) $T_{1\ 2}$ $G_{1\ 3-5}$ M_3 दशधा (for शतधा) Dn Ds_2 $G_{2\ 4}$ om 2005^b–2009^a — (L 2009) Dn Ds_2 $T_{1\ 4}$ G_3 M_1 आसीच्च , T_2 $G_{1\ 4\ 5}$ M_{2-4} °त (for °त्स) — (L 2010) Dn Ds_2 $M_{3\ 4}$ -संमितम् (for -संनिभम्). — (L 2011) वासुदेवं (for °देव). — (L. 2013) M_3 द्विधा तं (for तद्द्विधा). T_2 $G_{1,3-5}$ तद्द्विधं ($G_{3,4}$ °धा) तु जगन्नाथश्च (for ^{a}) — (L 2015) D_6 $T_{1\ 2\ 4}$ G M विंशद्धार- (for त्रिंश°). $T_{1\ 2\ 4}$ G_5 बृहत् (for महत्) Dn Ds_2 M_4 आयसास्यमभित्रहा , M_{1-3} अयस्मयममित्रहा (for ^{b}) — (L 2016) D_6 T_4 G_2 आदाय पौण्ड्रको राजा (for ^{a}) — (L 2017) G_3 [इ]मं , M_3 त्वं (for [इ]दं) T_4 पश्यैतन्निहितं घोरं (for ^{a}). D_6 सहस्रारं महाप्रभम् (for ^{b}) — (L 2018) T_2 पौण्ड्र- (for दर्प) G_3 दर्पविदां (for °वतां) — (L 2020) Dn Ds_2 M_4 कृतमन्यद् , G_2 कृतवर्म- (for कृत मम) — (L 2021) Dn Ds_2 G_3 दारयेदं , D_6 वारयेदं ; $T_{1\ 2\ 4}$ $G_{1\ 3-5}$ M_{1-3} वारयैनं (for दार°) D_6 $T_{1,4}$ G_3 M_{1-3} ममास्पदम् , G_2 महत्स्वनम् (for महास्पदम्) — Dn Ds_2 om (hapl) lines 2024–2027 . — (L 2026) D_6 प्राहरद् (for प्राहिणोद्). — (L 2027) G_2 चक्रं (for दृष्ट्वा). — (L 2031) D_6 T_1 वर्यिम् (for धैर्यम्) G_2 दुष्प्रभम् (for दुःसहम्) — (L 2032) Dn Ds_2 उत्थितश्च रथोत्तमात् (for ^{b}) — (L 2033) Dn Ds_2 $G_{2\ 3}$ शिलां (for शिलाः) Bom Poona eds G(ed) केशवम् (for °वे) — (L 2934) Dn Ds_2 T_1 $G_{3\ 4}$ तां शिलां (for ता शिलाः) Dn Ds_2 तस्मै यदुकुलोद्वहः ; G_3 कृष्णो

पौण्ड्रेण सुचिरं कालं विक्रीड्य भगवान्हरिः ।
ततश्चक्रं समादाय निशितं रक्तभोजनम् ॥
दैत्यमांसप्रदिग्धाङ्गं नारीगर्भविमोचनम् ।
शातकुम्भनिभं घोरं दैत्यदानवनाशनम् ॥
सहस्रारं शतारत्निमद्भुतं दैत्यभीषणम् ।
वैष्णवं परमं चक्रं नित्यं सुरगणार्चितम् ॥
विष्णुः कृष्णो रथी शार्ङ्गी नित्ययुक्तः सदा हरिः ।
जघान तेन गोविन्दः पौण्ड्रकं नृपसत्तमम् ॥
तस्य देहं विदार्याशु चक्रं पिशितभोजनम् ।
कृष्णस्याथ करं भूयः प्राप सर्वेश्वरस्य ह ।
ततः स पौण्ड्रको राजा गतासुः प्रापतद्भुवि ॥
निहत्य भगवान्विष्णुर्दुर्विज्ञेयगतिः प्रभुः ।
प्रतिपेदे सुधर्मां तु यादवैः पूजितो हरिः ॥

Colophon.

वैशंपायन उवाच ।

निषादेशं ततो रामः शक्त्या वीर्यवतां वरः ।
आजघान स्तनद्वंद्वे सिंहनादं व्यनीनदत् ॥
ततः क्रुद्धो निषादेशो रामं मत्तं महाबलम् ।
गदया लोकविख्यातो जघान स्तनवक्षसि ॥
आहतः स तु तेनाशु बलभद्रो महाबलः ।
उभाभ्यां चैव रामस्तु कराभ्यां वृष्णिपुंगवः ।
गदां गृह्य महाघोरां निषादाय समाददे ॥
तां दृष्ट्वा महती घोरामायान्तीं प्राणहारिणीम् ।
दुद्रावाथ निषादेशः समुद्रं मकरालयम् ।
अन्वधावत्ततो रामो धावन्तं मकरालयम् ॥
धावत्येवं तदा राजन्नेकलव्ये निषादपे ।
धावत्येव च रामोऽपि यत्र यातो निषादप. ॥
सागरं स प्रविश्याशु गत्वा योजनपञ्चकम् ।
भीत एव तदा राजन्नेकलव्यो निषादपः ।
कंचिद्द्वीपान्तरं राजन्प्रविश्य जडवत्स्थितः ॥
ततो रामो निषादेशं जित्वा यादवनन्दनः ।
तां सभां मणिरत्नाढ्यां प्रविवेश हलायुधः ॥
सात्यकिर्युद्धसंरक्तस्तां सभां प्रविवेश ह ।
अन्ये च यादवा राजन्यथायोगमुपस्थिताः ॥
आसीनेषु च सर्वेषु वृष्णिवीरेषु सर्वतः ।
अभिवाद्य यथायोगं वृद्धान्सर्वान्स केशवः ।
उवाच वचनं काले भगवान्देवकीसुतः ॥
दृष्टः कैलासशिखरे शंकरो नीललोहितः ।
स तु मह्यं यदुवराः प्रीतिमांश्च ददौ वरम् ॥
तत्र देवाः समायाता मुनयश्च तपोधनाः ।
दृष्ट्वा मां शंकरं चैव प्रीतास्तुष्टाः समाययुः ॥
अत्यद्भुतं मया दृष्टं रात्रौ यादवसत्तमाः ।

देवकिनन्दन (for ^{b}) — (L 2037) M_1 -प्रदीप्ताङ्गं (for -प्रदिग्धाङ्गं) — (L 2038) Dn Ds_2 शातकुम्भमयं घोरं (for ^{a}). $G_{4.5}$ -शासनम् (for -नाशनम्) — (L 2039) Dn Ds_2 T_4 शतारं तद्, $T_{1\ 2}$ $G_{1\ 3-5}$ सहस्रांशुम् (for शतारत्निम्) T_4 -मारणम् (for -भीषणम्). M_4 भूतदैत्यविभीषणम् (for ^{b}) — (L 2040) Dn Ds_2 ऐश्वर्यं वर्म परमं, M ऐश्वरं परमं वर्म (for ^{a}) — (L 2041) Dn Ds_2 T_1 $M_{1\ 3}$ तथा (for रथी). G_2 गदी चक्री (for नित्ययुक्त)

Colophon. — *Mention of the Epic* Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1\ 2\ 4}$ G M — *Adhy name* Dn D_6 $T_{1\ 2}$ $G_{1\ 3\ 4}$ $M_{1\ 4}$ पौण्ड्रकवध, Ds_2 वासुदेववधः — *Adhy no.* Dn Ds_2 285, T_1 G_3 212, T_2 G_1 214, T_4 179; G_2 207; G_4 211; G_5 213, M_{1-3} 177; M_4 213

Dn_2 G_2 om. the ref. — (L 2048) G_2 निषादकं (for °देशं) — (L 2049) D_6 स्तनद्वंद्वं (for °न्द्वे) — (L 2050) G_2 रणोन्मत्तं (for रामं मत्तं) $M_{2\ 3}$ महाबल. (for °बलम्) — (L 2052) T_1 आहतः स्तन एवाशु (for ^{a}). T_4 बलदेवो (for °भद्रो) — Dn Ds_2 D_6 om line 2057. — (L 2057) G_2 M_8 अन्वीयाच्च (for अन्वधावत्) T_4 G_2 समुद्रं (for धावन्त) D_6 निषादेशं जिघांसया (for ^{b}). — (L. 2058) Dn Ds_2 M_1 तदा राज्ञि, T_2 जवाद्राजन्; T_4 G_2 ततो राजन् (for तदा राजन्) T_4 $G_{1\ 4\ 5}$ M_{2-4} एकलव्यो निषादप. (for ^{b}) — (L 2059) D_6 ततो राजन्, M_3 तदा रामो (for च रामोऽपि) D_6 एकलव्यो, T_4 G_2 यत्र रामो (for यत्र यातो). — (L. 2062) Dn Ds_2 प्रविश्य न्यवसत्तदा (for ^{b}) — (L 2063) Dn Ds_2 जिगाय यदुनन्दनः (for ^{b}) — G_3 om line 2065 — (L 2065) Dn Ds_2 G_1 $T_{2\ 3}$ M_1 -ससक्तस; D_6 -संनद्धस; T_4 -सयुक्तस (for -संरक्तस) — (L 2068) Dn Ds_2 $T_{1.4}$ G_4 वृष्णीन् (for वृद्धान्). — (L 2070) Dn Ds_2

पिशाचौ द्वौ महाघोरौ वदन्तौ मामिकां कथाम् ॥
मृगयां चक्रतुस्तौ तु चिन्तयन्तौ तु मां सदा ।
दृष्ट्वा मां तौ तु राजेन्द्राः प्रीतिमन्तौ तपस्विनौ ।
भक्तिनम्रौ महात्मानौ प्रणामं चक्रतुस्तदा ॥
ततोऽहं सर्वथा प्रीतस्तौ दृष्ट्वा स्वर्गमुत्तमम् ।
तोषयित्वा महादेवमह्ना चाहं ततो गतः ॥
ततस्ते वृष्णयः सर्वे देवदेवं प्रशंसिरे ।
सर्वथा कृतकृत्यास्ते वृष्णयः केशवाश्रयाः ।
यादवाः सर्व एवात्र स्वं स्वं जग्मुर्यथालयम् ॥
अभ्यन्तरं जगन्नाथः प्रविश्य हरिरीश्वरः ।
रुक्मिणीसत्यभामाभ्यामाचचक्षे यथाभवत् ॥
ते प्रीते प्रीतियुक्तेन केशवेन समन्विते ।
एतत्ते सर्वमाख्यातं केशवस्य च चेष्टितम् ॥
शशास पृथिवीं कृत्स्नां दुष्टान्हत्वा महाबलः ।
नरकं घोरकर्माणं पौण्ड्रं च नृपसत्तमम् ॥
हयग्रीवं निशुम्भं च तथा सुन्दोपसुन्दकौ ।
ररक्ष विप्रान्देवेशो मुनीन्मुनिवरार्चितः ॥
विप्रेभ्यश्च ददौ वित्तं गाश्च रत्नानि केशवः ।
अग्निहोत्रं प्रयुञ्जानो ब्राह्मणांश्च सुतर्पयन् ॥
मुनींश्च ब्रह्मचर्येण देवान्यज्ञेन केशवः ।
स्वधया च पितॄन्सर्वान्प्रीणयत्येव सर्वदा ॥
तस्मिञ्शासति देवेशे राज्यं निष्कण्टकं बभौ ।
सुखमेव प्रजाः सर्वा जीवन्ति ब्राह्मणोत्तराः ॥

Colophon

जनमेजय उवाच ।

भूय एव द्विजश्रेष्ठ शङ्खचक्रगदाभृतः ।
चरितं श्रोतुमिच्छामि विस्तरेण तपोधन ।
न हि मे तृप्तिरस्तीह शृण्वतः कैशवीं कथाम् ॥
को नु नाम हरेर्विष्णोर्देवदेवस्य चक्रिणः ।
शृण्वन्कथां स्मरन्वापि तृप्तिं याति दिवानिशम् ॥
पुरुषार्थोऽयमेवैको यत्कथाश्रवणं हरेः ॥
कथमासीज्जगद्धेतोर्हंसस्य डिभकस्य च ।
समितिः सर्वभूतानां सदा विस्मयदायिनी ॥
विचक्रस्य कथं युद्धं दानवस्य महात्मनः ।
स तयोर्मित्रतां यात इत्येवमनुशुश्रुम ॥
तौ नृपौ वीर्यसंपन्नौ शिष्यौ भृगुसुतस्य ह ।
सर्वास्त्रकुशलौ वीरौ हराल्लब्धवरौ किल ॥
संग्रामः सुमहानासीदित्युक्तं भवता पुरा ।

T_1 $G_{2,3}$ $M_{1\ 4}$ दृष्टं (for दृष्टः). Dn Ds_2 G_3 दृष्टं कैलासशिखरं (for ^{a}). — (L 2071) T_2 यथा (for ददौ) — (L 2073) Dn Ds_2 शंकरश् (for °रं) G_5 प्रीत' स्तुत्वा समाययौ (for ^{b}) — (L 2075) पठन्तौ (for वदन्तौ) D_6 G_2 वदन्तौ मामिकाः कथा (for ^{b}) — (L. 2076) D_6 प्रीणयन्तौ (for चिन्त°). — (L 2077) T_2 $G_{1\ 4\ 5}$ राजेन्द्र. — (L. 2078) D_6 भक्तिमन्तौ (for °नम्रौ). — (L. 2079) Dn Ds_2 नीतौ (for दृष्ट्वा) — (L 2080) D_6 $T_{1\ 4}$ $G_{3\ 5}$ M प्रेषयित्वा (for तोष°) T_1 $G_{1,3-5}$ महात्मानाव्, T_2 °त्मानम् (for महादेवम्) T_1 आत्मा; T_2 वशं (for अह्ना) Dn Ds_2 मया चाद्य समागतम् (for ^{b}) — Before line 2081, some Mss ins वैशंपायन उवाच — (L 2081) Dn Ds_2 M शशंसिरे (for प्रशं°). — G_3 om lines 2082–2084 — (L 2082) D_6 T_4 G_2 M_{1-3} केशवाश्रयात् (for °श्रयाः) — (L 2083) $G_{4\ 5}$ यथागतम् (for °लयम्) — (L 2086) M ततस्ते (for ते प्रीते) — After line 2086, G(ed) ins an irrelevant narrative, not connected with the topic — (L 2087) Ds_2 D_6 $T_{1,2\ 4}$ $G_{1\ 2,4}$ M वि- (for च). — (L 2088) D_6 $T_{1\ 2\ 4}$ $G_{2\ 2}$ सर्वां (for कृत्स्नां) Dn Ds_2 G_2 M महाबलात् (for °बल) — (L 2089) Dn Ds_2 पौण्ड्रकं (for पौण्ड्रं च) — (L 2092) D_6 T_2 G_2 तदा, G_1 यथा (for ददौ) $G_{4\ 5}$ रत्नं (for वित्तं) Dn Ds_2 G_2 दत्त्वा स, G_5 वित्तं च, M_{1-3} रत्नान्स (for °नि). — (L 2094) Dn Ds_2 देवान्यज्ञैरनेकधा (for ^{b}) — (L 2095) D_6 T_1 G_5 M प्रजया (for स्वधया) Dn Ds_2 D_6 T_4 G_2 M प्रीणयन् (for °यति) D_6 केशव (for सर्वदा) — (L 2096) Dn Ds_2 D_6 T_4 G_2 M प्रभो (for बभौ) — (L 2097) Dn Ds_2 $M_{1\ 3}$ ब्राह्मणादयः, D_6 °णोत्तमाः (for °णोत्तराः).

COLOPHON — *Mention of the Epic* Ds_2. — *Mention of Khila* Dn Ds_2 $T_{1\ 2\ 4}$ G M. — *Adhy. name* : Dn Ds_2 M पौण्ड्रकवधः, $T_{1\ 2}$ $G_{1\ 3}$ एकलव्यपराजयः — *Adhy. no* Dn Ds_2 286; T_1 G_3 213, T_2 G_1 215; T_4 188, G_4 112; G_5 214; M_{1-3} 178, M_4 284

(L 2102) T_4 G_3 M_4 तथा (for कथां) Bom Poona eds G(ed) शृण्वंस्तथा रमन्वापि (for ^{a}) — (L 2104) D_6 T_2 $G_{1\ 4.\ 5}$ जगद्धातुर्; G_2 °त्पातुं (for °द्धेतोर्). — (L.

तयोश्च नृपयोर्विप्र केशवस्य जगत्पतेः ॥
कस्य पुत्रौ समुत्पन्नौ किंवीर्यौ किंपराक्रमौ ।
सर्वमेतद्द्विजश्रेष्ठ वक्तुमर्हसि सुव्रत ॥

वैशंपायन उवाच ।

शृणु राजन्महाबाहो कथां पापप्रणाशिनीम् ।
यथा संग्राम आसीत्तु तयोश्चक्रधरस्य च ॥
यथा च तौ समुत्पन्नौ यथाभूद्विग्रहो महान् ।
अष्टाशीतिसहस्राणि दानवानां महात्मनाम् ॥
बलान्यथ विचक्रस्य शितशूलधराणि च ।
आसन्युद्धे महाराज दानवस्य महात्मनः ॥
यदूनामन्तरं प्रेप्सुर्विचक्रो युद्धकाङ्क्षया ।
देवासुरे महायुद्धे देवानजयदम्बरे ।
तद्वधार्थं सदा यत्नमकरोच्चैव केशवः ॥

Colophon.

वैशंपायन उवाच ।

आसीत्साल्वेषु राजेन्द्र ब्रह्मदत्तो नृपोत्तमः ।
नाम्ना राजन्स भूतात्मा सर्वभूतदयापरः ॥
पञ्चयज्ञपरो नित्यं जितामित्रो जितेन्द्रियः ।
ब्रह्मविद्वेदविच्चैव सदा यज्ञपरः शिवः ॥
तस्य भार्ये महीपाल रूपौदार्यगुणान्विते ।
बभूवतुः सुसपन्ने अनपत्ये नृपोत्तम ।
स ताभ्यां मुमुदे राजा शच्या शक्र इवाम्बरे ॥
नाम्ना मित्रसहो नाम सखा चासीद्द्विजोत्तमः ।
तस्य राज्ञो महायोगी वेदवेदाङ्गपारगः ।
अनपत्यः स विप्रेन्द्रो यथा राजा बभूव ह ॥
स राजा सहितस्ताभ्यामर्चयामास शंकरम् ।
पुत्रार्थं शूलिनं शर्वं दश वर्षाण्यनन्यधीः ।
स विप्रो वैष्णवं सत्रं पुत्रार्थं समयोजयत् ॥
अर्चितस्तेन राजेन्द्र शंकरो नीललोहितः ।
आत्मानं दर्शयामास स्वप्ने राजानमब्रवीत् ।
प्रीतोऽस्मि तव भद्रं ते वरं वरय सुव्रत ॥
अथ राजा जगन्नाथमुवाचेदं स्वपन्नपि ।
पुत्रौ मम भवेतां हि तथेत्युक्त्वा वृषध्वजः ।
अन्तर्धानं गतः शंभुः स च प्रीतोऽभवन्नृपः ॥
सोऽपि मित्रसहो विद्वान्देवं केशवमव्ययम् ।
पञ्चवर्षं जगन्नाथमर्चयामास भक्तितः ॥
अर्चितस्तेन विप्रेण देवदेवो जनार्दनः ।

2105) M_3 तदा (for सदा) —(L 2107) G_2 शत्रवो मित्रता यान्ति (for ^{a}) —(L 2108) Dn Ds_2 सुतौ (for नृपौ) —(L 2109) Dn Ds_2 $T_{1\,2\,4}$ G M_3 हरेर् (for हराद्) —(L 2110) M_3 स (for सु) —(L 2111) T_2 $G_{1\,3-5}$ वीर (for विप्र) — Dn Ds_2 om (hapl) 2112^b–2116^a —(L 2113) T_4 एव (for एनद्) —(L 2117) Dn Ds_2 T_1 $G_{2,3}$ $M_{1\,2\,4}$ तरस्विनाम् (for महात्म°) —(L 2118) $G_{4\,5}$ शत- (for शित-) G_2 -धरस्य (for -धराणि) —(L 2119) $M_{1\,3}$ दुरात्मन., Cal ed जयैषिण (for महात्मन) —(L 2120) Dn D_6 $M_{2\,3}$ अन्तर-, M_1 अन्तरे (for अन्तरं) Dn Ds_2 T_1 M_1 यदूनां (for विचक्रो) —(L 2121) Dn Ds_2 M_1 देवाञ्जयति दुर्धर (for ^{b}) —(L 2122) T_2 $G_{4\,5}$ तदा (for सदा) — D_6 [ए]ष (for [ए]व)

COLOPHON — *Mention of the Epic* · Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1,2\,4}$ G M — *Adhy name* Dn Ds_2 $T_{1\,2\,4}$ G M हंसडिभकोपाख्यानम् — *Adhy no.*, Dn Ds_2 287; T_1 G_3 214; T_2 G_1 216; T_4 183; G_2 209, G_5 215, M_{1-3} 179, M_4 215

(L 2123) Dn_1 बलदत्तो (for ब्रह्म°) —(L 2124) Dn Ds_2 पूतात्मा (for भू°) —(L 2125) D_6 $M_{1\,3}$ जितामात्यो (for °मित्रो) Dn Ds_2 $T_{1\,2\,4}$ G जितात्मा विजितेन्द्रिय (for ^{b}) —(L 2126) Bom Poona eds. G(ed) यज्ञमय (for °पर) D_6 T_4 शिवे (for शिव.) —(L. 2127) M_{1-3} महाराज (for महीपाल) —(L 2128) G_2 समुत्पन्ने, Cal ed सुसंपन्ने (for °पन्ने) — G_1 om. lines 2129–2132 T_1 om (hapl) lines 2129–2130 —(L 2130) D_6 G_3 मित्रसखो (for °सहो) Cal ed महामते (for द्विजोत्तमः) —(L 2131) Dn_2 T_4 तत्परः (for -पारगः). Dn_1 D_6 T_1 $G_{2\,4\,5}$ वेदवेदान्ततत्पर (for ^{b}) —(L 2134) G_2 शत- (for दश) M_{1-3} [अ]नन्यभाक् (for °धी.) —(L. 2135) $M_{1\,3}$ समकल्पयत् (for °योजयत्). —(L. 2137) $M_{1\,3}$ दर्शयित्वा तु (for °यामास). —(L 2139) Dn Ds_2 स्वपन्निव; $T_{1,2}$ $G_{1\,3-5}$ स्वपन्निव (for स्वपन्नपि) —(L. 2140) D_6 T_4 M_{1-3} भवेयाता (for °तां हि) —(L 2141) Dn Ds_2 $M_{1\,3}$ प्रतिबुद्धस्ततो नृपः (for ^{b}) —(L. 2142)

पुत्रमेकं ददौ तस्मै स्वात्मना सदृशं हरिः ॥
ते भार्ये गर्भमाधत्तां तेजसा शंकरस्य ह ।
विप्रभार्या महाराज वैष्णवं तेज आदधात् ॥
महिष्यौ ते महावीर्यौ पुत्रौ शंकरसंमितौ ।
असूयेतां महीपाल क्रमेणैव नृपस्य ह ॥
स तयोश्च महाराज जातकर्मादिकाः क्रियाः ।
चकार विधिवत्सर्वा विप्रसाच्च महद्धनम् ॥
स च विप्रो विनीतात्मा पुत्रमेकं प्रजज्ञिवान् ।
साक्षादिव जगन्नाथं स्थितं पुत्रात्मना नृप ॥
जातकर्मादिकं सर्वं करणं स चकार ह ।
तौ कुमारावयं चैव त्रयः सवयसोऽभवन् ॥
वेदानधीत्य ते सर्वाञ्श्रुत्वा चान्वीक्षिकीं तथा ।
धनुर्वेदे तथास्त्रे च निपुणास्तेऽभवंस्तदा ॥
हंसो ज्येष्ठो नृपसुतो डिभकोऽनन्तरोऽभवत् ।
स च विप्रसुतो राजञ्जनार्दन इति स्मृतः ॥
अन्योन्यं मित्रतां याताः सर्वे चैव कुमारकाः ॥

Colophon.

वैशंपायन उवाच ।

हंसश्च डिभकश्चैव तपश्चर्तुं महामती ।
मनश्चक्रतुरात्मांशौ शंकरस्य नृपोत्तम ॥
गत्वा तु हिमवत्पार्श्वं तपश्चक्रतुरञ्जसा ।
उद्दिश्य शंकरं शर्वं नीलग्रीवमुमापतिम् ॥
वीर्यास्त्रे चैव नौ स्यातामित्याधाय तु मानसे ।
एकाग्रौ प्रयतौ भूत्वा वाय्वम्बुप्राशिनौ नृप ॥
नमस्ते देवदेवेश शंकरेति दिवानिशम् ।
हर शर्व शिवानन्द नीलग्रीव उमापते ॥
वृषध्वज विरूपाक्ष हर्यक्ष जगतां पते ।
भक्तप्रिय गिरीशेश वामदेव शिवाच्युत ॥
सद्योजात महादेव देवदेव गुहाशय ।
भूतभावन भूतेश प्रणवात्मन्सदाशिव ॥
इत्यादिनामभिर्नित्यं स्तुवन्तौ शंकरं भवम् ।
हृदि कृत्वा विरूपाक्षं तपस्तेपतुरञ्जसा ॥
निर्ममौ निरहंकारौ मौनव्रतसमाश्रितौ ।
वर्षाणीह तदा राजन्पञ्च चक्रतुरोजसा ॥

D6 एवं (for देव) — (L 2145) G2 शिव (for हरि). — (L 2147) Dn Ds2 T1 4 4 M4 आदधत् (for °धात्). — (L 2148) Dn T1 2 4 G1 3 5 M2 4 महावीर्ये (for °वीर्यौ) M1–3 ते राजभार्ये गर्भिण्यौ (for ^a) Dn Ds2 T1 3. 4 G1 2 5 M4 -निर्मितौ (for -समितौ) — (L 2149) T2 G1 असुवातां (for असूयेतां). G2 कर्मणा (for क्रमेण) — (L 2150) D6 स तयो परयो राजा, T4 स तयोः पुत्रयो राजन् (for ^a) Dn D6 T1 2 G M4 नाम- (for जात-) — (L 2151) D6 T2 4 G3 सर्वं (for सर्वा) Dn Ds2 M1 3 विप्रेभ्योऽदात्, G2 विप्रेभ्यश्च (for विप्रसाच्च) — (L 2152) G3 पुत्रो (for विप्रो) Dn Ds2 M1 3 हि लब्धवान्, M2 4 प्रलब्धवान् (for प्रजज्ञिवान्) — (L 2153) M विप्रात्मना (for पुत्रा°) — (L 2154) Dn Ds2 T1 2 4 G1. 3–5 M4 ब्राह्मण (for करण) D6 G2 अकरोद्द्विजसत्तम (for ^b) — (L 2155) G2 तत्कुमारद्वयं सोऽपि (for ^a) M1–3 क्रमेण (for त्रय स-) Cal ed त्रयः सुवपुषोऽभवन् (for ^b) — (L 2157) T4 तथास्त्रेषु, M1 3 तथा शास्त्रे (for तथास्त्रे च) — (L 2158) G1 दीपिको (for डिभको) — (L 2159) M श्रुत- (for स्मृत-) — (L 2160) D6 T4 M3 अन्योन्य- (for °यं)

Colophon — *Mention of the Epic* : Ds2. — *Mention of Khila* Dn Ds2 D6 T1 2 4 G2–5 M — *Adhy name* Dn Ds2 T1 2 4 G2–5 M हंसडिभकोपाख्यानम् — *Adhy. no* Dn 287, Ds2 288, T1 G4 215, T2 G2 217, T4 184, G4 214, G5 216, M1–3 180, M4 216

— (L 2161) D6 मही गतौ (for महामती) G(ed.) हंसश्चैव तपश्चर्तुं तथा डिम्भो महामति — (L 2162) Dn1 D6 आत्माशौ, T2 आत्मेशौ (for आत्मांशौ) — (L. 2163) G3 M1 3 गत्वा हिमवतः पार्श्वं (for ^a) Dn2 चरतुर् (for चक्र°) — (L 2165) T1 दिव्यास्त्रे (for वीर्यास्त्रे). G3 om lines 2166^b–2171^a — (L 2168) D6 G2 शिवेशान; T4 शिवेशान, M1–3 शिव शान्त (for शिवानन्द) — (L 2170) Dn2 भक्तिप्रिय (for भक्त°) D6 T2 G2 वासुदेव (for वाम°). — (L 2171) G3 गुहाच्युत (for °शय) — (L 2172) Bom Poona eds G(ed) देवेश (for भूतेश) — G3 om lines 2173–74 — (L 2173) M1 3 हरम् (for भवम्). — (L 2175) M1 3 -समन्वितौ; M2 4 -परायणौ (for -समाश्रितौ) — G2 M1–3 om line 2176 — (L 2176) D6 महाराज (for तदा राजन्) G3 ततश्च पञ्च वर्षाणि (for ^a) D6 पञ्च जग्मतुरञ्जसा (for ^b) — G3 om lines 2177–2181 — (L. 2178) G2 ताभ्यां (for नैजं) D2 गज- (for व्याघ्र-).

ततः प्रीतोऽभवच्छर्वस्ताभ्यां संयमनेन च ।
स ददौ दर्शनं नैजं व्याघ्रचर्माम्बरो हरः ।
त्रियक्षः शंकरः शर्वः शूलपाणिरुमापतिः ॥
अग्रतः संस्थितं शर्वं चन्द्रार्धकृतशेखरम् ।
तौ दृष्ट्वा प्रीतमनसौ नमश्चक्रतुरञ्जसा ॥

भगवानुवाच ।

वरं वरयतां भद्रौ यथेच्छया वां तथास्तु वै ॥
तावूचतुस्तदा राजन्प्रीतस्त्वं भगवन्यदि ।
देवासुरचमूमुख्यै रक्षोगन्धर्वदानवैः ।
आवामजेयौ सर्वात्मन्नेष नौ प्रथमो वरः ॥
द्वितीयो नौ विरूपाक्ष रौद्रास्त्राणां च संग्रहः ।
माहेश्वरं तथा रौद्रमस्त्रं ब्रह्मशिरो महत् ॥
अभेद्यं कवचं दिव्यमच्छेद्यं चापि कार्मुकम् ।
परशुं च तथा शर्व सदा रक्षार्थमेव च ॥
सहायौ द्वौ महादेव भूतो युद्धे हि गच्छतोः ।
एवमस्त्विति देवेश आह भृङ्गिरिटी हरः ॥
कुण्डोदरं विरूपाक्षं सर्वप्राणिहिते रतम् ।
युवामथ च भूतेशौ सहायौ सततं रणे ॥
संग्रामं गच्छतां घोरमेतयोर्बलशालिनोः ।
इत्युक्त्वा भगवाञ्शर्वस्तत्रैवान्तरधीयत ॥

ततस्तौ वीर्यसंपन्नौ हंसो डिभक एव च ।
कृतास्त्रौ शस्त्रसंपन्नौ चापिनौ वीर्यवत्तरौ ॥
आमुक्तकवचौ वीरावजेयौ देवदानवैः ।
अत्यन्तभक्तौ देवेशे शंकरे नीललोहिते ॥
नित्योत्सवकरौ देवे भस्मोद्धूलनशोभिनौ ।
कृतत्रिपुण्ड्रकौ नित्यं जटायुक्तशिरोधरौ ।
रुद्राक्षार्पितसर्वाङ्गौ व्याघ्रचर्माम्बरावृतौ ॥
नमः शिवाय शान्ताय महादेवाय धीमते ।
इत्यादिभिः सदा देवं स्तुवन्तौ नामभिः शिवम् ।
साक्षादिव महादेवौ रेजतुः शूलधारिणौ ॥
ततः स्वभवनं गत्वा पितुः पादावगृहताम् ।
पितुश्च सख्युर्बलिनो मातुश्च चरणौ तदा ॥
जनार्दनोऽपि धर्मात्मा कालेन महता नृप ।
विद्यापारं महाबुद्धिर्यत्नेनासावुपेयिवान् ॥
स च विष्णुं हृषीकेशं पीनकौशेयवाससम् ।
ब्रह्मतत्त्वपरो नित्यमुपास्ते विजितेन्द्रियः ॥
हंसश्च डिभकश्चैव कृतदारौ बभूवतुः ।
जनार्दनश्च धर्मात्मा कृतदारो बभूव ह ॥
सर्वे ते यज्ञपरमाः पञ्चयज्ञपरास्तथा ।
स्वदारनिरताः सर्वे गुरुशुश्रूषणे रताः ।

—(L 2179) D_6 T_2 G_2 त्र्यक्ष' स, T_4 त्र्यक्षर (for त्रियक्ष) —(L 2181) $T_{1\,2}$ $G_{2\,4}$ M_2 प्रीति- (for प्रीत-) — D_6 ईश्वर (for भगवान्) —(L 2182) $T_{1\,2}$ $G_{1\,3\,4}$ वरयतं D_6 $T_{2\,4}$ G_{1-4} भद्रं (for भद्रौ) Dn Ds_2 वरं वरय भद्रं वा (for ^{a}) T_4 G_2 यथेच्छेना, M_4 °च्छेह (for °च्छा वां) D_6 T_4 G_2 M_{1-3} वाम् (for वै) —(L 2184) D_6 -मुख्यौ (for -मुख्यैर्). M_4 यक्ष- (for रक्षो-) $M_{1\,3}$ -सत्तमै (for दानवै) —(L 2185) D_6 M_{1-3} अजय्यौ, D_6 नौ समौ (for एष नौ) —(L 2188) D_6 T_4 M_3 देव (for दिव्यम्) —(L 2189) $G_{4\,5}$ शार्वं (for शर्वं) — T_2 om (hapl) lines 2190–2123 —(L 2190) $M_{1\,3}$ युद्ध तु, M_4 युद्धस्य (for युद्धे हि) Dn Ds_2 T_1 $G_{1\,3-5}$ $M_{2\,4}$ गच्छताम् (for °तो) —(L 2191) $M_{1\,3}$ सर्वेश; $M_{2\,4}$ भूतेश (for देवेश) D_6 G_{3-5} M भृङ्गिरिटिं; T_4 °रिटं, G_1 °रिटी (for °रिटी) —(L 2192) D_6 द्वितीयो नौ (for कुण्डोदरं). D_6 T_4 G_2 $M_{1\,3}$ त्रिरूपाक्ष. (for °पाक्ष) D_6 $T_{1\,4}$ $G_{2,4}$ M_{1-3} रतः (for रतम्). —(L 2194) D_6 T_4 G_2 M_1 गच्छतोर्, T_2 $G_{1\,4\,5}$ °तं, $M_{2\,3}$ °तो (for °तां) —(L. 2194) D_6 कृतास्त्र- (for °स्त्रौ) Dn_1 Ds_2 शास्त्र-, M सत्त्व (for शस्त्र-) G_3 वीर्यवत्तमौ (for °त्तरौ) — T_4 om lines 2198–2201 —(L 2198) Dn Ds_2 T_1 G_{1-4} M_4 अजय्यौ (for अजेयौ) —(L. 2199) D_6 T_1 $G_{2\,3}$ M_4 देवेश (for °शे). —(L 2200) $M_{1\,3}$ नित्योपासकरौ (M_3 °करे) देवे (for ^{a}) D_6 भस्मोद्धूलितशोभितौ (for ^{b}) —(L 2201) T_3 कृतत्रिपुण्ड्रौ नित्य च (for ^{a}) $G_{4,5}$ -शिरोरुहौ (for °धरौ) —(L 2203) G_2 शंभवे (for धीमते) —(L 2204) Dn Ds_2 महादेवं (for सदा देवं) —(L 2205) Dn Ds_2 T_1 G_5 M_3 जल- (for शूल-) T_2 $G_{1\,3}$ -पाणिनौ (for -धारिणौ) —(L 2206) T_1 $G_{2\,3}$ अगृह्णताम्, T_2 G_1 अवन्द° (for अगृह्ण°). — D_6 om (hapl) lines 2208^b–2213^a. —(L 2209) G_3 विद्याम्पारं (for °पारं) Dn $G_{2\,3\,5}$ $M_{1\,4}$ युक्तेन, Cal. ed योगेन (for यत्नेन) T_1 यत्नेन समुपेयिवान् (for ^{b}). —(L 2210) $M_{1\,3}$ पीतवाससमच्युतम् (for ^{b}). —(L

धर्म एव परं श्रेय इति ते मेनिरे नृप ॥

Colophon.

वैशंपायन उवाच ।

ततः कदाचित्तौ वीरौ मृगयां चक्रतुः किल ।
जनार्दनेन सहितौ रथैरश्वैर्गजैरपि ॥
वनं गत्वा तु तौ वीरौ सिंहव्याघ्रांश्च जघ्नतुः ।
शितैर्बाणैर्महाराज वराहानथ सर्वशः ।
व्यालानन्यान्मृगान्हिंस्राञ्श्वभिश्च सहितौ नृप ॥
एष आयाति विपुलो वराहो दीर्घलोचनः ।
एनं बाणेन संछिन्धि याति चायं मृगाधिपः ।
अयमन्योऽथ महिषः शृङ्गप्रोतसरीसृपः ॥
एते खलु मृगाः सार्धं शावैर्धावन्ति सर्वतः ।
एतद्भ्रमति सर्वत्र भीतं शशकुलं महत् ॥
शावैस्तदन्वयैः सार्धं न हन्तव्यमिदं शुभम् ।
ग्रहीतव्यमिदं सर्वं निरुध्य श्वगणैरिह ॥
इत्यादिशब्दः सुमहान्मृगयां कुर्वतां नृप ।
क्षत्रियाणां नृपश्रेष्ठ व्याधानां चैव धावताम् ॥
हत्वा मृगान्सुबहुशो व्याघ्रान्सिंहान्नृपोत्तमौ ।
श्रमं च जग्मतुर्वीरौ मध्यं गच्छति भास्करे ॥
अलं हि मृगयास्माकं श्रमः समुपजायते ।
इत्यूचतुर्महाराज पुष्करं जग्मतुः सरः ॥
सरःसमीपमागम्य मुनिसिद्धनिषेवितम् ।
वीजन्मारुतसानूपं श्रमात्तत्र सुखं स्थितौ ॥
ततो जनाः सरः सर्वे विगाह्य श्रमकर्शिताः ।
बिसान्प्रवालान्पद्मानां भक्षयामासुरार्तवत् ॥
जनार्दनेन सहितौ हंसो डिभक एव च ।
सरः कंचित्समाश्रित्य श्रमं संत्यज्य तिष्ठतः ॥
विश्रम्य सरसस्तीरे तदासाते सुखं नृपौ ।
अशृण्वतां परं ब्रह्म मुनिमुख्यैः समीरितम् ।
माध्यंदिनं तथा सर्वैः सवनं सस्वरं नृपौ ॥
ततः प्रीतौ नृपौ भूत्वा श्रुत्वा वेदध्वनिं तदा ।
ऐच्छेतां तौ तदा द्रष्टुं यज्ञं मुनिकृतं तदा ॥
स्थापयित्वा ततः सेनां सर्वां मृगसमन्विताम् ।
आदाय च महाचापे शरान्कतिचिदेव च ॥
जनार्दनस्तदा वीरो हंसो डिभक एव च ।
पदातिनौ महाराज जग्मतुश्चाश्रमं किल ॥

2211) G2 नियतेन्द्रिय. ; M सयते° (for विजिते°). — (L 2213) Dn Ds2 T1 G2. 3 5 ऽपि (for च). (L 2214) Dn Ds2 -निरता· (for परमा) D6 M1-3 पाक- (for पद्म-) G2 -परायणा. ; M4 रतास्तथा (for -परास्तथा) — (L 2216) M3 ज्ञेय (for श्रेय) G4 नृपा·

COLOPHON — *Mention of the Epic* Ds2 — *Mention of Khila* Dn Ds2 D6 T1 2 4 G M — *Adhy name* Dn Ds2 G4 हसडिभकोपाख्यानम् , T1 G3 हंसडिबकोपाख्याने वरप्राप्ति· , T2 G1 हंसडिबकवरप्राप्ति· , M4 हंसडिभकस् — *Adhy no* Dn 288 , Ds2 289 , T1 G3 216 , T2 G1 218 , T4 185 ; G2 211 , G4 215 , G5 217 , M1-3 181 , M4 217

T2 om the ref —(L 2217) Dn2 Ds2 T1 2 G1 3 4 अटतु· ; Dn1 अटत. , D6 G3 जग्मतु· (for चक्रतु) G2 तदा (for किल) — (L 2218) Poona ed अश्व- (for अश्वैर्) — (L 2219) M1 सिंहान् (for सिंह-) — (L 2220) M1 शरैर् (for शितैर्) D6 T4 G2 च सहस्रश (for [अ]थ सर्वश) —(L 2221) D6 सिंहान् (for हिंस्रान्) — (L 2222) T1 2 G1 3 4 M पृथुलो , G2 वेगेन (for विपुलो) G2 विपुलो (for वराहो). —(L 2223) D6 G2 पार्श्वतो ; T4 यात्यतो ; M1 3 चान्यतो , M4 अन्यतो (for याति च) —(L 2224) D6 शृङ्गेतर- (for °प्रोत-) — (L 2225) Ds2 बाधन्ति (for धावन्ति) Dn Ds2 T1 G3 4 M3 4 सर्वश (for °त) — (L 2227) T1 2 स्तनंधयै (for तदन्वयै) Bom Poona eds G(ed) शावं स्तनं पिबत्साधु (for ᵃ) — (L 2229) T1 2 G2 3 कुर्वतो , T4 °ते (for °तां) G4 5 सदा (for नृप) — (L 2231) G2 G3 सर्वान् (for सिंहान्) — (L 2232) M1 गच्छतुर् (for जग्मतुर्) Dn Ds2 G5 मध्यं याते दिवाकरे (for ᵇ) —(L 2236) T1 व्रजन् ; G2 कूजन् (for वीजन्) M1 3 -सवीतं (for -सानूपं) —(L 2238) D6 सर्वान् (for बिसान्) D6 M पद्मांश्च (for पद्मानां). Dn3 विश्रम्य सरसस्तीरे (for ᵃ). —(L 2239) — For line 2240, D6 T4 G2 subst ·

19** विगाह्य· तत्सर स्वादु शीतं पीत्वा जल च तौ ।

—(L 2241) D6 T4 G2 समाश्रित्य सरस्तीरे (for ᵃ). D6 T4 G2 नृपोत्तमौ (for सुखं नृपौ) —(L 2243) D6 मध्यदिने (for माध्यंदिनं) — (L 2244) D6 तत प्रीतो महाबाहु. (for ᵃ) —(L 2246) D6 T1 4 G2 3 M2 सर्वां सेनां (by transp) Dn1 -समन्वितौ (for °ताम्) —(L·

नित्ययुक्तं विरूपाक्षं भूताधारमनामयम् ।
ध्यायन्तं सर्वदा देवं मनसा सर्वतोमुखम् ॥
दुर्वाससं सदोपास्यं वेदान्तैकरसं गुरुम् ।
तर्कनिश्चिततत्त्वार्थज्ञाननिर्मलचेतसः ॥
हंसाः परमहंसाश्च शिष्या दुर्वाससः प्रभो ।
गत्वा तत्र महात्मानौ दृष्ट्वा तानूर्ध्वरेतसः ॥
दुर्वाससं महाबुद्धिं विचिन्वानं परं पदम् ।
क्रुद्धो यदि स दुर्वासा दग्धुं लोकानिमान्क्षमः ॥
देवा अपि च यं द्रष्टुं क्रुद्धं चेन्न क्षमाः सदा ।
रोषमूर्तिः सदा यस्तु विश्वात्मा विश्वरूपधृक् ॥
रक्तकौपीनवसनो हंसः परम एव च ।
दृष्ट्वैनं च तयोरेवं बुद्धिरासीन्महामते ॥
को नामासौ महाभूतः काषायी वर्णवित्तमः ।
कश्चायमाश्रमो नाम विहाय च गृहाश्रमम् ॥
गृहस्थ एव धर्मात्मा गृहस्थो धर्मवित्तमः ।
गृहस्थो धर्मरूपस्तु गृहस्थः स्वर्ग एव च ॥
गृहस्थश्च सदा माता प्राणिनां जीवनं सदा ।
तं विनान्येन रूपेण वर्तते यो हि मूर्खवत् ॥
उन्मत्तोऽयं विरूपोऽयमथ वा मूर्ख एव च ।
ध्यायन्निव सदा चायमास्ते वञ्चयितापि वा ॥
किमेते प्राकृतज्ञाना ध्यायन्त इव किंचन ।
वयमेतान्दुरारोहानाश्रमान्तरकल्पितान् ॥
स्थापयिष्यामहे सर्वान्मन्दबुद्धीनिमान्गृहे ।
बलादेव द्विजानेतान्मूढविज्ञानतत्परान् ।
असद्ग्राहगृहीतांश्च बालिशान्दुर्मतीनिमान् ॥
एषां शास्ता च को मूढो न विद्मो वयमत्र ह ।
धर्म्ये वर्त्मनि संस्थाप्य पुनर्यास्याव निर्वृतौ ॥
इति संचिन्त्य तौ वीरौ विप्रेण सहितौ नृप ।
जनार्दनेन राजानौ मोहाद्भाग्यक्षयान्नृप ॥
समीपं तस्य राजेन्द्र यतेः संशितचेतसः ।
गत्वा च प्रोचतुरुभौ दुर्वाससमतीन्द्रियम् ।
यतींश्च नियतान्क्रुद्धौ राजानौ राजसत्तम ॥

Colophon.

शिवम्) — (L. 2278) Dn Ds2 D6 T4 शुभं, T1 2 G विभुं (for शिवं) — T1. 2 G1 3-5 om. (hapl) lines 2279-2281. — (L 2279) D6 विभुम् (for शिवम्) — (L. 2280) D6 T4 M1-3 विभुं बभ्रुं (for विरूपाक्षं) — (L 2281) Dn2 D6 M1-3 ध्यायन्तः (for °न्तं) M1 3 अनन्तं (for मनसा) — (L 2282) Dn Ds2 T1 2 G M4 दुर्वाससा (for °ससं) Dn2 -परं (for -रसं) — (L 2283) Cal.- सुवि- (for -ज्ञान-). — G4 om lines 2284-2285 G5 om line 2284 —(L 2285) T1 G3 M4 रेतसम् (for °सः). Dn Ds2 G1 5 तौ दृष्ट्वा तूर्ध्वरेतसम् (for ^{b}) — (L. 2288) Dn Ds2 T1 G1-3 वै (for चेन्) — (L 2289) D6 T4 G2 लोक- (for रोष-) Dn Ds2 T1 रुद्रात्मा (for विश्वात्मा) — (L 2291) D6 एकं, T4 देवं (for एवं) — (L 2292) G2 स, M1 2 4 [अ]य (for [अ]सौ) — (L 2295) Dn Ds2 T1 2 4 G1 3 5 वर्णं, G4 धर्मं (for स्वर्ग). Ds2 सः, M2 4 हि (for च). — (L 2296) M1 3 जीवदः (for °नं) G4 धनम् (for सदा) — (L 2297) G5 तेन (for [अ]न्येन). —(L 2299) T4 यदा, G5 सदा (for [अ]पि वा) — (L 2301) Dn Ds2 T4 G2 M -कल्पकान्; G3 -कर्शितान् (for -कल्पितान्) —(L 2303) G3 विद्वानेतद् (for बलादेव). — (L 2304) D6 T4 G2 असद्गृहीतास्तु सदा (for ^{a}) D6 बालस्कन्दमतीनिमान्, T4 G2 M1-3 बालान्मन्दमतीनिमान् (for ^{b}) —(L 2305) G2 मूर्खौ (for मूढो) Dn1 विप्रो (for विद्मो) — (L. 2306) Dn धर्मं-; Ds2 T1 G4 5 M1 4 धर्मे (for धर्म्ये) D6 G2 धर्मे ह्येतान्समास्थाप्य (for ^{a}) D3 T2 4 M1 2 4 यास्याम (for °व) D6 T2 4 G2 M1 3 4 निर्वृता (for °तौ) — (L 2309) Dn Ds2 T1 G1. 4 5 संयत- (for संशित-) — (L 2310) D6 गत्वा विप्रौ चतुर्भद्रौ, T4 गत्वा च भ्रूचतुर्भद्रौ (sic); G2 गत्वा प्रोचुतुरेवाग्रे (for ^{a}) —(L 2311) D6 G4 -सत्तमाः, T2 °मौ (for °म).

Colophon —*Mention of the Epic* Ds2 — *Mention of Khila* Dn Ds2 D6 T1 2 4 G M — *Sub-parvan* T3 भाविष्यपर्व — *Adhy name* Dn Ds2 T2 हंसडिभकोपाख्यानम्; T1 G2 मुनिसंदर्शनम्; T4 M2 4 हंसडिभकम्; G1 हंसडिभकोपाख्याने मुनिसंदर्शनम् — *Adhy. no* Dn Ds2 291; T1 G3 218, T2 107; T4 170, G1 220, G2 213, G4 217, G5 M4 219, M1-3 103.

Before the ref, T1. 4 G2-4 ins also वैशंपायनः G1 om. lines 2312-2351 G2 reads line 2312 twice —(L 2312) T1 ज्ञानलेश-. D6 M1. 2 विनीतात्मन् (for विहीना°).

हंसडिभकावूचतुः ।
ज्ञानलेशाद्विहीनात्मन्कि ते व्यवसितं द्विज ।
कश्चायमाश्रमो विप्र भवता यः समाश्रितः ॥
गृहमेधं परित्यज्य किं त्वया साधितं पदम् ।
दम्भ एव भवान्व्यक्त शङ्के नान्यत्र कारणम् ॥
लोकांश्चेमान्सदा मूढ नाशयिष्यसि निर्वृतः ।
एतान्सर्वान्विनेतासि नरके पातयिष्यसि ॥
स्वयं नष्टः परान्मूर्ख नाशयिष्यसि यत्नतः ।
अहो शास्ता कथं नास्ति तव मन्दमते द्विज ॥
सर्वथा त्वद्विनेता च पापं नास्त्यत्र संशयः ।
त्यक्त्वेममाश्रमं विप्र गृही भव यतात्मवान् ॥
पञ्च यज्ञान्सदा विप्र कुरु यत्नपरो भव ।
ततः स्वर्गं परं गन्ता स्वर्गे हि सुमहत्सुखम् ।
एष श्रेयःपथो विप्र जीविते चेत्स्पृहा तव ॥
इत्युक्तवन्तौ धर्मात्मा श्रुत्वा विप्रो जनार्दनः ।
उवाच च यतिं दृष्ट्वा प्रणम्यासौ सुभीतवत् ॥
मा ब्रूतामीदृशं वाक्यं राजानौ मन्दचेतसौ ।
अश्राव्यमीदृशं घोरं लोकयोरुभयोरपि ॥
को वक्तुमीशो मन्दात्मा यदि जीवेत्सबान्धवः ।
सर्वथा काल एवायं युवयोर्मन्दचेतसोः ।
समाप्त आयुषः शेषो ब्रह्मदण्डहतौ युवाम् ॥
एते हि यतयः शुद्धा ज्ञानदीपितचेतसः ।
ज्ञानाग्निदग्धकर्माणः प्राणान्प्राणेषु जुह्वति ॥
ऋते वामीदृशं वाक्यं कः समर्थो ह्यनुब्रुवन् ।
सर्वथा ज्ञातमस्माभिः समाप्तमिह जीवितम् ॥
चत्वार आश्रमाः पूर्वमृषिभिर्विहिता नृपौ ।
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ॥
तेषामग्र्यश्चतुर्थोऽयमाश्रमो भिक्षुकः स्मृतः ।
आस्ते तस्मिन्महाबुद्धिः स हि पुण्यतमः स्मृतः ॥
नोपासिता भवद्भ्यां च वृद्धाः सम्यग्विनीतवत् ।
ज्ञानं नाप्तं ततस्तेभ्यस्तथा चैवं वदेत कः ॥
अश्राव्यमीदृशं घोरं मया प्राणभृता नृप ।
किं करिष्यामि मन्दात्मन्मित्रत्वाद्भवतोर्नृपौ ॥
ज्ञानं यदाप्तं भवता गुरुभ्य-
स्तदत्र दुःखाय हि केवलं नः ।
ज्ञानं हि धर्मप्रभवं यथेष्टं
बलाद्धि पापस्य विधातृरूपम् ॥
युवां विहाय यास्ये वा पतेयं वा शिलातले ।

G_2 (first time) किमर्थं च विजानीत (for ^{a}) D_6 नृप (for द्विज) — (L 2314) M गृहाश्रमं (for गृहमेधं) M_{1-3} वद , M_4 धनम् (for पदम्) — (L. 2315) G_5 हंस (for दम्भ) D_6 तवास्युक्तं (for भवान्व्यक्तं) — (L 2316) G_2 मूर्खं (for मूढ) D_6 T_4 G_2 सुव्रत (for निर्वृत.) — (L 2319) T_4 $M_{1\ 3}$ मन्दमतेर् (for °मते) — (L 2320) D_6 G_2 M_{1-3} विनेतारौ ; T_4 °तारो (for °ता च) D_6 G_2 M_{1-3} भावां , Bom Poona eds पापो (for पापं) — (L 2323) D_6 कथं , M भवान् (for परं) Dn D_{s2} $G_{2\ 3}$ गत्वा (for गन्ता) — (L 2324) T_1 एवं (for एष) D_6 तथा , T_3 पथं ; Cal ed परो (for पथो) — G_3 om line 2326. — (L 2326) M_{2-4} स भीतवत् , Bom Poona eds. G(ed.) सुनी° (for सुभी°) — (L 2327) T_4 M_4 ब्रूत (for ब्रूताम्). $M_{1,\ 3}$ वाचं (for वाक्यं) T_2 -चेतनौ ; Bom Poona eds. G(ed.) -तेजसौ (for -चेतसौ). — (L 2329) T_2 वस्तुम् (for वक्तुम्) D_6 $M_{1,\ 2,\ 4}$ को वक्तुमीदृशो मन्दो (for ^{a}). D_6 T_4 M_3 जीवन् (for जीवेत्) — (L 2331) D_6 ब्रह्मदण्डहतो भवान् ; G_2 °ण्डहतात्मवान् , G_3 °ण्डायुधो हतम् ; M_{1-3} °ण्डहतस्य वाम् ; M_4 °ण्डहतस्य व (for ^{b}) — G_3 om line 2332. — (L. 2332) $M_{1\ 3}$ ज्ञाननिर्धूतकल्मषा, (for ^{b}) — (L. 2334) D_6 T_4 G_2 नरेश्वर , T_2 G_{3-5} मम ब्रुवन् ; M मनुब्रुवः (for ह्यनुब्रुवन्) — (L 2336) G_5 प्रोक्ता (for पूर्वम्). $T_{1\ 2}$ $G_{2\ 3}$ नृप (for नृपौ) D_6 ऋषिभिर्विजिता नृप , T_4 °भिर्विह्वला नृप , G_1 °भिर्वेदपारगै , M_{1-3} °भि कल्पिता नृप (for ^{b}) — (L 2339) $G_{2,\ 5}$ पुण्यतरः (for °तम). G_4 स हि पुण्यसमावृत (for ^{b}) — (L 2340) D_6 $T_{1,\ 2,\ 4}$ $G_{2\ 5}$ $M_{1\ 3}$ उपासिता, $M_{2\ 4}$ उपास्याश्च (for नोपासिता). — (L 2341) D_6 $T_{1\ 2}$ G_2 M_{1-3} चाप्तं (for नाप्तं) — D_{n1} om (hapl) lines 2341–2343 — (L. 2341) D_{n2} $T_{3\ 4}$ $G_{2,\ 5}$ M_4 तपस्विभ्यस् (for ततस्तेभ्यस्) — (L. 2342) D_6 T_1 प्राणभृतां (for °भृता) — (L 2343) D_6 $T_{3,\ 4}$ M_{1-3} मन्दात्मा (for मन्दात्मन्) M_4 मित्रार्था (for मित्रत्वाद्) D_{n2} D_{s2} T_1 $M_{1\ 4}$ भवतो नृप (for °तोर्नृपौ) — (L. 2344) $T_{2\ 4}$ $G_{4,\ 5}$ $M_{1\ 3}$ भवतो (for °ता). — (L. 2345) Dn D_{s2} M_4 केवलं नृप , T_1 °लं वहेः ; T_2 °लाद्भः , G_2 °लाय (for °लं नः) — (L 2346) T_1 -प्रवरं (for -प्रभव) ;

पिबेयं वा विषं घोरं पतेयं वा महोर्मिषु ॥
आत्मानं वात्र संत्यक्ष्ये शृण्वतां पश्यतां नृपौ ।
इत्युक्त्वा विललापैवं मा ब्रूतेति सदा वदन् ॥

Colophon

वैशंपायन उवाच ।

ततः क्रुद्धोऽथ दुर्वासा धक्ष्यन्निव तयोरसून् ।
एकेनाक्ष्णाथ दुर्वासा रौद्रेणाग्नियुजा सदा ॥
पश्यंस्तौ च दुरात्मानौ रोषव्याकुलितेन्द्रियः ।
कुर्वन्निव तदा लोकान्भस्मभूतानिमान्नृप ॥
ब्राह्मणं चक्षुषा पश्यन्सौम्येनान्येन केवलम् ।
उवाच वचनं राजन्ध्वंसत ध्वंसतेति ह ॥
इतो गच्छत राजानौ किं विलम्बथ माचिरम् ।
न वां वचनसंभूतं रोषं धारयितुं क्षमः ॥
अन्यथा वो महीपालान्सर्वान्दग्धुमहं क्षमः ।
किमतः साहसं वक्तुं कश्च शक्नोति मत्पुरः ॥
दर्पं वां लोकविख्यातः शङ्खचक्रगदाधरः ।
व्यपनेष्यति मन्दज्ञौ किं वा वक्ष्यामि सांप्रतम् ॥
तत उत्थाय धर्मात्मा गन्तुमैच्छद्यतीश्वरः ।
ततो निषेद्धुं हंसस्तं यतते स यतीश्वरम् ॥
तस्य बाहुं समादाय हंसो नृपवरोत्तमः ।
कौपीनं चिच्छिदे क्रूरः कृतान्त इव सत्तम ॥
यतयोऽन्ये पलायन्ति दिशो दश विचेतसः ॥
कष्टं हेति वदन्विप्रो मित्रभावाज्जनार्दनः ।
न्यवारयद्यथाशक्ति किमिदं साहसं त्विति ॥
दुर्वासाः सत्यधर्मस्तु हन्तुमीशोऽपि तं ततः ।
मन्दं मन्दमुवाचेदं हंसं डिभकमेव च ॥
शापेनाहं समर्थोऽपि हन्तुं राजकुलाधमौ ।
तथापि न करोम्येवं यतयो ह्यत्र ते वयम् ॥
यो हि देवो जगन्नाथः केशवो यादवेश्वरः ।
शङ्खचक्रगदापाणिर्गर्वं वां व्यपनेष्यति ॥
लोके तस्मिन्यदुश्रेष्ठे रक्षत्येव जगत्पतौ ।
युवयोः सर्वथा जीवः सुजीव इति मे मतिः ॥
जरासंधोऽपि वां बन्धुः स च वक्तुं न चेच्छति ।
ईदृशं लोकविद्विष्टं स हि धर्मपथे सदा ॥

M8 यदिष्टं (for यथेष्टं) — (L 2347) D6 T4 G2–4 M1–3 कालस्य (for पापस्य) T1 2 G3 5 M1 4 -पापम् (for -रूपम्) — (L 2348) D6 यास्यावो, T3 यास्येऽहं (for यास्ये वा) Ds2 शिलातलम् (for °तले) — (L. 2350) Dn Ds2 G2 पुन., T1 4 G4 पुर, G3 पुरा, G5 तदा (for नृपौ) — (L 2351) D6 ब्रुवन् (for वदन्) Dn Ds2 T2 G3–5 मा ब्रूतमिति तौ (G4 तं) वदन्; T1 तूष्णीमास जनार्दन (for ᵇ)

COLOPHON — *Mention of the Epic* : Ds2 — *Mention of Khila* Dn Ds2 D6 T1 2 4 G2–5 M — *Adhy. name* : Dn Ds2 T1, 2 G4 हंसडिभकोपाख्यनस्, D6 M हंसडिभकम् — *Adhy. no* Dn2 291; Ds2 292, T1 219; T2 221, T4 181, G2 214; G3 219; G4 218, G5 220, M1–3 184, M4 204

(L 2353) D6 M1–2 स (for [अ]थ) M रौद्रेणारुणवर्चसा (for ᵇ). — (L 2355) D6 M1 2 भस्मीभूतान् (for भस्म°) — (L 2356) D6 T4 G2 सदा सौम्येन केवलम् (for (for ᵇ) — (L 2358) Ds2 ततो (for इतो) Dn1 Ds2 M2, 3 विलम्बत (for °थ) — (L 2359) M भवद्वचनसंभूतं (for ᵃ). Dn Ds2 G3 क्षमे, T2 G4 5 M4 क्षमम् (for क्षम) — (L 2361) G3 शक्तो हि (for शक्नोति) — (L 2363) D6 T4 M मन्दात्मन् (for मन्दज्ञौ) D6 वां, T1 4 M वो (for वा) — D6 om lines 2364–2366 — (L 2364) G2 मन्दात्मा (for धर्मात्मा) G2 यतीश्वरम् (for °श्वर) — (L 2366) M1 बाह्वो, M3 बाहो (for बाहुं) M1 2 -वरोत्तम (for °म) T2 हसो वरनृपोत्तम (for ᵇ) — (L 2367) T4 G2 4 सत्तम — (L 2371) D6 M3 4 सत्यसंधस् (for °धर्मस्) G2 न तं जनम्, G3 ऽपि सत्तम; M1–3 न तत्कृतम् (for ऽपि तं तत) — (L 2372) D6 हंसो (for हंसं). — (L 2373) D6 M1 ऽस्मि (for ऽपि). — (L 2374) Dn Ds2 T1 G2 3 5 [अ]न्त, T4 M1, 2 4 [ए]तद् (for [ए]वं). M3 तथापि तत्क्षमे राजन् (for ᵃ). — (L. 2376) D6 T4 M दर्पं (for गर्वं). D6 M1–3 वो; Cal. ed ते (for वां) — (L 2377) T2 4 G1 2 4 5 M1–3 लोकं (for लोके) D6 यदुश्रेष्ठो; T2 G1 नृपश्रेष्ठ, G4 5 नृपश्रेष्ठे; M4 यदुश्रेष्ठं (for °श्रेष्ठे) D6 जगत्यसौ (for °त्पतौ). — (L 2378) G1 सज्जीव (for सुजीव) M3 इति मे निश्चिता मति. (for ᵇ) — (L 2379) T1 om (hapl) 2379ᵇ–2381ᵃ D6 T4 G2 M1–3 स च नेच्छ(D6 °ष्य)ति केवलम् (for ᵇ) — G2 om lines 2380–2384 T2 G1 3 om. line 2380 — (L 2380) D6 G4 5 धर्म- (for लोक-). D6 T4 धर्मरत, G4 5 M धर्मपथः (for °पथे). — (L. 2381) Dn Ds2 T1, 2, 4 G1, 3 न हि, G4, 5 स हि (for न स),

एतावता स वां बन्धुर्न स भूयो भविष्यति ।
विद्वेषो ह्यस्तु वां तस्य मागधस्य महीपतेः ॥
श्रुत्वेदं घोररूपं तु स हि बन्धुः सहेत चेत् ।
धर्मनाशो भवेत्तस्य नात्र कार्या विचारणा ॥
इत्युक्त्वा गच्छ गच्छेति हंसं प्राह पुनः पुनः ।
जनार्दनमुवाचेदं दुर्वासा यतिसत्तमः ॥
स्वस्त्यस्तु तव विप्रेन्द्र भक्तिरस्तु जनार्दने ।
संगतिस्तव तस्यास्तु शङ्खचक्रगदाभृतः ।
अद्य श्वो वा परश्वो वा साधुरेव सदा भवान् ॥
न हि साधोर्विनाशोऽस्ति लोकयोरुभयोरपि ।
गच्छ सर्वं पितुर्ब्रूहि ज्ञात्वा वृत्तं यथाखिलम् ॥

Colophon.

वैशंपायन उवाच ।

ततस्तौ हंसडिभकौ क्रुद्धौ कालेन चोदितौ ।
शिक्यं कमण्डलुं चैव विदलं दारुमेव च ॥
दण्डान्पात्रविशेषांश्च छित्त्वा भित्त्वा च सर्वशः ।
तस्मिन्देशे महाराज न्याधैर्मांसान्यदीदहन् ।
भक्षयित्वा ततो देशात्स्वपुरं तौ प्रजग्मतुः ॥
जनार्दनश्च धर्मात्मा स्नेहादनुययौ तयोः ।
नष्टाविमाविति तदा स मेने दुःखितः परम् ॥
गतेषु तेषु सर्वेषु दुर्वासा यतिसत्तमः ।
पलायनपरान्सर्वानिदमाह यतीश्वरान् ॥
इतो देशाद्विनिर्गत्य पुष्करात्पुण्यसंयुतात् ।
मन्दं मन्दं समाश्वस्य विश्रम्य च ततस्ततः ।
प्रविश्य द्वारकां देवं शङ्खचक्रगदाधरम् ।
दृष्ट्वा च तस्मै प्रभवे वक्ष्यामो यतिसत्तमाः ॥
स हि रक्षञ्जगदिदं धर्मवर्त्मनि संस्थितः ।
आद्यो लोकगुरुर्विष्णुर्यतात्मा तत्त्वविद्प्रियः ।
उद्धृत्य कण्टकान्सर्वाञ्शशास पृथिवीमिमाम् ॥
स च पापान्महाघोरान्सर्वान्पापकृतान्प्रभुः ।
रक्षेन्नः सकलान्सर्वाञ्ज्ञानेषु नियतात्मनः ।
इदमद्य क्षमं विप्रा यानमद्य विधीयताम् ॥
साहसं यत्कृतं ताभ्यां पात्रभेदादि सत्तमाः ।
एतत्सर्वमशेषेण दर्शयाम जनार्दनम् ॥
तथेति ते प्रतिज्ञाय यतयो ज्ञानचक्षुषः ।
छिन्नांस्ताभ्यां समादाय शिक्यं दारुमयं तथा ॥
द्विदलं कर्पटं चैव कौपीनमथ वल्कलम् ।
कमण्डलुं तथा राजन्नर्धप्रोतकपालकम् ।

— (L 2383) D6 T4 M1 3 सहेद्यदि, M2. 4 भवेद्यदि (for सहेत चेत्). — (L 2385) D6 हंसं प्राहुर्मुनीश्वरा (for ᵇ) — (2391) Dn1 Ds2 सर्वें (for सर्वं) D6 T3 G1 ब्रूया (for ब्रूहि) D6 T4 M ज्ञानमस्तु तवाखिलम् (for ᵇ)

Colophon. — *Mention of the Epic* Ds2 — *Mention of Khila* Dn Ds2 T1 2 4 G M — *Adhy. name* Dn Ds2 हंसडिभकोपाख्यानम्, T1. 2 G1 3 हंसडिभकदुर्वासदर्शनम्, M हंसडिभकम्. — *Adhy no* Dn 292; Ds2 293, T1 G3 220, T2 G1 222; T4 189, G2 215; G4 219; G5 M4 221; M1–3 185

(L 2393) Dn Ds2 T1 2 G1 3–5 द्विदलं, G2 वल्कलं (for विदलं) T1 2 G1 3–5 तरुम्, T4 धाम (for दारुम्) — (L 2395) D6 T4 G2 M1–3 मांसम् (for मांसानि). — (L 2396) Dn Ds2 G4 स्वपुरीं (for °रं) — (L 2397) G2 ताभ्याम् (for स्नेहाद्) — (L. 2398) D6 दुःखितं — (L 2399) G1 3 दुःखितो (for दुर्वासा) M2 4 मुनि- (for यति-) — (L 2400) T1 G1. 1 प्राह (for आह). — (L. 2401) G2 इदमाह (for इतो देशाद्). T2 G1 -संचयात् (for -संयुतात्) T1 G3 M1 पुष्करान्पुण्यसंयुतान् (for ᵇ). — (L 2402) D6 T2 समाश्वास्य (for °श्वस्य) G4 5 विश्वस्य (for विश्रम्य) G5 स्थित (for ततः) — (L 2405) Ds2 T2–4 M2 धर्मे, M3 धर्म्ये (for धर्म-) — (L. 2406) G2 आर्यो (for आद्यो) D6 G2 साक्षात् (for विष्णुर्) D6 T2. 4 G1–3 M स्वस्थात्मा (for यतात्मा) D6 M स्वस्थवित्; T4 सर्व° (for तत्त्व°) — (L 2407) T1 दुष्टकान् (for कण्टकान्). — (L. 2408) D6 M1–3 महाघोराद् (for °रान्). D6 अस्माद्द्य; M1–3 अस्मात्क्षत्र-, Cal ed पापकर्म- (for सर्वान्पाप-) D6 T4 G2 बहु (for प्रभु) — (L 2409) T2 G1 3 सत्यवान् (for सकलान्) G2 लोकान् (for सर्वाञ्) G2 एष निश्चितमात्मनः, G3 ज्ञानेषु नियतात्मवान् (for ᵇ) — (L. 2410) G1 क्षणं (for क्षमं) D6 T4 G2 यन्मयात्र, T1 M यानमत्र; T3 G1 3 यात्रामत्र (for यानमद्य) — (L 2411) M1–3 वस्त्र-, M4 वस्तु- (for पात्र-). — (L. 2412) D6 G2 जनार्दने. — (L 2414) T3 G2 4 5 छिन्नं, G1 भिन्नं, M4 भिन्नांस् (for छिन्नांस्) M1–3 महाराज (for समादाय) — (L. 2415) Ds M1 3 विदलं (for द्विदलं). — (L. 2417) D6

एतानन्यान्समादाय द्रष्टुं केशवमाययुः ॥
पञ्च चैव सहस्राणि पुरस्कृत्य महामुनिम् ।
दुर्वाससं तपोयोनिमीश्वरस्यात्मसंभवम् ॥
अहोरात्रेण ते सर्वे द्वारकां कृष्णपालिताम् ।
ययुर्दान्ता महात्मानो लोमशाः केशवर्जिताः ॥
प्रातः प्रविश्य राजेन्द्र वापिकायां यतीश्वराः ।
स्नात्वोपस्पृश्य शुचयो यत्नेन महता तदा ॥
द्रष्टुमभ्युद्यता विष्णुं कण्टकोद्धूतितत्परम् ।
एकरूपं समास्थाय सुधर्माद्वारमाययुः ॥

Colophon

वैशंपायन उवाच ।

अथ सर्वेश्वरो विष्णुः पद्मकिञ्जल्कलोचनः ।
श्यामः पीताम्बरः श्रीमान्प्रलम्बाम्बरभूषणः ॥
किरीटी श्रीपतिः कृष्णो नीलकुञ्चितमूर्धजः ।
अव्यक्तः शाश्वतो देवः सकलो निष्कलः शिवः ॥
क्रीडाविहारोपगतः कदाचिद्भवद्धरिः ।
कुमारैरपरैः सार्धं सात्यकिप्रमुखैर्नृप ॥
गोलक्रीडां सुधर्मायां मध्ये यादवसत्तमः ।
चकार प्रियकृत्कृष्णो युयुधानेन केशवः ॥
ममायं प्रथमो गोलस्तव पश्चाद्भविष्यति ।
इति ब्रुवंस्तदा विष्णुः सात्यकिं कमलेक्षणः ॥
पार्श्वस्था यादवास्तस्य वसुदेवपुरोगमाः ।
उद्धवप्रमुखा राजन्नासेदुः कचिदत्र वै ॥
अन्यव्यापाररहितो भूतात्मा भूतभावनः ।
विजहार यथा रामः सुग्रीवेण पुरा नृप ॥
मध्यंदिने महाविष्णुः शैनेयेन सहाच्युतः ।
विक्रीड्य सुचिरं कृष्ण उपारंसीत्सयादवः ॥
द्वाःस्थेन वारिताः पूर्वं द्वार्येव च समास्थिताः ।
इदमन्तरमित्येव विविशुस्तां सभां नृप ॥
यतयो दीर्घतपसः पुरस्कृत्य तपोधनम् ।
दुर्वाससं सुमनसो ददृशुर्यादवेश्वरम् ॥
गोलक्रीडासमायुक्तं करसंस्थितगोलकम् ।
विक्षिपन्तं जगन्नाथं पादाङ्गुष्ठेन गोलकम् ॥
पद्मपत्रविशालाक्षं वीक्षन्तं सात्यकिं हरिम् ।
एकेनाक्ष्णा ह्लादयन्तं परेणालोक्य गोलकम् ॥
यतयश्च महाराज प्रत्यदृश्यन्त तत्पुरः ।
वृष्णयः पुण्डरीकाक्षः सात्यकिर्बलभद्रकः ।
वसुदेवस्तथाक्रूर उग्रसेनस्तथा नृपः ॥
अन्ये च यादवाः सर्वे सम्भ्रमं प्रतिपेदिरे ।
इदं किमिदमित्येवं व्यासक्तमनसोऽभवन् ॥
पृष्ठतोऽप्यनुगच्छन्तं दिधक्षन्तं जगत्रयम् ।
अर्धकौपीनवसनं स्मरन्तं कमपि द्विजम् ॥

सर्वान् (for अन्यान्) — (L. 2418) T_4 पञ्च (for चैव) $G_{4\,5}$ नमस्कृत्य (for पुर°). Dn Ds_2 T_1 G_2 महामुनीन्; $G_{4,5}$ M_3 °मुनि. (for °मुनीन्). — (L 2421) T_4 $G_{3,5}$ M_{1-3} शान्ता; G_2 क्लान्ता (for दान्ता) D_6 केशवार्चिताः (for °वर्जिता.). — (L. 2423) D_6 [उ]पश्रुत्य; T_4 G_2 °सृत्य (for °स्पृश्य). — (L 2425) T_1 G_{3-5} सुधर्मायामवस्थितम् (for ^{b})

Colophon — *Mention of the Epic* Ds_2. — *Mention of Khila* Dn Ds_2 D_6 $T_{1\,2\,4}$ G M. — *Adhy name* Dn Ds_2 हंसडिभकोपाख्यानम्; T_1 G_3 यतीनां द्वारकाप्रवेश, M हसडिभकम्, — *Adhy no* · Dn 293; Ds_3 294; T_1 G_3 241, T_2 G_1 223, T_4 190, G_2 216, G_4 220; G_5 222, M_{1-3} 186

(L 2427) D_6 श्यामः पीताम्बरधरः (for ^{a}) — (L. 2431) T_2 $G_{1,4}$ नृपै. (for नृप). — (L 2433) D_6 T_4 G_2 चकार प्रियवत्तुष्टो (for ^{a}) — (L. 2436) G_4 सर्वे (for तस्य). — (L 2440) G_2 M_{1-3} मध्यंदिनान् (for °दिने). — (L 2442) D_6 T_4 [आ]वेदिता (for वारिता) D_6 द्वारे चैव (for द्वार्येव च) M समाश्रिता (for °स्थिताः) — (L. 2446) Ds_2 G_3 M -समासक्तं (for °युक्तं) — Dn Ds_2 om. line 2447 — (L 2448) Dn Ds_2 M_4 विष्णुं तं (for वीक्षन्तं). — (L 2449) D_6 M_3 ह्लादयुतं, T_4 $M_{1\,2}$ °यता (for ^{b}यन्तं) Dn $T_{1\,2}$ G [अ]न्येन, Ds_2 [अ]नेन (for [आ]लोक्य). G_2 प्रत्यदृशंस्ततस्ततः (for ^{b}) — (L 2451) T_2 G_5 M_4 वृष्णिप. (for वृष्णय) $T_{1\,2\,4}$ $G_{1\,2\,4\,5}$ M_4 पुण्डरीकाक्षं (for °क्ष) — (L 2452) D_6 दृष्ट्वा, M_{1-3} कङ्क (for [अ]क्रूर) — (L 2453) T_4 G_2 एते (for अन्ये) M_{1-3} संप्रपेदिरे (for प्रति°) — (L 2455) G_1 $T_{1\,3}$ पृष्ठतोऽप्यनुसर्पन्तं (G_1 °न्ति); G_2 °तो व्यनुसर्पन्त; $G_{4,5}$ °तो व्यवसर्पन्ति; M_3 °तोऽप्यनुगच्छन्ति (for ^{a}) G_3 जनार्दनम् (for जगत्र-

अन्तस्तापममायुक्तं छिन्नदण्डधरं यतिम् ।
अतिज्वलन्तं रोषेण हंसासादितकल्मषम् ॥
नेत्रोत्थितमहावह्निं प्रेक्षन्तं यादवेश्वरम् ।
दुर्वाससं ते दृदृशुर्भीता यादवसत्तमाः ॥
किं करिष्यत्यसौ क्रुद्धः किं वा वक्ष्यति नः प्रभुः ।
इति प्राञ्जलयः सर्वे यादवाः संप्रपेदिरे ।
इदमासनमित्येवं किंचिदूचुश्च वृष्णयः ॥
ततः कृष्णो हृषीकेशः किंचिदुत्प्लुत्य तत्पुरः ।
इदमासनमित्येव स्थीयतामिह निर्वृतः ।
अहमत्र स्थितो विप्र किं करोमीति चाब्रवीत् ॥
ततः किंचिदिवासीन आसने यतिविग्रहः ॥
आसने संस्थिते तस्मिन्यतयो वीतमत्सराः ।
आसनानि यथायोगं भेजिरे निर्वृताः किल ॥
अर्घ्यादिसमुदाचारं चक्रे कृष्णः किरीटभृत् ।
आह भूयो हृषीकेशो यतिं दुर्वाससं प्रभुम् ।
किमर्थं ब्रूहि विप्रेन्द्र अस्मिन्प्रत्यागमो हि वः ॥
दृष्टं वाप्यथ वा किंचित्कारणं वोऽस्ति वा महत् ।
संन्यासिनो द्विजश्रेष्ठा यूयं विगतकल्मषाः ॥
निःस्पृहाश्च सदा यूयमस्मत्तो द्विजपुंगवाः ।
प्रार्थ्यं नाम न चैवास्ति स्पृहा नैवास्ति वो यतः ॥
स्पृहाप्रेरितकर्माणः क्षत्रियान्यान्ति सुव्रताः ।
निरूप्यमाणमस्माभिर्विप्र किंचिन्न दृश्यते ॥

न जाने कारणं ब्रह्मन्युष्मदागमनं प्रति ।
एतावता चानुमेयं किंचित्कारणमस्ति हि ।
तद्ब्रूहि यदि विद्येत त्वत्तो ज्ञास्यामहे वयम् ॥
इत्युक्तवति देवेशे चक्रपाणौ जनार्दने ।
तस्यापि राजन्विप्रस्य भूयः कोपो महानभूत् ।
तस्मादभ्यधिकः पूर्वात्कोपः संजायते महान् ॥
दिधक्षन्निव लोकांस्त्रीन्भक्षयन्निव पश्यतः ।
रोषरक्तेक्षणः क्रुद्धो हसन्निव दहन्निव ।
उवाच वचनं विष्णुं दुर्वासाः क्रोधमूर्छितः ॥
न जान इति कस्मात्त्वं ब्रूषे नो यादवेश्वर ।
जानामि त्वामहं देव वञ्चयन्निव भाषसे ।
पुरातना वयं विष्णो पूर्ववृत्तान्तवेदिनः ॥
तथा हि देवदेवोऽसि मायामानुषदेहवान् ।
निगूहसे प्रभुरतः कस्मान्नो जगतीपते ॥
सोऽसि ब्रह्मविदां मूर्तिस्तदेतत्परमं पदम् ।
यदव्यक्तं परं ब्रह्म यच्च ज्ञाता वयं पुरा ॥
यतो विश्वमिदं भूतं तदेतत्परमं पदम् ।
यच्च स्थूलं विजानन्ति पुरा तत्त्वेन चेतसा ॥
पुराविदोऽथ विश्वेश तदेतत्परमं वपुः ।
कर्मणा प्राप्यते यत्तु यत्स्मृत्वा निर्वृता वयम् ॥
प्रत्यक्षमपि यद्रूपं नैव जानन्ति मानुषाः ।
न हि मूढधियो देव न वयं तादृशा हरे ॥

यम्) —(L 2458) Dn Ds_2 $T_{1\ 2\ 4}$ G अन्तर्ज्वलन्तं (for अतिज्व°). D_6 -कश्मलम् (for -कल्मषम्) T_1 G_5 हंसस्मारितकल्मषम्, T_4 G_6 हंससादित° (for ^{b}) —(L. 2459) G_2 नेत्रोद्भूत (for °त्थित-) —(L. 2461) D_6 T_4 संक्रुद्ध ; G_2 [अ]संक्रुद्ध (for [अ]सौ क्रुद्धः) —(L 2462) Dn Ds_2 $T_{1\ 2}$ $G_{1\ 3-5}$ प्रतिपेदिरे (for संप्र°). —(L 2464) D_6 G_2 उत्पत्य (for उत्प्लुत्य) T_4 $G_{2\ 3}$ तत्पर (for तत्पुर) — (L 2465) D_6 G_1 इति (for इह) — (L. 2466) $M_{2\ 4}$ अद्य (for अत्र) Dn Ds_2 D_6 $T_{1\ 2,\ 4}$ G किंकरोऽस्मि (for किं करोमि) — (L 2469) Ds_2 यथायोग्यं (for °योगं) —(L 2470) G_5 भूय· (for कृष्ण.). —(L 2471) G_3 M_{1-3} प्रभु (for प्रभुम्) —(L 2472) $M_{1,\ 2}$ अस्मान् (for अस्मिन्). G_2 नृप (for हि व·). — (L 2473) D_6 T_3 G_2 [अ]भवत् (for महत्) —(L 2474) D_6 M_1 -मत्सरा (for -कल्मषाः). —(L. 2475) D_6 T_4 M_{1-3} -पुंगव (for °वा). —(L. 2476) D_6 T_4 G_2 प्रार्थ्यं (for प्रार्थ्यं) — D_6 om lines 2477–2481 —(L 2477) M -धर्माण· (for -कर्माण·). —(L 2478) G_4 विद्यते (for दृश्यते) —(L 2479) G_2 M_{1-3} मया (for प्रति). —(L. 2484) D_6 T_4 G_2 M स्म ह (for महान्). —(L 2486) M_3 दुर्वासाथ हसन्निव (for ^{b}) —(L. 2489) Dn Ds_2 $T_{1,\ 2,\ 4}$ $G_{1\ 3\ 5}$ देवं (for देव). —(L. 2491) T_1 -देवेशो (for देवोऽसि). —(L 2493) $T_{1\ 4}$ $G_{1,\ 4\ 5}$ तवैतत् (for तदेतत्) —(L 2494) Dn यद्वा भाव्यं पुरा ब्रह्मा ; Ds_2 $T_{1,\ 2,\ 4}$ G M_4 यदभ्यर्च्यं पुरा (T_1 परं) ब्रह्मा , D_6 यदभ्यर्चेत्पुरा ब्रह्मा (for ^{a}). —(L. 2497) D_6 T_4 पदम् (for वपु) —(L.

न जान इति कस्मात्त्वं किमतः साहसं वचः ।
ये हि मूलं विजानन्ति तेषां पत्रविवेचनम् ॥
कुर्वतः किं फलं देव तव केशिनिषूदन ।
वेदान्ते प्रथितं तेजस्तव चेदं विभाव्यते ॥
यच्च विज्ञानतृप्तास्तु योगिनो वीतकल्मषाः ।
पश्यन्ति हृत्सरोजे हि तदेवेदं वपुः प्रभो ॥
वेदैर्यद्गीयते तेजो ब्रह्मेति प्रविभज्यते ।
तदेवेदं विजानेऽहं रूपमैश्वरमीश्वर ॥
वैष्णवं परमं तेज इति वेदेषु पठ्यते ।
अवगच्छाम्यहं विष्णो तदेवेदं वपुस्तव ॥
य ओमित्युच्यते शब्दो यस्य वागिति गीयते ।
स एवासि प्रभो विष्णो न जान इति मा वद ॥
परोक्षं यदि किंचित्स्यात्तव वक्तुं प्रयुज्यते ।
न जान इति गोविन्द मा वदीः साहसं हरे ॥
विश्वं यतः प्रादुरासीद्यस्मिंल्लीनं क्षये सति ।
इदं तदैश्वरं तेजस्त्ववगच्छामि केशव ॥
कर्ता त्वं भूतभव्येश प्रतिभासि सदा हृदि ।
यद्यद्रूपं स्मरेन्नित्यं तत्तदेवासि मे हृदि ॥
वायुरेव सदा विष्णुरिति मे धीयते मतिः ।
तदा तद्रूपमेवासि हृन्मध्ये संस्थितो विभो ॥
आकाशो विष्णुरित्येव कदाचिद्धीयते मतिः ।
तदा तद्रूपमेवासि हृन्मध्ये संस्थितो विभो ॥
पृथिवी विष्णुरित्येतत्कदाचिद्धीयते मतिः ।
तदा पार्थिवरूपोऽसि प्रतिभासि सदा मम ॥
रसोऽयं देव इत्येव कदाचिच्चिन्त्यते मया ।
तदा रसात्मना विष्णो हृन्मध्ये संस्थितो विभो ॥
यदा त्वं तेज इत्येव स्मर्ता स्यां पुरुषोत्तम ।
यदा तद्रूपसंपन्नः प्रतिभासि सदा हृदि ॥
चन्द्रमा हरिरित्येव तदा चान्द्रमसं वपुः ।
निरीक्षंश्चक्षुषा देव ततः प्रीतोऽस्मि केशव ॥
यदा सौरं वपुरिति स्मर्ता स्यां जगतीपते ।
तदा तद्भावनायोगात्सूर्य एव विराजसे ॥
तस्मात्सर्वं त्वमेवासि निश्चिता मतिरीदृशी ।
अतो न जानेऽहमिति वक्तुं नेशो जनार्दन ॥
इत्यर्थे संस्थितो विष्णो पीडां नो नैव चिन्त्यसे ।
अत्यन्तदुःखिता विष्णो वयं त्वामनु संस्थिताः ॥
ईदृशीयमवस्था नो नैनां स्मर्तासि केशव ।
तत्पुनर्भागधेयं नो नष्टमित्येव चिन्तये ।

2499) D_6 T_4 G_2 तव (for अपि) D_9 न च, T_4 G_2 M_{1-3} तव (for नैव) — D_6 T_1 om lines 2500–2505 —(L 2501) Dn T_2 $G_{1-3.5}$ M_4 जाने (for जान) Dn Ds_2 यद्रूषे (for कस्मात्त्वं). —(L 2502) T_2 -विचेतनम्, M_3 -विमोच° (for -विवेच°) —(L. 2503) M_{1-3} पुंस· (for तव). —(L 2504) $M_{1.3}$ तदेव (for तव च) Dn Ds_2 T_2 $G_{1.4.5}$ विचार्यते (for विभाव्यते). G_3 सर्वतेजो विचार्यते (for ^{b}). —(L. 2505) Dn Ds_2 T_4 ये (for यच्) —(L 2506) D_6 तव वेदं (for तदेवेदं) —(L 2507) $M_{1.3}$ वेदे (for वेदैर्) G_2 क्रियते (for गीयते) Dn Ds_2 D_6 $T_{2.4}$ $G_{1.3-5}$ ब्रह्मेति प्रतिपाद्य वै, T_1 °ति प्रतिपाद्यते, G_2 °ति प्रविभज्य वै (for ^{b}). —(L 2508) D_6 T_4 [इ]ह (for [इ]दं) Dn Ds_2 G_2 एव च (for ईश्वर) D_6 परमैश्वर्यमीश्वर (for ^{b}) —(L 2509) G_2 न वैष्णव परं तेज (for ^{a}) —(L 2510) $G_{3.5}$ तदा (for तव). —(L 2512) T_1 भवांस्त्वं (for एवासि) D_6 G_2 M वदी (for वद) — M_4 om lines 2513–2515. —(L 2513) Cal ed परोक्षे (for °क्षं) —(L 2514) $G_{1.2.4.5}$ M_1 वादी (for वदीः) T_2 मा वादी. सहसा हरि. (for ^{b}) —(L 2517) D_6 T_4 G_2 M_{1-3} स्मर्ता (for कर्ता). G_2 [अ]हं (for त्वं) — D_6 om line 2518. G_5 om (hapl) lines 2520–2525 —(L 2520) D_6 M_2 तन्मध्ये (for हृन्मध्ये) D_6 T_2 G_5 संस्थिते, G_1 °तं (for °तो). — D_6 M om (hapl) lines 2521–2523 —(L 2522) T_1 [आ]हुर् (for [अ]सि) —(L 2523) Dn D_6 T_4 G_{1-3} M_4 [इ]व, M_{1-3} [ए]वं (for [ए]तत्). —(L 2524) Dn Ds_2 T_1 $G_{2.5}$ M_4 त्वं (for ऽसि). —(L 2525) T_2 हरिः (for मया) — G_3 om line 3526 —(L 2526) D_6 तन्मध्ये (for हृन्मध्ये) $T_{2.4}$ $G_{1.4}$ संस्थिते (for °तो). —(L. 2227) D_6 $T_{2.4}$ $G_{1.3.5}$ M त्वां (for त्वं). M_4 त्वं (for स्यां) —(L 2528) D_6 -संपन्न, T_1 M_3 -संभिन्न· (for (for संपन्न) —(L 2530) Dn Ds_2 D_6 $T_{1.2.4}$ G M_4 निरीक्ष्य (for °क्षंश्च) —(L 2532) G_3 संभावना- (for तद्भावना-) —(L 2533) D_6 विजानासि (for त्वमेवासि). —(L 2534) G_3 तव वक्तुं (for वक्तु नेशो) —(L 2535) T_2 $G_{1.4}$ इत्यर्थं, G_3 इत्युक्त (for इत्यर्थे) T_1 पिता, M_3 पीडा (for पीडां) —(L 2536) T_1 वय ते मनसे स्थिताः

मन्दभाग्या वयं विष्णो यतो नो न स्मरेः प्रभो ॥
कौचित्क्षत्रियदायादौ गिरीशवरगर्वितौ ।
नाम्ना च हंसडिभकौ बाधेते नो जनार्दन ।
गार्हस्थ्यं हि सदा श्रेयो वदन्ताविति केशव ॥
इतश्चेतश्च धावन्तौ वदन्तौ बहु किल्बिषम् ।
अयुक्तं बहु भाषन्तौ धर्षयन्तौ च नः सदा ॥
इदमन्यत्कृतं देव असह्यं पापमुच्यते ।
पश्येदं बहुधा देव भिन्नं भिन्नं सहस्रशः ।
शिक्यं च दारवं पात्रं द्विदलान्वेणुकान्बहून् ॥
इदमप्यपरं पश्य तयोः साहसचेष्टितम् ।
कौपीनं बहुधा छिन्नं तदस्माकं महद्धनम् ।
कृतं कपालमात्रेण कमण्डलु जगद्गुरो ॥
त्वं तु नो रक्षसे नित्यं क्षात्रवृत्तं समाश्रितः ।
चित्रं चित्रमिदं देव रक्षस्येव दिवानिशम् ॥
किं करिष्यामि मन्दात्मा मन्दभाग्या वयं विभो ।
किं नः शरणमद्यैव तद्ब्रूहि जगतीपते ॥
जीवन्तौ तौ यदि स्यातां नष्टा लोका इमे त्रयः ।
न विप्रा न च राजानो न वैश्या न च पादजाः ॥
अत्यन्तबलिनौ मत्तौ तीक्ष्णदण्डधरौ नृपौ ।
न तयोः पुरतः स्थातुं शक्ता देवाः सवासवाः ॥
न च भीष्मो न वा राजा बाह्लीको भीमविक्रमः ।
यो हि वीरो जरासंधः क्षत्रियाणां भयंकरः ॥
नैव च प्रायशः स्थातुं गिरीशवरदर्पिणोः ।
तयोः शक्तो हरे कृष्ण नित्यमप्रतिसङ्गिनोः ॥
तस्मात्त्वं जहि तौ वीरौ रक्ष लोकानिमान्प्रभो ।
अन्यथा रक्षसीत्येवं शब्दो व्यर्थोऽत्र जायते ॥
बहुनात्र किमुक्तेन रक्ष रक्ष जगत्त्रयम् ।
इत्युक्त्वा विरारामैव दुर्वासाः क्रोधमूर्छितः ॥

Colophon

वैशंपायन उवाच ।

यतेर्वचनमाकर्ण्य मन्दमुच्छ्वस्य केशवः ।
दुर्वाससं समालोक्य बभाषे यादवेश्वरः ॥
क्षन्तव्यं भवता पूर्वं दोष एष ममैव हि ।
शृणु वाक्यं ममैतत्तु श्रुत्वा क्षमपरो भव ॥
जेष्यामि तौ रणे विप्र हंसं डिभकमेव च ।
गिरीशो वा वरं दद्याच्छक्रो वा धनदोऽपि वा ॥
यमो वा वरुणो वापि ब्रह्मा वाथ चतुर्मुखः ।
सबलौ सानुगौ हत्वा पुनर्दास्यामि वो रतिम् ॥

(for ^{b}) —(L 2537) Dn Ds_2 G_3 [ए]तां (for [ए]नां). Dn Ds_2 $G_{2.3.5}$ M_4 स्मरसि (for स्मर्तासि) — $M_{2.4}$ om line 2541 —(L 2543) T_1 om lines 2543^{b}–2544^{a} G_4 किल्बिषौ (for °षम्) —(L 2544) D_6 T_4 G_2 वनजाक्ष- वचः सदा (for ^{b}) —(L 2545) Dn_1 Ds_2 असभ्यं, T_2 G_{3-5} त्वसह्यं (for °अ) T_2 G_3 $M_{2.3}$ अच्युत (for उच्यते) —(L 2546) M_{2-4} बहुशो (for °धा) D_6 पश्येदं बहु देवेश (for ^{a}) T_2 छिन्नं (for the first भिन्नं). —(L 2547) D_6 G_2 दारुकं (for दारवं) D_6 विदलद्, M_3 विदलं (for द्विदलान्) —(L 2550) M -मात्रं तु (for -मात्रेण). Dn Ds_2 जगत्प्रभो (for °द्गुरो) —(L 2551) T_4 G_2 M_{1-3} समास्थितः (for °श्रित). Dn Ds_2 $T_{1.2}$ $G_{1.3-5}$ क्षात्रं वै व्रत- (T_3 वृत्त)मास्थितः (for ^{b}) —(L 2552) Dn Ds_2 $G_{1.4.5}$ M_4 सदानिशम् (for दिवा°) —(L 2554) D_6 इत्येव; G_3 अद्यैतत् (for अद्यैव). Dn $G_{4.5}$ ब्रूहि तज्जगतां पते; G_2 किं त्वं ब्रूहि जगत्पते (for ^{b}). —(L 2556) च विप्रा (for विप्रा न). D_6 T_4 राजेन्द्रा (for राजानो). M विशो (for वैश्या) —T_1 om lines 2557–2558. —(L. 2557) D_6 मलिनौ (for -ब°) Dn Ds_2 D_6 $T_{2.4}$ G M_4 नृप (for नृपौ) —(L 2558) G_2 सदानवा; G_4 सबान्धवा (for सवासवा) —(L 2559) G_4 बाह्लीको ब्रह्मवित्तम (for ^{b}) —(L 2561) G_2 M_1 -गर्विणो., M_3 -गर्विणौ, M_4 गर्विता (for -दर्पिणो.). —(L 2562) Dn Ds_2 T_4 $M_{1.3}$ कृष्ण, G_5 शक्ता (for शक्तो). Dn Ds_2 T_4 $M_{1.3}$ शक्तो (for कृष्ण) G_2 -शङ्किनो. (for -सङ्गिनो.) —(L 2563) D_6 T_2 G_2 M_{1-3} वीर (for वीरौ) G_2 रक्ष चैव स्वकानिमान् (for ^{b}).

Colophon —*Mention of the Epic* Ds_2. —*Mention of Khila* Dn Ds_2 D_6 $T_{2.4}$ G M. —*Adhy name* Dn Ds_2 हंसडिभकोपाख्याने दुर्वाससः समागम, D_6 M_4 हंसडिभकम्, T_3 G_1 हंसडिबकोपाख्याने वासुदेवदुर्वाससंगमः, G_3 वासुदेवदुर्वाससंगम — *Adhy no.* Dn 294, Ds_2 295; T_2 G_1 224, T_4 191, G_2 217; G_3 222, G_4 121; G_5 M_4 223, M_{1-3} 187

G_5 om. the ref. —(L. 2569) Dn M सर्वं (for पूर्वं). Dn_2 Ds_2 D_6 $T_{2.4}$ G M_3 एव (for एष). —(L. 2570)

सत्येनैव शपाम्यद्य मा रोषवशमन्वगाः ।
रक्षां वोऽहं करिष्यामि हत्वा तौ च नृपाधमौ ॥
जानामि तौ दुरात्मानौ युष्मद्दोषकरौ हि तौ ।
श्रुतं च पूर्वमस्माभिस्तीक्ष्णदण्डधराविति ॥
अत्यन्तबलिनौ मत्तौ गिरीशवरदर्पितौ ।
नाल्पप्रयत्नसंसाध्यौ जरासंधहितैषिणौ ॥
प्राणानपि तयो राजा दास्यत्येव न संशयः ।
जरासंधो महीपालो विनानेन यतेमहि ॥
जये तयोर्विप्रवर्य तत्र श्रेयो भवेत नः ।
यत्र यत्र च तौ गत्वा स्थितावित्यनुशुश्रुम ।
तत्र तत्र च हन्ताहं नात्र कार्या विचारणा ॥
गच्छध्वं यतयः स्वैरं निजकार्यपरायणाः ।
अचिरेणैव कालेन जेष्यामि रणपुंगवौ ॥
ततः प्रीतः प्रसन्नात्मा यादवेश्वरमाह सः ।
स्वस्त्यस्तु भवते कृष्ण जगतां स्वस्ति सर्वदा ॥
किं नु नाम जगन्नाथ दुःसाध्यं तव केशव ।
त्रिलोकेश त्रिधामासि सर्गसंहारकारकः ॥
देवानामपि देवेश सर्वत्र समदर्शनः ।
विष्णो देव हरे कृष्ण नमस्ते चक्रपाणये ॥
नमः स्वभावशुद्धाय शुद्धाय नियताय च ।
शब्दागोचर देवेश नमस्ते भक्तवत्सल ।
अज्ञानादथ वा ज्ञानाद्यन्मयोक्तं क्षमस्व तत् ॥
त्वमेवाहं जगन्नाथ नावयोरन्तरं पृथक् ।
अतः क्षमस्व भगवन्क्षमासारा हि साधवः ॥

भगवानुवाच ।

क्षन्तव्यं भवता विप्र क्षमासारा वयं सदा ।
संन्यासिनः क्षमासाराः क्षमा तेषां परं बलम् ॥
क्षमा मोक्षकरी नित्यं तत्त्वज्ञानमिव द्विज ।
क्षमा धर्मः क्षमा सत्यं क्षमा दानं क्षमा यशः ॥
क्षमा स्वर्गस्य सोपानमिति वेदविदो विदुः ।
तस्मात्सर्वप्रयत्नेन क्षमां पालयत स्वकाम् ॥
प्रत्यक्षज्ञानसंयुक्ता यूयं सर्वे यतीश्वराः ।
एते ते यतयो विप्राः पूजनीया मयाद्य वै ॥
भोक्तव्या यतयो विप्रा भिक्षुकाः सर्व एव हि ।
तथेति ते प्रतिज्ञाय भोक्तुमैच्छन्हरेर्गृहे ॥
ततः स्वभवनं विष्णुः प्रविश्य हरिरीश्वरः ।
चतुर्विधं तदाहारं कारयित्वा यथाविधि ।
भोजयामास तान्सर्वान्यतीन्यतिवरार्चितः ॥
छित्त्वा छित्त्वा च देवेशो दुकूलानि मृदूनि सः ।
ददौ तेभ्यस्तदा विष्णुः सर्वेभ्यो जनमेजय ।
ते च प्रीता यथायोगं यतः पूर्वं ततो गताः ॥

Colophon.

Dn Ds2 क्षमापरो, G1 शान्ति° (for क्षम°) — (L 2573) D6 T4 G2 ब्रह्मा वा चतुरानन (for ᵇ) — (L 2574) Ds2 G3 M1 3 सानुजौ (for °गौ) — (L 2575) M2 4 [अ]त्र (for [अ]द्य). Dn Ds2 T2 4 G1, 3–5 मा रोषवशगो भव (for ᵇ) — (L 2577) D6 T4 युष्मद्द्वेष- (for °द्दोष-) D6 T4 वने; T2 G3 M1–3 यते (for हि तौ) — (L 2579) D6 T1, 2 G2–4 M -गर्वितौ (for -दर्पितौ) — (L. 2580) M1 -साध्यौ तौ (for -संसाध्यौ). — (L 2582) Dn D6 T4 G2 M1–3 तेन (for [अ]नेन) Bom, Poona eds G(ed) विना तौ जयते महीम् (for ᵇ) — (L 2583) D6 G2 ताभ्यां (for तयोर्) M4 भविष्यति, Bom Poona eds G(ed) भवेत्तत· (for भवेत न·). — (L 2585) D6 T4 गन्ता (for हन्ता). — (L 2587) G2 नर· (for रण-) — (L 2588) G2 प्रीतौ (for प्रीत.) —(L, 2589) Dn Ds2 T1, 2 G1 3–5 M4 कुर्वते (for सर्वदा). — (L. 2591) D6 T2 G2 सर्व- (for सर्ग-) M4 -कारण (for कारक) — (L. 2595) Dn Ds2 D6 T1 2 G2 4 5 M1 शब्दगोचर (for शब्दा°) — D6 कृष्ण (for भगवान्) — (L 2602) Cal ed कर्म (for सत्यं) and सत्यं (for दानं) — (L 2605) D6 G2 नित्यं यूयं (for यूयं सर्वे) —(L 2606) Dn1 Ds2 त एते (by transp.), Dn2 Ds2 M4 य एते D6 G5 M1 3 4 विप्र (for विप्राः). D6 T4 प्रसाद्य, T1 G4 5 ममाद्य (for मयाद्य). — (L. 2607) D6 T2 M2 विप्र — (L. 2611) D6 T4 G3 विप्रान् (for सर्वान्) Dn2 -सुरार्चित (for -वरा°) — (L 2612) T2 G1 4 भित्त्वा भित्त्वा, T4 छित्त्वा भित्त्वा (for छित्त्वा छित्त्वा). D6 बहूनि (for मृदूनि). — (L 2614) T2 G1 4 3 M1, 3 यथा (for यत.) G2 यतयस्तत्र ते गता (for ᵇ)

Colophon. — *Mention of the Epic* Ds2. — *Mention of Khila* Dn Ds2 D6 T1 3 4 G M — *Adhy name:* Dn Ds2 T1 हंसडिभकोपाख्यानम्, D6 M4 हंसडिभकम्; T3

वैशंपायन उवाच ।
दुर्वासास्त्वथ तत्रैव नारदेन सहायवान् ।
चिन्तयन्ब्रह्मणस्तत्त्वं विजहार यथासुखम् ।
भगवानपि गोविन्दस्तयोर्वधममन्यत ॥
ततस्तौ हंसडिभकौ तस्मिन्काले महीपते ।
ब्रह्मदत्तं महीपालं पितरं वीर्यशालिनम् ।
प्रावोचतामिदं वाक्यं सामन्तजनसंसदि ॥
राजसूयं महायज्ञं पितः कुरु सुयन्त्रितः ।
अस्मिन्मासि नृपश्रेष्ठ यतामो यज्ञसिद्धये ॥
आवां तेऽद्य महाराज दिशां विजयतत्परौ ।
यतिष्यावो बलैः सार्धं रथैरश्वैर्गजैरपि ॥
संभारा यज्ञसिद्ध्यर्थमानेतव्या नृपोत्तम ।
तथेति स महाराजो ब्रह्मदत्तोऽब्रवीत्तदा ॥
जनार्दनस्तु विप्रेन्द्रो दृष्ट्वा साहसतत्परौ ।
अशक्यमिति मन्वानो वयस्यं हंसमब्रवीत् ॥
शृणु हंस वचो मह्यं श्रुत्वा निश्चित्य वीर्यवान् ।
आयुष्मन्साहसं कर्तुं निश्चितोऽसि नृपोत्तम ॥
स्थिते भीष्मे जरासंधे वाह्लीके च नृपोत्तमे ।
किं च वीरेषु सर्वेषु यादवेषु नृपोत्तम ॥
भीष्मो हि बलवान्वृद्धः सत्यसंधो जितेन्द्रियः ।
त्रिःसप्तकृत्वः पृथिवीं यो जिगाय भृगूत्तमः ।
तं युद्धे जितवान्भीष्मः सर्वक्षत्रस्य पश्यतः ॥
जरासंधस्य यद्वीर्यं तद्भवान्वेत्ति संयुगे ।
वृष्णिवीरास्तु ते सर्वे कृतास्त्रा युद्धदुर्मदाः ॥
तत्र कृष्णो हृषीकेशो जितशत्रुः कृती सदा ।
जरासंधेन सहितः सदा युद्धे जितश्रमः ।
प्रमुखे तस्य न स्थातुं शक्तो जीवन्नृपोत्तम ॥
बलभद्रस्तथा मत्तः क्रुद्धो यदि भवेद्बली ।
लोकानिमान्समाहर्तुं शक्नोतीति मतिर्मम ॥
तथा च सात्यकिर्वीरः शक्तो जेतुं रणे रिपून् ।
तथान्ये यादवाः सर्वे कृष्णमाश्रित्य दंशिताः ॥
अस्माभिश्च कृतः पूर्वं विरोधो यतिभिः सह ।
दुर्वासा यतिभिः सार्धं गतो द्रष्टुं स केशवम् ॥
इति श्रुतं नृपश्रेष्ठ ब्राह्मणाद्भोक्तुमागतान् ।
तथा सति यथा सिध्येत्तथा चिन्त्यं च मन्त्रिभिः ।
ततः पश्चाद्विधास्यामो राजसूयं महाक्रतुम् ॥
हंस उवाच ।
को नाम भीष्मो मन्दात्मा वृद्धो हीनबलः सदा ।
आवयोः पुरतः स्थातुं शक्तः किल स वृद्धकः ॥
यादवा इति चित्रं नः शक्ताः स्थातुं रणे द्विज ।
कश्च कृष्णः पुरः स्थातुं बलदेवश्च मत्तकः ॥
शैनेयश्चापि विप्रेन्द्र स्थातुं नालं विचित्रता ।

G$_1$ हंसडिबकम्, G$_3$ हंसडिबके यतिभोजनम् — *Adhy no* Dn$_1$ 294; Ds$_2$ 296, T$_1$ G$_4$ 222; T$_2$ G$_1$ 225, T$_4$ 192; G$_2$ 218; G$_3$ 223, G$_5$ M$_4$ 224, M$_{1-3}$ 188.

(L 2615) Dn Ds$_2$ T$_{1.2}$ G$_{1-3}$ $_5$ महामना (for सहायवान्) — Before lines 2617, G$_3$ ins वैशंपायन — (L 2617) Dn Ds$_2$ T$_{1\ 2}$ G$_{1\ 3-5}$ M$_3$ वासम्, D$_6$ विघ्नम् (for वधम्) — (L 2618.) Ds$_2$ G$_{1\ 4}$ महीपतौ, Bom Poona eds G(ed) °पतिम् (for °पते) — (L 2620) Dn प्रवोचताम्, Ds$_2$ D$_6$ प्रोवाच तम्; M$_{1\ 2}$ प्रोवाच ताम्, M$_3$ प्रोवाचेताम् (for प्रावोच°) Dn Ds$_2$ G$_{1\ 3\ 5}$ समन्ताज् (for सामन्त-) — (L. 2621) Dn Ds$_2$ सुयत्नतः, D$_6$ संयन्त्रितः, T$_2$ सुमन्त्रितः (for सुयन्त्रितः) — (L. 2622) Dn Ds$_2$ T$_{1,2\ 4}$ G$_{1\ 3-5}$ यतावो (for °मो) — (L 2623) M$_{1-3}$ दिशो (for दिशा). — G$_2$ om (hapl) lines 2624–2627. — (L. 2624) D$_6$ T$_4$ प्रयतावो (for यतिष्यावो). — (L 2626) Dn Ds$_2$ G$_3$ महाबाहो, T$_{1\ 4}$ M$_3$ °राज (for °राजो) — (L 2629) T$_{1\ 2}$ G$_{1\ 3-5}$ नित्यं (for मह्यं). D$_6$ T$_{2\ 4}$ G$_{1\ 4\ 5}$ M निश्चिनु (for °त्य) — (L. 2630) Dn Ds$_2$ उद्यतो (for निश्चितो) — (L 2634) M$_{2-4}$ भृगूद्वहः (for °त्तम) D$_6$ T$_4$ G$_2$ जिगाय भृगुनन्दनः (for ^{b}) — (L. 2635) T$_2$ युद्धेषु (for तं युद्धे). — G$_5$ om lines 2636–2639. — (L 2639) G$_1$ कृतश्रम. (foo जित°) — — (L 2640) D$_6$ T$_4$ M$_{3.4}$ क (for न) T$_4$ G$_{1.2\ 4\ 5}$ M$_{1\ 3.4}$ नृपोत्तमः. — (L 2641) D$_6$ सदा (for तथा) — (L. 2644) M$_{2\ 4}$ गर्विता (for दंशिताः). — (L 2645) D$_6$ यदुभिः (for यतिभि) — (L 2646) T$_4$ यदुभि (for यतिभिः). — (L 2647) D$_6$ श्रुत्वा (for श्रुतं). D$_6$ G$_{1\ 5}$ M$_{1\ 3}$ ब्राह्मणान्भोक्तुमागतान् (for ^{b}) — (L 2652) T$_2$ G$_1$ रणाजिरे (for रणे द्विज) — (L 2653) G$_2$ कश्च सः (for मत्तक.) — (L. 2654) D$_6$ राजेन्द्र (for विप्रेन्द्र). Dn Ds$_2$

जरासंधस्तु धर्मात्मा बन्धुरेव सदा मम ॥
गच्छ विप्र यदुश्रेष्ठं ब्रूहि मद्वचनात्त्वरन् ।
दीयतां करसर्वस्वं यज्ञार्थं लवणं बहु ॥
लवणानि बहून्याशु गृह्य केशव माचिरम् ।
आगच्छ त्वरितं कृष्ण न ते कार्यं विलम्बनम् ।
इति ब्रूहि यदुश्रेष्ठं याहि त्वरितविक्रमः ॥
न ब्रूयाश्चोत्तरं विप्र शपेयं त्वां प्रियोऽसि मे ।
मित्रभावादिदं ब्रूहि शपामि त्वां पुनः पुनः ॥
इति संचोदितो विप्रो नोत्तरं प्रत्यभाषत ।
मित्रभावात्तथा राजन्स्नेहाच्च जनमेजय ॥
जनार्दनस्तु धर्मात्मा नित्यं गन्तुं समुद्यतः ।
अद्य श्वो वा परश्वो वा गच्छामीति यतेत सः ॥
देवं द्रष्टुं जगद्योनिं शङ्खचक्रगदाधरम् ।
एक एव च धर्मात्मा हयमारुह्य सत्वरम् ॥
प्रातरेव जगामाशु द्रष्टुं द्वारवतीं द्विजः ।
हरिं कृष्णं हृषीकेशं मनसा संस्मरन्द्विजः ॥

Colophon

वैशंपायन उवाच ।

ततः प्रायाद्धरिं द्रष्टुं ब्राह्मणो ब्रह्मवित्तमः ।
हयेनैकेन राजेन्द्र त्वरितं स ययौ नृप ॥
यथा निदाघसमये सूर्यांशुपरिपीडितः ।
पान्थो याति जलं दृष्ट्वा त्वरितं तत्पिपासया ।
धावत्येव तथा विप्रो हरिं द्रष्टुं जनार्दनम् ॥
गच्छन्स चिन्तयामास चोदयन्हयमुत्तमम् ।
हंस एव यथा नित्यं कुर्यात्प्रियहितं मम ।
तथा हि प्रेषितस्तेन हरिं पश्येत्यहं प्रभुम् ॥
अहमेव सदा धन्यो मत्तो ह्यभ्यधिको न च ।
यतो द्रक्ष्याम्यहं विष्णुं वसन्तं द्वारकापुरे ॥
सा हि मे जननी धन्या हरिं दृष्ट्वा पुनर्गतम् ।
कृतार्थं सर्वथा पुत्रं द्रक्ष्यत्येषा मनस्विनी ॥
मुखमुन्निद्रहेमाब्जकिञ्जल्कसदृशप्रभम् ।
द्रक्ष्यामि देवदेवस्य चक्रिणः शार्ङ्गधन्वनः ॥
वपुर्द्रक्ष्याम्यहं विष्णोर्नीलोत्पलदलच्छवि ।
शङ्खचक्रगदाशार्ङ्गवनमालाविभूषितम् ॥
नेत्रे ते देवदेवस्य पद्मकिञ्जल्कसप्रभे ।
पश्याम्यहमदीनात्मा नष्टदुःखोऽस्मि निर्वृतः ॥
अपि द्रक्ष्यति योगात्मा सौम्येनैव स्वचक्षुषा ।
अपि वा मत्प्रियं ब्रूयात्स्वस्ति चेति च वा वदेत् ।

T_2 स्यातुं न इति चिन्तय, T_1 $G_{1\ 3-5}$ M_4 स्यातुं न इति चिन्तना (for [b]) — (L 2657) Dn Ds_2 सुन्दरं (for लवणं) — (L 2658) Bom Poona eds G(ed.) [अ]द्य (for [आ]शु). — (L 2659) $T_{1\ 2\ 4}$ G $M_{2\ 4}$ न ते कार्या विलम्बना (for [b]). — (L 2660) D_6 $T_{1\ 2}$ $G_{2,\ 5}$ M_3 -विक्रम (for °म.). — (L 2661) M_3 शपेऽहं (for °यं). — (L 2662) D_6 G_2 ब्रवीम्येतच्, M इदं वच्मि (for इदं ब्रूहि) Dn_2 Ds_2 $G_{1\ 4\ 5}$ M_4 पश्यामि (for शपामि). — (L 2666) D_6 T_4 वदस्तु (for यतेत) — (L. 2668) M_3 उद्यम्य (for आरुह्य) — (L 2669) $M_{1\ 3}$ हरिम् (for द्विज) — T_2 om line 2670 — (L 2670) M_3 कृष्णं विष्णुं (for हरिं कृष्ण). — After line 2670, G_4 ins.

20** प्रभुं कृष्णं हृषीकेशं मनसा संस्मरन्हरिम् ।

COLOPHON — *Mention of the Epic* Ds_2 — *Mention of Khila* Dn Ds_2 D_6 $T_{1\ 2\ 4}$ G M — *Adhy name* Dn Ds_2 $T_{1\ 2}$ $G_{1\ 4}$ हंसडिभकोपाख्याने जनार्दनगमनम्, T_4 भविष्यपर्वणि हंसडिभकम्, G_5 जनार्दनगमनम्, M हंसडिभकम् — *Adhy. no* Dn_2 296, Ds_2 297; T_1 G_3 224, T_2 G_1 226; T_4 193, G_2 219, G_4 223; M_{1-3} 189, M_4 225.

(L 2671) Dn Ds_2 T_4 G_3 विष्णुं (for द्रष्टुं) — (L. 2672) M त्वरितं पुण्यवानयम् (for [b]) — (L 2673) D_6 G_3 -दीपित (for -पीडित) M सूर्यांशुप्रतिदीपित. (for [b]) — (L 2674) M_{1-3} ऽमलं (for याति). G_2 त्वरितो हि पिपासया (for [b]) — (L 2675) Ds_2 D_6 $T_{2\ 4}$ $G_{3\ 4}$ M जनार्दन° — (L 2677) Dn Ds_2 G_2 M प्रियो मह्यं; D_6 यथा सत्यं, G_1 तथा नित्यं (for यथा नित्यं). D_6 $M_{1\ 3\ 4}$ कुर्वन् (for कुर्यात्) — (L. 2678) Dn Ds_2 D_6 $G_{2\ 3}$ पश्याम्यह (for पश्येत्यहं) — (L 2679) G_2 सत्यो (for धन्यो) G_2 भुवि (for न च) — D_6 T_2 G_2 om. lines 2680[b]–2685[a] — (L 2682) Dn Ds_2 T_2 $G_{1\ 3-5}$ देवी; T_3 देव (for पुत्रं) — (L 2684) Dn Ds_2 T_2 G_4 M_3 -धन्विनः (for धन्वन°) — (L. 2686) D_6 G_2 -खड्ग- (for -शार्ङ्ग-) — (L 2687) G_3 $M_{2\ 4}$ -सन्निभे (for -सप्रभे). — (L 2689) M_{1-3} द्रक्ष्यसि (for °ति). — (L 2690) G_4 मां (for वा) — (L 2691) D_6 देवम्, T_4 G_2 देहं (for वर्ष्म) Bom Poona eds. G(ed) ततस् (for

द्रक्ष्यामि चक्रिणो वर्ष्म अन्तस्त्रैलोक्यसंयुतम् ।
पादाब्जं चक्रिणो द्रष्टुं त्वरयत्येव मां मनः ॥
वक्षःस्थलं सदा विष्णोः स्फुरद्रत्नप्रभायुतम् ।
पश्यन्निव च गच्छामि स्मरन्ननिशमीश्वरम् ॥
पीतकौशेयवसन लम्बहारविभूषितम् ।
ईषत्स्मिताधरं विष्णुं पश्यामि च पुनः पुनः ॥
स्मरतश्च हरे रूपं लोमहर्षोऽयमीदृशः ।
गच्छतश्च पुरो भाति शङ्खचक्रगदासिमान् ॥
यातीव च पुरो भाति मह्यं देवो जगद्गुरुः ।
एषोऽयमिति मे वक्तुं जिह्वा प्रस्फुरतीव तम् ॥
इदं दुःखतरं मन्ये करं देहीति यद्वचः ।
इदं तत्साहसं मन्ये यद्वचस्तस्य भूपतेः ॥
हंसस्य करदो विष्णुस्तदाज्ञापरिचारकः ।
तस्य सर्वं पुरो गत्वा वक्ताहं किल निर्दयः ॥
मूढानामग्रणीरस्मि निर्लज्जश्च तथा वदन् ।
करं देहि हरे विष्णो हंसस्य यदुपुगव ॥
लवणानि बहून्याशु दातव्यानि करात्मना ।
इति वक्तुं न मे युक्तं पुरतस्तस्य शार्ङ्गिणः ॥
तथापि मित्रभावात्तु वक्तव्यं घोरमीदृशम् ।
कष्टो ह्ययं मित्रभावो मनुष्याणां कृतात्मनाम् ॥
अथ वा सर्वविद्विष्णुः सर्वस्य हृदि संस्थितम् ।
जानात्येव सदा भावं प्राणिनां शोभने रतः ॥
तथा सति न मे दोषो मित्रभावो यतो ह्ययम् ।
सर्वथा रक्षतां विष्णुर्घोरं वक्तु यनस्य मे ॥
द्रक्ष्याम्यहं जगन्नाथं नीलकुञ्चितमूर्धजम् ।
कम्बुग्रीवाधरं विष्णु श्रीवत्साच्छादितोरसम् ॥
स्फुरत्पद्ममहाबाहुं रत्नच्छायाविराजितम् ।
द्रक्ष्यामि चक्रिणं विष्णुं केशवं यादवेश्वरम् ।
अचिन्त्यविभवं देवं भूतभव्यभवत्प्रभुम् ।
आत्ममायं जगन्मायं द्रक्ष्यामि जलशायिनम् ॥
कृतार्थः सर्वथा चाहं भवामि विगतज्वर. ।
अद्य मे सफलं जन्म साक्षात्कृतवतो हरिम् ॥
अद्य मे सफला यज्ञा साक्षात्कृतवतो हरिम् ।
नेत्रे मे सफले विष्णुं पश्यतश्च जगन्मयम् ॥
प्रीतिमानस्तु मे विष्णुर्वक्तुर्घोरस्य कर्मणः ।
उन्मिषन्नेत्रयुग्मेन द्रक्ष्याम्यसकृदीश्वरम् ॥
आमूलमस्तकं विष्णुं पश्यामि च पुनः पुनः ।
पिबामि नेत्रयुग्मेन वपुः कृष्णस्य केवलम् ॥
धारयिष्याम्यहं पांशुं तत्पादप्रभवं शिवम् ।
ततः कृतार्थतां यास्ये स्वर्गमार्गो हि तद्रजः ॥
मेघगम्भीरनिर्घोषं श्रोष्यामि च हरेः स्वरम् ।
पादाब्जं चक्रिणो विष्णोः पश्यामि च जगत्पतेः ॥
पश्यामीव हरेर्वक्त्रं पूर्णेन्दुसदृशप्रभम् ।
हरेरिदं जगद्रूपं पश्यामीव च सर्वतः ॥

अन्तस्). Dn Ds2 -संनिभम्, G2 -संस्थितम् (for -संयुतम्) — (L 2692) T2 G2 मे (for मा). Dn Ds2 D6 T1 G1 M4 त्वरत्येव च मे मन· (for ^{b}) — (L 2693) Cal ed -समायुतम् (for -प्रभा°) — (L 2694) Dn Ds2 T1 चानिशम् (for अनि°). — (L 2699) D6 अतीव (for यातिव). — (L 2700) प्रभुम् (for [इ]व तम्). — (L. 2701) D6 T4 G2 दु खमहं (for °तरं) G1 om (hapl.) lines 2701^{b}–2702^{a} Dn Ds2 तद्वच (for यद्वचः). — (L 2703) D6 T4 G2 4 -पालक, M3 -चारिक (for -चारक) — (L 2705) G2 विष्णुं (for अस्मि) D6 निर्जरश् (for निर्लज्जश्). — (L 2706) G2 हरेर्मन्ये (for हरे विष्णो) — (L 2708) D6 T4 भूपते (for शार्ङ्गिणः) — (L 2710) M3.4 दुरात्मानम् (for कृता°). — (L 2711) D6 T4 B3 4 संस्थितः (for °तम्). — (L. 2713) G2 मित्रभावे यतोऽस्म्यहम् (for ^{b}) — (L 2714) D6 M1 2 क्षमतां (for रक्षतां) — (L 2716) T2 4 G1 3 5 M1 4 दिव्य- (for कम्बु-). G2 श्रीवत्साच्छादितं हरिम् (for ^{b}) — (L 2717) G3 -त्रिभूषितम् (for -विराजितम्) — (L. 2718) Dn Ds2 केशवं (for चक्रिणं) and चक्रिणं (for केशवं). — (L 2719) D6 भव्यं (for देवं) — (L 2720) D6 M4 आत्मेच्छया (for आत्ममायं). Dn Ds2 T1 2 4 G आत्मेच्छया जगद्रक्ष (T4 °च्छायं) (for ^{a}) — (L 2722) M1–3 दृष्टवतो (for कृत°). — (L 2725) D6 कर्तुर्, T1 वक्तुं (for वक्तुर्) — (L 2726) M3 -युग्मे तु (for युग्मेन). Dn Ds2 T1, 2 G1–3, 5 सकृद् (for [अ]सकृद्) — (L 2727) Dn Ds2 D6 T1 2 4 G M3 आमूलमसकृद्विष्णुं (for ^{a}). — (L 2731) T2 हरीश्वरम् (for हरेः स्वरम्) — Ds2 om. lines 2735–2738 — (L 2736) Dn D6 T1, 2, 4 G2–5 M1

प्रसीदतु सदा विष्णुरयुक्तं वक्तुमिच्छतः ॥
आलोलकुण्डलयुगं हरिचन्दनचर्चितम् ।
स्फुरत्केयूररत्नार्चिर्बाहुद्वयविराजितम् ॥
सव्योद्धृतमहाशङ्खं रश्मिजालविराजितम् ।
प्रोद्यद्भास्करवर्णाभं चक्रज्वालावभासितम् ॥
प्रोज्ज्वलत्कङ्कणयुतं तप्तजाम्बूनदाङ्गदम् ।
पीतकौशेयवसनं विस्तीर्णोरस्कमच्युतम् ॥
कदा द्रक्ष्यामि देवेशमिदानीमथ वान्यदा ।
सर्वथा कृतकृत्योऽहं यद्वपुर्द्रष्टुमुद्यतः ॥
नमो मह्यं नमो मह्यं यतो द्रष्टुमहं हरिम् ।
उद्यतोऽस्मि जगन्नाथं बलभद्रकृतास्पदम् ।
द्रक्ष्याम्यवश्यमद्यैव विष्णुं जिष्णुं जगद्गुरुम् ॥
श्रीहारकौस्तुभरुचिस्फुरितोरुवक्षः
पीताम्बरं मकरकुण्डलपङ्कजाक्षम् ।
कृष्णं किरीटदरचक्रगदोर्ध्वहस्तं
तेजोमयं मम हरेर्वपुरस्तु भूत्यै ॥
वेदोदधौ विविधशास्त्रमहाभियोग-
निष्णातशुद्धमतिमन्दरमथ्यमाने ।
उद्द्योतमानममरैरनिशं निषेव्यं
नारायणाख्यममृतं प्रपिबामि चाद्यम् ॥
ध्येयं मुमुक्षुभिरमेयमनाद्यनन्तं
स्थूलं सुसूक्ष्मतरमेकमनेकमाद्यम् ।
ज्योतिस्त्रिलोकजनकं त्रिदशैकवन्द्य-
मक्ष्णोर्ममास्तु सततं हृदयेऽच्युताख्यम् ॥
चिन्तयन्निति विप्रेन्द्रो ययौ द्वारवती पुरीम् ।
मत्वा कृतार्थमात्मानं वाहयन्हयमुत्तमम् ।

Colophon.

वैशंपायन उवाच ।

स निवेदितसर्वस्वो द्वाःस्थेन हि जनार्दनः ।
अथ प्रविश्य धर्मात्मा सुधर्मां वै द्विजोत्तमः ॥
अपश्यद्देवदेवेशं सुधर्माकृतिसंस्थितम् ।
बलभद्रेण संयुक्तमध्यासितमहासनम् ॥
अग्रतःस्थितशैनेयं पार्श्वतःस्थितनारदम् ।
दुर्वाससा कृतकथमुग्रसेनपुरःसरम् ॥
गायद्गन्धर्वमुख्यैश्च नृत्यदप्सरसां गणैः ।
सेव्यमानं महाराज सूतमागधबन्दिभिः ॥
उद्गीयमानयशसं माधवं मधुसूदनम् ।
उद्गीयमानं विप्रैश्च सामभिः सामगैर्हरिम् ॥
दृष्ट्वा प्रीतमना विष्णुं प्रोवाच पुलकच्छविः ।
नाम्ना जनार्दनोऽस्मीति ननाम चरणौ हरेः ।

-युतं (for -युगं). — (L 2737) D_6 G_2 स्फुरत्किरीटकेयूररत्नार्चिर्बाहुराजितम्. — T_1 om lines 2738–2739. D_6 T_4 G_3 om line 2738. — (L. 2738) Dn $G_{3.5}$ सव्ये द्योतन्; T_2 $G_{1.4}$ सव्योद्यत- (for सव्योद्धृत-). T_2 M_{1-3} -महाशङ्ख- (for °ङ्खं). — (L 2739) Dn Ds_2 T_1 $G_{1.3-5}$ M_1 चक्रज्वालाविराजितम्, D_6 °प्रभासितम्, G_2 °महासितम् (for °). — (L. 2742) $M_{1\ 3}$ गोविन्दम् (for देवेशम्). — (L 2747) Dn $T_{1\ 2}$ G श्रीकौस्तुभोद्भवरुचि- (for श्रीहारकौस्तुभ-). — (L 2748) D_6 T_4 -पङ्कजालम्, G_2 °जाङ्गम् (for °जाक्षम्). — (L 2749) Dn Ds_2 T_3 $G_{1\ 3\ 4\ 5}$ M_2 -वर-, T_1 -धर- (for -दर-) D_6 T_4 G_2 -कृतोर्ध्वहस्तम् (for -गदोर्ध्व°). — Ds_2 om lines 2751–2772. — (L 2751) Dn विशद- (for विविध-) T_2 -योगे (for -योग-). — (L 2754) D_6 प्रविशामि (for प्रपिबामि) Dn D_6 वाद्य, $T_{1\ 3\ 4}$ G_{1-4} चाद्य (for चाद्यम्). — (L. 2755) D_6 अनन्तमीड्य; T_4 अनन्तमाद्यं (for अनाद्यनन्तं). — (L. 2757) $M_{2.4}$ -जननं (for °कं). — (L. 2758) G_2 क्षेमं (for अक्ष्णोर्) D_6 T_4 हृदये (for सततं). D_6 T_4 अनिशम्, M_3 घृतम् (for हृदये). — (L 2760) D_6 G_2 कृत्वा (for मत्वा) $M_{1\ 3}$ चोदयन् (for वाह°) D_6 हरिम् (for हयम्).

Colophon om in Ds_2. — *Mention of Khila* Dn Ds_2 $T_{1\ 3\ 4}$ G_{1-4} M. — *Adhy name* Dn हंसडिभकोपाख्यानम्, $T_{1\ 2}$ G_1 M_4 हंसडिभकोपाख्याने जनार्दनकृतार्थताबुद्धिः, T_4 हंसडिभकोपाख्याने विप्रस्य द्वारवतीगमनम्, G_3 जनार्दनकृतार्थताबुद्धि. — *Adhy no* Dn 297; T_1 G_3 225; G_2 220, G_4 224, M_{1-3} 190, M_4 226.

G_3 om the ref. — (L 2761) D_6 T_3 G_2 ततो निवेदितः सद्यो (for °). T_4 G_4 स (for हि). — (L 2763) M_4 अथ प्रविश्य देवेशं (for °). D_6 $T_{1\ 4}$ G_3 $M_{1\ 4}$ -कृत-; $M_{1.3}$ -मध्य- (for -कृति-). — G_3 om lines 2766–2770. — (L 2766) Dn $T_{1\ 2}$ $G_{3\ 4\ 5}$ -पुरस्कृतम् (for -पुरःसरम्). — (L. 2769) D_6 G_2 M उत्कथ्यमानयशसं (for °). — (L. 2770)

बलभद्रं ततो भूयो ववन्दे शिरसा द्विजः ॥
दूतोऽस्मि देवदेवेश हंसस्य डिभकस्य च ।
इति ब्रुवाणं विप्रेन्द्रमिदमाह स माधवः ॥
आस्स्वेदं विष्टरं पूर्वं पश्चाद्ब्रूहि प्रयोजनम् ।
तथेति चाब्रवीद्विप्रो महदासनमास्थितः ॥
वाचा संपूज्य विप्रेन्द्रमपृच्छत्कुशलं हरिः ।
ब्रह्मदत्तस्य राजेन्द्र हंसस्य डिभकस्य च ॥
श्रुतं चापि तयोर्वीर्यं ततः प्रीतो द्विजोत्तम ।
अपि वा कुशलं विप्र पितुस्तव जनार्दन ॥
संगतिश्च गिरीशात्तु श्रुता मे वीर्यतस्तयोः ।
इति श्रुत्वा गिरं विष्णोस्तथेत्याह जनार्दनः ॥
कुशलं ब्रह्मदत्तस्य पितुश्च मम केशव ।
तयोरेव जगन्नाथ हंसस्य डिभकस्य च ॥

भगवानुवाच ।

किमाहतुर्महीपालौ तौ हंसडिभकौ नृपौ ।
ब्रूहि सर्वमशेषेण नात्र शङ्का द्विजोत्तम ॥
वाच्यं वाप्यथ वावाच्यं कर्तव्यमथ वेतरत् ।
श्रुत्वा तस्य विधास्यामो युक्तरूपं द्विजोत्तम ॥
दूतस्य सर्वथा विप्र न वाच्यावाच्यकल्पना ।
यत्कर्म राजनिर्दिष्टं तद्वाच्यं दूतजन्मना ॥
नात्र शङ्का त्वया कार्या वक्तव्यस्येतरस्य वा ।
अतो वद यथाप्रोक्तं ताभ्यां मम जनार्दन ॥
केशवेनैवमुक्तस्तु प्रोवाचाथो जनार्दनः ।
अजानन्निव किं ब्रूषे सर्वं प्रत्यक्षदर्शिवान् ॥
न चास्ति ते परोक्षं तु जगद्वृत्तान्तमच्युत ।
सर्वं हि मनसा पश्यन्कि त्वमात्थ वदेति माम् ॥
विद्वद्भिर्गीयसे विष्णो त्वमेव जगतीपते ।
इच्छया सर्वमाप्नोषि दृष्टादृष्टविवेचनम् ॥
त्वमेवेदं जगत्सर्वं जगच्च त्वयि तिष्ठति ।
न त्वया रहितो ह्येकः पदार्थः सचराचरः ॥
नास्ति किंचिदवेद्यं ते सर्वगोऽसि जगत्पते ।
त्वमिन्द्रः सर्वभूतानां रुद्रः संहारकर्मकृत् ॥
रक्षितासि सदा विष्णो सर्वलोकस्य माधव ।
संसारस्य भवान्स्रष्टा किं त्वमात्थ वदेति माम् ॥
विद्वद्भिर्गीयसे विष्णो ज्ञानात्मेति च माधव ।
प्राणं प्राणविदः प्राहुस्त्वामेव पुरुषोत्तम ॥

D_6 $G_{2\ 4}$ सामगैः सामभिर्हरिम् (for ^{b}). — (L 2772) Cal. ed. चरणे (for चरणौ) — (L 2773) Dn $T_{1,2}$ G $M_{2\ 4}$ देवं, Ds_2 कृष्णं (for भूयो) Ds_2 सहसा (for शिरसा) — M_1 om lines 2775–2776 — (L 2775) D_6 G_2 यादव (for माधव.) — (L 2779) $M_{1,3}$ विप्रेन्द्र (for राजेन्द्र) D_6 ब्राह्मणस्तस्य राजेन्द्र (for ^{a}) — (L 2780) $T_{1,2\ 4}$ $G_{1\ 3,4}$ $M_{2\ 4}$ अत. (for तत). Dn G_5 प्रयोजनमतो द्विज (for ^{b}) — After line 2781, G_5 ins :

21** इति श्रुत्वा गिरं विष्णोस्तथेत्याह जनार्दनः ।

— Dn om (hapl) lines 2782–2783 — (L 2782) D_6 $T_{3\ 4}$ G_3 गिरीशस्य (for °शात्तु) T_1 पतिश्च गिरिशस्तस्य, G_1 M संगतिं च गिरीशस्य (for ^{a}) T_1 श्रुतो; T_2 कृता, $G_{1\ 2}$ M श्रुतं (for श्रुता) — Before line 2784, Dn_2 D_8 ins जनार्दन उवाच T_2 om lines 2784–2785 G_2 om line 2784. D_6 कृष्ण, G_2 om (for भगवान्) — (L 2786) D_6 $M_{1,3}$ उभौ (for नृपौ) — (L 2787) Ds_2 ह्यविशङ्को, G_5 नात्र कार्या (for नात्र शङ्का) — D_6 om (hapl) lines 2788–2789. — (L 2788) Ds_2 यदि (for [अ]प्यथ). Dn_2 $T_{2,4}$ G M_1 चेतरत्; M_4 नेतरम् (for वेतरत्) — (L. 2789) Ds_2 M तत्र (for तस्य) — (L 2790) Dn D_8 $T_{1\ 2\ 4}$ G $M_{2\ 4}$ दूतोऽसि (for दूतस्य) — (L 2791) G_2 धिक् (for यत्) Dn $T_{1,2}$ $G_{1\ 3-5}$ राज्ञा (for राज-) Bom Poona eds G(ed) यत्कर्मकारनिर्दिष्टं (for ^{a}) — (L 2792) D_6 G_2 तत्र किं हि, T_5 न युक्तं हि (for नात्र शङ्का) D_6 T_4 कार्यं (for कार्या) — (L 2793) M_4 अतोऽवदद्यथोक्तं तत् (for ^{a}) Dn $T_{1,2}$ G इह, D_6 T_4 $M_{2\ 4}$ अथ (for मम) — $T_{1\ 4}$ om (hapl) line 2794 — (L 2794) Dn T_2 G स; D_8 M [अ]थ (for [अ]थो) — (L 2795) T_1 किमिदं (for इव किं) M सर्वं- (for सर्वं) — (L 2797) Ds_2 त्वमथ, G_1 माधव (for त्वमात्थ) — (L 2798) D_6 ब्रह्मेव (for त्वमेव) Ds_2 -पति (for -पते) — G_3 om (hapl) lines 2799–2802 — (L 2799) T_2 G_2 आप्नोति (for °षि) — (L 2801) D_6 नास्ति, T_4 ह्यस्ति; M_3 ऽप्यस्ति (for ह्येकः) Ds_2 $M_{1\ 2}$ न ते विरह (M_3 रहित) एवैष (for ^{a}) D_6 पदार्थः स चराचरे (for ^{b}) — (L 2802) G_2 सर्वथा हि (for °गोऽसि) — (L 2804) Ds_2 ब्रह्मासि त्वं (for रक्षितासि) Dn D_6 $T_{1\ 2}$ $G_{1\ 3-5}$ M_2 विष्णु (for विष्णो) — Ds_2 G_3 $M_{1\ 3\ 4}$ om. (hapl) lines 2806–2809. — (L. 2806)

शब्दं शब्दविदः प्राहुस्त्वामेव पुरुषोत्तम ।
तथा सति हृषीकेश किं त्वमात्थ वदेति माम् ॥
तथापि शृणु देवेश चोदितोऽसि यतस्त्वया ।
वदेत्यसकृदेवैतत्तस्माद्वक्ष्यामि माधव ॥
राजसूयेन यागेन ब्रह्मदत्तोऽद्य यक्ष्यति ।
तदर्थं प्रेषितस्ताभ्यां हंसेन डिभकेन च ॥
करार्थं यदुमुख्येभ्यस्तव चामन्त्रणाय च ।
लवणं बहु देयं ते यज्ञार्थं तस्य केशव ॥
इत्यर्थं प्रेषितस्ताभ्यां करं देहि तदाज्ञया ।
इदमप्यपरं ताभ्यामुक्तं शृणु जगत्पते ॥
लवणानि बहून्याशु प्रगृह्य त्वरितो भवान् ।
आगच्छतु तयो राज्ञोः सेयं केशव वाग्विभो ॥
इत्युक्तवति विप्रेन्द्रे दूते तत्र तयोर्नृप ।
प्रहस्य सुचिरं कृष्णो बभाषे दूतमीश्वरः ॥
शृणु दूत वचो मह्यं युक्तमुक्तं द्विजोत्तम ।
करं ददामि ताभ्यां तु करदोऽस्मि यतो नृप ॥
धाष्टर्यमेतत्तयोर्विप्र मत्तो यत्तु करग्रहः ।
अहो धाष्टर्यमहो धाष्टर्यं तयोः क्षत्रियबीजयोः
इदमश्रुतपूर्वं मे मत्तो यस्तु करग्रहः ।
इत्युक्त्वा केशवो दूतमिदमाह स यादवान् ॥
हास्यमेतद्यदुश्रेष्ठा मत्तो यत्तु करग्रहः ।
यष्टासौ राजसूयस्य ब्रह्मदत्तो महीपतिः ॥
तौ तं याजयितारौ च हंसो डिभक एव च ।
वोढा किल यदुश्रेष्ठा लवणस्य दुरात्मनोः ॥
करदो वासुदेवोऽहं जीवामि यदुसत्तमाः ।
हास्यं हास्यमिदं हास्यं शृणुध्वं यादवा वचः ॥
इत्युक्तवति दाशार्हे बलभद्रपुरोगमाः ।
यादवाः सर्व एवैते हासाय समवस्थिताः ॥
करदः कृष्ण इत्येवं ब्रुवन्तः सर्वसात्वताः ।
हासं मुमुचुरत्यर्थं तलं दत्त्वा परस्परम् ।
तलशब्दो हास्यशब्दो रोदसी पर्यपूरयत् ॥
स च विप्रो नृपश्रेष्ठ निन्दयन्मैत्रमात्मनः ।
अहो कष्टमहो कष्टं दौत्यं यत्कृतवानहम् ।
इति लज्जासमाविष्टस्तूष्णीमासीदवाङ्मुखः ॥

Colophon.

Dn T_{1} $G_{1, 5}$ निस्यं (for विष्णो) M_{2} ज्ञानात्मेतीह केशव (for ^{b}). — G_{2} om (hapl) lines 2807-2811 — (L. 2807) T_{2} प्राणमिदं (for °विद·) D_{6} $T_{2, 4}$ M_{2} प्रोचुस् (for प्राहुस्) M_{2} त्वामेव जगतीपते (for ^{b}) — (L 2810) D_{6} T_{4} यथा (for यतस्) Ds_{2} तथापि श्रूयतां देव (for ^{a}). — (L 2812) Ds_{2} D_{6} देवेश ; T_{4} देवेन , G_{2} M यज्ञेन (for यागेन) G_{2} ऽत्र (for ऽद्य) Dn $T_{2, 4}$ $G_{1, 2}$ M_{4} यक्ष्यते (for °ति) — (L. 2813) D_{6} G_{2} ततोऽहं , T_{4} तयाहं (for तदर्थं) Dn_{2} Ds_{2} om lines 2813^{b}–2816^{a}. — (L 2817) Dn $T_{1, 2}$ G M त्वम् (for अपि) — (L. 2819) D_{6} T_{4} तयोराज्ञां (for तयो राज्ञो) — (L 2820) इत्युक्ते तत्र विप्रेन्द्रे (for ^{a}). — (L. 2823) $M_{1, 2}$ नृपे (for नृप) — (L 2824) Ds_{2} अन्यत् ; T_{4} एव (for एतत्). $T_{1, 2}$ $G_{1, 2, 4, 5}$ यस्तु (for यत्तु) — (L 2825) D_{6} वीर्यं (for the second धाष्टर्यं) Dn_{2} Cal ed -वरियो (for -बीजयो) — (L 2826) Ds_{2} यश्च , D_{6} M_{2} यत्तु (for यस्तु) — M_{1} om (hapl) lines 2827-2828 T_{4} om line 2827 — (L 2827) Dn_{2} Ds_{2} D_{6} यादवः (for °वान्) — G_{1} M_{4} om. (hapl) line 2828 — (L 2829) Ds_{2} राजसूयेन (for °यस्य) — (L. 2831) Dn T_{1}, $G_{2, 4}$ $M_{3, 4}$ यदुश्रेष्ठो (for °ष्ठा) Ds_{2} $G_{1, 5}$ दुरात्मनः. — (L 2832) Dn $T_{1, 2}$ $G_{1, 3-5}$ जितोऽस्मि (for जीवामि) M_{3} नृप- (for यदु-) — M_{4} om lines 2833-2834 — (L 2833) T_{3} अस्य (for the first हास्यं) Dn Ds_{3} D_{6} $T_{1, 2, 4}$ M_{1-3} भूय· (for the third हास्यं) — (L 2834) Dn $T_{1, 2}$ $G_{1, 3-5}$ M_{2} देवेशे (for दाशार्हे) — (L 2835) Ds_{2} शमाय (for हासाय) — (L 2837) Ds_{2} हास्यं (for हासं) Ds_{2} तालान् (for तलं) — (L 2838) बलदर्पा· (for तलं दत्त्वा) — (L 2839) Ds_{2} स विप्रो नृपतिश्रेष्ठ (for ^{a}) $G_{1, 2, 4}$ M_{4} नन्दयन् , G_{3} निदधन् , G_{5} निन्दया (for निन्दयन्) Dn Ds_{2} D_{6} $T_{1, 2, 4}$ G M_{4} मित्रम् (for मैत्रम्) — (L 2841) G_{2} -समायुक्तस् (for °विष्टस्). M_{1} अधोमुख (for अवाङ्मुख).

COLOPHON — *Mention of the Epic* Ds_{2} — *Mention of Khila* Dn Ds_{2} D_{6} $T_{1, 2, 4}$ G M — *Adhy name* · Dn Ds_{2} $T_{1, 2}$ G_{1} हंसडिभकोपाख्याने वासुदेववाक्यम् , G_{3} वासुदेववाक्यम् , M हंसडिभकम्. — *Adhy no* Dn 299, Ds_{2} 298 , T_{1} G_{3} 226 ; T_{2} G_{1} 228 , T_{4} 195 ; G_{4} 121 ; G_{4} 225 ; G_{5} 227 , M 191.

वैशंपायन उवाच ।

हासं कुर्वत्सु तेष्वेवं केशवः केशिसूदनः ।
उवाच वचनं दूतं गच्छ मद्वचनाद्द्विज ।
तावित्थं हंसडिभकौ ब्रूहि त्वरितविक्रम ॥
बाणैर्दास्यामि निशितैः शार्ङ्गमुक्तैः शिलाशितैः।
नवनीतात्तकुसुमैः कङ्कपत्रैः सुवाजितैः ॥
असिना वाथ दास्यामि निशितेन महात्मनोः।
शिरो वश्छेत्स्यते चक्रं मत्करप्रहितं बलि ॥
यो वरं दत्तवाञ्शर्वो युवयोर्धार्ष्ट्यकारणम् ।
स एव रक्षिता वां स्यात्तं जित्वा वा निहन्म्यहम् ॥
देशोऽयं संविधातव्यो यत्र नः संगतिर्भवेत् ।
तत्र गन्ता तथा चास्मि सबलः सहसैनिकः ॥
भवन्तौ निर्भयौ भूत्वा गच्छेतां सबलौ नृपौ ।
पुष्करे वा प्रयागे वा मथुरायामथापि वा ।
तत्राहं सबलो याता नात्र कार्या विचारणा ॥
अथ वा मित्रभावाच्च वक्तुमेवं त्वमक्षमः ।
न शक्यं यत्त्वया वक्तुं तत्तु वक्ष्यति सात्यकिः ।
त्वया सह ततो गत्वा साक्षिभूतो भव द्विज ॥
इदं च जाने विप्रेन्द्र स्नेहो मम सदा त्वयि ।
तेन त्वं विजयी भूयाः संसारे दुःखसंकुले ।
मत्कथापरमो नित्यं सदा भव जनार्दन ॥

Colophon

वैशंपायन उवाच ।

इत्युक्त्वा ब्राह्मणं कृष्णः सात्यकिं पुनराह च ।
गच्छ शैनेय विप्रेण ब्रूहि मद्वचनात्तयोः ॥
यन्मयोक्तमशेषेण वद गत्वा तयोर्यदो ।
यथा नः संगतिर्युद्धे तथा वद बलाद्यदो ॥
धनुरादाय गच्छ त्वं बद्धगोधाङ्गुलित्रवान् ।
एकेनाश्वेन गच्छ त्वमसहायो यदूत्तम ॥
सात्यकिस्तं तथेत्युक्त्वा हयमारुह्य शीघ्रगम् ।
गन्तुमैच्छत्ततो राजन्नसहायः स सात्यकिः ॥
जनार्दनं विसृज्याशु दूतं तं यादवेश्वरः ।
अहो धार्ष्ट्यमहो धार्ष्ट्यमित्युवाच जनार्दनः ॥
नमस्कृत्य ततो दूतो माधवं यादवेश्वरम् ।
स ययौ साल्वनगरं शैनेयेन सह द्विजः ॥
ततः प्रविश्य धर्मात्मा ब्राह्मणो ब्रह्मवित्तमः ।
आसनं महदास्थाय विसृज्य यदवे पुनः ।
आस्ते यथासुखं विप्रः शैनेयेन समन्वितः ॥
अथ तं हंसडिभयोर्दर्शयामास सात्यकिम् ।
दूतोऽयं सात्यकिः प्राप्तः सव्यो बाहुरयं हरेः ॥

(L. 2842) Ds2 T4 G2 हास्यं (for हासं). — (L 2843) Dn1 Ds2 D6 T4 G2 4 M1–3 वद (for द्विज) — Dn Ds2 om line 2846 —(L 2846) D6 M1–2 -सुमुखै (for -कुसुमै). T1 नवनीतार्द्रकुसुमै (for °) — (L 2847) Ds2 महामते ; D6 T1 4 G2 M1–3 °त्मना (for °त्मनो) — (L. 2848) Ds2 मत्करात् (for °र-) Ds2 तयो , D6 बलात्, T2 G1 M1 4 बलिम् (for बलि) — (L 2849) Dn T1, 2 4 G1 4 5 रुद्रो (for शर्वो) Ds2 वर दत्तं च शर्वेण (for °). — (L 2852) T4 गत्वा (for गन्ता) Dn T1 2 G1, 3 5 -वाहन (for सैनिक) — (L 2855) Ds2 यामि (for याता) — (L 2856) Dn T1 2 G1–3 5 न ते क्षमम्, D6 T4 M1 न च क्षम॰ , G4 न च क्षमम् (for त्वमक्षम) — (L 2859) Ds2 इदं हि वक्ष्यते विप्र (for °) M1 3 तव (for त्वयि). — (L 2860) Dn Dn G1, 2 4 M4 भूत्वा ; Ds2 भूतः (for भूया.)

Colophon. — *Mention of the Epic* Ds2 — *Mention of Khila*. Ds2 D6 T1, 2 4 G M — *Adhy. name* Dn2 G4 M1–3 हसडिभकोपाख्यानम् Ds2 M4 हंसडिभकम् ; T1, 2 G1 हंसडिबकोपाख्याने वासुदेवकथनम्, G3 वासुदेवकोपकथनम् — *Adhy no* Dn Ds2 299, T1 G3 227 ; T2 G1 219, T4 196, G2 222, G4 126, G5 228, M 192

Dn1 G2 om ; Ds2 भगवान् (for वैशंपायन). — (L. 2862) M1, 3 विष्णु (for कृष्ण.) Dn2 इत्युक्त्वा भगवान्विष्णु (for °) Dn G1, 4 5 स (for च) — (L 2863) Dn G1 3–5 गत्वा , G4 हत्वा (for गच्छ) — (L 2864) G1 5 [अ]नयोर् (for तयोर्) Dn Ds2 G4 पुर॰ , D6 यथा , T4 G2 यदा (for यदो). — (L. 2865) Dn तदा ; T4 यदा (for यदो) — (L. 2871) M3 [उ]क्त्वा च (for [उ]वाच). M4 जनार्दनम् — T2 G1 3 om lines 2872–2876 — (L. 2872) Dn T1 G5 M4 तदा दूतो , Ds2 D6 T2 G2 जगन्नाथं (for ततो दूतो). Dn Ds2 D6 T1, 4 G2 4 M माधवं माधवेश्वरम् (for °) —(L 2873) Dn D6 समन्वित॰ (for सह द्विज॰). — D6 om (hapl) lines 2874–2876. — (L. 2875) Dn Ds2 T1, 4 G2, 4 यादवे (for य°). —(L 2876)

तस्य तद्वचनं श्रुत्वा हंसः प्राह वचस्तदा ।
श्रुत्या समागतः पूर्वमद्य दृष्टो मया त्वसौ ॥
धनुर्वेदे च वेदे च शस्त्रशास्त्रे तथैव च ।
निपुणोऽयं सदा शूर इत्येवमनुशुश्रुमः ।
अद्य दृष्टिपथं प्राप्तः प्रीतिं मे विदधात्यसौ ॥
कुशलं वासुदेवस्य बलदेवस्य चापि वा ।
कुशलाः सात्वताः सर्वे उग्रसेनपुरोगमाः ॥
तथेति सात्यकिः प्राह मन्दमुन्मिषिताननः ।
ततो जनार्दनं प्राह हंसो वाक्यविशारदः ॥
अपि दृष्टस्त्वया चक्री सिद्धं नः कार्यमीहितम् ।
वद सर्वमशेषेण मा वृथा कालमत्यगाः ॥

Colophon.

वैशंपायन उवाच ।

इत्युक्तवति हंसे च धर्मात्माथ जनार्दनः ।
उवाच प्रसहन्वीरः स्तुवन्नारायणं तदा ॥
अद्राक्षमद्राक्षमहं जनार्दनं
करस्थचक्रं वरशङ्खधारिणम् ।
आतप्तजाम्बूनदभूषिताङ्गं
स्फुरत्प्रभाद्योतितरत्नधारिणम् ॥
अद्राक्षमेनं यदुभिः पुरोगतं
संसेव्यमानं मुनिवृन्दमुख्यैः ।
संस्तूयमानं प्रभुबन्दिमागधै.
स्मितप्रवालारुणपल्लवाधरम् ॥
अद्राक्षमेनं कविभिः पुरातनै-
र्विविच्य वेद्यं विधिवत्सहामरैः ।
प्रफुल्लनीलोत्पलशोभितश्रियं
विनिद्रहेमाब्जविराजितोदरम् ॥
भूयोऽहमद्राक्षमजं जगद्गुरुं
प्रसादयन्तं वचनेन यादवान् ।
निरूपयन्तं विधिवन्मुनीश्वरैः
प्रवृद्धवेदार्थविधि पुरातनैः ॥
अद्राक्षमद्राक्षमहं पुनः पुनः

D_n T_1 $G_{2, 4}$ सुखं यदा (for यथासुखं) — (L 2877) D_6 T_1 G_3 M_{1-3} अथ हंसडिबकयोर् (for ^{a}) — (L 2878) T_2 ऽहं (for ऽयं). D_6 T_4 G_2 असौ (for अयं) — (L 2880) D_{n2} D_{s2} G_2 M_4 श्रुत , T_1 $G_{3, 5}$ दूत्या , T_2 $G_{1, 4}$ दूत्यं (for श्रुत्या) G_1 समागतं , G_2 M_4 °गम. (for °गतः) — (L 2881) G_5 शास्त्रे (for वेदे). D_n $T_{1, 2}$ $G_{1, 3}$ M_4 शास्त्रे शस्त्रे , D_{s2} शास्त्रे शास्त्रे , G_5 वेदशास्त्रे (for शस्त्रशास्त्रे) — (L. 2882) D_n थः (for ऽयं) D_{s2} M_4 धीर ; D_6 T_4 M_{1-3} वीर (for शूर) — (L. 2883) D_n $T_{1, 3}$ G_1 ततो ; D_{s2} D_6 T_4 M_4 अथो , G_2 अहो , M_3 अतो (for अद्य) T_2 प्राप्य (for प्राप्त). D_{s2} नो , Bom Poona eds G(ed) नौ (for मे). — (L 2884) D_{s2} D_6 T_4 G M बलभद्रस्य (for °देवस्य) D_{s2} वा पुनः (for चापि वा) — (L 2886) G_2 ततो हि (for तथेति) D_{s2} $G_{2, 3, 5}$ मन्दमुन्मथिताननः (for ^{b}). — (L 2888) G_4 संनद्धः (for सिद्धं नः) — (L 2889) T_2 अत्यगात् (for °गाः)

Colophon — *Mention of the Epic* D_{s2} — *Mention of Khila* D_n D_{s2} $T_{1, 2, 4}$ G M — *Adhy name* D_n D_{s2} $T_{1, 2}$ G_1 हंसडिभकोपाख्याने हंसवाक्यम् ; G_3 हंसवाक्यम् , $M_{2, 4}$ हंसडिभकम् — *Adhy no* D_n D_{s2} 300 , T_1 G_3 228 , T_2 G_1 230 , T_4 197 , G_2 123 , G_4 227 ; G_5 229 ; M 193 .

D_6 $T_{1, 2, 4}$ $G_{1, 2, 4, 5}$ M om. lines 2890–2891 with the ref Before, line 2892, D_{n1} $T_{2, 4}$ G_3 M ins जनार्दनः. — (L 2892) T_3 G_1 महाधन (for जनार्दनं). — (L 2893) D_{s2} $T_{1, 4}$ $G_{2, 3}$ M हस्तस्थ- (for करस्थ-) T_2 $G_{1, 4, 5}$ -शार्ङ्गं (for -चक्रं) D_{s2} $T_{1, 2, 4}$ G M -चक्र- (for शङ्ख-). — After line 2895, D_6 ins :

22** अद्राक्षमेनं यदुभिः पुरातनै-
र्विविच्य वेद्यं विधिवत्सहामरैः ॥
प्रफुल्लनीलोत्पलशोभितश्रियं
विनिद्रहेमाब्जविराजितोदरम् ॥

— (L. 2896) D_n $T_{1, 2}$ $G_{1, 3-5}$ यतिभि , M_4 कविभिः (for यदुभि) D_n D_{s2} G_2 M_4 पुरातनै , D_6 पुरागतैः ; T_4 G_4 पुरोगतै (for °गतं) — (L 2898) D_{s2} प्रभुसूतमागधैः ; T_4 G_2 प्रभवादि° , G_1 प्रभुभि स° , $G_{4, 5}$ मुनिवृन्दमुख्यैः (for प्रभुवन्दिमागधै.) — (L 2899) D_6 लसत्- (for स्मित-). D_{s2} G_3 -प्रवालाधर (for °रुण-) D_{s2} -पल्लवारुणम् (for °धरम्) — D_6 om. lines 2900–2903. — (L 2900) M_{1-3} कृतिभि (for कविभिः). — (L 2902) D_n $G_{3, 5}$ -शोभितं श्रिया (for -शोभितश्रियं) — (L 2904) D_6 M_{1-3} अमुं , G_3 इमं (for अजं) — (L 2905) D_{s2} G_3 प्रमोदयन्तं (for प्रसाद°) — (L 2906) T_3 विविधं (for विधि ; -वन्) — (L 2907) D_{s2} $G_{1, 4, 5}$ प्रवृत्त- , D_6 T_4 प्रबद्ध- G_2 प्रबुद्ध- , $M_{1, 2}$ विवृद्ध- , M_3 वेदाब्ज- (for प्रवृद्ध-). T_3

समस्तलोकैकहितं प्रभुं हरिम् ।
वसन्तमस्मिञ्जगतो हिताय
जगन्मयं तं परिभूय शत्रून् ॥
भूयोऽप्यपश्यं सह यादवेश्वरै-
र्विक्रीड्य विक्रीड्य विहारकाले ।
रमन्तमीड्यं रमयन्तमीश्वरा-
न्यदूत्तमान्यादवमुख्यमीश्वरम् ॥
भूयोऽप्यपश्यं सरसीरुहेक्षणं
सार्धं तया भीष्मतनूजया हरिम् ।
वसन्तमम्भोनिधिशायिनं विभुं
भक्तप्रियं भक्तजनास्पदं हरिम् ॥
अद्राक्षमद्राक्षमहं सुनिर्वृतः
पिबन्पिबंस्तस्य वपुः पुनः पुनः ।
नेत्रेण मीलद्विवरेण केवलं
धन्योऽहमेवेति तदा व्यचिन्तयम् ॥
अद्राक्षमम्भोजयुगं दधानं
प्रभुं विभुं भूतभवप्रभावनम् ।
आद्यं ककुद्मानमुरुं विभावसुं
संस्मृत्य संस्मृत्य तमेव निर्वृतः ॥
अद्राक्षं जगतामीशं वक्षोराजितकौस्तुभम् ।
वीज्यमानं हरिं कृष्णं चामराणां शतैः सदा ॥
युवां विद्वेषयुक्तेन चेतसा यादवेश्वरम् ।
स्मरन्तं सर्वदा विष्णुं क वा तौ क च वेति वा ॥
कुतो द्रक्ष्यामि तौ मन्दौ कुतो वा मत्पुरोगतौ ।
ध्यायन्तमित्थं देवेशं करसंश्रवणात्तदा ॥
हसन्तमेवमद्राक्षं करं देहीत्यतः परम् ।
वदन्तं नारदे वाचं दुर्वाससि यतीश्वरे ॥
ब्रह्मसूत्रपदां वाणीं दापयन्तं मुनीश्वरान् ।
दृष्ट्वा दृष्ट्वा हरिं देवं पुनः पुनरचिन्तयम् ॥
असाध्यमिदमारब्धं ताभ्यामिति नृपोत्तम ।
नारब्धव्यमिदं कार्यमितःप्रभृति भूमिप ॥
निवृत्ता सा कथा हंस यत्करग्रहणं तव ।
एष तेऽशेषमखिलं वक्ष्यत्येव हि सात्यकिः ॥
एतद्वचनमाकर्ण्य हंसः क्रुद्धोऽब्रवीद्वचः ।
अरे ब्राह्मणदायाद का नाम तव वागियम् ।
आवयोः पुरतो वक्तुं त्रैलोक्यं जेतुमिच्छतोः ॥
मायया त्वां भ्रमत्येष कृष्णो लीलाविधानवित् ।
तं दृष्ट्वा भ्रम एवैष तव संजायते महान् ॥

770-771 — (L 770) B_1 Dn मूढानां, D_6 भूतात्मा (for मूढात्मा) — (L 771) K_3 दीप्यन्त (for तिष्ठन्तं) — (L 773) D_3 $G_{3.4}$ बुद्धि- (for बुद्ध्या) — (L 775) $\tilde{N}_2$ [ए]व, $G_{3.4}$ [अ]नु- (for [अ]व-) — (L 776) अयुक्तात्मा (for अयोगात्मा) K_3 D_1 सत्य- (for सर्व-) $\tilde{N}_2$ V_1 B Ds $D_{2.6}$ G_4 -प्राणहरैर्; V_3 °चरो Dn °चरैर्, G_3 -प्राणिहरैर् (for प्राणधरैर्) — (L 777) D_2 भूतयोर्, D_3 रूपतो, D_5 भूतये (for °यो) K_1 विश्वेशो, V_3 B_3 Ds भूतेशं (for °शो) K_2 $\tilde{N}_2$ D_4 भूतयोर्भुवि विश्वेशो (for ^{a}) — (L 779) $B_{1.2}$ Ds $D_{5.6}$ आस्थाय, $G_{3.4}$ आदाय (for आधाय) B_2 (marg) योगेषु (for गात्रेषु) — (L 780) $K_{1.2.4}$ Dn $D_{1.2.4}$ G_3 ब्रह्मन् (for ब्रह्मा) — (L 781) $K_{1.2}$ $\tilde{N}_2$ $V_{1.3}$ B Dn Ds $D_{1.3.4}$ (marg.) $_6$ $G_{3.4}$ -संस्थानाज् (for °नं) K_3 $D_{2.4}$ चन्द्र-, Dn चान्द्रं (for तेजो) $G_{3.4}$ ज्योतिस्थानां म(G_3 बृ)-हत्तदा (for ^{b}) — (L 782) B_3 (marg as above) गायत्र्या नयनात्तदा (for ^{b}) — (L 784) Dn_2 युक्त (for ऽव्यक्त.) G_4 ध्रुवेन्द्रिय (for ध्रुवोऽव्ययः) D_3 शाश्वतो ध्रुवमव्यय (for ^{b}) — (L 785) $\tilde{N}_2$ $B_{1.2}$ Ds D_5 यश् (for न) V_1 सर्वेन्द्रियगुणैर्युक्तो (for ^{a}) — (L 786) V_3 चन्द्रांशुसलिलप्रख्यैर् (for ^{a}) $K_{1.2}$ $\tilde{N}_2$ $V_{1.3}$ B Dn Ds $D_{1.3.4.6}$ वर्ण-, D_6 (marg) बल-; G_4 जल- (for ब्रह्म-). — (L 787) B_2 ऋत्विजं (for ऋग्वेदं). — (L 790) B_3 तत्त्वत (for तत्पदम्) — (L 792) K_3 मनोमयै, B_3 °हरै, Ds_1 D_6 °रमै., D_1 °गतै (for °भवैः). D_3 तैर्भावैश्च मनोरमै (for ^{b}) — (L 793) Dn $G_{3.4}$ योग· (for भागः) — (L 794) K_2 D_4 -कण्ठान्तरे, D_3 -नाभ्यन्तरं, D_6 -बाह्वन्तरे (for °न्तरं) $K_{1.2}$ D_4 ऋग्भागसंभवं ततः, K_3 °ग संभवेत्तदा, $G_{2.4}$ °गस्तु प्रकीर्तित (for ^{b}) — (L 795) $\tilde{N}_2$ $V_{1.3}$ पार्श्वौ (for पार्श्वं). — (L 796) B_2 बस्तिनाभि-, G_4 यस्मिञ्शीर्षं- (for बस्तिशीर्षं) — (L 797) G_3 लोक- (for यज्ञ-) G_4 संभूतो लोककल्पित (for ^{b}) — (L 798) D_6 यज्ञ- (for दिव्य-) K_3 D_1 -रूपस्तु (for -रूपाभः). Dn_2 D_2 सम्भृतो (for सभूतो) K_4 संभृतो हिमवत्पदात, $G_{3.4}$ संभूतो ह्य(G_4 °तोऽप्य)जरात्परात (for ^{b}) — (L 799) B_3 Cal ed -सत्त्व (for -भूत-). — (L 801) Ds ब्रह्मभूतं; D_1 °बोध्यं, D_3 पुरुषं च, Bom ed. G(ed.) ब्रह्मचर्यं (for °चर्यं) — (L 803) K_3 सद्भिरेव, D_3 सिद्धैरेवं (for सिद्धिरेव) — (L 804) K_4 $\tilde{N}_2$ B_3 Ds D_6 निर्मुक्त· (for °क्तै) D_5 -कामेभ्यो, G_3 पापेभ्यो (for -कर्मभ्यो). B_2 विमुक्त· सर्वपापेभ्यो (for ^{a}) — Before line 805, $G_{3.4}$ ins जनमेजय. — (L 805) D_3 वैष्णवो यज्ञ इत्येवं (for ^{a}) D_2 G_3 स्तुवन्ते (for ब्रुवते). — (L. 806)

ब्राह्मणा नियमश्रान्ता वेदोपनिषदे पदे ॥
जनमेजय उवाच ।
चेतसस्तूपलम्भो हि मनोग्राह्यस्य कामतः ।
कारणं श्रोतुमिच्छामि यथातत्त्व महामुने ॥
वैशंपायन उवाच ।
न ह्यस्य कारणं किंचिद्ग्राह्यं भवति भारत ।
अन्तर्गतं कारणं तु शारीरं मानसं नृप ।
येन वेद्यं विदुर्मर्त्या ब्राह्मणा. सशितव्रताः ॥
अवेद्यमपि वेद्यं च शक्यं वेत्तुं न कर्मणा ।
ब्राह्मणेन विनीतेन सदा ब्रह्मनिषेविणा ।
सदा विदिततत्त्वेन सिद्धिहेतोर्महीपते ॥
सदा चैव शुचिर्भूत्वा नियतो ब्रह्मकर्मणा ।
उपतिष्ठेत स गुरुं बद्धाञ्जलिपुटो द्विजः ॥
सायं प्रातश्च तत्त्वज्ञो मोक्षकर्माणि कारयेत् ।
विनीतो ब्रह्मभावेन समाहितमतिर्मुनिः ॥
संप्रपद्येत मनसा वैष्णवं पदमुत्तमम् ।
ध्यायन्नेव प्रसीदेत समाहितमतिर्द्विजः ॥
स गच्छेत्परमं ब्रह्म निर्विकारेण चेतसा ।
अपुनर्भवभावज्ञो निर्ममो भावबन्धनात् ॥
तदेवाक्षरमित्याहुर्यत्तद्ब्रह्म सनातनम् ।
न हि तत्कर्मयोगेन विद्यायोगेन दर्शितम् ॥
ब्राह्मणानां विनीतानां वैष्णवे पदसंचये ।
सर्वद्रव्यातिरिक्तानां कामयोगविगर्हिणाम् ॥
अपुनर्भाविनां लोकाः कर्मयोगप्रतिष्ठिताः ।
अनादानेन मनसा राजन्कर्मणि कर्मणि ॥
आदानाद्बध्यते जन्तुर्निरादानात्प्रमुच्यते ।
ब्राह्मणेभ्यः क्रियाप्रप्तिर्जन्तोः पूर्वाज्जनाधिप ॥
मुक्तश्चेन्द्रियबन्धेन प्रातश्च परमं पदम् ।
न भूयः पुनरायाति मानुषं देहविग्रहम् ॥

Colophon

जनमेजय उवाच ।
उपसर्गं च योगं च ध्यातव्यं चैव यत्पदम् ।
सिद्धिं सिद्धिगुणांश्चैव श्रोतुमिच्छामि तत्त्वतः ॥
वैशंपायन उवाच ।
शृणु विस्तरतः सर्वं यथा पृच्छसि मेधया ।

$K_{1\ 2}$ D_3 ब्राह्मणा नियता शान्ता (for ^{a}).– After line 806, B_2 ins. an addl colophon mentioning पौष्करम् as sub-parvan — G_3 om the ref — (L 807) Bom ed मनोग्राहस्य कामत (for ^{b}) — (L 808) Ds_1 यथातथ्यं (for °तत्त्व) B_2 Dn यथा त्वं मन्यसे मुने (for ^{b}) — (L 809) $K_{1\ 2}$ D_4 वाक्य भवति कारणम् (for ^{b}). — K_2 $G_{3\ 4}$ om (hapl) lines 813-815 — (L 813) D_1 सदा चैव शुचिर्भूत्वा (for ^{a}) K_1 V_3 D_4 -निषेवता ; D_2 -निवेदिना (for -निषेविणा). — (L 816) $B_{1\ 3}$ Cal ed उपतिष्ठेच्च (for °ष्ठेत). D_1 सतत (for स गुरुं) Dn_2 G(ed) -परो (for पुटो) — (L 817) मोक्षकर्म च कारयन् (for ^{b}) — D_5 om. (hapl) lines 819-820. — (L 820) K_4 ध्यायते च , $\tilde{N}_2$ $B_{2\ 3}$ ध्यानेन च (for ध्यायन्नेव) — (L. 822) $B_{1\ 3}$ -तत्त्वज्ञो (for भावज्ञो) K_3 भव- (for भाव-) — (L 824) K_1 Dn D_2 तर्हि तत् ; B निहितं (for न हि तत्) D_3 -त्यागेन (for यो°) K_4 ब्रह्म केनापि दर्शितम् (for ^{b}). — (L 825) G_3 च सर्वेषां (for विनीतानां) — (L. 826) V_3 सर्वदम्भातिरिक्तानां , $B_{2\ 3}$ सर्वत्र व्यतिरि° (for ^{a}), B_2 कर्म- , Cal. ed. काल- (for काम-) V_1 D_1 -विगर्हितम् , Ds विगर्ह(Ds_2 °र्हि)णम् (for -विगर्हिणाम्). — (L 827) V_1 अपुनर्बोधिताल्लोकान् , D_3 °र्भविणां लोकाः (for ^{a}) K_3 कर्माङ्गेन , B_2 कर्मयोगा , Dn Ds $D_{3\ 6}$ °योगे (for °योग-) — (L 828) D_8 आच्छादितेन मनसा (for ^{a}). — (L 829) Cal ed अनादानात् (for निरा°) — (L. 830) V_1 B_1 Dn $D_{2\ 5}$ क्रियावाप्तिर् (for °प्राप्तिर्) K_2 सर्वो , K_3 D_1 प्राप्ता , B_2 D_5 पूर्वा , D_4 पूर्वो , D_6 पूर्वं (for पूर्वाज्) K_1 $\tilde{N}_2$ V_3 G_4 जन्तो पूर्वान्नराधिप , V_1 G_3 जन्तोः पूर्वं नरा° (for ^{b}) — (L 832) K_2 D_1 मानुषं कर्मबन्धनम् ; G_3 मानुषेष्वेव विग्रहम् (for ^{b})

Colophon — *Mention of the Epic* Ds_2 D_5. — *Mention of Khila* K_1 $V_{1\ 3}$ B Ds_1 D_1 — *Sub-parvan* K_1 $V_{1\ 3}$ B Ds $D_{1\ 2\ 5,\ 6}$ पौष्करम् ; Dn D_4 पु(D_4 पौ)ष्करप्रादुर्भाव· — *Adhy no* K_3 D_1 (marg) 91 , $V_{1\ 3}$ 293 , Dn 11 , Ds_2 202 , D_3 218 , D_4 128 ; G_3 344 , G_4 342

(L 833) G_3 उपसर्गश्च योगश्च (for ^{a}). K_4 ज्ञातव्य (for ध्या°) K_2 सत्पदम् (for यत्प°) G_3 ध्यातव्यश्चैव यत्परः (for ^{b}) — After line 833, B_1 Bom, Poona eds,

उपपन्नेन मनसा ब्रह्मादीनामनेकधा ॥
पञ्चेन्द्रियगुणांस्त्यक्त्वा पश्यतो ब्रह्मणो नृप ।
योगयुक्तेन मनसा पञ्चेन्द्रियनिवासिनः ॥
ब्रह्मणश्चिन्तयानस्य ब्रह्मयज्ञं सनातनम् ।
बहुरूपमनैश्वर्यात्प्रवक्ष्यामि निबोध तत् ॥
पञ्चेन्द्रियस्य ग्रामस्य नवद्वारस्य भारत ।
कामक्रोधनिरुद्धस्य संनिरुद्धस्य मेधया ॥
तेजसा मूर्ध्नि चाधाय धूमो दोधूयते महान् ।
नीललोहितवर्णाभः पीतैः श्वेतैश्च धातुभिः ॥
मञ्जिष्ठारागवर्णाभैः कपोतसदृशैस्तथा ।
शुद्धवैदूर्यवर्णाभैः पद्मवर्णदलप्रभैः ॥
स्फाटिकैर्मणिवर्णाभैर्नागेन्द्रसदृशैस्तथा ।
इन्द्रगोपकवर्णाभैश्चन्द्रांशुसलिलप्रभैः ॥
बहुवर्णैः सधूमौघैरिन्द्रायुधसमप्रभैः ।
संपतद्भिश्च युगपन्मेघैरिव समागमे ॥
निरुध्यन्त इवाकाशं पक्षवद्भिरिवाद्रिभिः ।
ते धूमवर्णसंघाता घनाः सलिलधारिणः ।
निर्वेमुश्चैव तोयौघान्विविशुर्वसुधातलम् ॥
मूर्ध्नि चैव महानग्निर्मानसो धूयते प्रभुः ।
युक्तः परमयोगेन शतशोऽर्चिभिरावृतः ॥
तस्याग्नेर्विस्फुलिङ्गानां सहस्राणि शतानि च ।
विसस्रुः सर्वगात्रेभ्यो ज्वलन्तीव युगाग्नयः ॥
यावन्त्यो वर्षधाराश्च तावन्त्योऽर्च्योऽनलस्य तु ।
समेयुर्वारिधाराभिर्विपुले वसुधातले ॥
वर्णाभ्यां युज्यमानश्च वायुर्दोधूयते महान् ।
दिव्यसिद्धगुणोद्भूतः सूक्ष्मः प्राणविवर्धनः ॥
वेगवान्भीमनिर्घोषो बलवान्प्राणगोचरः ।
तैरेव चाग्निसंघातैर्धातुभिः सह संगतः ॥
सहस्रशोऽथ शतशो मूर्तिं कृत्वा पृथग्विधाम् ।
अग्निर्वायुर्जलं भूमिर्धातवो ब्रह्मचोदिताः ॥
समवायत्वमापन्ना बीजभूता महीपते ।
संघातं ब्रह्मवेगेन धातवो गमिता नृप ॥

G(ed) repeat line 832 — Bom ed om line 834 — (L 834) D_{s1} Poona ed -गुणाश् (for -गुणांश्) — (L 835) K_4 V_3 B_2 D_3 विस्तरश (for °रत) $\tilde{N}_2$ V_3 B_1 D_6 G_4 यन्मां, D_{s1} यत्त्वं, D_{s2} यस्त्वं (for यथा) — (L 837) $K_{3\ 4}$ $V_{1\ 3}$ Dn $D_{1-3\ 5\ 6}$ (marg) पञ्चसिद्धि- (for पञ्चेन्द्रिय-) K_2 पश्यतां (for पश्यतो) — (L 838) D_6 -निवासिना, G_3 समप्रभ (for निवासिन) — (L 839) $K_{1\ 2}$ ब्रह्माण; G_3 ब्रह्मणा (for °णश्) — (L 840) V_3 G_3 ब्रह्म- (for बहु) K_3 प्रवर्तन्ते निबोध तान्, K_4 °र्तन्ति निबोधत, V_1 °र्तन्ति निबोधत, V_3 Dn $D_{1-3\ 5}$ °र्तन्ति निरोधनम्, D_6 °र्तन्ति निबोध यत् (for ^{b}) — (L 842) $K_{1\ 2\ 4}$ $V_{1\ 3}$ $D_{2\ 4-6}$ G_{3-4} -क्रोधात्र- (for क्रोधनि-) $\tilde{N}_2$ $B_{1\ 3}$ D_3 कामक्रोधस्य मोहस्य, Dn °क्रोधस्य लोभस्य, D_3 °क्रोधस्य रुद्धस्य (for ^{a}) K_2 निरोधस्य च मेधया, D_4 निरुद्धस्य च मे° (for ^{b}) — (L 843) K_1 D_{s2} आघ्राय, V_1 D_{s1} आदाय (for आधाय) D_6 तेजो मूर्धनि चाघ्राय (for ^{a}) — (L 844) $K_{1\ 2}$ $\tilde{N}_2$ B D_3 $D_{3\ 4\ 6}$ $G_{3\ 4}$ -वर्णाभै॰ (for °भ॰) K_2 om lines 844^b–847^a, D_6 om line 844^b–846^a D_3 पद्मरागसमप्रभैः (for ^{b}) — (L 845) B_2 Dn माञ्जिष्ठ- (for मञ्जिष्ठा-) V_1 -वर्णैश्च (for -वर्णाभै.) $G_{3\ 4}$ मञ्जिष्ठागरुवर्णाभैः (for ^{a}) G_4 om lines 845^b–846^a D_3 नागेन्द्र- (for कपोत-) B_2 कपोतसदृशप्रभैः (for ^{b}) — (L 846) K_1 D_4 पत्रदल-, $\tilde{N}_2$ V_3 $B_{1,3}$ D_3 D_5 -रागसम-, V_1 -वर्णसम (for -वर्णदल-) D_3 चन्द्रार्कसदृशप्रभैः (for ^{b}) — B_1 om. (hapl) lines 847–849 K_3 $D_{1\ 3}$ om (hapl) lines 847–848 — (L 849) $\tilde{N}_2$ -रक्तैः (for -वर्णै॰). D_{s1} धूमौघैश्च; D_6 सधूमाभैर् (for सधूमौघैर्) D_2 शक्रायुध- (for इन्द्रा°). G_4 -समुद्भवैः (for -समप्रभैः) — (L 850) D_3 संनदद्भिश् (for संपत°) K_3 D_1 घनागमे, B_2 D_3 समागतै॰, D_3 °गमैः (for °गमे) — (L 852) $\tilde{N}_2$ B Dn D_3 D_5 G_3 -वर्णा (for वर्ण-) — (L 854) D_6 (marg) मूढश् (for मूर्ध्नि) D_3 सधूमोऽग्निर् (for महानग्निर्) — (L 855) D_1 -युक्तेन (for -योगेन) D_4 युक्तं परमया योगं (for ^{a}) — (L 856) D_{n1} तस्यार्चिर्विस्फुलिङ्गानि (for ^{a}) — (L 857) K_4 $D_{2.5}$ विविशु॰, D_3 निजग्मु॰ (for विसस्रु) $\tilde{N}_2$ ज्वलन्निव हुताशनः; D_3 योगिनो नृपसत्तम॰ (for ^{b}) — (L 858) K_2 D_5 -धारासु, Dn धारास्ता (for °श्च) $\tilde{N}_2$ यावन्ति पुरराष्ट्राणि, $B_{2\ 3}$ °न्ति वर्षराष्ट्राणि (for ^{a}) V_3 तावन्त्यौर्वानलस्य तु, $D_{1\ 6}$ तावन्तो ह्यनलस्य च, D_2 °न्तश्चानिलस्य च (for ^{b}). — (L 859) G_3 प्रवेसुर् (for समेयुर्) Dn विविशुर् (for विपुले). — (L 860) D_3 उभाभ्यां (for वर्णाभ्यां) — (L 861) D_3 एष (for दिव्य-). $\tilde{N}_2$ V_1 D_3 -सिद्धि- (for -सिद्ध-) D_3 सूक्ष्मजीवप्रवर्धन (for ^{b}). — (L 862) V_1 रसवान् (for बल°) V_3 -वर्धन (for -गोचर॰) — (L. 863) K_{1-3} $D_{1\ 4}$ -संपातैर्, $\tilde{N}_2$ -संभू° (for -संघा°) $K_{1\ 3}$ $D_{1.4\ 6}$ संगतैः (for °तः) — (L 865) K_3 D_1 वापि, K_4

यद्ब्रह्म चक्षुषोर्मध्ये स सूक्ष्मः पुरुषो विराट् ।
तयोरन्यान्बहून्सूक्ष्मान्ससृजे पुरुषोत्तमः ॥
स एष भगवान्विष्णुर्व्यक्ताव्यक्तः सनातनः ।
आधारः सर्वभूतानां प्रलये प्रलयान्तकृत् ॥
तं मूर्ध्नि धातुभिर्बद्धं विशन्ति ब्रह्मचोदिताः ।
तेऽन्तरा पुरुषाः सर्वे ज्ञातारः सुखदुःखयोः ॥
अथ चेष्टितुमारब्धा मूर्तयो ब्रह्मसंमिताः ।
भित्त्वा च धरणीं देवीं प्रपद्यन्ते दिशो दश ॥
इत्येते पार्थिवाः सर्वे ऋषयो ब्रह्मनिर्मिताः ।
तत्रैव प्रलयं याता भूमित्वमुपयान्ति च ॥
कर्मक्षयाद्विमुच्यन्ते धातुभिः कर्मबन्धनैः ।
कर्मक्षयाद्विमुक्तत्वादिन्द्रियाणां च बन्धनात् ।
तामेव प्रकृतिं यान्ति अज्ञातां कर्मगोचरैः ॥
क्षराद्धूमक्षयं चैव अग्निगर्भास्तपोमयाः ।
येन तन्तुरिव च्छन्नो भावाभावः प्रवर्तते ॥
धूमादभ्रास्तु संभूता अभ्रात्तोयं सुनिर्मलम् ।
जगती जलात्तु संभूता जगत्येव च यत्फलम् ॥
फलाद्रसश्च संजज्ञे रसात्प्राणश्च देहिनाम् ।
रसस्तु तन्मयो जज्ञे यत्तद्ब्रह्म सनातनम् ॥

प्रधानं ब्रह्म उद्दिष्टं बहुभिः कारणान्तरैः ।
ब्राह्मणैस्तपसि श्रान्तैः सत्यव्रतपरायणैः ॥
अव्यक्ताद्व्यक्तिमापन्नं स्वेन भावेन भारत ।
अन्तःस्थं सर्वभूतेषु चरन्तं विद्यया सह ॥
कर्म कर्तेति राजेन्द्र विषयस्थमनेकधा ।
नोपलभ्यति चक्षुर्भ्यां तपसा दग्धकिल्बिषैः ॥
उपलभ्यति चक्षुर्भ्यां ज्ञानिभिर्ब्रह्मवादिभिः ।
निःसृतस्तु भ्रुवोर्मध्यान्मेघमुक्त इवांशुमान् ॥
चरद्भिः पक्षिवल्लोके निर्द्वंद्वैर्निष्परिग्रहैः ।
योगधर्मेण कौरव्य ध्रुवमासाद्यते फलम् ॥
प्रादुर्भावं क्षयं चैव भूतस्य निधनं तथा ।
विधत्ते शतशो ब्रह्मा संक्षये च भवेत्तथा ॥
कर्मणः कर्मयोगज्ञो भूतेभ्ज्ञो नात्र संशयः ।
अविनाशाय लोकस्य धर्मस्याप्यायनेन च ॥
युगं द्वादशसाहस्रं सहस्रयुगसंज्ञितम् ।
एतद्ब्रह्मयुगं नाम युगानां प्रथमं युगम् ॥
सहस्रयुगयोरन्ते संहारः प्रलयान्तकृत् ।
सूक्ष्मं भवति लोकानां निर्विकारमचेतनम् ॥
तथा प्रलयमापन्नं जगत्सर्वं सनातनम् ।

$V_{1\,3}$ D_{5} वायुर् (for भूमिर्) K_{3} (marg) $D_{1\,4}$ -नोदिता (for -चो°) — (L 866) $\tilde{N}_{2}$ जीव (for बीज-) V_{1} $B_{1\,4}$ D_{s} महीतले (for °पते) — (L 867) K_{3} D_{1} संहता (for संघातं) — (L 868) G_{3} परमो (for पुरुषो) — (L 869) $K_{1\,3}$ $D_{1\,4}$ असृजत्, D_{5} सोऽसृजत् (for ससृजे) — (L. 870) K_{3} D_{1} कृष्णो (for विष्णु°) $\tilde{N}_{2}$ B_{1} (marg) $_{3}$ D_{s2} प्रजापति- (for सनातन) Cal ed व्यक्तोऽव्यक्तः प्रजापतिः (for ^{b}) — (L 871) K_{4} $\tilde{N}_{2}$ $V_{1\,3}$ Dn D_{s} $D_{3,5}$ -विद्यानां (for -भूतानां) — (L 872) K_{4} B_{1} Dn $D_{2\,3\,6}$ $G_{3\,4}$ नद्धं (for बद्धं) K_{4} -समिता- (for -चोदिता-) — (L 875) $\tilde{N}_{2}$ $V_{1\,3}$ B D_{s} D_{6} $G_{2\,4}$ प्रापद्यन्त (for प्रपद्यन्ते). — (L 876) D_{3} G_{3} पार्थवा (for पार्थिवा-) G_{4} जले ते पार्थवाः सर्वे (for ^{a}) D_{3} -संमिता (for निर्मिता). — (L 877) K_{3} D_{1} यान्ति (for याता) G_{4} भूमिं समुपयान्ति च (for ^{b}) — (L 878) D_{s1} -बन्धनात् (for °नै.). — (L. 879) D_{3} नि- (for च) — (L 880) K_{3} D_{1} ज्ञातार (for अज्ञातां) — (L 881) Cal ed. जातं (for धूम-) V_{3} क्षरत्वमक्षयं चैव ; G_{3} क्षयाद्धूमक्षयश्चैव (for ^{a}). — (L 882) D_{3} भावाद्भावः (for भावाभाव-) — (L. 883) K_{3} D_{1} समुद्भूता (for $_{3}$ संभूता) $K_{1,2}$ V_{3} $B_{1\,3}$ D_{s} D_{4} G_{3} धूमादभ्रं तु संभूतम्, D_{3} धूम्रा धूम्राभ्रसंभूतिम्, D_{6} धूमादभ्रं समुद्भूतम् (for ^{a}). — (L 885) D_{3} संज्ञेयो (for संजज्ञे) D_{n2} फलाद्ब्रह्मरसं जज्ञे (for ^{a}). — (L. 887) $B_{1,3}$ Cal ed ब्रह्मोद्दिष्टं प्रधानं तु (for ^{a}). — (L 888) $D_{2,3\,6}$ -धर्म- (for -व्रत-) — (L 891) G(ed.) विषयस्थान् (for °स्थम्) — (L 892) $K_{1\,4}$ B Dn $D_{2,5}$ $G_{3\,4}$ -लभ्येत (for -लभ्यति) $\tilde{N}_{2}$ चक्षुर्भ्यां नोपलप्स्यन्ति (for ^{a}) — (L. 893) B_{1} G_{4} Cal ed यतिभिर् (for ज्ञानि°) — (L 894) B_{3} Cal ed मध्ये (for मध्यान्). — (L. 895) G_{3} पक्षिभिर् (for पक्षिवल्) B_{3} निर्ग्रन्थैर् (for निर्द्वंद्वैर्) — (L 896) $K_{1\,2}$ परम्, K_{3} D_{1} पदम् (for फलम्). — K_{4} om (hapl.) line 898 — (L 898) K_{2} D_{4} संक्षय (for °ये) D_{6} चोद्भवे (for च भवेत्) — (L. 899) $\tilde{N}_{2}$ ब्रह्मण , D_{1} कर्मणा (for °णः) G_{4} -योगस्थो (for °ज्ञो). G_{3} कर्मणां कर्मभोगस्थो (for ^{a}). — (L. 901) K_{3} D_{2} संमितम्; K_{4} $\tilde{N}_{2}$ V_{1} Dn $D_{1,5\,6}$ G_{3} सहि° (for -सञ्ज्ञि°). — (L. 903) $V_{1\,3}$ D_{s} सहस्रयुगपर्यन्ते;

ब्रह्म संपद्यते सूक्ष्मं निर्मितं कारणैर्गुणैः ॥

Colophon

जनमेजय उवाच ।
प्राग्वंशं श्रोतुमिच्छामि विस्तरेण महामुने ।
आद्ययोर्युगयोर्ब्रह्मन्ब्रह्मप्राप्तस्य सर्वशः ॥

वैशंपायन उवाच ।
शृणु विस्तरश. सर्व यन्मां पृच्छसि मेधया ।
उपपन्नेन मनसा दैवप्रत्ययसाधिना ॥
ऋद्धिं प्राप्तस्तु भगवान्योगात्मा ब्रह्मसंभवः ।
भूतानां बहुलत्वं च चकारेहेश्वरः प्रभुः ॥
स्थितो ब्रह्मासने ब्रह्माविक्षिप्तः सहसा प्रभुः ।
अचलेनैव भावेन स्थाणुभूतेन भारत ॥
रक्तश्च मोक्षविषये सर्वज्ञानमये पदे ।
यस्मात्पदसहस्राणि भवन्ति न भवन्ति च ॥
ब्रह्मयज्ञं तु यजते योगाद्वेदात्मकं सदा ।
ब्रह्मणो विपुलं ज्ञानमैश्वर्यं च प्रजायते ॥
ततः प्रथममैश्वर्यं युञ्जानेन प्रवर्तितम् ।
ब्रह्मणा ब्रह्मभूतेन भूतानां हितमिच्छता ॥
यदा त्वाकाशमैश्वर्यं युञ्जानस्य प्रवर्तते ।
ब्रह्मणो ब्रह्मभूतस्य निर्विकारेण कर्मणा ॥
तदान्तरिक्षं संप्राप्तं निर्मलं ब्रह्म चाव्ययम् ।
संहारः सर्वभूतानां चराणां ब्रह्मवादिनाम् ।
ध्रुवमैश्वर्ययोगानां प्रतिपद्यन्ति देहिनः ॥
आकाशैश्वर्यभूतेन संयोगे ब्रह्मवादिनाम् ।
प्रवर्तमानमैश्वर्यं वायुभूतं करोति च ।
विकारैर्बहुभिः प्राप्तैः संपतद्भिर्महाबलैः ॥
एतैर्विकारैः संवृत्तैर्निरुद्धैश्च समन्ततः ।
ध्रुवमैश्वर्यमापन्नः सिद्धो भवति ब्राह्मणः ॥
शरीरादभिनिष्क्रम्य आकाशेन प्रधावति ।
निरालम्बो निरालम्बानालम्ब्य मनसा ततः ॥
ऐश्वर्यभूतो भूतात्मा चरन्दिवि न दृश्यते ।
चक्षुर्भिर्बहुभिर्लोके पुरंदरसमैरपि ॥

B D3 6 G3 4 एव युगसहस्रान्ते (for ^{a}) B3 Cal ed प्रलयोऽन्तकृत, D5 °यान्तकः (for °यान्तकृत्) — D1 om lines 904^{b}–906^{a} Ñ2 G3 4 om (hapl) lines 905. — (L 906) Ñ2 B2 Ds निर्मुक्तं, B1 3 Dn2 निमित्त (for निर्मितं)

Colophon. — *Mention of the Epic* Ds2 — *Mention of Khila:* K1 V1 3 B Ds1 D1 3 4 — *Sub-parvan* K2 4 V1 3 B Ds2 D1 2 5, 6 G3 पौष्करम्; K3 पुष्करम्, Dn D4 Dn पुष्करप्रादुर्भाव· — *Adhy no.* K3 D1 91; V3 204, Dn 12, Ds2 203, D3 219, D4 199, G3 345, G4 340

(L. 907) D3 तपोधन (for महामुने) — G3 om the ref — (L 909) D3 पूर्वं (for सर्वं) B1 D3 यन्मां त्वं परिपृच्छसि (for ^{b}) — (L 910) K3 V3 D5 देवप्रत्यक्षसाधिना (K3 °नाम्), D1 दैवप्रत्यक्षसंधिना (for ^{b}) — (L 911) G3 बुद्धिं (for ऋद्धिं) Ñ2 विश्व-, D3 5 योग- (for ब्रह्म-). — (L 912) V1 3 सुबहुत्वं (for बहुलत्वं) G3 स चकार (for चकारेह) K3, 4 चकारेह (K4 °मं) महेश्वर, B3 चकार ईश्वर प्रभुः, D3 चक्रे योगेश्वरः प्रभु (for ^{b}) — G4 om line 913 — (L. 915) B2 Dn G3 स च· (for सर्वं-) — (L 916) K1 2 D4 भवन्ति प्र-, K4 Dn D2 5 6 प्रभवन्ति (for भवन्ति न) Ñ2 V1, 3 B Ds D3 प्रभवन्त्युद्भवन्ति च, G3, 4 प्रभुवन्त्युत्पतन्ति च (for ^{b}). — (L. 917) K2 B2 Ds D4 यजतो; K3 योगात्मा, D1 यज्ञान्ते (for यजते) B1 स ब्रह्मयज्ञ यजते (for ^{a}) K3 D1 6 वेदात्मकः, Ds2 विश्वात्मकं (for वेदा°). — (L 918) K4 Ñ2 V1, 3 B Dn Ds D2 3 5 G3 4 प्रवर्तते (for प्रजायते) — (L 919) D3 प्रज्ञानेन (for युञ्जानेन) K1–3 D1 प्रकीर्तितम् (for प्रव°) — (L 920) G3 om lines 920^{b}–924^{a} D3 भूतानां हितकाम्यया (for ^{b}) — (L 921) B1 om lines 921^{b}–927^{a} D3 यजानस्य (for युञ्जा°) K3 D2 प्रवार्तितम् (for °र्तते) — D2 om line 922 — (L. 922) V1 ब्रह्मणा ब्रह्मभूतेन (for ^{a}) D3 चेतसा (for कर्मणा) — (L 923) Ñ2 V1 3 B3 Ds ब्रह्म निर्मलमव्ययम् (for ^{b}) — (L 924) K4 वर्णानां, B3 Dn Ds2 D2 3 G4 नराणां (for च°) — (L 925) V3 -भूतानां (for -योगानां) Ds देहिनम्, G3 4 योगिन (for देहिनः) — (L 926) K3 -संभूते, G3 -भूतानां (for -भूतेन) V3 D6 G4 संयुगे (for संयोगे) K4 V1 Dn D2 5 G3 संयुगे ब्रह्मवादिना (for ^{b}). — (L 929) Cal ed [ए]व सर्वश (for समन्तत) — (L. 930) D6 ध्रुवमैश्वर्यसंपन्न (for ^{a}) — (L 932) K4 निरालम्बाद्, Ñ2 V1 G3 °लम्बम्, D3 °लम्बे (for °लम्बान्) D1 6 आलक्ष्य, D3 नालम्भ्यो (for आलम्ब्य) — (L 933) D5 भूतानां (for °त्मा) K2 भूतैर् (for चरन्) – (L 934) B1, 3 G3 4 लोकै (for लोके) K3 D1 -शतैर् (for -समैर्) — (L 935) K1, 2 D1, 4 अधीयन्ति, Ds1 विधीयन्ते (for त्वधी°).

ओंकारं ये त्वधीयन्ते मनसा ब्रह्मसत्तमाः ।
विभक्ताः सर्वकामेभ्यस्ते तं पश्यन्ति साधवः ॥
एतद्धि परमं ब्रह्म ब्राह्मणानां मनीषिणाम् ।
अन्तश्चरति भूतानां विद्धि चेतनया सह ॥
एष शब्दो महानादः पुराणो ब्रह्मसंभवः ।
वायुभूतोऽक्षरं प्राप्तो वदन्त्येवं द्विजातयः ॥
अरूपी रूपसंपन्नो धातुभिः सह संगतः ।
अन्तश्चरति भूतेषु कामकारकरो वशी ॥
ततः पूर्वमनुध्याय मनसा पूरयन्निव ।
वेदात्मकं तदा यज्ञं चिन्तयन्तो मनीषिणः ॥
ब्राह्मणाः शुचयो दान्ता यशोऽयुञ्जंस्तदन्वयाः ।
ब्रह्मलोकं काङ्क्षमाणा वैष्णवं पदमुत्तमम् ॥
यस्य हेतोः क्रियाः सर्वाः कुर्वन्ति विगतज्वराः ।
न ह्येते प्रसवादाने भवमिच्छन्ति भारत ॥
माल्योपहारैश्च त्रिभिः प्रतिभानैश्च वै द्विजाः ।
यजन्ति परमात्मानं विष्णुं सत्यपराक्रमम् ॥
यजनं विक्रमं चैव ब्रह्मपूर्वाः प्रचक्रिरे ।
ब्रह्मा च वैष्णवं तेजो वेदोक्तैर्वचनैर्नृप ॥
ब्राह्मणैर्वेदविद्भिश्च ब्रह्मज्ञैर्ब्रह्मवादिभिः ।
शुचिभिः कर्मुनिर्मुक्तैः सत्यव्रतपरायणैः ॥
धातुभिर्मोक्षकाले च महात्मा संप्रदृश्यते ।
तदेव परमं ब्रह्म वैष्णवं परमाद्भुतम् ॥
रसात्मकं तदैश्वर्यं विकारान्ते प्रदृश्यते ।
घोररूपा विकारास्ते व्यथयन्ति महात्मनः ॥
संछाद्यातीव तोयेन क्षुभ्यमाणो विचेतनः ।
ऊर्मिभिश्छाद्यते चैव शीतोष्णाभिर्विकारतः ॥
महार्णवगतश्चैव दह्यते न च सज्जते ।
भग्नाश्चैव महानद्यः सलिले चैव सीदति ॥
सीदमानश्च सलिले स शीते पात्यते बलात् ।
अशनाच्छादनाच्चापि युज्यमानो विचेतनः ॥
श्वभ्रे प्रपद्यमानश्च तोयेन परिपिच्यते ।
शुक्लवर्णेन बहुना स्रोतसा मूर्ध्नि सर्वशः ॥

V_{1} -वादिना (for -सत्तमा·) —(L 936) $K_{1\ 2}$ वियुक्ता , K_{3} V_{3} $D_{1\ 4\ 6}$ विमुक्ता (for विभक्ता·) B_{1} G_{4} -कर्मभ्यस् (for -कामेभ्यस्) K_{4} $\tilde{N}_{2}$ V_{1} $B_{2\ 3}$ Dn Ds_{1} $D_{2\ 3\ 5}$ G_{3} विमु(D_{2} °यु)क्ता सर्वकर्मभ्यस् (for ^{a}) Dn यं (for तं) —(L 938) D_{5} अन्ते चरन्ति भूताना (for ^{a}) —(L 939) Ds एक (for एष) K_{3} $V_{1\ 3}$ B_{1} Ds D_{1} पुराणे (for °णो). —(L 940) V_{1} क्षय (for ऽक्षरं) —(L 941) B_{2} (marg as above) रूपमापन्नो (for रूपसं°) Ds_{1} चतुर्भि. (for धातुभि) —(L 942) K_{1} भूतानां (for भूतेषु) $\tilde{N}_{2}$ बली (for वशी) —(L 943) K_{3} D_{1} तत्र पूर्वम् , K_{4} D_{2} G_{3} एतत्सर्वम् , $\tilde{N}_{2}$ $V_{1\ 3}$ B Dn Ds (marg) G_{4} एतत्पूर्वम् , Cal ed तत. परम् (for तत· पूर्वम्) K_{2} D_{4} अभिध्याय (for अनु°). V_{1} मनसा पूजयन्निव , D_{6} °सा पूजयन्ति च (for ^{b}) —(L 944) K_{3} D_{2} चिन्तयन्ते (for °यन्तो) —(L 945) K_{2} यश पुञ्जास् , D_{6} योगयुक्तास् (for यशोऽयुञ्जंस्). G_{4} तदाश्रया (for तदन्वया) D_{3} यश प्राप्ताः सदान्वया. , G_{3} युगयुक्तास्तदाश्रया (for ^{b}) —(L. 946) Ds_{2} वैष्णवं परम पदम् (for ^{b}) —(L 947) $K_{1\ 2\ 4}$ $V_{1\ 3}$ B $G_{3\ 4}$ पद- (for यस्य) —(L 948) K_{2} D_{6} प्रभवादाने , K_{4} प्रसवादानैर् (for °दाने) —(L 949) $\tilde{N}_{2}$ V_{1} Ds चिन्वाद्भिः , V_{3} शुचिभि , D_{6} स्तुतिभि· (for च त्रिभि·) B Dn Ds G_{3} त्रिभि(D_{3} चित्रै)र्माल्योपहारैश्च , D_{2} माल्योपकारैश्चरुभिः (for ^{a}) $K_{1\ 2}$ B_{3} प्रतिभागैश् , K_{3} Dn_{1} D_{2} °भावैश् , V_{1} °मानैश् , V_{3} $B_{1\ 2}$ प्रविभागैश् (for °प्रतिभानैश्). D_{3} भाव्यमानैर्द्विजातय. (for ^{b}) —(L 950) $B_{2\ 3}$ Ds युञ्जन्ति (for यजन्ति) Ds -परायणम् (for °क्रमम्) —(L 951) $B_{2\ 3}$ G_{3} युञ्जाना (for यजनं) D_{3} वैष्णवं (for विक्रमं) B_{1} Cal ed ब्रह्माद्या· सं- (for ब्रह्मपूर्वा) —(L 953) B_{2} Bom Poona Cal eds G(ed) ब्रह्म- (for वेद-) K_{1-3} $D_{1\ 4\ 6}$ -विद्भिर्हि (for -विद्भिश्च) D_{3} ब्रह्मविद्भिश्च ब्राह्मणै (for ^{b}). —(L 955) K_{1} D_{3} धातुनिर्मोक्षकाले च (for ^{a}) G_{4} -पत्स्यते (for -दृश्यते) G_{3} महात्मानं प्रपत्स्यते (for ^{b}) —K_{4} om lines 956–957 —(L 956) D_{1} न वेद (for तदेव) K_{3} न वेद परमं धर्मं , D_{6} एतदेव परं ब्रह्म (for ^{a}) $\tilde{N}_{2}$ $V_{1\ 3}$ Ds_{2} वैष्णवं पदमद्भुतम् , Ds_{1} °वं पदमुत्तमम् , D_{3} °वं परमं ध्रुवम् ; (for ^{b}) —(L 959) V_{1} योगेन (for तोयेन). — G_{4} om (hapl) lines 960–964 —(L 960) Dn विकारितः (for °रत) —(L 961) $V_{1\ 3}$ D_{3} G_{3} मज्जते (for स°). —(L 962) $K_{1\ 2}$ Dn $D_{2-4\ 6}$ G_{3} मग्नश्चैव महानद्या (K_{1} D_{6} °द्यां) (for ^{a}) —(L 963) K_{3} D_{1} सलिलैः (for °ले) K_{2} D_{4} स सीदन् , $K_{3\ 4}$ स शीत· ; $\tilde{N}_{2}$ B Ds_{2} स शीतात् , D_{6} शीतात्सं- (for स शीते) —(L 964) K_{1} $\tilde{N}_{2}$ $V_{1,3}$ B_{2} Dn_{1} Ds_{1} $D_{1\ 3\ 6}$ G_{3} आसनाच् (for अश°) K_{3} आसनाच्छादनैश्चापि (for ^{b}). B_{3} G_{3} मुह्यमानो

ऊर्ध्वज्योतिरवेक्ष्यश्च शुभ्रैः पीतैश्च छाद्यते ।
वारिपूर्णैः सुगम्भीरैर्विद्युद्भिरिव भासितैः ॥
एतैर्विकारैः संवृत्तैर्निरुद्धैश्चैव सर्वशः ।
ध्रुवैश्वर्यमथासाद्य सिद्धो भवति ब्राह्मणः ॥
रसात्मकं तदैश्वर्यं जिह्वाग्रादभिनिःसृतम् ।
सहस्रधारं विततं मेघत्वं समुपागतम् ॥
रसांश्च विविधान्योगान्स सिद्धः सृजते प्रभुः ।
धात्वर्थं सर्वभूतानां योगप्राप्तेन हेतुना ॥
तेजसो रूपमैश्वर्यं विकारैः सह वर्धते ।
आत्मनो विघ्नजननं स्वस्थो ब्राह्मणकारणे ॥
उग्ररूपैर्विकारैश्च हन्यते दण्डपाणिभिः ।
घोररूपैः सुगम्भीरैः पिङ्गाक्षैर्नरविग्रहैः ॥
नेत्रं समुद्धरन्भीमं जिह्वाग्रं चास्य विन्दति ।
नदन्ति युगपन्नादाञ्जृम्भमाणाः पुनः पुनः ॥
पुनरेव तदा भूत्वा बहुरूपास्तदाभवन् ।
नृत्यमानाः प्रगायन्ति तर्पयन्तो विशेषतः ॥
स्त्रीभूताश्च समं सर्वे युञ्जानाश्चावलम्बिरे ।
कण्ठेषु बहुरूपत्वाद्विघ्नैश्चैव प्रलोभयन् ॥
मधुरैरभिधानैश्च व्याहरन्ति नमीतवत् ।
पतन्ति युगपत्सर्वे पादयोर्मूर्धभिर्नताः ॥
प्रसादं काङ्क्षमाणाश्च योगस्यान्तरविघ्नतः ।
बहुप्रकारं कथयन्नृत्यन्ति च रमन्ति च ॥
एतैर्विकारैः संवृत्तैर्निरुद्धैश्चैव सर्वशः ।
ध्रुवमैश्वर्यमासाद्य सिद्धो भवति ब्राह्मणः ॥
तदर्चिष इवाग्नेया आदित्यस्येव रश्मयः ।
तेजोरूपकमैश्वर्यं जनिता जलबिन्दवः ॥
ज्योतींषि चैव संवृत्ता आकाशे गुणसंवृताः ।
चरन्ति सततं लोके सूर्याचन्द्रमसोर्गतिम् ॥
चन्द्रसूर्यात्मकं दिव्यं ज्योतिष्मद्घनमुत्तमम् ।
एतद्विभ्राजते लोके कालचक्रं ध्रुवं चरन् ॥
अर्धमासाश्च मासाश्च ऋतुसंवत्सराण्यथ ।
क्षणा लवा मुहूर्ताश्च कलाः काष्ठास्तथैव च ॥
अहोरात्रप्रमाणं च निमेषोन्मेषणं तथा ।
ताराणां गतयश्चैव ग्रहाणां च विशेषतः ॥
अथ पार्थिवमैश्वर्यं विकारग्रहसंभवम् ।
योगयुक्तास्त्वभिग्रस्ताः पात्यन्ते ह्यचलासनात् ॥

(for युज्य°) — D_4 om. (hapl) lines 967-969 — (L 967) G_3 अवेक्ष्याशु (for °क्ष्यश्च) K_4 B_1 D_2 शुभ्रै , Dn_2 B_2 G_4 शुक्लै° (for शुभ्रैः) — (L 968) D_2 वायु- (for वारि-) G_3 तोयदै. (for भासितै) — (L 970) K_4 $\tilde{N}_2$ $V_{1\ 3}$ B Dn Ds D_{2-6} $K_{3\ 4}$ ध्रुवमैश्वर्यमासाद्य (for ^{a}) $D_{2\ 6}$ शुद्धो (for सिद्धो) G_3 वै द्विज (for ब्राह्मण) — G_3 om (hapl) lines 971-990. — (L 971) $K_{1\ 3}$ जिह्वाया (for °ग्राद्). — (L. 972) $\tilde{N}_2$ सततं (for विततं) — (L 973) $K_{1\ 3}$ B Dn $D_{3\ 5}$ G_4 योगात्, Ds_1 सर्वान् (for योगान्) $K_{3\ 4}$ $\tilde{N}_2$ V_1 $B_{1\ 4}$ Dn Ds_2 $D_{1\ 2\ 6}$ G_4 सं- (for स). — (L 974) $V_{1\ 3}$ धात्वर्थं सर्वभूतात्मा (for ^{a}) — (L 975) K_2 विश्वाकारै प्रवर्तते (for ^{b}) — (L 976) D_6 -कारणै (for °णे) G_4 स्वास्थ्यं ब्राह्मणकारणम् (for ^{b}) — (L 977) B_3 D_8 G_4 विरूपैश् (for विकारैश्) — (L 978) D_3 -रूप (for -रूपैः) K_2 घोररूपः स गम्भीरैः (for ^{a}). — (L 979) D_8 नेत्रे (for नेत्रं) K_3 D_1 समुद्वहन् (for °द्धरन्) — (L 980) D_3 युगपत्कुर्वते नादान् (for ^{a}). D_5 भञ्जमानाः (for जृम्भमाणा) — (L 981) Poona ed G(ed) वायुरूपस् (for बहुरूपास्) — (L 983) K_{1-3} D_4 (*sup lin* as above) चाश्रमं , $B_{1\ 3}$ G_4 च ततः , D_1 स्वाश्रमं (for च समं). — (L 984) K_4 Dn $D_{3\ 5}$ कण्ठे तु , D_6 (marg) कर्णेषु (for कण्ठेषु) — (L 985) D_5 व्याहरन्तो (for °रन्ति) — (L 986) $\tilde{N}_2$ नतान्, B_2 युता (for नताः). — (L 987) B_3 योगस्यान्ते ह्यविघ्नत (for ^{b}) — (L 988) K_4 $D_{2\ 5}$ चरन्ति , Dn G(ed) तरन्ति (for रमन्ति) — (L 989) V_3 एभिर् (for एतैर्) B_3 बहुभिर् , D_4 संघृतैर् (for संवृत्तैर्) B_1 Cal ed एभिर्विकारैर्बहुभिर् (for ^{a}) — (L 990) $\tilde{N}_2$ $V_{1\ 3}$ हि द्विजः ; G_4 वै द्विज (for ब्राह्मणः) — Before line 991, D_1 ins वैशंपायन — (L 991) Ds_1 D_2 G_3 ज्ञेया (for [आ]ग्नेया) K_2 तदर्चिषवता ज्ञेया (for ^{a}) — (L 992) D_8 तेजोरूपं तमैश्वर्यं (for ^{a}) B D_3 G_4 जातास्ते (for जनिता) $V_{1\ 3}$ Dn $D_{2\ 4}$ (*sup lin*) $_5$ तेज (for जल-) — (L 993) B_3 D_6 ज्योतिषा (for ज्योतींषि) K_3 -संवृत्य (for °त्ता) G(ed) आकाशमुपसंगता (for ^{b}) — (L 995) B_1 बलम् , B_3 गणम् (for घनम्) K_4 Dn $G_{3\ 4}$ ज्योति. सघनमुत्तमम् ; V_3 ज्योतिः संज्ञान° , D_2 ज्योतिस्तद्वारमु° (for ^{b}) — (L 996) $B_{1,3}$ Cal. ed. विराजते (for विभ्रा°). — (L. 997) $K_{1,3}$ $D_{1,4,6}$

अलोभाच्छिद्यते सद्यो वेपमानोऽनुकीर्त्यते ।
सीदते वसुधामध्ये भिद्यमानः पुनः पुनः ॥
भूतानां बहुरूपैश्च अन्यैश्च तलवासिभिः ।
विषयैर्युज्यते क्षिप्रं संक्षेपात्संप्ररुध्यते ॥
मूर्तिमद्भिश्च बहुधा धातुभिः स च हन्यते ।
शक्तितोमरनिस्त्रिंशैर्गदाभिश्चाप्यनेकशः ॥
असिभिः पात्यते चैव क्षुरधारैः सहस्रशः ।
भिद्यते चैव बाणाग्रैः सुतीक्ष्णैर्मर्मभेदिभिः ॥
एभिर्विकारैः सकलैर्निरुद्धैश्चापि सर्वशः ।
ध्रुवमैश्वर्यमापन्नः सिद्धो भवति ब्राह्मणः ॥
ततः पार्थिवमैश्वर्यं निर्मुक्तस्य विकारतः ।
प्रादुर्भवति युञ्जाने समाधौ प्रलयं गते ॥
दिव्यं तन्द्रधमाघ्राति दिव्यार्थांस्तान्शृणोति च ।
दिव्यरूपैश्च पुरुषैर्भिद्यते न च छिद्यते ।
गच्छन्प्रकृतितोऽनन्तः प्रधानात्मा क्षरन्निव ॥

Colophon.

वैशंपायन उवाच ।

ततोऽन्यां धारणां गत्वा मनसा स पितामहः ।
ब्रह्मकर्मसमारम्भं निर्मुक्तेनान्तरात्मना ॥
सर्वाङ्गधारणां कृत्वा मनसा प्रहसन्निव ।
ब्रह्मयोगेन योगज्ञः सृजते मनसा प्रजाः ॥
मनसा रूपसंपन्ना ह्यप्सराः सृजते प्रभुः ।
नासिकाग्राच्च गन्धर्वान्सुचित्राम्बरवाससः ॥
तुम्बुरुप्रमुखान्सर्वाञ्शतशोऽथ सहस्रशः ।
नृत्यवादित्रकुशलान्कुशलान्सामगीतये ।
ब्रह्मयोगेन योगज्ञः स्वयंभूर्भगवान्प्रभुः ॥
चारुनेत्रां सुकेशान्तां सुभ्रूं चारुनिभाननाम् ।
पद्मेन शतपत्रेण चारुणा सुविराजिताम् ।

ऋतवो (K_3 D_1 अयने) वत्सराण्यथ (for ^{b}) — (L 998) D_3 कला काष्ठा (for कला. काष्ठास्) — (L 1001) G_3 सविकारं ससभवम् (for ^{b}) — (L 1002) D_6 (marg) योगयुक्तो विकारैस्तै (for ^{a}) K_1 यान्त्यन्ते ह्यबलाशनात्, D_2 पच्यन्ते ह्यबलासनात् (for ^{b}) — (L 1003) B_3 Cal ed. लोके (for सद्यो) $V_{1\ 3}$ अलोकाच्छिद्यते लोके (for ^{a}). — (L 1005) K_{1-3} बल-, V_3 D_3 वन-; D_4 बलि-, G_4 जल- (for तल-) — (L 1006) K_3 बुध्यते, D_1 बाध्यते (for युज्यते) — After line 1006, $K_{1\ 2}$ $\tilde{N}_2$ $B_{1.\ 3}$ $D_{4\ 6}$ ins :

47** ततः पार्थिवमैश्वर्यं सेवमानश्च सर्वत. ।

— B_3 om lines 1007–1012 K_2 om (hapl) lines 1009^a–1011^a - (L 1109) $K_{1\ 3}$ Dn Ds_1 $D_{1\ 6}$ पाठ्यते (for पात्यते) $\tilde{N}_2$ $V_{1,\ 3}$ D_6 तीक्ष्ण- (for क्षुर-) — D_6 om (hapl) lines 1010–1011. — (L. 1010) D_3 बाणौघै. (for बाणाग्रैः) — (L 1011) K_4 $V_{1\ 3}$ B_1 Dn $D_{2\ 3\ 5}$ $G_{3\ 4}$ निर्वृत्तैर्, B_2 संवृत्तैर्, D_3 निवृत्तैर् (for सकलैर्) Dn संवृतश् (for निरुद्धैश्) — V_3 om line 1013 —(L 1013) $K_{2\ 3}$ $D_{1\ 4}$ नियुक्तस्य, D_3 विमु° (for निर्मु°) — (L 1014) K_3 $D_{1\ 6}$ युक्तात्मा, Dn D_2 संजाते, D_5 युञ्जानो (for °ने) — (L 1015) Dn Bom Poona eds G(ed) दिव्यं गन्ध समाघ्राय (Dn °ति) (for ^{a}) — (L 1016) $B_{1\ 3}$ $G_{3\ 4}$ विविधैर् (for पुरुषैर्) $\tilde{N}_2$ विद्यते न च भिद्यते, $V_{1\ 3}$ छिद्यते न स भिद्यते, D_3 भज्यते न च भिद्यते (for ^{b}). — (L 1017) K_3 D_1 गच्छता प्रकृतिं चोक्तः, K_4 Dn D_5 गच्छन्सुकृतिना चान्त , D_3 गच्छन्ति प्रकृतेरन्त , D_6 गच्छंश्च प्रकृतिं स्वा तु (for ^{a}). K_3 D_1 क्षय गतः (for क्षरन्निव)

Colophon. — *Mention of the Epic* Ds_2 — *Mention of Khila* K_1 $V_{1\ 3}$ B Ds $D_{1\ 4}$ — *Sub-parvan* $K_{1,\ 2}$ $D_{4\ 5}$ पौष्करप्रादुर्भाव , K_3 Dn_2 पुष्करम्; K_4 V_3 प्रादुर्भाव , $\tilde{N}_3$ V_1 B Ds $D_{2\ 3\ 6}$ G_3 पौष्करम्, Dn_1 D_1 पुष्करप्रादुर्भावः — *Adhy no* K_3 (marg) D_1 93 , V_3 206 , Dn 13 , Ds_2 204 , $D_{3\ 4}$ 220 , G_3 346 , G_4 144

(L 1019) Dn_1 Ds_1 $D_{3\ 6}$ Cal ed समारम्भ- (for °रम्भं). $K_{1\ 2}$ D_4 नियुक्तेन, Cal ed निर्यु° (for निर्मु°) — G_4 om line 1020 — (L 1020) G_3 सर्वां च (for सर्वाङ्ग) B_1 Ds D_1 -धारणं (for °णा) $\tilde{N}_2$ V_1 गत्वा (for कृत्वा). V_3 सर्वाङ्गे धारणं कृत्वा; D_3 सर्वाः स धारणा गत्वा (for ^{a}) —(L 1021) K_4 $\tilde{N}_2$ B_3 ब्रह्मज्ञ. (K_4 °ज्ञं); Dn च ब्रह्मा, D_2 ब्रह्मात्मा, D_3 ब्रह्मस्थः (for योगज्ञः) — (L 1022) $K_{1\ 2}$ $B_{2\ 3}$ Dn Ds_2 D_4 (marg as above) G_3 चक्षुषा, $D_{3\ 6}$ G_4 चक्षुषो (for मनसा) D_5 मनसा (marg. चक्षुषा) रूपमापन्ना (for ^{a}) $\tilde{N}_2$ om lines 1022^b–1023^a. — (L 1023) Ds_1 नासिकायां, G_3 °कायाश् (for °काग्राच्) $K_{3\ 4}$ D_1 संपन्ना , D_2 संपन्नान् (for गन्धर्वान्) D_5 नासिकाग्रात्सुसंपन्ना (for ^{a}) — (L 1025) V_3 -गन्धर्वान्, D_5 -कुशला. (for °लान्) $K_{1\ 2}$ B_2 Dn D_4 $G_{3\ 4}$ -गीतिषु; D_6 -गायने (for -गीतये) $\tilde{N}_2$ सामगा गीतये तदा, V_1 सामगा-

धर्म्यां शुचिगिरं सेव्यां ब्राह्मी मूर्तिमती श्रियम् ॥
ससृजे मनसा ब्रह्मा सम्यक्प्रोक्तेन चेतसा ।
भावयोगेन भूतात्मा सर्वप्राणभृतां नृप ॥
चक्षुषा रूपसंपन्नाः सृजन्सोऽप्सरसः प्रभुः ।
नासिकाग्राच्च गन्धर्वान्सुवाचः सुप्रवादितान् ॥
गानप्रभाषं सचक्रे गन्धर्वाणां विशेषतः ।
अन्येषां चैव विप्राणां गानं ब्रह्मप्रभावितम् ॥
पद्भ्यां सृजति भूतानि गतिमन्ति ध्रुवाणि च ।
नरकिंनरयक्षांश्च पिशाचोरगराक्षसान् ॥
गजान्सिंहांश्च व्याघ्रांश्च मृगांश्चैव सहस्रशः ।
तृणजातीश्च बहुधा भावहेतोश्चतुष्पदान् ॥
ये तु हस्तान्निखादन्ति कर्मप्राप्तेन हेतुना ।
हस्तेभ्यः कर्म स सृजन्मन्तव्यं मनसा तथा ॥

पायुना स विसर्गं च भूतानां सुखमिच्छताम् ।
उपस्थेन तथानन्दं पञ्चेन्द्रियसमाधिना ॥
हृदयादसृजद्गावो बाहुना पक्षिणस्तथा ।
अन्यानि चैव सत्त्वानि तैस्तैर्वेषैः पृथग्विधैः ॥
ऋषिं त्वङ्गिरसं चैव मुनिं ज्वलिततेजसम् ।
ब्रह्मवंशकरं दिव्यं व्यतिरिक्तषडिन्द्रियम् ॥
भ्रुवोऽन्तरे जनयते योगाद्योगीश्वरः प्रभुः ।
ब्रह्मवंशकरं दिव्यं भृगुं परमधार्मिकम् ॥
ललाटदेशादसृजन्नारदं प्रियविग्रहम् ।
सनत्कुमारं मूर्ध्नश्च महायोगी पितामहः ॥
अभिषिक्तं च सोमं च यौवराज्ये पितामहः ।
ब्राह्मणानां च राजानं शाश्वतं रजनीचरम् ॥
तपसा महता युक्तो ग्रहैः सह पुरःसरः ।

न्साम गीयते (for *b*) — (L 1026) V3 सृजते मनसा प्रजा- (for *b*) — (L 1027) K1 2 D4 सुभ्रुं पद्म-, D3 शुभा चारु-, D6 (marg) सुभ्रूं शशि-, G8 पूर्णचन्द्र, G(ed) सुभ्रूं चन्द्र- (for सुभ्रू चारु) K3 सुभ्रूं चारुतराननाम् (for *b*) — (L 1028) D3 शुभ्र- (for शत-) K2 D4 करेण (for चारुणा) V8 सुविभूषिताम्, B1 3 च विराजि°, D1 सुविराजता (for °जिताम्) — (L 1029) K4 B2 Dn स्वक्षां, D3 रम्या (for धर्म्यां) D2 5 स्वक्षा शुचिगिरां सेव्या, G3 4 रम्या शुचिस्मिता सेव्या (for *a*) — K2 om lines 1030–1036 — (L 1030) K3 D1 6 सोऽसृजन्, K4 सृजते, B1 3 G3 असृजन्, D5 स सृजन् (for ससृजे) — (L 1031) G3 योगात्मा (for भूतात्मा) G3 4 वर (for नृप) — (L 1032) B2 Dn G4 चक्षुषो (for °षा) V1 3 D6 सृष्ट्वा (for सृजन्) Ñ2 ससृजे सोऽप्सराः प्रभुः, D3 सृजतेऽप्सरस पुनः, D6 असृजत्सोऽप्सरां प्रभु (for *b*). — (L 1033) संपन्नान् (for गन्धर्वान्) Dn Bom Poona eds G(ed) सुवासः (for °च) K3 D1 4 6 सुप्रवादिनः; D2 सुप्रसा(*sup lin* °वा)दितान् (for सुप्रवा°) G3 असृजत्सप्त सादिन (for *b*) — (L 1034) K1 Ds1 D3 -प्रभाव, Ñ2 B2 °षां, B3 Cal ed °स (for °षं) V1 3 गानप्रभाषा चक्रे च, Ds1 D6 गानं प्रभावं (D6 °षां) संचक्रे; D2 गानप्रभाषणं चक्रे, G3 गानप्रशंसां चक्रे वै (for *a*). Dn Bom Poona eds G(ed) अशेषत. (for विशे°) — (L 1035) K1 अन्योन्यं (for अन्येषां) G4 ज्ञान (for गान) B2 विप्र- (for ब्रह्म-) K3 D4 6 (marg) -सुभाषितम्, B1 3 D5 -प्रकाशि° (for -प्रभावि°) — (L 1038) K4 विशेषत (for सहस्रश.). — (L 1039) Ñ2 D5 बहुला (for °धा). — (L. 1040) D1 6 G3 हस्तेन (for हस्तान्नि) — (L 1041) D3 हस्तेन (for °भ्य) Ñ2 सृजते, V3 B3 Dn D6 ससृजे (for स सृजन्) B1 हस्तेभ्य संसृजन्कर्म, D5 °भ्य· कर्ममसृजत्; G3 4 °न कर्म ससृजे (for *a*) K3 सुरूपं, G3 कर्तव्यं (for मन्तव्यं), — (L 1042) K4 विसर्गस्, Dn2 °र्गं च (for °र्गं च) Ñ2 वायूनामविसर्गं च, D8 पायुना स विसर्गांश्च (for *a*) — (L 1043) K1 2 D4 समानन्दं, Ñ2 B2 D3 6 G3 4 तदा° (for तथा°) K3 उपस्थिते तदानन्दे, K4 D2 5 उपस्थं च (K4 °स्थानं) तदानन्द, Dn D3 Bom Poona eds G(ed) उपतस्थे (D3 °स्थेन) तदा°, D1 °स्थितवदानन्दं D1 (marg) °स्थाने तथा नादं (for *a*) G3 4 -समाधिमान् (for °धिना). — (L 1044) V1 3 B D5 गा वै (for गावो). V3 B1 3 बाहुभ्यां, D1 °त· (for °ना) — (L 1045) K1. 4 Ñ2 V1 B Dn2 D5 D2 5 6 (marg) अब्जानि, K3 आत्मना (for अन्यानि) D3 सर्वाणि (for सत्त्वानि) K3 विषयैस्तैः, K4 तैस्तैर्बोधै., V1 3 तैस्तैर्देशै., D3 तैर्विशेषै (for तैस्तैर्वेषै) B1 वेषैस्तैस्तै पृथग्विधै. (for *b*) — (L 1046) Ñ2 V1 3 Dn D3 ज्वलन (for ज्वलित) — (L 1047) K4 B1 om (hapl.) lines 1047*b*–1049*a* Bom Poona eds G(ed) व्यतिषिक्त- (for °रिक्त-) — (L 1048) K1 V1 Ds1 भ्रुवो-रन्तरे जनयते (hympermetric), K3 °रन्तरजनयद्, B2 D1 °रन्तरेण जनयद् (hypermetric), D3 भ्रुवोऽन्तरेण जनयन् (for *a*) K3 V1 B2 3 Dn D3 6 G3 4 योगेश्वरः (for योगी°) — (L 1050) K3 4 Ñ2 V1 3 B Dn D5 D1–3 5 6 G3. 4 -मध्याद् (for -देशाद्) K3 D1 दर्शनम् (for विग्रहम्). G3 4 नारदं विग्रहप्रियम् (for *b*).—(L 1051) K2 D1. 3 मूर्ध्नि

चचार नभसो मध्ये प्रभाभिर्भासयञ्जगत् ॥
स गात्रैर्मनसा योगान्भगवान्सिद्धिमागतः ।
सृष्टवान्सर्वभूतानि स्थावराणि चराणि च ॥
तत्र स्थानानि भूतानां योगांश्चैव पृथग्विधान् ।
व्यधत्त शतशो ब्रह्मा सर्वभूतपितामहः ॥
एष ब्रह्ममयो यज्ञो योगः सांख्यश्च तत्त्वतः ।
विज्ञानं च स्वभावं च क्षेत्रं क्षेत्रज्ञमेव च ॥
एकत्वं च पृथक्त्वं च संभवो निधनं तथा ।
कालः कालक्षयश्चैव ज्ञेयो विज्ञानमेव च ॥

Colophon

जनमेजय उवाच ।

श्रुतं ब्रह्मयुगं ब्रह्मन्युगानां प्रथमं युगम् ।
क्षत्रस्यापि युगं ब्रह्मञ्श्रोतुमिच्छाम्यहं प्रभो ॥
ससंक्षेपं सविस्तारं नियमैर्बहुभिश्चितम् ।
उपायज्ञैश्च कथितं क्रतुभिश्चैव शोभितम् ॥

वैशंपायन उवाच ।

एतत्ते कथयिष्यामि यज्ञकर्मभिरर्चितम् ।
दानधर्मैश्च विविधैः प्रजाभिरुपशोभितम् ॥
तेऽङ्गुष्ठमात्रा मुनय आदत्ताः सूर्यरश्मिभिः ।
मोक्षप्राप्तेन विधिना निराबाधेन कर्मणा ॥
प्रवृत्ते चाप्रवृत्ते च नित्यं ब्रह्मपरायणाः ।[1]
परायणस्य संगम्य ब्रह्मणस्तु महीपते ॥
श्रीवृताः पावनाश्चैव ब्राह्मणाश्च महीपते ।
चरितब्रह्मचर्याश्च ब्रह्मज्ञानेन बोधिताः ॥
पूर्णे युगसहस्रान्ते पूर्वं ये प्रलयं गताः ।
ब्राह्मणा वृत्तसंपन्ना ज्ञानसिद्धाः समाहिताः ॥
व्यतिरिक्तेन्द्रियो विष्णुर्योगात्मा ब्रह्मसंभवः ।
दक्षः प्रजापतिर्भूत्वा सृजते विमलाः प्रजाः ॥
अक्षराद्ब्राह्मणाः सौम्याः क्षरात्क्षत्रियबान्धवाः ।
वैश्या विकारतश्चैव शूद्रा धूमविकारतः ॥

च, K_4 $D_{2\ 5}$ च मूर्ध्नि, $\tilde{N}_2$ V_1 Dn_2 मूर्ध्ना च (for मूर्ध्नश्च). — (L 1052) K_1 $D_{4\ 6}$ Cal ed अभिषिच्य (for °षिक्त) K_2 अभिषिच्यत सोमं च, $D_{1\ 5}$ °क्तवान्सोमं च (for ^{a}) — B_1 om (hapl) lines 1053-1059 — (L 1053) Ds D_3 रजनीकरम्, Bom Poona eds G(ed) °नीश्वरम् (for °नचिरम्) — (L 1054) Ds_1 G(ed) ग्रह- (for सह) $K_{1\ 4}$ Dn $D_{2\ 4\ 5}$ निशाकर, K_3 $V_{1\ 3}$ D_1 पुरंदर, D_6 पुर सरम् (for °सर) Ds_2 निर्जगाम ग्रहै सह (for ^{b}) — (L 1056) $K_{2\ 4}$ $D_{2\ 5}$ अथातो (for स गात्रैर्) D_3 अन्यान् (for योगान्) Dn_2 स्वगात्रैर्भगवान्वेगान् (for ^{a}) — (L 1057) K_4 Dn $D_{2,5}$ ससृजे, D_3 सृष्ट्वा च (for सृष्टवान्) — (L 1059) K_{1-4} $D_{1\ 4\ 6}$ व्यदधच्; B_3 विधत्ते (for व्यधत्त) Dn D_2 -लोक- (for -भूत-) — (L 1062) Cal ed संभव (for °वो). — (L 1063) G(ed) कालविदां (for °क्षयश्) D_1 G(ed) ज्ञेयं (for ज्ञेयो).

Colophon — *Mention of the Epic* Ds_2. — *Mention of Khila* K_1 $V_{1\ 3}$ B Ds $D_{1\ 3\ 4}$ — *Sub parvan* $K_{1\ 2\ 4}$ $\tilde{N}_2$ $V_{1\ 3}$ B Dn $D_{2\ 4\ 6}$ G_3 पौष्करम्, K_3 पुष्करम्, $D_{1\ 3\ 5}$ पौ(D_1 पु)ष्करप्रादुर्भावः — *Adhy no* K_3 D_1 94; V_3 206, Dn 14, Ds_2 205, D_3 221, D_4 201, G_3 347, G_4 345

(L 1064) D_4 ब्रह्ममयं, D_6 (marg) °पुरं (for °युगं) D_3 परमं (for प्रथमं). — (L 1065) $B_{1\ 3}$ Ds D_6 तत्त्वत (for [ब्र]ह्मं प्रभो) — (L 1066) D_3 ससंख्येयं (for °क्षेप) V_3 ससंहारं (for सविस्तारं) K_3 D_1 नियमैर्ब्रह्मभि श्रुतम्; G_3 °मे बहु चिन्तितम् (for ^{b}) — G_4 om (hapl) line 1067 — (L 1067) B D_6 Cal ed [उ]प- (for [ए]व). V_3 क्रतुभिश्चोपसेवितम् (for ^{b}) — K_3 om (hapl) lines 1068-1069 with the ref G_4 om the ref — (L. 1068) G_4 अन्वितम् (for अर्चि°) — (L 1069) D_3 बहुभिः (for विविधै) — (L 1070) K_3 भुज्यमाना (for ऽङ्गुष्ठमात्रा) $V_{1\ 3}$ आयाता; D_3 आवृताः; D_4 (marg as above) आदित्या, Bom ed अर्दिता (for आदत्ताः) — (L 1071) K_4 धर्मिणा (for कर्मणा) — (L 1072) K_3 $D_{1\ 5}$ निवृत्ते (for [अ]प्र°) K_4 $D_{2\ 5}$ यज्ञ- (for ब्रह्म-) — (L 1073) K_2 $D_{1\ 4}$ परायणं च, Ds D_6 °णस्तु (for °णस्य) D_6 संगत्या (for °म्य) — $K_{1\ 2\ 4}$ $D_{1\ 2\ 4\ 5}$ om (hapl.) line 1074. — (L 1074) B_2 Ds D_3 G_4 श्रीवृत्ताः (for °ताः) $\tilde{N}_2$ $V_{1,3}$ श्राविता ($\tilde{N}_2$ सुवृत्ता) मुनयश्चैव, D_6 श्री(*inf lin* स्त्री)वृत्ताः परमाश्चैव, G_3 श्रीवृत्ता ब्राह्मणाश्चैव (for ^{a}) — (L 1075) $K_{1,4}$ B_2 G(ed) चरित, Cal. ed चारित- (for च°) B_2 ज्ञानाव (for -ज्ञानेन) K_3 D_1 तोषिता., D_3 शोधिता (for बो°) — (L 1076) $V_{1\ 3}$ B Ds $D_{3\ 6}$ $G_{3\ 4}$ प्रभावे (for पूर्वं ये) $K_{2\ 3}$ $D_{1\ 4}$ प्रभावे विलय गता., $\tilde{N}_2$ प्रभावे प्रलयं गते (for ^{b}) — (L 1077) Bom Poona eds G(ed) वित्त (for वृत्त-) D_6 ब्रह्मणा चि(*sup lin.* वृ)त्तसंपन्ना (for ^{a}) $\tilde{N}_2$ सिद्धा वृद्धा, V_3 $G_{3\ 4}$ ज्ञानवृद्धा (for °सिद्धाः). — (L 1078) $\tilde{N}_2$ व्यतिरिक्तेन्द्रियैर्विष्णुर् (for ^{a}). — K_3

श्वेतलोहितकैर्वर्णैः पीतैर्नीलैश्च ब्राह्मणाः ।
अभिनिर्वर्तिता वर्णाश्चिन्तयानेन विष्णुना ॥
ततो वर्णत्वमापन्नाः प्रजा लोके चतुर्विधा ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महीपते ॥
एकलिङ्गाः पृथग्धर्मा द्विपदाः परमाद्भुताः ।
यातनायाभिसंपन्ना गतिज्ञाः सर्वकर्मसु ॥
त्रयाणां वर्णजातानां वेदप्रोक्ता· क्रियाः स्मृताः ।
तेन वा ब्रह्मयोगेन वैष्णवेन महीपते ॥
प्रज्ञया तेजसा योगात्तेन प्राचेतसः प्रभुः ।
विष्णुरेव महायोगी कर्मणामन्तरं गतः ॥
ततो निर्माणसंभूताः शूद्राः कर्मविवर्जिताः ।
तस्मान्नार्हन्ति संस्कारं न ह्यत्र ब्रह्म विद्यते ॥
यथाग्नौ धूमसंघातो ह्यरण्या मथ्यमानया ।
प्रादुर्भूतो विसर्पन्वै नोपयुज्यति कर्मणि ॥
एवं शूद्रा विसर्पन्ते भुवि कात्स्न्र्येन जन्मना ।
नासंस्कृतेन धर्मेण वेदप्रोक्तेन कर्मणा ॥
ततोऽन्ये दक्षपुत्रास्तु संभूता धर्मयोनयः ।
बलवन्तो महोत्साहा महावीर्या महौजसः ॥
पित्रा प्रोक्ता महात्मानो दक्षेणायज्ञकर्मणा ।
अन्तमिच्छाम्यहं श्रोतुं धात्र्याः पुत्रोऽबलो ह्यहम् ॥
ततो विधास्ये तत्त्वज्ञः प्रजानां विपुलं बलम् ।
विपुलत्वाद्धि क्षेत्राणां ममापि विपुलाः प्रजाः ॥
न तेषां दर्शयेद्देवी चक्षुषा रूपमात्मनः ।
प्रजापतिसुतानां वै विपुलं सारमिच्छताम् ॥
आत्मनो भावनिर्वृत्ते भाव्ये कृतयुगे तदा ।
जनित्री सर्वभूतानामण्डजानुद्भिदांस्तथा ॥
संवेदजननी धात्री चेति मात्रा प्रचोदिता ।
अणुतां तनुतां चैव जन्तूनां कर्मभागिनाम् ॥

Colophon.

D4 om lines 1079–1080 —(L 1079) Ñ2 V1 3 B D6 G3 4 विपुला (for विमलाः) D3 ससृजे विविधा. प्रजा (for ᵇ) —(L 1080) K1 अक्षरा (for °राद्) K1 Ñ3 V1 3 Dn1 Ds2 D2 3 5 -संभवा (for -बान्धवा) K3 Ds1 D1 क्षत्रा (Ds1 °राः) क्षत्रियसंभवा· (for ᵇ) —(L 1081) K2 D4 [अ]धिकारतश्, D3 विकारजाश् (for °तश्). V1 3 Ds2 D1 3 धर्म- (for धूम-) —(L 1085) D3 विशां पते (for महीपते) —(L 1086) Ñ2 Ds Cal ed द्विपादा. (for द्विपदा) —(L 1087) K1 2 D1 4 यातनाभि. सुसंपन्ना (for ᵃ) Ds1 प्रभिज्ञाः, D3 तितिक्षाः, D4 ज्ञातिज्ञा (for ग°) —(L 1088) K1 2 B3 D2–4 -जातीनां (for जातानां) —(L 1089) K1 Ñ2 V1 3 B Ds D2 3 6 ब्राह्मण-; Dn वो ब्रह्म-, G3 [ए]व ब्रह्म (for वा ब्रह्म-) —(L 1090) B1 चेतसा (for तेजसा). Ñ2 B3 युक्ता, D6 युक्तस्, G3 यत्तस् (for योगात्) K3 (before corr) स्मृतः; D3 प्रजा· (for प्रभु) —(L 1092) V1, 3 निर्वार्थं; D4 निर्याण-, G3 द्युमणि- (for निर्माण-) —(L 1093) K1 2 Ñ2 V1 3 B2 3 D2 4–6 G4 सत्कारं; K4 सत्कर्म (for संस्कारं) Ds2 तस्मान्नार्हंति सत्कार (for ᵃ) B2 3 क्षत्रे (for ह्यत्र) K3 D1 क्षत्रं ब्रह्म च विद्यते (for ᵇ) —(L 1095) G3 Bom Poona eds G(ed) -युञ्जन्ति (for -युज्यति) D1 कर्मणा (for °णि) —(L 1096) K4 विमुच्यन्ते, Ñ2 B1 2 Dn D3, 4 विसर्पन्तो (for °र्पन्ते) V1 तेजसा, V2 कर्मणा (for जन्मना) —(L 1099) K3 D1 महादक्षा (for महोत्साहा). —(L 1100) K3 D1 महातेजा (for °त्मानो) K1 4 D1 3 6 यज्ञ- (for [अ]यज्ञ-) K3 दाक्षिणा याज्ञिया गिरा, Dn Ds1 D4 5 G3 4 दाक्षिणा यज्ञकर्मणा, D3 दक्षेण यज्ञकर्मणि (for ᵇ). —(L 1101) B1 3 Ds1 D5 6 G3 4 अन्यद् (for अन्तम्) K3 धातु (for धात्र्या). K1 3 4 B2 Dn Ds2 D1, 4 G3 4 पुत्रा (for पुत्रो) K4 धात्र्याः पुत्रा बलादहम्, B1 धात्रा यत्राचलो ह्यहम्, D3 धात्र्या पुत्र्याचलो ह्यहम्, D4 धात्र्याः पुत्रोऽबलो ह्यहम् (marg विलोक्यताम्) —(L 1102) K4 विधाय (for °स्ये) G3 4 तत्त्वज्ञाः (for °ज्ञ.) D5 ततो विधाय तत्त्वज्ञा (for ᵃ) —Ds om line 1103 —(L 1104) K1-3 Ñ2 V1 3 Ds D1 3 4 दर्शनं, Dn D5 G3 4 दर्शयद् (for °येद्) —(L 1105) K1 2 Ñ2 V1, 3 B2(marg) 3 Dn D1 2 4–6 विपुलासारम्, B1 2 Ds Cal ed °लामानम्, G4 °लं घोरम् (for °लं सारम्). K4 विपुलासारमिच्छता (for ᵇ) —(L 1106) Ñ2 V3 Dn भावे, Ds 5 भव्ये (for भाव्ये) —(L 1107) B1 D3 जननी (for जनित्री) K4 Ñ2 B Dn Ds2 D4–6 उद्भिजांस् (for °दांस्) D3 असृजन्त द्विजांस्तदा, G3 अण्डजानां ततो हिता. (for ᵇ) —(L 1108) K1, 3 V1, 3 Ds D1 G4 संस्वेद- D3 तां वेद- (for संवेद-). Ñ2 Ds D2 चेति धात्रा; D3 चिन्त्यमाना (for चेति मात्रा) K3 प्रकीर्तिता (for प्रचोदिता) —(L 1109) K1 D4 अण्डतां K3 अत्र तां, V1 अन्वेतां, V3 अथैतां; D1 अत्रैतां (for अणुतां) K2 अण्डतां चातुलां चैव (for ᵃ). V1 जनुषां, G3 जनित्री (for जन्तूना) K1–3 D1, 4 -भाजिनाम्, B1 Dn

जनमेजय उवाच ।
साध्वहं श्रोतुमिच्छामि त्रेतायां ब्राह्मणोत्तम ।
यं ज्ञात्वा सर्वविद्यानां परं पश्येयमव्ययम् ॥
वैशंपायन उवाच ।
दक्षस्तु पुनरालम्ब्य स्त्रीभाव पुरुषोत्तमः ।
योगाद्योगेश्वरात्मानं निषण्णो गिरिमूर्धनि ॥
सुजानुः पीनजघना सुभ्रूः पद्मनिभानना ।
रक्तान्तनयना कान्ता सर्वभूतमनोरमा ॥
दक्षः प्राचेतसस्तस्यां कन्यायां जनयत्प्रभुः ।
देहाद्धि योगविधिना कन्याः पद्मनिभाननाः ॥
दक्षः पुरुषरूपेण स्त्रीरूपमपहाय च ।
दर्शने सर्वभूतानां कान्तः कान्ततरोऽभवत् ॥
ताः कन्याः प्रददौ दक्षः स्वयं प्राचेतसः प्रभुः ।
ब्रह्मदेयेन विधिना ब्रह्मप्राप्तेन भारत ॥
प्रददौ दश धर्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय पत्नीहेतोः समाहितः ॥
दक्षो दत्त्वाथ ताः कन्या ब्रह्मक्षत्रं प्रपद्यत ।
ब्रह्मणाध्युषितं पुण्यं समाहितमना मुनिः ॥
तप्यमानो मृगैः सार्धं चचार वसुधां नृप ।
तृणमूलफलैर्वृद्धो वृद्धश्च तपसासकृत् ॥
मृगास्तु तस्य मोदन्ति फलं मोदन्ति ब्राह्मणाः ।
दीक्षिताः पुण्यकर्माणस्तपसा दग्धकिल्बिषाः ॥
संग्रामकाले कालज्ञः शरीराधिपतिर्मुनिः ।
कर्मयज्ञकृतां तात सिद्धि पश्यति लक्षणाम् ॥
दानमानप्रवीराश्च निरुद्वेगा निरामिषाः ।
मृगैः सह जरां यान्ति सपत्नीकाः सपुत्रिणः ॥
ब्राह्मणाः स्तोत्रसंसिद्धा जनित्रे प्रथमे पदे ।
ब्राह्मणाध्युषितत्वाच्च ब्रह्मक्षेत्रमिहोच्यते ॥
यतिभिः कर्मनिर्मुक्तैर्जितक्रोधैर्जितेन्द्रियैः ।
चरद्भिर्वसुधां विप्रैर्निष्किचनपथैषिभिः ॥

-भोगिनाम्, B2 Poona ed -योगि° (for -भा°)

COLOPHON om in D1 — *Mention of the Epic* Ds2. — *Mention of Khila* K1 V1 3 B Ds1 D4 — *Sub-parvan* K1 2 4 Ñ2 V1 3 B Ds2 D2 3 5 6 G3 पौष्करम्; K3 Dn2 पुष्करम्, Dn1 पुष्करप्रादुर्भाव, Ds1 D4 पौष्करप्रादुर्भाव· — *Adhy no* K3 (marg) 95, V3 207, Dn 15, Ds2 206, D3 222, D4 292, G3 341, G4 346

(L 1110) K1 त्रेतां च ब्रह्मणोत्तमम्, D3 त्रेतायां ब्राह्मणोत्तमान् (for ^{b}) — (L 1111) K2 3 D2 6 G1 4 यज् (for य) K4 V1 D5 -भूतानां (for -विद्यानां) D3 यज्ञार्थं सर्वभूतानां (for ^{a}) V3 D6 पारं (for परं) Cal ed अव्यय (for °यम्) D3 परं पश्येद्यथाव्ययम्, D5 विद्याना परमव्ययम् (for ^{b}) — (L 1113) D3 योगात्मना तथात्मान ; D6 योगाद्योगेश्वरात्मा हि (for ^{a}) K2 निष्पन्नो, V3 B2 3 Dn D2 विषण्णो (for नि°) Ñ2 -सानुषु (for -मूर्धनि) — (L 1114) K3 D1 सुजात- (for °नु·). K2 D4 शुभ्रा (for सुभ्रू) — (L 1115) D3 G3 -मनोहरा, D6 हिते रता (for -मनोरमा) — After line 1115, D6 ins

48** मनोरमा महाभागा चिन्तयात्मानमात्मना ।

— (L 1116) Dn2 Ds1 जनयन् (for °यत्) K3 D1 कन्यामजनत्प्रभु (for ^{b}) — (L 1117) Dn D2 3 देहार्धं- (for °द्धि) G3 4 -निभेक्षणा. (for -निभानना·) — (L 1118) K3 दक्षस्तु पुरुषो राजन् (for ^{a}) D3 अपहार्यं (for °हाय) — (L 1119) V1 B1 D5 6 कान्तात् (for कान्त·) — (L. 1121) D3 ब्रह्मज्ञो येन विधिना (for ^{a}) D3 G3 4 चेतसा (for भारत) — (L 1122) D3 ददौ स (for प्रददौ) — (L 1123) K3 चतस्रोऽरिष्टनेमिने (for ^{b}) — (L 1124) K2. 4 V1 3 B1 Ds D2 4 6 प्रपद्य च, Ñ2 °द्य ह, B2 D1 °द्यते (for °द्यत). K3 B1 Dn G3 4 ब्रह्मक्षेत्रं प्रपद्य च, D3 °क्षेत्रं प्रयुज्य च (for ^{b}) — G2 om (hapl) lines 1126–1130 — (L. 1127) G(ed) वृतश् (for वृद्धश्) — (L 1128) K1. 2 D4 तस्याव- (for तु तस्य) Cal ed चरितं (for मोदन्ति) D3 तथा; D6 फलैर् (for फलं) — (L 1130) Dn D2 5 शरीरादि- (for °राधि-) D3 नृप (for मुनिः) Cal ed शशिनाद्रियते मुनि (for ^{b}) — (L 1131) D4 तां च; D6 तां तु (for तात) K1 D3 कर्म यज्ञः कृतां तां तां (D3 °तं कर्म); Ñ2 धर्मयज्ञकृतां सिद्धिं (for ^{a}) V1 3 Ds D2 4–6 पश्यन्ति; G3 G3 पश्यन्वि- (for पश्यति). K3 लक्षणा· (for °णाम्). K1 2. 4 D1 सिद्धिं पश्यन्ति लक्षणात्, Ñ2 परां पश्यन्ति लक्षणाम् (for ^{b}) — (L 1132) K4 -प्रवीणाश्, Ñ2 V3 -शरीराश् (for -प्रवीराश्) K1 D4 निरुद्धाङ्गा (for °द्वेगा) K3 निराशिषः (for °मिषा·) D1 निरुद्विग्ना निराशिष, D3 °द्धाङ्गा निरामयाः (for ^{b}) — (L 1133) K1 सपुत्रिकाः, Ñ2 V1 3 B1 2 D3. 6 सपुत्रिण, Dn तपस्विन, D4 सपुत्रका· (for °त्रिण). — (L. 1134) D3 क्षुभिते (for जनित्रे) Ñ2 V1 3 जनिते प्रथमे तदा (for ^{b}). — (L 1137) V3 प्रीतैर् (for विप्रैर्). B Dn D2. 3 5 6 अकिंचन- (for निष्किं°) K4 Ñ2 V1. 3 D3

या प्रजा पूर्वमारूढा मानसी ब्रह्मचारिणी ।
सैवैषा व्यक्तिमापन्ना स्वभावदुरतिक्रमा ।
व्यक्ताव्यक्तगतिश्चैषा कालधर्मान्महीपते ॥
स्थावरा जङ्गमाश्चैव स्थूलाः सूक्ष्माश्च भारत ।
कालयोगेन योगज्ञा भवन्ति न भवन्ति च ॥
एताश्चैताः प्रजाः सर्वा दक्षकन्यासु जज्ञिरे ।
कश्यपेनाव्ययेनेह संयुक्ताः कालधर्मणा ॥
आदित्या वसवो रुद्रा विश्वे च समरुद्गणाः ।
नागाश्चानेकशिरसः साध्या वै पन्नगास्तथा ॥
गन्धर्वाः किनरा यक्षाः सुपर्णाश्च तथापरे ।
गरुत्मान्सह यक्षैश्च किनराश्च सुवाससः ॥
गावः पशुगणैः सार्धं नराश्च वसुधाधिप ।
धराधराश्च वसुधा धातारश्च धराधराः ।
गजाः सिंहाश्च व्याघ्राश्च हयाः पक्षधरास्तथा ॥
खड्गा विषाणिनश्चैव वृषभाश्च मृगास्तथा ॥
चतुर्विषाणा नागेन्द्राः पद्माभा वर्णतः शुभाः ।
सर्वलक्षणसंपन्ना प्राणिनः कामरूपिणः ॥
तथारूपैस्तथागात्रैस्तैः शीलैस्तैः पराक्रमैः ।
मुनयः पुनरुद्भूता धर्मक्षेत्रे सनातने ॥
क्षेत्रज्ञा मानुषे लोके धर्मिणो वेदगोचराः ।
यत्रोद्भूताः सुराः सर्वे दिवि लोके प्रतिष्ठिताः ॥
ये चान्ये तपसा सिद्धा गृहस्था मनुजाधिप ।
ब्रह्मचर्येण संसिद्धाः परिचर्या गता गुरोः ॥
ये च योगगतिं प्राप्ताः सिद्धिहेतोर्महीपते ।
क्लेशाधिकैः कर्मजन्यैर्वृत्तिं लप्स्यन्ति वै द्विजाः ॥
शिलोञ्छवृत्तयः क्षान्ताः सपत्नीका दृढव्रताः ।
सर्वे त्वेते दिविचरा भवन्ति चरितव्रताः ॥

Colophon.

$G_{3\ 4}$ अकिंचनपथैषिण (V_1 °दैषिण , G_3 °दैषिभि) (for ^{b}) — (L 1138) $\tilde{N}_2$ $V_{1\ 3}$ B_1 Dn Ds_2 D_6 G_4 सर्वम् (for पूर्वम्) D_2 या प्रजा सर्वदा मूढा , D_3 या प्रजा सर्गमारूढा (for ^{a}) — (L 1139) $\tilde{N}_2$ $V_{1\ 3}$ सा चैषा , G_4 नैष्ठिका (for सैवैषा) Dn सर्वम् (for व्यक्तिम्) D_3 स्वभावाद्दुरतिक्रमात् (for ^{b}) — After line 1139, $K_{3\ 4}$ $\tilde{N}_2$ $B_{2\ 3}$ Dn Ds_2 $D_{1\ 2\ 4\ 6}$ G_3 ins :

49** अव्यक्ता व्यक्तिमापन्ना स्वभावाद्दुरतिक्रमा ॥

[D_4 सैवैषा (for अव्यक्ता) K_3 D_1 व्यक्ताव्यक्तसमापन्ना , B_2 व्यक्ता व्यक्तित्वमा° (for ^{a}) K_4 $\tilde{N}_2$ $B_{2\ 3}$ $D_{2\ 4\ 6}$ स्वभाव (for °वाद्)]

— (L 1140) D_1 om line 1140^a $K_{1\ 2}$ D_4 -समैवैषा , V_3 B_3 -गतिश्चैव , B_2 -गतिस्त्वेषा , Ds_1 -गमैरेषा , D_6 -गातिं चैषां (for गतिश्चैषा) K_4 D_5 Cal ed व्यक्ताव्यक्तं गमित्वै- (K_4 °त्ये)षा , Ds_2 °द्व्यक्तगमैरेषां , D_2 °व्यक्तं गतिस्त्वेषां , D_3 व्यक्तव्यक्तिगता त्वेषा (for ^{a}) D_3 G_4 -धर्मैं (for -धर्मान्). — (L 1142) K_2 D_4 -वेगेन (for -यो°) $B_{2\ 3}$ $D_{1\ 6}$ G_3 कालज्ञा (for योगज्ञा) K_4 वि- (for न) — (L 1143) $K_{1\ 2}$ $V_{1,3}$ D_3 -कन्याश्च , G_3 -कन्या वि- (for -कन्यासु) K_3 K_3 D_1 दक्षकन्या व्यजज्ञिरे (for ^{b}) — (L 1144) D_6 कालेन महता तास्तु (for ^{a}) — (L. 1145) $K_{1\ 3}$ Dn D_2 G_7 विश्वे देवा , D_1 विश्वे चैव (for विश्वे च स-) G_4 विश्वे च मरुतां गणा (for ^{b}) — (L. 1147) K_3 राक्षसा , D_1 पन्नगा (for किनरा) — (L 1148) Dn_2 सुरासुराः , D_3 $G_{3\ 4}$ सवासवा (for सुवाससः) — (L 1150) K_4 V_1 B_2 Dn $D_{4.5}$ (*inf lin*) $_6$ G_3 चराचराश्च , V_3 B_3 D_3 धाराधराश्च , $D_{1\ 2}$ धराधरश्च , G_4 °चराश्च (for °धराश्च) Dn_2 G_3 धर्तारश्च , D_6 धातवश्च (for धातारश्च). D_3 नराधिपा (for धराधरा) — (L 1152) $G_{3\ 4}$ खगा (for खड्गा) D_3 पद्मवर्णनिभा शुभा (for ^{b}) — (L 1154) V_1 -संपूर्णा (for -संपन्ना) — (L 1155) K_4 तथाशीलैः (for तैः शीलैस्तैः) — (L 1156) K_3 -यज्ञे (for क्षेत्रे) D_1 धर्मज्ञैस्तैः सनातनैः (for ^{b}) — (L 1157) K_3 मानसा , K_4 $\tilde{N}_2$ $V_{1,3}$ B Dn $D_{1\ 3\ 6}$ $G_{3\ 4}$ मानसे (for मानुषे) D_3 Cal ed क्षेत्रज्ञमानसे(Cal ed °सो) लोके (for ^{a}) G_4 -पारगाः (for -गोचराः) D_4 धर्मिष्ठा वेदगोचरे (for ^{b}) — (L 1159) K_4 युक्ता (for सिद्धा) — (L 1160) G_3 गुरौ (for गुरोः) — (L 1161) G_3 सिद्धा योगे (for सिद्धिहेतोर्) — (L 1162) नश्यन्ति (for लप्स्यन्ति) — (L 1163) $K_{1\ 2\ 4}$ $D_{3\ 4}$ G_3 शान्ता , K_3 D_2 सर्वे , G_4 Bom Poona eds G(ed) ख्याता (for क्षान्ता) — (L 1164) B_2 सर्वत्र ते , D_3 ते च सर्वे (for सर्वे त्वेते). K_3 D_1 सर्वे च ते द्विजवराः (for ^{a})

Colophon — *Mention of the Epic* Ds_2 G_4 — *Mention of Khila* K_1 $V_{1\ 3}$ B Ds_1 $D_{1\ 4}$ — *Sub-parvan* : $K_{1\ 2\ 4}$ $\tilde{N}_2$ $V_{1\ 3}$ B Ds $D_{2\ 3\ 5\ 6}$ G_3 पौष्करम् , K_3 Dn_1 D_1 पुष्करम् , Dn_2 D_4 पौ(D_4 पु)ष्करप्रादुर्भाव — *Adhy name.* K_3 96 , V_3 208 ; Dn 16 , Ds_2 207 , D_1 95 ;

वैशंपायन उवाच ।

पितामहं पुरस्कृत्य मेरुपृष्ठे समाहिताः ।
जटाजिनधरा विप्रास्त्यक्तक्रोधा जितेन्द्रियाः ॥
पर्वतान्तरसंसिद्धे बहुपादपसंवृते ।
धातुसंरञ्जितशिले समे निस्तृणकण्टके ॥
त्रयाणां ब्रह्मवेदानां पञ्चस्वरविराजिते ।
मन्त्रयज्ञपरा नित्यं नित्यं व्रतहिते रताः
एकमेवाग्निमाधाय सर्वे ब्राह्मणपुंगवाः ।
बिभिदुर्मन्त्रविषयैः सुसमाहितमानसाः ॥
त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः ।
अतस्ते त्रित्वमापन्ना यदेकस्त्रिविधः कृतः ॥
एक एव महानग्निर्हविषा संप्रवर्तते ।
स्वधाकारेण मन्त्रज्ञा मन्त्राणां कार्यसिद्धये ॥
स्वयं च दक्षः संप्राप्तो भगवान्भूतसत्कृतः ।
ब्रह्मा ब्राह्मणनिर्माता सर्वभूतपितामहः ॥
दण्डी चर्मी शरी खड्गी शिखी पद्मनिभाननः ।
अभवन्न्यस्तसंतापो जितक्रोधो जितेन्द्रियः ॥
यजते पुष्करे ब्रह्मा मेधया सह संगतः ।
इन्द्रप्रोक्तानि सामानि गीयन्ते ब्रह्मवादिभिः ॥
घृतं क्षीरं यवा व्रीहिः सर्वं परमकं हविः ।
वेदप्रोक्तं मखे न्यस्तं कल्पितं ब्रह्मणः पदे ॥
निर्मथ्यारणिमाग्नेयीं शमीगर्भसमुत्थिताम् ।
स ब्रह्मा प्रथमं तस्मिन्नग्निमन्यं प्रवर्तयत् ॥
न ह्यन्यद्विहितं द्रव्यं यथाग्निर्यज्ञकर्मणि ।
प्रवर्तयेद्विभागैर्वा हुतहव्यमयं बलम् ॥
फलानि नैः प्रयुक्तानि हर्वाषि विततेऽध्वरे ।
प्रयुञ्जते प्रयोगज्ञा मुनयो ब्रह्मवादिनः ॥
युक्तानां वाजिमुख्यानां सहस्रेणाशुगामिनाम् ॥
रथमारुह्य दैत्येन्द्रो बभौ मेरुरिवापरः ।
किंकिणीजालपर्यन्तं गजेन्द्रध्वजशोभितम् ।
संध्याभ्रसमवर्णाभिः पताकाभिरलंकृतम् ॥
प्रवालजाम्बूनदभक्तिचित्रं
व्यालं विमुक्तान्तरनेमिघोषम् ।
रथं समारुह्य किरीटमाली
ययौ स युद्धाय महासुरेन्द्रः ॥
विरोचनानुजश्चैव कुजम्भो नाम दानवः ।
स्यन्दनैर्बहुसाहस्रैर्मणिकाञ्चनभूषितैः ॥
वृतो मदबलोत्सिक्तैर्देवारिररिमर्दनः ।
प्रासपाशगदाहस्तैर्दानवैर्युद्धकाङ्क्षिभिः ॥
स पर्वतनिभाकारो भिन्नाञ्जनचयप्रभः ।
महता भ्राजमानेन किरीटेन सुवर्चसा ॥
सर्वरत्नविचित्रेण कवचेन च संवृतः ।
महता दीप्तवपुषा रथेनेन्दुरिवांशुमान् ॥
शातकौम्भेन महता तालवृक्षेण केतुना ।
रराज रथमध्यस्थो मेरुस्थ इव भास्करः ॥
असिलोमा च तत्रैव दानवः पर्वतायुधः ।
दारुणं वपुरास्थाय दारुणो दारुणाननः ॥
रौद्रः शकटचक्राक्षो महामायो महाबलः ।
कृष्णवासा महादंष्ट्रो रक्ताक्षो लोहिताननः ॥
वृतो दैत्यसहस्रौघैर्गिरिपादपयोधिभिः ।
नानारूपधरैर्दीप्तैर्दैत्यैस्त्रिदशशत्रुभिः ॥

-समोपेतं, Ñ2 -बलो°, B3 D8 -धरो° (for -वरो°) T1.2 G1 3–5 M2 4 समस्तायुधसंपन्न (for ᵃ) K1.3 D5 M2 4 -मण्डितम्· T1 G3 5 -संयु°, T2 G1 4 मुच्छ्रि° (for -भूषि°) — (L 255) Ñ2 B2 3 G3 5 M2 संयुक्तं, V1 B1 D6 T1 2 G1 4 सुयुक्तं, Dn युक्ताङ्गं (for °ना) M2 Cal ed -गामिना (for °नाम्) — (L 257) T1 G3–5 -संयुक्तं (for -पर्यन्तं) Ds1 -सेवितम्, T1 G3 5 -भूषि° (for -शोभि°) D3 गजेन्द्रमिव शोभितम् (for ᵇ) — (L. 258) K3 -भीम-, T1 2 G1 3–5 M2 4 -जाल- (for -सम-) — (L 259) K4 प्रकृष्ट-, B3 पुराण- (for प्रवाल-) T2 G1 3 -भित्तिचित्र, G4 -जालपाङ्क्ति (for -भक्तिचित्रं).— (L 260) K2 D4 व्यालम्बि- (for व्यालं वि-) K3.4 Ñ1 D1–3 5 व्यालं वि(D3 महान्ध)कारान्तरनेमिघोषम्, Ñ2 V1 3 B Ds D6 व्यालं वि(D6 व्यालम्बि)-मुक्तान्तर(B2 3 °फल)शोभितं च, Dn D3 व्यालम्बिमुक्ताफल-शोभिताङ्गम्, T1 G3 व्यालं च मुक्तासरशोभितं च; T2 G1 4 व्यालायुधानामविचित्रभक्ति(G1 °भित्ति-; G4 °पत्ति)म् G5 व्यालम्बिमुक्तासरशोभितं च, M2 4 व्यालायुधागारविचित्र-भक्तिम् — (L 261) V3 समास्थाय (for °रुह्य) K Ñ1.2 V3 D1 3–5 -मौलिर् (for -माली) — (L 262) B2 सुरेन्द्राय, D2 3 सुयुद्धाय (for स यु°). B1 3 D6 Cal. ed ययौ स युद्धा-भिमुखोऽसुरेन्द्रः. — (L 263) T1 2 G1 3–5 M2 अनुह्लादा-नुजश्चैव (for ᵃ) D2 कुम्भाण्डो; D3 निकुम्भो, T1 सुजम्भो, (for कुजम्भो) B1 3 D6 Cal ed वीर्यवान् (for दानव). T2 G1 4 जम्भो नाम स दानव. (for ᵇ) — (L 264) G1 -भूषणै., T1 G3 5 चित्रितै (for -भूषितैः) —(L 265) K2 D4 -बलोत्क्षिप्तैर् (for °त्सिक्तैर्) K1–3 Ñ1 V1.3 B Ds D3 6 देवादिभिरारिंदम (for ᵇ). — For line 265, T1 2 G1. 3–5 M2–4 subst

15 ** वरदानमदोत्सिक्तैर्देवतानां च शत्रुभि ॥
[देवदानवशत्रुभि (for ᵇ)]

— (L 266) D1 पाशै (for प्रास-) — (L 267) Dn भग्नाञ्जन- (for भिन्ना°). D1.2 -सम- (for -चय-) — (L 268) B Ds D4 T1 2 G1 3–5 M2 4 [अ]र्क- (for सु-). — (L 270) Ñ2 B1 3 Ds D6 (marg as above) T1.2 G1 3–5 M2–4 स्वर्गद्वार (for रथेनेन्दुर्). — (L 272) T1.2 G1 3–5 M2 4 मेघस्थ (for मेरुस्थ) — After line 272, K1 2 Ñ2 V1.3 B Dn Ds D4–6 T1 2 G1 3–5 M2 4 ins.:

16 ** रणपटुरतिवीर्यसत्त्वबुद्धि·
सुरसमराभिमुख. प्रयाति तूर्णम् ।
असुरगणसमावृत कुजम्भ-
स्त्रिदशगणैरिव वृत्रहामरेन्द्र ॥

[(L 1) V3 -सत्य- (for -सत्त्व-) Ds1 -वृद्धिः (for -बुद्धि.). — (L 2) Ñ2 V1 3 D6 -सेनाभिरत (for -समराभिमुख). — (L. 3) T1 2 G1 3–5 M2 4 असुरगणसहस्रसवृतोऽसौ — (L. 4) Ñ2 V3 Ds सुरेन्द्र, B1 D6 नरेन्द्र, T1 G3 M2 महेन्द्रः (for [अ]मरेन्द्र)]

— (L 274) D1 4 दानवं (for दारुणं). D3 रथम् (for वपुर्) D1 2 दानवो (for दारुणो) V1 3 दारुणोऽनलः (for °णानन.) — D5 om (hapl.) lines 275–276. — (L 275) K1 Ñ1 2 B1 3 D6 G1 3.4 महाकायो (for °मायो) Ds महासुर (for °बल.) —(L 276) K4 Ñ2 V1 3 B Dn Ds D1 2 6 किरीटी (for रक्ताक्षो) Ñ1 T1 2 G1 3–5 M3 4 किरीटी लोहिताङ्गद (for ᵇ). — (L. 277) Dn D1.2

ते शूलहस्ता गगने चरन्त
इतस्ततस्तोयदवृन्दनादाः ।
खं छादयन्तस्तपनीयनिष्का
यथोत्थिताः प्रावृषि कालमेघाः ॥
अनायुषायाः पुत्रस्तु वृत्रो नाम महासुरः ।
देवशत्रुर्महाकायस्ताम्रास्यो निर्णतोदरः ॥
दीप्तजिह्वो हरिश्मश्रुरूर्ध्वरोमा महाहनुः ।
नीलाङ्गो लोहितग्रीवः किरीटी लोहिताङ्गदः ॥
आजानुबाहुर्त्रिकृतः श्वेतदंष्ट्रो विभीषणः ।
महामायो महाभीमो हेमकेयूरभूषणः ॥
महता मणिचित्रेण कवचेन सुसंवृतः ।
हेममालाधरो रौद्रश्चक्रकेतुररमर्षणः ॥
किंकिणीशतसंघुष्टं तपनीयविभूषितम् ।
युक्तं हयसहस्रेण रक्तध्वजपताकिना ॥
रथानीकेन महता युद्धायाभिमुखो ययौ ।
दिव्यं स्यन्दनमास्थाय दैत्यानां नन्दिवर्धनः ॥
तपितकनकबिन्दुपिङ्गलाक्षो
दितितनयोऽसुरसैन्ययुद्धनेता ।
विकसितकमलाभचारुवक्त्रः
सितदशनः शुशुभे रथासनस्थः ॥
एकचक्रस्तु तत्रैव सूर्यचक्र इवोदितः ।
कालचक्रसमो रौद्रश्चक्रायुध इवोद्यतः ।
सर्वायुधमयं दिव्यं रथमास्थाय भास्वरम् ।
वृतो दैत्यगणैर्दृप्तैः कालायसशिलायुधैः ॥
तस्याशीतिसहस्राणि रथानां चित्रयोधिनाम् ।
सर्वे कालान्तकप्रख्या रुधिराक्षा महाबलाः ॥
आयसैः काञ्चनैश्चैव संनद्धा वरवर्मिणः ।
व्यराजन्तान्तरिक्षस्था नीला इव पयोधराः ॥

रथ- (for दैत्य-) $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ -सहस्रेण (for °स्तौघैर्) T_2 $G_{1\ 4\ 5}$ $M_{2\ 4}$ गिरि पृथ्वीधरैरिव (for ^{b}) —K_2 D_8 om (hapl) line 278 — (L 278) $\tilde{N}_{1\ 2}$ V_3 B Dn_1 Ds_1 $D_{1\ 2\ 6}$ $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ दृप्तैर्, Ds_2 दैत्यैर् (for दीप्तैर्) $K_{1\ 3}$ D_4 नानारूपैर्वृतो दृप्तै(K_3 दुष्टै)र् (for ^{a}) D_5 दृप्तैस् (for दैत्यैस्) — (L 279) G_1 M_4 शैल- (for शूल-) — (L. 280) $\tilde{N}_1$ $G_{1\ 4}$ M_4 -वृन्दनीला, B_3 D_6 -भीमनादा, Bom Poona eds G(ed) -वृन्दतुल्या (for °नादा) $T_{1\ 2}$ $G_{3.\ 5}$ M_2 ततस्ततस्तोयदवृन्दनीलाः (T_1 °तुल्या., G_3 °शीला) —(L. 281) $T_{1.\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ आ- (for खं) K_3 खं तापयन्तस्तपनीयजिह्वा — (L 282) K_4 यथोदिताः, Bom Poona eds G(ed.) °न्नता (for °त्थिता) T_2 $G_{3\ 5}$ $M_{2\ 4}$ मेघसंघाः (for कालमेघाः) T_1 G_1 यथोन्नताः प्रावृषि मेघसंघा — (L. 283) $\tilde{N}_1$ बलो (for वृत्रो) — (L. 284) D_3 ताम्राक्षो (for °स्यो) K_4 Dn_1 $D_{1\ 4}$ निम्नितोदरः; Ds_1 निहतो°, Ds_2 निह्नुतो° (for निर्णतो°) — (L 285) $G_{1\ 4\ 5}$ $M_{2\ 4}$ दीर्घ- (for दीप्त-) Ds_2 महाश्मश्रुर् (for हरि°). $B_{1\ 3}$ D_5 D_6 महाबल, D_3 °नन (for °हनु) M_2 दीर्घरोमा महासुरः (for ^{b}) — (L 286) K_4 Dn $D_{1,\ 2}$ T_2 -मुख (for -ग्रीवः) $\tilde{N}_1$ $B_{1,\ 3}$ D_6 $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ लोहिताम्बरः (for °ङ्गदः) — K_4 $D_{1\ 2}$ om (hapl) line 288 — (L 288) $\tilde{N}_1$ $B_{1\ 3}$ Dn D_5 $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ महामायाधरो भीमो, $\tilde{N}_2$ $V_{1\ 3}$ B_2 D_5 D_{2-5} °मायामयो भीमो (for ^{a}) —(L. 290) T_1 हेममालाधरं रौद्रं (for ^{a}) K_2 Ds_1 $D_{2.\ 4}$ चित्रकेतुर्, V_1 चन्द्र° (for चक्र°). —(L. 291) K_2 V_3 D_4 संजुष्टं, $T_{1.\ 2}$ $G_{1\ 3-5}$ M_2 -निर्घोषं (for -संघुष्टं) $B_{1\ 3}$ D_6 T_2 $G_{1.\ 4}$ $M_{2\ 4}$ -परिष्कृतम् (for -विभूषि°) —(L 292) $\tilde{N}_1$ $D_{1\ 2}$ $T_{1.\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ -पताकिनम् (for °ना) —(L 293) B_3 स्थित (for ययौ) —(L 295) D_3 $G_{3\ 5}$ तपन-, T_1 कदन- (for तपित-) T_2 G_1 $M_{2\ 4}$ -चारु- (for -बिन्दु-). G_4 तपनकिरणचारुपिङ्गलाक्षो. —(L 296) $\tilde{N}_1$ V_1 B_3 D_6 -वृषभो (for -तनयो) $T_{1\ 2}$ $G_{1.\ 3-5}$ $M_{2\ 4}$ दितिवृषभो भुजगत्वगुग्रवासा. —(L 297) D_1 T_1 चारुचक्षुः (for °वक्त्र.) — (L 298) V_1 B D_6 $T_{1\ 2}$ $G_{1.\ 3-5}$ $M_{2.\ 4}$ तदा रथस्थः (for रथासनस्थ.). —(L 299) K_2 D_4 स्थित. सूर्य; D_4 सूर्यचन्द्र (for °चक्र). K_4 Dn D_5 [उ]द्यतः (for [उ]दित) $\tilde{N}_1$ सूर्यचन्द्र इवोद्यत (for ^{b}) —(L 300) $B_{1.\ 3}$ D_6 M_4 Cal ed -चक्रोपमो (for -चक्रसमो). $T_{1\ 2}$ $G_{1,\ 3-5}$ कालचक्रोपमौ दैत्यश् (for ^{a}) T_1 सदा युद्ध (for चक्रायुध) $\tilde{N}_1$ [उ]र्जितः (for [उ]द्यत.) $\tilde{N}_1$ चक्रायुधधरो मतः (for ^{b}) —(L 301) K $\tilde{N}_2$ $V_{1.\ 3}$ B Dn_2 D_3 $D_{1\ 3-6}$ सर्वायस- (for °युध-) $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ रौद्र (for दिव्यं). T_1 $G_{3\ 5}$ सत्वरम् (for भास्व°) —(L 302) T_1 G_3 M_2 चक्रायुध- (for कालायस-) K_3 -निभाननैः, Dn_2 -शिलायुधः; D_3 -वरायुधै (for -शिला°) T_2 $G_{1\ 4.\ 5}$ M_4 चक्रायस(G_5 °युध)शिलाधरै (for ^{b}) —(L 303) $\tilde{N}_1$ $B_{1\ 3}$ D_6 T_2 $G_{1\ 4}$ M_2 रथिनां (for रथानां) T_1 $G_{3\ 5}$ रथिनश्चित्रयोधिनः (for ^{b}) — B_1 D_6 M_2 om line 304. — (L 304) Dn_2 महाकाया (for रुधिराक्षा). —(L 305) $T_{1.\ 2}$ $G_{1\ 3-5}$ M_{2-4} चर्म वर्म(T_1 G_3 M_2 °र्मि)भि., Bom. Poona eds,

सर्वे कालान्तकप्रख्या वीराः समरदुर्जयाः ।
सागरोदरगम्भीरा नीलवक्त्रा दुरासदाः ।
रेजुर्यान्तोऽसुरवरा वेलातीता इवार्णवाः ॥
ते भीममायाः सुसमृद्धकायाः
किरीटिनः काञ्चनभूषिताङ्गाः ।
ययुस्तदा स्वायुधदीप्तहस्ता
नभः सपक्षा इव पर्वतेन्द्राः ॥
संदिष्टो बलिपुत्रेण वृत्रभ्राता महासुरः ।
वधाय सुरसैन्यस्य संनह्यस्वेति वीर्यवान् ॥
हेममाली महादंष्ट्रः स्रग्वी रुचिरकुण्डलः ।
रक्तमाल्याम्बरधरश्चण्डः समरदुर्जयः ॥
महाविवृत्तनयनः स किरीटी धनुर्धरः ।
प्रभिन्न इव मातङ्गः शार्दूलसमविक्रमः ॥
महातालनिभं चापं महारुचिरसायकम् ।
विस्फारयन्महावेगं वज्रनिष्पेषनिस्वनम् ।
रथेन खरयुक्तेन ध्वजेन भुजगेन च ।
शुशुभे स्यन्दनस्थः स संध्यागत इवांशुमान् ॥
रथैस्तु बहुसाहस्रैर्हेमपट्टविभूषितैः ।
शूलमुद्गरसंपूर्णैस्तोयपूर्णैरिवाम्बुदैः ।
स दैत्येन्द्रोऽभिचक्राम तस्मिन्युद्ध उपस्थिते ॥
पवनसमगतिर्विशालवक्षा
विकसितपङ्कजचारुगर्भगौरः ।
प्रवररथगतो ययौ स तूर्णं
त्रिदशगणैरभिलक्षितप्रभावः ॥

G(ed) वरवर्णिन॰ (for °वर्मिण) — (L 306) K_{3} पयोमुच (for °धरा) — After line 306, $\tilde{N}_{2}$ $V_{2\ 3}$ $B_{1\ 2}$ D_{3} ins

17** संदष्टौष्ठपुटा घोरा महाकाया महोदराः ।
वधाय सुरसैन्यस्य संनह्यन्त महाबलाः ॥

[(L 1) B_{1} Poona ed Cal ed महासुरा (for महोदरा) — (L 2) D_{s2} सनह्यत महाबल (for ^{b})]

— $T_{1\ 2}$ $G_{1\ 3-5}$ om line 337 — (L 307) D_{3} लोकान्तक- (for काला°). D_{5} सर्वे कालान्तसदृशा (for ^{a}) $B_{1,3}$ D_{6} $M_{2\ 4}$ रुधिराक्षा महाबला (for ^{b}) — (L 308) $G_{1\ 3\ 4}$ नीलवस्त्रा (for °वक्त्रा) T_{1} नीलवस्त्राकुला. सदा (for ^{b}) — D_{3} om line 309. — (L 309) $B_{1\ 3}$ Cal ed नेदुर्, T_{2} $G_{1\ 4}$ $M_{2\ 4}$ बभुर् (for रेजुर्) B_{1} D_{s1} वेलालोला (for °तीता). — (L 310) $\tilde{N}_{2}$ भीमवेगा ; D_{2} °काया , T_{2} $G_{1\ 4}$ M_{2} भूरिमाया (for भीम°) $K_{1\ 2}$ D_{4} सुविनद्ध-, K_{3} $\tilde{N}_{1}$ V_{3} B_{2} D_{s2} $D_{3\ 6}$ सु($\tilde{N}_{1}$ प्र)विवृद्ध- (for सुसमृद्ध-) V_{1} ते भीमकायाः सुविवृद्धकामाः, T_{1} $G_{3\ 5}$ ते भूरिमाया सुसमृद्धकोपा. — (L 311) V_{3} -चित्रिताङ्गा (for -भूषि°) — (L 312) B_{3} D_{s2} आयुध-, D_{2} T_{1} $G_{3\ 5}$ M_{2} सा° (for स्वा°) — (L 313) K_{3} अलून-, D_{1} तत स- (for नभ स-) — After line 313, $T_{1\ 2}$ $G_{1,3-5}$ M_{2} ins an additionl colophon [*Sub-parvan* T_{2} $G_{1\ 3}$ $M_{2\ 4}$ वामनप्रादुर्भावः — *Adhy name* G_{3} अनुह्रादविरोचनजम्भासिलोमवृत्रचक्रासुराणां मरणसंनाह. — *Adhy no* T_{1} 293, G_{1} 289; $G_{3\ 5}$ 295, G_{4} 279, $M_{2\ 4}$ 5]

— M_{4} om lines 314-315. Before line 314, $T_{1\ 3}$ $G_{1\ 3,5}$ M_{2} ins वैशंपायन॰ — (L 314) $T_{1,2}$ $G_{1,3-5}$ M_{2} संदिष्टो (T_{1} °दृष्ट्वा) बलिनेन्द्रेण (for ^{a}) $B_{1\ 3}$ D_{s2} $T_{1\ 2}$ $G_{1\ 3-5}$ M_{2} बलोऽसुर (for महासुरः) — (L 315) K_{3} संनद्धश्चाति-, D_{2} °ह्यास्तेति-, $T_{1,2}$ $G_{1,3-5}$ M_{2} समनह्यत (for संनह्यस्वेति) $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ मेघनादी (T_{2} G_{1} °दो), Bom. Poona eds G(ed) हेमताली (for °माली) — (L 317) D_{s2} -दुर्जरः (for -दुर्जयः) — (L. 318) $K_{1\ 4}$ D_{3} महावृत्त॰ सुनयन , K_{2} D_{4} स महावृत्तन°. $B_{1\ 3}$ D_{1} सुमहावृत्तन°, D_{6} महाविनस्तन°, T_{1} $G_{1\ 3-5}$ M_{2} महान्विवृत्तन° (for ^{a}) $K_{2\ 3}$ D_{4} किरीटी च; K_{4} $V_{1,3}$ B_{3} D_{n1} D_{s} D_{1} स($V_{1,3}$ सु)किरीटो, $\tilde{N}_{1}$ D_{n2} किरीटीव (for स किरीटी) D_{3} किरीटी धृतमुद्गर (for ^{b}) — (L. 319) K_{2} D_{2} प्रमत्त (for प्रभिन्न) — (L 320) D_{5} M_{4} तथा (for महा-) — (L 321) $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ स वेगेन (for महावेगं) K_{2} D_{4} चक्र- (for वज्र-). T_{1} $G_{3,5}$ -निर्घात ; T_{2} $G_{1,4}$ $M_{2\ 4}$ -निर्घोष- (for -निष्पेष-) — (L. 322) $M_{2\ 4}$ खड्ग- (for खर-) D_{6} (marg) खड्गेन (for ध्वजेन) — (L 323) $T_{1\ 2}$ $G_{1\ 3-5}$ M_{2} शुशुभे रथमध्यस्थ॰ (for ^{a}). — (L. 324) D_{4} T_{2} $G_{1\ 4}$ -वज्र- (for -पट्ट-) — (L 325) D_{3} हेम-; Bom Poona eds G(ed) कूट- (for शूल) T_{1} $G_{3\ 5}$ पट्टस- (for -मुद्गर-) $\tilde{N}_{1}$ D_{6} -संकीर्णैर् ; B_{3} -संकाशैस् (for -संपूर्णैस्) K_{3} M_{3} जलपूर्णैर्, K_{4} तोयवर्णैर् ; $\tilde{N}_{1}$ $T_{1,2}$ $G_{1\ 3-5}$ M_{2} अम्बुपू°, D_{s} तोयहस्तैर् (for °पूर्णैर्). D_{3} [अ]म्बुद. (for °दै) — After line 325, $T_{1\ 2}$ $G_{1\ 3,5}$ $M_{2\ 4}$ ins. :

18** संदष्टौष्ठपुटः क्रुद्धो गर्जमानोऽतिभैरवम् ॥
[$G_{3\ 5}$ -भैरव (for °वम्).]

— (L. 326) K_{4} एवंभूत॰ स दैत्येन्द्रस् (for ^{a}) $B_{1,3}$ D_{6} Cal ed युद्धकाल , D_{s1} D_{2} तस्मिन्युद्धम् (for °द्ध) — (L 327) K_{2} D_{5} -वक्त्रो (for -वक्षा). — (L. 328) B_{3} -चारुगर्भ-;

सिंहिकातनयश्चैव राहुर्नाम महासुरः ।
विकटः पर्वताकारः शतशीर्षः शतोदरः ॥
पीतमाल्याम्बरधरो जाम्बूनदविभूषितः ।
स्निग्धवैदूर्यसंकाशः पद्मपत्रनिभेक्षणः ॥
सर्वकाञ्चनसंयुक्तं मणिजालपरिष्कृतम् ।
पताकाशतसंकीर्णं युक्तं परमवाजिभिः ॥
आरुरोह रथं दिव्यं दैत्यः परमवीर्यवान् ।
ननाद च महानादं कम्पयन्वसुधातलम् ॥
मयेन विहितो दिव्यस्तस्य केतुर्हिरण्मयः ।
मयूरं सूर्यसंकाशं कवचं चायसप्रभम् ॥
भीमवेगरवैश्चान्यै रथैर्दिव्यैः सुभासुरैः ।
नानाप्रहरणाकीर्णैः सेव्यमानो महाबलः ॥
अतुरगणपतिर्गजेन्द्रगामी
गतिरभवत्सुगतिर्महासुराणाम् ।
अरिगणमभितो विभुः प्रयातो
गिरिवरमस्तमिवांशुमान्प्रयातः ॥
विप्रचित्तिस्तु तत्रैव दनोर्वंशविवर्धनः ।
कश्यपस्यात्मजः श्रीमान्ब्रह्मणस्तेजसा समः ॥
यष्टा क्रतुसहस्राणां वेदवित्तपसान्वितः ।
स्वयंभुवा दत्तवरो वरदश्च स्वयंप्रभुः ।
ईशित्वं च वशित्वं च महत्त्वं च महाद्युतेः ॥
ऐश्वर्यगुणसंपन्नो ब्रह्मेव स्वयमूर्जितः ।
सार्धं पुत्रैश्च पौत्रैश्च संनह्यत महाबलः ॥
सर्वे मायाधराः शूराः कृतास्त्रा रणदुर्जयाः ।
सर्वे कमलवर्णाभा हेमकूटोच्छ्रयोच्छ्रिताः ॥
सर्वे रजतसंकाशाः कैलासशिखरोपमाः ।
मयेन निर्मितास्तेषां सर्वे मायामया रथाः ॥
विचरन्तो व्यराजन्त शारदा इव तोयदाः ।
सर्वे हंसध्वजाः श्वेताः श्वेतदण्डसमुच्छ्रयाः ॥
श्वेताम्बरधरा दैत्याः श्वेतमाल्यविभूषिताः ।

T1 चारुगर्भसारः (for °गौर) — (L 330) K3 -संस्तुत-, D2 -भूषित- (for -लक्षित-) M2 -प्रताप (for -प्रभावः). — (L 332) K1 D2 4 T2 G1 4 M4 शतशीर्षा (for °शीर्ष॰). — (L 333) K2 D4 -विभूषण॰ (for °षित॰). — (L. 335) T2 G1, 3, 4 M2 4 -निर्युक्तं (for -संयुक्तं). G6 तप्तकाञ्चननिर्मुक्तं (for ᵃ) T1, 2 G1, 3–5 M2, 4 -पुरस्कृतम् (for -परिष्कृ°) — (L. 336) B1 3 D3 6 -संबाधं (for -संकीर्णं). T1 2 G1 3 5 M2, 4 पताकाध्वजसपूर्णं (for ᵃ) — (L. 337) Ñ1 B1, 3 Cal ed तूर्णं (for दिव्यं). D3 -कोपन (for -वीर्यवान्) T1 2 G1 3–5 M2 4 दैत्यः परपुरंजय. (for ᵇ) — (L 338) Cal ed. महाघोर (for °नादं) — (L 339) D5 कल्पितो (for विहितो) — (L 340) Ñ1, 2 Dn Ds2 M2 मयूर- ; V1 मायूरं (for म°) B D6 मयूरपक्षसंकाशं ; D3 T2 G1, 5 मयूरः सू(D3 °रसू)र्यसंकाशः (for ᵃ) K2 Dn2 D4 वायस- (for चा°) B Ds D6 T1 2 G1 3–5 M2 4 कवचं चायसं महत् (for ᵇ) — (L 341) B1 D6 प्रभास्वरै॰ (D6 °नैः), B3 सुभासुर॰, D3 प्रभासुरैः (for सुभा°). — (L 342) D3 नानाप्रहरणै पूर्णैं , T2 G4 °रणैश्चान्यै (for ᵃ) D3 महासुर॰, T1 G3 °रथ॰ (for °बल॰) — (L. 343) M2 -कल्पो (for -गामी). — (L 344) Ñ1 T1 अतिरभसगतिर् ; D3 गतिरभवत्सगतिर्, T2 G1 3, 4 M2 4 °द्युतिमान् (for °त्सुगतिर्) — (L 345) G1 अभिभूर् (for अभितो) Ds1 (marg. as above) गुरुः ; T2 G4 M2 4 ऽभिभूः (for विभु.). D6 प्रयाति (for °तो). — (L 346) K1 2 4 Ñ1 2 V1 B Dn D1 2 4 6 सुदीप्त ; K3 V3 D3 T2 G1, 4 M2 4 प्रदीप्तः (for प्रयातः) — (L. 347) G3 5 -समुद्भवः (for -विवर्धन) — (L 348) T1 2 G1, 3–5 M2, 4 -सहस्रस्य (for °स्राणां°) D5 युतः (for [अ]न्वितः) — (L, 350) G3 वरमत्तः (for °दश्च) K4 Ñ1 B2 Dn D1, 2, 5 स्वयंभुवः (for °प्रभुः) G5 वरमत्त॰ स्वयंभुव (for ᵇ). — K4 Dn1 D1 2 om line 351 — (L 351) K2 Ds1 D3–5 ईशत्वं (for ईशित्वं) G4 Bom Poona eds महत्त्वं (for वशित्वं) B2 वशित्वं (for महत्त्वं). B3 Ds महाद्युति , T1 G3, 5 गतिः स्वयम् (for महाद्युते) K1, 2 D4 प्राकाम्यं च महाद्युतिः ; G4 माहात्म्यं च गतः स्वयम् (for ᵇ) — (L 352) T1, 2 G1, 3–5 M2 4 ब्रह्मे(G5 °ह्मै)व हि सनातनः (for ᵇ). — Ñ2 om, lines 353ᵃ–357ᵃ. — (L. 353) B3 D6 Cal ed समनह्यन् (for सनह्यत) T1 2 G1 3–5 M2 4 समनह्यत दुर्जयः (for ᵇ). — (L 354) D3 क्रूराः (for शूरा) Dn कृतार्था (for °स्त्रा) T1, 2 G1 3–5 M2 4 कृतास्त्रा युद्धदुर्मदा (for ᵇ). — (L. 355) B3 T2 G1 3–5 M2 4 -गर्भाभा (for वर्णाभा). T1 सर्वे शुभाङ्गगर्भाभा (for ᵃ) K1–3 Ñ1 B2 Dn D1 2 4 5 हेमकूटोच्छ्रयोच्छ्रयाः (Dn °पमा॰), K4 °च्छ्रितोच्छ्रिता॰, V1 3 B1 3 Ds2 D6 हेम॰ (B3 D6 मेरु)शृङ्गोच्छयोच्छ्रिता , T1 मेरुशृङ्ग इवो°, T2 G1, 3–5 M2 4 मेरुशृङ्गमिवो° (for ᵇ) — (L 357) K1 2 D4 सर्वे मायामहारथाः ; B1 3 D6 T2 G1, 3–5 M2 4 रथाः पररथारुजः ; T1 रथाः परमदारुणा॰ (for ᵇ) — (L 358) V3 विचरन्ते ; Dn2 विरोचन्तो (for विचरन्तो). K4 G5 विराजन्ते, Ñ1

श्वेतातपत्राः सर्वे ते श्वेतकुण्डलमण्डिताः ॥
मुक्ताहारवृतोरस्का भान्ति नागेश्वरा इव ।
महाग्रहनिभाकाराः शत्रूणां लोमहर्षणाः ।
रक्तचित्राम्बरधराश्चित्राभरणभूषिताः ॥
त्रैलोक्यविजयं नाम रथमास्थाय वीर्यवान् ।
कैलासशिखराकारमष्टनल्वायतान्तरम् ॥
युक्तं वाजिसहस्रेण सितेन शशिवर्चसा ।
पताकाशतसंछन्नं नानायुधविकल्पितम् ॥
हंसांशुकुन्दप्रतिमं विशालं
सितातपत्रं दनुजेश्वरस्य ।
विभाति तस्योपरि धार्यमाणं
श्वेताद्रिमूर्धविगतः शशाङ्कः ॥
केशी दानवमुख्यस्तु जिह्मस्ताम्राक्षदर्शनः ।
नीलमेघचयप्रख्यः कालः पुरुषविग्रहः ॥
महाग्रहनिभाकारः शत्रूणां लोमहर्षणः ।
चित्रमाल्याम्बरधरो रक्ताभरणभूषितः ॥
शताक्षः शतबाहुश्च हरिश्मश्रुर्महाबलः ।
शङ्कुकर्णो महानादो वपुषा रौद्रदर्शनः ॥
युक्तं महिषकैर्दिव्यैर्घण्टाकोटिकृतस्वनम् ।
महावारिधराकारमास्थाय रथमुत्तमम् ॥
ध्वजेनोष्ट्रेण महता नीलकेसरवर्चसा ।
नानारागविचित्राभिः पताकाभिर्विभूषितम् ॥
द्विपञ्चाशत्सहस्राणि रथानामुग्रतेजसाम् ।
ययुस्तस्यासुरेन्द्रस्य प्रयातस्य सुरान्प्रति ॥
भान्ति भिन्नाञ्जननिभाः प्रयातस्य महात्मनः ।
दंष्ट्रार्धचन्द्रवदनाः सबलाका इवाम्बुदाः ॥
तत्तस्य वैदूर्यसुवर्णचित्रं
विद्युत्प्रभं भास्कररश्मितुल्यम् ।
किरीटमाभात्यसुरोत्तमस्य
दावाग्निदीप्तं शिखरं यथाद्रेः ॥

विभान्तीव (for व्यराजन्त) — (L 359) D_5 शुभ्रा., $T_{1\,2}$ $G_{1.\,3-5}$ $M_{2\,4}$ शूरा (for श्वेताः) — (L 360) $\tilde{N}_2$ om (hapl) lines 360^b–361^a $T_{1\,2}$ $G_{1\,3-5}$ $M_{2\,4}$ श्वेतमाल्यानुलेपना (for ^{b}) — (L 361) T_2 $G_{1\,4}$ M_2 हेम- (for श्वेत-). K_4 D_3 T_1 -भूषिताः (for -मण्डिताः) G_{3-5} M_4 हेमकुण्डलभूषिता (for ^{b}). — (L 362) $\tilde{N}_1$ B Dn Ds D_{4-6} नाकेश्वरा (for नागे°) — (L 363) D_2 महागज-, D_6 °ग्राह- (for °ग्रह-) G_1 -निभा शूरा (for -निभाकाराः) Dn_2 शूराणां (for शत्रूणां). — (L 364) $T_{1\,2}$ G_{3-5} M_2 -चित्राङ्गद- (for °म्बर-) $\tilde{N}_2$ रक्ताम्बरधराश्चित्राश्, M_4 रत्नचित्राङ्गदधराश् (for ^{a}) T_2 चित्राम्बरविभूषिता (for ^{b}) — $T_{1.2}$ $G_{1\,3-5}$ $M_{2.4}$ om (hapl) lines 365–376 — (L 366) D_5 अष्टनल्वायुतं बलम् (for ^{b}) — (L 367) $K_{1\,4}$ B_2 D_2 शिव-, $\tilde{N}_1$ D_3 सित-, (for शशि-) — (L 368) D_8 -संक्षुण्णं (for -संछन्नं). — (L. 369) K_3 Dn_2 D_{2-5} हंसेन्दु-; B_2 D_6 हिमांशु-, Dn_1 हेमेन्दु- (for हंसांशु-). K_2 सहस्रांशुकुन्दप्रतिभं विशाल, D_3 हंसांशुशुक्लप्रतिमं वि° — (L 370) $\tilde{N}_1$ $B_{1\,3}$ D_6 श्वेतातपत्रं (for सिता°). — (L 372) K_1 $\tilde{N}_1$ $V_{1\,3}$ D_4 -मूर्ध्नीव गतः, K_2 -मूर्ध्नि च गत, K_4 D_6 -मूर्ध्नो वितत, $\tilde{N}_2$ $B_{1\,2}$ Ds_2 -मूर्धोपगत, D_1 -मूर्धाप° (for -मूर्धव°) — (L 373) $B_{1\,3}$ D_6 दीप्तताम्रविलोचन (for ^{b}) — (L 375) D_3 सुराणां (for शत्रूणां). K_3 D_5 शत्रूणां चोग्र(D_5 मेघ)दर्शन. (for ^{b}) — (L 376) K_4 रक्त- (for चित्र-) — (L. 377) T_2 G_1 शतात्मा (for °क्षः). — (L 378) G_5 विकृतास्यो (for शङ्कुकर्णो) $\tilde{N}_1$ महापादो; T_1 $G_{3\,5}$ °पार्श्वो, T_2 $G_{1\,4}$ $M_{2\,4}$ °बाहुर् (for °नादो). T_1 G_3 (both marg) विकृतास्यो महानासो (for ^{a}) B वपुष्मान्, T_2 G_1 $M_{2\,4}$ चतुष्पाद् (for वपुषा) Bom. Poona eds G(ed) घोर- (for रौद्र-) T_1 G_{3-5} चतुष्पात्क्रूरदर्शन (for ^{b}) — (L 379) V_3 युक्तैर् (for युक्त) $\tilde{N}_1$ युक्तं दिव्यमहिषकैर्, $B_{1\,3}$ D_6 संयुक्तैर्दिव्यमहिषैर्, $T_{1.2}$ $G_{1\,3-5}$ M_{2-4} सयुक्तं महिषैर्दिव्यैर् (for ^{a}) D_3 -समस्वरम् (for -कृतस्वनम्) — (L 380) T_2 $G_{1\,4}$ घोरं वारि-, $G_{3\,5}$ $M_{2\,4}$ रथ वारि- (for महावारि-) T_1 आस्थितो (for आस्थाय). K_{1-3} $D_{4\,5}$ रथमास्थाय चोत्तमम्, $\tilde{N}_2$ आस्थाय नरसत्तम., T_2 $G_{1\,3-5}$ $M_{2\,4}$ आस्थितो रथसत्तम (T_2 G_4 °मम्) — (L. 381) $K_{1\,3}$ $D_{1\,5}$ G_1 सिंह- (for नील-). — (L. 382) D_3 अलंकृतम् (for विभूषि°) — (L. 383) T_1 $G_{1\,4}$ -वर्चसाम् (for तेज°) T_2 $G_{3\,5}$ $M_{2\,4}$ रथिनामुग्रवर्चसाम् (for ^{b}) — T_1 om. lines 385–386 — (L 386) D_6 G_3 -नयना (for वदना). $\tilde{N}_1$ दंष्ट्राग्रमुग्रनयनाः (for ^{a}) — (L 388) $B_{1\,3}$ D_5 T_2 $G_{1.\,3-5}$ $M_{2\,4}$ -संनिकाशम् (for -रश्मितुल्यम्) T_1 विद्युत्प्रभं चाशनिसंनिकाशम् — (L 389) $B_{1\,3}$ D_6 $T_{1\,2}$ $G_{1.\,3-5}$ $M_{2.\,4}$ [अ]सुरेश्वरस्य (for °रोत्तमस्य) — (L. 390) $K_{1.\,2}$ D_4 -दग्धं (for -दीप्तं) — After line 390, $T_{1.\,2}$ $G_{1.\,3-5}$ $M_{2\,4}$ ins an addl colophon [*Sub-parvan* $T_{1.\,2}$ $G_{1\,3-5}$ $M_{2\,4}$ वामनप्रादुर्भाव — *Adhy. name* $G_{4.\,5}$ बलासुरराहुविप्रचित्तीनां युद्धसंनाह — *Adhy. no* T_1 294, G_1

वृषपर्वासुरश्चैव श्रीमान्सुरनिषूदनः ।
आरुरोह रथं दिव्यं मेरुशृङ्गमिवांशुमान् ॥
प्रवालजाम्बूनदचित्रकूबरं
महारथं भारसहं महार्हम् ।
स्वलंकृतं राजतहेममण्डलं
गभस्तिनक्षत्रतडिन्निकाशम् ॥
केयूरयुक्ताङ्गदनद्धबाहुः
सहस्रतारेण च चर्मणा सः ।
सांग्रामिकैराभरणैश्च चित्रै-
र्मध्याह्नसूर्यप्रतिमो बभूव ॥
महाबलो बद्धतलाङ्गुलित्रो
बलोत्कटः किंशुकलोहिताक्षः ।
प्रगृह्य चामीकरचारुचित्रं
चापं स्थितो वृत्तविशालनेत्रः ॥

महासुरेन्द्रश्च महासुरैर्वृतो
बलिस्तदा स्यन्दनमारुरोह ।
वैदूर्यहेमोपचितं विशालं
विद्युत्प्रभं षोडशनल्वमात्रम् ॥
युक्तं सहस्रेण दितेः सुतानां
गजाननानां विकृताननानाम् ।
चामीकरोरःस्थलभूषितानां
प्रनर्दतां प्रावृषि चाम्बुदानाम् ॥
महारथं देवरथप्रकाशं
सहस्रमायेन मयेन सृष्टम् ।
ईहामृगाक्रीडितभक्तिचित्रं
दिव्यं रथं वीररथानुयातम् ॥
साकिंकिणीकं विमलं सुविस्तृतं
हिरण्मयैः पद्मशतैरलंकृतम् ।

290, $G_{2\,5}$ 296, G_{4} 284, $M_{2\,4}$ 6] — Before line 391, $T_{1\,2}$ $G_{1\,3-5}$ $M_{2\,4}$ ins वैशपायन· — (L 391) $D_{1\,4}$ असुरसूदन, Bom Poona eds G(ed) च सूरसू° (for सुरानिषू°) — (L 392) K_{1-3} $\tilde{N}_{1}$ $V_{1\,2}$ B D_{S} D_{3-6} दीप्तं (for दिव्य) — (L. 393) K_{1} $B_{1\,3}$ $D_{5\,6}$ प्रतप्त- (for प्रवाल-). D_{S2} -चित्रकूटं, T_{1} -जालकुञ्जरं, T_{2} $G_{1\,3\,5}$ $M_{2\,4}$ -जालकूबरं (for -चित्र°) — (L 394) K_{1} (marg) रथोत्तमम् (for महार्हम्) — (L 395) Bom Poona eds G(ed) -कुण्डलं (for -म°) $\tilde{N}_{2}$ $V_{1\,3}$ B D_{S} D_{6} $T_{1\,2}$ $G_{1.3-5}$ $M_{2\,4}$ अलंकृतं राजतनेमिमण्डलं — (L 396) K_{1} $\tilde{N}_{2}$ $B_{1\,3}$ $D_{3.6}$ $T_{1.2}$ $G_{1\,3-5}$ $M_{2\,4}$ -तडित्प्रकाशम् (for -तडिन्नि°) — (L 397) $K_{1.2}$ V_{3} $B_{1\,3}$ Dn D_{S} $D_{1\,4\,6}$ -मुक्ताङ्गद-, $\tilde{N}_{2}$ -चित्रा°, D_{2} -शुक्ला°, T_{2} $G_{1\,4.5}$ नद्धा° (for -युक्ता°) D_{1} नद्धबाहुं; D_{3} °गात्रो (for °बाहुः) T_{1} G_{3} M_{4} केयूरनद्धा(G_{3} °चित्रा)ङ्गदचित्रबाहुः, M_{2} °रनद्धाङ्गविचित्रबाहु — D_{3} om. lines 398–404 — (L 398) $K_{2\,4}$ $B_{2\,3}$ D_{S} $D_{1.4\,5}$ वर्मणा सः, $\tilde{N}_{2}$ V_{3} चर्मणा य, V_{1} वर्मणा य·, T_{1} G_{3} चर्मणा सह (for °णा यः) — (L 401) K_{3} महारवो, $T_{1\,2}$ $G_{1\,3\,5}$ $M_{2\,4}$ दैत्याधिपो (for महाबलो) G_{4} दैत्याधिपो विद्धतलाङ्गुलित्रो — (L. 402) V_{1} B_{3} रणोत्कट., V_{3} बलोत्कटै, $T_{1\,2}$ $G_{1.3\,4}$ M_{2} मदोत्कटः (for बलो°) — (L 403) $B_{1\,3}$ D_{6} विकृष्य (for प्रगृह्य) $T_{1\,2}$ $G_{1\,3-5}$ $M_{2\,4}$ विकृष्य चा(M_{2} विचित्रचा)मीकरचारुनद्धं — (L, 404) D_{5} स्थितो महावृत्तविलासनेत्रः. — After line 404, $T_{1.2}$ $G_{1\,3-5}$ $M_{2\,4}$ ins

19** सैन्येषु संनाहविधानस्सु
भटेषु योग्येषु रणाय भूपते ।
रथेषु चित्रीकृतकूबरेषु
नागेषु यत्तेषु रणाय पत्तिभिः ॥

[(L. 1) T_{1} G_{3} सैन्येन (for °षु) — (L 2) $G_{1\,3}$ भद्रेषु युग्येषु रणाय भूते — (L. 4) G_{4} यातेषु, M_{2} युक्तेषु (for यत्तेषु)]

— (L 405) K_{4} $T_{1\,2}$ $G_{1\,3-5}$ $M_{2.4}$ महासुरेन्द्रोऽपि (K_{4} °न्द्रश्च) महासुरेन्द्रैर् — (L. 406) K_{4} $T_{1.2}$ $G_{1\,3-5}$ $M_{2.4}$ वृतो बलि (for बलिस्तदा). — (L 407) $\tilde{N}_{2}$ V_{3} G_{3} -वज्रोपचित (for -हेमो°) — (L 409) $K_{1\,2}$ $D_{4\,5}$ युक्तं सहस्रैर्दितिनन्दनानां — (L 410) G_{3} महागजानां (for गजाननाना) $K_{1\,2}$ B Dn $D_{4\,6}$ विकृताकृती(K_{2} °ता)नाम् (for °ताननानाम्. — (L 411) V_{1} B D_{S} T_{1} G_{3} चामीकरोरश्छदभूषितानां; T_{2} $G_{1\,4}$ $M_{2\,4}$ चामीकराच्छादनभू° — (L 412) T_{1} विनर्दतां चैव तु तोयदानाम्, T_{2} $G_{1\,3-5}$ $M_{2.4}$ विनर्दतां प्रावृषि तोय° — (L 413) T_{2} $G_{1\,4}$ तं समरे (for देवरथ-). — (L 414) $\tilde{N}_{1}$ निर्मितम् (for सृष्टम्). — (L 415) $T_{1.2}$ $G_{1\,4\,5}$ $M_{2\,4}$ ईहामृगाक्रीडन- (for °डित-) — (L 416) G_{5} $M_{2\,4}$ भीम-, Bom Poona eds G(ed) दिव्य- (for वीर-). T_{2} $G_{1\,4}$ दिव्यं रथं भीमरथं सुवेगम् — After line 416, D_{3} ins

20** सर्वास्त्रपूर्णं च समीरवेगम् ।

— (L 417) K_{3} D_{6} सुचित्र (for सुविस्तृतं) $K_{1.2}$ B $D_{4.6}$ $T_{1.2}$ $G_{1.3-5}$ $M_{2.4}$ साकिंकिणीकां विमलां सुविस्तृतां (B D_{6}

अभ्याददे वैजयन्तीं जयाय
स्रजं बलिर्हेमविचित्रपुष्पाम् ॥
आबध्य मालां प्रबभौ विचित्रां
बलिस्तदा भाति भुजैर्विशालैः ।
रराज तैः सर्वसमृद्धियुक्तै-
र्महार्चिषा सूर्य इवाम्बरस्थः ॥
स्रजं तदा बध्यति चास्य दुर्गां
सर्वासुराणामिव हारभूताम् ।
वैरोचनिः सर्वश्रियाभिजुष्टो
विभ्राजतेऽसौ शरदीव चन्द्रः ॥
मेरोस्तटैः काञ्चनरागरक्तै-
रादित्यसंसक्तमिवाभ्रनीलम् ।
प्रासाश्च पाशाश्च हिरण्यनद्धा-
श्चर्माणि खड्गाश्च परश्वधाश्च ॥
धनूंषि वज्रायुधसप्रभाणि
दिव्या गदा वज्रमुखाश्च शक्तयः ।
दिव्याश्च खड्गा विशिखाश्च दीप्ता
नाराचपूर्णा विविधाश्च तूणाः ।
धृता रथे दैत्यवृषस्य तस्य
चकाशिरे प्रज्वलिता यथोल्काः ॥
तं चामरापीडधराः सुदंष्ट्राः
सुवर्णमुक्तामणिहेमचित्राः ।
वीजन्ति वालव्यजनैर्विनीताः
स्वलंकृताः स्यन्दनवेदिकास्थाः ॥
अयःशिरा अश्वशिरा दुरापः
शिबिर्मतङ्गो विकटः शताक्षः ।
अजो निकुम्भः कुपथश्च दानवो
ररक्षुरेते दश दानवाधिपम् ॥

M2 सुचित्रां) — (L. 418) K1 2 B1 3 D4 6 T1 2 G1. 3–5 M2. 4 अलंकृताम् (for °लम्) — (L 419) K1 2 Ñ2 V1 3 B Da Ds D1 4–6 T1 M2 वैजयिकी , K3 4 G5 °यकीं (for °यन्तीं) D3 अभ्याददे वैजयिकं जयार्थं — (L 421) Ds आमुच्य (for आबध्य). K1 2 तां च (for मालां) K3 प्रययौ , B2 D1. 5 प्रभया , T1 2 G1 3–5 M2 विबभौ (for प्र°) Ñ2 B1 आबध्यमानां प्रबभौ (B1 °भया) विचित्रां , B3 आमुच्यमानां प्रभया वि° , D6 आमुच्य मालां प्रभया वि° — (L. 422) K1 4 दीर्घ- , T1 G5 [अ]तीव (for भाति) Ñ1 काषायवासोऽतिभुजैर्विशालै — Ñ1 T2 G1 4 M2. 4 om lines 423–428 — (L 423) T1 G3 5 एष (for सर्व-) — (L. 425) K4 B3 Ds D1 G4 चास्य दुर्गां , V1. 3 भास्वदग्रां , Dn चारुभुग्रां (for चास्य दुर्गां) D3 स्रज तदाबध्य सुचारुरूपां , T1 G3–5 स्रजं तदा बध्यतु पद्म(T1 रत्न)-चित्रां . — (L 426) K4 D1 3 भारभूताम् , Ñ2 V1. 3 हारभूषाम् , T1 G3. 5 सारभूताम् (for हार°) — (L 427) B3 सूर्य- (for सर्व-) T1 G3 5 -समृद्धि- (for -श्रियाभि-) — (L 428) G3. 5 चन्द्रमाः (for चन्द्र·) — (L 429) K Ñ1. 2 V3 D1 2 4 5 मेरोस्तटैर्वा ज्वलनप्रकाशैर् ; V1 °टैर्वाप्यनलप्रकाशैर् , D3 °टैर्ज्वालिनिकप्रकाशैर् , T1. 2 G1 3–5 M2 4 मेरोस्तटे पावकरागमु(T1 G3 5 °र)क्तैर् — (L. 430) K4 D1 3 -संयुक्तम् (for -संस°) K1–3 Ñ2 V1 B Dn Ds D4–6 -जालम् (for नीलम्) T1 2 G1 3–5 M2 4 आदित्यसंश्लिष्टमिवाभ्रजालम् — (L 431) K3 गदाश्च प्रासाश्च (for प्रासाश्च पाशाश्च) K2. 4 V1. 3 B2 Dn D1 2 -बद्धाश् (for -नद्धाश्). — (L 432) T1 2 G1 3–5 M2 4 शूलानि (for खड्गाश्च) — (L. 433) B1 3 D6 T1 2 G1 3 M4 चेन्द्रायुध- ; M2 सेन्द्रा° (for वज्रा°) — (L 434) T2 G4 शक्ती (for शक्त्य·) D6 दिव्यायुधा वज्रमुखाश्च शक्त्य . — V1 om lines 435–436 — (L 435) B1 3 D6 शूला (for खड्गा) D3 [अ]ग्निशिखाव- ; T1 G3 5 विविधाश्च (for विशिखाश्च) K4 राजन् (for दीप्ता) — (L 437) D4 5 वृ(D5 धृ)ता रथैर् (for धृता रथे) T2 G1 3–5 M2 4 -वरस्य (for -वृषस्य) T1 धृते रथे दैत्यवरस्य तस्य — (L 438) K4 V1 3 प्रकाशिरे (for च°). — (L 439) Dn2 G1 ते (for त) K2 D4 सुरेन्द्रा· (for सुदंष्ट्रा.) — (L. 440) K4 सुवर्णचित्रा मणिहेमभूषा· , D3 मुक्तामणिश्रीयुतहेमचित्रा — (L 442) Dn2 D2 T1 महासुरा (for स्वलंकृता) K4 Dn1 D1 महासुराः स्यन्दनवेदिकस्था — (L 443) K2 3 D1 3 अजाशिरा (for अय शिरा). B1 3 D6 T1 G5 वाजिशिरा , D5 गोश्व° , G3 वज्र° (for अश्व°). Ñ1 [अ]सुराधिप , G(ed) दुरालपः (for दुरापः) K4 अजाशिरा दुराप· खराननः , D2 4 अजाशिरा अश्वशिरा दुरापा — (L. 444) K4 V1 3 B Ds2 D1–4 6 विकच , Bom Poona eds. G(ed) विशिरा· (for विकट·) K3 D5 शिबिर्मतङ्गो विकचः सिताक्ष. , T2 G1 3–5 M2 4 शिबी (G3 शङ्खी , G4 M2 शिखी) मतङ्गो विकच. शताक्षः — (L 445) Ñ1 2 V1 Dn D1 T1 अयो , B1. 3 Ds D6 जयो (for अजो) K4 D1 2 क्रथश् ; D3 करुषश् , T1 G3 M2 क्रथनश् (for कुपथश्) — (L 446) K2–4 D1 2 M2 ररक्षिरे ते (for °क्षुरेते) T1 2 G1 3–5 M4 ररक्षिरे ते दश दानवेश्वरा. (T1 M4 °रम्). — (L. 447) Ñ1. 2 B1

पुरःसराश्चैव सहस्रशोऽसुराः
पदातयो दानवराजरक्षिणः ।
शतघ्निचक्राशनिशक्तिपाणयः
प्रजग्मुरग्रेऽनिलतुल्यवेगिनः ॥
घण्टासुशब्दास्तपनीयनद्धा
आडम्बरा झर्झरडिण्डिमाश्च ।
महारवा दुन्दुभयश्च नेदू
रथप्रयाणे दितिजेश्वरस्य ॥
तस्योच्छ्रितः काञ्चनवेदिकाढ्यो
हिरण्मयो दिव्यमहापताकः ।
महाध्वजो वै तपनीयनद्धो
रराज वीरस्य यथा विवस्वान् ॥
समुच्छ्रितं काञ्चनमातपत्रं
स्रक्काञ्चनी वक्षसि चास्य भाति ।
समन्ततश्चैनमुपाचरन्ति
दैत्यर्षयः प्राञ्जलयो यजन्ति ॥

पुरोहिताः शत्रुवधे समाहिता-
स्तथैव चान्ये श्रुतशीलवृद्धाः ।
जपैश्च मन्त्रैश्च तथौषधीभि-
र्महात्मनः स्वस्त्ययनं प्रचक्रुः ॥
स तत्र वस्त्राणि शुभाश्च गावः
फलानि पुष्पाणि तथैव निष्कान् ।
बलिर्द्विजेभ्यो ब्राह्मणेभ्यः प्रयच्छ-
न्विराजतेऽतीव यथा धनेशः ॥
सहस्रसूर्यो बहुकिंकिणीकः
परार्ध्यजाम्बूनदहेमचित्रः ।
सहस्रचन्द्रायुततारकश्च
रथो बलेरग्निरिवावभाति ॥
तमास्थितो दानवसंगृहीतं
महाबलः कार्मुकधृक्सबाणः ।
उद्वर्तयिष्यंस्त्रिदशेन्द्रसेना-
मतीव रौद्रं स बिभर्ति रूपम् ॥

D_n D_3 T_2 $G_{1\,5}$ पुरश्चराश् (for पुरःस°) — K_4 om lines 448–449 — (L 448) D_2 -रागिण (for -रक्षिण) — B_3 om lines 449–454 — (L 449) K_2 D_4 शक्राशनि- (for चक्रा°) T_2 G_3 $M_{3\,4}$ -वज्र- (for -शक्ति-). — (L 450) Cal ed मंजग्मुर् (for प्र°) V_3 B_1 एतेऽनिल- , D_3 अर्कानिल- , T_2 $G_{1\,3-5}$ अग्नेऽशनि- , M_2 अन्येऽनिल- (for अग्रेऽनिल-) $\tilde{N}_1$ -विक्रमा (for -वेगिनः) — (L 451) K_3 -सुदीप्तास् , $\tilde{N}_1$ सशब्दास् , V_3 सुतप्तास् , D_6 $T_{1\,2}$ $G_{1\,3-5}$ M_2 -सशङ्खास् (for -सुशब्दास्) K_4 D_n D_s $D_{1\,2\,5}$ -बद्धा (for -नद्धा) B_1 M_4 घण्टा सशङ्खास्तपनीयबद्धा ; D_3 घण्टावनद्धास्तपनीयबद्धा — K_3 om (hapl) lines 452–457 — (L 452) T_1 कालाम्बरा ; T_2 $G_{1\,3-5}$ $M_{2\,4}$ साड° (for आड°) K_4 भूरि च , $\tilde{N}_1$ D_s M_2 झर्झरि- ; B_2 D_3 डुर्डुर्- , D_{n1} संसर- , D_1 M_4 गर्गर- , D_7 कर्कर- (for झर्झर-) T_2 $G_{1\,4}$ -डिम्बराश् (for -डिण्डिमाश्) — (L 453) $T_{1,2}$ $G_{1\,3-5}$ $M_{3,4}$ सगोमुखा दुन्दुभयश्च भेर्यो — (L 454) D_6 Cal ed प्रयाणकाले ; $T_{1\,2}$ $G_{1\,3-5}$ $M_{2\,4}$ गर्जन्ति याने (for रथप्रयाणे). — (L 455) K_1 $\tilde{N}_{1\,2}$ D_n D_{s1} तस्योत्थितः ; D_2 तथोच्छ्रित- (for तस्यो°) V_3 T_1 $G_{3\,5}$ तस्यो(V_3 °थो)च्छ्रितः काञ्चनवेदिकस्थो. — (L 457) K_4 $\tilde{N}_2$ V_3 D_n D_1 -बद्धो (for -नद्धो) — (L 459) D_4 समुद्धृतं (for °च्छ्रितं) — (L. 460) $D_{1,2}$ तत्काञ्चनं , T_1 स्रक्काञ्चनं (for °नी). — (L 461) $K_{1\,4}$ D_n $D_{1\,2}$ [अ]प्यसुराश् ; $K_{2,3}$ $\tilde{N}_{1,2}$ V_1 $D_{4\,5}$ [ए]व सुराश् , D_{s2} T_1 [ए]वमुपा- (for [ए]नमुपा-). T_2 -गताश्च (for -चरन्ति) V_3 D_3 समन्ततश्चैव सुराश्च भा(D_3 °स्तवर)न्ति — (L 462) $K_{1\,4}$ $\tilde{N}_{1\,2}$ V_1 $D_{1,3,5}$ जयन्ति ; K_3 जपन्ति , V_3 D_6 गृणन्ति , $B_{2\,3}$ D_3 M_2 जपन्तः ; D_n जयन्त. , $G_{3\,5}$ M_4 ब्रुवन्त (for यजन्ति). B_1 $T_{1\,2}$ $G_{1,4}$ दैत्यर्षभा प्राञ्जलयो ब्रुव(B_1 जप)न्त. — (L. 463) $T_{1,2}$ $G_{1\,3-5}$ $M_{2\,4}$ पुरोहिता शत्रुवधं (M_2 °जयं) ब्रुवाणास् — (L. 465) $V_{1\,3}$ जाप्यैश् ; D_s D_s जप्यैश् (for जपैश्) B_1 Cal. ed. महौषधीभिर् , T_2 $G_{1\,4}$ M_2 तथौषधैश्च ; M_4 °धीश्च (for °धीभिर्). B_3 D_6 जप्यैश्च मन्त्रैश्च महौषधीभिर्. — (L 466) V_3 प्रकुर्युं , D_2 च चक्रु (for प्रचक्रु) — (L 467) K_3 रथाश्च , D_3 शुभानि (for °श्च) $B_{1\,3}$ D_3 D_6 गा वै (for गावः). T_1 तत सहस्राणि शुभाश्च गावः — (L 468) B_3 D_6 ग्रामांश्च रत्नानि , D_3 फलानि पुण्यानि (for °नि पुष्पाणि). K_4 निष्कम् (for निष्कान्) — (L 469) $K_{1\,2}$ $\tilde{N}_2$ $V_{1\,3}$ B D_s $D_{4,6}$ बलिर्द्विजेभ्यः प्रयत- ($K_{1\,2}$ D_4 °भ्यो दितिज) प्रयच्छन् ; $T_{1\,2}$ $G_{1\,3-5}$ $M_{2\,4}$ दैत्येश्वरो ब्रह्मविदां प्र°. — (L. 473) B_3 D_s -चन्द्रोऽयुत- (for -चन्द्रायुत-). — (L 474) D_3 महानभिर् (for बलेर्°). K_4 B_3 [आ]विभाति , $\tilde{N}_1$ M_2 [अ]भि° (for [अ]व°) — (L 475) K_2 तमास्थितं ; D_{n2} समास्थितो ; M_3 तदास्थितो (for तमा°) — (L 476) T_2 $G_{1,4}$ M_3

स वेगवान्वीररथौघसंकुलः
प्रयाति देवान्प्रति दैत्यसागरः ।
महार्णवो वीचितरंगसंकुलो
यथा जलौघैर्युगसंक्षये तथा ॥
त्रैलोक्यवित्रासकरैर्वपुर्भि-
स्तान्यग्रतो यान्ति बले रथस्य ।
महाबलान्युच्छ्रितकार्मुकाणि
सपर्वतानीव वनानि राजन् ॥

Colophon

वैशंपायन उवाच ।
श्रुतस्ते दैत्यसैन्यस्य विस्तरो जनमेजय ।
भूयस्त्रिदशसैन्यस्य शृणु विस्तरमादितः ॥
सुराधिपस्तु भगवानाज्ञापयत वै सुरान् ।
मरुद्गणांस्तथादित्यान्विश्वेदेवांश्च वासवः ॥
वसूनष्टौ भृशं सर्वान्यक्षरक्षोमहोरगान् ।
विद्याधरगणान्सर्वान्गन्धर्वांश्च महाबलान् ॥
महार्णवांश्च शैलांश्च तथा रुद्रान्महौजसः ।
यमवैश्रवणौ चोभौ वरुणं च जलाधिपम् ॥
ये तु सिद्धा महात्मानः पितरश्च मनस्विनः ।
राजर्षींश्चापि शतशो योगसिद्धांस्तथैव च ॥
त्रिदशाज्ञापकः शक्र आज्ञापयति वीर्यवान् ।
भवन्तो दैत्यनाशाय संनह्यन्तामिति प्रभुः ॥
शक्रस्य वचनं श्रुत्वा ततः सर्वे दिवौकसः ।
संनह्यन्त महात्मानः शक्रस्य समविक्रमाः ॥
नानाकवचिनः सर्वे विचित्रकवचध्वजाः ।
नानायुधोद्यतकरा मत्ता इव महागजाः ॥
केचिदारुरुहुर्व्याघ्रान्केचिदारुरुहुर्गजान् ।
केचिदारुरुहुर्नागान्केचिदारुरुहुर्वृषान् ॥

महारथं (for °बलः) D_3 महाध्वजः कार्मुकबाणहस्तः ; T_1 G_{3-5} °रथं काञ्चनचित्रबाणम्, M_4 °रथं कार्मुकधृक्सबाणम्. — (L. 479) G_5 वीरवरौघ-, M_2 द्विरदरथौघ- (for वीरर°). — (L 480) $\tilde{N}_1$ G_2 सैन्य- (for दैत्य-) — (L 481) $B_{1\ 3}$ D_3 महानिलोद्धूत-, $T_{1,2}$ $G_{1\ 3\ 5}$ M_4 °नलाविद्ध- (for °र्णवो वीचि-) — (L 482) $D_{3\ 4}$ Bom Poona eds G(ed) -संशये (for -संक्षये) D_6 $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ यथार्णवो लोकविनाशनाय. — (L 483) $T_{1\ 2}$ $G_{1\ 3-5}$ M_{2-4} भीमानि सं- (G_3 वि-) (for त्रैलोक्यवि-) — (L 484) M_4 तस्य (for तानि) B D_6 भान्ति (for यान्ति) D_3 तान्यग्रतो भान्ति बलानि तस्य, T_1 $G_{1,3-5}$ M_2 तस्या(G_4 °था)ग्रतो भान्ति बले रथस्य — (L 485) महारथाभ्युत्थितकार्मुकाति

COLOPHON — *Mention of the Epic* · K_4 V_1 Dn_1 Ds_2 $D_{1,5}$. — *Mention of Khila* V_2 B Dn Ds $D_{1\ 3-5}$. — *Sub-parvan* · $\tilde{N}_1$ $D_{1,5\ 6}$ वामनम्, $B_{1,3}$ D_3 T_2 $G_{1\ 3}$ $M_{2,4}$ वामनप्रादुर्भाव. — *Adhy name* K $\tilde{N}_2$ $V_{1\ 3}$ B_2 Dn Ds D_{1-5} बलेरुद्योग., $B_{1\ 3}$ दैत्यसंनहनम्, D_5 दैत्येन्द्रसंहननम् ; G_3 महाबलिजैत्रयात्रा, M_2 सेनावर्णनम् — *Adhy no* · K_3 24, V_1 200 ; V_3 Ds_2 237, Dn 236 ; D_1 223 ; D_3 249, D_4 231, T_1 G_4 295, G_1 294, $G_{3\ 5}$ 297.

G_4 om. lines 487–570. — After line 488, T_1 $G_{1\ 3\ 5}$ $M_{3\ 4}$ ins ·

21** दैत्यानामथ संनाहं दूताच्छ्रुत्वा सुराधिप. ॥
[M_2 नराधिप (for सुराधिप.)]

— (L. 489) T_1 $G_{3\ 5}$ शचीपतिस् (for सुराधिपस्). $K_{1,2}$ $V_{1,3}$ Ds $D_{3\ 4}$ आज्ञापयति (for °यत) $B_{1\ 3}$ D_6 Cal. ed. आज्ञापयदसौ सुरान् (for ^{b}) — (L 490) K_4 D_3 दिव्यान् (for [आ]दित्यान्) $B_{1\ 3}$ D_6 T_1 $G_{1\ 3-5}$ $M_{2\ 4}$ विश्वान्साध्यांश्च ; B_2 Dn T_1 विश्वान्देवांश्च, Ds_2 विश्वदे° (for विश्वेदे°). — For line 491, $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ subst.

22** अष्टौ चापि वसूंस्तूर्णं यक्षराक्षसकिंनरान् ।
[M_2 -पन्नगान् (for -किंनरान्).]

— (L 492) सिद्धान् (for सर्वान्) B_1 Cal ed महारथान् (for °बलान्) — (L 493) T_2 G_1 द्वीपान् (for रुद्रान्). — (L 494) D_6 नराधिपम्, $T_{1,2}$ $G_{1\ 3-5}$ M_2 महाबलम् ; Bom Poona eds G(ed) जनाधिपम् (for जला°). M_4 वरुणश्च महाबलः (for ^{b}). — (L 495) K_1 सिद्धाश्चैव ; K_2 D_4 सिद्धसंघा (for ये तु सिद्धा) K_3 महाबला, V_1 महात्मन. (for मनस्विन.) $\tilde{N}_2$ शक्रस्य समविक्रमा (for ^{b}). — (L. 496) K_4 B_3 Dn D_1 राजर्षयश्च, D_5 °र्षयोऽपि (for °र्षींश्चापि). T_1 $G_{1\ 3}$ राजर्षयश्च बहुशो, T_2 G_5 $M_{2\ 4}$ °र्षींश्चैव बहुशो (for ^{a}) $K_{1,2,4}$ $\tilde{N}_{1,2}$ V_3 $B_{1\ 3}$ Dn Ds $D_{1\ 3-5}$ $T_{1\ 2}$ $G_{1\ 3}$ -सिद्धास् (for -सिद्धांस्) — (L 497) B_2 D_3 $T_{1\ 2}$ $G_{1,5}$ $M_{2\ 4}$ आज्ञापयत (for °ति) V_3 वै सुरान् (for वीर्यवान्). — (L 498) D_2 संनह्यध्वम् (for °न्ताम्) — (L 500) D_3 समनह्यन्त (hypermetric) (for संनह्यन्त) — (L 501) D_3 -किरीटिन (for -कवचिन) D_3 T_2 $G_{1\ 3\ 5}$ -कनक- (for -कवच-). — T_2 G_1 om lines 502–505 D_3 om (hapl) line 502. — (L. 503) $\tilde{N}_4$ om (hapl.) line 503^a. K_3

हरिनेत्रो हरिश्मश्रुर्द्विरदैरावतध्वजम् ।
रथं हरिहयैर्युक्त्वा स प्रायात्समरं प्रति ॥
आदित्यवर्णं विरजं सुधौतं
त्वष्ट्रा स्वयं निर्मितमीश्वरार्थम् ।
जालैश्च जाम्बूनदभक्तिचित्रै-
रलंकृतं काञ्चनदाममिश्रं ॥
सकूबरोपस्करबन्धुरेषं
विद्युत्प्रभाभिः कृतभामिताभ्रम् ।
कैलासशृङ्गोपममिन्द्रयानं
सुचारुचारुप्रतिचक्रचक्रम् ॥
तारासहस्रै रुचिरैर्ज्वलद्भि-
र्दैवार्धमाल्यार्चितसर्वदेहम् ।
समुच्छ्रितश्रीध्वजमक्षयाक्षं
जाज्वल्यमानं वपुषोत्तमेन ॥
आस्थाय तं भास्वरमाशुवेगं
शचीपतिर्लोकपतिः सुरेशः ।
वज्रस्य भर्ता भुवनस्य गोप्ता
ययौ महात्मा भगवान्महेन्द्रः ॥
आमुच्य वर्माथ सहस्रतारं
हुताशनादित्यसमप्रभावम् ।
सूर्यप्रभं चामुमुचे किरीटं
मालां च जाम्बूनदवैजयन्तीम् ॥
त्वष्ट्रा कृतं भास्वररश्मिदीप्तं
सुतीक्ष्णघोरामलतीक्ष्णधारम् ।
महासुराणां रुधिरार्द्रमुग्रं
प्रगृह्य वज्रं शतपर्वमुख्यम् ॥
महाशनी द्वे च महाग्रहाभे
दीप्तामनोघां च स शक्तिमुग्राम् ।
चक्रं तथैन्द्रं सुमहच्च चापं
प्रगृह्य शक्रः प्रययौ रणाय ॥
सहस्रदृग्भूतपतिः सनातनः
सनातनानामपि यः सनातनः ।
प्रयाति देवाधिपतिर्महात्मा
वैयाघ्रमादाय च चर्म चित्रम् ॥

---

om line 503^{b} $T_1 G_{3, 5} M_2$ रथान् (for गजान्). — (L 504) $B_1 D_3 D_6$ Cal ed रथानारुरुहु केचित् (for °) — (L. 505) $K_{1, 4}$ $\tilde{N}_1$ Dn $D_1 T_1$ द्विरदैरावृत- (for °वत-) M_2 -ध्वज (for -ध्वजम्) — (L 506) $K_{2-4} V_3 B_2$ Dn D_{3-5} $T_{1, 2}$ $G_{1, 3-5}$ युक्तं (for युक्त्वा) — (L 507) $\tilde{N}_1$ विरजा· ; B_2 विमलं, $T_1 G_3 M_2$ द्विरद (for विरजं) D_3 सुनाभं, M_4 सुधाभं (for सुधौतं) $B_{1, 3} D_6$ आदित्यवर्णं विपुलं सुनाभं (D_6 °धामं); $T_2 G_{1, 5}$ °र्णं विश(G_5 द्विर)दं सुधाभं — (L 508) $\tilde{N}_1 B_3 D_3$ स्वयंभुवा (for त्वष्ट्रा स्वयं) — (L 511) V_1 -बन्धुरं रथं (for -बन्धुरेषं). D_3 शुक्लाम्बरोपस्करबन्धुरेषं. — (L 514) $K_1 D_4$ सुचारुचारुं, $B_1 D_4$ तारासुनारं, B_3 सुचारुतारं (for °चारु) T_1 -प्रतिमं स- (for -प्रतिचक्र-) $T_2 G_1 M_{2, 4}$ सुतार(M_4 °चारु)तारप्रतिमं च चक्रम्, $G_{3, 5}$ सुचारुताराप्रतिम सुच° — (L. 515) $K_1 D_4$ रुचिरं, $K_3 T_2 G_1$ रचितं ; $K_4 \tilde{N}_1$ उचितैर् ; $D_3 D_{3, 6} T_1 G_{3, 5}$ खचितं (for रुचिरैर्). — (L 517) K_1 $\tilde{N}_{1, 2}$ $D_3 D_6 T_1 G_3$ समुच्छ्रितं (for °च्छ्रित-) $M_{2, 4}$ चारुपक्षं (for अक्षयाक्षं) B_1 समुच्छ्रितं स्वर्ध्वजमक्षयाक्षं, $T_2 G_1$ °तं श्रीध्वजचारुपक्षं, G_5 °तं श्रीध्वजमायताक्षं — (L 518) $\tilde{N}_2 D_2$ प्रज्वाल्यमानं (for जाज्व°) $K_2 D_3 T_1 M_2$ °पुरुषोत्तमेन (for वपु°). $K_{3, 4} D_1$ प्रज्वाल्यमानं पुरुषोत्तमेन. — (L 519) $K_{2, 3} \tilde{N}_2 B_{1, 3} G_1$ भास्करम्, $\tilde{N}_1 B_2 D_3 D_5$ भासु° (for भास्व°), $V_3 D_5 T_{1, 2} G_{3, 5}$ उग्रवेगं, D_2 आशुचारं (for °वेगं) — (L 520) M_2 स श्रीपतिर् (for शची°). T_2 देव- (for लोक-). M_4 स श्रीपतिर्लोकपतिं सुरेशम्. — (L. 521) K_3 Dn धर्ता ; D_{s2} गोप्ता (for भर्ता) — (L 522) D_1 सुरेशः (for महेन्द्रः) — (L 524) G_5 -प्रभासम् (for °वम्) — (L. 525) D_3 वै सुशुभे (for चामुमुचे). $\tilde{N}_2$ सूर्यप्रभावं मुमुचे किरीटं — (L 527) Dn_2 D_5 भास्कर (for भास्वर-). K_3 दीप्ति- (for रश्मि). — (L 528) $K_1 D_{1, 2}$ -तीव्र-, B D_6 G_{3-5} M_4 नैक- (for the second तीक्ष्ण-). T_1 सुनीक्ष्णघोरामलमेकधारम्, $T_2 G_1$ °घोरज्वलनैकधारम्, M_4 °घोरामनलैकधाराम् — (L. 529) $K_{1, 2} D_4$ रुधिराप्रदिग्धं ; K_3 °रौघदीप्तं ; B_3 Dn °राश-मुग्र, D_1 रुधिरार्द्र°, D_3 निधनप्रसक्तं ; D_5 रुधिराङ्गदिग्धं (for °र्द्रमुग्रं) — (L 530) $K_{1-3} D_{4, 5}$ -पर्वमुग्रम् ; V_1 °णाख्यम्, $B_{1, 3} D_3 T_{1, 2} G_{1, 3, 5} M_{2, 4}$ °भीमम् ; D_2 -वर्ममुख्यम् ; D_3 -पत्रतुल्यम् (for -पर्वमुख्यम्) — (L. 531) D_3 महाप्रदीप्ते ; $T_{1, 2} G_{1, 3-5} M_{2, 4}$ °प्रभावे (for °ग्रहाभे) — (L. 532) $K_2 D_4 T_1$ वर-, K_3 च सु- (for च स). — (L. 533) Bom. Poona eds सुमहत्प्रताप (for °च्च चापं). — (L. 534) $G_5 M_4$ चक्रं (for शक्रः) — (L. 535) $\tilde{N}_1$ भूतभवः (for °पतिः). — $\tilde{N}_1$ om. line 536. — (L. 536) D_3 अधिप

क्षीरोदधिक्षोभसमुत्थितानि
पुरामृतादुत्तमभूषणानि ।
देवासुराणां श्रमनिर्जितानि
सोमार्कनक्षत्रतडित्प्रभाणि ॥
दत्तान्यदित्या मणिकुण्डलानि
युद्धं प्रयातस्य सुरेश्वरस्य ।
तैर्भूषितो याति सहस्रचक्षु-
रुद्द्योतयन्वै विदिशो दिशश्च ॥
हरिः प्रभुर्नेत्रसहस्रचित्रो
विभाति युद्धाभिमुखः सुरेन्द्रः ।
यथा सितं शारदमभ्रवृन्दं
नभस्तलं ऋक्षसहस्रचित्रम् ॥
स्तुवन्ति यान्तं विपुलैर्वचोभि-
र्जयाशिषा चोर्जितसत्त्ववीर्यम् ।
अत्रिर्वसिष्ठो जमदग्निरौर्वो
बृहस्पतिर्नारदपर्वतौ च ॥
समन्वयुर्देवगणा महेन्द्रं
प्रयान्तमादित्यसमानवर्चसम् ।
विश्वे च देवा मरुतश्च सर्वे
साध्यास्तथादित्यगणाश्च सर्वे ॥
ते देवराजस्य पुरंदरस्य
हयाश्च ये मातलिसंगृहीताः ।
प्रयान्ति देवेश्वरमुद्वहन्तो
नभस्तलं पद्भिरिवाक्षिपन्तः ॥
ब्रह्मर्षयश्चैव सुरर्षयश्च
राजर्षयश्चाक्षयपुण्यलोकाः ॥
सर्वेऽनुजग्मुः सहसा ज्वलन्तं
तेजोन्वितं शक्रममित्रसाहम् ॥
प्रगृह्य शूलानि परश्वधांश्च
दीप्तानि चापान्यशनीर्विचित्राः ।
वर्माणि चामुच्य हिरण्मयानि
प्रयान्ति सूर्यांशुसमप्रभाणि ॥

(for अपि य) $T_{1\ 2}$ $G_{1\ 3-5}$ $M_{2\ 4}$ सनातनानामपि शाश्वत॰ प्रभु. — (L 537) $\tilde{N}_2$ V_3 $B_{1\ 3}$ Dn D_6 $T_{1\ 2}$ $G_{1\ 3\ 5}$ $M_{2\ 4}$ खड्गं च (for प्रयाति) — (L 538) K $\tilde{N}_1$ Ds D_{1-5} सुवर्ण-, V_1 च वर्म-, V_3 स चर्म-, B_2 स वर्म- (for च चर्म) — (L 539) $\tilde{N}_1$ Ds_2 $D_{2\ 6}$ -समुच्छ्रितानि (for °त्थितानि) $K_{1\ 3}$ क्षीरोदविक्षोभसमुच्छ्रितानि. — (L 540) D_3 पुराकृतानि, T_1 $G_{1\ 3\ 5}$ पुरातनानि (for °पुरामृताद्) — (L 541) $K_{1\ 2}$ D_4 च विनिर्जितानि, K_4 $D_{1\ 2}$ समनिर्जि°; Dn_2 श्रमवर्जि°, D_3 समरे जि° (for श्रमनिर्जि°). — (L 543) T_2 $G_{1\ 5}$ $M_{2\ 4}$ [अ]मृत- (for मणि-) — (L 545) K_4 $\tilde{N}_{1,2}$ V_1 Dn Ds_2 $D_{2\ 4}$ T_1 G_3 भाति, T_2 $G_{1\ 5}$ $M_{2\ 4}$ ऽतीव (for याति). D_5 सहस्रनेत्र (for °चक्षुर्) — (L 546) K_4 उद्द्योतयित्वैव (for °तयन्वै) — (L 547) D_3 -धर्ता (for -चित्रो) — M_4 om lines 548–552 — (L 548) D_3 सुरेश. (for °न्द्रः) — (L 549) D_6 स्थित (for सित) $K_{1,2\ 4}$ $\tilde{N}_1$ $V_{1\ 3}$ Ds $D_{1\ 2\ 4\ 5}$ कल्पं, K_3 -चित्रं (for -वृन्दं) D_3 यथा नभ शारदमभ्रकल्पं, D_5 (marg) यथासितैर्वारिधरैर्विचित्रं, $T_{1,2}$ $G_{1\ 3\ 5}$ M_2 यथा सितं वारिधरैर्विमु- (T_2 G_1 M_2 °भ)क्तं — (L 550) $T_{1\ 2}$ $G_{1\ 3-5}$ M_2 ज्योति- (for ऋक्ष-) K_2 -नेत्रम् (for -चि°) — After line 550, T_1 $G_{3\ 5}$ ins

23** ऐरावतं नागवरं महात्मा
तदा समारुह्य ययौ रणाय ॥

— (L 551) K_4 विमलैर् (for विपुलैर्) K_3 विचित्रो; $T_{1\ 2}$ G_1 M_2 स्तवैर्हि, G_3 स्तवैरिमं (for वचोभिर्) — (L 552) K_3 चोद्धत- (for चोर्जित-) T_2 G_1 -वीर्यसंज्ञम् (for -सत्त्ववीर्यम्) — K_4 om lines 553–557 — (L 556) $B_{1\ 3}$ D_6 Cal ed -समप्रभावम्; $T_{1\ 2}$ $G_{1\ 3,5}$ $M_{2\ 4}$ -निभं सुरेशम् (for -समानवर्चसम्) — (L 557) D_2 ऋतवश् (for मरुतश्) Bom Poona eds G(ed) तथैव (for च सर्वे). — $\tilde{N}_2$ om line 558 — (L 558) $T_{1\ 2}$ $G_{1\ 3\ 5}$ $M_{2\ 4}$ समस्ता (for च सर्वे) — (L 560) G_1 हरेर्हया (for हयाश्च ये) — (L 561) D_2 प्रयान्ति देवेश्वरयुद्धहेतोर् — (L. 563) K $\tilde{N}_{1\ 2}$ $V_{1\ 3}$ $B_{1\ 2}$ Dn Ds $D_{1\ 2\ 4\ 5}$ G_3 महर्षयश् (for सुर°) — (L 564) $T_{1\ 2}$ $G_{1\ 3\ 5}$ $M_{2\ 4}$ -शीलाः (for -लोकाः). — (L 565) $\tilde{N}_1$ T_2 $G_{1\ 5}$ यशसा (for सहसा). $M_{2\ 4}$ सर्वेऽनुजग्मुर्यशसा ज्वलन्त॰ — (L 566) V_1 तेजस्विनं, D_3 तेजो बलं, M_2 तेजोयुताः, M_4 °न्विताः (for °न्वितम्) T_1 -कालम् (for -साहम्). K_3 तेजस्विनं शक्रममित्रसादनम्. — (L 568) T_2 $G_{1,5}$ $M_{2\ 4}$ दीप्तान्पिनाकान्, G_3 °नि चापान् (for °नि चापानि) $B_{1\ 3}$ D_6 तथा शनीश्च (for [अ]शनीर्विचित्रा.) — (L. 570) D_3 सूर्याग्नि- (for सूर्यांशु-). — After line 570, $T_{1,2}$ $G_{1,3-5}$ $M_{2,4}$ ins. an addl. colophon [*Sub-parvan* T_2 $G_{1,3}$ $M_{2,4}$ वामनप्रादु-

तथा कुबेरोऽश्वसहस्रयुक्तं
श्रेष्ठं रथं सर्वसहं महार्हम् ।
दिव्यं समारुह्य रणाय यातो
धनेश्वरो दीप्तगदाग्रहस्तः ॥
निशाचराः पावकधूम्रकाया
रक्षोवृषा रुद्रसखस्य तस्य ।
विशालनानायुधदीप्तहस्ता
यान्त्यग्रतो वैश्रवणस्य राज्ञः ॥
ते लोहिताक्षाः परिवार्य देवं
व्रजन्ति भिन्नाञ्जनचूर्णवर्णाः ।
यक्षोत्तमा यक्षपतिं धनेशं
रक्षन्ति वै प्रासगदासिहस्ताः ॥
पुण्यः प्रभुः प्राणपतिर्यतात्मा
वैवस्वतो धर्मभृतां वरिष्ठः ।
तडिद्गुणाभं शतवाजियुक्तं
रथं समारोहत सूर्यकल्पम् ॥
तं लोकपालं पितरोऽनुजग्मु-
र्विविक्तपापा ज्वलिता यशोभिः ।
सर्वे च भूता भुवनप्रधाना
नानायुधव्यग्रकरा सुभीमाः ॥
दण्डं महास्त्रं परिगृह्य देवो
लोकाङ्कुशं विग्रहनिश्चितार्थम् ।
हिरण्मयानां कमलोत्पलानां
मालां मनोज्ञामवसज्य कण्ठे ॥
स्थितोऽस्थिमेदामिषलोहितार्द्रं
सर्वासुराणां निधनं विकाङ्क्षन् ।
तेजोमयं मुद्गरमुग्ररूपं
विकर्षमाणोऽरुणधूम्रनेत्रः ॥
समन्वितो व्याधिशतैरनेकै-
र्ययौ हरिश्मश्रुरुदारसत्त्वः ।
महासुराणां निधनाय बुद्धिं
चक्रे तदा व्याधिपतिः कृतान्तः ॥

भाव — *Adhy name* G3 देवेन्द्रसमरसंनाह ; G5 पुरंदरसमरसंनाह — *Adhy no* T1 296, G1 292, G3 5 298; M2 4 8].

— Before line 571, T1 G1 3–5 M2 4 ins वैशंपायनः — (L 572) T1 2 G1 3–5 M2 4 श्रेष्ठं नरश्रेष्ठ शुभं शुभार्हम् (T2 °वहम्) — (L 573) T1, 2 G1 3–5 M2 4 रथं (for दिव्यं) G3 समास्थाय (for °रुह्य) — (L. 575) D1 3 -धूमकाया, D5 T1 2 G1, 3–5 M2 4 -धूम्र(T1 G3 °म)वर्णा (for °काया). —(L 577) K1 -दीर्घ- (for -दीप्त-). K2 D4 विशालनागायुधदीर्घहस्ता — (L. 578) D1 सद्यः (for राज्ञः) T1 2 G1 3–5 M2 4 ययुः पुरस्ताद्धनदस्य राज्ञ. —(L. 580) G1 3–5 M2, 4 द्रवन्ति (for व्रजन्ति) D5 -भिन्नाः (for -वर्णाः) D2 G(ed) व्रजन्ति चूर्णाञ्जनभिन्नवर्णा — (L. 581) G5 यक्षेश्वरा (for यक्षोत्तमा) M2, 4 यक्षोत्तमा राक्षसवद्धनेशम् — (L 582) K2 4 Ñ2 V3 Dn D1, 2 4 T2 पाश- (for प्रास-) — Dn2 om lines 583–587. —(L 583) K3 पुण्यव्रज, Ñ1 पुण्यं प्रभुं, V3 D3 D1 3 4, 6 पुण्यप्रभु (V3 °भः) (for पुण्यः प्रभुः) Bom Poona eds G(ed) जितात्मा (for य°) V1 पुण्यप्रभु प्राणपतिर्महात्मा; T1 2 G1, 3–5 M2 प्राणिप्रभुः प्रेतपतिं यता(G3 5 M2 महा)त्मा. — (L 584) Ñ1 वैवस्वतः सर्वभूतोपहन्ता — (L 585) Ñ1 2 V1 B2 Dn1 D3 5 तडिद्गुणाभं (for तडिद्गु°). T1 M2 -चक्र-, G3 M4 -चन्द्र- (for वाजि-). T2 G1, 4, 5 तडिद्गुणाभं शतचन्द्र(G5 °चक्र)युक्तं. — (L 586) Ñ1 D3 समारोहति (for °हत). —(L 588) Ñ1 M2 4 निर्णिक्त-; G1, 5 निर्मुक्त- (for विविक्त-) K1 Ñ2 B2 Dn D1 3–5 तपोभिः (for यशोभि) K2 विविक्ततापा ज्वलितास्तपोभिः; K3, 4 V1, 2 B1, 3 D3 D2 6 विमु(B1, 3 D6 निर्णि)क्तपापा ज्वलितास्तपोभिः. — (L. 589) D3 G5 प्रभूता (for च भूता). — (L. 591) V1 महान्तं (for °स्त्रं) — (L. 592) G1, 4 लोकाद्भुतं (for °ङ्कुशं) K4 Ñ1, 2 V1 B2 Dn Ds2 D1, 2, 4 6 निग्रह- (for वि°) T1 G3 5 M4 लोकाद्भुतं निश्चितविग्रहार्थः (M4 °र्थाः), T2 M2 °द्भुतं विग्रहनिश्चितार्थः. — (L. 593) K2 D4 कमलोत्तमानां; K3 °ज्वलानां (for °त्पलानां). — (L. 594) D2 4 अवमुच्य (for °सज्य) — (L. 595) G3 मेदोऽस्थि- (for स्थितोऽस्थि). K4 -लोहिताक्षं (for °र्द्रं). D6 T1 2 G1 4 5 M2 4 मेदोस्थिमज्जामिषलोहितार्द्रं. — (L. 596) K1 3, 4 Ñ2 V3 D1, 3 विरूपम्, Ñ1 निरूप्य; D5 निरूपम् (for विकाङ्क्षन्) T1 2 G1, 3–5 M2, 4 सर्वासुराणां निधनैकरौद्रम् — D2 om. lines 597–601 — (L. 598) K4 D1 T2 -धूम्रनेत्रम्; B1 °लोचन, D3 -ताम्रनेत्र (for -धूम्र°) — (L 599) B1 D6 Cal ed -गणैर् (for -शतैर्). T1 2 G1 3–5 M2 4 सुदर्पितैर्व्याधिशतैः परी(T2 G1, 4 °तैरुपे)तो. — (L. 600) V1 -वीर्यः (for -सत्त्व) — (L. 601) T2 निधनेन, G1 °ने स (for °नाय). M2 चक्रे (for बुद्धिं). — (L. 602) M2 बुद्धिं (for चक्रे). D3 स यास्याधि- (for

ततस्त्रिशीर्षैर्भुजगैर्बृहद्भि-
　　र्युक्तं रथं हेमचितं महात्मा ।
आस्थाय कुन्देन्दुनिभं जलेशो
　　ययौ रणायासुरदर्पहन्ता ॥
वैदूर्यमुक्तामणिभूषिताङ्ग-
　　स्तेजोमयः पाशगृहीतहस्तः ।
महासुराणां निधनाय देवः
　　प्रयाति रूप्याकरनद्धबाहुः ॥
कैलासशृङ्गप्रतिमोऽप्रमेयः
　　समुद्रनाथोऽमृतपो महात्मा ।
महोरगैः स्वैस्तनयैश्च गुप्तो
　　ययौ रथेनार्कसमप्रभेण ॥
युद्धाय तं यान्तमदीनसत्त्वं
　　नभस्तले चन्द्रमिवातिकान्तम् ।
पश्यन्ति भूतानि महानुभावं
　　संहृष्टरोमाणि कृताञ्जलीनि ॥
धातार्यमांशोऽथ भगो विवस्वा-
　　न्पर्जन्यमित्रौ च शशी च देवः ।
त्वष्टा तथैवोर्जितविश्वकर्मा
　　पूषा च साक्षादिव देवराजः ॥
सोरश्छदैः सध्वजकिंकिणीकै-
　　र्वैदूर्यनिष्कैश्चितहेमकण्ठैः ।
हयैर्वरैः शक्रहयप्रकाशै-
　　र्युक्तान्रथानारुरुहुः सुरास्ते ॥
दिवाकराकारनिभानि केचि-
　　द्धुताशनार्चिःप्रतिमानि केचित् ।
निशाकरांशुप्रतिमानि केचि-
　　त्तडिद्गुणोद्द्योतनिभानि केचित् ॥
नीलांशुमेघप्रतिमानि केचि-
　　त्कार्ष्णायसाकारनिभानि केचित् ।
वर्माणि दिव्यानि महाप्रभाणि
　　त्वष्ट्रा कृतान्युत्तमभानुमन्ति ॥

तदा व्याधि-) — (L 603) T_2 $G_{1, 5}$ $M_{2, 4}$ भूयस् (for ततस्) K_3 Dn महद्भिर् (for बृ°) — (L 604) V_3 हेमचित्रं ; $T_{1, 2}$ $G_{1, 4}$ M_4 °मयं (for °चितं) G_5 M_2 युक्त हयं हेममयं महात्मा — (L 605) D_3 -समं (for -निभं). — (L. 608) $T_{1, 2}$ $G_{1, 3-5}$ $M_{2, 4}$ तेजोज्वलत्पाश- (for °मय पाश-) — (L 609) $K_{1, 2}$ D_4 चैव (for देव·) — (L 610) $\tilde{N}_1$ $K_{1, 4}$ $D_{1, 5}$ -निर्झराभ ; D_3 -निर्मलाभ (for -नद्धबाहु) — After line 610, $\tilde{N}_2$ $V_{1, 3}$ B D_5 $D_{3, 6}$ $T_{1, 2}$ $G_{1, 3-5}$ $M_{2, 4}$ ins

24** अन्वीयमानो जलदेवताभि-
　　निंषेव्यमाणो जलजैश्च सत्त्वैः ।
　संस्तूयमानश्च महर्षिवृन्दैः
　　संपूज्यमानश्च महाभुजंगै ॥

[(L 2) $V_{1, 3}$ D_3 जलजै(D_3 °दै)श्च सर्वैं , D_6 जलसर्वसत्त्वै , M_2 °जैश्च शङ्खै (for °जैश्च सत्त्वै) — (L 3) $\tilde{N}_2$ संस्तूयमानैश् (for °नश्) G_{3-5} M_2 स (for च)]

— (L 611) $T_{1, 2}$ $G_{1, 3-5}$ $M_{2, 4}$ महात्मा (for ऽप्रमेय) — (L. 612) $T_{1, 2}$ $G_{1, 3-5}$ $M_{2, 4}$ भगवाञ्जलेश· (for ऽमृतपो महात्मा). — (L. 613) $K_{1, 2, 4}$ B_1 $D_{1, 3, 4}$ तैस्तनयैश् , M_3 स्वस्त्ययनैश् (for स्वैस्तनयैश्) $\tilde{N}_2$ V_3 D_5 सु- (for च). $K_{1, 2}$ D_4 युक्तो (for गुप्तो) — (L 614) K_2 D_5 -समप्रभाव. (for °भेण). — (L. 616) T_2 G_4 अतीव (for इवाति-) — After line 618, $T_{1, 2}$ $G_{1, 3-5}$ $M_{2, 4}$ ins an addl. colophon [*Sub-parvan* T_2 $G_{1, 3}$ $M_{2, 4}$ वामनप्रादुर्भाव.. — *Adhy. name* G_3 कुबेरवरुणसंनाह — *Adhy. no* T_1 297 , G_1 293 , G_4 296 , G_6 299 , $M_{2, 4}$ 9] — Before line 619, $T_{1, 2}$ $G_{1, 3-5}$ $M_{2, 4}$ ins वैशंपायन — (L. 619) K_4 [अ]थांशुभगौ ; $D_{1, 2, 4}$ [अ]प्यांशुभगौ , D_3 [अं]शुश्च भगो (for [अं]शोऽथ भगो) — (L 620) T_1 $G_{1, 3-5}$ $M_{2, 4}$ वरुणस्तथैव , T_2 वरुणः स देव (for च शशी च देवः). — (L 622) K_{1-3} $\tilde{N}_{1, 2}$ $V_{1, 3}$ $B_{2, 3}$ Dn $D_{1, 3-5}$ T_1 G_3 दिवि (for इव) — (L 623) D_3 घोरस्वरैः , D_6 सौरध्वजैः (for सोरश्छदैः) — (L 624) B Dn D_6 T_2 $G_{1, 4, 5}$ $M_{2, 4}$ -निष्काञ्चित- , T_1 -निष्काङ्गद- (for -निष्कैश्चित-). D_3 -हेमदण्डै (for °कण्ठै) G_3 वैडूर्यनिष्काञ्चितहेमतूलैः — (L. 625) $B_{1, 3}$ D_6 Cal ed हयोत्तमै· (for हयैर्वरैः) Dn_2 Bom Poona eds G(ed) -रथ- , T_2 G_4 -हयैः , M_4 -वर· (for -हय-) — (L. 627) T_1 बलाहकाकार· (for दिवाकरा°) — G_1 M_3 om. lines 629–632 — (L 629) T_1 दिवाकरांशु- (for निशा°) — $K_{3, 4}$ $\tilde{N}_{1, 2}$ V_3 D_5 $D_{1-3, 5}$ om. line 630 V_1 B $T_{1, 2}$ G_{3-5} M_4 om (hapl) lines 631–632 — (L 931) D_6 नीलालि (for नीलांशु-). $K_{2, 4}$ $\tilde{N}_1$ D_{1-4} नीलांशुमेघाभ्रनिभानि केचित् — After line 631, $\tilde{N}_1$ ins

दिशां गजैश्चैव महाबलैस्ते
कैलासशृङ्गप्रतिमैर्महद्भिः ॥
प्रजग्मुरुग्रायुधदीप्तहस्ता-
श्चतुर्युगान्ते ज्वलिता इवोल्काः ।
साध्याश्च देवाः सुमहाप्रभावाः
स्वाधीनचक्राः प्रतिदीप्तवक्त्राः ।
प्रयान्ति जाम्बूनदभूषिताङ्गा
गङ्गौघमार्गैर्गगने बलौघैः ॥
विद्योतयन्तो विदिशो दिशश्च
महाबलास्ते जयतां वरिष्ठाः ।
वरिष्ठपृष्ठौष्ठभुजाः सुदृप्ता
वैश्वानरार्कप्रतिमप्रभावाः ॥
ते ब्रह्मविद्भिश्च नमस्यमानाः
संपूज्यमानाश्च सुरैः सशक्रैः ॥
गन्धर्वसंघैरनुगम्यमाना
वधाय तेषामसुराधिपानाम् ॥
वैदूर्यवज्रस्फटिकाग्रचित्रै-
र्वज्रैः सुवर्णैश्च परिष्कृतानाम् ।
रूपं बभूवोत्कटभूषणानां
दैत्येन्द्रनाशाय विभूषितानाम् ॥
आत्मप्रभाभिश्च रणोत्कटाभि-
र्वर्मप्रभाभिश्च तमोनुदाभिः ।
विभान्ति ते देववराः ससाध्याः
प्रध्मातशङ्खस्वनसिंहनादाः ॥
महारथस्थास्त्रिदिवौकसस्ते
महाबलाः शत्रुबलं प्रयान्ति ।
महास्त्रहस्ता ययुरुग्ररूपा
महासुराणां निधनाय देवाः ॥
तथैव सर्वे मरुतोऽतिवीर्या
बलोत्कटाः खे समरप्रतीताः ।
ययुर्महामेघसमानवर्णा
वज्रायुधास्तोयदनादनादाः ॥

— D_6 om line 25–36 — (L 25) $D_{3\ 5}$ दशांशश्चैव होमश्च (for ^{a}) — (L 26) $D_{3.\ 5}$ द्विजर्षभ (for नर°) — After line 26, D_3 ins a passage given in App. I (No 44),

दशांशश्चात्र होमो वै कार्यः श्रोत्रा नराधिप ॥
इदं मया तवाग्रे च सर्वं प्रोक्तं नरर्षभ ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ।
अपुत्रः पुत्रमाप्नोति अधनो धनमाप्नुयात् ॥
नरमेधाश्वमेधाभ्यां यत्फलं प्राप्यते नरैः ।
तत्फलं लभते नूनं पुराणश्रवणाद्धरेः ॥
ब्रह्महा भ्रूणहा गोघ्नः सुरापो गुरुतल्पगः ।
सकृत्पुराणश्रवणात्पूतो भवति नान्यथा ॥
इदं मया ते परिकीर्तितं मह-
च्छ्रीकृष्णमाहात्म्यमपारमद्भुतम् ।
शृण्वन्पठन्नाशु समाप्नुयात्फलं
यच्चापि लोकेषु सुदुर्लभं महत् ॥

Colophon.

— D5 om lines 27–36 — (L 27) Bom. Poona eds. G(ed) स्मरण- (for श्रवण-)

COLOPHON om in D3 6. — *Mention of the Epic* Dn D6. — *Mention of Khila* Dn. — *Adhy. name*: Dn श्रवणफलम्, D6 श्रवणमहात्म्यम् — *Adhy no* Bom. Poona eds 135.

— After the colophon, Dn1 reads.

श्रीकृष्णार्पणमस्तु । हरिवंशः समाप्त । संवत् १८१० मिति कार्तिक सुदि पुरवांशीके हरिवंश समाप्ति ।

Dn2 reads

शुभमस्तु । शके १६७९। ईश्वरनाम संवत्सरे आश्वीन शुद्ध ॥ १ ॥ प्रतिपदा भृगुवासरे तद्दिने हरिवंश समाप्तमगमत् । श्री कृष्णार्पणमस्तु ।

Cal ed. reads

समाप्तोऽयं खिलसंज्ञको हरिवंशभट्टारकः ।
समाप्ता चेयं महाभारतसंहिता ।

G(ed) reads

भविष्यपर्व संपूर्णम् । संपूर्णश्च हरिवंशग्रन्थः ।
ॐ तत्सत्कृष्णार्पणमस्तु । शुभमस्तु ।

तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
चर्माम्बरं सुरमुनीन्द्रसुतं कवीन्द्रम् ।
कृष्णत्विषं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं द्विजानाम् ॥
श्रीगोपालकृष्णः प्रीयताम् । संपूर्णम् ।

APPENDIX II

(शेषधर्मप्रकरणम्)

The App. No II to the Critical Edition of the Harivaṃśa contains a long passage called *Śesadharmaprakaraṇa* found in few isolated Mss of the text and in a few independent Mss as well as in a separate printed edition called G(ed) here It should be noted that the G(ed) used for this App II is *not a part* of the printed edition of HV in Grantha script used for our Critical text and passages printed in App I In fact, G(ed) here is our independent printed tract of this passage only The text of this Appendix No. II is the latest or youngest addition to the Mahābhārata, presumbly made to it and to HV called Āścarya Parvan by South Indian Paṇdits perhaps coming from regions where Grantha and Malayālam scripts were current There is only a single Devanāgarī Ms of this passage No Telugu Ms was available I give below the description of the printed edition and Mss used for constituting the text of the passage :

G(ed) = The printed edition of the passage in Grantha script

D_1 This Ms , No 257 of 1895-1902, belongs to Government MSS collection formerly deposited in the Deccan College, Poona, but now transferred to the Bhandarkar Oriental Research Institute, Poona. It is a paper Ms containing 118 folios with 14 lines to page and about 35 letters to a line The writer of this Ms is रामचद्र यशवत The text is divided into 58 adhys It is not a part of any HV Ms and is undated

G_1— This Ms belongs to the Oriental Research Institute, Mysore The script is Grantha It is a palm-leaf Ms with 334 folios It has 14 to 15 lines to a folio and about 70 letters to a line It is not dated and is a continuation of HV Ms

G_2— This Ms belongs to the Government Oriental Mss Library, Madras It bears No 8257 It is a palm-leaf Ms The script is Grantha, and has 355 folios with 11 lines to a page and about 103 letters to a line The scribe's name is रामन् of कावेरीनगरम् The above passage in the Ms is a continuation of HV

M_1— This MS bslongs to Avanapparampu Mana Library and has no number It contains only this passage. It is also a palm-leaf Ms. containing folios 94 with 9 to 13 lines to a folio and 64-68 letters to a line It has 75 adhys It mentions no date nor the name of its scribe

---

अथ ते मुनय' सर्वे शौनकाद्या महौजसः ।
सूतं धर्मविदां श्रेष्ठं पप्रच्छुरिदमादता' ॥
सूत सूत महाभाग सर्वशास्त्रविशारद ।
व्यासप्रसादात्सर्वं त्व वेत्सि धर्ममशेषत ॥

भारतीयानि शास्त्राणि विचित्रफलवन्ति च । [5]
विचित्रकथयोपेता भारतीया· श्रुता कथा ॥
श्रीकृष्णचरिते दिव्ये हरिवंशे यदद्भुतम् ।
धर्मं धर्मविदां श्रेष्ठ तं न· शंसितुमर्हसि ॥

D_1 begins with

श्रीगणेशाय नम ॥ हरि ॐ,

G_2 begins with ·

1** शुक्लाम्बरधर विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदन ध्यायेत्सर्वविघ्नोपशान्तये ॥
वेदव्यसितनाथाय पराशरसुताय च ।
सुखायानन्दरूपाय तस्मै व्यासाय ते नम ॥
श्रीकृष्णाय नम· ॥ अविघ्नमस्तु ॥

M_1 begins with

हरि । श्रीगणपतये नम । स्वस्ति श्रीवेदव्यासाय नमः ॥

(L. 1) G_1 अत्र (for अथ). M_1 महर्षय (for महौजस). — (L 2) G_1 G(ed) धर्मभृतां (for °विदा). — Before line 3, M_1 ins ऋषय ऊचु — (L 3) G_2 सर्वतत्त्वार्थकोविद (for ^{b}) — (L 4) D_1 सकल (for सर्वं त्व) G(ed.) विशेषत (for अ°). D_1 वेत्सि त्व तु विशेषत (for ^{b}). — (L 6) वैकुण्ठचरितोपेता (for ^{a}). — (L. 8) G_1 G(ed.) धर्मभृतां

सूत उवाच ।

एतदर्थं महाप्राज्ञो जनमेजयभूपतिः ।
पृष्टवान्मुनिशार्दूलं वैशंपायनमर्थवित् ॥

जनमेजय उवाच ।

भारते सर्वशास्त्राणि श्रुतानि विविधानि च ।
धर्माणि च विचित्राणि प्रथितानि महात्मनाम् ॥
पाण्डूनां कौरवेन्द्राणां कथाः पुण्यार्थदायिका ।
यादवेन्द्रस्य कृष्णस्य चरितं महदद्भुतम् ॥
हरिवंशे भगवता पितृदेवोद्भवा कथाः ।
यादवेन्द्रस्य चरितं भौमकंसनिबर्हणम् ॥
कैलासयात्राप्रमुखाश्चरिताः सर्वतः शुभा ।
प्रोक्ताश्च बहवो धर्मा श्रुताः परमपावना ॥
अनुक्तं भवता तत्र किंचिच्छेषं भवेद्यदि ।
विमृश्य च भवान्नूनं सूक्ष्मं धर्म्यं बहुप्रदम् ।
ब्रूहि मे कृपया विप्र लोकस्यास्य विशुद्धये ॥
यद्यद्रहस्यमाचष्ट पाण्डूनां वृष्णिनन्दनः ।
तत्तत्संगृह्य कृपया वद मे भूसुरोत्तम ॥

सूत उवाच ।

इत्युक्तो राजसिंहेन भारतेन महात्मना ।
ध्यात्वा मुहूर्तं विप्रेन्द्रो ह्यपश्यद्धर्मसंहिताम् ॥

वैशंपायन उवाच ।

शृणु राजन्महाश्चर्यं गदितं धर्मवित्तमैः ॥
कृष्णामृतमिति ख्यातं साक्षाद्भगवतोदितम् ॥
धर्माणि च विचित्राणि सर्वेषां सुलभानि च ।
नरकाणि च सर्वाणि यातना बहुविस्तराः ॥
देवदेवस्य कर्माणि विष्णोः सर्वात्मनः प्रभोः ।
मुक्तिप्रदानि भक्तानां चरितानि महात्मनाम् ॥
अन्नगोभूमिदानानि सत्सङ्गात्प्राप्यते तु यत् ।
साळग्रामशिलायां तु यत्फलं प्रोच्यते बुधैः ॥
एकादशीव्रते चैव गङ्गास्नाने च यत्फलम् ॥
अन्नपानीयदाने तु ह्यतिथीनां च पूजने ।
विष्णोः प्रदक्षिणे यच्च नमस्कारे महात्मनाम् ॥
गर्भे जनन्या यद्घोरं संसारस्य च कष्टताम् ।
ऋणिनां धनिनां चैव नरकं स्वर्गमेव च ॥
कावेर्या महिमां चैव पम्पायाः फलमुत्तमम् ॥
कुम्भकोणे च कावेर्याश्चन्द्रपुष्करिणीतटे ॥
रङ्गनाथस्य माहात्म्यं कावेर्यां स्नानवैभवम् ॥
श्रीशैलशिखरे यच्च वेङ्कटाद्रौ महागिरौ ।
श्रीहस्तिशिखरे पुण्यं प्रविष्टानां महात्मनाम् ॥
सिंहाद्रौ हेमकूटे च विरूपाक्षस्य दर्शने ।
जयन्त्या महिमा चैव नवम्या महिमा तथा ।
शिवार्चनेन यत्पुण्यं शिवरात्रिव्रते तथा ।
चातुर्मास्यव्रते पुण्यं चैत्रादौ मासि यत्फलम् ॥
रवीन्दुवारयोः पुण्यं धनुर्मासप्रपूजनम् ।
पूजने यत्तु महतां यतीनां ब्रह्मचारिणाम् ॥
विचित्राणि च दानानि फलानि विविधानि च ।
मार्गाणि नरकाम्भोधेः पापिनां दुर्गगामिनाम् ।
पथि भोगं च यानानि मार्गाणि स्वर्गगामिनाम् ॥
एतानन्यान्महाभागो धर्मपुत्रः सहानुजः ।
द्रौपद्या सह धर्मात्मा यादवेन्द्रात्प्रशुश्रुवे ॥
देवतानामृषीणां च द्विजानां यज्ञशीलिनाम् ।
मध्ये धर्मान्प्रशुश्राव कृष्णे वदति धर्मवित् ॥

जनमेजय उवाच ।

कदा प्रोवाच भगवान्कस्मिन्देशे यदूत्तमः ॥
एतदाचक्ष्व विप्रेन्द्र कृष्णवाक्यामृतं हि मे ॥

(for °विदां) D_1 त्व (for तं). — (L. 9) G_1 इमम् (for एतद्). G(ed) इममर्थं पुरा प्राज्ञो (for ^{a}) —(L 12) G_1 G(ed.) चरितानि (for प्रथि°), — (L 13) D_1 M_1 पाण्डूना कौरवाणां च (for ^{a}). D_1 G_1 M_1 चरित्रा पुण्यदायका (for ^{b}). — (L 14) M_1 तु महाद्भुतम् (for महद°) — (L. 15) G(ed.) ऽपि कथिता॰ (for भगवता) — (L 16) D_1 M_1 -निबर्हणा॰ (for °णम्). — (L. 17) G_1 G(ed) M_1 कैलासाद्रिप्रभृतयश्च (hypermetric) (for ^{a}) G_1 गिरय , G(ed.) विषयाः (for चरिता). — (L. 19) D_1 G_1 M_1 किंचिच् (for तत्र) D_1 G_1 M_1 शेष तेष्वखिल महत् (for ^{b}) — (L 20) G(ed) विमृश्य तद्भवान्सम्यक् (for ^{a}).— (L 22) G_1 G(ed) -वल्लभ (for -नन्दन) — G_2 om the ref. — (L 25) G_2 -संहतिम् (for -संहिताम्) — (L. 26) G_2 सर्वभूतहित त्विदम् (for ^{b}). – (L. 29) G(ed) नरकाश्चैव विविधान् (for ^{a}). G_1 यातनाबहुलानि च (for ^{b}) —(L 30) D_1 सर्वाणि , G_1 धर्माणि (for क°). — (L 33) G(ed) साल्ग्रामस्य पूजायास् (for ^{a}) — (L 35) G_1 G(ed.) प्र- (for च). — (L 36) G_1 G(ed.) गवां (for विष्णोः). — (L. 37) G_2 जनन्यां (for °न्या) G(ed) सकटम् (for कष्टताम्) — (L 38) G_2 मोक्षम् (for स्वर्गम्). — For line 38, G(ed) subst

2** ऋणिनामृणदातॄणा हीनोत्तमगतिस्तथा ।

— (L 39) G_1 कावेरीमहिमा चैव , G(ed) कावेर्याः सुप्रभावं च (for ^{a}). G(ed) पम्पायाः सरसस्तथा (for ^{b}) — (L. 40) G(ed) कुम्भघोणे (for °कोणे) $G_{1,2}$ कुम्भघोणे च कावेर्या (for ^{a}) — (L 42) M_1 वेङ्कटाख्ये (for °द्रौ). — (L. 43) M_1 रम्ये (for पुण्यं) — (L 44) G(ed.) [illegible]मोद्रौ (for सिंहाद्रौ) — For line 45, G(ed) subst

3** श्रीजयन्त्याः प्रभाव च नवम्याश्च तथैव च ।

—(L. 47) D_1 चातुर्मास्ये (for °स्य-) G_2 चातुर्मास्ये तु यत्पुण्यं (for ^{a}) G(ed) चित्रादावपि यत्फलम् (for ^{b}). — (L. 48) D_1 -वारे यत् , G(ed) -व्रतयो (for -वारयो) G_1 रवीन्दुवारव्रते पुण्यं (hypermetric), M_1 इन्दुवारव्रते पुण्य (for ^{a}). D_1 धनुर्मासे (for °मास-) M_1 G(ed) -प्रपूजने (for °नम्). — For line 49, G(ed) subst.

4** पूजने यत्तु देवाना यत्पुण्यं लभते नरः ।

— (L 51) D_1 मार्गांश्च , G(ed.) मार्गांश्च (for मार्गाणि).

वैशंपायन उवाच

राज्याद्भ्रष्टो महातेजा धर्मपुत्र सहानुज ।
पाञ्चाल्या सह धर्मात्मा काम्यकं वनमाविशत् ॥
दु खिते समनुप्राप्ते धर्मपुत्रे महावनम् ।
एतज्ज्ञात्वा यदुश्रेष्ठो ह्यन्तर्यामी जगत्पति ॥
पत्तीनां शतसाहस्रै काञ्चनाढ्यैर्महारथै ।
नियुतै. पताकसयुक्तै किंकिणीदामशोभितै ॥
सप्तभिः सप्तसाहस्रैरश्वै काश्मीरजैर्वृत ।
नीलजीमूतसंकाशैर्मत्तद्विरदकोटिभि ॥
सैन्यैस्तु संवृत शूर श्याममूर्ति प्रतापवान् ।
आययौ हस्तिनपुर विदुरेण समागत. ॥
समागतं हरि ज्ञात्वा भीष्मो वै भीतिसंयुत: ।
द्रुतमागत्य भवनात्स्वगृह समुपानयत् ।
कल्पवित्कल्पयामास ह्यर्घं पाद्यं महात्मने ॥
स्वागतं ते जगन्नाथ कृतार्थोऽहं तवागमात् ।
तव संस्मरणादेव सर्वपापक्षयो भवेत् ।
असंस्तवे वा स्वप्ने वा कीर्तिस्तव सुखप्रदा ॥
दृष्टमात्रे जगद्योनौ किं सपन्नं भवेन्मम ।
तवैव चरणाम्भोज योगिनामपि दुर्लभम् ॥
पुरा संचितपुण्येन लब्धमेतन्मयानघ ।
भवान्तरेऽहं निष्पापो भवेयं जगदीश्वर ।
अन्यथा दुर्लभं ह्यद्य कथं त्वद्दर्शनं मम ॥
इत्येवं प्रभुरव्यक्त. स्वप्रकाशो निरञ्जन ।
गाङ्गेयेन महाभागो बभाषे वदतां वर: ॥
उभाभ्यां सत्कृतो नाथो लोकानां प्रभुरव्यय: ।
भासयन्तं दिशो भाभिर्विचित्रमणिमण्डपम् ॥
सस्मितं विदुरं दृष्ट्वा भीष्मं चेदमुवाच ह ।
गाङ्गेय शृणु मद्वाक्यं पाण्डवा धर्मतत्परा ॥
स्थितेऽपि त्वयि धर्मिष्ठे किमर्थं वनवासिन: ।
मद्भक्तान्पाण्डवान्विद्धि तेषां स्यु: कथमापद: ।
साधूनां वै कृत क्लेशस्तेषा भवति शाश्वतम् ॥
इत्युक्त्वा तूर्णमुत्थाय गृहीत्वा करपल्लवम् ।
भीष्मस्य भीतिमुत्पाद्य गान्धार्यास्तनयस्य च ॥
आपृच्छ्य विदुरं कृष्ण प्रययौ काम्यकं वनम् ।
गाङ्गेयसहितो धीमान्कृष्णो यदुकुलोत्तम: ॥
अपश्यद्भ्रातृभिर्दीप्तै सेव्यमानं युधिष्ठिरम् ।
एकत्रस्थमुदाराङ्ग यज्वभि परिवेष्टितम् ॥
ऋषिविप्रगणै सार्धैर्धर्मसवादतत्परै: ।
पुराणधर्मशास्त्रज्ञैस्तथा वेदान्तवेदिभि ॥
शाब्दिकैस्तार्किकैश्चैव ज्योति शास्त्रविशारदै ।
ऋग्यजु:सामाथर्वज्ञै श्रौतस्मार्तविशारदै: ॥
काव्यालंकारतत्त्वज्ञै षड्भाषानिरतैर्द्विजै ।
काव्यकर्तृभिरन्यैश्च नाटकेषु विशारदै ॥
गान्धर्वशास्त्रनिपुणैर्लक्षणज्ञैर्महात्माभि: ।
एतैरन्यैर्महाभागै. सेव्यमान ददर्श ह ॥
तस्मिन्नवसरे धीमान्धर्मपुत्र: प्रतापवान् ।
भ्रातृभिर्बोधितो दृप्तैर्बलिभिर्युद्धकाङ्क्षिभि: ॥
युद्धमेव वरं ज्ञात्वा कौरवेन्द्रेण शत्रुणा ।

— (L. 52) G(ed) मार्गाश्च (for मार्गाणि) — (L 53) M_1 धर्मान् (for अन्यान्) — (L. 55) G_1 -शीलिनाम्, G_2 G_2 शिल्पि° (for -शालि°). — (L 58) G_2 मे ब्रह्मन् (for विप्रेन्द्र) — (L 59) G_1 महाराज (for °तेजा) — (L 62) G_2 तत्स- (for एतज्) — (L. 63) $G_{1 \, 2}$ M_1 G(ed) पत्नीनां (for पत्तीनां) M_1 युतै पताकासयुक्तै (for ^{a}) — (L 64) G_1 -नाद- (for -दाम-) — For line 64, G(ed) subst

5** ध्वजयष्टिपताकाढ्यै किङ्किणीनादशोभितै ।

— (L 65) G(ed) अपि काम्भोजजैर्वृत (for ^{b}) — (L. 67) M_1 श्रीमान् (for शूर:) D_1 सै-ैस्तु सभृत श्रीमान् (for ^{a}). G(ed.) साधु- (for श्याम-). — (L 69) D_1 G_2 M_1 सम गत (for समागतं). — (L. 73) D_1 $G_{1 \, 2}$ M_1 सदर्शनाद् (for संस्मरणाद्). — G(ed.) om line 74 — (L 74) D_1 शुभ- (for सुख-) — (L 75) M_1 जगद्योने , G(ed.) त्वयि श्रीमन् (for जगद्योनौ) G_1 कि सिद्धिर्नै ; M_1 का सपन्ना ; G(ed) का सिद्धिर्नै (for कि संपन्न) — (L 76) G(ed) [ए]तच् (for [ए]व) G(ed) शरणं योगिनामपि (for ^{b}) — (L 77) G_2 -कृतेन (for सचित-) $G_{1 \, 2}$ M_1 एव (for एतन्) D_1 लब्धमेव मयाधुना (for ^{b}). — After line 77, G(ed) ins

6** मामुद्धर जगन्नाथ भवाम्भोधेर्महाभयात् ।
देहि मे ह्यचला भक्ति तव पादाब्जयो· सदा ॥

— G(ed) om lines 78–79 — (L 79) G_1 कथंचिद्दर्शन मम (for ^{b}) — (L. 80) G(ed) [उ]क्त (for [ए]व) M_1 अव्यग्र: (for °क्त) — G(ed) om line 82 — (L 83) D_1 $G_{1 \, 2}$ G(ed) भासयन्दन्तशोभाभिर् (for ^{a}) — Before line 85, D_1 ins श्रीभगवान् — (L 85) M_1 पाण्डवान्धर्मतत्परान् (for ^{b}). — (L 88) G_2 कृता क्लेशास् (for कृत क्लेशस्) D_1 साधूना यत्कृत क्लेश (for ^{a}) G_1 M_1 शाश्वत (for °तम्) G(ed) स्वाहितायोपकल्पते (for ^{b}) — (L 90) $G_{1 \, 2}$ G(ed) तु सुतस्य (for तनयस्य) — (L 91) $G_{1 \, 2}$ M_1 प्रति (for वनम्) — (L 92) G_2 -कुलोद्वह (for °त्तम) — (L. 93) G(ed) तत्र (for दीप्तै) — (L 94) G(ed) शान्तं दान्तम् (for एकत्रस्थम्) — (L 95) ऋषिभिर्विप्रवर्यैश्च (for ^{a}) — (L 96) M_1 पुराणशास्त्रतत्त्वज्ञैस् , G(ed) °संप्रदायज्ञैर् (for ^{a}) D_1 -पारगै , M_1 -वादिभि (for -वे°) G_1 वेदान्तनिरतैर्द्विजै (for ^{b}) — G_1 om lines 97–99. — (L 97) D_1 G_2 M_1 शब्दतार्किकमुख्यैश्च (for ^{a}) — (L 99) D_1 षडङ्ग- (for षड्भाषा) — For lines 99^{b}–100^{b}, G(ed) subst .

7** कुशलैर्भाषणे तथा ।
बन्दिमागधमुख्यैश्च गायकैर्वैणिकैरपि ॥

— (L 101) G_5 निचय- (for निपुणैर्) — (L 102) सुदर्शनम्, G_2 ददर्शतु (for °र्श ह). — (L 103) G(ed) तु समये

दिग्दन्तिसदृशै. शूरैः खड्गशूलधरै शुभैः ।
रक्ताक्षैर्भीमवद्नैर्गदादण्डभयंकरै ॥
• सुयोधनमहं हन्मि पास्यामि रुधिरं भृशम् ।
इति वादिभिरत्युग्रैर्भ्रातृभि सहितोत्थित ।
गमनाय मति चक्रे धर्मपुत्र' प्रतापवान् ॥
सङ्गात्संजायते काम. कामात्क्रोधोऽभिजायते ।
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।
एतज्ज्ञात्वा तु मतिमान् सङ्गं परिहरेद्बुधः ॥
श्रीकृष्ण जगतामीश धर्मबन्धो महेश्वर ।
पाहि सत्यं प्रतिज्ञा च लोकनाथ नमोऽस्तु ते ॥
इत्येव धर्मज्ञो विद्वान्धर्मलोपभयात्सुधी· ।
चिन्तयामास गोविन्दं सर्वगं भक्तवत्सलम् ॥
तर्षस्तथा हि सुकृतान्न लोपयति किंचन ।
सुरवृक्षो यथा काममीप्सिताना प्रयच्छति ॥
दूरे निवेशितदलौ कृष्णगङ्गासुतावुभौ ।
ददर्श धर्मज श्रीमान्सुकृती भ्रातृभिः सह ॥
तदा विप्रान्पुरस्कृत्य कन्दमूलफलैः सह ।
आलिङ्गनं नमस्कारमर्घ्यपाद्यं चकार ह ॥
मध्ये तु पर्णशालायामुपवेश्य तु विष्टरे ।
पप्रच्छ कुशलं राजा कृष्णगङ्गासुतावुभौ ॥
स्वागतं ते यदुश्रेष्ठ किमिहागमन प्रभो ।
बन्धुहीनान्कृशानस्मान्बन्धुभि परिवर्जितान् ।
पश्य कृष्ण महाभाग प्रीतिर्ननु तवैव हि ॥
सकामो भविता तत्र प्रज्ञाचक्षुस्तदात्मजा ।
तात प्रियमिदं सर्वमस्माकं चरित्त तव ॥
एवमुक्त्वा धर्मसुतो बाष्पव्याकुललोचन ।
कृष्णं तु सर्वगं ज्ञात्वा तन्माया च दुरत्ययाम् ।
अतिष्ठन्मौनमाश्रित्य भ्रातृभिः परिवेष्टित ॥
कृष्णो भक्तप्रिय श्रीमान्भक्ताना दु खनाशन· ।
भक्तानां चरितं दृष्ट्वा प्राह भीष्मं महामना ॥
पश्य भीष्म महाभागान्सत्यशीलान्दृढव्रतान् ।
मत्प्रियान्धर्मनिरतान्मयि संसक्तमानसान् ।
निरसूयापरानेतानहकारविवर्जितान् ॥
भीष्म उवाच ।
किमाश्चर्यमिदं देव त्वद्भक्तानां महात्मनाम् ।
त्वय्यावेशितचित्तानामाश्रमाचारचारिणाम् ॥
त्वां विना देवदेवेश गतिमन्या न लक्षये ।
तस्मादेतान्महाभाग रक्ष त्वं भक्तवत्सल ॥
कृशानामपि भक्तानां सायुज्यं हि प्रयच्छसि ।
तेजस्विनामभक्ताना ध्रुवं निरयमेव हि ॥
श्रीभगवानुवाच ।
भीष्म त्वमेतानाश्वास्य सत्यशीलान्महाबलान् ।
बोधयस्व मम ज्ञानं मयि भक्तिं सुखप्रदाम् ॥

(for अवसरे) $G_{1, 2}$ श्रीमान् (for धी°) — (L 104) M_1 बोधितैर्) (for °तो) M_1 बहुभिर् (for वालिभिर्) — G(ed) om line 105 — (L 106) M_1 क्रूरै (for शूरै). G(ed) तथा (for शुभै) — (L 107) G(ed) आहोपुरुपिकावृतै (for ^{b}). — For line 108, G(ed) subst .

8** सुयोधनमुखान्सर्वाञ्जेष्यामस्तव पश्यत· ।

— (L. 109) G(ed) तु स ([उ]त्थित·). — After line 109, G(ed.) ins .

9** युद्धमेव पर मत्वा कौरवेन्द्रेण शत्रुणा ।

— (L 111) G(ed) वर्धते (for जायते). — (L 114) D_1 G_1 M_1 सुधी (for बुधः) — For line 114, G(ed) subst.:

10** एव ज्ञात्वा स धर्मात्मा कृष्णमेवानुचिन्तयत् ।

— (L 116) D_1 सत्य- (for सत्) G_1 भो (for च) G(ed) पाहि सत्यप्रतिज्ञा मे (for ^{a}). — After line 117, G(ed) ins

11** ततो ज्ञानबलात्तत्र निश्चितात्मा नराधिप ।

— (L. 118) G_1 देवेश (for सर्वग). — G(ed) om. lines 119-120 — (L 119) G_1 यदि मे सुकृतोद्भवो (for ^{a}) — (L 120) D_1 आश्रिताना (for ईप्सि°). — For line 122, G(ed.) subst

12** तौ ददर्श ततस्तत्र धर्मज्ञो भ्रातृभि सदा ॥

— (L. 124) G(ed.) आलिङ्ग्य विनतो भूत्वा (for ^{a}) — (L. 125) D_1 उपविष्ट (for °वेश्य) — For lines 125–126, G(ed) subst

13** तत आनीय विनयान्मध्येशालं तु विष्टरे ।
समावेश्याथ तावेवमप्राक्षीत्कुशलं नृप ॥

— G(ed.) om line 126 — (L. 128) G(ed) प्रीतेस्तव फलं त्विदम् (for ^{b}) — (L. 130) D_1 सहात्मजा, G(ed.) सदा° (for तदा°) — (L 131) G(ed) अस्मदाचरित तव (for ^{b}) — (L 133) G_1 चिन्तामपि (for तन्माया च) (L 134) G_2 -वारित (for -वेष्टित) — (L. 135) D_1 G_2 M_1 G(ed) वृष्णिवर· (for भक्तप्रियः) — (L 136) D_1 $G_{1, 2}$ M_1 भृत्याना (for भक्ताना). $G_{1, 2}$ M_1 महात्मनाम्, G(ed) हसस्तदा (for महामना) — (L. 137) G_1 सुसवृतान् (for दृढव्र°) — (L. 138) G(ed) मत्परत- (for ससक्त-) (L 139) G(ed) आपन्नान्भ्रुविहिसितान् (for ^{b}) — (L 140) G(ed) भगवन्देवदेवेश (for ^{a}) — (L 141) $G_{1, 2}$ M_1 आश्रयाचारचा(G_1 °का)रिणाम्, G(ed) त्वदेककारणैपि° (for ^{b}) — (L 142) G(ed.) त्वा विना सर्वदातार (for ^{a}) — (L 143) D_1 G_2 M_1 महाभाग (for भागान्). — For line 144, G(ed.) subst

14** अकिंचनाना भक्ताना सायुज्य हि प्रयच्छसि ।

— (L 145) G(ed) ध्रुवं निरयदो ह्यसि (for ^{b}) — G_2 श्रीकृष्ण (for श्रीभगवान्) — For line 146, G(ed.) subst. :

15** भीष्म त्वमेको मा वेत्सि नान्यो मे प्राकृतो जनः ।

मन्निवेशितचित्तानां मय्यावेशितकर्मणाम् ।
इह लोके परत्रापि नास्ति नास्ति महद्भयम् ॥

वैशंपायन उवाच ।

ततस्तु लोकस्य चराचरस्य
त्रातारमीशं प्रभुमप्रमेयम् ।
सृष्ट्यन्तकं तं प्रणमय्य मूर्ध्ना
गङ्गासुतो वक्तुमुपक्रमे च ॥

Colophon

वैशंपायन उवाच ।

सुरसिन्धुसुत श्रीमानाज्ञप्तो वै मुरारिणा ।
आत्मना त नमस्कृत्य प्राञ्जलिर्वाक्यमब्रवीत् ॥

भीष्म उवाच ।

विद्धि पाण्डव देवेशं सर्वदातारमच्युतम् ।
लोकत्राणाय संभूत कृष्ण साक्षाज्जगद्गुरुम् ॥
आधारं सर्वभूताना पालयन्तमशेषकम् ।
हरन्तं सर्वसंतापं कृष्णं विद्धि जगद्गुरुम् ॥
धर्मं धर्मभृतां पार्थ ह्यर्थमर्थवतां प्रभुम् ।
सत्यं सत्यवतां कृष्णं कामदं विद्धि कामिनाम् ।
सुखदु.खस्य कर्तासौ भक्तानामसतामपि ॥
अयमेव परो मन्त्रो ह्ययमेव परं तप ।
अयमेव पर ज्ञानमयमेव परा गति ॥
अयमेव परो बन्धुरयमेव सुहृत्तम. ।
तस्माद्भजस्व कौन्तेय सर्वसंपद्भवेत्तव ॥

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
कृष्णे धर्मे च मे भक्तिर्यथा स्याद्धि तथा वद ॥
श्रोतुकामा अमी पार्था ऋषयश्च तपोधना. ।
यज्वानो देवताः सर्वास्तथा देवा दिवि स्थिता ॥

भीष्म उवाच ।

शृणु पाण्डव वक्ष्यामि हरिभक्तिं सुदुर्लभाम् ।
श्रोतॄणा सर्वपापघ्नी वदता च युधिष्ठिर ॥
नारायणं जगद्योनिं सच्चिदानन्दविग्रहम् ।
यजस्व नरशार्दूल कृष्ण ब्रह्मस्वरूपिणम् ॥
रिपवस्तं न हिंसन्ति न बाधन्ते ग्रहाश्च तम् ।
राक्षसाश्च न खादन्ते ह्येनं कृष्णपरायणम् ॥
भक्तिर्दृढा भवेद्यस्य देवदेवे जनार्दने ।
श्रेयांसि तस्य सिध्यन्ति भक्तिमानधिकस्ततः ॥
तौ पादौ सफलौ पुंसा विष्णवायतनगामिनौ ।
तौ करौ भाग्यनिलयौ विष्णुपूजापरायणौ ॥
ते च नेत्रे महाभागे पश्यतो ये जनार्दनम् ।
सा जिह्वा प्रोच्यते सद्भिर्हरिनामपरायणा ॥
सत्यं सत्यं पुन सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैव केशवात्परम् ॥
सत्यं वच्मि हित वच्मि सारं वच्मि पुन. पुन ।
असारे दग्धसंसारे सारं यद्विष्णुपूजनम् ॥
सर्वभूतदयायुक्तो विष्णुपूजापरायणः ।
मातापित्रोश्च शुश्रूषुस्तस्य तुष्टो जनार्दन ॥
सत्कथाया च रमते सत्कथा च करोति य. ।
सत्यवाङ् निरहंकारस्तस्य प्रीतो रमापति. ॥
नामसंकीर्तन विष्णो क्षुतप्रस्खलनादिषु ।
करोति सततं पार्थ तस्य विष्णु· प्रसीदति ॥
या तु नारी पतिप्राणा पतिपूजापरायणा ।
तस्यास्तुष्टो जगन्नाथ कृष्णो लोकहिते रतः ॥
तस्माच्छृणुष्व कौन्तेय यजस्व सततं विभुम् ।
मा कुरु त्वमहंकारं विद्युल्लोला श्रियो यत ॥

—(L 147) G_1 महाप्राज्ञान्, G_1 M_1 ममाज्ञा वै (for मम ज्ञान) G(ed.) तद्भो वयैतान्वमैश (for ^{a}) —(L. 149) G(ed) कदाचिन्नास्ति वै भयम् (for ^{b}) —(L 152) G_2 सृष्ट्यन्तनाश (for °क त) G_2 प्रणिपत्य (for प्रणमय्य) G(ed.) सर्वस्य दातारमनीशमाद्य —(L 153) G(ed) भीष्मो नमस्कृत्य तदाब्रवीदिदम्

COLOPHON — *Mention of the Epic* : G_1 G(ed.) —*Sub-parvan* D_1 महाश्चर्यपर्व , G_1 M_1 G(ed) आश्चर्यपर्व — *Adhy. name* $G_{1, 2}$ M_1 शेषधर्मा , G(ed) श्रीकृष्णयुधिष्ठिरसवाद.. — *Adhy no* D_1 $G_{1, 2}$ M_1 G(ed) 1

(L 151) G(ed) गङ्गातनूभव श्रीमान् (for ^{a}). —(L 156) G_1 M_1 -धातारम् (for दा°). —(L 157) G_1 G(ed) जगत्प्रभुम् (for जगद्गुरुम्) —(L 158) D_1 धातार (for आधार) $G_{1, 2}$ G(ed) अकल्मषम् (for अशेषकम्). —(L 160) G_2 G(ed) धर्मवता (for °भृता). G(ed) वरम् (for प्रभुम्) G_1 ह्यर्थं ह्यर्थभृता वरम् (for ^{b}) —(L 161) G_1 कामं तं (for कामद). —(L. 162) G_1 कर्तारं (for °सौ) —(L 166) D_1 $G_{1, 2}$ G(ed) इम (for तस्माद्). —(L. 169) G_2 कुरु (for वद) —(L 170) G_1 G(ed) श्रोतुकामास्त्वमी पार्थ (for ^{a}) —(L 171) $G_{1, 2}$ M_1 G(ed) सर्वे (for सर्वास्) —(L 173) $G_{1, 2}$ M_2 G(ed) -पापघ्न (for °घ्नी) —(L 175) G_1 G(ed) राज (for नर-) D_1 $G_{1, 2}$ M_1 कृष्ण द्वन्द्वभीप्सितम् (G_1 °प्ससि) (for ^{b}) —(L. 177) G_1 G(ed) बाधन्ते (for खादन्ते) G_1 G(ed) [अ]मुं (for [ए]न) —(L 181) G_1 G(ed) हरि- (for विष्णु-). —(L 182) D_1 $G_{1, 2}$ M_1 पश्येते (for पश्यतो) —(L. 183) $G_{1, 2}$ विप्रैर् (for सद्भिर्) G(ed) विष्णु- (for हरि-). —(L 185) G(ed) प्रमाण नापरं वेदात् (for ^{a}) D_1 न देवः केशवात्पर (for ^{b}) —(L. 186) M_1 बुद्धिं (for सार). —(L 191) G(ed) सत्य- (for तस्य) D_1 तुष्टो (for प्रीतो) G_2 जनार्दन (for रमापति) —(L 193) G(ed) य. करोति सदा पार्थ (for ^{a}) —(L 195) $G_{1, 2}$ G(ed) तुष्टे (for तुष्टो) —(L 196) G(ed) यजध्व (for °स्व) G_2 यजध्व सततं हरिम् (for ^{b}). —(L. 197) D_1 G_1 कुरुध्वम् ; G_2 M_1

शरीरं मृत्युसंयुक्तं जीवितं चापि चञ्चलम् ।
बलाधिकैर्धनं ग्राह्यं संपदः क्षणभङ्गुराः ॥
तस्माद्भजस्व कौन्तेय पुण्डरीकाक्षमव्ययम् ॥
हे पार्थाः किं न जानीध्वमायुषोऽर्धं तु निद्रया ।
हृतं च भोजनाद्यैश्च कियदायुः समाहृतम् ॥
कियदायुर्बालभावात्कियदायुश्च वार्धकात् ।
कियद्विषयभोगैश्च कदा धर्मं करिष्यथ ॥
बालभावे च वृद्धत्वे न घटेताच्युतार्चनम् ।
वयस्येव च धर्मान्वै कुरुध्वमनहङ्कृताः ।
शरीरं रोगनिलयं मलाद्यैः परिदूषितम् ।
किमर्थं शाश्वतधिया पापं कुर्वन्ति मानवाः ॥
असारभूते संसारे नानादुःखसमन्विते ।
विश्वासो नात्र कर्तव्यो निश्चितं नाशमेष्यति ॥
शृणुध्वं पाण्डवश्रेष्ठाः सत्यमेव मयोच्यते ।
काय संनिहितापायः पूज्य एव जनार्दनः ॥
मानं त्यजथाहंकारं कामक्रोधादिसंयुतम् ।
यजध्वं सततं विष्णुं मानुष्यमतिदुर्लभम् ॥
कोटिजन्मसहस्रेषु स्थावरादिषु पाण्डव ।
संभ्रान्तस्य च मानुष्यं कथंचित्परिलभ्यते ॥
तत्रापि देवताबुद्धिर्दानबुद्धिश्च पाण्डव ।
भोगबुद्धिस्तदा नृणां जन्मान्तरतपःफलम् ॥
मानुष्यं दुर्लभं प्राप्य यो हरिं नार्चयेत्सकृत् ।
मूर्खः परतरः पार्थ कोऽन्यस्तस्मादचेतसः ॥
आराधितो जगन्नाथो ददात्यभिहितं फलम् ।
कस्तं न पूजयेद्विद्वान्समाराग्निप्रपीडितः ।
यस्मिंस्तुष्टे जगत्तुष्टं यतः सर्वगतो हरिः ॥
यथा हस्तिपदे सर्वं पादमात्रं प्रलीयते ।
आकाशेन यथा व्याप्तं जगत्स्थावरजङ्गमम् ।
तथैव हरिणा व्याप्तं जगत्स्थावरजङ्गमम् ॥
जनने मरणं पार्थ मरणे जन्मसाधनम् ।
उभे ते निकटे नृणां तन्नाशो हरिसेवया ।
ध्यातः स्मृतः पूजितो वा स्तुतो वा नमितोऽपि वा ।
संसारपाशविच्छेदी कस्तं न प्रतिपूजयेत् ।
यन्नामोच्चारणादेव महापातकनाशनम् ।
यं समभ्यर्च्य राजेन्द्र पदं मोक्षमवाप्स्यथ ॥
अहो चित्रमहो चित्रमहो चित्रं हि पाण्डव ।
हरिनाम्नि स्थिते लोके संसारे वर्तते पुनः ॥
यावन्नेन्द्रियवैकल्यं यावद्व्याधिर्न बाधते ।
तावदेवार्चयेन्नित्यं यदि मुक्तिरतो नृप ॥
भूयो भूयो हितं वच्मि भुजमुद्धृत्य पाण्डव ।
कृष्णोऽयं सर्वथा पूज्यो भुक्तिमुक्तिप्रदो नृणाम् ॥
क्रोधमूलं मनः पार्थ क्रोधः संसारसाधनम् ।
धर्मक्षयकरः क्रोधस्तस्मात्तं परिवर्जयेत् ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।

कृणुध्वम् (for कुरु त्वम्). G_2 विद्युल्लोला (for विद्युल्लोला). D_1 विद्धि लोला श्रिय यथा (for ^{b}). — D_1 om line 198. — (L. 199) D_1 G_1 बाध्य (for ग्राह्य). — (L 200) G_1 G(ed.) यजस्व (for भ°). — (L. 201) G(ed.) हे पार्थ किं न जानीषे (for ^{a}) — G_1 G(ed) om line 203. — (L 203) G_2 M_1 स(M_1 म)माहृतम् (for च वार्धकात्) — (L. 204) M_1 कर्म (for धर्म) G(ed.) चरिष्यासि (for करिष्यथ) — (L. 205) D_1 $G_{1,2}$ M_1 वार्धक्ये (for वृद्धत्वे). G_1 यौवने च (for न घटेत) — (L 206) $G_{1,2}$ G(ed.) [ए]व (for [इ]व). D_1 यौवने चैव धर्मान्वै (for ^{a}) — (L 207) M_1 भोग- (for रोग-). G_2 आपि (for परि-) G_1 -पूरितम् (for -दूषि°). — (L 208) D_1 सर्वदा (for मानवा) $G_{1,2}$ M_1 पाप कुरुत (M_1 °र्वन्तु) सर्वदा (for ^{b}). — (L 210) M_1 निश्चय (for निश्चित) G(ed) नाशो निश्चित एव हि (for ^{b}). — (L. 211) G(ed) शृणु त्वं पाण्डवश्रेष्ठ (for ^{a}) — After line 212^{a}, D_1 ins

16** सपदोऽपि च चञ्चला ।
यौवन क्षणविध्वंसि ·

G(ed.) इति निश्चिनु सर्वदा (for ^{b}) — (L 213) G(ed) त्यजन् (for त्यजथ) — (L 214) G(ed) यजस्व (for °ध्वं). D_1 G_2 M_1 कृष्णं (for विष्णु) G(ed) गतिरन्या न विद्यते (for ^{b}) — (L 217) G(ed) -भक्तिश् (for -बुद्धिश्) — (L. 218) $G_{1,2}$ G(ed.) योग- (for भोग-). D_1 G_2 M_1 -फलप्रदा (for -तप फलम्) — (L 220) G_1 स पतित· ; G(ed.) पापरत (for परतर) — (L 221) G_2 दद्याद् (for ददाति). G_1 G(ed) [अ]भिमत (for °हित) — (L 222) D_1 G_2 -प्रदीपित·, M_1 -प्रतापित (for -प्रपीडित) — (L. 223) D_1 M_1 सर्वमयो (for °गतो) — (L 224) G_1 G(ed) पदमात्र तु लीयते (for ^{b}) — For line 226, G(ed) subst

17** तथा व्याप्त भगवता विष्णुना प्रभविष्णुना ।

— (L 227) G(ed) मरणे जनन तथा (for ^{b}). — (L. 228) G(ed) उभे ते सन्निकृष्टे हि (for ^{a}) D_1 ते नष्टे (for तन्नाशो) — (L 229) D_1 ज्ञात (for ध्यात·). G(ed.) स्तुत (for स्मृत·) M_1 कीर्तितो (for पूजितो) D_1 ध्यातो वा ; G_1 दृष्टो वा, M_1 पूजितो (for स्तुतो वा). G(ed.) दृष्टो वा स स्मृतोऽपि वा (for ^{b}) — (L. 230) G_1 M_1 -दूर (for -पाश-). D_1 -विच्छेत्ता (for °दी) G(ed) य· क्षणाद्भवविच्छेदी (for ^{a}). G(ed) देवं न (for न प्रति-) — (L 231) D_1 यन्नामस्मरणादेव (for ^{a}) — For lines 231–232, G(ed.) subst. .

18** प्रायश्चित्त भवेत्तस्य कर्मलोपे सदा नृणाम् ।
तमर्चय महाबाहो मनोवाक्कायकर्मभिः ॥

— (L 234) G_2 G(ed) लोके (for लोक·). G(ed) संसारो (for °रे). — (L 235) D_1 G_2 M_1 बाध्यते (for बाधते). — (L 236) G_1 [अ]र्चेन (for [अ]र्चयेन्). G(ed.) तावदेवार्चनीयो हि (for ^{a}) G(ed) सम्यग्योगेश्वरेश्वर (for ^{b}). — (L. 238) M_1 G(ed.) सर्वदा (for °था). G_2 -मुक्तिप्रदं

तस्मात्तदेव मंयोज्य तस्मिन्कृष्णे सुखी भव ॥
अनाराध्य जगन्नाथं सर्वकामफलप्रदम् ।
संसारसागरे मग्ना· कथं पारं गमिष्यथ ॥
अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगा· सत्यं सत्यं वदाम्यहम् ॥
हरिश्रद्धावतां पुंसां न सुतैर्नापि बान्धवै· ।
तस्माच्च सर्वदेवेशे भक्ति कुरुत पाण्डवा ॥
बन्धुमत्व धनाढ्यत्वं पुत्रवत्वं च पाण्डव ।
विष्णुभक्तिमतां नृणा भवेज्जन्मनि जन्मनि ॥
इहामुत्रफलं लिप्सु· पूजयेत्सततं हरि. ।
इहामुत्रफलं नेच्छन्परनिन्दापरो भवेत् ॥
न नमेद्विष्णवे यस्य शरीरं कर्मभेदिने ।
पापानामाकरं तद्धि ज्ञेयं कुरुकुलोत्तम ॥
तस्माच्छृणुत राजेन्द्र हरिभक्तिपरायणाः ।
श्रेष्ठा. सर्वत्र विख्याता ह्यतो भक्ति सुदुर्लभा ॥
असूयारहिता ये च विप्रत्राणपरायणा ।
कामादिरहिता ये च तेषां तुष्यति केशव ॥
तस्मात्संसारतप्तानां हरिरेव परा गति· ।
यन्नामश्रवणादेव प्रयाति परमं पदम् ॥
यादवेन्द्रमसुं विद्धि कृष्णं लोकेश्वरं हरिम् ।
अस्य प्रसादात्ते सर्वं भविष्यति न संशय· ॥
स्रष्टा पालयिता हन्ता कृष्णो हि जगतीपति ।
अस्माद्वै सकलान्धर्मान्छृणुष्व च सुखी भव ॥

वैशंपायन उवाच ।

इति देवव्रतेनोक्तं निशम्य कुरुनन्दन· ।
संतुष्टमानसो भूत्वा श्रोतुकामोऽभवत्तदा ॥
य इदं कीर्तयेन्नित्यं पुण्यं पापप्रणाशनम् ।
हरिभक्तिकरं नृणां स्मृतानामघनाशनम् ।
ब्राह्मणानां समाजे च तथा विष्ण्वालये पठेत् ।
परं विमानमारूढो विष्णुलोकं स गच्छति ॥

Colophon.

वैशंपायन उवाच ।

एवं प्रबोधितस्तेन भागीरथ्यात्मजेन वै ।
धर्मपुत्रो महाप्राज्ञो यादवेन्द्रमभाषत ॥

युधिष्ठिर उवाच ।

देवदेवारविन्दाक्ष मायातीत जगत्पते ।
त्वद्भक्ति शाश्वती मेऽस्तु तथा मोक्षो भवेद्ध्रुवम् ॥
राज्यभ्रष्टा वयं सर्वे त्वत्पादकमलं गता ।
पाह्यस्मान्पुण्डरीकाक्ष धर्मशास्त्रोपदेशत· ॥
त्वा धर्मं सत्यमित्याहु सर्वशास्त्रविशारदाः ।
प्राणभूतं मनुष्याणां जन्तूनामपि सर्वश· ॥
त्वमेव बन्धुश्च गुरुस्त्वमेव
त्वमेव विद्या द्रविणं त्वमेव ।
त्वमेव माता च पिता त्वमेव
त्वमेव साक्षान्मम जीवितं च ॥
बलानि सर्वाणि तुरंगमाद्या
नागा रथा शास्त्रभृत. सुहृच्च ।
सर्वं च राष्ट्रा गिरिदुर्गमाश्च
कृपास्ति चेत्सन्ति तथैव नाथ ॥
त्वदाज्ञां किं नु लङ्घेयमहमव्यय मुक्तिद ।

(for °द्दो). — (L 239) D_1 क्रोधो मूलमनर्थाना (for ^{a}). G_2 M_1 कारणम् (for -साधनम्) — (L 243) G_1 -लोक-, G(ed) -कर्म- (for -काम-) — (L 247) G_2 नयनैर्, M_1 न धर्न (for न सुतैर्). D_1 नयनैर्न च बान्धवै (for ^{b}). — For line 247, G(ed) subst

19** हरिभक्त्या जिता लोका जितं सर्वं तथैव हि ।

— (L 251) G_2 ईप्सु (for लिप्सु·). — After line 251, G(ed) ins

20** ध्यायेच्च संस्मरेच्चैव सर्वसिद्धिर्भवेद्ध्रुवम् ॥

— G(ed.) om. line 252. — (L. 253) G_1 G(ed.) शरीर सर्व(G_1 काम)दायिने (for ^{b}) — (L 254) D_1 विद्धि (for तद्धि) D_1 सोऽय कुरुकुलोद्वह, M_1 विज्ञेय कुरुकुलोद्वह (hypermetric), G(ed.) ज्ञेय मलकरण्डकम् (for ^{b}) — G(ed) om. lines 255–257 G_2 om lines 257^b–858^a — (L 260) D_1 सयाति, G(ed) प्राप्यते (for प्रयाति) G_2 प्रयाति परमा गतिम् (for ^{b}). — (L 261) G_1 G(ed) विष्णु (for विद्धि) G_2 योगेश्वर (for लोके°). G_1 G(ed.) प्रभुम् (for हरिम्). — (L. 263) D_1 विष्णुर् (for कृष्णो). — After line 263, G(ed) ins. :

21** अस्मात्परतर नास्ति सत्य सत्य वदाम्यहम् ॥

— G(ed) om line 264 —(L 268) G(ed) सर्वपापप्रणाशनम् (for ^{b}) — (L. 270) G(ed) वर (for पर) — After line 270, G(ed) ins

22** सर्वदा संस्मरेद्यस्तु वासुदेव रमापतिम् ।
सर्वबन्धविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

COLOPHON — *Sub parvan* D_1 G_1 G(ed) आश्चर्यपर्व ; G_2 भाविष्यपर्व — *Adhy name* G_1 हरिभक्तिकथनम्, M_1 शेषधर्मा·, G(ed) शातनवप्रतिपादितहरिभक्तिमाहात्म्यकथनम्. — *Adhy no* D_1 $G_{1,1}$ M_1 G(ed.) 2

G_1 om. the ref G(ed) धर्मराज (for युधिष्ठिर) — (L. 273) $G_{1,2}$ G(ed) महामते (for जगत्पते) — (L. 275) G_1 राज्याद्भ्रष्टा (for राज्यभ्रष्टा) — G(ed) om lines 277–288 — (L 277) G_2 M_1 सर्व- (for धर्म-) — After line 277, G_2 ins

23** त्वा धर्मसत्यमित्याहु सर्वशास्त्रविशारदम् ।

— (L 282) D_1 (marg.) त्वमेव सर्वं मम देवदेव — (L. 285) D_1 -दुर्गकाश् (for °माश्) — (L 286) D_1 तवैव नान्यथा (for तथैव नाथ). — (L 287) D_1 मुक्तिदाम् (for

किमर्थं पुण्डरीकाक्ष कटाक्षैरपि नेक्षसे ॥
रक्ष मां देवदेवेश धर्मेण जगदीश्वर ॥
श्रीकामो यो हि योगीन्द्र यद्दत्त्वा विन्दते श्रियम् ।
प्राप्नोति विपुलान्कामान्रक्ष रक्ष महामते ॥
त्वया नाविदितं किंचित्त्रिषु लोकेषु सुव्रत ।
सर्वान्धर्मान्ममाचक्ष्व कृपा मयि तवास्ति चेत् ॥
सुव्रतानि च सर्वाणि तीर्थानि च विशेषतः ।
धर्माधर्माणि सर्वाणि क्षेत्राणि फलवन्ति च ।
धर्मानन्यान्ममाचक्ष्व देवदेव नमोऽस्तु ते ॥
इत्युक्त्वा योगिनां नाथं कृष्णं कमललोचनम् ।
धर्मपुत्रो महाप्राज्ञस्तूष्णीमास्ते सतां प्रियः ॥
तस्य चित्तं समाज्ञाय ऋषीणामग्रजन्मनाम् ।
प्रोवाच वचनं धीमान्धर्मश्रवणमिच्छताम् ॥

श्रीभगवानुवाच ।

साधु साधु महाप्राज्ञ मतिस्ते विमलोज्ज्वला ।
यस्माद्धर्मे सदा भक्तिर्वर्तते तव सुव्रत ॥
धर्मे श्रुते सदा भक्त्या मनुजैर्मनुजेश्वर ।
प्रापयन्ते सदा साधूञ्छ्रोतॄन्वै धर्मतत्परान् ॥
शृणु पाण्डव वक्ष्यामि दानानामुत्तमं वरम् ।
भूमिदान वरं ज्ञेयं भुक्तिमुक्तिफलप्रदम् ॥
भूमिदानात्तु सर्वाणि संभवन्ति न संशयः ।
तस्माद्भूमिप्रदो राजन्सर्वदः प्रोच्यते बुधैः ॥
भूमिं सर्वगुणोपेतां यो दद्यात्सस्यशालिनीम् ।
न तस्य लोकाः क्षीयन्ते यावदाचन्द्रतारकम् ॥
अग्निष्टोमादिभिर्यज्ञैरिष्ट्वापि बहुदक्षिणैः ।
न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते ॥
तपस्विनोऽथ यज्वान सत्यवन्तो बहुश्रुताः ।
गुरुदेवरताश्चैव नातिक्रामन्ति भूमिदम् ॥
दिवि देवाः प्रशंसन्ति सिद्धाश्च परमर्षयः ।
भूमिदानं प्रशंसन्ति तस्माद्भूमिप्रदो वर ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
श्रोतॄणां सर्वपापघ्नमायुरारोग्यवर्धनम् ॥
पुरा कृतयुगे राजन्ब्राह्मणो योगभूषणः ।
सर्ववेदार्थतत्त्वज्ञः सदा दान्तश्च शीलवान् ॥
अध्यात्मविद्यानिरतो निर्धनो ब्रह्मवित्तम ।
निष्किंचनत्वात्सुभृशं बाध्यते चानिशं सुतैः ।
तथापि मन्युं न प्राप शून्यजन्मान्तरप्रदः ॥
कदाचिद्वैश्वदेवान्ते बलिं दत्त्वा गृहाङ्गणे ।
आयान्तं तं द्विजं प्राह कल्याणी तत्प्रिया सती ॥
एते तवात्मजा नाथ क्षुधिताः पतिता भुवि ।
लुठन्ति भृशदुःखार्ता रुदन्तो रोदयन्ति माम् ॥
त्वं निरीक्षयसे नैताञ्जठराग्निप्रपीडितान् ।
अशक्ता रक्षणे चैषां किं करोमि च तद्वद ॥
पानीयमेव पीत्वाहं वर्तेयं शाकमेव वा ।
त्वद्भुक्तशेषं भुञ्जन्ति ह्येते वै तव सूनवः ॥
पुत्रग्राहसमायुक्तां पतिधिक्कारशङ्किनीम् ।

°द) — (L 288) D_1 G_1 २ किमह (for किमर्थं) — After line 289, G(ed.) ins

24** श्रीकामस्तुष्टिकामो वा पुष्टिकामोऽथ वा नरः ।
यजते श्रद्धया यस्तु ता ता प्राप्नोत्यसंशयम् ॥

— G(ed) om lines 290–291 — (L 291) D_1 तान्वदस्व, M_1 तद्वदस्व (for रक्ष रक्ष). — (L 292) D_1 विद्यते (for सुव्रत) — D_1 om (hapl) line 294^{b} — (L 296) G_1 M_1 G(ed) सर्वान् (for धर्मान्) — After line 296, G (ed) ins.

25** त्वद्भक्तिरचला मेऽस्तु सर्वाघौघविनाशिनी ॥
त्वमेव स्रष्टासि चराचराणा
त्वं सर्वगोप्तासि जनार्दनस्त्वम् ।
त्व रुद्ररूपोऽसि विनाशहेतु-
स्त्रिमूर्तरूपाय नमो नमस्ते ॥

— Before line 297, D_1 M_1 ins वैशपायन — (L 297) G_2 जगता (for योगिना) — (L 298) G_2 महातेजास् (for °प्राज्ञस्) M_1 आसीत् (for आस्ते) G(ed) तूष्णीभूतोऽभवत्सदा (for ^{b}) — (L 299) G(ed) ऋषीणामुग्रतेजसाम् (for ^{b}) — (L 300) G_1 श्रीमान् (for धी°) — (L 301) G(ed.) मतिस्ते साधुसमना (for ^{b}) — (L 303) G_1 G(ed.) धर्म श्रुत (for धर्मे श्रुते) D_1 मनुजाधिप (for °जेश्वर) — (L 304) G_2 G(ed.) स प्राप यदि तान्साधून् (for ^{a}). G(ed.) मत्पादसलिलं यथा (for ^{b}) — (L 305) G(ed) दानानामुत्तमोत्तमम् (for ^{b}) — After line 305, G(ed) ins

26** सर्वेषामेव भूताना भुक्तिमुक्तिफलप्रदम् ।
भूमिर्विश्वभरा धात्री वसुधेति च कथ्यते ॥

— (L 306) D_1 G_1 भूदान परम ज्ञेय (for ^{a}) — G(ed) om. line 307. — (L 309) G_2 यो दद्याद्धान्यमालिनीम् (for ^{b}). — (L. 311) G_2 इष्ट्वा बहुसुवर्णकै , M_1 इष्ट्वा बहुलदक्षिणै (for ^{b}) — After line 313, G(ed) ins. .

27** भूमिदातृफलाशाशकला नैव भजन्ति ते ॥

— G(ed) om line 314 — After line 315, G(ed.) ins

28** भूदानादेव देवत्व लब्धमित्यहो ॥

— G(ed) om line 316 — (L. 316) G_1 भूदान सं- (for भूमिदान) — (L 320) D_1 सर्वदा दानशीलवान् (for ^{b}). — (L. 321) D_1 -सेवी च (for -निरतो). G_2 अध्यात्मविद्या वर्तेत , M_1 °विद्या वृत्तिश्च (for ^{a}) — (L 322) G_1 G(ed.) स भृश (for सु°). — (L 323) G_2 आन्त्य- (for शून्य-). G(ed) ज्ञात्वा तान्स्वकृत द्विज (for ^{b}). — (L 325) D_1 आचान्त (for आयान्त) — (L 326) G(ed) त्वदात्मजा (for तवा°). G_2 एते तव सुता. सर्वे (for ^{b}). — (L. 327) G_1 G(ed.) भूरि- (for भृश-) — (L. 328) G_2 स त्त निरी-

दारिद्र्यवारिधौ मग्नां धिङ् मां निर्घृणवल्लभाम् ॥
अन्या गृहिण्यस्तिष्ठन्ति निष्कण्ठ्यो धनान्विता ।
वर्तन्ते गोधनैश्चान्या धान्यैर्माहिषिकै परा ।
दीर्घशृङ्गैरनडुद्भि. शकटैर्दासिभि परा ॥
दासैः परिकरैः क्षेत्रैर्बन्धुभि सहिता परे ।
मादृश्यो नैव दृश्यन्ते त्वादृशा गृहमेधिन ।
आत्मजा इव दृश्यन्ते कुत्रचिन्न च दु खिता ॥
एवमुक्त्वा तदा चण्डी जठरं प्रत्यताडयत् ।
प्रकीर्य कबरी चण्डी मुसलेन शिरोऽहनत् ॥
आक्रोशन्ती रुदन्तीं तामात्मजै परिवेष्टिताम् ।
आश्वास्य धीमान्विप्रेन्द्र इद वचनमब्रवीत् ॥
किमर्थं कोपसंयुक्ता भद्रे रोदिषि कोपने ।
न ह्यसंचितपुण्यानामेकं शोकं हि शोभने ॥
सत्पात्रे ये प्रयच्छन्ति स्वल्पामपि वसुंधराम् ।
ते नेक्षन्ते ह्यलक्ष्मी च दु खां नरकयातनाम् ॥
तस्मात्किं शोचसे मूढे यत्कृतं तत्प्रभुज्यते ।
त्वया मया च यत्किंचिन्न दत्तं पूर्वजन्मनि ॥
मासमात्र क्षमस्व त्वं पुत्रान्सरक्ष शोभने ।
आहरिष्ये श्रिय गेहे तपसा साधु रम्यताम् ॥
आश्वास्य धीमान्विप्रेन्द्रस्तपसे कृतनिश्चय ।
श्लोकमेकं जगौ सारं सत्यवाक्प्रियदर्शन ॥
दारिद्र्याय नमस्तुभ्य सिद्धोऽहं त्वत्प्रसादत ।
अह तु सर्वान्पश्यामि मां च कोऽपि न पश्यति ॥
इत्युक्त्वा सोऽपि विप्रेन्द्रो जगाम तपसे वनम् ।
तत्र चाग्निं प्रतिष्ठाप्य चचार तप उत्तमम् ॥

ग्रीष्मे पञ्चाग्निमध्यस्थो वायुभक्षो जितेन्द्रियः ।
निरुध्य हृदये वायुमात्माकाशं समागत ।
बाह्यस्थान्विषयान्किंचिन्न विवेद स योगवित् ॥
शङ्खचक्रगदापाणि खड्गशार्ङ्गधरं शुभम् ।
कौस्तुभेन विराजन्तं श्रीवत्साङ्कितवक्षसम् ॥
पीताम्बरधर देव वनमालाविराजितम् ।
कालमेघनिभ देवं विद्युच्चञ्चललोचनम् ॥
ध्यायन्स्तुवन्नमस्यंश्च मनसा कृतनिश्चय ।
मद्भक्तो भारतश्रेष्ठ तस्मिन्नाम्ने तपोवने ॥
सुरैस्तु तत्तपोद्विग्नै रम्भामेनादिभि कृतम् ।
तपोविघ्नं कुरुश्रेष्ठ यद्यत्तन्न च वेद सः ॥
पक्षमात्रं गते तस्मिन्ब्रह्मनाडीसमुद्भव. ।
ददाह पावको लोकान्संत्रस्ता ससुरासुरा ॥
ततो देवपतिर्भीतो ब्राह्मणोद्योगशङ्कया ।
ब्रह्मलोक ययौ देवैर्दिक्पालै सह धर्मज ॥
तुष्टाव देव लोकानामीश्वरं प्रपितामहम् ।
नत्वा पूर्वमपूर्वार्थं नत्वा पूर्वमरिदम ॥

देव उवाच ।

नमो विश्वाय देवाय ईश्वराय कपर्दिने ।
शभवे ब्रह्मणे तुभ्य मायिने विष्णुरूपिणे ॥
देवाय देवरूपाय वेदान्ताय नमो नम ।
सर्वज्ञाय स्वरूपाय पुराणाय नमो नम ॥
यमाय यमरूपाय धर्मरूपाय ते नम ।
मृत्यवे शत्रुरूपाय नमस्ते जलमूर्तये ॥

क्षसे नैतान् (for ^{a}) D_1 G_2 M_2 पति(D_1 पीडि)ताज्ञाठराग्निना (G_2 °पु) (for ^{b}).— (L 332) $G_{1\ 2}$ M_1 G(ed) ह्यति- (M_1 वर)धिक्कारभङ्गिनी (for ^{b}) — (L 335) G_2 [अ]न्यैर् (for [अ]न्या) G_1 G(ed) वर्त(G_1 °र्ध)न्ते गोधनाश्वाद्यैर् (for ^{a}) G_1 G(ed) धान्यैर्माहिषिकादिभि (for ^{b}) — (L 336) G_1(ed) अनडुहै (for °ड्भि). D_1 सगुणैश्च सुरूपेण (for ^{a}). G_1 G(ed) शकटैर्दासिकादिभि (for ^{b}) — (L 338) D_1 G(ed) मादृशा (for °श्यो) — (L 339) G(ed) अपि (for इव) G(ed) कुताश्चिन् (for कुत्रचिन्) —(L 340) G(ed) तु सा (for तदा). G_1 उदर (for जठर) G(ed) रुरोद भृशदु खिता (for ^{b}) — (L 341) G(ed) स्वस्य (for चण्डी). — (L 342) G_2 G(ed) लुठन्ती (for रुदन्ती) — (L 344) G_1 किमर्थं शोकसंतप्ता , G_2 G(ed) °र्थं शोकसंयुक्ते (G_2 °क्तां) (for ^{a}) — (L 345) D_1 शोको , M_1 कोप (for शोकं) G(ed) ऋद्धिर्भवति शाश्वती (for ^{b}) — (L 347) G_2 [अ]लक्ष्मं (for °क्ष्मी) — (L 348) G(ed) यत्कृत (for °तं) — (L 350) G(ed) कंचित्काल (for मासमात्रं) — (L 351) G(ed) पश्य माम् (for रम्यताम्) G_2 तपसा साधुरुध्यताम् (for ^{b}) — (L 352) G(ed.) [ए]व स (for धीमान्) — (L 359) G_2 M_1 वायन् (for वायु). — (L. 364) G_2 विद्युच्चपल-, M_1 °उज्ज्वलित- (for °चञ्चल) — After line 365, G(ed) ins

29** चचार स तपो घोर दुष्कर सर्वमानवै ।

— (L 367) G(ed.) सुरैस्तत्तपसोद्विग्नै (for ^{a}) — (L. 368) G_1 मद्भक्तो न विवेद च (for ^{b}) — (L 369) D_1 क्षणमात्रं (for पक्ष°) G(ed) एव तपस्यतस्तस्य (for ^{a}) — (L 370) D_1 सत्रस्ता. सासुरा सुरा , G_1 G(ed) °स्ता सुरसत्तमा (for ^{b}) — (L 371) D_1 G_2 M_1 ब्राह्मणान्भोगसक्षयात (G_2 °शङ्कया), G(ed) ब्राह्मण मनसा स्मरन् (for ^{b}) — (L 372) D_1 गतो (for ययौ) — (L 373) D_1 सर्वे (for देव). — (L 374) G_1 M_1 अपूर्वार्थैर् (for °र्थं) — For lines 373–374, G(ed) subst

30** तुष्टाव देवराजोऽसौ ब्रह्माण पद्मसभवम् ।
तेन सार्धं तदा देवास्तुष्टुवुर्विविधैः स्तवै ।

— G_1 om the ref. — (L 377) D_1 वेदाय (for देवाय). G_1 G(ed) वेदाय वेदरूपाय (for ^{a}) — After line 377, D_1 ins

31** मन्त्राणा पतये तुभ्य व्रताना पतये नम ।

— (L 378) G_1 सर्वयज्ञ- (for सर्वज्ञाय) G(ed.) नमस्तुभ्य (for स्वरूपाय). G(ed) भास्कराय (for पुराणाय). — (L. 379)

नम॰ पङ्कजनेत्राय हिरण्यपतये नम ।
सर्वोपनिषदर्थाय वेदानां पतये नम ॥
क्रतूना पतये तुभ्यं व्रतानां पतये नम ।
हिरण्यरेतसे तुभ्य वेदराशे नमोऽस्तु ते ॥
आर्तानां दु खनाशाय देवानां प्रपितामह ।
करोषि यत्नं देवेश भूयो भूयो नमोऽस्तु ते ॥

ब्रह्मोवाच ।

अहो हि भगवान्विष्णुरन्तर्यामी जगद्गुरुः ।
महाविष्णु प्रसन्नात्मा कर्मणां फलदायकः ॥
तमृते पुण्डरीकाक्षं सर्गस्थित्यन्तकारिणम् ।
कर्मणां फलदाता हि कः समर्थो महीतले ॥
तमेव शरणं गत्वा ते सर्वे सर्वतोमुखम् ।
प्रार्थयामो वयं देवा इति चिन्तापरोऽभवत् ॥
तस्मिंश्चिन्ताकुले पार्थ प्रविष्टो भगवान्हरि ।
चोदयामास तद्वृत्तं फलं तस्मै न्यवेदयत् ॥
ततो हर्षाकुलो ब्रह्मा कृपया मुरवैरिण॰ ॥
प्रत्युवाच च तान्देवाञ्शतक्रतुपुरोगमान् ॥
मा भैषीर्देवराज त्वं स्तोत्रेण परितोषित ।
ददातु भगवान्विष्णुर्यद्यच्चेतसि वर्तते ॥

इन्द्र उवाच ।

तपसा योगभूषस्य सतप्तं हि जगत्त्रयम् ।
तस्य चित्तगतं कामं ज्ञात्वा चेष्टं ददस्व ह ॥

वैशंपायन उवाच ।

तथेति ब्रह्मा सर्वात्मा दैवै सार्धमरिंदम ।
तं देशमगमद्विद्वान्वरं दातुं महात्मने ॥
तपश्चरन्तं विप्रेन्द्र संप्रेक्ष्य च पितामह ।
पिधाय ब्रह्मनाडीं तामिद वचनमब्रवीत् ॥
योगभूषण महाक्यं तपसा तोषित. शृणु ।
वरं वरय भद्रं ते ब्रह्माणं विद्धि मामिह ॥
निवृत्तयोगो विप्रेन्द्रो विस्मयोत्फुल्ललोचन ।
बद्धाञ्जलिर्नमस्कृत्य वचनं चेदमब्रवीत् ॥
ऐश्वर्यं देहि मे ब्रह्मन्दारिद्र्यान्मृशदु खितः ।
अष्टैश्वर्यं ददस्व त्वमन्यापेक्षा यथा न मे ॥

ब्रह्मोवाच ।

तथास्तु ब्राह्मणश्रेष्ठ मद्दत्तां द्रव्यसंपदम् ।
ब्राह्मणेभ्यो ददस्व त्वं भूयो वृद्धिमवाप्स्यसि ॥
इत्युक्त्वान्तर्दधे देवो देवैः सार्धं पितामह ।
स्वपुर प्राप्तवान्राजन्ब्राह्मणश्च गृहं गत. ॥

Colophon

युधिष्ठिर उवाच ।

संप्राप्तश्रीर्द्विजवरः किं चकार गृहे स्वके ।
तत्सर्वं वद तत्त्वेन देवदेव जगत्पते ॥

G1 धर्माय धर्मरूपाय (for ᵃ) — (L. 380) G1 G(ed) शत- ; G2 शान्त- , M1 ऽशत्रु- (for शत्रु-). G(ed) मूल (for जल-) —After line 380, M1 ins

32** सर्वज्ञाय स्वरूपाय पुराणाय नमो नम. ।

— (L. 382) G(ed) देवाना (for वेदानां) — D1 om. line 383 — (L. 383) M1 पशूनां (for क्रतूना). — (L. 384) D1 M1 हिरण्यरिपवे , G1 2 °पतये (for °रेतसे) G1 नम॰ (for ऽस्तु ते) M1 देवेशाय नमो नमः (for ᵇ). — (L. 385) G(ed.) देवानां पतये नम॰ (for ᵇ) — (L 386) D1 कुरुष्व (for करोषि). G1 कुरुष्व यत्नं भूतेश ; G(ed) पाह्यस्मान्सर्वलोकेश (for ᵃ) D1 M1 नम (for ऽस्तु ते). — (L 387) G1 G(ed) जगन्मय (for °द्गुरु॰). — (L 390) G(ed.) जगत्त्रये (for महीतले). — For lines 391-392, G(ed) subst :

33** तस्मात्तमेव शरण गच्छामो वयमञ्जसा ।
इत्युक्त्वा स सुरै सार्धं विष्णुमेवान्वचिन्तयत् ॥

— (L 393) G1 प्राप्ते (for पार्थ). G(ed) तस्मिन्ध्यानपरे तत्र (for ᵃ). — (L 394) G1 M1 तच्चित्त (for तद्वृत्त) D1 M1 निवेद्य च (for न्यवेदयत्) G1 फलमस्मै निवेदय (for ᵇ) — For line 394, G(ed) subst

34** तत्र सचोदयामास सर्वं कुर्विति त तदा ।

— (L 395) G(ed) सुर- (for मुर-). — (L 396) G1 2 M1 ततो ; G(ed) स तान् (for च तान्).— (L. 397) G(ed) स्तोत्रैर्वै. (for स्तोत्रेण). — (L. 398) G(ed) मामेवाज्ञापयद्विष्णुर् (for ᵃ). D1 यथा (for यद्यच्). — G1 M1 om. the ref

— (L. 400) G(ed.) [अ]भीष्ट (for चेष्टं) — (L. 401) G1 G(ed) वेधा (for ब्रह्मा) M1 तथेति ब्रह्मणा सर्व- (for ᵃ). — (L 402) G(ed.) शीघ्राद् (for विद्वान्) — (L 404) D1 विहाय (for पिधाय) G1 -नाडीकाम् , G(ed) -नाडीं स (for -नाडीं ताम) — (L 405) G1 तोषित (for °तः). — For line 405, G(ed) subst

35** योगभूषण तुष्टोऽस्मि तपसा ते तपोनिधे ।

— (L 406) G(ed) मा भैषीर्मम सन्निधौ (for ᵇ). — Before line 409, G(ed.) ins योगभूषण . — After line 409ᵃ, G(ed) ins

36** यदि प्रीतो मयि ध्रुवम् ।
दारिद्र्यादहमत्युग्रात्पीडितोऽस्मि पितामह ॥

— (L 410) D1 M1 अत्यैश्वय (for अष्टै°). G2 G(ed) दद सत्यम् (for ददस्व त्वम). D1 न मे भवेत् (for यथा न मे). — (L 411) D1 मद्दत्तद्रव्यसपदाम् ; G1 दत्त दिव्यस्य संपदः ; M1 मद्दत्ता दिव्यसपद॰ , G(ed) तव दत्ता हि सपद॰ (for ᵇ). — For line 412, G(ed) subst :

37** तद्वृद्धिर्भवता कार्या ब्राह्मणेषु समर्पणात् ॥

— (L 414) M1 दिव (for गृहं) — For line 414, G(ed.) subst :

38** ततो जगाम स्व लोकं ब्राह्मणोऽपि गृहं गतः ॥

Colophon — *Sub-parvan* : D1 आश्चर्यपर्व ; G1 2 भविष्यपर्व . — *Adhy. name* : G1 भूदानप्रशंसनम् , G(ed) भूदानमाहात्म्यवर्णनम् . — *Adhy. no.* : D1 G1. 2 M1 G(ed.) 3.

श्रीभगवानुवाच ।

ब्राह्मणेऽभ्यागते तस्मिन्वरादानसमुत्सके ।
हेमप्राकारनिचयं हेमतोरणमण्डितम् ।
शरच्चन्द्रनिभै सौधै क्रीडाशालैर्विराजितम् ॥
दीर्घिकाभिर्विचित्राभिश्चन्द्रोपलविनिर्मितैः ।
दासीभिर्दासवर्गैश्च सेवकैश्च पुरोहितै ।
रमणीयं गृहं दृष्ट्वा मुदमाप द्विजोत्तम ॥
समागतं द्विजं ज्ञात्वा कल्याणी तत्प्रिया सती ।
नीराजनपुरोगाभि कामिनीभि पुरो दधे ॥
निष्ककण्ठी स्वकां भार्यां काञ्चीदामविभूषिताम् ।
मुक्तादामविचित्राङ्गी कर्णपत्रविराजिताम् ॥
वज्रवैडूर्यवलयैरङ्गदैरुपशोभिताम् ।
एवंभूतां विचित्राङ्गी दृष्ट्वा विस्मयमागत ॥
गृहं विवेश धर्मात्मा सत्यवाग्विजितेन्द्रिय ।
चित्रैर्विषयभोगैश्च ह्यनुभूय द्विजोत्तम ।
उपविष्टा स्वका भार्यां वचनं चेदमब्रवीत् ॥
मद्वाक्यं श्रूयतां भद्रे धर्मे बुद्धिं सदा कुरु ।
अन्नदानमहोरात्र ब्राह्मणानां ददस्व ह ॥
मया कृतानां धर्माणामानुकूल्यं सदा कुरु ।
प्रातिकूल्येन न श्रेय सर्वं वै नाशमेष्यति ॥
पतिवाक्यमिदं श्रुत्वा ब्राह्मणी क्रोधमूर्छिता ।
रक्ताक्षी भीमवदना वचनं चेदमब्रवीत् ॥
न दास्ये किंचिद्विप्राणा बन्धूनां च विशेषतः ।
पुत्रान्संप्रति वर्धिष्ये पुत्रा एव परा गतिः ॥
को वा बन्धुजनो नाथ मां पूर्वं प्रत्यपालयत् ।
भवन्तमात्मजान्वापि तं वदस्व महामते ॥
मूढवत्प्रतिभासि त्वं भवानद्य हि धर्मकृत् ।
भुक्त्वा गृहे मदीये तु तूष्णीं तिष्ठ मदाज्ञया ॥
इत्युक्त्वा सा मदोन्मत्ता निपीड्य करसंपुटम् ।
आगतानतिथीन्बन्धून्भर्त्सयामास सत्वरम् ॥
यथाकामं स्वयं भुक्त्वा पतिवाक्यविरोधिनी ।
विनिन्दन्ती स्वकान्बन्धूनास्ते तत्र गृहोत्तमे ॥
ब्राह्मणावज्ञया चैव बन्धूनां परिवर्जनात् ।
क्षय प्रयाता धर्मात्मन्दग्धारण्यमिव ध्रुवम् ॥
नष्टश्रियं तदा दृष्ट्वा सर्वशास्त्रार्थतत्त्ववित् ।
सर्वनीतिमयी प्राज्ञ इमा गीतिमगायत ॥
    वश्या सुता वृत्तकरी च विद्या
        नीरोगता सज्जनसंगतिश्च ।
    इष्टा च भार्या वशवर्तिनी च
        दुःखस्य मूलोद्धरणानि पञ्च ॥
अनुकूला प्रिया भार्या यस्य नास्ति कुटुम्बिन. ।
अरण्यं तेन गन्तव्यं यथारण्य तथा गृहम् ॥
धर्मविघ्नकरी भार्या यस्य तिष्ठति मन्दिरे ।
मर्तव्यं तेन विदुषा न चेद्दुःखोदधिं व्रजेत् ॥
अभ्युन्नतपदारूढ पूज्यान्नैवावमानयेत् ।
नहुष शक्रतां प्राप्य च्युतोऽगस्त्यावमानत ॥
इत्युक्त्वा ब्राह्मणश्रेष्ठ स्वकां पत्नीमभाषत ।
त्वया कृतमिदं दोष पश्य मूर्खे फलं त्विदम् ।
गृहं दग्धं विशेषेण चौरैरपहृतं धनम् ॥
अनाकर्ण्य तु मद्वाक्यमास्ये भस्म न्यनिष्पतत् ।
तत्फलं भुङ्क्ष्व यास्यामि अत्र स्थातुं न शक्यते ॥
पतिवाक्य तदा श्रुत्वा दुःखिता वाक्यमब्रवीत् ।
यत्करोषि हि धर्मांस्त्वंस्तत्करोमि ददामि च ॥
त्वद्दास्या यत्कृतं नाथ कर्म तत्क्षम्यतामिति ॥

(L. 415) D_1 M_1 वसन् (for स्वके) — G_1 2 lines 417-420. — (L 417) M_1 ऽत्यगमद् (for ऽभ्यागते) M_1 -समुत्सुकौ (for °के) — (L. 419) M_1 क्रीडासौधैर् (for °शालैर्) — (L 421) D_1 सेवकैरुपशोभिनम् (for ^{b}) —(L 422) M_1 पुर दृष्ट्वा, G(ed) स्वभवन (for गृह दृष्ट्वा) G(ed) दृष्ट्वा मुदमवाप स॰ (for ^{b}) —(L 424) D_1 ययौ (for दधे) — For line 424, G॰ subst .

39** गृहान्निर्गत्य कल्याणी नीराजनमथाकरोत् ।

—(L 426) G_2 G(ed) मुक्तादामैर् (for °दाम-). — D_1 M_1 om. line 430 —(L 431) D_1 उपविष्ट॰, G(ed.) °रिष्टात् (for °विष्टा). — (L. 433) G(ed) सदा कुरु (for ददस्व ह) — (L 434) G(ed) अनुकूला सदा भव (for ^{b}). —(L 435) D_1 G_1 प्रातिकूल्यं न च (G_1 न) श्रेय (for ^{a}). —(L. 436) G(ed) तु सा (for इदं). D_1 M_1 -सयुना (for °मूर्छिता) —(L 437) $G_{1,2}$ रक्ताक्षा (for °क्षी). $G_{1,2}$ M_1 G(ed) अनु($G_{1,2}$ मान)भूत मया पुरा (for ^{b}). —(L 440) G_1 G(ed) पर्यपालयत्, G_2 प्रतिपाल° (for प्रत्य°). —(L. 446) G_1 भुङ्क्ते (for भुक्त्वा). M_1 यथा स्वय धन भुक्त्वा (for ^{a}) — (L 447) G(ed) विनिन्दती (for °न्ती) —(L 449) G_1 चेयाय, G_2 इयाय (for प्रयाता) D_1 क्षय निनाय धर्मात्मा, G(ed) क्षय प्राप्ता तदा सपद् (for ^{a}) D_1 [अ]भवत् (for ध्रुवम्) $G_{1,2}$ दण्डारण्यमिव द्रुतम् (G_2 °मिवाभवत्), G(ed) दण्डारण्यमिव द्रुम (for ^{b}) — (L 450) G_1 G(ed) नष्टा (for नष्ट-) — (L 451) G_1 गिरम् (for गीतिम्). — For line 451, G(ed) subst. .

40** नीतियुक्ता गिर प्राज्ञ स्त्रिय ता प्रत्यभाषत ।

— Before line 452, G(ed) ins ब्राह्मण —(L 452) G(ed) वित्तकरी (for वृत्त°) —(L 453) G_1 -संनतिश्, G_2 -सगती (for °तिश्) —(L 458) G(ed) सद्गृहे (for मन्दिरे) —(L 459) D_1 G(ed) गन्तव्य ; M_1 न त्राह्या (for मर्तव्यं) G_2 दुःखाधिक (for दुःखोदधि) —(L. 460) G_1 पूज्यश्चैवावमानत , G_2 M_1 पूज्यानेवावमानयेत्, G(ed) सर्वदेवै सुपूजित (for ^{b}) —(L 461) M_1 एवाव- (for ऽगस्त्याव). —(L 463) $G_{1,2}$ देवि (for दोष). G(ed) त्वया कृतेन दोषेण (for ^{a}). G(ed) निरन्तरम् (for फल त्विदम्). —(L 465) $G_{1,2}$ M_1 विनिष्पतत्, G(ed.) निवेशितम् (for

इत्युक्त्वा पतिता मूलं पादयोर्ब्राह्मणस्य सा ।
क्षमस्वेति पुनर्नम्रा धर्मकार्यरताभवत् ॥
तदाप्रभृति सा चण्डी भर्तृशुश्रूषणोद्यता ।
अवशिष्टैस्त्वसौ विप्रो द्रव्यैर्दानपरोऽभवत् ॥
अवशिष्टं तु सौवर्णं रत्नानि विविधानि च ।
द्विजेभ्यो ब्राह्मणो वाक्य विमृश्यान्नं ददौ च सः ॥
गृहक्षेत्रमृते सर्वं वस्त्रधान्यानि धर्मज ।
ब्राह्मणाना तु सर्वेषां पात्रसादकरोद्द्विजः ॥
एवं भूते तदा विप्रे वागुवाचाशरीरिणी ।
किमिदं ब्राह्मणश्रेष्ठ निर्वेदमधिगच्छसि ॥
भूदानं कुरु विप्राणां श्रोत्रियाणा महात्मनाम् ।
अचिरात्प्राप्य सौभाग्यं पूर्ववत्सुखमेष्यसि ।
ऋषिदेवगणास्तात भूदान प्रार्थयन्ति हि ॥
इति खे संगता वाणीं श्रुत्वा प्रीतो द्विजोत्तम ।
गृहं क्षेत्राणि सर्वाणि ब्राह्मणेभ्यः प्रदत्तवान् ॥
कृपया ब्राह्मणानां वै श्रोत्रियाणा महात्मनाम् ।
अचिरात्प्राप्य सौभाग्यं मुमुदे भार्यया सह ॥
अन्नगोभूमिदानानि लिङ्गकृष्णाजिनानि च ।
शाळग्रामशिलादीनि कुर्वन्नास्ते द्विजोत्तमः ॥
तस्मात्त्वमपि राजेन्द्र भूदानं कुरु सर्वथा ।
श्रोत्रियाणा दरिद्राणा दीक्षितानां महात्मनाम् ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
कृत्वा यत्फलमाप्नोति भूमिदानात्तदश्नुते ॥
सर्वभाग्यकरं पुण्यमायुर्वर्धनकारणम् ।
स्वर्गदं पुत्रदं पार्थ भूदानं कवयो विदु ॥
मन्निवेशितचित्तस्तु ममैवेति ददाति यत् ।
ददामि तस्य सायुज्यं सोऽहं पार्थ न संशय ॥
दानहोमादिकाले तु भोजने च विशेषत ।
मां ध्यायन्कारयेद्यस्तु तस्याहं मुक्तिदो नृप ॥

युधिष्ठिर उवाच ।

कांल्लोकान्समवाप्नोति स विप्रो भुवनेश्वर ।
एतदाचक्ष्व योगीन्द्र त्वद्भक्तस्य नमोऽस्तु ते ॥
चराचराणां भूतानामन्तर्यामिन्यदूत्तम ।
त्वया न विदित किंचित्सर्वलोकेषु सुव्रत ॥

श्रीभगवानुवाच ।

स विप्रो योगयुक्तात्मा सर्वलोकेषु मां स्मरन् ।
बुभुजे विषयान्सर्वान्सत्यत्यागनहंकृती ॥
वर्षाणामयुत श्रीमान्स्थित्वा योगबलेन वै ।
अन्ते जगाम मल्लोकं देवर्षिगणसेवितम् ॥
भूदानस्य प्रभावेन मदनुध्यानसंपदा ।
भविष्यति हि ते पार्थ मल्लोकं चोत्तमोत्तमम् ॥
एतत्ते कथितं पार्थ भूदानस्य फलं महत् ।
ब्रवीमि सर्व ते धर्मं किं भूय. श्रोतुमिच्छसि ॥
धर्मः श्रुतो वा दृष्टो वा कृतो वा कथितोऽपि वा ।
अनुमोदितो वा राजेन्द्र नयतीन्द्रपुरं नरम् ॥
य इदं पुण्यमाख्यानं शृणोति श्रद्धयान्वित ।
सर्वपापविनिर्मुक्त स्वर्गलोकं स गच्छति ॥
ब्राह्मणानां समाजे च तथा देवालये पठेत् ।

व्यनिष्पतत्) — (L. 466) $G_{1,2}$ M_1 वस्तु (for स्यातु) G(ed) नात्र स्यातु ममोचितम् (for [b]) — (L 468) G(ed) यत्कर्तव्य मया ब्रह्मस (for [a]) G_1 वस्तु तत्तद्दद्स्व च, G_2 वस्तु यद्यद्दासि च ; M_1 अस्तु तत्ते ददानि च, G(ed) तद्ददस्वाद्य तत्त्वतः (for [b]) — (L. 469) G(ed) कर्म तत्क्षन्तुमर्हसि (for [b]). — (L. 470) G(ed) सा तु (for मूल). — (L 471) G_1 नत्वा (for नम्रा) G_1 -परा- (for -रता-) — For line 471, G(ed.) subst

41** ततस्तेन समादिष्टा धर्ममाचर्य सत्वरम् ।

— (L 472) G_1 G(ed) भर्तृशुश्रूषणे रता (for [b]) — (L. 473) G(ed) अवशिष्टस् (for °ष्टैस्) D_1 तु स द्रव्यै ; G_2 तु सो विप्रो (for त्वसौ विप्रो). M_1 अविशिष्टैस्तु विप्रोऽसौ (for [a]) D_1 पुनर् (for द्रव्यैर्) — (L. 475) D_1 G_1 वाक्याद् (for वाक्य) G(ed) द्विजेभ्यो ब्राह्मणी चापि (for [a]) D_1 G_2 सा (for स.) G(ed) दातु समुपचक्रमे (for [b]) — (L 476) D_1 गृह क्षेत्रमृते वर्म (for [a]). M_1 -धान्यादि (for °नि). D_1 धर्मवित् (for °ज) G(ed) वस्त्रधान्यादिक तथा (for [b]) — For line 477, G(ed) subst

42** ब्राह्मणाना दरिद्राणा भक्त्या विप्र समर्पयत् ।

— (L. 478) D_1 गते निर्वेदे तस्मिन्, $G_{1,2}$ दत्ते (G_2 गते) तस्मिन्द्विजवरे, M_1 गते तस्मिश्च राजेन्द्र (for [a]). D_1 $G_{1,2}$ शु- (G_2 ऽभ्यु)च्चचार वचोऽम्बरे, M_1 उच्चैरुश्च गिरोऽम्बरे (for [b]). — (L 480) D_1 G_1 ब्राह्मणाना (for श्रोत्रियाणा). — (L 481) G_2 M_1 प्राप्स्यसि (for एष्यसि). — (L. 482) D_1 ते तु ; G_2 तत्र (for तात) G(ed) ऋषयो देवता सर्वा (for [a]). — For line 483, G° subst.

43** इति खे सगता वाणी तच्छ्रुत्वा प्रीतोद्विज (?) ।

— (L 484) D_1 G_2 M_1 G(ed) गृह- (for गृह) — (L 492) G_2 भूमिदान (for °दानात्). — (L 498) G(ed) मा स्मरन्कुरुते यस्तु (for [a]) — (L 500) M_1 त्वद्भक्तस्य (for त्वद्भृत्यस्य) — For lines 499-500, G(ed.) ins. :

44** कान्लोकानभजत्पुण्यान्स विप्रः पुण्यकृत्तम ।
तत्सर्वं मे समाचक्ष्व कृपया मुनिसत्तम ।

— (L 502) G_1 G(ed) ह्यविदित (for न वि°). D_1 विश्रुते (for सुव्रत) — (L 503) M_1 -युक्त य (for -युक्तात्मा). — (L 508) G(ed) मत्पद (for मल्लोक) D_1 मल्लोकश्चोत्तमोत्तम (for [b]). — (L 510) G(ed.) ब्रवीमि सर्वांस्ते धर्मान् (for [a]) — (L. 511) G(ed) पालितो (for कथितो). — (L. 512) Hypermetric G(ed) अङ्गीकृतो वा राजेन्द्र (for [a]). M_1 -पद (for -पुर) — (L. 513) D_1 M_1 नरः (for [अ]न्वित.). — (L 514) G_1 G(ed.) नर. (for सर्व-). M_1 गमिष्यति (for स गच्छति). — (L. 515) G(ed.) सदा (for

शृण्वता वदतां चैव मल्लोको भवति ध्रुवम् ॥
Colophon
युधिष्ठिर उवाच ।
गोदान हि महत्पुण्यमिति चाहुर्महर्षय ।
विस्तरेण जगन्नाथ तन्मे त्वं कृपया वद ॥
केन चादौ पुरा दत्ता प्राप्यते सुमहत्फलम् ।
तत्सर्वं हि भवान्वेत्ति कृपया वद सुव्रत ॥
श्रीभगवानुवाच ।
शृणु पाण्डव वक्ष्यामि श्रोतॄणामघनाशनम् ।
सुशर्मणस्तु चरितं सर्वं मङ्गलदायकम् ॥
सुशर्मा नाम विप्रेन्द्रो ब्राह्मणो वेदपारग ।
शान्तो जितेन्द्रियो राजन्सर्वसंपत्समायुत ॥
सर्वक्रतु सदा यज्वा विशेषेण मम प्रिय ।
नित्यं दानरतो नित्यं सदा सर्वहिते रत ।
पुराणवक्ता कौन्तेय बन्धूना हितकृत्सदा ॥
एवं प्रवर्तमानस्य बहुपुत्रस्य धीमत ।
जरा प्राप्ता तदा राजन्सपत्नीव नृपात्मज ॥
पलितं तु स्वकं देहं दृष्ट्वा राजेन्द्र स द्विज ।
वनं विवेश धर्मात्मा मुनिवृन्दनिषेवितम् ॥
तत्राराध्य परं देवं वासुदेवाख्यमव्ययम् ।
जगाम तपसा स्वर्गं संशोषितकलेवर ॥
तत्र तिष्ठति धर्मिष्ठे विप्रवर्ये युधिष्ठिर ।
वृत्रारेर्निकटं प्राप्ता देवदूता महाबला ॥
ऊचु ससंभ्रमं राजन्देवराजं पुरंदरम् ।
बलभिच्छ्रूयतां देव यदर्थमिह चागता ॥
यमदूता महात्मान पाशहस्ता भयंकरा ।
स्वर्गाद्विमनुजान्नाथ ह्यस्माकं वशवर्तिन ।
निरुध्य पथि ते दूता प्रापयन्ति यमालयम् ॥
ते सार्धं बहुधायुध्य ह्यशक्तास्त्वामुपागता ।
तदुपाय वदस्व त्वं येनेदं प्राप्नुवन्ति ते ॥
इन्द्र उवाच ।
दिवं ममाज्ञया यान्तु धर्मिष्ठा मनुजोत्तमा ।
पापिनां नरकं ज्ञेयं धर्मिष्ठाना त्रिविष्टपम् ॥
सर्वेषां गोप्रदानेन पापराशि प्रणश्यति ।
तत्पर यान्तु धर्मिष्ठा गोदानाद्धूतकल्मषा ।
तदाप्रभृति धर्मिष्ठा दृष्ट्वा यान्ति परं दिवम् ॥
तदद्भुतमिदं दृष्ट्वा ब्राह्मणो देवसंनिधौ ।
उपदेष्टुं स्वकान्पुत्रानियेष द्विजसत्तमः ॥
पुत्राणां तत्सकाशं तु विमानेन समेत्य च ।
पुत्रा शृणुत मद्वाक्यं यूयं स्वर्गं यदीप्सथ ।
दातव्यं गोप्रदानं हि युष्माभिस्तु प्रयत्नत ॥
अशरीरं वच श्रुत्वा पुत्रा बन्धुजना अपि ।
आश्चर्यं परमं जग्मुर्घोषयन्ति स्म नित्यश ॥
तच्छ्रुत्वा विस्मिता सर्वे द्विजा गोदानतत्परा ।
अभवन्नन्त्यकालेऽपि निश्रेय इति सर्वत ॥
तस्माद्ददध्वं गोदानमपमृत्युविदारकम् ।

तथा) —(L 516) D_1 ददता (for व°) G_2 शृण्वतामपि सर्वेषा (for ^{a}) G(ed.) मत्पद (for मल्लोको)

Colophon — *Sub-parvan* D_1 आश्चर्यपर्व , — *Adhy. name* D_1 भूदानप्रशसा , G_1 भूदानप्रशसनम् , G_2 भूमिदानप्रशसा , M_1 भूदानवर्णनम् ; G(ed) भूदानमाहात्म्यकथनम्. — *Adhy. no* D_1 $G_{1,2}$ M_1 G(ed.) 4.

(L 517) G(ed) महापुण्यम् (for महत्पु°) D_1 मनीषिण (for महर्षय.). — (L 519) D_1 [इ]यं (for [आ]दौ) M_1 दत्त (for दत्ता) D_1 प्राप्यत च , G(ed) प्राप्त केन (for प्राप्यते सु-).—(L 520) G_2 भगवान् (for हि भवान्) — (L. 521) G_2 पार्थ प्र- (for पाण्डव). — After line 522, G_2 ins. :

45** अत्रैवोदाहरन्तीममितिहास पुरातनम् ।

—(L 524) G_1 दान्तो (for शान्तो) G(ed) -समन्वित (for -समायुत). — (L. 525) G(ed.) -क्रतुपरो (for -क्रतु सदा). — (L. 526) G_1 G(ed.) ऽतीव (for the second नित्यं). G_2 धर्म (for , र्वं) — (L. 527) D_1 कौरव्य (for कौन्तेय) — (L 529) $G_{1,2}$ M_1 G(ed) समभवद् (for प्राप्ता तदा). — (L. 532) G(ed.) प्रभुं (for पर) — (L 534) G(ed.) अत्र (for त्र). — (L 535) M_1 प्राप्य (for प्राप्ता) — (L. 537) G_2 भवद्भिः (for बलभिच्च्). M_1 राजन् (for देव). — (L. 541) D_1 G(ed.) युध्वा (for युध्य). — (L. 542) $G_{1,2}$ केन (for येन) — (L 543) $G_{1,2}$ M_2 यमाज्ञया (for म°). G_1 धर्मिष्ठा मनुजेश्वरा , G(ed) °ष्ठा खलु ते नरा (for ^{b}) — For line 544, G(ed) subst

46** पापिना नरक स्थान न तु पुण्यकृता हि स· ।

— After line 545^{a}, G(ed) ins

47** सुरलोक: कथस्थित ॥
तस्मात्ते गोप्रदातारो भुवि पापरता अपि ।
आयान्तु मत्पद शीघ्र नात्र कार्या विचारणा ॥
अज्ञानाद्यमदूतैस्ते गृहीता न तु धर्मत ।
इ युक्त्वा यमराजाय तानानायत माचिरम् ॥
एवमुक्तास्तदा दूताश्चक्रुरिन्द्राज्ञया तदा ।

—G(ed) om. lines 545^{b}–547^{a}. — (L 546) M_1 तत्पापिनस्तु धर्मिष्ठा (for ^{a}) D_1 धौत- (for धूत-) — (L. 547) G_2 दिवि (for दिवम्). D_1 सर्वे गोदानतत्परा (for ^{b}), — (L. 548) G_2 G(ed) इम (for इद) —(L 550) D_2 च सकाश , G(ed) स स° (for तत्स°). — After line 550, D_1 ins .

48** उवाच वचन धीमान्धर्मपुत्रो महाबल: ।

— (L 551) G(ed.) शृणुध्व (for °त) — (553) $G_{1,2}$ G(ed) अशरीर- (for °रं) — (L. 554) D_1 G(ed) अपर (for परम) D_1 G_2 M_1 सर्वश· (for नित्यश) — (L 556) G_2 अन्त (for अन्त्य-). D_1 अभूवन्नन्तकालेऽपि (for ^{a}). D_1

स्वर्गदं स्वर्गकामानां श्रीकरं श्रियमिच्छताम् ॥
तदाप्रभृति धर्मिष्ठा यमेन परिपूजिता ।
गोप्रदानरता मर्त्या दिवं यान्ति स्ववंशजै. ॥
एका च दशगुर्दद्याद्दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात्सममेतत्त्रयं फलम् ।
गोदानात्परमं दानं नैव किंचिज्जगत्त्रये ।
सा गौर्न्यायार्जिता दत्ता कृत्स्नं तारयते कुलम् ॥
अमृतं वै गवां क्षीरमित्युवाच प्रजापति ।
तस्माद्ददाति यो राजन्नमृतत्वं च गच्छति ॥
वृद्धाय यूने यो दद्यात्तथैव ब्रह्मचारिणे ।
गा दद्याच्छ्रुतविद्याय दरिद्राय कुटुम्बिने ॥
पौराणिकाय भूपाल श्रोत्रियायाहिताग्नये ।
वृत्तिहीनाय वै देयं गोदानं स्वर्गमिच्छता ॥
पुण्यक्षेत्रे पुण्यकाले मातापितृदिने तथा ।
चन्द्रसूर्योपरागे च दातव्या गौः प्रयत्नत. ॥
संक्रान्तौ जन्मनक्षत्रे ह्ययने विषुवे तथा ।
प्रेताहे च सपिण्डे च व्यतिपाते महालये ।
यो ददाति गवां दानं मम लोक स गच्छति ॥
गवामभावे सौवर्णं द्विनिष्कं पुष्पपूजितम् ।
मत्संनिधौ त्व मा ध्यात्वा दद्याद्गच्छेन्ममालयम् ।
यत्र वै ब्राह्मण पश्येच्छ्रोत्रियं नियतेन्द्रियम् ।
एतत्कालमहं मन्ये परमं श्राद्धदानयो. ॥
श्रियमायुष्करं दानं पुत्रपौत्रप्रवर्धनम् ।
गोदानात्परम दानं नास्ति किंचिज्जगत्त्रये ।
नित्यं ददस्व भूपाल यदि स्वर्गं त्वमिच्छसि ।
श्रियं च विपुला लोके गमिष्यसि न संशयः ॥
इत्येतच्छृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
स्वर्लोक समवाप्नोति गोप्रदानफलं लभेत् ॥

Colophon

वैशंपायन उवाच ।
गोदानस्य फलं श्रुत्वा धर्मराजो महामति ।
पुनरेवापरं धर्मं पप्रच्छ द्विजसंसदि ॥
युधिष्ठिर उवाच ।
लोकनाथ नमस्तेऽस्तु नमस्ते भक्तवत्सल ।
त्राहि मां पुण्डरीकाक्ष धर्मशास्त्रोपदेशतः ॥
सर्वेषामेव दानानां यद्दानं सुमहत्फलम् ।
सद्यस्तुष्टिकरं चैव सर्वपापप्रणाशनम् ॥
त्वमेव वेत्सि तत्सर्वं लोकनाथ यदूत्तम ।
त्वत्कृत्यान्पाहि धर्मात्मन्सत्कथाश्रवणेन च ॥
श्रीभगवानुवाच ।
वक्ष्यामि पाण्डवश्रेष्ठ दानानामुत्तमं वरम् ।
सद्यस्तुष्टिकर पुण्यमायुरारोग्यवर्धनम् ॥
अन्नदानात्परं दान नास्ति किंचिज्जगत्त्रये ।
अन्नेन जायते लोको ह्यन्ने प्राणाः प्रतिष्ठिताः ।
तस्मादन्नात्परं दानं नास्ति पार्थ हि मे मतम् ॥
अद्य तेऽहं प्रवक्ष्यामि इतिहासं पुरातनम् ।
शृण्वता सर्वपापघ्नं भुक्तिमुक्तिफलप्रदम् ॥
पुरा किल महाराज ब्राह्मणो वेदभूषण ।
सर्वशास्त्रार्थसंपन्नो बहुपुत्रो महाधनी ॥
अतिथिप्रियकृन्नित्यं बन्धूनां हितकृन्नृप ।
अन्नमेव पर दानमित्युक्त्वासौ करोति च ॥

G_1 M_1 न- (for नि-) G_1 सद्युना (for सर्वतः). — (L. 557) D_1 G(ed) ददस्व (for °च्छ). G(ed.) -विदारकम् (for °णम्). — (L 558) G_1 द्विजाना (for श्रीकरं). — (L 562) G(ed) फलात् (for फलम्). — (L. 566) सोऽमृतत्व (for अमृ°) G_1 G(ed.) स (for च). — (L. 567) D_1 G(ed.) नो (for यो). — (L. 569) D_1 विदुषे (for भूपाल) — (L. 571) D_1 -मृते दिने ; G_1 -दिने नृप ; M_1 -मृतौ नृप (for दिने तथा) — (L. 573) D_4 ह्ययनेषु च पर्वणि, G_2 G(ed) °ने विष्णुपर्वसु (G_2 °णि) (for ^{b}) — (L. 574) G_2 व्रताहे च सपिण्डयौ च (for ^{a}). — (L 576) D_1 G_2 -पूरितम् (for पूजि°) — (L 577) G(ed) विशेषेण (for तु मा ध्यात्वा). — (L 579) G_1 G(ed) एत (for एतत्). — After line 579, G(ed) ins :

49** गोदानान्निर्दहेत्पापतूलराशि प्रधक्ष्यति ।

— G(ed,) om line 580 — (L 581) G_2 दानात् (for दान) — For line 581, G(ed) subst. ·

50** तस्माद्गोदानसदृशं दान नास्ति जगत्त्रये ।

— (L 583) G_3 निमला (for विपुला). D_1 श्रियं च विपुलान्भोगान् (for ^{a}) — (L. 585) D_1 गोदानस्य (for गोप्रदान-).

Colophon. — *Sub-parvan* D_1 $G_{1.2}$ M_1 G(ed) आश्चर्यपर्व — *Adhy name* G_1 गोप्रदानप्रशसनम्, G_2 गोदानम्, M_1 गोदानप्रशसनम , G(ed) गोदानप्रशसा. — *Adhy. no* · D_1 $G_{1\ 2}$ M_1 G(ed) 5.

(L 586) M_1 धर्मपुत्रो (for °राजो). G_1 महीपति°, G(ed.) युधिष्ठिर. (for महामति) — (L 587) G(ed.) अपृच्छद् (for पप्रच्छ) G_1 G(ed) जन- (for द्विज-) — (L. 594) G_1 वदामि (for वक्ष्यामि). G_1 M_1 परम् , G(ed) शृणु (for वरम्). — (L 595) D_1 -पुष्टिदम् (for -वर्धनम्). — After line 595, D_1 ins .

51** गजतुरगसहस्र गोकुलाना सहस्र
कनकरजतपात्र मेदिनीसागरान्तम् ।
उभयकुलविशुद्ध कोटिकन्याप्रदान
न भवति समदानमन्नदानस्य लोके ॥

— (L. 597) G(ed.) लोका जायन्ते (for जायते लोको). — (L 598) G(ed.) पार्थ नास्तीति मे मति. (for ^{b}). — (L. 600) M_1 शृणु त्व (for शृण्वता). — (L. 601) D_1 G(ed.) खलु (for किल) — (L 602) G_1 G(ed.) तत्त्वज्ञो (for -संपन्नो) — (L. 603) D_1 -प्रियकरो (hypermetric)

दुर्भिक्षे वा सुभिक्षे वा ह्यन्नमेव सदा ददत् ।
द्विजशूद्रान्त्यवर्णानां प्रमृष्टान्नं ददाति च ॥
अन्नदानं दृढं कृत्वा स्थिते तस्मिन्महात्मनि ।
सुरलोकेऽथ गन्धर्वा कीर्तयन्ति स्म त द्विजम् ॥
एतच्छ्रुत्वा देवपति. परीक्षायां समुत्सुकः ।
आजगामाथ विप्रस्य मन्दिरं ब्रह्मपूजितम् ॥
संदिश्य च महामेघान्पुष्कलावर्तकान्द्रुतम् ।
वृष्टिमुत्पादयामास सप्तरात्रं निरन्तरम् ॥
जलाकुलमभूत्सर्वं दशयोजनमात्रकम् ।
तस्मिन्कालेऽप्यसौ देवश्चाययौ विप्ररूपधृत् ॥
कृश· खञ्जो यष्टिहस्त सूक्ष्मदृष्टि क्षुधातुर ।
स्वस्तीत्युक्त्वा ययाचेऽन्नं घर्घरघोषसंयुतः ॥
विप्ररूपधरं देवं दृष्ट्वा राजेन्द्र धर्मवित् ।
प्रत्युत्थानाभिवादाभ्यां पादौ चापि प्रपीड्य च ॥
उवाच मतिमान्धर्मी ब्राह्मणेषु दृढव्रत ।
कृतार्थोऽस्मि महाभाग भवदागमनेन हि ॥
कुल वित्तं श्रुत गेह पुत्रपौत्रादय. सुहृत् ।
सर्वे ते मम पत्न्यश्च धन्या एव त्वदागमे ॥
पितरो मे महाभाग गावो मे जन्म चैव हि ।
धन्या एवाद्यय· सर्वा भूत्वा जन्मान्तराणि च ॥
इदानीं सुदिनं जातं जीवितं च सुजीवितम् ॥
एवं वदति विप्रेन्द्रे तस्मिन्धाराकुले दिने ।
अग्निं प्रज्वाल्य यत्नेन साध्वी पाकमथाकरोत् ॥
तत प्रक्षाल्य विप्रेन्द्र. पादौ तस्य द्विजस्य च ।
तदन्नं पात्रसात्कृत्वा विष्णुबुद्ध्या ननाम ह ॥
तस्मिन्नवसरे शक्रो ब्रह्मरूपी सुरेश्वर· ।
मनसाचिन्तयद्देवांस्तेऽपि तत्र समागताः ॥
ब्रह्मरूपा महात्मानो ज्वलनार्कसमप्रभाः ।
अन्नं ययाचिरे विप्रं स्वस्तीत्युक्त्वा समुच्छ्रिता ॥
भोक्तु समुद्यत· शक्र श्रुत्वा तु करुणां गिरम् ।
सुराणा तु समाहूय वचनं चेदमब्रवीत् ॥
शृणुष्व मद्वचो विप्र ते सर्वे क्षुधिता भृशम् ।
तैश्च सार्धमह भोक्तुमिच्छामि न च तैर्विना ॥
तच्छ्रुत्वा वचनं तस्य ब्राह्मणोऽतिथिवत्सल ।
कुरु पाकं क्षणेन त्वमिति पत्नीमभाषत ॥

ब्राह्मण्युवाच ।

किं करोमि च धर्मात्मन्निन्धनं नास्ति मद्गृहे ।
क्षुधिता ब्राह्मणश्रेष्ठा यदुपायं वदस्व तत् ।

ब्राह्मण उवाच ।

वस्त्राणि च बहून्यत्र घृततैलघटास्तथा ।
संयोज्य वर्तिका तेषु दीपयस्व समृद्धवत् ॥

वैशंपायन उवाच ।

भर्तृवाक्यं तथा श्रुत्वा वस्त्रमेकं यथा भवेत् ।
घृतं तैलं तु नि शेषं तथा साध्वी चकार ह ॥
सर्वाभावे पतिं प्राह श्रूयतां वचनं प्रभो ।
वस्त्राज्यतैलं निःशेषं मा भूत्कि करवाण्यहम् ।
पाकश्च नाभवद्विद्वन्कर्तव्यं किमत परम् ॥

श्रीभगवानुवाच ।

श्रुत्वा वच पुनस्तस्या कोपात्संरक्तलोचन ।
अब्रवीत्परुषं वाक्यं साक्षाद्देवेन चोदित· ।
दु खिताश्चैव तिष्ठन्ति क्षुधिता ब्राह्मणोत्तमा· ।
पादौ प्रसार्य ते चाग्नौ कुरु पाकं हि दुर्जने ॥
पतिवाक्यं तदा श्रुत्वा प्रीता साध्वी नृपोत्तम ।

(for प्रियकृत्) G_2 प्रिय (for हित-) — (L 604) $G_{1,2}$ अनेन परम दा(G_1 शा.नम् (for ^{a}). D_1 मत्ना , G_1 G(ed) [उ]क्त्वा हि (for [उ]क्त्वासौ) — (L 605) G_2 M_1 ह्यन्न वै सर्वदा ददत् ; G(ed) ह्यन्नमेव ददानि स (for ^{b}) — (L 606) G_1 G(ed) प्रहृष्टोऽन्न (for प्रमृष्टान्न). — (L. 607) G(ed) अन्नदाने मतिं कृत्वा (for ^{a}). — (L 608) G_1 पर- (for सुर-) G_1 सदा , G(ed) हित (for स्म त). — (L 609) D_1 G_2 परीक्षार्थं (for °या) G_1 महामति· (for समुत्सुकः). — (L. 610) D_1 $G_{1,2}$ G(ed) पूरितम् (for -पूजि°). — (L 611) $G_{1,2}$ G(ed) तदा (for महा-) — (L 614) G_2 M_2 हि (for ऽपि) D_1 G_2 ऽपि , M_1 हि (for च). G_1 M_1 वृद्धरूपभाक् (M_1 °धृक्) (for °धृत) — (L. 615) G_1 G(ed) -धर (for -हस्त) — (L 616) G_1 -सयुतम् (for °त). — (L. 617) M_1 दृष्ट्वा (for देवं) M_1 देवराज च धर्म- वित् (for ^{b}). — (L. 619) G(ed) धर्मं (for धर्मी) — (L 621) G_1 श्रुत (for कुल) G(ed.) हि न (for वित्त) D_1 वयं (for श्रुत). — (L. 623) M_1 भावो मे जन्म एव च , G(ed) ह्यागामिनि न जन्मानि (for ^{b}). — M_1 एवान्तराणि (for जन्मा°). — (L 626) D_1 G_2 M_1 -वादिनि (for वदति) G_2 क्षणे (for दिने). — (L 627) G_2 परम् (for पाकम्) — (L 629) G_2 -कृत्य (for कृत्वा) — (L 633) D_1 G_1 समूर्छिता· , M_1 समर्चिता , G(ed) सुमूर्छिता (for समुच्छ्रिता·) — (L 634) G(ed) तत् (for सु-) — (L 635) तमञ्जमा (for सुराणां तु) — (L 637) G_1 G(ed) सावम् (for सार्धम्) — (L 638) G(ed) ब्राह्मणो बाढमित्यथ (for ^{b}) — (L 640) G(ed) वै गृहे (for मद्गृहे) — (L. 641) G(ed) आसते वेदि- कान्तरे (for ^{b}) — (L 642) D_1 घृतानि च (for घटास्तथा). — (L 643) D_1 समृद्धिमत् , M_1 °द्धिवत् , यथामति (for समृ- द्धवत्) — $G_{1,2}$ om the ref — (L 647) अभूत् (for मा भूत्) — For lines 644^b–647^b, G(ed) subst .

52** तदा प्राज्वालयत्सती ।
वस्त्राण्यनल्पमूलानि तैलाक्तान्यतिभक्तित ।
तथापि पाकपूर्तिर्हि न जातेन्द्रप्रभावत ॥
ब्राह्मणी ।
वस्त्राण्यनल्पमूलानि भस्मसात्कृतवत्यहम् ।

— (L. 650) D_1 दैवेन (for दे°). — (L. 653) G_1 प्रीता

तथाकरोत्स्वपादौ च तैलसेचनचर्चितौ ॥
पाकस्तदाभवच्छीघ्रं जङ्घाकाण्डेन वह्निना ।
सा साध्वी वेद नाकिंचिन्नैव विन्दति नादुनोत् ॥
पतिस्तु पाककर्ता च कृत्वा पाकाननेकश. ।
तत: प्रक्षाल्य पादौ च पूजयामास चाक्षतै ॥
प्रसार्य भाजनं दीपं स्थापयित्वा स धर्मवित् ।
दातुमन्नं समारेभे संभ्रमादविचारयन् ॥
तत पुरंदर प्राह ब्राह्मणं विगतस्पृहम् ।
पत्नी समानयस्वेति ह्यन्नं सा दातुमर्हति ॥
पत्न्या विरहिते गेहे वस्तुमद्य न शक्यते ।
भोक्तुं किमुत विप्रेन्द्र गृहिणी गृहमुच्यते ॥
यस्य भार्या गृहे नास्ति सद्वृत्ता धर्मचारिणी ।
अरण्यं तेन गन्तव्य यथारण्यं तथा गृहम् ॥
पत्न्या विरहिते गेहे भर्तुः सौख्यं न विद्यते ।
तथैव द्विज सर्वेषां मद्विधानां किमुच्यते ॥
अतिथीनां यथा साध्वी प्रीता दास्यति पुत्रवत् ।
प्रीता भवन्ति ते देवा: कर्मश्रद्धासमीप्सव: ॥
मौनं बलं हि योगीनां द्विजातीनां श्रुतं बलम् ।
पत्नी बलं गृहस्थानां पक्षौ वै पक्षिणां बलम् ॥
अन्नं बलं मनुष्याणां पुरुषाणां धनं बलम् ।
राजा बलं दुर्बलानां योधानां तु धृतिर्बलम् ॥
चक्षुर्बलं हि जन्तूनां धर्म वै संपदां बलम् ।
शील बलं हि नारीणां गृहिणी गृहमेधिनाम् ॥
तस्मात्त्वं बलहीनश्च किं करोषि वृथा मम ।
भार्या न चेत्तु यास्यामस्तिष्ठ त्वं तु सुखं द्विज ॥
इति देवपतेर्वाक्य श्रुत्वा भीतिसमन्वित· ।
ध्यात्वाथ मां विवेशाशु पाकशाला कुरूद्वह ॥
परिप्लवाक्षी वेष्टन्ती भुवि दीना सुमूर्छिताम् ।
हीनजङ्घां स्वका भार्यामिदं वचनमब्रवीत् ॥
अहोऽह पापधीर्नित्यं क्रूरवाङ् निर्घृणोऽसुर ।
अनुकूलां स्वकां भार्यामीदृशी करवाणि यत् ॥
अविवेको हि सर्वेषामापदां परमं पदम् ।
विवेकरहितो यस्तु पशुरेव न संशय: ॥
अतर्कयन्तं विद्वांसमपि शास्त्रविशारदम् ।
प्रविशन्ति यथा नद्यो दु खानि च महार्णवम् ॥
इत्युक्त्वा रत्न क्षमस्वेति मद्वच परुषाक्षरम् ।
अब्रवीत्पुनरेवाशु कल्याणीं तां पतिव्रताम् ॥
किमिदं सुव्रते साध्वि प्राकृतस्त्रीजनो यथा ।
आगतानतिथीन्सर्वान्पालयस्व च मामिह ॥
त्वया विना कथं वस्तुमुत्सहे धर्मचारिणि ।
कालो ह्ययं नैव दृष्टो नोक्तपूर्वं मयेदृशम् ॥
त्वं धर्मस्त्वं प्रिया प्राणा देवता च त्वमेव मे ।
अतिथीनामयं धर्मस्त्वय्येव च निवर्तते ॥
एवमुक्त्वापतद्भूमौ शोकमोहसमन्वित: ।
उत्थिता पुरुहूतस्य कृपया सा पतिव्रता ॥
विस्मिता जातजङ्घोरू जाम्बूनदविभूषिता ।
भोजयामास तान्सर्वान्ब्रह्मरूपधरान्सुरान् ॥
तृप्ता: प्रमुदिता: सर्वे सुखासीना द्विजोत्तमा· ।

(for श्रुत्वा) G_1 साध्वी मा च (for प्रीता साध्वी). — (L. 654) M_1 सा (for स्व-) D_1 M_1 -सेकन- (for सेचन-) — (L. 655) G_1 M_1 पाकं तथा (for पाकस्तदा) D_1 तीव्रं (for शीघ्र) G(ed) पाक तदाकरोच्छीघ्र (for ^{a}) — (L 656) D_1 वहित् (for नादुनोत्). G(ed) नाविन्दत्पतिभक्तित· (for ^{b}) — After line 656, G(ed) ins .

53** तत आहूय तान्भक्त्या पूजयित्वा यथाविधि ।

— G(ed.) om lines 657-659 — (L 657) D_1 कृतपाकक्रियां सोऽथ (for ^{a}). D_1 श्रुत्वा (for कृत्वा). — (L 658) G_2 M_1 सो (for the second च). — (L 659) G_2 धर्मज्ञ (for °वित) — (L 662) D_1 समाह्वयस्व (for समान°). — (L. 665) G_1 2 सुव्रता (for सद्वृत्ता) — G_1 G(ed.) om. lines 667-668 — (L. 670) M_1 श्रद्धा (for श्रद्धा). — (L 671) G(ed) बल हि योगिना मौन (for ^{a}). G_1 G(ed) द्विजाना तु (for °तीना) — (L. 672) D_1 G_1 M_1 भार्या (for पत्नी) G_2 om lines 672^{b}–674^{a} D_1 M_1 अपि (for बलम्) — (L 676) G(ed) बल ज्ञान महात्मनाम् (for ^{b}) — (L 678) G_1 G(ed) न भोक्ष्यामि कदाचन (G_1 तथा द्विज) (for ^{b}) — (L 680) G(ed) क्षण (for [अ]थ मा) G_2 [अ]थ (for [आ]शु) — After line 680, G(ed.) ins. :

54** तदापश्यद्वेपमाना हाहाकारेण संयुताम् ।

— G(ed) om line 681 — (L 681) M_1 लुठ्यन्तीं (for वेष्टन्ती) G_2 भुवि नीना समुच्छ्रिताम् (for ^{b}) — (L 683) G(ed) बत (for अहो) M_1 दुष्टवान् (for क्रूरवाक्). G_1 दुष्टवान्निर्घृणोऽधुना, G(ed) दुष्टा धृष्टश्च निर्घृण· (for ^{b}). — (L 684) G(ed) य साध्वीमकल्यां भार्याम् (for ^{a}). G_2 ईदृश (for °शीं) G(ed) ईदृशीं कृतवानहम् (for ^{b}) — (L. 685) M_1 मनुष्याणा (for हि सर्वेषा) and सर्वेषा (for आपदां). D_1 जन्तूनामापदां पदम् (for ^{b}) — (L 687) G(ed) -विदां वरम् (for -विशारदम्) — (L 688) G(ed) हि दु खानि (for यथा नद्यो) and यथा नद्यो (for दुःखानि च) G_2 यथार्णवम् (for महा°). — (L 689) G_2 मद्वाक्य (for मद्वच). G(ed.) स द्विजो भृशदु.खित (for ^{b}). — (L. 692) G(ed) अनादृत्येह तिष्ठसि (for ^{b}) — (L 693) G_2 M_1 हीन (for विना)· G(ed) त्वया हीनः कथ पूजा ह्यतिथीनां भवेदिह. — After line 693, G(ed) ins. .

55** नाह वस्तुमिहाकाङ्क्षे प्रस्थितायां दिव त्वयि ।

— G(ed.) om. line 624 — (L. 694) D_1 वेद (for दृष्टो). — (L 696) G(ed) परि- (for च नि-). — (L. 697) G(ed) मूर्छित: सहसा द्विज· (for ^{b}). — (L 698) G(ed.) तत: सा (for उपस्थिता). G(ed) कृपया ध्वस्तसकटा (for ^{b}).

भर्तारमानयस्वेति तामूचुर्धर्मनन्दन ॥
शोकार्णवे पतिं दृष्ट्वा पतितं तं सुदुःखितम् ।
किमेतदिति सा साध्वी व्याजहार सुदुःखिता ॥
किं त्वं शोचसि कल्याण नितरां प्राकृतो यथा ।
भुक्त्वा तुष्टा द्विजवरा करिष्यन्त्याशिषं शुभाम् ।
तेषां सकाशं गच्छ त्वं प्रार्थयस्व शुभान्द्विजान् ॥
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥

श्रीभगवानुवाच ।

स्वप्नदृष्टेव तत्सर्वं विचिन्त्य च मुहुर्मुहुः ।
गत्वा प्रणम्य तान्सर्वानुवाच कुरुनन्दन ॥
अद्य मे सफलं जन्म भवत्पादाभिवन्दनात् ।
अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम् ॥
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशजातं चित्तेषु विस्मृत्य क्षन्तुमर्हथ ॥
एवमुक्त्वा ननामाशु स विप्रो वै पुनः पुनः ।
ज्योतिर्मयांस्तदा दृष्ट्वा विस्मयं परमं गतः ॥
ततो देवपतिः प्राह प्रहसन्ब्राह्मणोत्तमम् ।
तृप्तोऽस्मि देवास्तृप्यन्ति मामिन्द्रं विद्धि धर्मभृत् ॥
देवा ह्येते वयं प्राप्तास्त्वत्परीक्षाभिलिप्सवः ।
यावास्थितोऽहं स्वर्लोके तावत्त्वं स्थितिमेष्यसि ॥
तव धर्मस्य विप्रेन्द्र प्रत्यूहो न भविष्यति ।
इत्युक्त्वा तां धर्मपत्नीमभिनन्द्य मुहुर्मुहुः ।
तिरोदधे स सुत्रामा देवैः सार्धमरिंदम ॥
स विप्रो भार्यया सार्धं भुक्त्वा भोगान्यथेप्सितान् ।
अन्ते जगाम स्वर्लोकं भार्यया सह धर्मज ॥
तस्मात्त्वमपि राजेन्द्र देहस्वान्नं नराधिप ।
अन्नदानेन ते स्वर्गं भविष्यति न संशयः ॥
भक्त्या परमया युक्तः स्त्रिया सार्धमरिंदम ।
सपत्नीको यथा विप्रस्तथा त्वं कीर्तिमेष्यसि ॥
ईश्वरः सर्वभूतानां हृद्देशे समवस्थितः ।
तस्मादतिथयः पूज्या भोक्ता च परमेश्वरः ॥
यस्य गेहे यदा तुष्टो ह्यतिथिर्भक्ष्यभोजनैः ।
तदा देवाश्च तुष्यन्ति तस्मादन्नप्रदो वरः ॥

वैशंपायन उवाच ।

इत्येवमुक्तं यदुपुंगवेन
धर्मं महात्मा कुरुनन्दनश्च ।
पुनस्तथोवाच निपत्य मूर्ध्ना
पादारविन्दं परमस्य पुंसः ।

Colophon.

युधिष्ठिर उवाच ।

देवदेवारविन्दाक्ष शरणागतपालक ।
त्वमेव संशयच्छेत्ता सर्वदा मम सुव्रत ॥
धनाढ्या देवताभक्ता ब्रह्मभक्ता बहुप्रदाः ।
सत्पात्रे दानशीलाश्च प्रयान्ति परमं पदम् ॥

— (L 699) $G_{1,2}$ M_1 -हेमाङ्गी (for -जङ्घोरू) G(ed) उत्थिता हृष्टरोमाङ्गी (for ᵃ) G_2 जातवेद- (for जाम्बूनद-). G(ed) पतिभक्तिसमन्विता (for ᵇ) —(L 701) D_1 भुक्ता (for तृप्ता) G_2 च तेऽमरा (for द्विजोत्तमा) —(L 702) M_2 आह्वयस्व (for आन°). —(L 704) G_2 M_1 ह्याजुहाव (for व्याजहार) D_1 पतिं दुःखाकुलं तथा (for ᵇ). —(L. 706) G(ed) सर्वे (for तुष्टा) —(L 707) G(ed) शुभं (for शुभान्). — After the ref, D_1 ins. :

56** इति तस्या वचः श्रुत्वा स विप्रो ज्ञानशीलवान् ।
मा पश्यन्सर्वतो गत्वा यत्रास्ते भुवि देवता. ॥

—(L 710) D_1 विचिन्तयाति स द्विज. (for ᵇ). — For line 710, G(ed) subst

57** स्वप्ने दृष्ट्वा तु तत्सर्वं देवकृत्यं द्विजस्ततः ।

— (L 711) M_1 स गत्वा प्रणमन्सर्वान्, G(ed.) झटित्युत्थाय तान्सर्वान् (for ᵃ) — (L. 714) D_1 G_2 ईदृशम् (for °शा) — (L. 715) D_1 M_1 चित्ते तु, G_2 नित्तेन (for °षु) —(L 717) M_1 ज्योतिर्मय (for °यास्) — For line 717, G(ed) subst :

58** ततो ज्योतिःस्वरूपास्तु तान्दृष्ट्वा विस्मयं गतः ।

— (L 719) M_1 तृप्यन्तु ; G(ed) तृप्ताः स्युः (for तृप्यन्ति). G(ed.) भूसुर (for धर्मभृत्). — (L. 720) G_2 वयमिह (for ह्येते वयं) —(L 721) M_1 सुखम् (for स्थितिम्) —(L. 724) G(ed) तिरोहितोऽभूत्सुत्रामा (for ᵃ) M_1 साकम् (for सार्धम्). — G_2 om lines 725–726 —(L 725) M_1 अभि- (for यथा) —(L 727) M_1 समाहित (for नराधिप) — D_1 om lines 728–729 — (L 728) M_1 स्वर्गो (for स्वर्गं) —(L 731) G(ed) हृद्देशे वत्स तिष्ठति (for ᵇ). —(L 733) G_2 भक्ति- (for भक्ष्य-) — After line 734, G(ed) ins

59** अद्य वेत्ति च भूतानि तस्मादन्नं तदुच्यते ।

— D_1 G(ed) om the ref —(L 735) G_1 G(ed) -नन्दनेन (for -पुंगवेन). —(L 736) M_1 महान्त (for महात्मा). G(ed) धर्मं समाकर्ण्य कुरुप्रवीर . —(L 737) G_1 तदा ; G_2 च च, M_1 स च (for तथा). — After line 738, G_1 G(ed) ins.

60** य इदं पुण्यमाख्यानं शृणुयाद्देवसंनिधौ ।
ब्राह्मणानां समाजे वा स विप्रो नाकमश्नुते ।

COLOPHON —*Sub-parvan* : D_1 G_1 आश्चर्यपर्वणि शेषधर्माः ; G_2 M_1 G(ed) शेषधर्माः — *Adhy name* D_1 G_1 M_1 अन्नदानप्रशंसनम् ; G_2 अन्नदानमहिमा, G(ed) अन्नदानप्रशंसा. — *Adhy. no* . D_1 $G_{1,8}$ M_1 G(ed) 6

(L. 742) G(ed.) प्रयान्ति परमां गतिम् (for ᵇ). —(L.

रिक्तास्तु सर्वे मनुजा ह्यशक्ता दानकर्मसु ।
का गति कानि दानानि तेषां मे कृपया वद ॥
श्रीभगवानुवाच ।
शृणु पाण्डव वक्ष्यामि श्रोतृणामघनाशनम् ।
यस्य श्रवणमात्रेण वाजपेयफलं भवेत् ॥
निष्किचना हि मुनय सर्वे धर्मपरायणा ।
सदा सर्वहिते युक्तास्तोयदानाद्दिवं गता ॥
काञ्चनादीनि दानानि गृह्णन्ति गृहमेधिनः ।
उपर्युपरि वाञ्छन्ति तोयात्तृप्ता भवन्ति हि ॥
दानानामुत्तमं दानमन्नदानं तथा जलम् ।
सद्यस्तुष्टिकरं दानं प्राणिनां जीवन च यत् ॥
प्रीणनमपि सर्वेषां प्राणा वारिणि संस्थिता ।
तज्जलं ये प्रयच्छन्ति प्राणदा परिकीर्तिताः ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
श्रोतृणां सर्वपापघ्नमायुरारोग्यवर्धनम् ॥
पुरा किल महाराज सुशीलो ब्राह्मणोत्तमः ।
शान्तो जितेन्द्रियो विद्वान्मद्भक्तो नि स्पृह शुचिः ॥
वेदे च धर्मशास्त्रे च वेदान्ते परिनिष्ठित ।
उञ्छवृत्ति सदानन्दः सदा सर्वहिते रत. ॥
आतिथेयः सदा मौनी जलदाने सदा रतः ।
पशुपक्षिमृगादीनां मनुजानां विशेषत ।
मां च सर्वगतं ध्यात्वा जलदानं करोति सः ॥
पुण्यवृक्षान्समारोप्य सुपुष्पानपि पादपान् ।
पशुपक्षिमृगादीनां शीतलं तोयमुत्तमम् ॥
अवग्रहेऽपि राजेन्द्र महाकूपात्समुद्धृतम् ।
जलं ददन्सर्वकालमास्ते बदरिकाश्रमे ॥
देवा यक्षास्तथा सिद्धा गुह्यका अपि चारणाः ।
तस्याश्रमपद प्राप्य सदा क्रीडन्ति नि स्पृहा ॥
कदाचिद्बलभिद्देव. शङ्कितस्तस्य कर्मणा ।
सप्तार्चिषा समागम्य ययाचे जलमार्तवत् ॥
मित्रातपात्परिक्लिष्टौ जलपानसमुत्सुकौ ।
आवाभ्यां दीयतां विप्र जलं परमशीतलम् ॥
सुशील उवाच ।
कृतार्थोऽस्मि महाभागौ युवाभ्यां तारितोऽस्म्यहम् ।
अद्य मे सफल जन्म जीवितं च सुजीवितम् ।
अद्य मे वंशजा सर्वे मुक्ता एव न संशय ॥
एवमुक्त्वा सुशीलस्तु पादौ प्रक्षाल्य तौ द्विज ।
अद्य मे प्रीयतां विष्णुरित्युक्त्वासौ ददौ जलम् ॥
स पीत्वा तज्जल सर्वमपि तृप्त पुरंदर ।
दीयतां दीयतामस्मै शीतवारि च सत्वरम् ॥
तच्छ्रुत्वा वचनं तस्य ब्राह्मणो मयि तत्परः ।
पानीयशालिकामध्ये शून्यं भाण्डं ददर्श ह ॥
किमेतच्छून्यमभवद्भाण्डं पानीयपूरितम् ।
ध्यात्वा सर्वगतं विष्णुं पाहि पाहीत्यचिन्तयत् ॥
पानीयं नैव पश्यामि पिपासुर्ब्राह्मणोत्तमः ।
किं करोमि जगन्नाथ पाहि मां ब्राह्मणोत्तमम् ॥
कर्ता त्वं मम धर्मस्य देवदेव जगत्पते ।
कथं धर्मं तु भृत्यस्य भङ्गीकर्तुमिहार्हसि ॥

---

743) M_1 सक्तास (for रि°). —(L 746) D_1 M_1 लभेत् (for भवेत्) —(L. 747) $G_{1\,2}$ M_1 G(ed) पूर्वे (for सर्वे). —(L 748) G_2 सर्वदा सर्वतो युक्तास् (for ^{a}) —(L. —(L 749) G(ed) गृह्णन्ते (for °न्ति). —(L 750) M_1 तोय- (for तोयात्). G(ed) ते (for हि). —(L 752) G_1 द्वयम् (for च यत्) D_1 G_2 प्राणिना जीवन(G_2 °वित)द्वयम् (for ^{b}) —(L 754) D_1 ते प्र- (for परि-). —(L. 757) G(ed) सुशीलो नाम ब्राह्मण. (for ^{b}). —(L 758) G_2 श्रीमान् (for विद्वान्) —(L 761) G(ed) सदा धर्मरत. सुधी (for ^{b}) —(L. 762) M_1 मनुष्याणा (for °जाना). G(ed) om lines 762^b–765^a —(L. 764) D_1 सुफलान् (for सुपुष्पान्) —(L. 766) G_1 G(ed) महाकूपात (for ऽपि राजेन्द्र) and रज्ज्वा चैव (for महाकूपात्) —(L 767) G(ed) सार्वकालम् (for सर्व°) —(L 770) $G_{1\,2}$ ययाचे (for कदाचिद्) —(L 771) G(ed) आदरात् (for आर्तवत्). —After line 771, G(ed) ins ·

61** विप्रावूचतु. ।
आवा विद्धि महाप्राज्ञ चण्डातपसमाहतौ ।

—(L. 772) D_1 मित्रांशुतापितौ पुष्टौ (for ^{a}). D_1 $G_{1.2}$ G(ed)) -पानात् (for -पान-). (L. 773) D_1 अवश्यं (for आवाभ्या) G_1 अद्य (for विप्र) G(ed) तस्मान्नौ दीयतां क्षिप्र (for ^{a}). G(ed) -शीतकम् (for °लम्). — After line 773, G(ed) ins

62** तद्दीनवचन श्रुत्वा स विप्रो वेदवित्तम. ।
प्रोवाचातिविनीतात्मा वचन चेदमादरात् ॥

— G_1 G(ed.) om the ref —(L 774) G(ed) पारितो (for ता°). —(L 778) D_1 G_2 M_1 ददाति च (for ददौ जलम्) —(L 779) M_1 अपितृप्त (for अपि तृप्त). — For line 778, G(ed) subst ·

63** तत्पीत्वा निमिषादिन्द्रो ययाचे पुनरग्यहो ।

—(L 780) M_1 मेति, G(ed) मह्य (for अस्मै) M_1 प्रोवाच न्यायविस्तरम्, G(ed) शीत वारीति सत्वर. (for ^{b}) —(L. 781) D_1 ब्राह्मणो मत्प्रिय. पर, G(ed) °णो मत्परायण (for ^{b}). — After line 781, G(ed.) ins

64** मा सरन्नगमच्छीघ्र पानीयागारमुत्तमम् ।
तत्रापश्यद्भाण्डजात सर्वं विरहितं जलैः ॥

— G(ed.) om line 782 — $G_{1.2}$ M_1 G(ed.) -शालिकां (for °का-). —(L 783) M_1 पात्र (for भाण्डं). G(ed.) भाण्डजातमिति स ह (for ^{b}). —(L. 786) D_1 पाहि मां

पिता माता गुरुस्तीर्थं धर्मो बन्धु सुहृत्तमः ।
अतस्त्वं मम देवेश व्रतं पाहि नमोऽस्तु ते ॥
तथा वदति तस्मिन्वै ब्राह्मणे पाण्डुनन्दन ।
पूरयामास तद्ब्राण्डमन्तर्यामी जगद्गुरु ॥
शिखावान्समनुप्राप्य जलं वै सर्वतोदिशम् ।
अपिबत्सहसा राजन्कल्पान्ते वारिधि यथा ।
भूयोऽपिबद्दस्वेति प्रार्थयित्वा स धर्मज ।
ययौ पुरंदरपुरं वज्रिणा सह विस्मित. ॥
आश्चर्यं परमं गत्वा स विप्रो भार्यया सह ॥
खानयामास तत्कूपं तदा पातालसंनिभम् ।
प्रार्थयामास लोकेशं मामेवं पाण्डुनन्दन ॥
नमस्ते लोकनाथाय भुक्तिमुक्तिप्रदाय च ।
नमस्ते वासुदेवाय देवानां मूलरूपिणे ।
पाहि मां पुण्डरीकाक्ष त्वद्भक्तं कमलापते ॥
यथा हि मम धर्मस्य ह्यन्तराया न सन्ति हि ।
तथा मा पालयस्वेति भूयो भूयो ननाम च ॥
एवं भक्त्याददत्तोयं सर्वेषां प्राणिनामिह ।
आस्ते तत्र च विप्रेन्द्र ऋषिसंघनिषेवित ॥
तत पुरंदरो देवैरागत्य सह धर्मज ।
पपौ तत्र जलं सर्वं ग्रीष्मे तु पथिको यथा ॥
त्रि सप्तकृत्वस्तत्रैनं परीक्ष्य च पुन. पुनः ।
तद्धर्ममपहर्तुं वै न शशाक स वृत्रहा ॥
तथा हि मम भृत्यस्य कामाल्लोके व्यपोहितुम् ।
क समर्थो महाराज ममापि च न शक्यते ॥
भक्ताधीनो ह्यहं पार्थ तेषामिष्टं ददामि च ।
ताल्लोकेऽप्यन्यथा कर्तुं क समर्थो नु पण्डितः ॥
स्वर्लोकं समनुप्राप्य शङ्कितस्तस्य कर्मणा ।
द्वादशाब्दं सहस्राक्षो न ववर्ष तदाश्रमे ॥
कृपया मम धर्मात्मन्वर्धितं तोयमुत्तमम् ।
ददन्वै सर्वभूतानामास्ते तत्र मम प्रिय ॥
ततस्तु प्रेषयामास ग्रहान्सर्वाञ्शचीपति. ।
ते सर्वे समनुप्राप्य पपु पानीयमुत्सुका ॥
स्थितेषु तेषु सर्वेषु ह्येकत्र कुरुनन्दन ।
वृष्टिस्तदाभवच्छीघ्र कल्पान्ते ब्रह्मणो यथा ॥

इन्द्र उवाच ।

अन्यथा चिन्तितं कार्यं दैवेन कृतमन्यथा ।
अहमन्यच्चिन्तयामि दैवमन्यत्र चिन्तयेत् ॥
एवं चिन्ताकुलो राजन्सुत्रामा तु सुरै सह ।
स्वर्गार्होऽयमिति ज्ञात्वा तान्ग्रहान्समचिन्तयत् ॥
अर्दितान्वृष्टिभि सम्यक्कम्पमानान्महीसुरान् ।
सुप्तोत्थिता ग्रहा सर्वे ह्यब्रुवन्ब्राह्मणोत्तमम् ॥
सुशील सर्वधर्मज्ञ तृप्ता. सर्वे दिवौकस ।
पितरस्तव सुप्रीता प्रशंसन्तो दिवं गता ॥
कर्मणा तव धर्मात्मल्लोका सर्वे चराचराः ।
तुष्टो हि पुण्डरीकाक्षो वेत्ति धर्मं न चेतर. ॥
त्वमद्य गच्छ स्वर्लोकमनया भार्यया सह ।
सुत्रामा प्रार्थते त्वा तु वस्तुं धर्मभृतां वर ॥
वय ग्रहा इति ख्याता सूर्यचन्द्रादयो द्विज ।

जगदीश्वर (for [b]) — (L 788) G(ed) विनष्ट कर्तुमर्हसि (for [b]) — (L 789) G1 -सुहृत् (for गुरुस्) D1 धर्म- (for धर्मो) — (L 790) G(ed) सर्वं (for अतस्) G1 द्रुतं, G(ed.) धर्म (for व्रत). — (L. 792) G1 जगत्पति (for °द्गुरु.). — For line 792, G(ed) subst .

65** जलेन पूर्णमकरोद्ब्राण्डजात जगत्पति ॥

— After the above, G(ed) cont

66** तत' शिखावास्तत्सर्वं विलीनमकरोज्जलम् ।
देवदेवा तच्च पुन पूर्णमभूत्तदा ॥
एताच्चित्रं विलोक्येन्द्रो विप्र समान्य सत्वर ।
ययौ स्वर्ग सरच्छन्धत्त विप्र सार्थनामकम् ॥
तत' स विप्रप्रवरस्तत्र कूपान्बहूदकान् ।
कारयामास राजेन्द्र स्वधर्मपरिपालक ॥

— G(ed) om lines 793-798 — (L. 794) G1 जलधि (for वारिधि) — (L 795) M1 ऽपि स (for ऽपिबद्). D1 D2 तमुक्त्वा तु (for प्रार्थयित्वा) — (L 802) D1 त्वद्भृत्य (for त्वद्भक्त) — (L 804) G2 नमामि (for ननाम). — (L. 805) G(ed) बहु (for इह) — (L. 806) G(ed) सुवृत्त स च विप्रेन्द्र (for [a]) D1 G2 -निषेविते (for °त'). — (L 807) G(ed) पुनः (for तत) G(ed) सार्धमागत्य धर्मज (for [b]). — (L. 808) G(ed.) पपौ जलं यथापूर्वं (for [a]). — (L 813) G2 M1 भृत्याधीनो (for भक्ता°) G(ed) तदभीष्टप्रदो ह्ययम् (for [b]) — (L 814) M1 न पण्डित ; G(ed) महीपते (for नु पण्डित.) — After line 814, G(ed) ins

67** तस्मिन्क्षेप समुत्पाद्य सहस्राक्षोऽतिशङ्कित ।

— G(ed) om line 815 — (L 816) G(ed) तदा राजन् (for सहस्राक्षो) — (L 817) G1 वासित (for वर्धित). — (L 818) G(ed) मुमुदे तत्र स द्विज (for [b]) — (L 820) G(ed) नत्र (for सर्वे) — G1 om. the ref — (L 824) D1 G1 2 M1 अहमन्यत्र चिन्तामि (for [a]) G1 M1 चिन्तितम् (for चिन्तयेत). G(ed) दैवमन्यदचिन्तयत् (for [b]). — (L 825) G(ed) सुत्रामा तमृषि तदा (for [b]). — For line 826, G(ed) subst

68** महाभागवत ज्ञात्वा विनयादब्रवीदिदम् ।

— G(ed.) om lines 827-828. D1 om line 827. — (L 828) G2 सुरा (for ग्रहा) — (L. 831) धर्मज्ञ (for धर्मात्मल्ँ) — After line 831, G(ed) ins .

69** सुप्रीता अभवन्विप्रा नात्र कार्या विचारणा ।

— (L 834) D1 वस्तु धर्मभृता वर (for [b]). — For line 834, G(ed) subst. :

70** सुत्रामाह द्विजश्रेष्ठ तुष्टोऽसि तव धर्मत ।

विमानं सूर्यसंकाशं त्वदर्थं वै समागतम् ।
पश्यारोहतु यास्यामो भवान्भुङ्क्ष्व सुखं दिवि ॥
श्रीभगवानुवाच ।
ग्रहाणां तच्छ्रुतं वाक्यं निशम्य कुरुनन्दन ।
ययाचे लोकरक्षार्थं वरं नत्वा पुन पुन ॥
अत्रत्यानां तु सर्वेषामद्यप्रभृति धर्मिणाम् ।
दूरस्थानामपि यदि मुक्तिरत्र भविष्यति ।
नाकं भवतु लोकानां यदि मा नेतुमिच्छथ ॥
अन्यथा चेदहं ह्यत्र वसेयं तु यथासुखम् ।
नाकं गच्छथ यूयं वै प्रार्थयिष्ये रमापतिम् ।
ग्रहा ऊचुः ।
तरुगुल्मलतानां तु मृगाणामाततायिनाम् ।
सानिध्याल्लोकनाथस्य मुक्तिश्चापि भविष्यति ॥
इत्युक्त्वा तं समारोप्य विमाने सूर्यवर्चसि ।
सपत्नीकं समारोप्य विविशुर्नाकमव्ययम् ॥
चतुर्युगसहस्राणि भुक्त्वा भोगाननेकश ।
ततस्तु ब्रह्मणो लोकमवाप्य सुखमश्नुते ॥
तस्मात्त्वं सर्वदा राजन्प्रपां कृत्वा सुशोभनाम् ।
पानीयं शीतलं राजन्ददस्व सततं नृणाम् ॥
दरिद्राणामयं धर्म' स्वर्गमोक्षप्रदायक ।
सुराणा दुर्लभो ह्येष सुरलोके सुखप्रद ॥

वरमिममितिहास य शृणोतीह नित्यं
सकलकलुषशान्तिः सद्य एवेति विद्धि ।
सुरपतिवरलोके शृण्वतां भूसुराणां
भवति हि खलु वासो नात्र संदेहमस्ति ॥
Colophon
युधिष्ठिर उवाच ।
श्रिय पते नमस्तुभ्यं वृष्णीनां वंशवर्धन ।
त्वमेव सर्वशास्त्राणि वेदाश्चापि महामते ॥
तस्मात्त्वा प्रार्थयाम्यद्य पातुं धर्मामृतं प्रभो ।
पालयस्व च धर्मेण शास्त्रेण जगतीपते ॥
कन्यादानं प्रशंसन्ति मुनय. पुण्यदर्शिनः ।
धर्मं तं वद तत्त्वेन लोकनाथ नमोऽस्तु ते ॥
दानस्य को विधिस्तस्य क. कालः समुदाहृतः ।
त्वमेव वेत्सि तत्सर्वं कृष्ण संप्रति कथ्यताम् ॥
भगवंस्त्वद्वच सत्यं हितं परमपावनम् ।
अस्माकं हितकृन्नित्यं साक्षाज्जगत प्रभु ॥
कांल्लोकान्समवाप्नोति कन्यादाता सुरोत्तम ।
तद्भवान्वेत्ति तत्त्वेन वद संप्रति मेऽनघ ॥
श्रीभगवानुवाच ।
साधु पृष्टं महाबाहो त्वया कुरुकुलोत्तम ।
धर्मश्रवे यथाप्रीतिस्तथा ख्यातिर्भविष्यति ॥

—(L 835) एते (for वय). —(L 837) G_1 G(ed) पत्नी (for पश्य). G(ed) मुने (for भवान्) G_2 सुखानि च (for सुखं दिवि). —(L 838) D_1 तु (for तद्) G(ed) इन्द्रेणोक्त तु तद्वाक्य (for ᵃ) —(L 839) D_1 वदन् (for वरं.) —(L 840) $G_{1\ 2}$ अमर्त्याना, M_1 तत्रत्यानां (for अ°) D_1 कर्मणा (for धर्मिणाम्) — For line 841, G(ed.) subst.

71** दूरदेशादिहागन्तृजनाना च पुरदर ।

G(ed) cont.

72** स्वर्गप्राप्तिर्भवेन्नित्या मत्कूपजलपानत ।

—(L 842) G_2 लोकार्हे (for °ना). G(ed.) एवं वरं प्रयच्छ त्व (for ᵃ). — For line 844, G(ed) subst

73** यूय गच्छत वै नाक नाहमागन्तुमुत्सहे ।

—(L 845) G(ed.) -लतादीना (for °नां तु) — For line 846, G(ed) subst

74** भवत्कूपोदकस्पर्शान्मुक्तिश्चापि भवेद् ध्रुवम् ।

—(L 847) G(ed) समाहूय (for °रोप्य) —(L 848) G(ed) जगाम त्रिदिवं हरि (for ᵇ) —(L. 849) G(ed) त्रिविष्टपे (for अनेकश) —(L 850) G(ed) स (for तु). G(ed) सुखभागभूत् (for °मश्नुते) — (L 855) G_1 परम् (for वरम्) G_2 M_1 इदम् (for इमम्) G(ed.) भक्त्या (for नित्यं). —(L. 856) $G_{1,2}$ सद्य एवाभवद्धि; M_1 सद्य एवाभिवृद्धिः; G(ed) धर्मबुद्धिश्च सद्य (for सद्य एवेति विद्धि). — (L 857) G_1 -वरपर- (for -पतिवर-) —(L. 858) G(ed) [अ]स्ति सदेहबुद्धि (for [अ]त्र सदेहमास्ति)

Colophon. — *Sub-parvan* D_1 $G_{1,2}$ M_1 G(ed.) शेष-धर्म, $G_{1\ 2}$ भविष्यपर्व — *Adhy. name* · D_1 G_1 G(ed.) पानीयदानप्रशसा, G_2 पानीयदानम्, M_1 पानीयप्रशंसनम्. — *Adhy. no* D_1 $G_{1,2}$ M_1 G(ed) 7.

(L 860) G(ed) त्वमेव वेत्सि वेदाश्च (for ᵃ). D_1 वेत्सि, G_1 चैव (for चापि). G(ed) वेदाङ्गानि च सर्वज्ञ (for ᵇ). —(L 861) M_1 ज्ञातुं (for पातु) —(L. 862) G(ed) मामद्य (for धर्मेण) D_1 शास्त्रेण जगता पते; M_1 °ण च महीपते, G(ed) धर्मतत्त्वोपदेशत· (for ᵇ) —(L. 863) M_1 -शालिन. (for दर्शिन'). — (L 864) G_1 नम. (for ऽस्तु ते). — For line 864, G(ed.) subst

75** तद्दानस्य च माहात्म्यं कृपया वद सुव्रत ।

—(L 865) G_1 ऽहो लोकेश, G_2 ऽहो नाथ क (for विधिस्तस्य) M_1 दानस्य लोके को नाथ· (for ᵃ). — G(ed.) om. lines 866–868 —(L 868) D_1 जगतां (for °तः) M_1 त्वं साक्षाज्जगतीपति· (for ᵇ). —(L 869) G_1 G(ed.) -दानात्; G_2 M_1 -दाने (for -दाता) — G_1 G(ed.) om line 870. —(L. 871) D_1 G(ed) महाभाग (for °बाहो). — For line 872, G(ed.) subst. :

76** धर्मान्प्रष्टुं तथा ज्ञातुं त्वमेवार्हसि नेतरः ।

सुरूपाय सुशीलाय कुलीनाय निरोगिणे ।
कन्या दद्याच्छुभाल्लोकाल्लभते नात्र संशय ॥
सुश्रुनाय दरिद्राय श्रोत्रियस्यात्मजाय च ।
यो दद्यात्तु स्वका कन्या ब्रह्मलोकं स गच्छति ॥
कन्याभावे धन दत्त्वा विवाह कारयेद्बुध ।
न तस्य लोका क्षीयन्ते यावदाचन्द्रतारकम् ॥
विषुवायनसंक्रान्तौ चन्द्रसूर्योपरागयो ।
पुण्यक्षेत्रे पुण्यतीर्थे कन्यादो मोक्षमश्नुते ॥
पितृदेवगणास्तात कन्यादानात्सुपूजिता· ।
गन्धर्वै स्तूयमानास्ते प्रयान्ति मम मन्दिरम् ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
सर्वपापप्रशमनमायुर्वर्धनकारणम् ॥
पुरा कृतयुगे राजन्नर्मदायारतटे शुभे ।
धर्मव्रतो महानासीत्कौण्डिन्यकुलसंभव ॥
शान्तो जितेन्द्रियो विद्वान्वेदवेदाङ्गपारग. ।
अग्निहोत्री सदामौनी तस्मिन्नास्ते तपोवने ॥
स कदाचिन्महाभाग. शिष्यैः सह जितेन्द्रिय ।
वनं जगाम धर्मात्मा ह्येधानाहर्तुमुद्यत. ॥
कन्दमूलफलाकीर्णे समित्पुष्पकुशावृते ।
इन्धनार्थं विसृज्यैतान्वनमन्यदुपाविशत् ॥
महावराहनिचयै. कस्तूरीमृगसेवितम् ।
शार्दूलै श्वापदैः सिंहैर्गजैरश्वैर्वृकैरपि ॥
ऋक्षजम्बूकनागैश्च वानरीचमरीगणै ।
डाकिन्यादिगणैः क्रूरैर्वृकनादैरनेकशः ॥
महाघोरैरजगरै राक्षसै· पिशिताशनै· ।
एवं बहुविधैरन्यैर्जन्तुभिः परिवारितम् ।
पश्यन्वनं भयकरं प्रविवेश महामति· ॥
वनशोभां क्वचित्पश्यंस्तिष्ठन्नासीन एव च ।
शुश्राव च महानादं रक्ष रक्षेति चाग्रतः ॥
तेन शब्देन महता विस्मयं परमं गत ।
भयंकरे महाघोरे मन्दं मन्दं चचार ह ॥
तमन्वेष्टुमना विप्र किंचिद्दूरतरे नृप ।
वृक्षवल्लीसमाकीर्णे कूपमेकं ददर्श ह ॥
कण्टकीद्रुमसकीर्णं द्रुमैराच्छादितं महत् ।
हुंकारनादितं घोरं महोरगनिषेवितम् ॥
तं दृष्ट्वा सहसा राजन्किंचित्साध्वससंयुतः ।
आश्रम पुनरागन्तुमुपचक्राम धर्मवित ॥
तस्मिन्नवसरे राजन्महाकूपे महास्वन ।
आयाहि पश्य रक्षेति तदाराद्रुत्थितो भृशम् ॥
श्रुत्वा तदद्भुताकारं पुनर्वीक्ष्य महाबलम् ।
को भवान्वद तत्त्वेन किं करोमीति चाब्रवीत् ॥
इत्याकर्ण्य वचस्तस्य तदाराद्धूम उत्थित ।
तस्मात्कूपात्समाकृष्य मा भैषीरित्युवाच तम् ॥
धर्मव्रत महाभाग ह्यस्मान्पश्य महामते ।
पितॄनेतांस्त्वदीयान्वै विद्धि तथ्यं ब्रवीमि ते ॥

धर्मव्रत उवाच ।

किमर्थमत्र स्थीयन्ते युष्माभि पितृमूर्तिभि ।
पितृलोकं विसृज्यैव सत्यमेवं ब्रुवन्तु मे ॥

पितर ऊचु ।

येनेमामीदृशी प्राप्ता गतिं गतिमतां वर ।
वक्ष्यामो वयमद्यैव शृणु नान्यमना हि ताम् ॥
अस्मिन्कुले महाभाग धर्मिणो नैव सन्ति हि ।
तस्मादिमामवस्था वै प्राप्ता एव न संशयः ॥
अन्नदा गृहदाश्चैव भूप्रदा गोप्रदास्तथा ।
गङ्गास्नानरता नैव गङ्गायां पिण्डदास्तथा ॥
पुण्यतीर्थरता नैव सत्पात्रे दानतत्परा· ।
तिलदा घृतदा नैव अन्नदा जलदास्तथा ॥
अयने विषुसंक्रान्तौ व्यतिपाते तथाष्टके ।
सोमसूर्योपरागे च नार्चयन्ति हि किंचन ॥

—G_1 om. lines 873–875 —(L. 873) G(ed) ह्यरोगिणे (for नि°).—(L 879) D_1 M_1 अयने विषुवि(M_1 °स)क्रान्तौ (for ^{a}) —(L. 880) D_1 करपादौ (for कन्यादो) —(L 881) M_1 पितृमातृ- (for °देव-) G(ed.) तस्य (for तात). G(ed) भवन्ति हि (for कन्यादानात). — (L 883) M_1 अत्रैवोदाहरिष्येऽहम् (for ^{a}) — (L. 884) G_2 आयुरारोग्यवर्धनम् , M_1 °वर्धनमुत्तमम् (for ^{b}). —(L 886) G(ed) भूषण (for -संभव). — (L 889) G_1 G_2 M_1 G(ed) महाभाग (for °भागः) — (L 891) D_1 -फलान्वितम् , G_1 -कुशान्विते (for °वृते). G(ed) वृक्षसघाकुले वने (for ^{b}) — (L 892) G_1 G(ed) दूरम् (for अन्यद).— (L 893) G(ed) कस्तूरीभिश्च सेवितम् (for ^{b}) — (L 894) G_1 च गवयैर् (for अश्वैर्वृकैर्) — (L 895) G(ed) -हरिणैर् (for -नागैश्च) G(ed) वानरैश् (for °री-). — (L. 896) G_1 G(ed) उलूकाद्यैर् (for वृकनादैर्) — (L 898) D_1 परिपूरितम् (for परिवा°). —(L. 899) G(ed.) स पश्यन्वै (for पश्यन्वनं). — (L. 901) G(ed.) सु- (for च) — (L 903) M_1 महारण्ये (for °घोरे) — (L 904) D_1 तमन्वेष्टु समाविष्ट (for ^{a}) M_1 दूरचरो , G(ed.) दूरान्तरे (for दूरतरे) — (I 906) D_1 कण्टक- (for °की-) — (L. 909) G_1 G(ed) आयातुम् (for आगन्तुम्) D_1 M_1 G(ed) धर्मज (for °वित्). — (L 911) G_1 $_2$ दु खितो (for उत्थितो) — (L 912) G(ed) महास्वनम् (for °बलम्). — (L 915) D_1 समाकर्ण्य , G_2 M_1 G(ed) तमाकृष्य (for स°) G_2 मा भैषीरिति चाब्रवीत् (for ^{b}) — Before line 916, G_2 ins धूम — (L 917) G(ed) ब्रुवाम (for ब्रवीमि). G_1 विद्धि तत्त्व ब्रुवाम ते (for ^{b}) — (L 918) G(ed) किमत्र ताता स्थीयन्ते (for ^{a}) — (L 919) M_1 -लोकान् (for -लोक) — (L. 920) D_1 एते अमीदृशीं प्राप्ता (for ^{a}). — (L. 924) D_1 भूमिदाश् (for गृह°) G(ed) गृहदा (for भूप्रदा) — D_1 om line 925 — (L 928) G_1 $_2$ विषुवायनसक्रान्तौ (for ^{a}) — (L 929) G(ed) नार्पयन्तीह किंचन (for ^{b}). — (L. 931) D_1 -रताश् (for -पराश्). G_2 साति-

न स्मरन्ति पितॄंस्तात कथं कुर्वन्ति तेऽधुना
पञ्चयज्ञपराश्चैव ह्यातिथेया न सन्ति हि ॥
वासन्तिके तथा काले जलदा पुण्यदा न च ।
वसुदा न तु धर्मिष्ठास्तथा ताम्बूलदा न च ।
शाकमूलफलाना तु दातारो नैव सन्ति हि ।
प्रात स्नानरताश्चैव मध्याह्ने स्नानतत्पराः ॥
कार्त्तिके मासि माघे च दीपदा देववेश्मनि ।
नैव सन्ति हि यज्वानो त्वदृते वत्स सप्रति ॥
उपवासरता नैव ह्येकादश्यां शुभे दिने ।
अनन्तफलदे माघे ह्येकभुक्तरता न च ॥
उपवासरता नैव शिवरात्रिशुभे दिने ।
वृषोत्सर्गं न कुर्वन्ति कार्त्तिके मासि कन्यदा· ॥
नैव सन्ति हि धर्मात्मन्नुपरागे तथान्नदाः ॥
माघस्नानरता नैव व्यतीपातव्रते परा ।
स्वकर्मनिरताश्चैव नैव सन्ति हि केचन ॥
पुराणधर्मशास्त्रज्ञा वेदवेदाङ्गपारगा ।
पुराणश्रवणे सक्ता क्षणमात्रमपि द्विज ॥
पुराणे भक्तिमन्तश्च श्रौतस्मार्तेषु तत्पराः ।
अर्कद्विपर्वरात्रीषु ह्येकभुक्तरता न च ॥
कन्यागते यदा सूर्ये पितॄन्न प्रीणयन्ति च ।
ज्ञानिनो विष्णुभक्ताश्च सूर्यभक्तास्तथा न च ॥
अग्निशुश्रूषवश्चैव काले काले न सन्ति हि ।
शुश्रूषवश्च महता सेवकाः केशवं प्रभुम् ॥
अभिषेकरता नैव विष्णौ रुद्रे महामते ।
रुद्रपौरुषसूक्ते च जपशीला न सन्ति हि ॥
अध्यात्मशास्त्रपठने नमस्कारे विवस्वत ।
सौराघ्र्यैनिरता विप्रा नैव सन्ति हि मत्कुले ।
तेनेमामीदृशीं प्राप्ता गतिं धर्मभृतां वर ॥

श्रीभगवानुवाच ।

एतान्धर्मांस्तदा श्रुत्वा कम्पमानो महामति· ।
क्षमध्वमिति मत्कर्म पपात भुवि मूर्छित ॥

वैशंपायन उवाच ।

आश्वास्य विप्रं ते देवा· पितृमूर्तिधरा· शुभा ।
मैवं तेऽप्युक्तमात्रे तु विस्मितो ब्राह्मणोऽब्रवीत् ॥

ब्राह्मण उवाच ।

किं करोमि च हे तात युष्माकमपि यत्प्रियम् ।
तत्सर्वमद्य मे यूय ब्रुवन्तु ह्यविशङ्कया ॥
येन धर्मेण युष्माकं ब्रह्मलोको भविष्यति ।
तदद्य एव वः प्रीत्यै यतिष्ये कर्तुमुत्तमम् ॥

पितर ऊचुः ।

पितॄणां मोक्षदं दानमसंख्यातं महीतले ।
तथापि शृणु वक्ष्याम· सर्वदानफलात्मकम् ॥
ब्रह्मणा हि पुरा दत्तं पितॄणां मुक्तयेऽनघ ।
वक्ष्यामस्तद्वच सत्यं श्लोकरूपस्तवाग्रत· ॥
दास्यन्ति यदि कन्या स्वां सर्वदानफलात्मिकाम् ।
युष्माकं स्वप्रसूतां वै ब्रह्मलोको भविष्यति ॥
कन्याभावे स्वकाद्द्रव्याद्विवाहं कारयन्ति ये ।
तेषामपि पितॄणा च ब्रह्मलोको भविष्यति ॥
स्वयंभुवा पुरादत्तं पितृमुक्तिकरं परम् ।
तदाप्रभृति धर्मिष्ठा वाञ्छन्ति पितरोऽनिशम् ॥
ब्रह्मलोकप्रद ह्येतत्कन्यादानमनुत्तमम् ॥
पश्य कूपं महाभाग पूरितं विषजन्तुभिः ।
धूमाकुलान्कृशान्दीनान्प्रार्थ्यमानास्तिलोदकम् ॥

थेया (for ह्या°) — M1 om. lines 932–934. — (L. 933) D1 वस्त्रदा न, G2 वस्त्रदा ये (for वसुदा न) — (L. 934) G(ed.) -फलादीना (for °ना तु) — (L 935) G(ed) माध्याह्निकपरा न च (for [b]) — (L 936) D1 G2 माघमासे (for मासि माघे) — (L 937) D1 त्वादृशा, M1 G(ed) त्वामृते (for त्वदृते). — D1 om. lines 938-939. — (L 940) D1 -व्रता· शुभे (for -शुभे दिने). — (L 941) G(ed) पामरा. (for कन्यदा·) — (L 943) G(ed) रता (for परा) — (L 945) D1 G1 -वेदाङ्ग- (for -वेदान्त-) — (L 946) D1 पुराणश्रवणासक्ता (for [a]). — (L 948) G1 2 रात्रौ च (for -रात्रीषु). — (L. 954) G1 -सूक्ताभ्या, G(ed) -सूक्ताना (for -सूक्ते च) G(ed.) जापका नैव सन्ति हि (for [b]) — (L 955) G1 अध्यात्मशास्त्रोत्पन्नेन (for [a]) G(ed) विवस्वाति (for °त·) — (L. 956) G1 सौराख्य- (for °र्घ्य-) D1 नियता (for -निरता). — For line 956, G(ed) subst

77** सौराख्यसूक्तपठने निरता नैव सन्ति हि ।

— (L. 958) G(ed.) वाच धर्म्यामिमा श्रुत्वा (for [a]).

— (L 959) G1 प्रापतद्, G(ed) सोऽपतद् (for पपात) D1 चाशु स (for मूर्छित·) — G2 श्रीभगवान् (for वैशंपायन). — After the ref, G(ed.) ins. .

78** ततस्त प्रणत भूमौ विषण्णमतिविह्वलम् ।

— After line 960, G(ed) ins .

79** उत्तिष्ठ साधो विप्रर्षे शृण्वस्मद्वाक्यमादरात् ।

— (L. 961) G1 G(ed.) एतावद् (for मैव तेऽपि). — (L. 965) G1 तदद्यैव वच· प्रीत्यै (for [a]). — For lines 965–966, G(ed) subst.

80** तदद्यैव च संप्रीत्या वक्तुमर्हथ सादरा· ।

पितरः ।

पितॄणा मोक्षदान्यत्र बहुदानानि सन्ति हि ॥

— (L 967) G1 -फलाधिकम् (for °त्मकं) G(ed.) दानं सर्वोत्तमं महत् (for [b]) — (L. 968) G(ed.) सृष्ट (for दत्त). — (L 969) G1 G(ed) वक्ष्यामस्तव यत्कृत्य (for [a]). G2 मोक्षरूप, M1 श्लोकरूपं (for °रूपम). G(ed.) कर्तव्यं श्लोकरूपतः (for [b]). — (L 970) D1 -फलात्मकाम्; G2 °त्मकम् (for °त्मिकाम्). — (L. 971) G(ed) सुता ब्राह्मेण विधिना (for [a]).

न कृतं चेदिदं नूनं भवद्भिर्लोकविश्रुतैः ।
अस्मिन्कूपे वयं मग्ना जीर्णदूर्वास्थिता ध्रुवम् ॥
तद्गच्छ साधो तत्सर्वं कारयस्वास्मदाज्ञया ।
स्वस्ति तेऽस्तु गमिष्याम इत्युक्त्वान्तर्दधुस्तदा ॥
ब्राह्मणो विस्मयाविष्ट प्रणम्य च मुहुर्मुहु ।
स्वाश्रम प्राप धर्मिष्ठ शिष्यै सह महामते ॥
सर्वेषामपि विप्राणां तन्निवेद्य युधिष्ठिर ।
कारयामास तत्सर्वं विप्रै सर्वैर्नरैरपि ॥
तस्मात्त्वमपि राजेन्द्र बहु दत्त्वा वसु स्वकम् ।
कारयस्व विवाहं वै विप्रान्विप्रहिते रतः ॥
पितरस्तृप्तिमेष्यन्ति देवास्तृप्ता भवन्ति हि ।
कन्यादानाच्च ते वृद्धिर्भविष्यति न संशयः ।
सर्वदानफलं तेऽस्तु कन्यादाने युधिष्ठिर ॥
श्राद्धकाले नु यो विप्र कीर्तयेत्पितृसंनिधौ ।
पितरस्तृप्तिमेष्यन्ति सोऽपि पापै प्रमुच्यते ॥

वैशंपायन उवाच ।

इदं रहस्यं परमं पवित्रं
य श्रावयेद्ब्रह्मसभासु विद्वान् ।
ज्ञातैरपि ज्ञानकृतैरघौघैः
सद्यो विमुक्त सुरलोकमेति ॥

Colophon

वैशंपायन उवाच ।

मुरारेः पादकमल धर्मपुत्र प्रणम्य च ।
पुनरेवापरं धर्मं पृष्टवान्गरुडध्वजम् ॥

युधिष्ठिर उवाच ।

सर्वेषामेव धर्माणां सत्यमाहुरनुत्तमम् ।
लोकनाथ नमस्तेऽस्तु सत्यरूपं वदस्व मे ॥
येन देवा दिव यान्ति येन सर्वं प्रतिष्ठितम् ।
येन वेदविदो यान्ति तथापि मनुजोत्तमा ॥
येन पुत्रान्प्राप्नुवन्ति ह्यद्यापि पुरुषोत्तम ।
येन बन्धुजनं विद्यां कीर्तिं च विपुलां श्रियम् ।
तद्धर्मं वद तत्त्वेन लोकनाथ नमोऽस्तु ते ॥
हरिश्चन्द्रादयो भूपा धर्मिष्ठा सत्यवादिन ।
सुरलोके वासुदेव तिष्ठन्त्यद्यापि न श्रुतम् ॥
तस्मिन्नवसरे देवी द्रौपदी शुभदर्शना ।
यदूना पतिमव्यक्तं जगौ लोकगुरु प्रति ॥

द्रौपद्युवाच ।

भगवन्पुण्डरीकाक्ष मायातीत महामते ।
अजातशत्रोर्व्याजेन मामुपाकर्तुमर्हसि ॥

वैशंपायन उवाच ।

उभयोस्तद्वच श्रुत्वा कृष्णस्तु जगतीपति ।
सस्मितं वचन चेदमब्रवीद्वदतां वर ॥

श्रीभगवानुवाच ।

साधु साधु महाप्राज्ञ प्रसिद्धोऽसि जगत्त्रये ।
यस्माद्धर्मे मतिस्ते वै जायते धर्मवल्लभे ॥
सत्य पिता च माता च सखा भ्राता युधिष्ठिर ।
भोक्ता पालयिता हन्ता सत्यमाहुर्विपश्चित ।
सत्येन जायते मुक्ति सत्यात्पापक्षयो भवेत् ॥

युधिष्ठिर उवाच ।

असत्यवादिनो देव स्वर्गं यान्तीति न श्रुतम् ।
तत्कथं देवदेवेश भवान्वेत्तीति मे मति. ॥

श्रीभगवानुवाच ।

गोब्राह्मणार्थे चात्मार्थे स्व्यर्थे च भरतर्षभ ।

G(ed.) भवेद् ध्रुवम् (for भविष्यति). — G_2 om lines 972–973. — (L. 979) G(ed) तद् (for चेद्). D_1 त्वया (for इद). G_1 दान (for नून) — (L 980) G(ed) जीर्णदूर्वावलम्बिन (for ^{b}) — (L. 981) D_1 ममाज्ञया, G_1 सुता° (for [अ]स्मदा°). — (L. 984) G(ed) स्वाश्रय प्राप्य स सुधीः (for ^{a}) D_1 महामति. (for °मते) — (L. 985) D_1 निगाद्य (for निवेद्य). G(ed) यथाश्रुतम् (for युधिष्ठिर) — (L. 986) G(ed) अपि द्रुतम् (for नरैरपि). — (L 988) G(ed) विवाहान् (for °ह) — (L 989) G(ed) देवाश्च त्रिदिवौकस. (for ^{b}) — (L 990) G(ed) मुक्तिर् (for वृद्धिर्) — (L 991) G(ed) कृते सति (for युधिष्ठिर) — (L 993) M_1 देवास्तृप्ता भवन्ति हि (for ^{b}) — (L 996) G(ed) अविज्ञात- (for अपि ज्ञान) G_2 अमोघै (for अघौघै) D_1 ज्ञानैरविज्ञानकृतैरमोघै

COLOPHON — *Sub parvan* : D_1 आश्चर्यपर्व. — *Adhy name* : D_1 G_1 M_1 G(ed.) कन्यादानप्रशंसनम् (D_1 °सा), G_1 कन्यादानम् — *Adhy. no.* : D_1 $G_{1,2}$ M_1 G(ed.) 8

(L 999) G_1 G(ed) पप्रच्छ (for पृष्टवान्) — (L 1000) D_1 $G_{1,2}$ M_1 विपश्चित (for अनुत्तमम्) — (L 1002) G(ed) यस्मिन् (for the second येन) — G_1 M_1 om line 1003 — (L 1003) G_2 पुत्रा दिव (for वेदविदो). — For line 1003, G(ed) subst

81** यच्च स्वर्गस्य सोपानं पारावारस्य नौरिव ।

— G(ed) om line 1004 — (L 1005) G(ed) येन बन्धुषु विख्यात. (for ^{a}) G(ed) प्राप्नोति (for कीर्तिं च) — (L 1009) G_2 देव (for देवी) — (L 1010) G(ed) अव्यग्र (for °क्त) — (L 1013) G_1 वचन (for तद्वच) — (L. 1015) D_1 महाभागे, G(ed) °प्राज्ञे (for °प्राज्ञ) D_1 M_1 प्रसिद्धा (for °द्धो) — (L 1016) G_2 ततो भक्तिर् (for मतिस्ते वै) D_1 M_1 यस्माद्धर्मेषु ते भक्तिर् (for ^{a}) G_2 -वत्सल (for -वल्लभे). — (L 1019) $G_{1,2}$ M_1 G(ed.) सत्यै (for सत्यात्) — (L 1020) D_1 M_1 देवा (for देव). G(ed) याता (for यान्ति) — (L 1021) G_2 G(ed) वेत्तीह (for °ति) G(ed.) वद (for मति.) — (L. 1023) G_1 तदघ तस्य

विपत्तावनृतं ब्रूयादघं तस्य न विद्यते ॥
एतानृते तु राजेन्द्र वदेच्चेदनृतं नर ।
नरकं तस्य विज्ञेयं युगानामयुत प्रभो ॥
सत्य ममेति संकल्प्य योऽवतिष्ठति भूतले ।
तेन पूतमिद सर्वं जगत्स्थावरजङ्गमम् ॥
सत्येन स्थापिता पूर्वं चन्द्रसूर्यादयो ग्रहाः ।
दिवि देवगणा सर्वे सेन्द्रा दिग्दन्तिनस्तथा ॥
बहुविद्याप्रद सत्य बहुकीर्तिप्रदं शुभम् ॥
पापघ्नं दुरितघ्नं च सत्यं तस्माद्वदेत्सुधी ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
वक्ष्ये पापहरं नृणां श्रोतॄणां च सुखप्रदम् ॥
सुमतिर्नाम विप्रेन्द्रो वेदवेदाङ्गपारगः ।
व्याघ्रस्य काञ्चनाक्षस्य सत्यमुक्त्वा दिवं गतः ॥

युधिष्ठिर उवाच ।

सुमतिव्याघ्रयो सत्य कथं जातं महामते ।
कुत्र स्थितौ महात्मानौ सर्वं तत्कथयस्व मे ॥

श्रीभगवानुवाच ।

पुरा कृतयुगे राजन्कावेर्या सरितस्तटे ।
शङ्खतीर्थमिति ख्यातं सर्वसिद्धनिषेवितम् ॥
यक्षगन्धर्वनिचयैर्मुनिवृन्दैर्निषेवितम् ।
चम्पकाश्वत्थपुंनागपनसै फलमण्डितै ॥
कपित्थचूतबिल्वैश्च कदलीजम्बुनिम्बकै ।
एतैरन्यै पुण्यवृक्षैर्नानामृगगणैरपि ।
मयूरैः परभृनाभिश्च चक्रवाकोपशोभितम् ॥
तत्रासीत्सुमतिर्नाम ब्राह्मणो वेदपारगः ।
शिष्यै प्रशिष्यैस्तच्छिष्यै साक्षादिव पितामहः ॥
एकदा तु महाराज शिष्यैः परिवृतो वशी ।
कन्दमूलफलान्येधांस्याहर्तुं वनमाविशत् ॥
आहूय सर्वान्मतिमाञ्शिष्यान्प्राज्ञान्सुशीलवान् ।
अब्रवीच्च तदा वाक्यमेकैकं प्रति धर्मज ॥
शृण्वन्तु मद्वचः शिष्या यदर्थं वयमागतः ।
कन्दमूलफलान्येधांस्यानयध्व ममान्तिकम् ॥
तावदत्र समित्पुष्पमाहरिष्ये कुशानपि ।
व्याघ्रचोरभय नास्ति युष्माकं तु वने द्विजा ॥
इत्युक्त्वा तु महातेजा सर्वांस्तान्पर्यमोचयत् ।
पश्यन्वनानि पुण्यार्थमेक एवाचरत्तदा ॥
विषोल्बणैर्महानागैर्वृकजम्बुकसंकुलै ।
ऋक्षव्याघ्रसमूहैश्च वृकनादैर्भयंकरम् ॥
वनमेवं बहुविधं पश्यन्सुमतिरात्मवान् ।
व्याघ्रन्सर्वगत मा च विचचार नृपोत्तम ॥
एतस्मिन्नन्तरे मूर्खो व्याघ्रो वै मांसलोलुप ।
उड्डीयोड्डीय वेगेन द्विजस्य निकटं गत ॥
ब्राह्मणो विस्मयाविष्टो दिशो दश विलोकयन् ।
पश्यन्व्याघ्र भयकरं गन्तुं समुपचक्रमे ॥
गच्छन्तं ब्राह्मण प्रेक्ष्य लाङ्गूलं विनिहत्य च ।
समुल्लिखन्पदाभ्यां तु जगृहे दक्षिण भुजम् ॥
हन्तुं कृतमतिं व्याघ्रं ब्राह्मणो गतभीस्तदा ।
रक्ताक्षं दीर्घलाङ्गूलं दीर्घदंष्ट्रं तदाब्रवीत् ॥
भो भो साधो वृथा मां त्वं हनिष्यसि निरागसम् ।
मया किमपराधं ते कृतं व्याघ्र वदस्व तत् ॥
कृतापराधिन लोके शिक्षां कुर्वन्ति भूमिपा ।
न हिंसन्ति वृथा सौम्य सज्जना अपि प्राणिनम् ॥
अस्मिञ्जन्मनि हे व्याघ्र मया कस्यापि विप्रियम् ॥
न कृत पूर्वजनने ह्यस्ति चेत्तद्वदस्व मे ॥
कन्दमूलफलाहारैर्वर्तयन्तमनागसम् ।
मां वृथा बाधसे व्याघ्र व्रतै कृच्छ्रादिभि कृशम् ॥
ग्रीष्मे पञ्चाग्निमध्यस्थ हेमन्ते जलवासिनम् ।
वर्षर्तौ पतितां वृष्टिं मेघवृन्दात्समन्तत ॥
सहिष्णुं सर्वदा शुद्धं मुकुन्दप्रियदर्शनम् ।
मां वृथा बाधसे व्याघ्र निर्मांस मांसलोलुप ॥
परपीडापर नित्यं परनिन्दापरायणम् ।
असत्यनिरतं मूर्खं देवब्राह्मणनिन्दकम् ॥
गुरुनिन्द दुराचारं धर्मविक्रयिण खलम् ।
पञ्चयज्ञविहीन च प्रात स्नानविवर्जितम् ॥
जपोपासनहीन च संध्यावन्दनवर्जितम् ।
राक्षसाश्च पिशाचाश्च बाधन्ते त्वादृशा अपि ॥

विद्यते (for ^{b}) —(L. 1026) G_1 यावत्; G_2 यो वा (for योऽव-) —(L 1029) G_1 प्रभो (for तथा). —(L. 1031) G(ed) दुःखनाशं (for दुरितघ्न). G_1 कृत्यं (for सत्यं) —G_1 om lines 1032–1033 G_2 G(ed) om line 1033. —(L. 1037) G_1 G(ed) कुत्र स्थितो महात्मासौ, G_2 कुत्रत्य को महात्मासौ (for ^{a}) —(L. 1039) $G_{1\,2}$ G(ed) -सिद्धि (for -सिद्ध-) —(L 1043) G_1 G(ed) पुष्प- (for पुण्य-). —(L 1044) Hypermetric D_1 परभृद्भिश्च, M_1 °पुष्टाभिश् (for °भृनाभिश्च) D_1 G(ed) चक्रवाकैश्च शोभि(D_1 सेवि)तम् (for ^{b}) —(L 1046) G(ed) शिष्यवृन्दान्वितो नित्य (for ^{a}) —(L 1048) $G_{1\,2}$ corrupt; G(ed) फलादीनि हि (for °न्येधांसि). —(L 1049) M_1 आदाय (for आहूय). D_1 धृतिमाञ्छ् (for मति°). G(ed) सुशीलतः (for-°वान्) —(L. 1051) D_1 $G_{1\,2}$ M_1 पुत्रा (for शिष्या). —(L 1052) G(ed) एतान् (for एधांसि). —(L. 1054) M_1 G(ed) सुताः (for द्विजा). D_1 G_1 युष्माक शृणु तद्वचः; G_2 °क शृण्वता सुता (for ^{b}) —(L 1056) G(ed) चित्राणि हि (for पुण्यार्थम्). G_2 चरन् (for [अ]चरत्). —(L. 1058) G_2 -वराहैश् (for -समू°) M_1 सूकराद्यैर् (for वृकनादैर्). G(ed.) तथा नादैर्भयंकरै (for ^{b}). —(L. 1066) D_1 समुल्लिख्य (for °खन्). —(L 1070) G(ed.) अपराद्धं (for °धं). G_2 मे (for तत्). —(L 1072) G(ed.) दुर्जना अप्यपापिनम् (for ^{b}). — G(ed) om. (hapl.) lines 1076^b–1080^a. —(L 1081) G_1 G(ed.) -करं (for -परं). G_2 -बाधा-, G(ed) पीडा- (for -निन्दा-). —(L. 1082). G_1 -हिंसकम् (for -निन्द°). —(L. 1083) G(ed.) गुरुनिन्दा-

शुचिं गोविन्दभक्तं मां वृथा त्वं बाधसेऽधुना ।
शुष्केनानेन देहेन तव चेन्न प्रयोजनम् ॥

वैशंपायन उवाच ।

निशम्य वचन तस्य ब्राह्मणस्य नृपोत्तम ।
व्याघ्रोऽवदन्महाघोरो ब्राह्मणं विगतस्पृहम् ॥
शृणुष्व विप्रशार्दूल क्षुधितस्य च मद्वच ।
अस्थि वापि त्वचं वापि भाक्षिष्ये त्वत्कलेवरम् ॥
महापापानि कृत्वापि परपीडामथापि वा ।
आत्मा संरक्षणीयो हि सर्वथा सर्वदेहिनाम् ॥
एवं निशम्य वचनं घोरं व्याघ्रस्य धर्मज्ञ ।
प्रहसन्ब्राह्मणोऽप्याह व्याघ्रं प्रति सुनिर्भय ॥
मांसमूत्रमलौघैश्च पूरित श्लेष्मराशिभि. ।
पित्तास्थिनिचयै पूर्णमेतद्दग्धं कलेवरम् ॥
रजस्वलमनित्यं च दुर्गन्धपरिचर्चितम् ।
ईदृक्शरीरक स्यर्थमस्वतन्त्र विनिन्दितम् ॥
प्रयोजनविहीनेन शुष्कास्थिनिचयेन मे ।
तव तृप्तिर्यदि भवेन्मत्त कोऽप्यधिको भुवि ॥
कृतार्थोऽस्मि महाभाग ह्यात्मान ते ददाम्यहम् ।
आत्मा हि परितुष्ट्यर्थं भवेद्यदि मम प्रियम् ॥
मद्वाक्यं श्रूयता व्याघ्र सत्यं परमपावनम् ।
गत्वा ममाश्रमं तूर्णमागमिष्ये तवान्तिकम् ॥

व्याघ्र उवाच ।

बान्धवैर्विप्रकृष्टस्य मृत्युवक्त्रगतस्य ते ।
किं कार्यमाश्रमे ब्रह्मन्नस्ति चेत्तद्वदस्व मे ॥

सुमतिरुवाच ।

समारोप्य कृतानग्नीनग्निहोत्रगृहं गतान् ।
शिष्यानाश्वास्य पश्चात्स्व त्वागमिष्ये तवान्तिकम ॥

व्याघ्र उवाच ।

अनागते यदि त्वं तु ब्रह्मन्भूयो ममान्तिकम् ।
तदुपायं वद त्वं मे तप्येऽहं जाठराग्निना ॥

सुमतिरुवाच ।

करोमि तेऽहं शपथं येन चित्तं सुनिश्चितम् ।
यथा भवेत्तव व्याघ्र तद्ब्रवीमि हि संप्रति ॥
ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पग ।
महापातकिनश्चैते तत्संयोगी च पञ्चम ॥
मातृहा पितृहा चैव ह्यात्महा भ्रूणहा तथा ।
गोहन्ता वीरहन्ता च अश्वहा नृपहा तथा ॥
स्त्रीहन्ता पुत्रहन्ता च भ्रातृहा भार्यहा तथा ।
यां गतिं प्राप्नुवन्त्येते महापातकिनोऽधमा ।
अनागतश्चेद्भवतु सा गति सर्वथा मम ॥
यन्मातृगमने पापं भगिन्या गमने तथा ।
पुत्रिकागमने यत्तु स्नुषाया गमने तथा ॥
व्याधस्त्रीगमने यत्तु पुल्कसागमने तथा ।
विश्वस्तागमने यत्तु यज्ञपत्न्यास्तु संगमे ॥
विधवागमने यत्तु उदक्यागमने तथा ।
एतासां गमने यत्तु तत्पापं तु भवेन्मम ॥
पति त्यक्त्वा तु या नारी अन्यसगमतत्परा ।
प्रतिकूला पतौ या तु बहुभाषी विरोधिनी ॥
सदा कलहशीला च सदा निष्ठुरभाषिणी ।
सदा रोदनशीला या सदा द्वारपुर स्थिता ॥
पुत्रताडनशीला या पुत्रद्वेषपराकृता ।
दानविघ्नकरा या तु सदा मलिनमूर्धजा ॥
सदा मलिनवस्त्रा च सदा कार्पण्यभाषिणी ।
आत्मनिन्दापरा या तु परनिन्दापरा तु या ॥
श्वशुरं श्वशुरी चैव विनिन्दन्ती स्वकं शिशुम् ।
भर्तृबन्धुषु या नारी ह्यौदासीन्यपरा तु या ॥
भर्तारं वञ्चयित्वा या संचितार्थपरा सती ।
अन्यसंभाषणपरा ह्यन्यवेश्मनि या स्थिता ॥

परं दार- (for ^{a}). — D_1 om line 1085 — (L 1088) G_1 नास्ति (for चेन्न). G(ed) किं भवेत्तव तद्वद (for ^{b}) — (L 1089) G(ed.) सत्य (for तस्य) — (L 1097) G_1 -पुरीषैश् (for मलौघैश्). — For line 1103, G(ed) subst.

82** भगवान्सर्वसाक्षी यश्चकारैतन्मम प्रियम् ।

— (L 1105) $G_{1\,2}$ G(ed) नित्य (for सत्य) — (L 1106) G_1 G(ed.) [आ]श्रमपदम् (for [आ]श्रम तूर्णम्) — (L. 1109) G_1 M_1 G(ed) तु तान् (for कृतान्) — (L 1110) $G_{1\,2}$ शिष्यास्तान्बोधयित्वा च ; G(ed) शिष्यान्सुतान्बोधयित्वा (for ^{a}) — (L. 1111) M_1 G(ed.) अनागतो (for °गते) — (L 1112) M_1 G(ed.) वदस्व त्वं (for वद त्व मे). — (L. 1115) M_1 च सुरापश् ; G(ed) मद्यपायी (for च सुरापी) — (L 1118) G_2 नृप- (for वीर-), G_2 गजहा (for नृपहा) M_1 भ्रातृहन्ता यथा तथा , G(ed) °हन्तार्यहा तथा (for ^{b}) — After line 1119, G(ed) ins.

83** परदारपरद्रव्यक्षेत्राण्यपहरन्ति ये ।
विश्वासघातका ये च दीनाना दु खदास्तथा ॥
असत्यवादिनो ये च पिशुना गरदास्तथा ।
हव्यकव्यविहीनाश्च अग्निदाश्च तथा परे ॥

— D_1 G_2 om line 1123 — (L 1123) G_1 M_1 पुत्रस्त्रीगमने यत्तु (for ^{a}) G_1 ह्यात्मजा- , M_1 पुष्पिता- (for स्नुषाया) — (L 1124) M_1 बान्धवी- (for व्याधस्त्री-) M_1 पुल्कस्या ; G(ed) °स्त्री- (for °सा-). — (L 1125) G_2 विश्वास- (for विश्वस्ता-) — After line 1126, G(ed) ins

84** शूद्रस्त्रीगमने यत्तु भ्रष्टस्त्रीगमने तथा ।

— (L 1129) G(ed) धवे (for पतौ) — After line 1199, D_1 ins

85** गन्धानुलेपनैर्हीना सदा ताम्बूलवर्जिता ।

— (L 1131) G_1 दानविघ्नकरी या तु , G(ed) सदा विघ्नकरी या तु (for ^{a}) — (L. 1132) G_1 -परा तु या ; M_2 -करा तु या ;

मलिनाङ्गी तु या नारी वेश्यालावण्यकारिणी ।
होमकाले विप्रयुक्ता या नारी शयने तथा ॥
अनुत्थिता तु या नारी तल्पाच्चैव पते पुरः ।
भर्तुं पूर्वं स्वपन्ती या दीर्घनिद्रापरा तु या ॥
पुंश्चली दीर्घनिद्रा च ऋतुकालमदर्शिनी ।
आत्मताडनशीला या कुटिला दुःखभाषिणी ॥
असूयायां परा या तु विधवासहचारिणी ।
परप्रेष्यपरा या तु या नारी पितृनिन्दका ॥
भ्रातृस्त्रीभ्रातृनिन्दा च मातृनिन्दात्मजांस्तथा ।
अग्रभोजनशीला या स्वकृतं पाकसंचयम् ॥
सदा कलहकल्याणी चोरवृत्तिपरा दृढा ।
अग्निदा गरदा या तु रज्जुभिर्मरणं गता ॥
कूपान्ते पतिता या तु तटाके देहनाशिनी ।
विष पीत्वा मृता या तु अग्निदग्धा स्वयं रुषा ॥
आसां तु पतिपत्नीनां नरकं यद्विदुर्बुधा ।
अनागते यदि मयि तन्मे भवतु शाश्वतम् ॥
किं तु वक्ष्यामि शार्दूल वैधव्ये दुष्टचारिणी ।
स्नानहीना तु या नारी विधवा सङ्गलोलुपा ॥
हरिसेवाविहीना या विधवा केशधारिणी ।
उपवासविहीना या व्रतहीनातिदुःखिता ॥
कामादिकलहैर्युक्ता सदाताम्बूलभक्षिणी ।
सदामण्डनशीला च विधवा कामचारिणी ॥
सदारोदनशीला या सदामलिनवस्त्रका ।
उष्णोदकेन या स्नाति सदा तु जपवर्जिता ॥
नामत्रयविहीना या मातृवाक्यविरोधिनी ।
विप्रपादोदकं या तु शिरसा नैव धारिणी ।
प्रदक्षिणानमस्कारविहीना देवतागृहे ॥
पूर्वभागे तु या भुङ्क्ते दिवसस्य पदे पदे ।
बहुभाषी स्तोत्रहीना व्रतहीना ह्यनिर्मला ॥
गर्भिणी विधवा या तु तद्भीत्या मरणं गता ।
काषायवस्त्रहीना या नीलीवस्त्रधरा तु या ॥
द्विभुक्तानिरता या तु भक्ष्यभोज्यरता तु या ।
तैलनिर्मलदेहा तु शिरस्तैलं तु धारिणी ॥
अलंकाररता या तु भूषणादिसुवस्त्रकैः ।
सुतीर्थविमुखा या तु सत्पात्रे दानवर्जिता ॥
पाददृष्टिविहीना या तिर्यग्दृष्टिरता तु या ।
सदा कर्मविहीना या सदा सलापतत्परा ॥
यां गतिं प्राप्नुवन्त्येताः सा मे भवतु शाश्वती ।
न दास्ये यदि मद्देहस्तव तृप्त्यै मृगाधिप ॥

श्रीभगवानुवाच ।

तां वाचं सत्यसंयुक्तां निशम्य कुरुनन्दन ।
नमस्कृत्य द्विजवरं गच्छ सौम्येत्यथाब्रवीत् ॥
गत्वा स्वमाश्रमपदं पुनरेव महामते ।
आगच्छ मम तृप्त्यर्थं प्राणान्रक्ष नमोऽस्तु ते ॥
ब्राह्मणो दक्षिणकरं दत्त्वा व्याघ्रस्य मूर्धनि ।
मा भैषीरुक्तवान्राजन्निर्भय. स्वाश्रम ययौ ॥

Colophon.

$G(ed)$ -परायणा (for °कृता). —D_1 om lines 1133–1134 —(L. 1135) $G(ed)$ पर- (for पति-). —(L 1137) D_1 -परायणा , $G(ed)$ -परा सदा (for परा तु या) G_2 ह्युदासीनपरायणा (for ^{b}). —(L 1138) D_1 -परा तु या ; G_2 परायणा (for परा सती). $G(ed)$ संचिनोत्यर्थसंचयम् (for ^{b}). —(L 1142) $G(ed)$ तल्पात्पत्यौ समुत्थिते (for ^{b}) — For lines 1143–1144, $G(ed)$ subst.

86** स्वभर्तुं पुरतो या तु सपत्नी गाढनिद्रया ।
पुंश्चली सङ्गनिरता या नारी पतिवर्जिता ॥

—(L 1146) $G_{1, 2}$ M_1 अन्या(G_2 °न्य)सूयापरा ये तु , $G(ed)$ सदासूयापरा ये तु (for ^{a}) —(L 1147) D_1 M_1 -प्रेष्यरता (for °परा) G_2 विप्र- (for पितृ-) $G(ed)$ -दूषिणी (for -निन्दका) —(L 1148) G_1 -परा (for [आ]त्मजास्) $G(ed)$ भ्रातृस्त्रीभ्रातृमात्रादिनिन्दाया रमते तु या —(L. 1149) D_1 $G_{1, 2}$ M_1 पाप- (for पाक-) —(L 1150) M_1 -कार्याणि , $G(ed.)$ -शीला या (for -कल्याणी). $G(ed)$ शठा (for दृढा) —(L. 1152) G_1 कूपान्त- ; G_2 कूपे नि- , $G(ed)$ कूपान्त (for °न्ते) $G(ed)$ तटाके पतिताथ वा (for ^{b}) —(L. 1153) $G_{1, 2}$ M_1 विषपीत- (for विष पीत्वा) —(L. 1154) $G(ed.)$ दुष्ट- (for पति-). G_2 आसा च मृगशार्दूल (for ^{a}). —(L. 1156) G_2 M_1 -चारिणाम् (for °णी). — G_2 om. lines 1159–1162 G_1 om lines 1159–1161 —(L. 1160) $G(ed)$ कामार्ता कलहे युक्ता (for ^{a}). —(L 1162) G_1 $G(ed)$ विमल- (for मलिन-) —(L 1163) G_1 $G(ed)$ सदा जपविवर्जिता (for ^{b}) — G_2 om line 1167. —(L. 1167) D_1 G_1 च सरिमता (for पदे पदे) —(L. 1168) $G(ed)$ वृत्त- (for व्रत-) G_2 च कल्मषा (for ह्यनिर्मला). D_1 पितृवाक्यविरोधिनी (for ^{b}). — For line 1169, $G(ed.)$ subst :

87** विधवा गर्भिणी या तु गर्भं भित्त्वा मृता तु या ।

—(L. 1170) $G_{1, 2}$ M_1 $G(ed.)$ शुक्ल- (for नीली-). — G_2 om. line 1173 —(L 1176) $G(ed)$ -धर्म- (for -कर्म-). —(L. 1177) D_1 G_2 M_1 शाश्वतम् (for °ती) — After line 1177, G_2 ins. :

88** कृच्छ्रलब्धधनं क्षेत्रमन्यायेन बलाद्धरेत् ।
योऽतिघोरेण पापेन लिप्येयं मय्यनागते ॥

—(L. 1178) $G(ed.)$ भयंकर (for मृगाधिप). —(L. 1179) G_1 $G(ed.)$ -युक्ता च (for -संयुक्ता) —(L. 1181) G_2 तु स्वाश्रम- (for स्वमा°) —(L. 1182) G_2 मृग- (for मम). —(L 1184) $G_{1, 2}$ [इ]त्युक्तवान् (for उक्तवान्) M_1 मा भैरित्युक्तवान्राजन् ; $G(ed.)$ मा भैषीरित्यवोचत्स (for ^{a}).

Colophon.—*Sub-parvan* : D_1 $G_{1, 2}$ $G(ed.)$ आश्चर्यपर्वणि

युधिष्ठिर उवाच ।

गत्वा स्वमाश्रमपदं ब्राह्मणो बन्धुवत्सल ।
किमब्रवीन्महाभाग भार्यां चैव स्वपुत्रकान् ॥
सत्यवाक्यः पुनर्ज्ञात्वा व्याघ्रपार्श्वं कथं गत ।
तन्मे कथय सर्वेश पाण्डूना हितकृत्तम ॥

श्रीभगवानुवाच ।

मां ध्यायन्सर्वलोकेशं सृष्टिस्थित्यन्तकारिणम् ।
मामकं पौरुषं सूक्तं जपन्नाश्रममाययौ ॥
आश्रमस्थान्स्वकाञ्शिष्यानाहूय ब्रह्मवित्तमः ।
स्वपत्नीमात्मजांश्चैव इदं वचनमब्रवीत् ।
शृण्वन्तु मद्वच पुत्रा सत्यं ब्रूयां हिताय च ॥
वेदे च धर्मशास्त्रे च यो धर्म. प्रोच्यते बुधै ।
तमेव सर्वकालेषु कुरुध्वमविशङ्कया ॥
चराचरात्मकं विश्वं देवतिर्यङ्नरादिकम् ।
विष्णुरूपमिदं सर्वं पश्यध्वमविशङ्कया ॥
वाङ्मन कर्मभिर्नित्यं हीनैश्च द्रव्यसंचयै. ।
मा वृत्ति सर्वथा हीना कुरुध्वमविशङ्कया ॥
सर्वधर्ममयं सार वक्ष्यामि च हिताय व ।
परदारान्परद्रव्यं स्वप्ने वा न स्मरिष्यथ ॥
इत्युक्त्वा ब्राह्मणश्रेष्ठ सत्यवागनहंकृतिः ।
अग्निहोत्रगृहं विद्वानासमादातिहर्षित ॥
अग्नौ हुत्वा सदारस्तु प्रणम्य प्रयतेन्द्रियः ।
समारोपयदग्नीस्तान्स्वस्यात्मनि मदाश्रये ॥
स्वकां पुत्रवती भार्यां साध्वी ता प्रियवादिनीम् ।
आहूय वचनं वाग्मी प्रोवाच भरतर्षभ ॥
हे प्रिये शृणु मद्वाक्यं कल्याणि ह्यतिथिप्रिये ।
पुत्रान्संरक्ष धर्मेण परं श्रेयो गमिष्यसि ॥
धर्मं भजस्व सततं भूतहिंसां सदा त्यज ।
जहि कामान्स्वदेहस्थान्साधुसङ्ग सदा कुरु ॥
हरिमर्चय भद्रे त्वं सत्यशीला तथा भव ।
देहेऽस्मिन्बुद्बुदाकारे ममतां त्यज सर्वदा ॥
इति वादिनि धर्मिष्ठे भार्या तस्य प्रिया सती ।
शिरसाञ्जलिमाधाय दु खिता वाक्यमब्रवीत् ॥
भगवन्नीदशी वाणी नोक्तपूर्वा त्वयानघ ।
साशङ्का इव मे भाति कथं वक्तुं त्वमर्हसि ॥

सुमतिरुवाच ।

समित्पुष्पकुशार्थं तु ह्यागतस्य तनुर्मम ।
व्याघ्रस्य दत्ता तृप्त्यर्थं क्षुधितस्य मयानघे ।
तन्निमित्तमहं वच्मि तत्सकाश व्रजाम्यहम् ॥
एवमुक्ता तदा साध्वी ब्राह्मणी शोककर्शिता ।
पपात सहसा भूमौ हा हतास्मीति दु खिता ॥
समुत्थाप्य तदा साध्वी ब्राह्मणो ब्रह्मवित्तम ।
नि.स्पृह सर्वकामेषु तदा वाक्यमभाषत ॥
मद्वच श्रूयता भीरु धर्मबुद्धि सदा कुरु ।
धर्ममार्गपराणा तु धर्म एव परा गति ॥
पतिवाक्यरताना तु स्त्रीणां चैव सुशोभने ।
स्त्रीजन्म नास्ति नास्त्येव देवा एवं वदन्ति हि ॥
धर्मनिष्ठा तपोनिष्ठा सत्यनिष्ठा सदा भव ।
मदर्थं कुरु कल्याणि यत्किंचिद्वै ददासि च ॥
एवमुक्ता तदा साध्वी ब्राह्मणी धर्मनन्दन ।
तथा करोमीत्युटजं प्रविवेश सुतान्विता ॥
ध्यायन्ती पर्णशालायां सर्वधातारमच्युतम् ।

शेषधर्मा., M_1 शेपधर्मा'. —*Adhy name* D_1 व्याघ्रद्विजसवाद , G_1 सत्यप्रनिधा ; G(ed.) सत्यव्रतप्रशसाया द्विजव्याघ्रसवाद . — *Adhy. no.* : D_1 $G_{1.\ 2}$ M_1 G(ed) 9

(L. 1185) G_2 G(ed.) धर्म- (for वन्धु-). — (L. 1186) G(ed) स्वभार्यैं च (for भार्यां चैव) — (L 1187) $G_{1.\ 2}$ M_1 -वाक्यात् (for -वाक्य) — For line 1187, G(ed.) subst .

89** स सत्यवचनो धीमान्पुनर्व्याघ्रं कथं गत' ।

—(L. 1188) G_2 तत्त्वेन (for सर्वेश). — (L. 1189) D_1 -कारणम् ; G_2 -कारकम् (for -कारिणम्). — (L. 1191) M_1 सर्वांश्च ब्राह्मणोत्तमः (for ^{b}). — Before line 1193, D_1 M_1 ins. सुमतिरुवाच — (L 1193) G_2 शृणुध्व (for शृण्वन्तु). G_1 G(ed) ब्रूत , G_2 वच्मि (for ब्रूयां) — (L 1194) $G_{1.\ 2}$ ये धर्मा' (for यो धर्म). — (L. 1195) G_2 तान् (for तम्) M_1 -लोकेषु (for -कालेषु). D_1 शृणुध्वम् (for कुरु°) — (L 1196) G_2 पक्षितिर्यग्जनादिकम् (for ^{b}). —(L. 1197) G(ed) विश्व (for सर्वं). — G_2 om. line 1198-1199 —(L 1198) G_1 धनैश्चैव कलेवरैः (for ^{b}). — (L. 1199) परतुष्टि सदा यूय (for ^{a}). — (L. 1200) G_2 -सत्त्व- (for -धर्म-). — (L. 1201) G(ed) परार्थान्वै (for परद्रव्य) — (L 1202) G_2 M_1 अनहङ्कृत (for °ति). — (L 1203) G(ed) स्मरन्विभुम् (for [अ]तिहर्षित) — (L 1204) G(ed) तदारास्तु , G_2 [आ]हुतीर्धीमान् , M_1 चादरास्तु (for सदारस्तु) G(ed) विजितेन्द्रिय (for प्रय°) — (L 1205) D_1 मदाश्रयः (for °ये). — (L. 1206) G_1 M_1 ब्रह्म- (for प्रिय-) — (L. 1207) G(ed) सोऽथ (for वाग्मी) —(L 1209) G(ed) भविष्यति (for गमिष्यसि) —(L 1210) G_1 G(ed) समुत्सृज , G_2 परित्यज (for सदा त्यज) — (L 1215) D_1 D_2 आस्थाय (for आधाय). — Before line 1216, D_1 M_1 ins ब्राह्मणी उवाच — (L. 1216) D_1 कथ त्वम् (for भगवन्). $G_{1.\ 2}$ M_1 ईदृशा (for °शी). D_1 G_2 -पूर्वं (for पूर्वा). — For line 1217, G(ed) subst

90** किमकाण्डे प्रवक्तुं वै कारण वद मानद ।

— D_1 ब्राह्मण (for सुमतिर्) — (L. 1218) G_2 M_1 -फलार्थं (for -कुशार्थं) G(ed) वन यातस्य मे तनु. (for ^{b}). — (L. 1220) D_1 G_1 व्रजामि च ; G_2 M_1 प्रयामि च (for व्रजाम्यहम्) — (L 1225) M_1 धर्मबुद्धि सदा भव (for ^{b}). —(L. 1227) G(ed.) स्त्रीणामिव सुशोभनम् (for ^{b}). — (L. 1233)

तुष्टाव पुण्डरीकाक्षं योगिध्येयमरिंदमम् ॥
ब्राह्मणी उवाच ।
लक्ष्मीपते नमस्तुभ्यं सृष्टिस्थित्यन्तकारिणे ।
चिरकालं ममानन्तं सौमङ्गल्यं ददस्व ह ॥
अनाथबन्धो देवेश पाहि मां पतिदानतः ।
त्वत्पादकमलादन्या गतिर्मम न विद्यते ॥
कालात्मन्सर्वभूतात्मन्बालापत्यां तपस्विनीम् ।
पाहि मां सर्वलोकेश पतिदानात्प्रजापते ॥
शिष्येषु वा मयि सुते कृपा यदि तवास्ति चेत् ।
सौमङ्गल्यं ददस्व त्वं भूयो भूयो नमोऽस्तु ते ॥
ध्यायन्ती देवदेवेशमिति नत्वा पुनः पुनः ।
अध्यास्ते पर्णशाला तु गतशोका पतिव्रता ॥
ब्राह्मणो गतवांस्तूर्णं शिष्यैः परिवृतो वशी ।
व्याघ्रो मृगारिर्यत्रास्ते तं देशं पाण्डुनन्दन ॥
स्थाप्य दूरे स्वकाञ्शिष्याञ्शान्तिसूक्त निवेश्य च ।
व्याघ्रस्य संमुखं चागाद्गतभीः कीर्तिवर्धन ॥
तस्मिन्नवसरे शिष्या जप्त्वा सूक्तानि पौरुषान् ।
दिशां पतीन्नमस्कृत्य प्रार्थयामासुरव्ययान् ॥
नताः स्म देवराज त्वा पाहि लोकपते प्रभो ।
यज्ञांशभागिने तुभ्यमस्मद्गुरुमकल्मषम् ॥
वैवस्वत नताः स्म त्वां धर्मरूप सतां पते ।
अपमृत्युभयात्पाहि गुरुं नो लोकवन्दितम् ॥
अपां पते नताः स्म त्वां पाहि नः पाशधारिणे ।
व्याघ्रचोरभयाद्देव गुरुं निष्कल्मषं प्रभो ॥
निधीश निःस्पृहं शान्तं पाहि नो गुरुमव्ययम् ।
त्वत्पादं तु वयं सर्वे प्रपन्ना एव धर्मप ॥
इति स्तुता दिक्पतयो देवगन्धर्वकोटिभिः ।
उद्गीयमानाः सर्वत्र तं देशमगमन्नृप ॥
पिण्डीकृतां तनुं दृष्ट्वा ब्राह्मणस्य नृपोत्तम ।
विस्मयं परमं जग्मुर्देवाः सर्वे दिवि स्थिताः ॥
भक्ष्यतां भक्ष्यतां व्याघ्र क्षुधितोऽसि तनुर्मम ।
इत्याकर्ण्य वचस्तस्य सर्वे विस्मयमागताः ॥
सर्वे दिवौकसो राजन्सर्वशास्त्रविशारदम् ।
पुरस्कृत्य गुरुं श्रेष्ठं सुत्रामाणं बभाषिरे ॥
तृप्तिमस्मै प्रयच्छ त्वं व्याघ्राय त्रिदशेश्वर ।
त्रिविष्टपं ददस्व त्वं ब्राह्मणाय महात्मने ॥
तथेति च समाहूय ब्राह्मणं विगतस्पृहम् ।
दिवस्पतिरुवाचेदं सर्वभूतहिते रतम् ॥
सुमते ब्राह्मणश्रेष्ठ व्रज स्वर्गं ददामि ते ।
सत्यप्रतिज्ञा दृष्टा हि मयैव हि तवैव हि ॥
सुरलोके तथा सौख्यं तेन सत्येन सुव्रत ।
भुङ्क्ष्व भोगान्विचित्रान्वै यानमारोह तेऽर्पितम् ॥
दिवस्पतिवचः श्रुत्वा सुमतिर्ब्राह्मणोत्तमः ।
दृष्ट्वा देवान्दिविस्थान्वै ननाम च सुविस्मितः ॥
सुमतिरुवाच ।
शिष्याणां चैव सर्वेषां भार्यायाश्च दिवस्पते ।
यदि नाकं ददासि त्वं व्याघ्रस्य च तथास्तु मे ॥
सुमतेस्तु वचः श्रुत्वा तदा देवपतिः प्रभुः ।
अब्रवीन्मधुरं वाक्यं ब्राह्मणं गतकल्मषम् ॥
भुक्त्वा भोगान्यथेष्टं त्वं सशिष्यैर्भार्यया सह ।
दिवं गच्छ महाभाग कीर्तिस्ते शाश्वती भवेत् ॥
शत्रौ ते मित्रताबुद्धिर्दृष्टा नान्येषु सुव्रत ।
तस्मात्तवेप्सितं सर्वं प्रदास्यामि वरं द्विज ॥
परीक्षार्थपरा सर्वे ह्येते त्रिदशपुंगवाः ।

G(ed) -दातारम् (for -धा°) — (L 1234) G_2 अनुत्तमम् (for अरिंद°) — G_1 G(ed) om. the ref. — (L 1235) D_1 -कारणम् (for कारिणे) — (L. 1236) D_1 [आ]नन्द (for [अ]नन्त). — (L. 1240) D_1 G_1 -कालेषु, M_1 -कामेषु; G(ed) -कार्येषु (for -लोकेश). — (L 1241) G(ed) मयि (for यदि) — (L 1245) G(ed) शीघ्र (for तूर्णं) — (L 1247) G(ed) -सूक्तान् (for सूक्त) G_1 जपन्द्विज° (for निवेश्य च) — (L. 1248) $G_{1\ 2}$ G(ed) यायात् (for चागात्) — (L 1249) M_1 G(ed.) सूक्तांश्च (for सूक्तानि). D_1 जप्त्वा सूक्तान्हि वैष्णवान् (for [b]). — (L 1251) G(ed) नमस्कुर्मो देवराज (for [a]). — For line 1252, G(ed) subst.

91** यज्ञांशभागी भगवानस्मद्गुरुरकल्मषः ।

— (L 1253) G(ed) नमस्तुभ्य (for नताः स्म त्वा) G_1 M_1 -रूपिन् (for रूप) — (L 1254) G(ed.) -विश्रुतम् (for -वन्दि°) G_2 गुरुर्नो लोकवन्दित (for [b]). — (L 1255) G(ed.) पाहि नः परमं गुरुम् (for [b]) — (L. 1256) D_1 G_2 एव (for देव) — For line 1256, G(ed) subst.

92** पाहि व्याघ्रभयादस्मात्पाशहस्त महाप्रभो ।

— (L 1257) G(ed) निधीश (for °श). M_1 निधीश भयात्पाहि गुरुं (hypermetric) (for [a]) — (L 1258) G_1 धर्मज, G(ed) सर्वदा (for धर्मप) — (L 1261) G(ed.) -कृत- (for -कृता). D_1 ब्राह्मण सुरसत्तमाः (for [b]). — (L. 1266) D_1 नमस्कृत्य (for पु°) M_1 सर्व° (for श्रेष्ठं). — (L. 1267) D_1 G(ed) त्रिदिवेश्वर (for त्रिदशे°) — (L. 1268) G(ed.) महागत (for °त्मने). — (L 1269) G_1 समाशाय; G_2 तमाहूय, G(ed) समावाय (for °हूय) G(ed.) -ज्वरम् (for -स्पृहम्) — (L 1270) G(ed.) रतः (for रतम्). 1272) G_1 त्वय्येव च न मानवे; G_2 M_1 त्वय्येव न च मानव; G(ed.) त्वय्येव च न संशयः (for [b]) — (L. 1273) G(ed.) मया सार्धं (for यथा सौख्य) — (L. 1277) D_1 M_1 महामते (for दिवस्पते) — (L 1278) G(ed) द्विवरपते (for तथास्तु मे) — After line 1278, G(ed.) ins.

93** तदा मे जायते तुष्टिरन्यथा नोत्सहे दिवम् ।

— (L. 1280) G_1 -किल्बिषम (for -कल्म°). — (L. 1283) M_1 श्रौतस्मार्ते च ते बुद्धि ; G(ed.) शत्रौ ते मित्रबुद्धिश्च (for [a]). — (L. 1285) G(ed.) परीक्षार्थं सुराः सर्वे (for [a]). G(ed.)

व्याघ्रव्याजेन सुप्रीतास्तवान्तिकमुपागता ॥
इत्युक्त्वान्तर्दधे पार्थ गोत्रभित्सपुरोहित. ।
विमाने व्याघ्रमारोप्य ह्यादितेया दिवं गता ॥
ब्राह्मणो विस्मयाविष्ट शिष्यै. सह युधिष्ठिर ।
आश्रमं प्राप धर्मज्ञो भार्यायास्तद्न्यवेदयत् ॥
कर्मकाण्डमशेषेण कृत्वा शिष्यान्विवाह्य च ।
भुक्त्वा भोगान्यथेष्टं तु शिष्यैः सह दिवं गत ॥
तस्मात्सत्यं परं धर्म दैवतैरपि दुर्लभम् ।
स्वर्गलोकप्रद पार्थ सत्यमेव वदन्ति हि ॥
सत्यशीलो भव त्वं च धृतिं मा मुञ्च संप्रति ।
सत्येन ते भवेत्स्वर्गस्त्वमप्येवं समाचर ॥
य इद पुण्यमाख्यानं शृणोति श्रद्धया नरः ।
स विधूयेह पापानि स्वर्गलोके महीयते ॥

Colophon

युधिष्ठिर उवाच ।

प्राणिनां रक्षणे पुण्यं सर्वलोकप्रदायकम् ।
एवं वदन्ति धर्मिष्ठं मुनयो मुनिकीर्तन ॥
तस्य धर्मफलं देव दर्शयाद्य यदुत्तम ।
मम प्रीत्या वद श्रीमन्भूयो भूयो नमाम्यहम् ॥

श्रीभगवानुवाच ।

यो ददात्यभय भूप भयविह्वलचेतसाम् ।
तस्य पुण्यफलं वक्तुं नालं वर्षशतैरपि ॥
एकत. क्रतवः सर्वे समग्रवरदक्षिणाः ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥
संरक्षति महीपाल भयविह्वलचेतसम् ।
स स्नातोऽब्दशतं साग्रं गङ्गायां नात्र संशयः ॥
कपोतस्याभयं दत्त्वा शिबिर्नाम जनेश्वर ।
प्राप्तवान्वैष्णव लोकं सत्यं सत्यं मयोदितम् ॥

युधिष्ठिर उवाच ।

शिबिर्नाम महातेजा राजा धर्मपरायण ।
कपोतस्याभयं दत्त्वा कथ मुक्तिमवाप्तवान् ॥
त्वमेव वेत्सि तत्सर्वं लोकनाथ नमोऽस्तु ते ।
मयि कारुण्यभावेन कृष्ण संप्रति कथ्यताम् ॥

श्रीभगवानुवाच ।

आसीत्पुरा महाराज सत्यवादी दृढव्रत ।
शिबिर्नाम महातेजा सर्वैश्वर्यसमन्वित ॥
वर्तमाने महायज्ञे शिबेस्तस्य महात्मन ।
देवलोकेऽथ गन्धर्वा गायन्ति स्म हि तद्यशः ॥
तत्परीक्षां करोमीति वृत्रारि समचिन्तयत् ।
सखायं वरयामास वैश्वानरमरिंदम ।
इन्द्र श्येन कपोतोऽग्निर्भूत्वा तत्रोपजग्मतु ॥
कपोतो भीतिसंयुक्त श्येनात्तस्मान्महामते ।
राजानं शरणं गत्वा प्रणिपत्येदमब्रवीत् ॥
भो भो राजन्महाराज शोभनं चरित तव ।
श्येनो हिंसितुमुद्युक्तो मा पालय कृपालय ॥
इत्युक्त्वा सहसा राजन्राजानं शरणं ययौ ।
राजापि भयसंविग्न कम्पमानं वचोऽब्रवीत् ॥
इत एहि कपोत त्व भयशोकौ विमुञ्च ह ।
मृत्युतोऽपि भयं नास्ति मत्समीपे स्थितस्य ते ।
किमुतान्यन्महाबुद्धे त्यज कम्पं सुखी भव ॥
एवमुक्ते तु राजेन्द्रे श्येनरूपी सुरेश्वरः ।
आजगाम नृपस्याशु यज्ञवाटं महामते ।

-सभवा. (for -पुंगवा'). —D_1 om lines 1287–1288. —(L. 1287) G(ed) बलभित् (for गोत्र°) — (L 1289) D_1 तदा गत' (for युधिष्ठिर). — (L. 1290) G(ed) धर्मिष्ठो (for धर्मज्ञो) G_1 आश्रम प्राप्य धर्मिष्ठो (for ᵃ) — For lines 1293–1294, G(ed) subst ·

94** तस्मात्सत्य परो धर्म' सत्ये सर्व प्रतिष्ठितम् ।
तदेव नाकसोपान पारावारस्य नौर्यथा ॥

— (L 1295) G(ed) सुव्रत (for संप्रति). — (L 1297) D_1 G(ed.) [अ]न्वित. (for नरः). — (L. 1298) M_1 G(ed.) सत्य- (for स्वर्ग-) — After line 1299 G(ed) ins. :

95** सत्यं सत्यमहं वच्मि नात्र कार्या विचारणा ।

COLOPHON — *Sub-parvan* D_1 $G_{1, 2}$ M_1 आश्चर्यपर्व — *Adhy. name* D_1 M_1 सत्यप्रशंसनम्, $G_{1, 2}$ सत्यप्रशसा, G(ed) सत्यवचनप्रशसाया विप्रव्याघ्रसंवादपरिसमाप्ति —*Adhy. no* · D_1 $G_{1, 2}$ M_1 G(ed) 10

(L 1299) G(ed.) रक्षण (for °णे) G(ed) स्वर्ग- (for सर्व-). —(L 1300) G(ed.) सर्वे (for एव) M_1 धर्मिष्ठा (for °ष्ठं). D_1 -कीर्तित (for -कीर्तन). —(L. 1301) G(ed) पुण्य- (for धर्म-). G_2 तस्य धर्मस्य रूपं हि (for ᵃ). G(ed.) शृण्वतामघनाशनम् (for ᵇ) — (L 1302) G(ed) मयि (for मम) G_1 G(ed) नमोऽस्तु ते (for नमाम्यहम्) — D_1 om lines 1304–1307 — (L 1304) G(ed) नाह शक्तो नराधिप (for ᵇ) — (L 1308) D_1 G_1 G(ed) स स्नाते; G_2 सुस्नाते (for स स्नातो). — (L 1309) G(ed) नराधिप (for जनेश्वर) — (L 1310) G_1 [ई]रितम् (for [उ]दितम्) G(ed) सर्वदेवै सुपूजित' (for ᵇ) — (L 1312) D_1 अवाप्नुयात् (for °प्तवान्) — After the ref, D_1 ins

96** अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
श्रवणात्सर्वपापघ्न यशस्य पुण्यवर्धनम् ॥

— (L 1316) G(ed) शिबिर्नामातिविख्यात (for ᵃ). — (L. 1318) D_1 M_1 -लोकेषु (for लोकेऽथ) D_1 G_2 महामते (for हि तद्यश) — (L 1320) G_1 G(ed) सहाय (for सखाय). D_1 सहाय कारयामास (for ᵃ) — (L 1322) D_1 श्येनार्तस्तु, G_1 °र्त्त स (for °त्तस्मात) — (L. 1325) G_1 कृपानिधे (for °लय) — (L 1326) G_1 G(ed.) गत (for ययौ). — (L 1327) G(ed) -सत्रस्तः (for सविग्नं). — (L 1328) G_2 एह्येहि च (for इत एहि). D_1 भयशोक (for °कौ) — For line 1330, G(ed.) subst. :

नृपस्य निकट प्राप्य इदं वचनमब्रवीत् ॥
राजन्धर्मभृता श्रेष्ठ प्रसिद्धोऽसि जगत्त्रये ।
कथं धर्मविरुद्धं त्वं कर्म कर्तुमिहार्हसि ॥
कपोतोऽयं ममाहारस्त्वया संरक्षित खलु ।
क्षुधया पीडितोऽहं वै मोचयस्व कपोतकम् ॥
न मुञ्चसि यदि त्व तु राजन्द्विजमनुत्तमम् ।
मम प्राणा हि यास्यन्ति प्राणान्रक्ष नृपोत्तम ॥

राजोवाच ।

प्राणार्थी रक्ष रक्षेति कपोत शरणं गतः ।
कथं त्यजेयमेन ते वद द्विजकुलोत्तम ॥
शरणागतं तु यो राजा विसृजेत्स तु पातकी ।
प्रायश्चित्तं न तस्याहु शरणागतघातिनः ॥
ब्रह्महत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् ।
शरणागतहन्तुस्तु नेहामुत्र च निष्कृति. ॥
अन्यद्यथेष्ट मासं ते दास्ये खगकुलोत्तम ।
तन्मासं भक्षय त्वं हि पुत्रपौत्रैर्यथासुखम् ॥

श्येन उवाच ।

कपोतोऽयं ममाहारो ह्यन्यापेक्षा न मे नृप ।
श्येना' कपोतान्खादन्ति श्रुतिरेषा सनातनी ॥
ब्रह्मणा हि पुरा सृष्टं श्येनाना तु कपोतकम् ।
तस्मादेनं ददस्व त्वं मा पालय सबान्धवम् ॥
किं प्रयोजनमस्तीह यज्ञैर्विपुलदक्षिणैः ।
प्राणिना रक्षणं श्रेष्ठं देहं त्यक्त्वापि मानद ॥
एकं रक्षति बह्वर्थे स मूढो यो नृपोत्तम ।
एकं हित्वा तथा राजन्बहून्रक्षन्सुखी भवेत् ॥
तस्मात्त्वं राजशार्दूल पुत्रपौत्रादिसंयुतम् ।
मां रक्ष त्यज्यतामेष लोके कीर्तिं गमिष्यसि ॥

राजोवाच ।

धनराज्यशरीरेच्छा पुत्रदारस्पृहा न च ।
यथैकस्य तु रक्षार्थे स्पृहा गुरुतरायते ॥
शरीरं वापि संत्यक्ष्ये दुस्त्यजं सर्वदेहिनाम् ।
शरणागतमेनं तु न त्यजेयं खगोत्तम ॥

श्येन उवाच ।

तथा कुरु महाभाग तदभावे स्वका तनुम् ।
कपोतदेहमात्रं त्वं प्रयच्छ तुलया धृतम् ॥

राजोवाच ।

कृतार्थोऽस्मि महाभाग आत्ममांसं ददामि ते ।
आत्मा हि परतुष्ट्यर्थमभूदिति महत्प्रियम् ॥
एवमुक्त्वा महाराज राजा सत्यपरायण ।
प्रगृह्य विपुलं खड्ग स देहं प्रत्यकृन्तत ॥
प्रगृह्य मासं बहुशोणितस्रवं
तुलान्तरे चैव समागतस्य ।
समं द्विजस्य प्रददौ महात्मा
तृणं करोतीति महान्महत्सुखम् ॥
कपोतेन स्थित पार्श्वे तन्मात्रादतिरिच्यते ।
पुनश्चोत्कृत्य मांसानि तुलायामक्षिपत्प्रभुः ॥
अधिकं तेन मासेन कपोतस्तुलया धृत' ।
मांसाभावे निरीक्ष्यैना स्वयमेव तुलां गत ।
त्यक्त्वा कपोतरूपं तु तदाराद्गिरास्थित. ॥

इन्द्र उवाच ।

साधु साधु महाराज धैर्यं ते ह्यन्यदुर्लभम् ।
त्वय्येव दृष्टमेतद्धि न दृष्टं प्राकृतेषु च ॥
इन्द्रोऽहं खलु राजेन्द्र कपोतो हव्यवाडयम् ।
त्वत्परीक्षापरौ राजस्तव दास्यावहे वयम् ।
वरं वृणीष्व धर्मज्ञ कीर्तिस्ते शाश्वती भवेत् ॥

राजोवाच ।

युष्मत्सेवापरोऽहं वै दानयज्ञादिसंभवः ।
यो धर्मो विद्यते मेऽद्य तत्सर्वं सफलं कुरु ॥
दिवस्पते त्वदर्थं तु ह्ययं यज्ञ' प्रवर्तते ।
अविघ्नं कुरु कल्याण भूयो भूयो नमाम्यहम् ॥

97** अन्यस्माकिमुत श्येनाज्जहि कम्प सुखी भव ।

—(L 1336) D1 सर्वित. (for संरक्षितः). —(L 1337) D1 G2 क्षुधा च ; G(ed) क्षुधा स- (for क्षुधया) —(L. 1339) D1 मम देह प्रतप्तोऽद्य (for ^{a}). —(L. 1341) G(ed) त्यजेऽहम् (for त्यजेयम्) —(L. 1342) G(ed) यो राजा शरण प्राप्तं (for ^{a}) – (L 1347) G1, 2 G(ed) त मास भक्षयित्वा हि (for ^{a}) —(L. 1350) G(ed) श्येनाहार' कपोतक (for ^{b}) —(G 1351) G(ed) शुभप्रद (for सबान्धवम्) —(L 1355) G1 बहून्राजन्, M1 G(ed) महाराज (for तथा राजन्) D1 G2 बहूनि सुकृती भवेत् (for ^{b}) — G2 G(ed) om the ref —(L 1360) G(ed) [अ]हं (for सं-) G1, 2 दुर्जयं (for दुस्त्यज) — Before line 1361, G1, 2 ins. राजा . —(L 1362) M1 स्वकामिषम्; G(ed) तवामिषम् (for स्वका तनुम्). —(L 1363) D1 कपोतमात्र त्वं भारं (for ^{a}) —(L. 1364) D1 M1 खगेत्याह (for महाभाग) D1 om lines 1364^b–1366^a. — (L. 1365) G(ed.) आत्मन (for आत्मा हि). G1 G(ed.) मम (for महत्). — For line 1365, M1 subst. :

98** आत्मा हि तुष्ट्यर्थमभूदिति च मे महाप्रियम् ।

—(L. 1370) G(ed) मत्वा तृणैस्तुल्यमतीव कायम्. —(L. 1374) M1 अथ कृत्तेन , G(ed) अधिकस्तेन (for °क तेन). D1 G2 कपोत तुलया धृतान् (for ^{b}). — After line 1374, D1 ins :

99** एवं तु बहुशो राजन्राजा सत्यपराक्रम' ।

—(L. 1375) D1 G(ed) [ग]तं (for [ग]तां). — After line 1375, D1 G1 G(ed) ins. .

100** तस्मिन्क्षणे महाराज तुलामौशीनरे गते ।

विभावसो नमस्तेऽस्तु गृह्णतां मन्त्रवद्धविः ।
काले पुण्ये महाभाग पालयस्व नमोऽस्तु ते ॥
कर्मण्योर्यजमानस्य वाचं श्रुत्वा मनोरमाम् ।
प्रादादग्निश्च शक्रश्च वरं लोके बहुश्रुतम् ॥
यावत्कालं चन्द्रसूर्यौ दिवि देवनिषेवितौ ।
तावत्ते कीर्तिरतुला लोके ख्यातिं गमिष्यति ॥
दिव्यरूपधरो भूत्वा भुक्त्वा भोगान्यथेच्छया ।
ब्रह्मलोकं व्रज श्रीमन्नित्युक्त्वान्तरधीयत ॥
तस्मात्त्वमपि राजेन्द्र पौरुषं कुरु सर्वदा ।
पुरुषार्थाद्दिवं यान्ति बहवोऽन्ये नरोत्तमाः ॥
प्राणेन मनसा वाचा कर्मणा कुरुनन्दन ।
परेषां दुःखितानां तु साहाय्यं कुरु सर्वदा ॥
अप्यहं भक्तवर्गाणां मयि संन्यस्तकर्मणाम् ।
करोम्यहर्निशं पार्थ योगक्षेमं महात्मनाम् ॥
परेषां हितकृन्नित्यं यो वा को वापि भूपते ।
मत्कृत्यः स हि विज्ञेयस्तस्याहं सुलभोऽनिशम् ॥
य इदं पुण्यमाख्यानं शृणुयाद्भक्तिमान्नरः ।
यथा ययौ शिबिर्लोकं ब्रह्मणोऽभ्येति सोऽपि च ॥

Colophon

युधिष्ठिर उवाच ।

श्रियः पते नमस्तेऽस्तु सर्वलोकस्य कारण ।
त्वत्पादाम्बुजनिष्ठस्य सर्वसंपत्प्रदायक ॥
अष्टादशपुराणेषु यो धर्मः प्रोच्यते बुधैः ।
तत्सर्वं भगवान्वेत्ति स्वयं धर्मेश्वरो यतः ॥
सूक्ष्मधर्ममनेकार्थं बहुलोकप्रदं ध्रुवम् ।
सुलभं सर्वजन्तूनां मादृशामपि कामदम् ॥
पुण्यदं पुण्यशीलानां स्वर्गदं स्वर्गगामिनाम् ।
मोक्षदं मोक्षकामानां पुत्रदं पुत्रकामिनाम् ॥
पापघ्नं पापजन्तूनां स्वल्पाद्धर्मादपीश्वर ।
सर्वयज्ञफलं तात सर्वतीर्थफलप्रदम् ॥
शिवमायुष्करं देव कीर्तनीयं त्वदाश्रयम् ।
ज्ञानदं भक्तिदं नाथ त्वत्प्रियं परमेष्ठिन ॥
प्रियं शक्रस्य धर्मस्य वरुणस्य तथा प्रियम् ।
धनदस्य च शर्वस्य तथा वै चन्द्रसूर्ययोः ॥
नक्षत्राणां च सर्वेषां गन्धर्वाप्सरसामपि ।
देवतानामृषीणां च ब्राह्मणानां प्रियं च यत् ॥
पुण्यदेशं पुण्यकालं पुण्ययोगं तथा क्षयम् ।
एतान्सर्वान्महाभाग विस्तराद्वक्तुमर्हसि ॥
अस्माकं त्वद्वचः पथ्यं पवित्रं पापनाशनम् ।
श्रोतुकामा अमी विप्रा यज्वानो ऋषयस्तथा ।
भ्रातरो मे महाभाग पाञ्चाली पापवर्जिता ॥

नताः स्म सर्वे जगतां निवास
पाण्डोः सुतानां प्रियकृत्सुरेश ।
त्वत्पादमूलं तु वयं हि सर्वे
गताः स्म पाहीति तमित्यवोचत् ॥

वैशपायन उवाच ।

भक्तिं विज्ञाय भृत्यानां पाण्डूनां हितकृद्धरिः ।
उवाच मधुरं वाक्यं प्रीणयन्सर्वमानसः ॥

श्रीभगवानुवाच ।

साधु साधु महाप्राज्ञ मतिस्ते विमलोज्ज्वला ।
धर्मे ते वर्तते बुद्धिस्तस्मात्त्वं लोकविश्रुतः ॥
शृणु पार्थ महाभाग सर्वशास्त्रविशारद ।
वक्ष्यामि तव संप्रीत्यै धर्मसारसमुच्चयम् ।
नारदाय पुरा गीतं नैमिषारण्यवासिने ॥
मरुत्वन्तं दिवि स्थाप्य बदरीवनवासिना ।
विस्तराद्वदितुं नालं मया वर्षशतैरपि ॥
तस्मात्समासतो वक्ष्ये शृणु नान्यमनाः प्रभो ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥
धर्मः श्रुतो वा दृष्टो वा कृतो वा कारितोऽपि वा ।
अनुमोदितो वा राजेन्द्र नयतीन्द्रपुरं महत् ॥

देवदुन्दुभयो नेदुर्दिव्याः कुसुमवृष्टयः ।
श्येनरूपी सहस्राक्षः स्वदेहं प्राप्तवांस्तदा ॥

— (L. 1379) D_1 G_2 हव्यवाहन (for °ङयम्). — (L 1380) M_1 G(ed.) वरम् (for वयम्). — (L 1381) D_1 M_1 धर्मिष्ठ; G_1 भद्र ते (for धर्मज्ञ). — G_2 om line 1383 — (L 1387) G(ed) मा पालय (for पालयस्व) — (L. 1389) D_1 वराँल्लोके बहुश्रुतान् (for [a]) — (L 1390) G_2 -निषेविते (for °तौ) — (L 1392) D_1 यथेप्सितम्, G_1 °प्सितान् (for °च्छया) — (L. 1395) D_1 G(ed) नृपोत्तमाः (for नरो°) — (L 1396) G(ed) कायेन (for प्राणेन). — (L 1398) D_1 G(ed) भृत्य-, $G_{1, 2}$ भ्रातृ- (for भक्त-).

Colophon. — *Sub-parvan* D_1 $G_{1, 2}$ आश्चर्यपर्व. — *Adhy name* · D_1 अभयदानप्रशमनम्, G_1 अभयप्रदानम्, M_1 G(ed) अभयप्रदानप्रशंसनम् — *Adhy no* · D_1 $G_{1, 2}$ M_1 G(ed,) 11.

— (L 1407) G(ed) तु भवान् (for भगवान्). G_1 G(ed) सर्वलोकेश्वरो यतः (for [b]) — (L 1408) G_3 G(ed) यच्च सूक्ष्मम् (for सूक्ष्मधर्मम्) — (L 1410) M_1 -लोकिनाम्; G(ed) -कामि° (for गामि°) — (L 1413) D_1 -यज्ञ- (for -तीर्थ-) — (L 1414) D_1 श्रियम्, G_3 दीर्घम् (for शिवम्). — (L 1416) D_1 सोमस्य (for धर्मस्य) D_1 धर्मस्य वरुणस्य च (for [b]) — (L 1421) G_1 एतान्धर्मान्, G(ed) एतत्सर्वं (for एतान्सर्वान्) — (L 1424) G(ed) पाञ्चाली भृशमाकुला (for [b]) — Before line 1425, D_1 ins वैशपायन उवाच. — (L 1425) G_1 M_1 G(ed) अधीश (for निवास) — (L. 1428) G(ed) [उ]वाच (for [अ]वोचत्) — D_1 om the ref — (L 1430) D_1 -भूसुरान्, G_1 -मानसम् (for °सः). — (L 1433) D_1 महाप्राज्ञ, G_2 °राज (for °भाग) — (L. 1434) M_1 G(ed) सु- (for स-). D_1 धर्मसारमनुत्तमम् (for [b]). — (L. 1439) D_1 G_3 स्मरण- (for श्रवण-). — (L. 1440)

धर्मा बहुविधा प्रोक्ताः पुण्यलोकप्रदायकाः ।
तेषां मध्ये यदेकैकं कृतवाल्लाकमश्नुते ॥
तन्नूना मम सर्वासां ब्राह्मणो हि विशिष्यते ।
तत्राप्यध्यात्मविदुषे दत्त भवति चाक्षयम् ॥
कलत्रिण वा शास्त्रज्ञ श्रोत्रियं वा गुणान्वितम् ।
यो दत्त्वा स्थापयेद्वृत्तिं तस्य पुण्यफलं शृणु ॥
मातृत पितृतश्चैव द्विकोटिकुलसंयुत ।
मम लोकमवाप्नोति यत्र गत्वा न शोचति ॥
गण्यन्ते पांसवो भूमेर्गण्यन्ते वर्षबिन्दव ।
न गण्यते विधात्रापि ब्रह्मसंस्थापने फलम् ॥
समस्तदेवतारूपो ब्राह्मण परिकीर्तित. ।
जीवनं ददतस्तस्य क पुण्यं गदितुं क्षम. ॥
देवपूजासु सत्काय पुराणश्रवणे तथा ।
देयं प्रयत्नतो राजन्पुराणपठकाय च ॥
यो विप्रहितकृन्नित्यं स सर्वान्कृतवान्मखान् ।
स स्नात सर्वतीर्थेषु तप्त तेनाखिलं तप ॥
यो ददस्वेति विप्राणां जीवनं प्रोच्यते नरः ।
सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषितैः ॥
भूमिदानसम दान सर्वलोकेषु नो नृप ।
परं निर्वाणमाप्नोति भूमिदो नात्र संशय ॥
भूमिद सर्वद प्रोक्तो भूमिदो मोक्षभाग्भवेत् ।
भूमिदानं तु यो दद्यात्सर्वपापै प्रमुच्यते ॥
द्विजस्य वृत्तिहीनस्य सदाचाररतस्य च ।
जीवनार्थं महीं दत्त्वा तस्य पुण्यफलं शृणु ॥
गङ्गातीरेऽश्वमेधानां शतानि विधिवन्नरः ।
कृत्वा यत्फलमाप्नोति भूमिदस्तु तदश्नुते ॥
भूमिदानं महादानमतिदानं प्रकीर्तितम् ।
सर्वपापप्रशमनमपवर्गफलप्रदम् ॥

तस्मात्त्वमपि राजेन्द्र भूदानं कुरु सर्वदा ।
पुराणवेदशास्त्राणां वक्तृणा त्वं ददस्व ह ॥
तटाकं कारयेद्यस्तु स्वयमेव करोति वा ।
तस्यैव वंशजा सर्वे ब्रह्मलोकं व्रजन्ति हि ॥
कर्तुं तटाक यो मर्त्य प्रारम्भं कुरुते यदि ।
सोऽपि तत्फलमाप्नोति तदुपायप्रदश्च य ॥
मृदं तु भारमात्र यस्तत्तटाकाद्बहि. क्षिपेत् ।
त्रिविष्टपमवाप्नोति यावदाचन्द्रतारकम् ॥
तटाकार्धफलं राजन्कासारे परिकीर्तितम् ।
कूपं पादफलं ज्ञेयं कुल्यायां तच्छतोत्तरम् ॥
देवालयं तटाकं वा ग्रामं वा पालयेत्तु य ।
तेषां शतगुणं ज्ञेयं कर्तृभ्योऽपि महीयते ॥
देवतायतन यस्तु कुरुते कारयत्यपि ।
स चन्द्रधवलैर्यानैर्मम लोके सुखी भवेत् ॥
शिवस्य वा हरेर्वापि य करोति ममालयम् ।
ब्रह्मलोकादिकान्भुक्त्वा तदन्ते मामुपैति स ॥
दृषाद्भिः कारयेद्यस्तु धनाढ्यो देवतागृहम् ।
मृदा दरिद्र. कुरुते समपुण्यं प्रकीर्तितम् ॥
आरामं कारयेद्यस्तु बहुजन्तूपकारकम् ।
स चन्द्रधवलैर्यानैर्मम लोकं हि गच्छति ॥
स्थापयेद्वृक्षमेकं वा दरिद्रो लोकसाधनम् ।
स याति ब्रह्मणो लोकं यमेन परिपूजितः ॥
गावो वा ब्राह्मणो वापि पथिको वा नृपोत्तम ।
क्षणार्धमपि तच्छाया तिष्ठन्नाकं नयत्यमुम् ॥
पुरोपकण्ठे पथि च वृक्षारामप्रवर्तक ।
तत्र यावन्ति पर्णानि बीजानि कुसुमानि च ।
तावत्कालं वसन्नाके शतकोटिकुलान्वित ॥
तुलसीरोपणं ये तु कुर्वन्ति मनुजोत्तमाः ।

D_1 G_2 कथितो (for कारितो) —(L 1441) Hypermetric $G(ed)$ प्र- (for अनु-) D_1 जनान्, G_1 $G(ed)$ जनम् (for महत). M_1 स याति परमा गतिम् (for ^{b}) —(L 1442) $G(ed)$ च बहुधा (for बहुविधा). —(L. 1444) $G_{1,2}$ दानानामपि सर्वेषा (for ^{a}). —(L 1450) G_2 भूमौ (for भूमे). $G(ed)$ वृष्टि (for वर्ष-). —(L 1453) D_1 च ददस् (for ददतस्) —After line 1453, D_1 M_1 $G(ed)$ ins :

101** सर्वेषामेव वर्णाना ब्राह्मण परमो गुरु ।
तस्य देयानि दानानि स तारयति पण्डितः ॥
सत्कर्मनिरतायैव श्रोत्रियायाहिताग्नये ।
वृत्तिहीनाय वै देय दरिद्राय कुटुम्बिने ॥

[(L. 2) D_1 M_1 नारकान् (for पण्डित)]

—(L 1456) $G_{1,2}$ $G(ed)$ सर्वं (for सर्वान्) G_2 मखम् (for मखान्) —(L 1458) G_1 M_1 $G(ed)$ जीवन वक्ति मानवः (for ^{b}) —(L 1460) D_1 M_1 त्रिपु (for सर्व) —(L. 1461) D_1 भूमिदानात्र सशय , G_2 °दान न सशय (for ^{b}). —(L 1463) $G_{1,2}$ $G(ed)$ सर्वपापप्रणाशनम् (for ^{b}) —(L. 1465) $G(ed)$ दयायुक्त (for महीं दत्त्वा) —(L. 1466) D_1 विधिना (for विधिवन्) — G_2 om. lines 1471–1472. —(L. 1471) $G(ed)$ -धर्म- (for -वेद-). —(L 1473) $G_{1,2}$ तव (for तस्य) D_1 M_1 मम (for ब्रह्म-). —After line 1473, D_1 $G(ed)$ ins.

102** य कश्चिदध्वगो वापि तटाकेषु जलं पिबेत् ।
कर्तुं सर्वाणि पापानि नाशयति न सशय ॥
एकाहमपि कौन्तेय भूमिस्थमुदकं कुरु ।

[(L. 1) D_1 राजस् (for वापि) —(L. 3) D_1 भूयिष्ठमधिकं कुरु (for ^{b}).]

—(L. 1475) G_2 M_1 तत्क्षणम् (for तत्फलम्) —(L. 1476) $G(ed.)$ मात्रा (for -मात्र) D_1 तटाकाच्च (for तत्तटाकाद्). $G(ed)$ तटाकात्प्रक्षिपेद्बहि (for ^{b}) —(L. 1478) M_1 कासार (for °रे) G_3 कासार परिकीर्तित (for ^{b}). —(L 1479) $G(ed)$ कूपे (for कूपं) M_1 वा फलद (for पादफल). —(L. 1480) D_1 M_1 मठ ग्राम च पालयेत् (for ^{b}). —(L. 1485) G_2 मम लोकं स गच्छति (for ^{b}). —(L. 1488) G_1 सर्व- (for

सर्वान्वंशान्समुद्धृत्य यमेन परिपूजिता. ।
तप्तहाटकवर्णैश्च यानैर्यान्ति ममालयम् ॥
ऊर्ध्वपुण्ड्रकरो यस्तु तुलसीमूलमृत्कणै ।
तत्रैव नेत्रं तत्रासीन्मूर्ध्नीन्दोर्बिभृयात्कलाम् ॥
तृणानि तुलसीमूलाद्यावदुत्पादितानि वै ।
तावती ब्रह्महत्या वै च्छिनत्त्येव न संशय ॥
तुलसी सेचयेद्यस्तु चुलुकोदकमात्रकम् ।
पितरस्तृप्तिमेष्यन्ति ब्रह्मलोकं व्रजन्ति हि ॥
ददाति ब्राह्मणाना यस्तुलसीदलकोमलम् ।
यमेन पूजितो याति मम लोकं च शाश्वतम् ॥
तुलसीकाष्ठमणिना निर्मितेन प्रयत्नत ।
गायत्र्यादिजपं कुर्यात्तस्य नास्ति महद्भयम् ॥
सदा संधारयेद्यस्तु तुलसीमणिमालिकाम् ।
भूतप्रेतपिशाचैस्तु न दृष्टो वर्तते सुखी ॥
कण्ठे भुजद्वये यस्तु धारयेत्तुलसीमणिम् ।
यमदूता महात्मानो नमस्यन्ति हि तं द्विजम् ॥
कण्टकावरणं वापि प्राकारं वापि भूपते ।
तुलस्या कुरुते यस्तु मम लोकं स गच्छति ॥
योऽर्चयेद्धरिपादाब्ज तुलसीकोमलैर्दलैः ।
न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कदाचन ॥
तुलसीकाननं यत्र यत्र पद्मवनानि च ।
वसन्ति वैष्णवा यत्र तत्र संनिहितो हरि ॥
तुलसीमञ्जरीभिस्तु पितॄनर्चन्ति ये नराः ।
प्रहृष्टा पितर सर्वे मम लोकं व्रजन्ति हि ॥
गङ्गा तु तुलसीं चैव सर्वकालेषु संस्मरेत् ।
दु स्वप्ने दुर्निमित्ते च दुष्टभावे क्षुते खले ॥
तस्मात्वं पितृकार्येषु पितॄनर्चय मा स्मरन् ।
पितरस्ते प्रदास्यन्ति यत्ते मनसि रोचते ॥
ब्रह्मा देवास्तथा सिद्धा यक्षगन्धर्वकिंनरा ।
पितरो लोकपालाश्च पार्थैता मम मूर्तय· ॥
अमृतांशु कठोरांशुराकाशो भूमिरेव च ।
आप पर्वतजालानि विद्धि पार्थ ममांशव ॥
महानद्यो महाभाग वायुरग्निश्च सागर ।
अव्यक्त व्यक्तरूप च विद्धि मां पाण्डुनन्दन ॥
अर्च्यो वन्द्यस्तथा ध्येयो जप्य स्तुत्यः परा गतिः ।
मामेवं विद्धि भूपाल मयि सर्वं प्रतिष्ठितम् ॥
ममार्चनपरो नित्यं मामेव समुपैष्यसि ।
तव देहाभिमानस्य कर्ताह सर्वदानघ ॥
किं तु वक्ष्याम्यहं पार्थ यत्ते मनसि वर्तते ।
तदाचक्ष्व विचार्य त्वमत्र मुञ्चसि साध्वसम् ॥

वैशंपायन उवाच ।

इत्युक्तो देवदेवेन धर्मपुत्रो महामतिः ।
मति चक्रे पुनर्धर्मान्श्रोतुं देवे जनार्दने ॥
इद भगवता प्रोक्तं देवदेवेन चक्रिणा ।
य शृणोति सदा भक्त्या पातकेभ्य स मुच्यते ।

Colophon.

वैशंपायन उवाच ।

कृपां विज्ञाय देवस्य धर्मराजो महामति ।
पुनरेवापरं धर्मं पप्रच्छ द्विजसंसदि ॥

बहु). — (L. 1492) G(ed) गौर्वाथ (for गावो वा) — (L 1493) G(ed) क्षणार्धं वातच्छायाया (for ^{a}) D_1 तिष्ठन्लोके (for °न्नाक) — (L 1497) D_1 मनुजोत्तम (for °मा) — (L. 1498) G(ed) सर्वान्लोकान्समुत्तीर्य (for ^{a}) — (L 1500) G_1 G(ed) धरो (for करो) D_1 -मृत्तिका, G_2 -मृद्गणै (for मृत्कणै.). — (L 1501) G_1 धन्यस्य, M_1 तस्य स्यात्, G(ed) शिरासि (for तत्रासीन्). D_1 तस्यैव पत्र तत्रस्थो (for ^{a}) G(ed) कला चन्द्रस्य धारयेत् (for ^{b}). — (L 1502) D_1 G(ed) यावन्त्यु(D_1 °न्त्य)पहृतानि वै, G_1 °न्त्युत्पाटयन्ति वै (for ^{b}). — (L. 1504) G(ed) -मात्रत. (for °कम्). — (L 1506) G(ed.) यो ददाति ब्राह्मणाय (for ^{a}). D_1 M_1 G(ed) तुलस्या कोमलं दलम् (for ^{a}). — (L. 1507) G(ed) सनातनम् (for च शाश्वतम्) — (L 1509) G_2 कुर्वन् (for कुर्यात्) G(ed) तस्य स्थानं ममालय (for ^{b}) — (L 1511) G(ed) स्पृष्टो (for दृष्टो). — (L 1512) After line 1512^{a}, G(ed) ins

103** कर्णयोर्वा शिरस्यथ ।
धारयेद्यस्तु तुलसीमणिमाला नरोत्तम ॥

— (L 1513) G(ed) महात्मानं (for °नो) — (L 1514) D_1 भूतले (for भूपते). — (L 1520) D_1 मानवा· (for ये नरा·). — (L. 1521) G(ed) तुष्यन्ति पितरस्तस्य (for ^{a}). — (L 1523) M_1 दु स्वप्ने वा दुर्निमित्ते (for ^{a}) D_1 M_1 क्षुतस्खले, G_2 क्षुधे खिले (for क्षुते खले) — (L 1525) G_2 G(ed) प्रदास्यन्ते (for °न्ति) — (L 1526) G_1 यक्षा (for सिद्धा). G_1 रक्षो (for यक्ष-) — (L. 1529) G(ed) [ए]ते वै (for पार्थ) D_1 G_1 M_1 ममांशका (for °व·) — (L 1530) G(ed) सागरा (for °र) — For line 1531, D_1 subst.

104** आद्यो वन्द्य श्रिया ध्येयो सदा जप्यपरा गति· ।

— (L. 1535) कर्ताह पाण्डुनन्दन (for ^{b}) — (L 1538) G(ed) महात्मना (for °मति) — (L 1539) M_1 तथा (for पुनर्) G(ed.) ध्यात्वा (for धर्मान्) G(ed) श्रोतु धर्माञ्जनार्दनात् (for ^{b}) — (L 1541) G_1 पातकैस्तु, G_2 °कैस्तद् (for °केभ्य). M_1 पातकै स तु मुच्यते (for ^{b})

Colophon — *Sub-parvan* D_1 G_1 M_1 आश्चर्यपर्व, G_2 M_1 G(ed) शेषधर्मा — *Adhy name* D_1 शेषधर्मे सकलधर्मप्रशमनम्, G(ed) नानाधर्मप्रशंसा — *Adhy no* D_1 $G_{1,2}$ M_1 G(ed) 12.

D_1 G_2 युधिष्ठिर (for वैशंपायन). — (L. 1542) G(ed) धर्मपुत्रो (for °राजो). — (L. 1543) G(ed.) पृष्टवान्गरुड-

युधिष्ठिर उवाच ।

यज्ञमूर्ते महस्राक्ष धर्ममूर्ते नमोऽस्तु ते ।
पूजाभिषेककर्माणि कथयस्व ममानघ ॥

श्रीभगवानुवाच ।

शृणु पार्थ प्रवक्ष्यामि पुण्यकालं च पूजनम् ।
पूजाद्रव्यं च धर्मं च ब्राह्मणानां प्रपूजनम् ॥
द्वादश्यां पौर्णमास्यां च एकादश्यां नृपोत्तम ।
सोमसूर्योपरागे च संक्रान्तावयने शुभे ।
सिद्धयोगे पुण्यदिने व्यतीपाते च वैधृतौ ॥
पुण्यक्षेत्रे पुण्यकाले पुण्यर्क्षे पाण्डुनन्दन ॥
शन्यश्विन्यां बुधाश्विन्यां माघमासे नृपात्मज ।
वस्त्रपूतेन पयसा तथा पञ्चामृतेन च ।
पुष्पगन्धोदकैश्चैव य स्नापयति केशवम् ॥
नैवेद्यैर्विविधाकारैर्भक्ष्यमुख्यैर्नृपोत्तम ।
यः पूजयति मां पार्थ शूलपाणिमथापि वा ॥
मातृत पितृतश्चैव प्रियाया वंशजानपि ।
सर्वान्वंशान्समुद्धृत्य देवगन्धर्वसेवित ॥
तप्तकाञ्चनसंवीतैर्नानामणिविराजितैः ।
किङ्किणीजालसंयुक्तैर्यानैर्हंसनियन्त्रितैः ॥
अप्सरोगणसकीर्णैर्विमानैरुपशोभित: ।
याम्यादिषु च लोकेषु भुक्त्वा भोगान्यथेच्छया ।
मम लोकमनुप्राप्य तत्रैव परिमुच्यते ॥
शंकरं मां च सर्वेशं भेदबुद्धिविवर्जित ।
यः पूजयेत्सदा भक्त्या काङ्क्षितं लोकमेष्यति ॥
केतकीकरवीराब्जचम्पकाजातिमल्लिकाः ।
अमूनि ये प्रयच्छन्ति पुष्पाणि सुरभीणि मे ॥
तां पूजां प्रतिगृह्णाति रुद्रो वै लोकशासन ।
पालकोऽहं च राजेन्द्र ह्यावयोरन्तरं न च ॥
पूजयस्व च मां पार्थ तत्र त्वं सुखमेष्यसि ॥
तिलतैलान्वितं दीपं मम रुद्रस्य भारत ।
दत्त्वा नर सर्वकामान्संप्राप्नोति न संशय ॥
घृतदीपं तु यो दद्यान्महादेवस्य संनिधौ ।
स मुक्त. सर्वपापेभ्यः सर्वयज्ञफलं लभेत् ॥
यथादिष्टतमं भोज्यं तत्तदीशाय दापयेत् ।
सर्वपापविनिर्मुक्तो मम लोकं स गच्छति ॥
कार्त्तिके मासि माघे च दीपं मम गृहे सदा ।
वर्तयस्व च कौन्तेय ब्राह्मणान्भोजयस्व ह ।
भोजिते ब्राह्मणे मृष्टं मम तृप्तिर्भवेद्ध्रुवम् ॥
यथादिष्टतम भोज्यं तत्तद्विप्राय दापयेत् ।
स याति ब्रह्मभवनं सर्वमोहविवर्जितम् ॥
भ्रूणहाप्यन्नदानेन शुद्धो भवति भूपते ।
नान्नतोयसमं दानं त्रिषु लोकेषु विद्यते ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकै ।
शृणुष्व चित्रं भूपाल शुद्ध्यत्यन्नजलप्रद· ॥
शरीरमन्नज प्राहु प्राणमन्न प्रचक्षते ।
तस्मादन्नप्रदो ज्ञेयः प्राणदो नात्र संशय· ॥
अन्नदस्य कुले जाता आसहस्रं नृपोत्तम ।
नरकं ते न पश्यन्ति तस्मादन्नप्रदो वर ॥
पथि श्रान्तं द्विजं दृष्ट्वा यस्तु भक्त्या प्रपूजयेत् ।
सर्वदेवगणाः पूर्वमन्न दत्त्वा तु धर्मज ॥
अन्नदानेन मतिमान्ब्रह्मलोकं स गच्छति ॥
आयान्मम तिथिं राजन्सर्वदेवा अनुव्रता ।
तस्मिंस्तुष्टे जगत्तुष्टं देवास्तृप्यन्ति धर्मज ॥
दिवं प्रपेदिरे मुक्तास्तस्मादन्नप्रदो वरः ।
नास्तिवाक्यं स कृत्वा यो ब्राह्मणे गृहमागते ।
तस्य पापं महाघोरं रौरवं नरकं भवेत् ॥
अन्नं ददाति यो राजन्स सर्वान्कृतवान्मखान् ।
पशुराज्यधनापत्यस्वर्गमोक्षाल्लँभेन्नर· ।
अन्नदानेन कौन्तेय तस्मादन्नप्रदो वरः ॥
विप्ररूपेण भोक्ताहं विप्ररूपेण पूजित· ।
ददामि विप्ररूपेण सर्वान्कामान्नृपोत्तम ॥
पादाभ्यङ्गं भक्तियुक्तो ब्राह्मणानां करोति यः ।
स स्नातः सर्वतीर्थेषु गङ्गास्नानपुर·सरम् ॥
तैलाभ्यङ्गं महाराज ब्राह्मणानां करोति य· ।
स स्नातोऽब्दशत साग्रं गङ्गायां नात्र संशयः ॥
उष्णोदकेन यो राजन्ब्राह्मणान्स्नापयेन्नर· ।
स कोटिकुलसंयुक्तो वसेद्ब्रह्मपुरे नरः ॥
कर्मणा मनसा वाचा यो रक्षेदामयान्वितम् ।

ध्वजम् (for ^{b}) — G_2 om the ref — (L 1548) M_1 नराधिप (for नृपोत्तम). — G_2 om lines 1551–1552. — (L 1554) G_2 G(ed) -गन्धादिभिश् (for -गन्धोदकैश्). — (L 1559) G_1 -विचित्रितै , D_2 -विकुट्टिमै , M_1 -विघट्टितैः (for -विराजितै). — (L. 1561) G_1 संवीतैर् (for -सकीर्णैर्) — (L 1562) D_1 सत्यादिषु (for याम्या°). D_1 यथेप्सितान् (for °च्छया) — (L. 1566) G_1 -मल्लिकै· (for °का) — (L 1568) G(ed) -नाशन· (for -शासन·). — (L 1571) G(ed) संनिधौ (for भारत) — (L 1572) G_2 संवृणोति (for संप्राप्नोति). —(L. 1573) G_2 मम रुद्रस्य संनिधौ , M_1 G(ed.) मम देवस्य सं° (for ^{b}) —(L. 1577) G(ed.) च संनिधौ (for गृहे सदा). — (L 1579) G(ed) भोजनं (for भोजिते) G(ed) तृप्त्यै (for तृप्तिर्) — (L 1580) ब्राह्मणेभ्यो निवेदयेत् (for ^{b}) — (L 1584) G(ed.) -संयुक्तो (for युक्तो वा).—(L 1585) G_2 शुद्ध्यर्थं च (for शुध्यत्यन्न-). — G_1 om lines 1586–1589. — (L 1587) G_2 प्राणदः परिकीर्तित (for ^{b}) — (L 1588) D_1 आसाद्दस्रं (for आस°). — D_1 om lines 1590–1600. — (L 1593) G_1 अनुद्रुता· (for °व्रता) — M_1 om. (hapl.) lines 1596–1600. — (L 1596) G_1 अकृत्वा च ; G(ed.) अकृत्वा तु (for स कृत्वा यो). — G_1 G(ed.) om line 1597. — G_2 om. lines 1604–1605. — (L. 1607) D_1 G(ed.) प्रियाम्,

स याति वज्रिणो लोकं पुनरावृत्तिवर्जितम् ॥
यो ददाति महीपाल निवासं ब्राह्मणाय च ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति पुष्कलम् ॥
अन्येभ्य प्रतिगृह्यापि स्वां गामपि पयस्विनीम् ।
यो ददाति च विप्राय स याति ब्रह्मण पदम् ॥
कपिलां वेदविदुषे यो ददाति पयस्विनीम् ।
स एव रुद्रो भूपाल सर्वदेवप्रपूजित. ॥
विप्राय ब्रह्मविदुषे दद्यादुभयतोमुखीम् ।
तस्यैव वंशजा. सर्वे मम लोके वसन्ति हि ॥
यो मृत्युकाले संप्राप्ते गां ददाति पयस्विनीम् ।
गवां दर्शितमार्गेण ब्रह्मलोकं स गच्छति ॥
व्याधिना पीडितो यस्तु ग्रहनक्षत्रपीडया ।
अपमृत्युं च तान्सर्वान्स तीर्त्वा सुखमश्नुते ॥
अपत्यधनरत्नानि राज्यानि विविधानि च ।
गोदानात्प्राप्यते मर्त्यो निष्पापश्च दिवं व्रजेत् ॥
तस्मात्सर्वप्रयत्नेन गोदानं कुरु भूपते ।
अनेन ते भवेद्वृद्धि स्वर्गमोक्षौ च सुव्रत ॥
वरिष्ठ· सर्वलोकानां गोप्रदाता नृपोत्तम ।
मत्प्रियो मम भक्तश्च पूज्यो लोकेषु विश्रुत ॥
सदा दानेषु निष्ठस्य सदा शास्त्रानुवादिनः ।
प्रियंवदस्य साधोश्च कृपा मम सदा भवेत् ॥
सर्वलोकप्रभुं वीरं सर्वधातारमच्युतम् ।
योगीश्वर सदानन्दं विद्धि मां भरतर्षभ ॥
स्रष्टारं सर्वभूतानां रक्षितारं जगत्त्रयम् ।
संसारोत्तारणं देव विद्धि मा भरतर्षभ ॥
धर्मदं धर्मशीलानां तापसाना तपःफलम् ।
ध्यातॄणां ध्यानयोगं मां विद्धि त्व धर्मनन्दन ॥
मया प्रोक्तमिमं धर्मं यः शृणोति मदाश्रय ।
ददामि तस्य वै स्वर्गं यावदाचन्द्रतारकम् ॥

Colophon

युधिष्ठिर उवाच ।

नानाद्रव्याणि देयानि वस्त्रादीनि फलानि च ।
सुगन्धश्च सुपुष्पाणि धान्यानि विविधानि च ।
कस्य देयानि योगीन्द्र तन्मे त्वं कृपया वद ॥

श्रीभगवानुवाच ।

सर्वेषामपि दानानां कर्ताहं पाण्डुनन्दन ।
मम मूर्तिधरायेह विप्रायैव ददस्व ह ॥
वस्त्रं ददाति यो राजन्ब्राह्मणाय सदक्षिणम् ।
शिवलोकमवाप्नोति शतवंशसमन्वित ॥
कौबेरं कम्बलाद्यानि कञ्चुकान्सूर्यसंनिधिम् ।
चित्राम्बरप्रदाता च स्वर्गलोकाधिपो भवेत् ॥
सुरक्तवस्त्रदश्चैव नृप माञ्जिष्ठदस्तथा ।
चीराम्बरप्रदाता च मम लोकं स गच्छति ॥
यानदश्छत्रदश्चैव पादुकां च ददाति यः ।
उपानह्प्रदाता च सर्वलोकवरो भवेत् ॥
गजाश्वमहिषान्राजन्यो ददाति सदक्षिणम् ।
अपमृत्युभयान्मुक्तस्तथा मेषप्रद सुखी ॥
शत्रूञ्जयति संग्रामे राजा जयति मण्डलम् ।
तस्य भृत्यः शत्रुजन' पूज्य सर्वधनुर्भृताम् ॥
तस्मात्त्वं भूभृता श्रेष्ठ कुरु दानं मयोदितम् ॥
अजकृष्णाजिनं दान सर्वव्याधिविनाशनम् ।
आयुष्करं प्रियं मृत्यो· स्वर्गदं स्वर्गमिच्छताम् ॥
अनड्वान्दत्तमात्रेण पापव्याधिविनाशनम् ।
दातारं ब्रह्मणो लोकं नयत्येव न संशय ।
कृष्णाजिनप्रदातॄणां क्षयगुल्मादिनाशनः ॥

(for नर·). — (L. 1612) G(ed.) आप्नोति (for प्रा°). G_2 मानव· (for पुष्कलम्). — (L. 1613) D_1 -गृह्णाति (for -गृह्यापि). G_1 अन्येभ्यो ब्राह्मणेभ्यश्च (for [a]) D_1 यस्तु गा हि (for स्वा गामपि). — (L. 1616) D_1 रुद्रलोके (for एव रुद्रो). — (L 1617) D_1 प्रियाय वेदविदुषे (for [a]) — (L. 1620) D_1 G_1 G(ed.) गवा (for गवा). — (L 1621) D_1 M_1 व्याध्यादि (for व्याधिना). D_1 -पीडित' (for -पीडया) — (L. 1622) M_1 गा दत्त्वा (for तान्सर्वान्) — (L. 1626) G(ed.) ऋद्धि (for वृद्धि) G_2 च भारत, G(ed) सुखप्रदौ (for च सुव्रत). D_1 स्वर्गमोक्षसुखानि च (for [b]) — (L 1627) D_1 गोदानं च ; G_1 G(ed.) गोप्रदानान्, M_1 °दान (for °दाता). — (L 1629) G_1 दानैक-, G(ed) दाने सु- (for दानेषु). G(ed) दानेषु (for शास्त्रानु-) — (L 1631) G(ed) -दातारम् (for -धा°) — (L 1634) D_1 संसाररोगोत्तरण, M_1 G(ed) °रोत्तारकं देवं (for [a]). — (L 1636) M_1 सिद्धिद पाण्डुनन्दन (for [b]).

COLOPHON. — *Sub-parvan* : D_1 आश्चर्यपर्व. — *Adhy. name* D_1 G(ed) शेषधर्मे दानप्रशसा, $G_{1\cdot 2}$ शेषधर्माः. — *Adhy no.* D_1 $G_{1,2}$ M_1 G(ed) 13

G_2 om. line 1640 — (L 1640) D_1 गन्धधूप-, M_1 सुगन्धीनि (for सुगन्धश्च). — (L. 1641) D_1 त्वमेव (for तन्मे त्व) — (L 1643) D_1 रूप- (for मूर्ति-). — (L 1646) G(ed) कौशेय कम्बलादीनि (for [a]) G(ed) कञ्चुक सूर्यसंनिभम् (for [b]) — For line 1646, G(ed) ins. ·

105** यो ददाति च विप्राय स्वर्गलोक स गच्छति ।

— (L 1647) D_1 स्वर्गलोक स गच्छति (for [b]). — (L. 1649) M_1 G(ed.) चीनाम्बर- (for चीरा°). — After line 1649, G(ed) ins

106** वैशाखपौर्णमास्या च ब्राह्मणाना विशेषत ।

— (L 1651) G_1 लोकेश्वरो, M_1 G(ed) -लोकचरो (for °वरो) — (L 1653) D_1 G_1 M_1 अपमृत्यु जयत्याशु (for [a]) — (L. 1655) G_1 M_1 पुण्यजना ; G_1 G(ed.) शत्रुजनै· (for °जन·). D_1 पूज्य· सर्वधनुर्भृत' (for [b]) — (L 1657) D_1 G(ed) आर्द्र-

दारिद्र्यनाशनं राजन्नपमृत्युभयापहम् ।
दारुणा निर्मित पात्रं पूरितं गन्धवारिणा ॥
यो राजन्मुखजेभ्यस्तु दक्षिणा च ददाति च ।
उपेन्द्रो भगवान्विष्णु. सुधामस्मै प्रयच्छति ।
सुधां पिबन्रुक्मपात्रे स्वर्गलोके महीयते ॥
यो राजल्लोहपात्रे तु स्वादुपानप्रपूरितम् ।
ददाति भूसुरेभ्यस्तु तस्य पुण्यफलं शृणु ॥
मार्गे सुधा पिबन्राजन्यमलोकं स गच्छति ।
पूजितो धर्मराजेन चन्द्रलोकं स गच्छति ॥
ताम्रपात्र महाराज गन्धोदकसमन्वितम् ।
ददाति ब्राह्मणानां य सूर्यलोकं स गच्छति ॥
रजतं राजशार्दूल पात्रं जलसमन्वितम् ।
वेदशास्त्रविदे दद्यात्तस्य पुण्यं ब्रवीमि ते ॥
पञ्चाशद्युगपर्यन्तं चन्द्रलोके सुखी भवेत् ।
ततो भूमि समासाद्य चक्रवर्तीह जायते ॥
सौवर्णनिर्मितं पात्र स्वादुपानप्रपूरितम् ।
श्रोत्रियाय तु यो दद्याद्दरिद्राय विशेषत· ।
तस्य पुण्यफलं चित्र सावधानमति. शृणु ॥
यक्षकिंनरगन्धर्वचारणाद्यैरभिष्टुतः ।
सुधापानं प्रकुर्वाण प्रयाति मम मन्दिरम् ॥
पञ्चकोटिकुलैर्युक्तो मेरुमूर्ध्नि चिरं वसेत् ।
भूलोकं समनुप्राप्य सार्वभौमश्च जायते ॥
इष्ट्वा दिव्यक्रतून्सर्वांस्तथा जित्वा भुवःस्थलम् ।
दत्त्वा सर्वाणि दानानि मम सायुज्यमश्नुते ॥
कांस्यपात्रं तु यो दद्याद्रुक्मदक्षिणसंयुतम् ।
ददामि विष्णवेत्युक्त्वा यो ददाति सुवाग्मिने ।
कोटिवंशसमायुक्तः सत्यलोके सुखी भवेत् ॥
तस्मात्सर्वेषु कालेषु यत्किंचिद्वै ददाति च ।
मम बुद्ध्या महीपाल तत्सर्वं मेरुतां व्रजेत् ॥
नव वै मृण्मयं पात्रं स्वादूदकसमन्वितम् ।
दरिद्रोऽपि च मा ध्यात्वा मम सालोक्यमश्नुते ॥
वृद्धेभ्यो ब्राह्मणेभ्यस्तु यतये योगिने नृप ।
यद्दत्तं यद्धुतं तप्तं तत्सर्वं मदनुग्रहात् ॥
कोटिकोटिगुणं राजन्स्वल्पं वापि महद्भवेत् ।
अक्षय्यलोकमाप्नोति ह्यक्षय्यं सुखमश्नुते ॥
वृद्धेभ्यो ब्राह्मणेभ्यस्तु यतये रोगिणे नृप ।
वस्त्रयष्ट्यजिन पथ्यमौषधं च ददाति य ।
सर्वान्वंशान्समुद्धृत्य ब्रह्मलोकं स गच्छति ॥
हिरण्य राजत वापि यो दद्याद्दानमुत्तमम् ।
महदैश्वर्यमाप्नोति ब्रह्मणा परिपूजित ॥
पशुपुत्रधनादीन्वै विन्देत्सौवर्णदानतः ।
पुण्यलोकानिमान्सर्वानमृतत्वं च गच्छति ॥
रजतं निष्कमात्रं तु यो दद्यात्पाण्डुनन्दन ।
शिवलोकमवाप्नोति शतवंशसमन्वितः ॥
सीसं कांस्य तथा ताम्रं पलत्रितयसंमितम् ॥
यो ददाति नरश्रेष्ठो रुद्रलोकं स गच्छति ॥
अयस्कान्तं(?) यतीनां तु यो दद्यात्पात्रमुत्तमम् ।
स कोटिकुलसयुक्तो देवलोके चिरं वसेत् ॥
काषायं च तथा भैक्षं कौपीनं कम्बलं तु वा ।
यो ददाति यतीना तु स मुक्तो नात्र संशय· ॥
कार्त्तिक्या पौर्णमास्या वा आषाढे वापि भूपते ।
वृषभं विसृजेद्यस्तु तस्य पुण्यफल शृणु ॥
सर्वजन्मार्जितै पापैर्विमुक्तो रुद्ररूपभाक् ।
कुलसप्ततिसंयुक्तो रुद्रेण सह मोदते ॥
पितरस्तस्य तृप्यन्ति देवास्त्रिदशपुंगवाः ।
नरकस्था दिवं यान्ति दिविस्था ब्रह्मणः पदम् ।
ब्रह्मस्था विष्णुलोकं च सत्यं सत्यं मयोदितम् ॥
शिवलिङ्गाकृतिं कृत्वा महिषं य समुत्सृजेत् ।
यमस्य यातना तस्य नैव तत्र मयोदितम् ॥
यमेन पूजित· सम्यक्सुरलोकं व्रजेद्ध्रुवम् ॥
अनड्वाहं चिर कालं कर्षयित्वा नृपोत्तम ।
उत्सृजेद्वार्धके भावे तस्य पुण्यं वदामि ते ॥
इहलोके सुखं भुक्त्वा पुत्रपौत्रादिसंयुतः ।

(for अज-) — G_2 om. lines 1660–1661.—(L 1662) D_1 अपमृत्यु प्रणश्यति, G_1 M_1 °मृत्युश्च नश्यति, G(ed) °मृत्यु च नाशयेत् (for ^{b}) —(L 1664) G(ed) स द्विजेभ्यश् (for मुख°) —(L 1667) D_1 -पानं प्र-; G_2 -पानक- (for -पान-प्र-) —(L 1670) D_1 M_1 यम- (for धर्म-). —(L. 1673) M_1 G(ed) राजत (for र°) G_1 पात्र जल-; M_1 पात्र वारि- (for पात्रे जल-) —(L 1675) G_1 2 ब्रह्मलोके (for (for चन्द्र°) G(ed.) महीयते (for सुखी भवेत्) —(L. 1679) D_1 G_2 -मना (for मति) —(L 1684) M_1 दिव्यान्कुरून् (for दिव्यक्रतून्) G(ed) राजस् (for सर्वांस्) and निर्जित्य च (for तथा जित्वा). —(L 1685) G_2 मम लोक स गच्छति (for ^{b}) —(L 1686) G(ed) -द्वितय- (for -दक्षिण-). —(L, 1687) G(ed.) भक्तियुक्तस्तु वाग्मिने (for ^{b}). —(L, 1688) G_1 महीयते (for सुखी भवेत्). —(L 1690) G(ed) मयि भक्त्या (for मम बुद्ध्या) — G_1 2 om lines 1694–1696 —(L 1702) G_2 -वस्त्र- (for -पुत्र-) — D_1 — D_1 om (hapl) lines 1704–1707 —(L. 1706) G(ed) -सगुतम् (for -संमि°) —(L 1707) M_1 विष्णु- (for रुद्र-). —(L 1708) D_1 आयरकं तु; G(ed) मृण्मयं च (for अयस्कान्त) —(L 1710) D_1 पादुका; G_2 M_1 चन्दन (for च तथा). —(L 1712) G(ed) आषाढ्यां (for °ढे) —(L 1714) G_2 M_1 रूपधृक् (for °भाक्). —(L. 1715) G_2 कुल सप्तकुलैर्युक्तो (for °) M_1 विष्णुना (for रुद्रेण) —(L 1718) G(ed) तत्रस्था (for ब्रह्मस्था). —(L. 1719) M_1 -लिङ्गाङ्कित (for लिङ्गाकृति) —(L. 1721) G(ed) व्रजत्यसौ (for व्रजेद् ध्रुवम्) —(L 1722) G(ed.) वृषभं य (for अनड्वाह) —(L. 1723) G(ed) काले (for भावे). G_2 योत्सृजेद् (for उ°). — For line 1723, D_1 subst. :

सर्वान्वंशान्समुद्धृत्य मम सालोक्यमश्नुते ॥
ददाति च सुवृत्ताय महिषीं च पयस्विनीम् ।
अपमृत्युं जयत्येव यमेन सह मोदते ॥
दर्शे प्रसूतिका गा च महिषीं च नृपोत्तम ।
अपमृत्यु दरिद्राय दत्त्वा तीर्त्वा दिवं व्रजेत् ॥
ताम्बूलं नित्यशो राजन्यो दद्याद्ब्राह्मणाय च ।
तस्याहं च कुरुश्रेष्ठ ददामि श्रीयुतं पदम् ।
अष्टैश्वर्यं भवेदत्र ताम्बूलात्कुरुनन्दन ॥
क्षीरदानं शिशूना तु स्वर्गलोकप्रदं ध्रुवम् ।
शूलादिरोगयुक्ताय ब्राह्मणाय ददाति यः ॥
क्षीरोदस्योत्तरे तीरे पिबति क्षीरमुत्तमम् ।
मधूनि दधितक्राणि घृतानि च नृपोत्तम ।
यो दद्याद्ब्राह्मणेभ्यस्तु तस्य नो मृत्युतो भयम् ॥
इक्षुदण्डं गुडं क्षीरं ब्राह्मणाय प्रयच्छति ।
पथि श्रान्ताय यो दद्यात्सततं मयि तत्परः ॥
सर्वलोकप्रभुश्चैव सर्वयज्ञेषु दीक्षित ।
सर्वदानफल तस्य सर्वलोकं च शाश्वतम् ॥
नालिकेरफलं दद्याच्चैत्रवैशाखमासयो ।
कौबेरं लोकमाप्नोति यमेन परिपूजितः ॥
युगाना त्रिदशं स्थित्वा तत कैलासमेति च ।
तत्र पञ्चयुगं स्थित्वा ब्रह्मलोके महीयते ॥
शर्करारससयुक्तं नालिकेरं ददाति य ।
तस्य पार्श्वे प्रसन्नोऽहं देवास्तस्य वशानुगाः ॥
एलालवङ्गकर्पूरमिश्रित शीतलं जलम् ।
ददन्मार्गे सुधां पीत्वा मम लोकं स गच्छति ॥
मार्गशीर्षे महाराज मरीचि लवणं ददन् ।
सर्वपापविनिर्मुक्तो व्रजेद्रुद्रस्य मन्दिरम् ॥
इन्धनं कम्बलं वस्त्रमुपानत्कुङ्कुमं घृतम् ।
मित्रलोकमवाप्नोति सर्वसिद्धनिषेवित ॥
ज्येष्ठे तु सर्वबीजानि कृषिक्षेत्रशकृज्जलै ।
ब्राह्मणानां सहायार्थं धनैरपि च कर्मणा ।
कुरुते यः सदा भक्त्या तस्य पुण्यफल शृणु ॥
मातृन पितृतश्चैव दशकोटिकुलान्वित ।
गन्धर्वै. स्तूयमानस्तु मम लोकं स गच्छति ॥
सुशीलो ब्राह्मणो भक्त. स च मे सतत प्रिय ।
तेन पूतमिदं सर्वं जगत्स्थावरजङ्गमम् ॥
घ्नन्तं शपन्त परुषं वदन्त
यो ब्राह्मणं न प्रणमेद्यथार्हम् ।
स पापकृद्ब्रह्मदवाग्निदग्धो
दण्ड्यश्च वध्यश्च न चास्मदीय ॥
प्रियो यथा ब्राह्मणपुङ्गवो मे
तथा न लक्ष्मी स्वपुर महात्मन् ।
त्रिविष्टपे ब्रह्मपुरे वसेत्स
त्वया हि पूज्यो गुरुदेवतात्मा ॥
तस्मात्त्वमपि राजेन्द्र ब्रह्मभक्त सदा भव ।
तस्मिंस्तुष्टे धरा सर्वा फलत्येव न संशय ॥
एवमाद्या महाभाग धर्मा बहुविधा नृप ।
तत्र सारं प्रवक्ष्यामि धर्मं तव हिताय च ॥
मयि भक्तिर्यदि भवेद्दानकाले नृपोत्तम ।
अनन्तफलद ज्ञेयं तद्दानं सात्त्विकं भवेत् ॥
इद रहस्यमायुष्यं य शृणोति सदा नर ।
सर्वदानफलं तस्य सर्वपापक्षयो भवेत् ॥

Colophon

वैशंपायन उवाच ।

श्रुत्वैवं धर्मसंवाद धर्मपुत्रो यदूत्तमात् ।

107** य उत्सृजेगार्द्धकेपि तस्य पुण्यफलं शृणु ।
— (L. 1725) G_2 मम लोक स गच्छति (for ^{b}) — D_1 om. (hapl.) lines 1729–1736 — (L 1729) G_1 दरिद्राच्च, G_2 G(ed.) °द्रे च (for °द्राय). — (1732) M_1 G(ed.) अत्यैश्वर्यं (for अष्टै°). — (L 1738) D_1 G_2 M_1 G(ed) इक्षुक्षीरं गुड (M_1 घृतं) दण्डं (for ^{a}). G(ed) महात्मने (for प्रयच्छति) — (L 1741) M_1 सर्वलोकश्च शाश्वत (for ^{b}) — (L 1745) M_1 पञ्चशत (for °युग). — (L 1746) M_1 -मधु- (for रस-). — (L 1747) D_1 देवस्तस्य च शंकर (for ^{b}). — (L 1748) G_2 -समितं (for -मिश्रित) — (L 1750) G(ed) तथा माघे (for महाराज) — (L 1751) G_2 इन्द्रस्य, M_1 त्रिणोश्च (for रुद्रस्य) D_1 सनिधिम् (for मन्दिरम्) — (L 1752) G_1 छत्र ; G(ed.) चित्रं (for वस्त्र) D_1 G_2 कञ्चुकं (for कुङ्कुम). — (L 1753) M_1 -निषेवितम् (for °त) D_1 मित्रसिद्धनिषेवितम् (for ^{b}). — After line 1753, D_1 M_1 ins

108** पुष्ये माघे ददन्नेतत्सर्वेषा मित्रता व्रजेत् ।
[M_1 पुष्यमासे ददच्चैलं (for ^{a}).]

While G(ed) ins after line 1553

109** पुष्यमासे ददन्नेतान्सर्वचारित्रता व्रजेत् ।
— (L 1755) G_1 G(ed) ब्राह्मणव्य(G_1 °णे व्य)वसायार्थं (for ^{a}) — (L 1759) D_1 तस्याहं स च मत्प्रिय , G_1 मम देहाच्च स प्रिय , M_1 तस्य मेऽह स च प्रिय , G(ed) यत्स्वहङ्कारवर्जित (for ^{b}) —(L 1763) $G_{1\cdot 2}$ -मध्ये (for -दग्धो). —(L. 1764) D_1 $G_{1\cdot 2}$ G(ed) दण्डश् (for दण्ड्यश्) — (L 1765) G_2 -पुंगवेन (for °वो मे) — (L 1766) M_1 च लक्ष्म्या (for न लक्ष्मी) D_1 यथा च लक्ष्मी स्वपुर यथात्मन् , G_2 मेवा च लक्ष्म्या स्वपुरे महात्मन — (L 1770) G(ed) सर्वधर्मा फलन्ति (for धरा सर्वा फलति) —(L 1771) D_1 G_2 महाभागा , G_1 °राज- (for °भाग) G(ed) बहुगुणा (for °विधा) — Before line 1775, D_1 G(ed) ins वैशपायन

COLOPHON — *Sub-parvan* D_1 G_1 आश्चर्यपर्व , D_1 $G_{1\cdot 2}$ M_1 G(ed) शेषधर्मा — *Adhy. name* G_1 दानप्रशंसा , G(ed) नानादानप्रशंसा . — *Adhy no* D_1 $G_{1\cdot 2}$ M_1 G(ed.) 14.

पप्रच्छ तं नमस्कृत्य धर्मं तव पितामह॰ ॥
युधिष्ठिर उवाच ।
शङ्खचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥
यानि मङ्गलपुष्पाणि फलानि रसवन्ति च ।
साळग्रामाशिलादाने लिङ्गदाने च यत्फलम् ॥
पुष्पदानानि चित्राणि स्फटिकादीनि वृष्णिप ।
एषां दानेषु यत्पुण्यं तन्ममाचक्ष्व विश्वधृक् ॥
श्रीभगवानुवाच ।
माघमासं पुरस्कृत्य प्रपा कृत्वा सुशोभनाम् ।
सर्वेषामेव दानानां शीतं पानीयमुत्तमम् ।
यो ददाति दयायुक्तस्तस्य पुण्यं वदामि ते ॥
इहलोके चिरं भुक्त्वा सर्वैश्वर्यसमन्वित॰ ।
ब्रह्मलोकमवाप्नोति सत्यं सत्यं मयोदितम् ॥
चतुष्पथे महामार्गे शालां कृत्वा सुशोभनाम् ।
पानीयं च यवागूं च कृष्णधान्यमयीमपि ।
पथि श्रान्ताय यो दद्यात्तस्य पुण्यं वदामि ते ॥
शिबिकायानमारोप्य देवदूता प्रियंवदाः ।
व्यजनानि प्रधून्वन्तो विशन्ति च सुरालयम् ॥
विमाने सूर्यसंकाशे समारोप्य ममाज्ञया ।
प्रविशन्ति च तं लोके ततस्तु ब्रह्मण पदम् ॥
तत्र कोटियुग स्थित्वा द्विकोटिकुलसंयुतः ।
मम लोकमवाप्नोति तत्रैव परिमुच्यते ॥
कस्तूरीकर्पूरयुतं श्रीगन्धं तु द्विजातये ।
यो ददाति नरश्रेष्ठ सोमलोके सुखी भवेत् ॥
कपित्थदो दिवं याति कौबेरं पनसप्रद ।
चूतजम्बूफलं दत्त्वा सूर्यलोके महीयते ॥
शर्करामधुरायुक्तं पक्वं रम्भाफलं नर ।
यो ददाति द्विजेभ्यस्तु सुरलोके सुखी भवेत् ॥
अपूपभक्ष्यभोज्यानि ददन्विप्राय भक्तिमान् ।
ध्रुवलोकमवाप्नोति यावदाचन्द्रतारकम् ॥
वारुण लोकमाप्नोति महेशं लवणप्रदः ॥
रूक्षद्रव्यप्रदानेन तिलगोधूममुद्गकान् ।
कृष्णधान्यं यवव्रीहीन्गन्धकं पिप्पलादिकम् ।
एतेषां तु प्रदानेन ब्रह्मलोक प्रयाति वै ॥
शाकमूलप्रदातॄणा तथा भोजनपात्रकान् ।
सुरलोकं स्थिरं राजन्मम भक्तिपरो यदि ॥
मल्लिकाजातिपुष्पाणि केतकीचम्पकानि च ।
ददामि विष्णवेत्युक्त्वा यो ददाति द्विजातये ।
तस्य चैवानिशं पार्थं योगक्षेम वहाम्यहम् ॥
साळग्रामशिलादाने ह्येतेषां तु फलं भवेत् ॥
साळग्रामशिलादानं यो ददाति कुरूद्वह ।
तस्य पुण्यफलं चित्रं सावधानमना॰ शृणु ॥
चतु सागरपर्यन्ता सशैलवनकाननाम् ।
दत्त्वा यत्फलमाप्नोति साळग्रामात्तदश्नुते ॥
साळग्रामशिलायास्तु मम चक्रं प्रशस्यते ।
तद्दानं ये प्रयच्छन्ति मत्प्रियान्विद्धि तान्प्रभो ॥
साळग्रामशिला यत्र तत्तीर्थं तत्तपोवनम् ।
तत्रैव मुक्तिं यास्यन्ति मदर्चनपरायणा॰ ॥
सालग्रामशिलादानमतिदानं प्रकीर्तितम् ।
सर्वेषामेव दानानामुत्तम तत्प्रचक्षते ॥
साळग्रामं तथा लिङ्गं यो ददाति कुरूद्वह ।
मम लोकमवाप्नोति पुनरावृत्तिवर्जितम् ॥
ब्रह्माण्डकोटिदानेन यत्फलं भवति प्रभो ।
तत्फलं समवाप्नोति शिवलिङ्गप्रदानतः ॥
यो ददाति नरो दीपं साळग्रामस्य संनिधौ ।

(L 1778) G_2 धर्मरूप महामति (for ^{b}) —(L 1781) $G_{1,2}$ विविधानि (for रसवन्ति) —(L. 1783) D_1 कृच्छ्राणि, M_1 च विभो (for चित्राणि). D_1 सुप्रसिद्धानि वृष्णिप (for ^{b}) —(L 1784) M_1 G(ed) दाने च (for दानेषु). M_1 विश्वसृट् (for °धृक्) D_1 तदिहाचक्ष्व विश्वसृट् (for ^{b}). — D_1 om. (hapl.) lines 1786–1790. —(L. 1786) G_1 शीत-, G(ed) शिव (for शीतं) —(L 1788) G_2 स्थिर स्थित्वा; M_1 चिर स्थित्वा (for चिर भुक्त्वा) —(L 1789) G_2 वदाम्यहम् (for मयोदितम्) —(L 1790) G_2 महाभाग (for °मार्गे). —(L 1793) D_1 M_1 शिबिकाया तमारोप्य (for ^{a}). —(L 1794) D_1 M_1 प्रधुन्वन्ति (for °न्तो) —(L 1795) $G_{1,2}$ G(ed) यमाज्ञया (for म°) —(L 1796) G_2 M_1 प्रशंसन्ति (for प्रविशन्ति) D_1 च लोकेषु, G_1 च तं लोकं, G(ed) वसोर्लोके (for च तं लोके) —(L 1798) D_1 तत्रैव सुखमश्नुते (for ^{b}) — For line 1799, G(ed) subst :

110** कर्पूरागरुकस्तूरीयुतं गन्धं द्विजातये ।

—(L. 1800) M_1 महीयते (for सुखी भवेत्). —G(ed.) om. lines 1801-1802 —(L. 1803) G_1 M_1 शर्करामधुसंयुक्तं (for ^{a}). D_1 रम्भापक्वफल नृप (for ^{b}). — For line 1804, G_2 subst. :

111** यो ददन्भूसुरेभ्यस्तु सुरलोके महीयते ।

—(L. 1806) $G_{1,2}$ मम (for ध्रुव-). —(L. 1808) G(ed.) रूक्षद्रव्य प्रदत्त्वा च (for ^{a}) —(L. 1809) G_1 G(ed.) यवान् (for यव-) G_2 व्रीहिं (for व्रीहीन्) D_1 कटुकं; G(ed.) आढक (for गन्धक) —(L. 1810) G(ed) एतदादि- (for एतेषा तु) —(L 1811) G_1 -फलादीना; G_2 -प्रदा नृणां; G(ed) -प्रदाता च (for °तॄणा) D_1 -पात्रकम्, G(ed) °दः (for °कान्) —(L 1812) D_1 -लोकस्थितो; M_1 -लोके स्थिर) G(ed) सुरलोके स्थितिस्तस्य (for ^{a}) — D_1 om. line 1816. —(L 1818) D_1 M_1 -मति॰ (for -मनाः). —(L. 1820) G(ed) दत्त्वा भूमिमाप्नोति (sic) (for ^{a}). —D_1 om lines 1821–1826 —(L. 1821) G(ed.) -शिलायां तु; M_1 -शिलाचक्रं (for °यास्तु) M_1 अर्चनं तु (for मम चक्रं). G_1 प्रदृश्यते (for प्रशस्यते). —(L. 1827) D_1 साळग्राम-

योगसिद्धिर्भवेत्तस्य ज्ञानं च भुवि दुर्लभम् ॥
महतां च यतीनां च मठे दीपप्रदायकः ।
गङ्गास्नानफलं तस्य दिनेनैकेन सभवेत् ॥
रत्नान्वितसुवर्णस्य प्रदानेन नृपोत्तम ।
परं मोक्षमवाप्नोति महादानं यत स्मृतम् ॥
वज्रमाणिक्यरत्नं यो ददाति नृपसत्तम ।
मम लोकमवाप्नोति पुनरावृत्तिवर्जितम् ॥
वैडूर्यविद्रुमान्राजन्ब्राह्मणाय ददाति य ।
रुद्रलोकमवाप्नोति पुष्परागप्रदश्च य ॥
शेषरत्नप्रदानेन ह्यलंकारप्रदश्च य ।
सर्वत्र सुलभो लोक सर्वत्र सुखमश्नुते ॥
गवा तृणप्रदानेन सेवया भरतर्षभ ।
रुद्रलोकमवाप्नोति पुनरावृत्तिवर्जितम् ॥
आश्रमाचारनिरता सद्धर्मेषु सदोद्यता ।
अदाम्भिका गतासूया प्रयान्ति सुरमन्दिरम् ॥
परोपदेशनिरता वीतरागा विमत्सराः ।
मम पादार्चनरताः प्रयान्ति ब्रह्मण पदम् ॥
सत्सङ्गाह्लादनिरताः सर्वभूतहिते रता ।
परापवादविमुखा. प्रयान्ति ब्रह्मण. पदम् ॥
नित्यं हितकरो यस्तु ब्राह्मणेषु च गोषु च ।
परस्त्रीसङ्गविमुखो न पश्यति यमालयम् ॥
सत्यवादी तथा मौनी मृदुभाषी क्षमारतः ।
परापवादविमुखाः प्रयान्ति ब्रह्मण पदम् ॥
अग्निशुश्रूषवश्चैव गुरुशुश्रूषवस्तथा ।
यतिशुश्रूषवश्चैव न यान्ति यमयातनाम् ॥
अनाथं विप्रकुणपं यो वहेत्कुरुसत्तम ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोति पुष्कलम् ॥
पूजया रहितं विष्णु लिङ्गं वा पूजयेत्तु य ।
ब्रह्मलोके सुखं भुक्त्वा ततो मोक्षमवाप्नुयात् ॥
देवतायतने यस्तु समार्जनपरो भवेत् ।
पांसवस्तस्य पापानि नाशयन्ति न संशय ॥
जलेन गोमयेनापि सेचनं देवतागृहे ।
करोति य सदा भक्त्या सर्वपापै प्रमुच्यते ॥
गन्धोदकेन धूपेन कर्पूरसहितेन च ।
धूपसेचनकृन्मर्त्यो गच्छेच्च मम मन्दिरम् ॥
प्रदक्षिणनमस्कारं काले काले करोति य ।
सर्वपापविशुद्धात्मा वाजपेयफलं लभेत् ॥
राजन्प्रदक्षिणैकेन सर्वपापं व्यपोहति ।
द्वितीयेन दिव याति तृतीयेनेन्द्रसंपदम् ॥
चतुर्भिर्मम लोकः स्यात्पञ्चमे सर्वलोकभाक् ।
षष्ठे तु महदैश्वर्यं सप्तमे मम किंकर. ॥
अष्टमे मम सालोक्यं सामीप्यं नवमे नृप ।
सारूप्यं दशमे विद्धि सङ्गमेकादशे तथा ॥
सायुज्य द्वादशे विद्धि सायुज्यादपरो न च ॥
साङ्गप्रदक्षिणैकेन सर्वपापप्रणाशनम् ।
त्वग्दोष व्याधिपीडा च न च मृत्योर्भयं पुन ॥
शिवप्रदक्षिणे मर्त्यः सोमसूत्रं न लङ्घयेत् ।
लङ्घने त्वेकमेकं स्यादलङ्घ्ये ह्ययुतत्रयम् ॥
रुद्रसूक्तेन यो विप्र प्रभाते स्नानतत्परः ।
अभिषेकपरो रुद्रे शिवसालोक्यमश्नुते ॥
वामदेवादिमन्त्रेण तथा त्र्यम्बकेन च ।
अभिषेकनमस्काराच्छिवसालोक्यतां व्रजेत् ।
एककाल द्विकालं वा त्रिकालं वापि नित्यश ।
शिवदर्शनमात्रेण पातकैः परिमुच्यते ॥
वृषस्य वृषणं स्पृष्ट्वा शृङ्गमध्ये पिनाकिनम् ।
दृष्टमात्रे नरो याति कैलासे शिवसंनिधिम् ॥

शिलाचक्र (for [a]) —(L 1829) D_1 ब्रह्माण्ड (for °ण्ड-). —(L 1830) D_1 शालग्राम- (for शिवलिङ्ग-) —(L. 1834) D_1 -सम (for -फल) G_1 M_1 G(ed) तद्भवेत् (for सभ°). D_1 फलसारं च संभवेत् (for [b]) —(L 1835) G_2 रत्नश्रुति- (for रत्नान्वित-). —(L 1837) D_1 G(ed.) -रत्नानि (for -रत्न यो). D_1 G_1 M_1 G(ed) यो ददाति नृपोत्तम (for [b]) — For line 1838, D_1 G_2 subst. .

112** पर मोक्षमवाप्नोति महादान तु तत्स्मृतम् ।

—(L 1140) G_2 G(ed) ब्रह्म- (for रुद्र-) M_1 पुनरावृत्तिवर्जितम (for [b]). — M_1 om lines 1841–1842 G(ed) om line 1841 —(L 1842) G(ed) सर्वलोकमवाप्नोति (for [a]) —(L 1845) G(ed) स्वधर्मेषु सदा रता (for [b]) —(L 1846) G_2 G(ed) मम (for सुर-). —(L 1848) G_2 G(ed) प्रयान्ति मम मन्दिरम् (for [b]). —(L 1849) D_1 सदागमेषु निरता , M_1 सत्सङ्गाभ्यासानि° (for [a]) —(L. 1851) G_1 नित्यं हितकरा ये तु (for [a]) —(L 1952) G_2 M_1 -विमुखाः (for °खो). D_1 प्रयाति ब्रह्मण पदम् (for [b]) — G_2 G(ed) om lines 1853–1854 —(L 1853) D_1 M_1 -भाषी (for वादी). M_1 क्षमान्वित. (for °रत) — For line 1854, D_1 M_1 subst

113** मन्मना योगयुक्ताश्च न पश्यन्ति यमालयम् ।

—(L 1857) D_1 दहेत् (for वहेत्) —(L 1859) G_2 च हित (for रहित) G(ed) शिव (for लिङ्ग) —(L. 1860) D_1 G_2 चिर भुक्त्वा , G(ed) सुखी भूत्वा (for सुखं भुक्त्वा) G_1 अवाप्यते (for °प्नुयात्). —(L 1870) M_1 G(ed) याति (for यान्ति) —(L 1871) G(ed) चतुर्भिर्ब्रह्मणो लोक (for [a]) G(ed) पञ्चभि (for °मे) — G_2 om. lines 1872–1874 D_1 om line 1874 —(L 1874) M_1 सग च (for सङ्गम्) —(L 1875) D_1 om line 1875[a]. D_1 अपरेण , G_1 अपर न , G(ed) अधिक न (for अपरो न) —(L. 1876) G(ed) सर्वपाप प्रणश्यति (for [b]) —(L 1877) D_1 त्वग्दोषव्याधिपापेभ्यो (for [a]) —(L 1878) M_1 युक्त (for मर्त्य) —(L 1779) G_1 G(ed) अलङ्घ्यम् (for °ङ्घ्ये). —(L. 1883) G_1 -नमस्कारै (for °रात्). G_2 G(ed.) शिव-

मृदङ्गगीतवाद्यैश्च घण्टाकाहळशङ्खकैः ।
देवं मां सेवयेद्यस्तु स मुक्तो नात्र संशय ॥
संमार्जयित्वा प्रथम गोमयेन तु लेपयेत् ।
तस्य पुण्यफल चित्रं शृणु वक्ष्यामि सुव्रत ॥
सर्वयज्ञफल प्राप्य सर्वलोकान्विजित्य च ।
कोटिवंशसमायुक्तो मम लोकं स गच्छति ॥
देवतायतने यस्तु ध्वजस्तम्भं प्रकल्पयेत् ।
तेन पुण्यप्रभावेन ध्वजी राजा भवेद्ध्रुवम् ॥
अखण्डदीप य कुर्यान्मम रुद्रस्य संनिधौ ।
दिने दिनेऽश्वमेधस्य प्राप्नोत्यविकलं फलम् ॥
एवमाद्या महाभाग धर्मा बहुविधाः नृप ।
यस्मिन्धर्मे यस्य रुचिस्तेनैव सुखमश्नुते ॥
एतेषां धर्मकरणे प्रीतिरस्ति तवापि चेत् ।
कुरुष्व नृपशार्दूल पर श्रेयो गमिष्यसि ॥
धर्मादर्थश्च कामश्च मोक्षश्च भरतर्षभ ।
तस्मान्मयि सदा भक्तिं कुरुष्व च ददस्व च ॥
युधिष्ठिर त्वं भुवन[illegible]गोप्ता
गन्ता पुर· सर्वमहीपतीनाम् ।
शृणुष्व चित्र पुनरेव वक्ष्ये
धर्मस्वरूपं परिपालनाय ॥

वैशंपायन उवाच ।

य इदं पुण्यमाख्यानं शृणोति सततं नरः ।
तस्य धर्मे स्थिरा बुद्धिर्जायते कुरुनन्दन ॥

Colophon.

वैशंपायन उवाच ।

एवमुक्तस्तु कृष्णेन धर्मपुत्रो महामति· ।
पुनरेव शुभं वाक्यं जगन्नाथमुवाच ह ॥
अणोरणीयांसमज पुराणं
ब्रह्माणमीशं च विशां पतीनाम् ।
भक्तप्रियं त्वां यदुनाथमीड्यं
नमामि विश्वेश्वर शेषशायिन् ॥
दिनोदितानि कर्माणि वक्तुमर्हसि मे प्रभो ।
त्वत्पादकमलादन्यद्गतिर्मम न विद्यते ॥

श्रीभगवानुवाच ।

शृणु पार्थ महाभाग सर्वधर्मार्थकोविद ।
धर्मसारं प्रवक्ष्यामि पुनरेव महामते ॥
प्रातःकाले समुत्थाय धर्मकीर्तनतत्पर ।
स्नानं करोति राजेन्द्र स गच्छेद्वै सुरालयम् ॥
याम्यं तु नरकं घोरं नित्यस्नायी न पश्यति ।
नित्यस्नानेन शुद्धात्मा प्रयाति सुरमन्दिरम् ॥
प्रात स्नानं हरेन्नृप सबाह्याभ्यन्तरं मलम् ।
मध्याह्ने वापि राजेन्द्र यो गच्छेत्सुरमन्दिरम् ॥
स्नानाद्विना तु यो भुङ्क्ते स मलाशी न संशय ।
तस्मात्स्नात्वा तु योऽश्नीयात्स भृत्यो मम उच्यते ॥
स्नात्वा देवानृषींश्चैव पितॄनपि च तर्पयेत् ।
दिव्यनामानि मे जप्त्वा मुच्यते सर्वपातकै· ॥
धौतवस्त्रो नरश्रेष्ठ शुचिर्मौनी समाहित ।
अर्घ्यं दत्त्वा च मां ध्यायन्पूज्यते च सदामरै· ॥
यदर्घ्यं यो नमस्कारो या पूजा क्रियते विभो ।
यज्जप्यं या स्तुतिर्भानोस्तन्मामेव प्रपद्यते ॥
समाधानमनिर्यस्तु जपं कुर्यात्कुरूद्वह ।
स मुक्त सर्वपापेभ्यो गङ्गास्नानफल लभेत् ॥
अष्टोत्तरशतं यस्तु गायत्रीं वेदमातरम् ।
जपेत्प्रयत्नतो यस्तु तस्य पुण्यफलं शृणु ॥
दिने दिने च यत्किंचिज्ज्ञानाज्ञानकृतं च यत् ।
तत्सर्वं विलयं याति पातकं पापवर्जित· ॥
अष्टोत्तरसहस्रं यो गायत्रीं लोकवन्दिताम् ।
जपेत्तस्य फलं वक्ष्ये शृणु नान्यमना· प्रभो ॥
षण्मासात्सर्वपापेभ्यो मुच्यते नात्र संशय ।
संवत्सरजपाद्राजन्सर्वान्कामान्समश्नुते ॥
अपत्यधनरत्नानि पशुक्षेत्रं च भारत ।
जपमानो लभेद्विद्वान्गायत्र्यास्तु प्रभावत ॥
सत्कर्मणा जपानां तु स्नानं मूलं हि पाण्डव ।
प्रभाते स्नानशीलानां नास्ति नास्ति महद्भयम् ।
तस्मात्स्नात्वा तु कौन्तेय सर्वान्धर्मांस्ततः कुरु ॥

सालोक्यमश्नुते (for ^{b}) — (L 1885) G(ed) -कृन्मर्त्यं (for -मात्रेण) — (L 1887) G_1 दृष्टमात्रो, G(ed) °क्षणान् (for °मात्रे) — (L 1888) G_2 शङ्खकाहलघण्टकै (for ^{b}) — (L. 1889) D_1 शिवमासेवयेद्यस्तु (for ^{a}) — (L 1895) G_2 ध्वजराजो, M_1 महाराजो (for ध्वजी राजा) — (L. 1896) G_2 M_1 आज्यदीप तु य कुर्यात् (for ^{a}) — (L 1901) G_1 नर- (for नृप) — (L 1902) G_1 G(ed) धर्मश्चार्थश्च (for धर्माद°). — (L 1903) G(ed) भवेत् (for तस्मात्) D_1 G_2 धर्मे (for मयि) — (L 1907) M_1 पशु-, G(ed) द्विज- (for परि-) G_1 धर्मस्य रूप जगरक्षणेन — D_1 om lines 1908–1909.

COLOPHON — *Sub-parvan* आश्चर्यपर्वणि शेषधर्मा·, G_2 M_1 G(ed.) शेषधर्माः. — *Adhy name*. G(ed) सर्वधर्मप्रशंसा. — *Adhy no* · D_1 $G_{1,2}$ M_1 G(ed) 15.

(L. 1910) G_1 महाद्युति ; G_2 युधिष्ठिरः (for महामति·). — (L 1911) अभाषत (for उवाच ह). — Before line 1912, D_1 ins युधिष्ठिर — (L. 1917) D_1 अन्या (for अन्यद्). — (L. 1920) M_1 G(ed) मम (for धर्म-). — (L 1922) $G_{1,2}$ प्रात स्नायी (for नित्य°). — G_1 om. lines 1924–1925. — (L 1925) G(ed) स याति (for यो गच्छेत्) — (L 1927) G(ed) स तु भृत्यो ममोच्यते (for ^{b}). — (L 1933) M_1 यत् (for या) G_2 जप्य या च स्तुतिर्गीतिस् (for ^{a}) — (L 1934) G_2 समाराध (for °न-). — (L. 1936) D_1 जप्त्वा (for यस्तु). — (L 1937) G(ed.) नित्य (for यस्तु). — (L. 1944) G_2 बहु- (for पशु-). G(ed) पशुं

युधिष्ठिर उवाच ।

देवदेव जगन्नाथ यदूनां कुरुवर्धन ।
काल्लोकान्समवाप्नोति गायत्र्यास्तु प्रभावत ॥
तत्सर्वं च भवान्वेत्ति मन्त्राधीनो महामते ।
कृपया वद सर्वेश लोकनाथ नमोऽस्तु ते ॥

श्रीभगवानुवाच ।

गायत्र्यास्तु समं किंचित्त्रिषु लोकेषु नो नृप ॥
गायत्री मोक्षदा ज्ञेया गायत्री पापनाशिनी ।
स्वर्गलोकप्रदा देवी ब्रह्मलोकप्रदायिनी ॥
रुद्रलोकप्रदा सैव सूर्यलोकप्रदा तु सा ।
ध्रुवलोकप्रदा देवी चन्द्रलोकप्रदा तु सा ।
मम लोकं च कौन्तेय गायत्री संप्रयच्छति ॥
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
गायत्री सेव्यते येन तप्तं तेनाखिलं तपः ॥
गायत्रीं भजते यस्तु मन्मना हि महीपते ।
गन्धर्वैः स्तूयमानस्तु मम लोकं स गच्छति ॥
ब्रह्मयज्ञफलं वक्ष्ये शृणु सोमकुलोद्भव ।
ब्रह्मयज्ञं तु यः कुर्याद्ब्रह्मणो रूपमव्ययम् ।
मम सालोक्यमाप्नोति सत्यं सत्यं मयोदितम् ॥
प्रणवं व्याहृतिं चोक्त्वा गायत्रीं वेदमातरम् ।
पादं पादं जपं कुर्यात्ततो वेदं यथाक्रमम् ॥
इदं तु मन्मतं राजन्मत्प्रियं कुरु पाण्डव ।
यज्जप्त्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥
ब्रह्मयज्ञमिदं श्रौतं यः करोति स मुक्तिभाक् ।
ब्रह्मयज्ञात्तपोवृद्धिर्ब्रह्मतेजः प्रवर्धते ॥
यशो बलं च कौन्तेय धर्मवृद्धिः प्रजायते ।
कुरुते यदि पापानि ह्यवधूय दिवं व्रजेत् ॥
वैश्वदेवं ततः पश्चाद्बलिकर्म विधानतः ।
क्रियते येन राजेन्द्र जितं तेन त्रिविष्टपम् ॥
बलिकर्म प्रकुर्वन्ति चक्राकारं द्विजोत्तमाः ।
ते सर्वे चक्रिणो भूत्वा प्रयान्ति मम मन्दिरम् ॥
राज्यकामो ध्वजाकारं पुत्रार्थी शूर्पवन्नृप ।
चक्राकारं तु भोगार्थी वल्मीकं बहुपुत्रवान् ॥
चक्राकारप्रदातॄणामेतेषां फलदो ह्यहम् ।
एवं चतुर्विधं ज्ञेयं बलिकर्म नृपोत्तम ॥
तुर्यं तव हितं ज्ञेयं चक्राकारं नृपोत्तम ।
मोक्षं संप्रापयत्याशु कामांश्च विविधान्नृप ॥
मां ध्यायन्भोजने काले मौनी संस्तुतवाग्द्विजः ।
कुरुते भोजनं यस्तु अमृतत्वं स गच्छति ।
द्वात्रिंशत्कवलं यस्तु भोजनं कुरुते द्विजः ।
सुरलोकमवाप्नोति गन्धर्वैरुपसेवितः ॥
मिताहारो भवेद्यस्तु नीरुजो गतकल्मषः ।
पुण्यलोकमवाप्नोति पूजितो दिवि दैवतैः ॥
पश्चिमां तु तथा संध्यां सादित्यां प्रार्थयेत्तु यः ।
भानौ ह्यनुदिते पूर्वां संगच्छेत्सूर्यसंनिधिम् ॥
देवानृषींस्तु संतर्प्य रवौ मध्याह्नमागते ।
नमस्कारं प्रकुर्वीत ततोऽर्घ्यं सवितुः कुरु ॥
यद्येवं कुरुते नित्यं स मुक्तो नात्र संशयः ॥
काले काले तु यः कुर्याद्देवतापूजनं गृहे ।
पुरुषसूक्तविधानेन स मुक्तो नात्र संशयः ॥
गृहार्चना गृहस्थस्य सर्वपापप्रणाशिनी ।
मन्मूर्तिः सर्वदा पूज्या संसारं तर्तुमिच्छता ॥

क्षेत्र च भारतीम् (for ^{b}) — For line 1945, G_2 subst .

114** जप्यमाने भवेद्विद्वान् गायत्रीया (sic) प्रभावत ।

— G_2 वैशंपायन (for युधिष्ठिर). — (L 1949) D_1 कुलनन्दन , G_1 कीर्तिवर्धन , M_1 कुल° (for कुरु°). — (L 1951) G(ed.) मन्त्राधीन (for °नो) — (L 1956) D_1 देवी (for सैव). D_1 G_2 -प्रदायिनी (for -प्रदा तु सा). — G_2 om line 1957 — (L. 1958) G(ed) ध्रुव- (for मम). G_2 द्विजाना (for गायत्री). — (L 1961) D_1 जपते (for भजते) — (L 1963) D_1 -कुलोत्तम (for °द्भव). — (L. 1964) D_1 ब्रह्मणो लोकमुत्तमम् (for ^{b}) — (L 1965) G_1 G(ed.) मम लोकमवाप्नोति (for ^{a}) — (L 1968) G_2 सर्वदा (for पाण्डव) — (L 1970) D_1 मुक्तिमान् ; G_2 M_1 मुक्तवान् (for मुक्तिभाक्) — (L 1973) G(ed) व्यवधूय (for ह्य°) — After line 1973, D_1 ins .

115** संध्या माध्याह्निकीं कुर्याच्च श्रुत्यनुकूलत ।
समभ्यर्च्य तथा देवं मा क्षीरोदनिवासिनम् ।
पौरुषेण तु सूक्तेन षोडशैरुपचारकै ॥
धूपदीपादिनैवेद्यदीपपुष्पाञ्जलीनपि ।
समर्प्य देवदेवाय तद्भक्ताश्च विशेषत ॥

— (L 1975) D_1 यदि (for येन) — G(ed) om lines 1976–1977 — (L 1978) D_1 भाग्यार्थी तु (for राज्यकामो); — (L 1979) M_1 G(ed) छत्राकार (for चक्रा°). D_1 योगार्थी (for भो°) D_1 वल्मीकान् (for °कं). G_2 वल्मीकान्बहुपुत्रकान् (for ^{b}) — (L 1980) D_1 -कृता नृणाम् (for -प्रदातॄणाम्). — (L 1982) D_1 कार्यं ; M_1 तुल्य (for तुर्यं). M_1 G(ed.) नरोत्तम (for नृपो°) — (L 1983) D_1 च ; G(ed.) त्वां (for स-) M_1 मोक्षस्थान प्रयात्याशु (for ^{a}) — (L 1984) G(ed) संरुद्धवाग् (for संस्तुत°). D_1 मौनी सस्कृतवाग्बुधः ; G_2 मौनी सस्तुतवान्नरः (for ^{b}) — (L. 1986) G_2 नरः (for द्विजः) — (L 1987) G_1 M_1 -शोभित (for -सेवितः). — After line 1987, D_1 ins

116** रसमास्वादयन्भुञ्जन्नातित्वराविवर्जितः ।
त्वरया भुञ्जते यस्तु स देवान्भोक्षयेन्नृशम् ॥

— (L 1988) G(ed) निरोगो (for नीरुजो). — (L 1990) G(ed) सावित्री (for सादित्या). — (L. 1991) G_2 अर्के (for भानौ). — (L. 1993) D_1 स्तोत्रं तु (for ततोऽर्घ्यं). — (L 1995) G_2 G(ed.) प्रात काले (for काले काले). M_1

कुशोदकं तु राजेन्द्र गायत्र्या ह्यभिमन्त्रितम् ।
पिबेदनुदिनं यस्तु सोऽन्नदोषैर्न लिप्यते ॥
मृदुभाषी सदा मौनी कामक्रोधविवर्जित· ।
य· सम· सर्वभूतेषु सोऽहं पार्थ न संशय. ॥
चराचरात्मकं विश्वमहमेवेति यो वदेत् ।
स एवाहं नरश्रेष्ठ त्वमप्येवं विचारय ।
तस्मात्सर्वप्रयत्नेन भज मां पाण्डुनन्दन ॥
योगाभ्यासरता ये तु प्राणायामपरायणा. ।
जितेन्द्रिया नरा ये च परस्त्रीषु पराङ्मुखा ।
ते नरा राजशार्दूल सर्वत्र परिपूजिता. ॥

वैशंपायन उवाच ।

एतद्भगवता प्रोक्तं धर्मं पापप्रणाशनम् ।
शृणुयाद्यो हि राजेन्द्र व्रजत्येव त्रिविष्टपम् ॥

Colophon

वैशंपायन उवाच ।

इत्येवं दुर्लभान्धर्माञ्श्रुत्वा प्रीतो महीपतिः ।
पुनरेव शुभं वाक्यं प्रत्युवाच जगत्पतिम् ॥

युधिष्ठिर उवाच ।

नमामि पुण्डरीकाक्ष वासुदेव जगत्पते ।
त्वत्पादकमलं वन्द्यं योगिनामपि दुर्लभम् ॥
चतुर्णामपि वर्णानामाश्रमाणां च वृष्णिप ।
आचारं वद धर्मेश कर्माणि जगतीपते ॥

श्रीभगवानुवाच ।

सर्वेषामपि वर्णानां ब्राह्मणः परमो गुरुः ।
श्रुतेन तपसा तात पाति लोकान्स्वकर्मणा ॥
वेदाध्ययनसंपन्न· सर्वशास्त्रविशारद ।
पुराणवक्ता कौन्तेय पालयत्यखिलं जगत् ॥
अग्निष्टोमादिकान्यज्ञानिष्ट्वा विहितदक्षिणान् ।
मय्यर्पितमना विद्वान्मामेव प्रतिपद्यते ॥
इतरेषां तु वर्णानां शिक्षिता धर्मतत्परः ।
सदा शास्त्ररतो विद्वान्मामेव प्रतिपद्यते ॥
निष्किंचनोऽपि राजेन्द्र वेदशास्त्राणि चाभ्यसेत् ।
सन्मार्गपरिनिष्ठानां मम लोकं च शाश्वतम् ॥
विद्यामुखेन यो राजन्ब्राह्मणो वर्ततेऽनिशम् ।
स स्नातः सर्वतीर्थेषु तप्त तेनाखिलं तप ॥
विद्यया सचितं द्रव्य यस्य वै संप्रयच्छति ।
स मुक्तः सर्वपापेभ्यो मेरुमूर्ध्नि चिरं वसेत् ॥
विद्ययोपार्जितं द्रव्यं ब्राह्मणानां सुखावहम् ।
सांग्रामिकं च कृष्यंशं क्षत्रियाणां सुखप्रदम् ॥
क्रयविक्रयजं द्रव्यं वैश्यानां तत्सुखावहम् ।
कृषिभि. शूद्रजातीनां यत्तद्द्रव्यं सुखावहम् ॥
द्वितृतीयचतुर्थाना वर्णानां ब्राह्मणो गुरु· ।
तस्मै देयं प्रयत्नेन ग्रहीतव्यं ततो द्विजैः ॥
श्रोत्रियान्न तु यो भुङ्क्ते जन्मजन्मान्तरेष्वपि ।
तस्य जन्मान्यनेकानि भवन्ति ब्रह्मयोनिषु ॥
सर्वज्ञ श्रोत्रिय· प्रोक्त. श्रोत्रियो वैष्णव स्मृतः ।
विद्वान्वै श्रोत्रियः प्रोक्तो ज्ञानी श्रोत्रिय उच्यते ॥
पुराणसंहितावक्ता श्रोत्रियो ह्यभिधीयते ॥
ममैवाज्ञेति यो राजन्पुराणानि च यो वदेत् ।
तस्यैव सर्वश्रेयांसि ददामि कुरुनन्दन ॥
एव वाच्यं पुराणं तु शब्दभावसमन्वितम् ।
पदं पदं संविभज्य पूर्वापरविमिश्रितम् ॥
सुव्यक्तं मधुर राजन्गम्भीरं शास्त्रगर्भितम् ।
अथवा रागसंयुक्तं श्रीरागमथ वा नृप ॥
मन्द्रमध्यमतारैश्च ध्वनिभिः संमित वदेत् ।
एवं वदन्द्विजो दक्ष· श्रोतॄणामघनाशनम् ।
अथ वा सर्वरागैश्च वदन्स्वर्गे महीयते ॥
पुराणश्रवणे बुद्धिर्यस्य पुंसः प्रजायते ।
सर्वपापविनिर्मुक्तः सुरलोके महीयते ॥

नृप (for गृहे) —(L 1996) Hypermetric G(ed) °विधिना (for °विधानेन). —(L 1997) D_1 गृहार्चन; G(ed.) ग्रहार्चना (for गृ°). D_1 प्रणाशनम् (for °शिनी). —(L 2000) D_1 ह्यन्नदोषो न विद्यते (for ᵇ) —(L 2002) D_1 G_2 संसार तर्तुमिच्छति (for ᵇ) —After line 2005, G(ed) ins

117** कृतकृत्योऽसि सर्वत्र प्राप्स्यसे सर्वतो जयम् ।

—(L 2009) G_1 G(ed) सर्व- (for धर्म) —(L 2010) D_1 य· शृणोति (for शृणुयाद्यो) G_2 व्रजेदेव (for व्रजत्येव).

COLOPHON —*Sub-parvan* · D_1 G_1 G(ed) आश्चर्यपर्व शेषधर्मा., G_2 M_1 शेषधर्मा —*Adhy no* · D_1 $G_{1,2}$ M_1 G(ed) 16.

(L. 2013) G(ed) देवदेव (for वासु°). —(L 2017) G_1 प्रथमो (for परमो). —(L. 2020) G_1 M_1 पावयाति (for पाल°) —(L 2021) G_1 M_1 बहुल- (for विहित-) —For line 2021, G(ed) subst

118** अग्निष्टोमादिकैर्यज्ञैरिष्ट्वा विपुलदक्षिणै ।

—(L 2025) $G_{1\ 2}$ वेदशास्त्रान्समभ्यसेत् (for ᵇ). —(L. 2026) G(ed) मम लोकस्तु शाश्वत (for ᵇ) —(L 2032) D_1 तथा राजन्, G_1 षष्ठयश, G_2 M_1 कृष्यश, G(ed) षष्ठांश: (for कृष्यश) D_1 M_1 सुखावहम् (for सुखप्रदम्) —(L. 2033) D_1 क्रयविक्रयद्रव्य च (for ᵃ) D_1 वैश्याना तु सुखप्रदम्; G_2 °ना तु सुखं भवेत् (for ᵇ) —(L 2036) $G_{1\ 2}$ द्विजोत्तमैः (for ततो द्विजै). —(L 2038) G(ed) भवेयुर् (for भवन्ति) —D_1 om line 2040 —(L 2042) G(ed.) पुमान् (for च यो). —After line 2043, G(ed.) ins.:

119** सर्वपापविनिर्मुक्तः सुरलोके महीयते ।

—(L. 2045) G_1 पादमध्य (for पदं पदं). —(L. 2046)

य संसारार्णवं ततुंमुद्योगं कुरुते यदि ।
शृणुयात्स पुराणानि सत्यं सत्यं मयोदितम् ॥
सर्वधर्माणि वक्ष्यन्ति पुराणानि महामते ।
तस्मात्सर्वप्रयत्नेन पुराणेषु मतिं कुरु ॥
वेदव्यासस्तु धर्मात्मा वेदशास्त्रविभागकृत् ।
प्रोक्तवान्सर्वशास्त्राणि पुराणे पाण्डुनन्दन ॥
पुरार्जितानि पापानि नाशमायान्ति यस्य वै ।
पुराणश्रवणे बुद्धिस्तस्य पुंस प्रजायते ॥
शृण्वता वदता चैव पुराणं मोक्षदायकम् ।
तस्मात्सर्वप्रयत्नेन श्रोतव्यं जन्मभीरुभिः ॥
श्रोतॄणां सर्वपापानि पुराणं दहति ध्रुवम् ।
ज्ञानाज्ञानकृत पापं जन्मान्तरकृतं च यत् ।
पुराणश्रवणादेव तत्क्षणादेव नश्यति ॥
गङ्गादिसर्वतीर्थेषु स्नातानां यत्फलं भवेत् ।
तत्फलं समवाप्नोति पुराणश्रवणान्नृप ॥
य शृणोति पुराणानि प्रभाते तत्कुरूद्वह ।
रजन्यां यत्कृत पापं तत्क्षणादेव नश्यति ॥
क्षपायां मद्गृह नित्य य शृणोति नृपोत्तम ।
दिवाकृत तु यत्पापं तत्क्षणादेव नश्यति ॥
यः शृणोति पुराणानि नित्यं भक्तिसमन्वितः ।
विधूय सर्वपापानि ब्रह्मलोकं स गच्छति ॥
पुराणं शृण्वतां नृणां नास्ति नास्ति महद्भयम् ।
तस्मात्पाण्डव राजेन्द्र पुराणेषु मतिं कुरु ॥
क्षत्रियाणां सुवृत्तानां यथाशपरजीविनाम् ।
यथापराधदण्डानां ब्रह्मलोकं तु शाश्वतम् ॥
गुरुसेवापरो यस्तु ब्रह्मचारी सदा शुचिः ।
भैक्षान्ननिरत. स्नाने स याति ब्रह्मण· पदम् ॥
ऊरुजाना सुशीलानां स्वपुण्ये सत्यवादिनाम् ।
महतां सेवया तात ब्रह्मलोकं तु शाश्वतम् ॥
कृषिमार्गरतानां च चतुर्थानां नृपोत्तम ।
शुश्रूषया पूर्वजानां ब्रह्मलोकस्तु शाश्वत' ॥
यज्ञैर्दानैस्तपोभिश्च गृहस्थो ब्रह्मसेवया ।
आतिथेय सत्यवादी शुचिरेति ममालयम् ॥
षोडशग्रासनिरतो वानप्रस्थाश्रमे रत ।
वेदशास्त्ररतो नित्यं त्रिस्नायी मां च गच्छति ॥
त्रिदण्डमेकदण्डं वा सदा काषायचेलवान् ।
सदा प्रणवशीलश्च संन्यासी मां च गच्छति ॥
चराचरात्मकं विष्णुमेकमव्यक्तमक्षरम् ।
ध्यायन्सर्वत्र योगीन्द्र स दु खात्परिमुच्यते ॥
तत्त्वज्ञानं तु यो दद्यादज्ञाय ब्रह्मवित्तम ।
स मामेव प्रपद्येत सर्वभूतहिते रत ।
पतिव्रता पतिप्राणा पतिसेवापरायणा ।
प्रियंवदा च कल्याणी नारी गच्छति मत्पदम् ॥
पतिरेव परो बन्धु पतिरेव परो गुरु ।
पतिरेव मम प्राणा यथा संगिरतेति च ।
तया जितो ब्रह्मलोके नात्र कार्या विचारणा ॥
स्त्रीणां पुरुषमुख्यानां द्विजानामग्रजन्मनाम् ।
मनुजानां तु सर्वेषां धर्म एव परा गतिः ॥
किमत्र बहुनोक्तेन धर्मं कलिमलापह. ।
धर्मं भजस्व सततं पुराणेषु मतिं कुरु ।
पुराणधर्मशास्त्राणा कीर्तनान्नाकमश्नुते ॥
धर्ममार्गरतानां तु श्रोतॄणा धर्मसंहिताम् ।
नरकं नास्ति नास्त्येव सत्यमेव मयोदितम् ॥

धर्मस्य कर्ता भुवनस्य गोप्ता
मन्त्रस्य कर्ता गुरुरप्रमेय ।
मोक्षस्य कर्ता पतिरीश्वराणां
सर्वान्तरात्मा ह्यहमेक एव ॥
विश्वप्रभुं विश्वसृजं कृतज्ञं
भक्तार्तिहं विश्वतनुं महान्तम् ।
भजस्व नित्यं बहुरूपभाजं
त्वं पार्थ मा सर्वजनाभिवन्द्यम् ॥

एवं तु गदितं पार्थ धर्मं धर्मभृता वर ।
किं ते प्रीतिकरं वच्मि तद्ब्रूहि मम संप्रति ॥

वैशंपायन उवाच ।

धर्मसारमिदं राजञ्शृणोति सततं नर' ।
स मुक्त सर्वपापेभ्यो गङ्गास्नानफलं लभेत् ॥

Colophon.

D1 -गूढितम्, M1 -चोद्र° (for गर्भि°) —(L 2047) G(ed.) श्रीरङ्गेणाथ वा युतम् (for [b]). —(L 2049) D2 एव वदेद्धि यो राजन् (for [a]) —(L. 2054) G2 शृणुयात्सर्वशास्त्राणि (for [a]) — (L 2057) G2 G(ed.) -शास्त्रार्थ- (for -शास्त्रवि-) G1 वेदशास्त्रार्थभाववित् (for [b]) —(L 2060) G1 बुद्धि' (for पुंस') —(L 2061) G1 G(ed) पठता (for वदता) G2 साधनम् (for -दायकम्). G1 पुराण पापमोचकम् (for [b]) —(L 2063) G1 G(ed) क्षणात् (for ध्रुवम्). —(L 2065) G1 तत्क्षणेन विनश्यति (for [b]) —D1 om (hapl) lines 2066–2071 —(L 2070) G2 कुरूद्वह (for नृपोत्तम) —(L. 2076) D1 यथासंभवजीविनाम्; G1 G(ed.) यथाङ्गपरि°; G(ed) यथाश परि° (for [b]). —(L. 2077) G(ed) ब्रह्मलोकस्तु शाश्वत· (for [b]). —(L 2078) G1 -पूजारतो, M1 -सेवारतो (for °परो) —(L 2079) D1 भैक्ष्याग्निनिरतस्नायी, G1 G(ed) °न्ननिरतस्तात, M1 भिक्षान्ननिरत स्नाति (for [a]) —(L 2081) G(ed) ब्रह्मलोकस्तु शाश्वतः (for [b]) —(L 2085) ममान्तिकम् (for °लयम्). —D1 om (hapl) lines 2088–2089 —(L. 2088) G(ed) त्रिदण्डी वैकदण्डी वा (for [a]) —(L. 2090) G1 अक्षयम्; G(ed) अव्ययम् (for अक्षरम्) —(L 2095) D1 प्रियं वदति कल्याणी (for [a]) —(L 2097) D1 यथा संस्मर्यते सदा, G1 पति स्वर्गतिरेव च, G(ed) यथा सगीयतेति च (for [b]). —(L. 2101) G2 धर्मं कलिमलापहम् (for [b]). —(L. 2105) D1 तथ्यम् (for सत्यम्). —(L 2110) M1 विश्वमज (for °सृज).

युधिष्ठिर उवाच ।

श्रीमते विश्वरूपाय वासुदेवाय चक्रिणे ।
भक्तप्रियाय देवाय देवानां पतये नमः ॥
प्राणेश्वराय योगीन्द्र सर्वसंपत्कराय च ।
बलाय वासुदेवाय कृष्ण विष्णो नमोऽस्तु ते ॥
भूतात्मन्भूतकृद्देव पाण्डूना हितवर्धन ।
त्वत्प्रसादात्प्रसन्नात्मन्पापैरद्य विमोचित. ॥
धर्मशास्त्रोपदेशेन कृपालो मधुसूदन ।
इदानीं श्रोतुमिच्छामि पापानां तु यदाश्रयम् ॥
पापिनो येषु पच्यन्ते नरकेषु च संततम् ।
वदस्व मे विशालाक्ष तथा घोराश्च यातना ॥

श्रीभगवानुवाच ।

पापभेदान्प्रवक्ष्यामि तथा स्थूलाश्च यातना ।
शृणुष्व धैर्यमास्थाय रौद्रा हि नरका यत ।
यस्य पापस्य यः प्रोक्तो नरको ब्रह्मवादिभिः ।
तमहं संप्रवक्ष्यामि शृणु नान्यमना नृप ॥
ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पग. ।
महापातकिनश्चैव तत्संयोगी च पञ्चम. ॥
एतेषां पापबाहुल्यं प्रवक्ष्यामि यथामति ।
पञ्चानां पातकानां च तत्समानां नृपोत्तम ॥
ब्रह्महा तपनं घोरं व्याघ्रंशूलंप्रमर्दनम् ।
तपने तप्यमानश्च शूले व्याघ्रैश्च भक्षित: ॥
प्रमर्दनो मर्दमानस्तिष्ठेद्वर्षायुतं नरः ।
तप्ताय.पिण्डवदनो रुदन्बहुविधं मुहु ।
हा हतोऽस्मि हतोऽस्मीति रक्ष रक्षेति तिष्ठति ॥
तत परं तमाकृष्य कुम्भीपाकेन पच्यते ।
पुनर्वर्षसहस्राणि दह्यमानो महाग्निना ॥
नरकेषु च सर्वेषु भुक्त्वा भोगाननेकशः ।
स पश्चाद्भुवमासाद्य भवति ब्रह्मराक्षसः ।
तत्र पञ्चयुगं स्थित्वा चण्डालेष्वभिजायते ॥
सुरापस्य गतिं वक्ष्ये नारकीं शृणु पाण्डव ।
सुरापी मलमूत्रं च पिबेद्वर्षायुतं नृप ॥
तप्ताय पिण्डमादाय ताडयन्ति च किंकराः ।
तप्तायःपिण्डवदनः सूचिपूरितलोचन. ॥
नखसंधिषु सर्वेषु पाट्यमानश्च शङ्कुभिः ।
अङ्गारशयने घोरे लुठन्युगशत बहु ॥
स्थित्वा युगाष्टकं राजन्धूमपानं व्रजेत्तत ।
तत्र तप्तसुरां पीत्वा हा हतेति रुदन्बहु ॥
पिशाचत्वमवाप्नोति तत्र स्थित्वा युगाष्टकम् ।
अनुभूय च सर्वाणि हीनजन्मानि भारत ।
पौल्कसादिषु संजातो व्याधो भवति भूतले ॥
स्तेयिनस्तु गतिं वक्ष्ये दु खदा शृणु भूपते ।
निष्कत्रयप्रमाणं तु सौवर्णं यो हरेन्नृप ॥
स्तेयीति स हि विज्ञेय सर्वकर्मबहिष्कृत ।
प्रायश्चित्तविहीनस्य वक्ष्ये तस्य च यातनाः ॥
मूषावस्था तथा कूपं मूषिकै. परिपूरितम् ।
हिमोत्कट शूलयन्त्रं श्वभक्षो मांसभोजनः ॥
एतान्युगशतान्पञ्च ह्यनुभूय नृपोत्तम ।
क्रकचैश्चूर्ण्यमानस्तु ताड्यमानस्तु चर्मभिः ॥
स्थावरादिषु जायेत तस्मिन्स्थित्वा युगाष्टकम् ।
तत. किरातयोनीषु जायते नात्र संशयः ॥
पापिनां नरकं वक्ष्ये गुरुदाराभिगामिनाम् ।
ज्येष्ठमाता भ्रातृपत्नी. यज्ञपत्नी नृपोत्तम ॥
अध्यापकस्य या पत्नी श्वशुरी मातुलस्य च ।
पितृमातृष्वसा चैव माता गुरुसुता गुरोः ।
गुरुतल्पसमानानामेतेषां शृणु पातकम् ॥
मन्वादिषु च शास्त्रेषु प्रायश्चित्तादिकल्पनैः ।
नैव शुध्यति य पापी तस्य पीडां वदामि ते ॥

D_1 कृतिशं (for कृनशं) —(L. 2111) M_1 -रत्नं (for तनु).

Colophon. — *Sub-parvan* D_1 G_1 आश्चर्यपर्वणि शेषधर्मा०, G_2 M_1 G(ed) शेपधर्मा — *Adhy name* · D_1 M_1 पुराणप्रशसनम्, G(ed) पुराणप्रशंसा —*Adhy. no* D_1 $G_{1,2}$ M_1 G(ed.) 17.

(L. 2118) D_1 G_1 श्रीपते (for श्रीमते). —(L 2121) G(ed) बलाय बलभद्राय (for ^{a}) —(L 2123) G(ed) वियोजित (for विमोचित) —(L 2125) G(ed) पापाना च क्रमात्फलम् (for ^{b}) —(L 2127) $G_{1\ 2}$ G(ed.) वद तान् (for वदस्व). G(ed) वै (for मे) — G_2 om line 2128. —(L. 2128) M_1 घोराश्च (for स्थूलाश्च) — G_2 om lines 2130–2133 —(L 2134) G_2 यथामतम्; M_1 °विधि (for °मति) —(L 2136) G(ed) गच्छेद् (for घोरं) —(L. 2139) G_2 नर (for मुहु.) —(L. 2141) G(ed.) समाकृष्ट (for तमाकृष्य). —(L 2144) D_1 पश्चाद्भवनमासाद्य (for ^{a}). —(L. 2146) D_1 नरकान्, G_1 नारक (for °कीं).

— After line 2146, G(ed) ins.

120** विहितां धर्मराजेन रौद्ररूपा भयानकाम् ।

—(L 2147) D_1 G(ed) मूत्रे (for -मूत्र) —(L 2150) D_1 पीड्यमानश्, M_1 ताड्य° (for पाट्य°). —(L. 2153) G_1 हा हन्तेति, G(ed) हाहेति प्र- (for हा हतेति) G_2 हा हन्तेति रुदन्मुहु (for ^{b}) —(L 2155) G_2 पार्थिव (for भारत) —(L 2157) M_1 दु सह, G_2 दु खिता (for दुःखदां). G_1 भूतले (for भूपते). —(L 2160) D_1 $G_{1\ 2}$ G(ed) यातनाम् (for °ना). —(L 2161) D_1 मूषावस्था तथा कूपे; G(ed) °स्थानक कूप (for ^{a}) —(L. 2162) D_1 श्वभक्षं मासभक्षणम् (for ^{b}) —(L 2163) G(ed) एतान्युगशतान्यष्ट (for ^{a}) —(L 2164) D_1 G_2 स्वकरौ (G_2 नरके) चूर्णमानस्तु (for ^{a}) —(L 2166) D_1 -योनौ वै (for -योनीषु) G_1 सजातो (for जायते). —(L. 2168) D_1 गुरु- (for यज्ञ-) —(L 2171) G(ed.) गुरुतल्पगतुल्याना (for ^{a}). —(L. 2172) G_1 मन्वादिकेषु शास्त्रेषु (for ^{a}). G_1 G(ed.)

रेत:पानं महादारं सर्वसंधिषु दाहनम् ॥
अङ्गारशयनं चैव कबन्धभ्रामयन्त्रकम् ।
क्षणिकच्छेदनं चैव तपनोत्पातने तथा ॥
पाशबन्धं धूमपानं तथा शूलानुरोहणम् ।
अस्थिभेदं पित्तपानं तथा लवणभक्षणम् ॥
स्नायुच्छेदं शिलापीडा तथा पाषाणवारणम् ।
श्लेष्ममासमयाहारं वृक्षाग्रपतनं तथा ॥
जलान्तर्मज्जनं चैव शयनं कण्टकोपरि ।
पिपीलिकादिदशनं तथा वृश्चिकपीडनम् ॥
अस्त्रशस्त्रादिशयनं तथा महिषमर्दनम् ।
सूचिप्रक्षेपणं चैव नेत्रयोर्नखसंधिषु ॥
शिश्ने च वृषणे चैव ह्ययोभारस्य बन्धनम् ।
तप्ताय:शयनं चैव तप्तशीताम्बुसेचनम् ॥
अत्युष्णसिकतास्नानं तथा दृषदि शीर्णनम् ।
व्याघ्रराक्षसपीडा च तप्तपाषाणभक्षणम् ॥
एवमाद्या महाभाग नरका कोटिकोटिश ।
अहं वक्तुं न शक्नोमि किमुतान्यो महीपते ॥
शृणु पाण्डव वक्ष्यामि यममार्गं सुदु सहम् ।
सुखदं पुण्यशीलाना पापिना भयदायकम् ॥
षडशीतिसहस्राणि योजनानि नरेश्वर ।
यमगार्गस्य विस्तार: पापिनां भयदायक ॥
ये नरा पुण्यशीलास्तु ते यान्ति सुखिनो नृप ।
गन्धर्वैः स्तूयमानाश्च अप्सरोगणसेविता. ।
सुधापानं प्रकुर्वन्त: प्रयान्ति स्वर्गमन्दिरम् ॥
धर्मशून्या नरा यान्ति दु:खेन यमयातनाम् ।
प्रेतभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुका: ।
क्रन्दन्तो विस्वरं दीना यान्ति तत्पथि पापिन· ॥
हन्यमाना यमभटै प्रतोदाद्यैस्तथायुधै: ।
इतस्तत. प्रधावन्तो यान्ति दु:खेन तत्पथि ॥
श्वानजम्बूकशब्दैश्च कम्पमाना सुदारुणै ।
दंशयन्तो महानागैर्यान्ति दु खेन तत्पथि ॥
क्वचित्ताप: क्वचिद्वह्नि क्वचित्संतप्तकर्दम: ।
सतप्तसैकताश्चैव तीक्ष्णधारा· शिला क्वचित् ॥
क्वचिदङ्गारवृष्टिश्च शिलावृष्टिश्च दु·सहा ।
जलोपलसमावृष्टिरुष्णाम्बुवर्षणं तथा ॥
क्षारकर्दमवृष्टिश्च महावातान्वितो मरुत् ।
उष्णकर्दमवृष्टिश्च शिखावान्समरुत्क्वचित् ॥
क्वचित्कण्टकवृष्टिश्च दु खारोहशिला क्वचित् ।
गाढान्धकारकूपाश्च कण्टकावरणं महत् ॥
वप्राग्रारोहणं चैव कन्दरस्य प्रवेशनम् ।
शर्कराश्च तथा लोष्टा सूचीतुल्याश्च कण्टका ।
शैवालं च क्वचिन्मार्गे क्वचित्कीचकपङ्कय· ॥
व्याघ्रराक्षसयूथैश्च मत्तदन्तिसमाकुले ।
वृकगोमायुसंकीर्णे ऋक्षसिंहभयाकुले ।
शुष्कपादपसकीर्णे छायाहीने हिमोत्कटे ॥
विषज्वालाकुलैर्नागैर्वृश्चिकै परिपूरिते ।
कङ्कवायसगृध्राणा छायायुक्ते महास्वने ॥
निरूदके महाघोरे यूथनादैर्भयंकरे ।
चण्डार्ककिरणैर्घोरे यान्ति दु खेन तत्पथि ॥
पुरोग्रै शङ्कुभिस्तीक्ष्णै खचिते भृशदारुणे ।
अधोमुखा कृष्यमाणा पापिनो यान्ति तत्पथि ॥
एवं बहुविधै क्लेशैर्निरुच्छ्वासे तु तत्पथि ।
क्रोशन्तश्च रुदन्तश्च म्लानवक्त्राश्च पापिन ॥
पाशेन यन्त्रिता केचित्कृष्यमाणास्तथाङ्कुशै ।
शस्त्राग्रैस्तुद्यमानाश्च पृष्ठत पार्श्वत पथि ॥
नासाग्रपाशकृष्टाश्च कण्ठपाशैस्तथापरे ।

G2 कंधरं ग्रामयन्त्रकम् (for ^{b}) — (L 2608) G1 2 तपनोत्पतन तथा ; M1 पतनोत्पतने तथा (for ^{b}) — (L 2610) D1 अस्थिच्छेद (for °भेद). G2 अस्थिच्छेद रक्तपान (for ^{a}) — (L 2611) G(ed) दारणम् (for धा°) — (L 2619) D1 हृदय-, G(ed) दृष्टिवि (for दृषदि) — After line 2620, G(ed) ins. ·

132** कुम्भीपाक महाघोरं क्रिमिविष्ठामयस्तथा ।

— (L 2623) D1 G1 M1 -मार्गस्य (for -मार्गं सु-). — After line 2625, G(ed) ins .

133** षडशीतिशतान्यत्र तिर्यग्वै विस्तरस्तथा ।

— (L. 2626) G2 शृण्वता भयदायकम् ; G(ed) एवंभूतो नराधिप (for ^{b}). — (L 2627) G1 सुखदा , G2 सुखिता (for °नो) — (L. 2629) G(ed) यम- (for स्वर्ग-) — (L. 2630) G2 M1 दु खेन शृणु यातना (for ^{b}) — (L. 2633) G2 प्रोताद्यैश्च (for प्रतोदाद्यैस्) — (L 2634) D1 यान्ति तत्पथि पापिन· (for ^{b}). — (L 2636) G(ed) सदष्टाश्च (for दंशयन्तो). — G1 M1 G(ed.) ins. after line 2638 : D1 after line 2656

134** क्वचिदङ्गारराशिश्च महाधूमाकुल क्वचित् ।
क्वचिदु सहशीत च महावायुविशोषणम् ॥

— D1 om (hapl) lines 2639-2643 — (L 2640) M1 G(ed) क्वचिदुष्णाम्बुवर्षणम् (for ^{b}) — (L 2641) G(ed) महावातान्विते द्रुमम् (for ^{b}) — (L 2645) D1 वृक्षाग्रारोहण , M1 वप्रस्या° (for वप्राग्रा°) — (L. 2646) D1 -कल्पाश् (for -तुल्याश्). — (L 2648) G2 क्रूरैरेव (for (मत्तदन्ति-). — (L. 2649) G2 सिहवानरसकुले (for ^{b}). — (L 2654) G2 M1 -किरणे (for °णैर्) — G(ed) om (hapl) lines 2655-2656 — (L. 2655) G1 M1 खचितैर्भृशदारुणै (for ^{b}) — (L 2658) G1 क्लिश्यन्तश् (for क्रोश°) G1 ध्वनयन्तश् (for म्लानवक्त्राश्) M1 पापिनं प्रापयन्ति ता , G(ed) ताडिता यान्ति पापिन (for ^{b}) — M1 om line 2659. — (L 2659) D1 पाशैर्यान्ति नरा केचित् (for ^{a}). — After line 2659, G1 ins

135** क्रोशन्तश्च रुदन्तश्च पापिनः प्रापयन्ति हि ।

कर्णपाशैः कृष्यमाणा गले प्रोतास्तथापरे ॥
पादाग्रपाशकृष्टाश्च केचिच्छत्रैः प्रबाधिता ।
वहन्तश्चायसं भारं शिक्याग्रेण प्रयान्ति वै ॥
अधोभारद्वयं केचिन्नासाग्रेण तथापरे ।
कर्णाभ्यां च तथा केचिद्वहन्तो यान्ति पापिनः ॥
केचित्पृष्ठस्थपाषाणा अश्मभिर्घट्टिताः परे ।
केचिच्छृङ्खलिता यान्ति ताड्यमानास्तथापरे ॥
निरुच्छ्वासतया केचित्केचिच्छादितलोचनाः ।
छायाजलविहीने तु पथि यान्ति सुदुःखिताः ॥
शोचन्तः स्वानि कर्माणि रुदन्तश्च मुहुर्मुहुः ।
शूलप्रोतमुखाः केचित्प्रयान्ति यममन्दिरम् ।
प्रदीपैर्दह्यमानाश्च ह्युल्कैर्दारुणैर्भृशम् ॥
तृणैराच्छादिताः केचिद्दह्यमानाः समन्ततः ।
अधोमुखाः कृष्यमाणाः केचित्संतप्तकर्दमे ॥
तप्तसैकतमार्गेषु केचिन्मग्नाः प्रयान्ति वै ।
बृहच्छिला वहन्तश्च शवं केचित्प्रयान्ति वै ॥
भक्ष्यमाणाः स्वमांसानि पिबन्तो रुधिरं स्वकम् ।
गळबन्धैर्महानागैर्दश्यमाना विषाग्निभिः ॥
वहन्तः कण्टकचयं श्वभिर्दष्टाः प्रयान्ति वै ।
गळप्रोतैर्घटीयन्त्रैर्लम्बमानाः प्रयान्ति वै ॥
खरमारुह्य केचित्तु केचिद्वै श्वानजम्बुकौ ।
काकगृध्रं तथोलूकं सिंहं व्याघ्रं तथा वृकम् ।
आरुह्य पापिनो यान्ति यमलोकं भयावहम् ॥
खरश्वमांसनिचयं भुञ्जन्तो यान्ति पापिनः ।
पुरीषमूत्रनिचयं पिबन्तः पापिनः पथि ॥
हा हतोऽस्मि हतोऽस्मीति क्रन्दमानास्तथा परे ।
तप्तायःपिण्डवदनाः सूचिपूरितलोचनाः ॥
भग्नदन्तोरुजङ्घाश्च गजदन्तैः प्रहारिताः ।
सुदुःखिताः प्रयान्त्येव पापिनः पाण्डुनन्दन ॥
पिशाचैर्भक्षिताः केचिद्व्याघ्रैर्वृकगणैस्तथा ।
राक्षसैर्भक्षिता केचिड्डाकिनीकुलसंकुले ॥
कूष्माण्डभैरवगणैर्महागजकरादिभिः ।
ऋषभैः खादिताः केचिन्महिषैः खड्गशृङ्गिभिः ।
जीर्णमांसं वहन्तश्च शुष्कास्थिनिचयानि ते ॥
महावराहयूथैश्च दारिता यान्ति पापिनः ।
अहंकारयुता ह्यत्र तत्र राक्षसभक्षिताः ॥
परदाररता ह्यत्र तत्र शिश्नैर्वियोजिताः ।
परद्रव्यापहर्तारः खराभ्यां विनियोजिता ॥
भग्नदेहा महाकूपे कृष्यमाणाः श्वभिस्तथा ।
प्रयान्ति नरशार्दूल नरकं दारुणं भृशम् ॥
शूलैरुत्कृष्य मांसानि छिन्नदेहास्तथापरे ।
छिन्नदेहा वहन्तश्च स्वशिरः करसंपुटे ।
प्रयान्ति प्राणिनः पापा ब्रह्मघ्ना निर्घृणास्तथा ॥
स्वभुजं केचिदुत्कृत्य खादन्तो यान्ति पापिनः ।
हा पुत्रेति रुदन्तश्च हा तातेति तथापरे ॥
हा अम्बेति तथा चान्ये हा सखेति तथापरे ।
प्रिये कान्ते मम सखि त्राहीत्युक्त्वा तथापरे ॥
महाराज महाभाग रक्ष मां शरणागतम् ।
त्वं पालयेति सततं प्रयान्ति प्राणलोलुपाः ॥
विस्मृत्य स्वानि कर्माणि मूढा एवं वदन्ति हि ।
मौनमाश्रित्य यान्त्येव कर्मज्ञा कुरुनन्दन ।
एवं बहुविधाकारं पापिनो यान्ति तत्पथि ॥
श्रुत्वैवं नरकं राजन्धर्मपुत्रो युधिष्ठिरः ।
मूर्च्छितो भ्रातृभिः सार्धं भीतभीतो व्यतिष्ठत ॥
ज्ञात्वा तु पुण्डरीकाक्षः कम्पमानं युधिष्ठिरम् ।
मा भैषीरित्युवाचेदं त्वं राजन्धर्मतत्पर ॥

श्रीभगवानुवाच ।

धर्मिष्ठानां गतिं वक्ष्ये तव प्रीत्यै नराधिप ।
निबोधत्त सुरैर्जुष्टा सुखदां तत्र शाश्वतीम् ॥
धर्मिष्ठा ये नरश्रेष्ठा दानशीलाः सुबुद्धयः ।
अतीव सुखसंपन्नाः प्रयान्ति यममन्दिरम् ॥
अन्नदा ये च धर्मिष्ठा भुञ्जन्तः स्वादु यान्ति वै ।

—(L 2660) G(ed) ताड्यमानाश् (for तुद्य°). —(L. 2661) G_2 M_1 -पात-, G(ed) -पाशैः (for -पाश-) — D_1 G(ed) om line 2662 —(L 2662) G_1 कण्ठ- (for कर्ण-). —(L 2663) G_1 पादाग्रा पादकृष्टाश्च (for ^{a}). —(L. 2666) M_1 कर्णाग्रेण (for °भ्या च). — G_2 om. lines 2672–2675 G_1 M_1 om line 2673 —(L 2674) G_1 तृणैराच्छादिते कूपे (for ^{a}) — G_1 M_1 om line 2675. D_1 om line 2676 —(L 2677) G_2 पङ्के (for शव) —For line 2680, G_1 subst

136** कण्टकैः क्रकचैर्दंष्ट्रा प्रयान्ति यमसादनम् ।

— M_1 om line 2681 — (L 2681) D_1 G(ed) दीर्घ- (for घटी-) G(ed) वध्यमाना (for लम्ब°) —(L 2682) G_1 आरोप्य (for आरुह्य) —(L 2683) G(ed.) सिंहव्याघ्रौ (for सिंह व्याघ्रं) —(L 2685) G(ed.) भक्षयन्तः प्रयान्ति वै (for ^{b}). — M_1 om. lines 2688–2689. —(L. 2689) G(ed) -दण्डाश् (for जङ्घाश्). — M_1 om. lines 2691–2695 —(L, 2691) D_1 महिषैः खड्गशाङ्गिभिः (for ^{b}). —(L. 2692) G_1 शुनकीगणसंकुलैः, G(ed.) डाकिनीगणपीडिताः (for ^{b}) —(L 2693) G(ed.) शाकिन्यजगरायुतैः (for ^{b}) — D_1 om. (hapl) line 2694. —(L 2694) G_1 घट्टिता, G(ed) भक्षिता (for खादिताः) —(L. 2695) G(ed) निचयानपि (for °नि ते). — D_1 om (hapl) line 2699 —(L. 2705) G_1 M_1 उत्कृष्य (for °त्य). G_2 स्वमांसं केचिदुद्धृत्य (for ^{a}). —For line 2707, G(ed) subst. :

137** तथा हा मातरित्यन्ये सखे हाहेति चापरे ।

—(L. 2710) G_2 प्रयान्ति प्राणिनः पथि (for ^{b}). —Before line 2714, all Mss ins वैशंपायनः. —(L. 2714) M_1 G(ed) दृढव्रत (for युधिष्ठिरः). —(L 2715) G_2 पपात धरणीतले (for ^{b}). — M_1 om the ref. —(L. 2722) M_1 G(ed.) नरश्रेष्ठ (for च धर्मिष्ठा). D_1 अन्नदाने तु धर्मिष्ठा (for

नीरदा ये तु सुखिन· पिबन्त· क्षीरमुत्तमम् ॥
घृतदा मधुदाश्चैव क्षीरदाश्च नृपोत्तम ।
सुधापानं प्रकुर्वन्ति प्रयान्ति यममन्दिरम् ॥
शाकदः पायसं भुञ्जन्दीपद प्रज्वलन्दिशः ।
वस्त्रदो राजशार्दूल दिव्याम्बरधरो ययौ ॥
अलंकारप्रदो याति पूज्यमानोऽमरै सह ।
गोदानेन नरो याति सर्वकामसमन्वित. ॥
भूमिदो गृहदश्चैव विमाने सर्वसंपदा ।
अप्सरोगणसंकीर्णे क्रीडन्याति यमालयम् ॥
हयदो गजदश्चापि यानदश्च नृपोत्तम ।
यमालय विमानेन याति भोगसमन्वित. ॥
अजदोऽनड्वदश्चैव कृष्णाजिनमहीप्रद ।
फलद पुष्पदश्चैव याति संतोषसंयुत· ॥
ताम्बूलदो नरो याति तुष्टात्मा यममन्दिरम् ।
विद्यादानरतो याति पूज्यमानोऽब्जजन्मना ॥
सर्वभूतदयायुक्त· पूज्यमानोऽमरै सदा ।
पुराणपठको याति पूज्यमानो मुनीश्वरै ॥
शृण्वन्ति सततं ये तु पुराणं मनुजेश्वर ॥
ते चन्द्रधवलैर्यानै प्रयान्ति यममन्दिरम् ॥
ज्ञानपूर्णा नरा यान्ति कृते ये तु यमालयम् ।
त्रेतायां तपसा लोकं मम प्राणेश्वरस्य ह ॥
द्वापरे यज्ञविधिना प्रयान्ति पदमव्ययम् ।
कलौ युगे नरश्रेष्ठ पुराणश्रवणान्नर· ।
प्रयाति परम स्थानं यत्र गत्वा न शोचति ॥
कलौ युगे मनुष्याणां पुराणश्रवणान्मम ।
कीर्तनाद्राजशार्दूल मम लोकं भविष्यति ॥
पुराणश्रवणान्मर्त्यं पुत्रपौत्रादिसंयुतः ।
भुक्त्वा भोगान्यथाकाम तदन्ते मामुपैति च ॥
कलौ देवाः प्रशंसन्ति पुराणश्रवणं परम् ।
परां मुक्तिमवाप्नोति सत्यं सत्यं मयोदितम् ॥
आत्मार्थं वा परार्थं वा यो वदेद्धर्मसंहिताम् ।
प्रयाति सुखमार्गेण देवलोकं सुखावहम् ॥
धर्मशास्त्रे मतिर्यस्य वर्तते कुरुनन्दन ।
गन्धर्वै स्तूयमानस्तु स याति यममन्दिरम् ॥
उत्तमाश्वैर्नरा यान्ति केचिद्यानेन धर्मिण ।
गजोष्ट्रवृषभैर्यान्ति विमानेन च भारत ॥
चतुर्दन्तमयं यानमारूढा यान्ति तत्पथि ।
यान्ति देवगणैः सार्धं दिव्यरूपधरा दिवम् ॥
रथं मणिमयं दिव्यं जाम्बूनदपरिष्कृतम् ।
आरुह्य सुखिता यान्ति धर्मिष्ठा· पाण्डुनन्दन ॥
केचिद्विमानमारुह्य सूर्यकान्तिसमप्रभम् ।
प्रयान्ति नरशार्दूल मम लोकं सुखप्रदम् ॥
छत्रचामरसंयुक्त सेव्यमानाप्सरोगणै ।
ते चन्द्रधवलैर्यानै प्रयान्ति मम मन्दिरम् ॥
चैत्रनन्दनसंकाशं वनं प्राप्य पथि प्रभो ।
क्रीडयित्वा यथाकामं प्रयान्ति मम मन्दिरम् ॥
शङ्खिनश्चक्रिणो भूत्वा तुलसीवनरोपका ।
प्रयान्ति मम लोक वै पुष्पारामप्रवर्तका ॥
व्रतोपवासनिरता पञ्चयज्ञपरायणाः ।
ज्वलन्तो यान्ति राजेन्द्र सत्यलोकं बहुश्रुता ॥
ब्रह्मप्रतिष्ठाकर्तारस्तथा वैवाहधर्मदा ।
अनाथविप्रभर्तार प्रयान्ति मम मन्दिरम् ॥
नित्यदानपरा राजन्नित्यं विप्रप्रपूजका ।
विप्रपादोदकपरा ज्वलन्तो यान्ति मत्पदम् ॥
एव धर्मपरा यान्ति सुखेन मम मन्दिरम् ।
परत्रेह च राजेन्द्र धर्म एव सदा सखा ॥
य इदं पुण्यमाख्यानं धर्माधर्मं हि पाण्डव ।
शृणोति सततं भक्त्या मुच्यते सर्वपातकै ॥

Colophon

ᵃ). —(L 2725) D1 प्रकुर्वन्त (for °न्ति) M1 मधुपान प्रकुर्वन्त· (for ᵃ). —(L 2728) G2 M1 यश्च (for याति). G1 सदा (for सह). — For line 2728, G1 subst..

138** अलंकारप्रदा यान्ति पूज्यमानामरै सह ।

—(L 2732) G2 अश्वदो (for हयदो) —(L. 2734) G(ed) वृषदश् (for ऽनड्वदश्). —(L 2735) G(ed) याति सहृष्टमानस (for ᵇ). —(L. 2736) M1 नरो भृत्यजनैर्वृत· (for ᵇ) — M1 om lines 2737–2739 —(L 2737) D1 -दानप्रदो, G1 G(ed) °परो (for °रतो) —(2739) G1 G(ed) पुराणपा(G1 °प)ठका यान्ति (for ᵃ) G1 G(ed.) पूज्यमाना (for °नो). —(L 2741) D1 मम (for यम-). —(L. 2742) D1 कृतौ तु न (for कृते ये तु) G1 ममालयम् (for य°) —(L. 2749) G(ed) पुत्रदारसमन्वित (for ᵇ) —(L 2750) M1 यथान्यायं (for °काम). G2 भुक्त्वा भोग यथाभोज्यं (for ᵃ). —(L. 2752) D1 G(ed) पुराणान्मुक्तिमाप्नोति (for ᵃ) —(L 2754) G2 च शाश्वतम् (for सुखावहम्) —(L 2757) G2 याने च (for यानेन) G(ed) भारत (for धर्मिण) G1 विमानेन च भारत (for ᵇ) — G1 om line 2758 —(L. 2758) D1 गजै स (for गजोष्ट्र-) G2 विमानैर्भरतर्षभ, G(ed) °नेनार्कवर्चसा (for ᵇ) —(L 2763) G2 G(ed) -कान्तिमय- (for °सम-) —(L 2765) G(ed) ह्यप्सरोगणसेविताः (for ᵇ) —(L 2766) G2 प्रयान्ति परमं पदम् (for ᵇ) —(L. 2768) G(ed) क्रीडित्वा तु (for क्रीडयित्वा). — G(ed) om. lines 2773–2774 —(L 2777) G2 G(ed) यम- (for मम) —(L 2778) G2 परा गति (for सदा सखा) —(L. 2779) G(ed) धर्माधर्मनिरूपणम् (for ᵇ)

COLOPHON — *Sub-parvan* D1 G1 आश्चर्यपर्वं शेषधर्माः, G2 M1 G(ed) शेषधर्मा —*Adhy name* D1 धर्मसारयममार्गविस्तारः, G1 यममार्गविस्तारम्, M1 मार्गनिस्तार·, G(ed) यममार्गादिगमननिर्णय·· — *Adhy no* , D1 G1, 2 M1 G(ed.) 21.

युधिष्ठिर उवाच ।

भगवन्देवदेवेश मायातीत महामते ।
नमामि पुण्डरीकाक्ष त्वत्पादकमलं शुभम् ॥
पापिनो ये तु मनुजाः पापं कृत्वा सुदारुणम् ।
नरकं यान्ति ते नाथ मुच्यन्ते ते कथं प्रभो ॥
यदि मुक्ताः प्रयत्नेन तेषां का गतिरुच्यते ।
किं भवन्ति च ते नाथ कथं गर्भं विशन्ति ते ॥
गर्भस्थाः किं नु कुर्वन्ति जातमात्रा यदूत्तम ।
वृक्षत्वे च पशुत्वे च मृगत्वे कृमियोनिषु ॥
पक्षित्वे पापकर्माणो मत्स्यत्वे च महामते ।
एतान्सर्वान्ममानन्त स्पष्टीकर्तुं त्वमर्हसि ॥

श्रीभगवानुवाच ।

शृणु पाण्डव वक्ष्यामि नराणां पापकर्मणाम् ।
गर्भस्थानां बहिस्थानां जन्तूनां वर्तनं प्रभो ॥
नरकेषु चिरं मग्ना जन्तवो नित्यदुःखिता. ।
शोचन्त. स्वानि कर्माणि बहुकालं रुदन्ति हि ॥
सर्वानेतान्महाघोरान्नरकाननुभूय च ।
क्रमेण दैवयोगात्ते निर्विशन्ति महीतलम् ॥
सर्वदुःखसमायुक्ते सर्वोपद्रवसंकटे ।
स्थावरत्वे नियोज्यन्ते नश्यन्ति प्रभवन्ति च ॥
वृक्षगुल्मलतावल्लीगिरयश्च तृणानि च ।
स्थावरा इति विख्याता महामोहसमावृता ॥
दवाग्निना हि दह्यन्ते छिद्यन्ते पापकर्मभिः ।
वेपन्ते हि महावातैः शुष्यन्ते चण्डरश्मिभि ।
हृष्यन्ते वृष्टिभिस्तात शुष्कायन्ते ह्यवृष्टिभि ॥
फलार्थं छिद्यमानाश्च गृहार्थं भरतर्षभ ।
चितार्थमिन्धनार्थं च महामोहसमावृता· ॥
एव क्लेशसमायुक्ताश्चिरं तिष्ठन्ति भूतले ।
तत पञ्चत्वमापन्ना जायन्ते कृमियोनिषु ॥
कृमयस्ते महाभाग सदा दुःखोपजीविनः ।
क्षणार्धमुपजीवन्ति क्षणार्धं तु म्रियन्ति च ॥
बलवद्भिश्च खाद्यन्ते ह्यशक्ता ह्यात्मरक्षणे ।
शीतवातातपक्लेशभूयिष्ठाः क्षुधिता भृशम् ॥
मलमूत्रादिमांसेषु संचरन्तो नृपोत्तम ।
सुखलेशमजानन्तो म्रियन्ते दुःखजीविन ॥
पक्षियोनिं ततः प्राप्य बलिभि पक्षिभिर्हताः ।
चरणान्निधनं प्राप्ताः खादिता मांसलोलुपै· ॥
म्रियन्ते केचिदण्डेषु द्विजाता मांसजीविन ।
केचिद्गृहाङ्गणे बद्धा नीडेषु प्रचरन्ति च ॥
पक्षैर्वियोजिताः केचिद्भक्ष्यन्ते मनुजैर्भुवि ।
केचित्परार्थमाहारमुत्पाद्य क्षुधिता भृशम् ।
बल्यर्थं निहताः केचिच्चेष्टन्ते भुवि मानवैः ॥
केचित्तु भूभृतां गेहे भुक्त्वा ह्याहारमुत्तमम् ।
बध्यन्ते वागुरै. केचिद्भ्रियन्ते मनुजैः सह ॥
मार्जारोरगदंष्ट्राद्यै. खाद्यन्ते केचिदन्यथा ।
एवं क्लेशसमायुक्ता निधनं यान्ति पाण्डव ।
पशुयोनिं तदागत्य क्लिश्यन्ते बहुधा नृप ॥
वक्ष्ये तान्मूढधीन्मत्तानात्मपापमजानतः ।
शृङ्गिणो दंष्ट्रिण केचित्केचित्पादनखायुधाः ।
केचिद्वहन्ति मनुजान्केचिद्भारान्वहन्ति च ।
कुर्वन्ति कलहं केचिदन्योन्य मदगर्विताः ।
केचित्पदाभ्यां शिरसा केचिद्दंष्ट्रैर्नखै परे ।
कुर्वन्ति कलहं केचिच्छृङ्गैर्मत्ता वृथा नृप ॥
कर्षन्ति केचिद्दुःखार्ता बद्धास्तिष्ठन्ति केचन ।
मांसाशिनो दुरात्मानः केचित्कर्मविशेषतः ॥
भुञ्जन्ति केचिद्राजेन्द्र दुहन्ति च पिबन्ति च ।
मरणं यान्ति केचित्तु ह्यन्योन्यकलहान्नृप ॥
महापापसमायुक्ता वर्तन्ते नृप कानने ।
पिबन्ति रुधिरं केचित्फलानि च तथापरे ॥
खादन्ति कन्दमूलानि तुषारान्विलिहन्ति च ।
खादन्ति दुर्बलान्केचिद्रमन्ते मातरं परे ।
कामयन्ते तथा चान्ये मातरं स्वसखीजनम् ॥
जातिभेदमविज्ञाय रमन्ते काममोहिताः ।
प्राप्नुवन्ति तथा चान्ये बन्धनं त्वविशङ्कया ॥

G_1 om the ref D_1 राजा (for युधिष्ठिर) — (L 2781) D_1 जगत्पते (for महामते) — (L 2784) G(ed.) केन (for नाथ). — (L 2787) G_2 जातमात्रे (for °मात्रा). — (L 2788) G_2 M_1 कृमि- (for क्रिमि-). — After line 2788, D_1 ins

139** पाषाणत्वे लताभावे तृणगुल्माकृतौ हरे ।
केन दोषेण जायन्ते पुमासस्तद्वदस्व मे ॥
वृकव्याघ्रवराहादिशशवानरयोनिषु ।
जायन्ते केन दोषेण तत्सर्वं कथ्यता प्रभो ॥
उष्ट्रवाजीखराकारे गजासिंहादियोनिषु ।
कस्य पापस्य कर्तार समुत्पन्ना महामते ॥
रक्ष पिशाचभावेषु शाकिनीडाकिनीतनौ ।
कस्माद्दोषात्प्रजायन्ते कियन्मात्रा यदूत्तम ॥

— (L. 2799) D_1 -निचयश् (for -गर°) — (L 2815) G(ed) चरणैर् (for चरणान्). D_1 चिरेण निधन याताः (for ^{a}). D_1 G(ed.) खाद्यन्ते (for खादिता). — (L 2816) G_1 जाता वै मांसजीविभि (for ^{b}). — (L. 2817) G_1 महाङ्गणे (for गृहा°) D_1 प्रविशन्ति ; M_1 प्रचलन्ति (for °रन्ति). G_2 व्याधैश्च निधनं गता (for ^{b}) — (L. 2821) D_1 भ्रमन्ति द्वारमुत्तमम् (for ^{b}) — (L 2825) G(ed.) ततः प्राप्य (for तदागत्य). — For line 2826, G_1 subst. :

140** मध्ये तान्मदमत्ताना पापजन्मपरिग्रहान् ।

— (L 2829) M_1 केचिदन्योन्यगर्विताः (for ^{b}). — (L. 2832) क्लिश्यन्ते (for कर्षन्ति) — (L 2834) G(ed) मुञ्चन्ति (for दुहन्ति). — (L. 2840) D_1 मातर सुखहेतवे (for ^{b})· — (L 2841) G_1 M_1 रमन्ते कामुका हि ताम् (for ^{b}).

खड्गैर्निकृत्य मांसानि भक्ष्यन्ते केन केचन ।
ताड्यन्ते रज्जुभिर्नित्यं तोत्राद्यैर्दण्डघट्टनैः ॥
शीतवातातपक्लिष्टास्तृणभक्षा सुदारुणा ।
व्याधिभि पीड्यमानाश्च ह्यमेध्यामिषभोजिनः ।
प्रबलैस्ताड्यमानास्ते म्रियन्ते पाण्डुनन्दन ॥
परदेशं प्राप्नुवन्ति रुदन्त क्रयविक्रयैः ।
स्वजनैस्तु परित्यागाद्बाध्यन्ते व्यजनैरपि ॥
एवं पापा प्रलीयन्ते कर्मभि पूर्वसंचितै ।
मृता पुन पुनर्जाता शतश कोटिजन्मसु ॥
तदन्ते दैवयोगेन पूर्वकर्मफलेन वै ।
मानुष्यं प्राप्नुवन्त्येते जन्तव कुरुनन्दन ॥
उत्कृष्टनीचकर्माणो जायन्ते बहुयोनिषु ।
तान्वक्ष्ये भरतश्रेष्ठ पुण्यपापविमिश्रितान् ॥
उत्कृष्टा मुखजा प्रोक्ता मध्यमा बाहुजा. स्मृता ।
अधमाश्चोरुजा प्रोक्ता पादजा ह्यधमाधमा ॥
चित्रिण शिल्पिकर्माणः केचित्क्रूरेण कर्मणा ।
रजकाः कुम्भकाराश्च लोहकारास्तथापरे ॥
सौवर्णकाश्च राजेन्द्र कुविन्दा नटपुल्कसाः ।
अन्त्याः किरातवैणाद्या घोषवस्त्रीकुलेषु च ॥
म्लेच्छास्तु पापशेषेण पुलिन्दा व्यधनाविका ।
आन्ध्रास्तुरुष्ककाम्बोजा पारसीकाश्च कोङ्कणा ॥
आम्लायकास्तु तुलुवा आर्यकर्णाटकुञ्जरा ।
लालद्राविडचोलाश्च पाण्ड्या भरतसत्तम ॥
एवमाद्या महाभागा कर्मशेषेण निर्मिता ।
स्वेनैव कर्मशेषेण भवन्ति ह्यामयाविन ॥
अन्धा कुब्जा जडा मूका हीनाङ्गा बधिरा परे ।
खञ्जाः काणास्तथा क्लीबा कृशाङ्गाः स्थूलकायिन ॥
केचित्पुण्यावशेषेण साक्षरा प्रभवन्ति हि ।
विद्यादानेषु निरता ब्राह्मणा पुण्यकर्मिणः ॥
एवं भवन्ति भूपाल अल्पविद्याप्रदा अपि ।
वेदान्तवादिनश्चैव शब्दशास्त्रविद परे ॥
काव्यालंकारशीलाश्च पुराणनिपुणाः परे ।
षडङ्गनिपुणा केचिन्मीमांसातर्कवादिन ॥
ज्योतिषे गानभैषज्ये निपुणा नर्तका परे ।
भरते वाद्यभेदे च गणिका सेवका अपि ॥
भुञ्जन्ति मेदिनी केचिद्देशं ग्रामं तु भूप्रदाः ॥
इदं विष्णुरहं विष्णुरहं दासस्तु शार्ङ्गिण ।
अनेकजन्मसंसिद्धा केचिदेवं वदन्ति हि ॥
ब्रह्मध्यानपरा केचिन्मोक्षशास्त्रविद. परे ।
विश्वं मामेव पश्यन्तो दण्डकाषायधारिण ॥
ज्ञानयज्ञेन चाप्यन्ये कर्मयज्ञेन चापरे ।
नमस्यन्तश्च मामेव जपन्तो मामकं जपम् ।
एवं मुमुक्षव पार्थ मय्येवार्पितमानसा ॥
काषायधारिण केचिल्लम्पटा विषयेष्विह ।
एकदण्डास्त्रिदण्डाश्च मुण्डिनो लोकवञ्चका ॥
शिश्नोदरपराश्चान्ये वेश्यासक्तास्तथापरे ।
कपटा नास्तिका केचिद्वृथा वै वेषधारिण ॥
राजसेवां प्रकुर्वन्ति पिबन्ति रुधिरं परे ।
खादन्ति मांसं राजेन्द्र पिबन्ति मधु गर्विता ।
कापालिनो जटाधारा वञ्चका प्राणिहिंसका ॥
केचित्पुण्यविशेषेण प्रभव प्रभवन्ति हि ।
दरिद्रा व्याधिता मूर्खा निर्घृणा प्राणिहिंसकाः ॥
नीचसेवां प्रकुर्वन्ति ह्युत्तमा मध्यमाधमान् ।
एवंभूता दुरात्मान पापिन पुण्यकर्मिणः ।
प्रहृष्टा दु खिता सर्वे प्रहसन्ति रुदन्ति च ॥

युधिष्ठिर उवाच ।

देवदेवारविन्दाक्ष पुराणपुरुषोत्तम ।
तापत्रयातुरा सर्वे मृगमीना हि पक्षिणः ॥
बाध्यन्ते कर्मणा केन गर्भे च बहि च स्थिता ।
तत्सर्वं वद तत्त्वेन यदुनाथ नमोऽस्तु ते ॥

वैशंपायन उवाच ।

धर्मसूनोरिदं वाक्य श्रुत्वा भक्तिसमन्वितम् ।
भगवान्वासुदेवस्तु वक्तुं समुपचक्रमे ॥
प्रोक्तं भगवता यस्तु शृणोति श्रद्धया नरः ।

— (L 2845) D_1 -क्लिष्टास् (for -श्लि°) — (L 2846) D_1 G_1 भोजना ; G_2 G(ed) भोजनै (for भोजिन) — (L 2854) -जन्मानो (for -कर्माणो) M_1 पर- (for बहु-). — (L. 2857) G_1 M_1 ह्यधमा पादजा नृप (M_1 °जाधमाः) (for ^{b}). — (L. 2860) G(ed) स्वर्णकाराश् (for सौवर्णकाश्). — After line 2862^{a}, D_1 ins

141** भवन्ति ह्यामयायिन ।
अन्धा कुब्जा जडा मूका ·

D_1 G_2 -नापिता (G_2 °का) (for नाविका). — (L. 2863) D_1 आन्ध्रास्तु पुष्करामभोजा (for ^{a}) — (L 2864) G_1 G(ed) आमदादास् ; G(ed) आमलादास् (for आम्लायकास्) D_1 आर्या कन्नोजगुर्जराः (for ^{b}). — (L. 2868) D_1 G_2 मूर्खा (for मूका). — (L 2874) M_1 -निरता (for -निपुणा·) — (L 2875) G_1 -निरता (for -निपुणा). — (L 2876) D_1 ज्योतिषेयाश्च भैषज्ये (for ^{a}) — (L. 2881) D_1 -ज्ञानरताः (for -ध्यानपरा) — (L 2883) M_1 ज्ञान- (for कर्म-). — For line 2887, G_2 subst :

142** एकदण्ड्यस्त्रिदण्ड्यश्च मुण्डिन्यो लोकवञ्चका ।

— (L 2889) G(ed) कुटिला (for कपटा) — (L. 2891) D_1 -गर्हिता (for -गर्विता). — (L. 2892) G_1 कलापिनो ; G_2 G(ed) कपालिनो (for का°) $G_{1,2}$ वृथामुण्डाश्च वृत्तयः (for ^{b}) — (L. 2895) G_1 G(ed) ह्युत्तमाधममध्यमा (G_1 °मान्) (for ^{b}) — (L 2896) D_1 G(ed) पापिन पाण्डुनन्दन (for ^{b}) — (L 2897) G_1 G(ed) प्रभवन्ति (for प्रहसन्ति). — (L 2900) M_1 गर्भे च बहिरास्थिता (for ^{b}). — (L. 2901) G(ed) लोक- (for यदु-). — (L. 2904) G(ed.)

विधूय सर्वपापानि ब्रह्मलोकं स गच्छति ॥

Colophon

श्रीभगवानुवाच ।

धर्मात्मन्धर्मिणां श्रेष्ठ जितामित्र शुभव्रत ।
आजन्ममरणान्तानि शृणु कर्माणि देहिनाम् ॥
कामेन बाधिताः सर्वे नरास्तु पशुजातयः ।
मैथुनं भावमाश्रित्य क्रीडन्ति च परस्परम् ॥
स्तनाश्रयं तु नारीणां शोणितं शुक्रवर्धनम् ।
पुंसां बीजाश्रयं शुक्रं स्त्रीणां सङ्गेन वर्धते ॥
पुनश्च शुक्रवृद्ध्या च नारीशोणितवर्धनम् ।
शुक्रस्य पतने काले जीवांशः पुरुषस्य हि ॥
अन्तर्विशति तद्गर्भे शोणितेन विवर्धते ।
जीवप्रवेशात्तद्गर्भे पुरुषस्य कुरूत्तम ॥
मयूरपिण्डवन्मांसान्मृदुत्वं प्रतिपद्यते ।
चैतन्यमुल्बमभवन्मासादुपरि पाण्डव ॥
मलमूत्रादिदोषेण बद्धो भ्रमति सर्वशः ।
पूर्णे मासद्वये पश्चान्मत्स्याकारं प्रपत्स्यते ॥
पूर्णे मासत्रये गर्भो हस्तपादैः प्रयुज्यते ।
मासानां पञ्चमे वृद्धिः षष्ठे जीवप्रवेशनम् ॥
सप्तमे रोमवृद्धिः स्यादष्टमे वृद्धिमेति च ।
वर्धिष्यति यथा गर्भस्तथा मूत्रं पुरीषकम् ॥
तेनैव लिप्तसर्वाङ्गः क्लेशमेति रुदन्बहु ।
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षेण तप्यते ।
भ्रमन्वै क्लेशमसहन्नास्ते गर्भे नरोत्तम ॥
पूर्वजन्मकृतं पापं स्मरन्क्लेशाद्रुदन्बहु ।
सम्यग्ज्ञानसंपन्नः स्वयमाश्वास्य वर्तते ॥
गर्भस्य वेदनां सोढुमशक्त प्रलपन्बहु ।
मलमूत्रादिसंबद्धो निन्दन्नास्ते कुरूद्वह ॥

युधिष्ठिर उवाच ।

त्रैलोक्यनाथ सर्वज्ञ मायातीत महामते ।
कथं निन्दन्स्वमात्मानं कथं वै विलपन्प्रभो ।
गर्भे तिष्ठति पापेन तन्मे ब्रूहि जनार्दन ॥

श्रीभगवानुवाच ।

मलमूत्रादिसंबद्धो देही गर्भे तु यद्वदेत् ।
तं वदामि च ते प्रीत्या शृणु नान्यमना प्रभो ॥

जीव उवाच ।

अहोऽह पापधीर्नित्यं जन्मकोटिशतेषु च ।
पुत्रमित्रकलत्रार्थमपहृत्य वसूनि च ॥
क्षेत्राण्यपि च साधूनामीदृशी गर्भवेदनाम् ।
प्राप्तोऽहमीदृशः पापी कदा मोक्षो भविष्यति ॥
परेषां धर्मपत्नीनां सङ्गं कृत्वा तु मोहित ।
मलमूत्रादिपङ्केषु गर्भेषु परिदुःखितः ।
पापस्य मे कदा मोक्षो भविष्यति न वा खलु ॥
एकोऽहं पापकर्मा हि स्थावरत्वमवाप्य च ।
तत्रापि दुःखं बहुलमनुभूतं मया पुरा ॥
मातुस्तापाद्दह्यमानो जरायुपरिवेष्टित ।
मलपङ्कमहाब्धौ च मग्नदेहो दुनोमि च ॥
मया पोषितपुत्राद्या स्वकर्मवशवर्तिन ।
गतान्यत्र स्त्रियो मित्रं दह्याम्यत्रात्मना त्वहम् ॥
अहो दुःखमहो दुःखमहो दुःखं हि देहिनाम् ।
देहस्तु पापात्संजातास्तस्मात्पापं न कारयेत् ॥
पुत्रमित्रकलत्रार्थमन्यद्द्रव्यं हृतं मया ।
तेन पापेन दह्यामि जरायुपरिवेष्टितः ॥
दृष्ट्वान्यस्य स्त्रिय पूर्वं संतप्तोऽहमसूयया ।
गर्भाग्निना तु दह्यामि पापात्मा पापसंभवः ॥
कायेन मनसा वाचा परपीडामकारिषम् ।

[अ]न्वित. (for नर.). — After line 2904, G_1 ins .

143** आजन्ममरणान्तानि सचितानि यदृच्छया ।

COLOPHON — *Sub-parvan* D_1 G_1 M_1 G(ed) आश्चर्यपर्वणि शेषधर्मा ; G_2 शेषधर्मा. — *Adhy name* G(ed) धर्मसार. — *Adhy no* D_1 G_1 2 M_1 G(ed) 22

(L. 2906) D_1 श्रुतव्रत (for शुभ°). — (L. 2908) M_1 कामिनो मनुजा. सर्वे (for ^{a}). G_1 -वृत्तय. (for -जातयः) —(L 2910) G_2 सङ्गाश्रय (for स्तना°) — M_1 om (hapl) lines 2912–2914. —(L. 2912) D_1 पुस शुक्रस्य वृद्ध्या च (for ^{a}) —(L. 2915) G_1 G(ed) तद्गर्भं (for °र्भे) D_1 जीवप्रवेशस्तद्गर्भे, G_2 °शनाद्गर्भे (for ^{a}). D_1 G(ed) कुरूद्वह (for °त्तम) — (L. 2916) D_1 प्रसूनपिण्डवन्मासं, G_1 मयूरवर्णवन्मासो, G_2 मयूराकारवन्मासान्, M_1 मयूरकाण्डवन्मासान् (for ^{b}) —(L. 2918) G(ed) बद्धो भ्राम्यति सर्वत (for ^{b}) —(L 2919) D_1 M_1 प्रपद्यते (for °त्स्यते). G_1 पिण्डाकार प्रपद्यते (for ^{b}). —(L. 2920) G_2 पूर्णे मासे तुरीये च (for ^{a}) —(L 2923) G(ed) वर्धते नवमे गर्भे (for ^{a}). — (L. 2925) D_1 G_2 -तृष्णारूक्षैश्च (G_2 °पेण) तप्यते (for ^{b}). — (L. 2927) G_1 भृशम्, M_1 वदन् (for बहु). D_1 स्मरन्क्लेशान्रुदन्भृशम् (for ^{b}). — (L 2930) D_1 निन्दन्नात्मनमात्मना (for ^{b}). —(L. 2934) G_1 G(ed) -सयुक्तो (for -सबद्धो). D_1 देही गर्भे विचिन्तयन् (for ^{b}) — M_1 G(ed.) om. the ref G_2 जन्तुर् (for जीव) — (L 2938) G_2 ईदृशं गर्भवेदनम् (for ^{b}). — (L. 2945) M_1 मनस्तापाद् ; D_1 मातु कुक्षौ (for मातुस्तापाद्). — (L 2946) D_1 G_2 G(ed) अग्नि-, M_1 मल- (for मग्न-). — (L 2947) M_1 स्वकर्मपरिवर्तिन (for ^{b}) — (L 2948) D_1 गता स्त्रियस्तथा मित्रा, G(ed) गतान्यत स्त्री च मित्र (for ^{a}) D_1 दह्यामि स्वात्मना त्वहम्, G(ed.) दग्धो ह्यत्र स्वकर्मणा (for ^{b}) — (L 2950) D_1 देहास्तु पापात्सजातास्; G_1 देहं पापाच्च संजात (for ^{a}). G(ed.) तु नाचरेत् (for न कारयेत्). — (L. 2952) G(ed) दग्धोऽस्मि (for दह्यामि) and -पीडित (for -वेष्टित). —(L. 2953) G_2 स तु दृष्ट्वा स्त्रियं

तेन पापेन दह्यामि अहमेकोऽतिदु खित ॥
अकृत्वा देवकार्याणि पितृकार्याणि लौकिकान् ।
अग्निदेवगृहान्विप्रानीदृशी यातना गत ॥
जपस्नानविहीनत्वादसद्भि सहवासनात् ।
सदा पापरतत्वाच्च प्राप्तोऽहं गर्भवेदनाम् ॥
सदा शास्त्रविहीनोऽहं श्रवणेषु तथालस ।
अनिन्द्यान्निन्द्यमानोऽहमेवं प्राप्तो महद्भयम् ॥
एवं बहुविधं जन्तुर्विलप्य स्वयमेव हि ।
आत्मनात्मानमाश्वास्य बुद्धिं धर्मे नियुज्य च ॥
धर्मं कृत्वा यथान्यायं सत्सङ्गेषु प्रवर्त्य च ।
कृत्वा देवाग्निपूजां च यास्येऽहं परमां गतिम् ॥
आराध्य तु जगन्नाथं सर्वकामार्थद प्रभुम् ।
जगद्योनिमुदाराङ्गं विश्वरूपं जगद्गुरुम् ॥
देवगन्धर्वनिचयैर्विद्याधरमुनीश्वरै ।
दिग्दन्तिभिश्च दिक्पालैश्चन्द्रसूर्यादिभिर्ग्रहै ॥
ऋषिदेवगणैर्विप्रैरिन्द्राद्यै ससुरासुरै ।
अर्च्यमानं सदा शुद्धं सृष्टिस्थित्यन्तकारिणम् ॥
सर्वगं सर्वलोकानामीश्वरं पुरुषोत्तमम् ।
आनन्दमक्षरं नित्यं स्वप्रकाशं निरञ्जनम् ॥
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
कालमेघनिभं देवं विद्युच्चञ्चललोचनम् ॥
पीताम्बरधरं देवं शङ्खचक्रादिसेवितम् ।
लक्ष्मीपतिं विशालाक्षं सर्वालंकारशोभितम् ॥
अनन्तमजरं विष्णुं ध्यात्वा नित्यमतन्द्रित ।
गर्भात्तु निर्गतोऽहं वै मुक्तिं यास्यामि निश्चितम् ॥
अतिक्रमिष्ये संसारं घोरं जलधिसंनिभम् ॥
सर्वत्र हि भयं नास्ति सर्वत्र सुखमेव मे ।
इति वै चिन्तमानस्य जन्तोर्गर्भगतस्य च ।
प्रसूतिकालवायुश्च पुर स्थित्वा च कर्षति ॥
तेनैव वायुना बद्धः प्राजापत्येन पाण्डव ।
मातुश्च दुःखमतुलं कुर्वन्कर्मबलेन च ।
आकृष्यमाणो निर्गच्छेद्योनियन्त्रप्रपीडित ॥
नि संज्ञं तु विचेष्टन्तं रुदन्तं च विलक्षणम् ।
उज्जीवयति तं वायुर्बाह्यवर्ती कुरूद्वह ॥
स्पर्शनाद्बाह्यवायोश्चानन्तरं स शिशुर्नृप ।
नष्टस्मृतिस्तथा दु खमतुलं च प्रपद्यते ॥
दैवाद्बालत्वमापन्नो जन्तुर्दु खाद्विमुच्यते ।
वक्तुं स तु न शक्नोति किंचिच्चापि न वेद सः ॥
स्वदेहमलमूत्रैश्च लिप्ताङ्गो दु खकर्शित ।
आध्यात्मिकादिदु खैश्च पीड्यमानो रुदन्वसेत् ॥
क्षुत्तृड्भ्यां पीडितो नित्यं मशकैर्यूकदंशकैः ।
स्वपन्रुदश्च बहुशो वर्तते पेटके नृप ॥
क्षुधया पीडिते बाले जननी बान्धवा अपि ।
उदरे वेदनास्तीति शिशोरस्य वदन्ति हि ॥
स्तन्यं देयमहो कष्ट शिशो किंचिन्न विद्यते ।
वदन्त्यौषधमन्योऽपि देयं देयमिति प्रभो ॥
एवं भोगमनुप्राप्य ह्यन्याधीनतया नृप ।
पीडितो मलदंशाद्यैर्बाल्यभावं प्रपद्यते ॥

वैशंपायन उवाच ।

एवं श्रुत्वा महाभागो धर्मपुत्रो महामतिः ।
आश्चर्यं परमं गत्वा नमस्कृत्येदमब्रवीत् ॥

युधिष्ठिर उवाच ।

पाहि लोकपते देव वासुदेवारिमर्दन ।
त्वमेव गतिरस्माकं सर्वकाले यदूत्तम ॥
पाञ्चालीं पाण्डवान्साधून्कुतीं धर्मभृतां वर ।
पालयास्यनिशं भक्तानित्युवाच पुरा प्रभो ॥
तस्मात्त्वां प्रार्थयाम्यद्य त्वद्वक्त्रकमलस्तुतम् ।

पूर्वम् (for ^{a}). D1 अन्यद्रव्य हृतं मया, G2 अन्यद्रव्यमसूयया (for ^{a}) —(L 2954) G(ed) सुदग्धोऽस्मि (for तु दह्यामि). —(L 2955) G(ed) परपीडा मया कृता (for ^{b}). —(L 2956) G(ed.) दग्धोऽस्मि (for दह्यामि) —(L. 2958) G1 वेदना (for यातना) — For line 2958, G(ed) subst. :

144** ग्रहविप्राग्निपूजां च यातनामीदृशी गत ।

—(L. 2961) D1 -पुराणाना (for -विहीनोऽह) —(L. 2962) G2 अनिन्द्यैर् (for °न्द्यान्) G(ed) अनिन्द्यान्निन्दयन्साधून् (for ^{a}). —(L 2966) M1 कृत्वाग्निपूजा धर्मांश्च (for ^{a}). G(ed) प्राप्स्ये (for यास्ये) D1 G2 परम पदम् (for °मां गतिम्). —(L 2967) D1 आराध्य जगतां नाथ (for ^{a}) —(L 2968) G2 मुरारिं च (for उदाराङ्गं) D1 M1 -योनिं (for -रूप). —(L 2969) M1 -मनुजैर् (for -निचयैर्). — G2 om lines 2970–2971 —(L 2971) G(ed) सिद्धयोगि- (for ऋषिदेव-). —(L. 2972) D1 सर्गस्थित्यन्तकारणम् (for ^{b}) —(L 2974) G(ed) दिव्य (for नित्य). G2 अनन्तमक्षय नित्य (for ^{a}) —(L 2976) G(ed) पीताम्बरधर विभुम् (for ^{b}) —(L 2977) G(ed.) अभयं वरदं शान्तं (for ^{a}) D1 -सयुतम् (for -सेवि°). G2 शङ्खचक्रगदाधरम् ; G(ed) °चक्रादिभिर्युतम् (for ^{b}) —(L 2979) D1 अचलं (for अजरं) —(L 2980) G1 गर्भात्तु निर्गम प्राप्य (for ^{a}). —(L 2982) D1 सुखं (fo भय) —(L 2983) G(ed.) इति चिन्तयतो नित्य (for ^{a}). —(L. 2987) G2 M1 -प्रपीडित (for -निपी°) —(L 2988) G1 2 M1 G(ed) नि सज्ञ भुवि वेष्टन्तं (for ^{a}). —(L 2990) G2 जन्तोस्तस्य च धीमत (for ^{b}) —(L 2992) D1 जन्तुर्दु खं प्रपद्यते (for ^{a}). —(L 2993) D1 गन्तुं (for स तु). G(ed) स्ववेदनाम् (for न वेद स). —(L. 2997) D1 स्वप्तु रुदन्सुबहुशो (for ^{a}). —(L 2998) G1, 2 M1 G(ed.) क्षुधा च (for क्षुधया). D1 क्षुधया पीडितो बालो (for ^{a}). —(L 3002) M1 ह्यन्याधीनस्तथा नृप (for ^{a}) —(L 3004) G2 G(ed) महाभाग

पातुं धर्मामृतं नाथ यदुपुंगव संप्रति ॥
भगवन्सर्वलोकेश प्रणतार्तिप्रणाशन ।
नतोऽस्मि ते पादमूलं भक्तं मां परिपालय ॥
बाल्ये च यौवने कृष्ण वार्धके चरमेऽनघ ।
का बाधा किं सुखं तात तन्मे त्वं कृपया वद ॥

वैशंपायन उवाच ।

एवमुक्तो जगन्नाथो योगिध्येयो मुनीश्वरः ।
प्रत्युवाच स धर्मात्मा पाण्डुपुत्रं बहुश्रुतम् ॥
गदितं धर्मराजाय वासुदेवेन विष्णुना ।
शृणोति यः सदा भक्त्या गङ्गास्नानफलं लभेत् ॥

Colophon

श्रीभगवानुवाच ।

शृणु पाण्डव वक्ष्यामि जन्तूनां पापकर्मणाम् ।
बालत्वे यौवनत्वे च वृद्धत्वे यत्कृतं तु तत् ॥
बाल्ये मातरमभ्येत्य ददस्वेति फलादिकान् ।
रुदन्भूमौ लुठन्केशांस्ताडनं प्राप्यते सदा ॥
निर्धना बहुपुत्रा सा रुदन्ती पुत्रगृद्धिनी ।
उदरं तु शिरोभागं विनिहत्य ब्रवीति च ॥
अहो दरिद्रता कष्टं तत्रापि बहुपुत्रता ।
निर्घृणस्य पतेर्भार्या तस्यापि मरणं वरम् ॥
धिग्जन्म भाग्यरहितं धिग्जन्म ख्यातिवर्जितम् ।
नरस्य बहुपुत्रस्य दरिद्रस्य च धिग्बलम् ॥
इति क्लेशं वर्धयित्वा भर्तुश्च नितरां प्रभो ।
लेखकानां वशे बालं नियुज्य सुखमश्नुते ॥
गृहोपद्रवमालोक्योपाध्यायवशवर्तिनम् ।
पिता च तं सुतं धीमान्करोति च सुदुःखितम् ॥
असोढा वेदना तेषां यत्र कुत्रापि लीयते ।
अनागते शिशौ तस्मिन्रुदन्ति पितरो भृशम् ॥
क्व गतो बालको मेऽद्य किं करोमि च संप्रति ।
कुलतन्तोर्वियोगेन ममैव मरणं ध्रुवम् ॥
न चिरायति तातोऽयमहो कष्टमुपस्थितम् ।
हा पुत्र क्व नु गन्तासि किं करोमि त्वया विना ॥
कुलं धन गृहं क्षेत्रं वासांस्याभरणानि च ।
सर्वं नष्टं त्वया हीनं हा पुत्रक करोमि किम् ॥
गौर्घटोघ्नीर्महिष्यश्च शकटं यानवाहनम् ।
कुलं चानडुहां पुत्र दासीदासकुलं हृतम् ॥
घृतं धान्यं गुळ तैलं शर्करापूपसंहतिः ।
श्वेततांबूलकर्पूरचन्दनानि हृतानि मे ॥
वस्त्रकञ्चुककौशेयपट्टमाञ्जिष्ठकम्बला ।
त्वया हीनानि किं मेऽद्य हृतानि च सुखं सुत ॥
एवं विलप्य पितरौ बन्धुभिः सह धर्मज ।
त्यक्ताहारास्त्यक्तनिद्राः सर्वे तिष्ठन्ति दुःखिताः ॥
मार्गमाणौ भृशं लब्ध्वा प्रलप्य बहु दुःखितौ ।
पांसुभिर्धूलितं पुत्रं तृष्णया परिपीडितम् ।
हा हतेति तमालिङ्ग्य वर्तेते पितर परे ॥
भक्ष्यभोज्यानि वस्त्राणि फलानि रसवन्ति च ।
दत्त्वा समृद्धं राजेन्द्र कारयेते गुरोर्वशे ॥
ताडनं कलहं कुर्वन्नृत्यन्गच्छन्रुदन्स्वपन् ।
पीडयन्पीडितो नित्यं गुरुणा पीडितो भृशम् ।
अक्षराणि लिखन्भूमौ वर्तते च गुरोर्वशे ॥
क्रीडनं कलहं कुर्वन्बहुव्यापारसंयुतः ।
सदाशुचित्वमापन्नो गृहे वसति वै क्षणम् ॥
एवं बहुतरं क्लेशं सुख समनुभूय च ।
ततस्तु यौवनं प्राप्य धनार्जनपरो भवेत् ॥
समुद्रलङ्घनं कृत्वा वञ्चयित्वा परानपि ।
व्यापाराच्चैव कृष्यंशाद्याचनात्प्राप्नुते धनम् ॥
रक्षणार्थं धनस्याशु बहुप्राकारसंयुतम् ।
दृढं कृत्वा प्रयत्नेन वेश्म पालयते धनम् ॥
राजतस्करदुर्वृत्तैस्तद्धने विलयं गते ।
रुदन्बहुविधं क्लेशाज्जठरं विनिहत्य च ।

(for °भागो). G1 महाद्युति· (for °मति) — D1 G2 M1 om. the ref. — (L. 3008) G1 G(ed) बन्धून् (for साधून्) — (L 3012) G(ed.) -विनाशन (for प्रणा°). — (L. 3015) D1 किं वाधिक (for का बाधा किं)

Colophon — *Sub parvan* D1 M1 आश्चर्यपर्वणि शेषधर्मा·, G1 आश्चर्यपर्व, G2 G(ed) शेषधर्मा· — *Adhy name* · D1 M1 कृष्णयुधिष्ठिरसंवाद ; G1 जन्तुजननक्रम ; G(ed) पिण्डोत्पत्तिकथनम् — *Adhy no* D1 G1, 2 M1 G(ed.) 23

G(ed) om the ref. G1 श्रीकृष्ण (for श्रीभगवान्) — (L 3024) G2 -वार्धिनी, G(ed) -कर्शिता (for -गृद्धिनी). D1 कृपणा गृध्रपुत्रिणी (for [b]) — (L 3025) G(ed) [अ]ब्रवीदिति (for ब्रवीति च) — (L 3026) D1 G1 निर्धनता (for दरिद्रता). — (L. 3027) G(ed) च भार्यात्व (for पतेर्भार्या) — (L. 3029) D1 M1 नरस्य बह्वपत्यस्य (for [a]). — (L 3032) G(ed) स्वाध्याय· (for [उ]पाध्याय-) — (L 3033) G2 कशापातं (for पिता च त). M1 सुखं (for सुतं). — (L. 3034) D1 G2 असोढुं (for °ढा) — (L. 3035) M1 G(ed.) रुदन्तौ पितरौ भृशम् (for [b]). — (L. 3038) G1 न विचारयिता दोषम् ; G(ed.) आविचार्यं च वै दोषम् (for [a]). — (L. 3042) D1 G2 गा (for गौर्) G(ed) चाश्व- (for यान-) — (L. 3045) G(ed) गन्ध- (for श्वेत-) G(ed) -दुकूलानि (for -चन्दनानि) — (L 3046) G1 -वस्त्र- (for -पट्ट-). M1 -कम्बलम् (for °ला) G(ed) पट्टमाञ्जिष्ठकादि च (for [b]). — (L. 3050) G2 लब्ध्वा (for लब्ध्वा) G(ed) विलप्य शिशुसंहतौ (for [b]) — (L 3051) M1 लुलितं; G(ed) धूसरं (for धूलितं) — (L 3053) M1 G(ed) सर्वाणि (for वस्त्राणि). — D1 om. (hapl) lines 3055–3056. — (L. 3055) G1 G(ed.) लुठन्रुदन्, M1 रुदन्परान् (for रुदन्स्वपन्). — (L. 3056) G2 पीडयन् (for पीडितो). — (L. 3058) G2 क्रुद्ध-

आस्यं शिरश्च राजेन्द्र तूष्णीमास्ते सुबोधित· ॥
तत परं समुत्थाय रुदन्भूमौ पतन्भृशम् ।
विलपन्वर्तते मोहादविज्ञाय स्वकर्म च ॥
अहोऽहं पापधीर्नित्य सर्वे लक्ष्म्या समावृताः ।
पुरार्जितेन पापेन निर्भाग्योऽहं भवामि च ॥
बहुक्लेशसमापन्नं नष्टमासीद्धि मे धनम् ।
मत्तोऽधिकाश्च तिष्ठन्ति ममैवमभवद्धत ॥
देव एव हि जानाति पुरा येन च यत्कृतम् ।
तदेव मयि दृष्टं च किमन्यैर्बहुभाषितै. ॥
गृहक्षेत्रादिकं कर्म किंचिन्नापि विचारितम् ।
समृद्धस्य कुटुम्बस्य कथं भवति जीवनम् ॥
मम मूलधनं नास्ति वृष्टिश्चापि न वर्षति ।
न लभ्यते वर्तन च राजबाधातिदुःसहा ॥
रिपवो मां च बाधन्ते कथमन्यत्र वर्तनम् ।
व्यवसायाक्षमश्चाहं प्राप्त प्राणहरो रिपु ॥
सखिमित्रसुहृद्वर्गा मातुलश्वशुरात्मजा· ।
पोषितापि मया नूनं मा त्यजन्ति हि निर्धनम् ॥
एवं चिन्ताकुलो राजन्निवारयितुमक्षम ।
आध्यात्मिकानि दु.खानि ह्यवशोऽनुभवंश्च स ॥
ततो वृद्धत्वमापन्न क्षीयमाणबलस्तदा ।
जरापलितदेहोऽसौ कम्पते सततं नृप ॥
श्वासकासादिसंयुक्त पीडितो घूर्णलोचन ।
श्लेष्मव्यावृतकण्ठत्वात्पुत्रैर्निर्भर्त्स्यते सदा ॥
बाधसे किं वृथा मूढ त्वं वृद्धकुणप शृणु ।
जीवितं तव धिक्कष्टं कदा मरणमेष्यसि ॥
दग्ध्वारण्ये कदा यामि सौख्यं त्वां पापकर्मिणम् ।
त्वयि तिष्ठति मे किंचिद्भाग्यं नैव मृतो भव ॥
धनं विश्राण्य सर्वं त्वं वृथा त्वं शोचसे पित· ।
अस्मान्वै पातयित्वा च कथं मरणमेष्यसि ॥
निर्घृणस्य तवेदानीं परं मरणमेव च ।
परलोके च ते मूढ नरकं भवति ध्रुवम् ॥
चोरयित्वा धनं सर्वं वञ्चयित्वा तु मामकान् ।
क्क गन्तासि कथं त्वां तु हनिष्ये मृत्युवद्ध्रुवम् ॥
एतत्कष्टतरं वाक्यं पित्रादीनां रुदंस्तदा ।
श्रुत्वा करुणया वाचा प्रलपन्वदते तदा ॥
अहो कष्टमहो कष्टं वृद्धानां पापजीवनम् ।
मृतं मारयते चैव पुत्रोऽयं बाधते भृशम् ॥
कदा मरणमेष्यामि कदा तृप्तिर्भवेत्तव ।
यद्दु खं मम संप्राप्तं तत्तवैव भविष्यति ॥
इत्युक्त्वा प्रलपन्मूढो ह्यज्ञानात्प्रेमबन्धनात् ।
पुत्रान्प्रति महाभाग कृपया वदते तदा ॥
गृहक्षेत्रादिक वस्तु मया नैवोपपादितम् ।
कथं वर्तनमन्यत्र शिशोरस्य भविष्यति ॥
परस्य चेद्धन सर्वं पुत्रादीना कथं भवेत् ।
वर्तनं कि नु भविता जीविष्यन्ति च ते कथम् ॥
मम दु ख बहुतरं किं न यास्ये परा गतिम् ।
हा तात अम्ब कान्तेति रुदञ्जन्तुर्विमोहित ॥
मोहात्प्रजल्पति पुन. काले तु समुपस्थिते ।
उपार्जित धनं सर्वमानयस्वेति संप्रति ॥
आस्ये चार्धं करे चार्धं भुञ्जन्मध्ये च पुत्रक ।
पूरयस्व च पाहीति लुठन्नास्ते विमोहित· ॥
एव क्लेशं बहुतर निन्दन्कुर्वन्परस्य च ।
क्षुत्तृड्भ्यां पीडितो नित्यं वदते च पुन· पुनः ॥
देहि मे चोदकं शीतं गाढतापान्मृतोऽस्म्यहम् ।
हा हेति पर्यटन्मूर्छन्घर्घरायति धर्मज ॥
ततो बन्धुजना सर्वे निराहारातिदु खिता· ।
किमर्थं जल्पसे पापिन्नोचितं शीतलं जलम् ।
मृतवत्तिष्ठ तिष्ठेति तदा वाचा दहन्ति च ॥
इत्येवं प्रलपञ्जन्तुर्विवश कर्मसंक्षयात् ।
निश्चैतन्यो भवेच्छीघ्र बान्धवै परिवेष्टित ॥
ततो यमभटैर्बध्वा भर्त्स्यमानो यमालयम् ।
प्राप्यते घोरमार्गेण वृकराक्षसभक्षित ।
श्वभि काकैर्गृध्रगणै शार्दूलैर्डाकिनीगणै ॥
खड्गसूचीसमायुक्ते तप्तसैकतविस्तृते ।
तप्तपाषाणसंबाधे तप्तकर्दमसंकटे ॥
वह्निवृष्टिसमायुक्ते ह्यस्त्रवृष्टिभिरुत्कटे ।
शिलावृष्टिसमायुक्ते नानाबाधासमन्विते ॥
मार्गे महोपले घोरे कृष्यमाणो ह्यधोमुखः ।
नरकं पूर्ववत्प्राप्य दु खमेव प्रपद्यते ॥
एवं ते मामविज्ञाय मूढा. संसारपाशगा ।
पुनः पुनश्च गच्छन्ति जायन्ते च पुन पुनः ॥
संसारपाशविच्छेदकारणं मां भजन्ति ये ।
ते यान्ति परमं स्थानं पुनरावृत्तिवर्जितम् ॥
तस्मात्संसारतापार्तो ह्यभ्यसेद्योगमुत्तमम् ।

न्कुर्वन्सबालश्च (for [a]). —(L 3059) G(ed.) मठे वै वसति क्षणम् (for [b]) —(L. 3063) D1 कार्पण्याद् (for कृष्यशाद्). —(L 3066) G(ed.) तद्धन च हृत यदि (for [b]) —(L. 3868) M1 अध शिराश् (for आस्यं शिरश्) —(L 3069) D1 लुठन्भृशम् ; G2 लुठन्पतन् (for पतन्भृशम्) —(L. 3072) D1 भ्रमामि (for भवामि). —(L 3074) D1 विभवेन समन्विता· (for [b]) —(L 3075) G1 G(ed.) दैवम् (for देव). — (L. 3076) D1 तदेव कथितं कर्म (for [a]). —(L. 3080) G(ed) सुवृत्तिश् (for वर्तन). —(L 3083) D1 अपि मित्रसुहृद्भार्या (for [a]) —(L 3086) D1 G(ed.) आध्यात्मिकादिदु खानि (for [a]) D1 बाध्यमानश्च सर्वत (for [b]) —(L 3091) G(ed) त्व वृद्धकुणपो यथा (for [b]). — G2 om lines 3099-3100 —(L 3102) G2 श्रुत्वा कष्टतर वाक्यं (for [a]) G(ed) वक्ति वै (for वदते) —(L. 3119) D1 निन्दाक्लेश परस्य ह (for [b]).—(L 3120) D1 क्षुत्तुष्णा- (for क्षुत्तृड्भ्यां) —(L. 3131) G2 अतिघोर- (for खड्गसूची-).

योगाज्ज्ञानं भवेत्सम्यग्ज्ञानान्मोक्षमवाप्यते ॥
ज्ञानशून्या नरा ये तु पशवः परिकीर्तिताः ।
तस्मात्संसारमोक्षाय परं ज्ञानं समभ्यसेत् ॥
मानुष्यं जन्म संप्राप्य सर्वधर्मप्रसाधकम् ।
ज्ञानं नैवाभ्यसेद्यस्तु कोऽन्यस्तस्मादचेतन ॥
अनेककोटिजन्मानि भ्रान्तस्य मनुजेश्वर ।
मानुष्यं प्राप्यते दैवाद्भुक्तिमुक्तिप्रदायकम् ॥
मानुष्ये मरणं प्राहुस्तत्तु मिथ्या हि बान्धवाः ।
ज्ञानाद्वा मयि भक्त्या वा ह्यमृतत्वं स गच्छति ॥
सत्सङ्गेन विशुद्धात्मा याति ब्रह्म सनातनम् ।
न तस्य पुनरावृत्तिर्मम लोकात्कदाचन ॥
तस्मात्त्वमपि राजेन्द्र भज मां मुक्तिदं शुभम् ।
अस्ति चेत्तव संसाराद्भीतिर्जन्मान्तरप्रदा ।
भज मां देवदेवेशं सर्वधातारमच्युतम् ॥
ये भजन्ति च मां नित्यं सर्वसंसारभेषजम् ।
तेषामेवाचिरान्मुक्तिर्जायते धर्मनन्दन ॥

वैशंपायन उवाच ।

एवं प्रबोधितस्तेन कृष्णेन ब्रह्मरूपिणा ।
प्रहृष्टात्मा तदा पार्थो नमस्कृत्येदमब्रवीत् ॥
कृतार्थोऽस्मि महाभाग जगन्नाथ कृपाकर ।
भवता पालितोऽहं वै धर्मशास्त्रोपदेशतः ॥
कृपया तव देवेश संस्थानं प्राप्य शाश्वतम् ।
त्वयोक्तान्सकलान्धर्मान्करिष्ये वचनात्तव ॥
तावत्कालमिमं देहं मनुजान्पाहि धर्मतः ।
गुणदोषं यदास्मासु तत्सर्वं त्वयि वर्तते ॥
ते वयं न विजानीम पुण्यदोषफलं प्रभो ।
त्वत्पादाम्बुजभक्तानां रक्षिता त्वं विशेषतः ॥
त्वत्पादमूलं तु वयं हि सर्वे
गताः स लोकेश कविः कवीनाम् ।
ईशो विरिञ्चश्च हरिस्त्वमेव
यज्ञेश्वरो यज्ञभुजां प्रधानः ॥
पतिं पतीनां पतिदेवतानां
गतिं गुरूणां गुरुमप्रमेयम् ।
नमामि नित्यं बहुरूपमीशं
तथा वधूनां वरदं यदूनाम् ॥
भक्तानिमान्संप्रति देवराज
त्वत्पादमूलं सततं प्रपन्नान् ।
पातुं समर्थोऽसि सहस्रनेत्र
पुनश्च भूयोऽपि नमो नमस्ते ॥
किं नु व्रतं करिष्यामि किं नु तीर्थनिषेवणम् ।
इदानीमुचितं ब्रूहि नित्यं वै लोकनायक ॥
क्षेत्राणामुत्तमं क्षेत्रं तीर्थानां च तथोत्तरम् ।
किं वासुदेव लोकेश कृपया वद सुव्रत ॥

वैशंपायन उवाच ।

इत्युक्तो वै जगन्नाथो धर्मपुत्रेण धीमता ।
विचार्य मनसा राजन्नगौ भागीरथीं प्रति ॥

सूत उवाच ।

यः पठेदिममध्यायं नूनं वैराग्यकारणम् ।
जनने मरणे चैव तस्य नास्ति महद्भयम् ॥
शृणुयाद्य इमं नित्यमर्थतो मुनिसत्तमः ।
अचिरात्तस्य वैराग्यं जायते भक्तिरेव च ॥

Colophon

श्रीभगवानुवाच ।

तीर्थानामुत्तम तीर्थं क्षेत्राणां च तथोत्तमम् ।
गङ्गायमुनयोर्योगं वदन्ति परमर्षयः ॥
सितासितोदकं तीर्थं ब्रह्माद्याः सर्वदेवताः ।
मुनयो मानवाश्चैव सेवन्ते पुण्यकाङ्क्षिण ॥
गङ्गा पुण्यनदी ज्ञेया त्रैविक्रमपदोद्भवा ।
पापहा यमुना प्रोक्ता तयोर्योगमनुत्तमम् ॥
स्मृतार्तिनाशिनी गङ्गा नदीनां प्रवरा शुभा ।
सर्वपापक्षयकरी सर्वोपद्रवनाशिनी ॥
यानि क्षेत्राणि पुण्यानि समुद्रान्ते महीतले ।
तेषां पुण्यतमं ज्ञेयं प्रयागाख्यं महीतले ॥

— D_1 G_2 om. line 3134 — (L 3145) D_1 -काम- (for -धर्म-). G_1 M_1 सर्वकर्मप्रणाशनम् (for ᵇ). — After line 3146, M_2 ins :

145** न तस्य पुनरावृत्तिर्मम लोकात्कदाचन ।
तस्मात्त्वमपि राजेन्द्र भज मा मुक्तिद शुभम् ॥

— (L 3147) G(ed) गच्छता (for भ्रान्तस्य) — (L. 3149) M_1 तर्तुं मिथ्या हि पाण्डव , G(ed.) तर्तुं विद्यां हि साधनम् (for ᵇ) — G_2 om lines 3150–3153 — (L 3157) D_1 मदर्चनात् (for एवाचिरान्) — Before line 3160, G(ed) ins युधिष्ठिर. . — (L 3173) G_1 गुरुरप्रमेय G_2 गणयेऽप्रमेयम् , M_1 गतिमप्र° (for गुरु°) — (L 3178) G_2 वक्तु (for पातु) — G(ed) om lines 3180–3181. — (L 3182) D_1 निषेवणम् ; G_1 M_1 तथोत्तमम् (for °त्तरम्). G(ed) तीर्थानामुत्तम तथा (for ᵇ) — D_1 G_1 M_1 om. the ref. G(ed.) वैशपायन (for सूत) — (L. 3189) M_1 G(ed.) जायते मुक्तिमेव स (M_1 °मेष्यति (for ᵇ).

Colophon — *Sub-parvan* . D_1 आश्चर्यपर्वणि शेषधर्माः ; G_1 M_1 आश्चर्यपर्वणि हरिवंशे उपरिभागः , G_2 शेषधर्मा , G(ed.) शेषधर्मे उपरिभाग — *Adhy name* : D_1 अवस्थात्रयवर्णने धर्मोपदेश ; M_1 नरकधर्मा ; G(ed) नरकधर्मादिवर्णनम्. — *Adhy no* . D_1 G_1 2 M_1 G(ed) 24.

— (L 3191) D_1 प्रवदन्ति मनीषिण (for ᵇ). — (L. 3192) M_1 ब्राह्मणा (for ब्रह्माद्याः). — (L. 3193) G(ed.) ऋषयो (for मुनयो) — (L. 3195) G(ed.) तयोर्योगस्त्वनुत्तमः (for ᵇ) — (L 3198) D_1 G(ed.) महीपते (for °तले). — (L. 3200) D_1 योजनाना शतैरपि , G_2 °नानां विदूरतः (for

गङ्गे गङ्गेति यो ब्रूयाद्योजनायुतदूरतः ।
मुच्यते सर्वपापेभ्यो गङ्गास्नानफलं लभेत् ॥
मम पादोद्भवा देवी विश्वेश्वरसमीपगा ।
संसेव्या सर्वदा देवैः संसारच्छेदलिप्सुभिः ॥
तत्सैकतं ललाटे तु ध्रियते येन पाण्डव ।
तत्रैव नेत्रं शिरसि विधोरर्धं च धारयेत् ॥
यन्मज्जनं महापुण्यं दुर्लभं ह्यकृतात्मनाम् ।
साधूनां सुलभा गङ्गा प्रीता मोक्षप्रदायिनी ॥
यत्र स्नाताः पापिनोऽपि पितृमातृकुलानि च ।
सहस्राणि समुद्धृत्य प्रयान्ति मम मन्दिरम् ॥
स स्नातः सर्वतीर्थेषु गङ्गां स्मरति यः सदा ।
पुण्यक्षेत्रेषु सर्वेषु स्थितवान्नात्र संशयः ।
योजनत्रितयं गत्वा गङ्गायामिति गच्छति ॥
यत्र स्नातं नरं दृष्ट्वा नराः पापवृता अपि ।
मुच्यन्ते सर्वपापेभ्यो नात्र कार्या विचारणा ॥
यदम्भःस्पर्शमात्रेण सर्वपापविमोचितः ।
यन्मृदं मस्तके धृत्वा देवेशो भवति ध्रुवम् ॥
देहेऽनुलेपनं कृत्वा देहबन्धो न जायते ॥
कदा यास्याम्यहं गङ्गां कदा यास्यामि तामहम् ।
अनुतप्यति यो नित्यं स विष्णुर्नात्र संशयः ॥
योजनत्रितयं यस्तु गङ्गायामिति गच्छति ।
सर्वपापविनिर्मुक्तो गङ्गास्नानफलं भवेत् ॥
सेयं गङ्गा महापुण्या नदीरन्याः प्रविश्य वै ।
मेषादिषु च मासेषु पावयत्यखिलं जगत् ॥
गोदावरी भीमरथी कृष्णा रेवा सरस्वती ।
तुङ्गभद्रा च कावेरी कालिन्दी सरयूर्नृप ॥
वेत्रावती ताम्रपर्णी शतद्रुश्च महानदी ।
एवमादिषु सर्वासु नदीषु सततं स्थिता ॥
या पुण्यतिथयः प्रोक्ताः शास्त्रेषु मुनिपुंगवैः ।
तासु सर्वजलस्था सा पावयत्यखिलं जगत् ॥
मकरस्थे रवौ गङ्गा जलमात्रे व्यवस्थिता ।
पुनाति स्नानपानाद्यैः पावयत्यखिलं जगत् ॥
गङ्गायाः सदृशो नास्ति पापारण्यदवानलः ।
भवव्याधिहरा गङ्गा तस्मात्सेव्या प्रयत्नतः ॥
गङ्गाजलकणेनापि यः सिक्तो मनुजेश्वर ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ।
आकल्पजन्मभिः पापं संचितं यन्नरैर्नृप ।
तत्सर्वं लयमायाति प्रयागे माघमज्जनात् ॥
ब्रह्मादयः सुराः सर्वे रुद्रादित्या मरुद्गणाः ।
गन्धर्वा लोकपालाश्च यक्षगुह्यककिंनराः ॥
ब्राह्मी माहेश्वरी लक्ष्मी शुचिर्मेनादितिर्दितिः ।
घृताची मेनका रम्भा ह्युर्वशी च तिलोत्तमा ॥
सर्वास्ता देवपत्न्यश्च देवाः सर्वे युधिष्ठिर ।
माघमासे च संक्रान्त्यां चन्द्रसूर्यग्रहे नृप ।
व्यतीपाते पुण्यदिने स्नातुमायान्ति देवताः ॥
अश्वमेधसहस्रेण वाजपेयायुतेन च ।
यत्फलं प्राप्यते सद्भिर्गङ्गायां तद्दिने दिने ॥
किमत्र बहुनोक्तेन गङ्गायाः सदृशं भुवि ।
नास्ति नास्ति नृपश्रेष्ठ तस्मात्सेव्या प्रयत्नतः ॥
सर्वकामप्रदा देवी सर्वोपद्रवनाशिनी ।
गङ्गा सेव्या प्रयत्नेन ह्यक्षयं भोगमिच्छता ॥

युधिष्ठिर उवाच ।

गङ्गां गन्तुमशक्तानां का गतिः पुरुषोत्तम ।
तीर्थं किं पुण्डरीकाक्ष पवित्रं पापनाशनम् ॥
लोकं पुनाति किं नाथ पूज्यं किं पुण्यकर्मणाम् ।
एतन्मे ब्रूहि लोकेश त्वदन्यः को वदेन्मुने ॥

भगवानुवाच ।

हन्त ते कथयिष्यामि पवित्रं पापनाशनम् ।
सालग्रामशिलार्तार्थमशक्तानां परं नृप ॥
सालग्रामार्चनाद्राजन्मानवा गतकिल्बिषाः ।
प्रयान्ति मम लोकं वै दीप्यमाना दिशो दश ॥
महद्विमानमारुढा गन्धर्वैरुपसेविताः ।
मम लोकं प्रयान्त्येव विश्वासं कुरु पाण्डव ॥
मुमुक्षुभिरहं पार्थ पूज्य एव हि सर्वदा ।
सालग्रामशिलाचक्रे वज्रकीटविनिर्मिते ॥
यः पूजयति मां चक्रे सालग्रामे नृपोत्तम ।
राजसूयसहस्रेण तेनेष्टं प्रतिवत्सरम् ॥
अपि पापसमायुक्ता धर्मकार्यविदूषकाः ।
सालग्रामार्चनात्पार्थ नैव यान्ति यमक्षयम् ॥
साळग्रामे यथा प्रीतिस्तथा लक्ष्म्यां न विद्यते ।

---

^{b}). — (L. 3211) D1 तीर्थेषु (for सर्वेषु). — D1 G1 M1 G(ed.) om. line 3212 — (L. 3215) G1. 2 M1 G(ed) यदङ्ग- (for यदम्भ-). — (L 3218) G1 2 M1 G(ed.) द्रक्ष्यामि (for यास्यामि). — (L 3219) D1 विष्णुलोके महीयते (for ^{b}). — G1 om. line 3220 — (L. 3224) G2 G(ed) भीमनदी (for °रथी). — (L 3227) G2 पुण्यासु (for सर्वासु). — D1 om. (hapl.) lines 3228–3230. — (L 3229) G(ed) -जलस्नानात् (for °स्था सा) — (L 3233) G1 G(ed) ध्येया (for सेव्या) — (L 3238) M1 रुद्रादित्यमरुद्गणैः (for ^{b}). — (L 3240) G2 मेना दनुर् (for मेनादितिर्). — G2 om. lines 3244–3246. — (L. 3248) D1 क्षेत्र (for नास्ति) — (L 3250) G2 सर्वथा मनुजै शुभै (for ^{b}) — (L. 3251) G2 गङ्गाया तु च सिक्ताना (for ^{a}) — (L 3254) G2 त्वद्भक्तस्य महामते (for ^{b}). — G1 कृष्ण (for भगवान्). — (L. 3255) G2 शृणु त्व , M1 अह ते (for हन्त ते). — (L 3256) D1 भवेन्नृप , G1 G(ed) परतप (for परं नृप). G2 भक्ताना परम नृप (for ^{b}) — G2 om. lines 3257–3260 — (L 3257) D1 M1 शालग्रामार्चका राजन् (for ^{a}). — After line 3264, G2 ins

146** पूजयेन्मा च विश्वेश विश्वासं कुरु पाण्डव ।

— G2 om. lines 3264–3266. — (L 3264) D1 M1 -वास-

तथा मम पुरे पार्थ सनकादिनिषेविते ॥
सागरान्तामिमां पृथ्वीं दत्त्वा विप्राय यत्फलम् ।
तत्फल ममवाप्नोति सालग्रामशिलार्चनात् ॥
सालग्रामशिलापङ्क्तिं द्विपङ्क्तिमथ वापि वा ।
पूजयेत्परया भक्त्या तस्य पुण्यं वदामि ते ॥
गङ्गातीरेऽश्वमेधाना सहस्राणा फलं भवेत् ।
यो नित्यं पूजयेद्भक्त्या सालग्रामशिलां नृप ।
मम लोके चिरं स्थित्वा चक्रवर्तीह जायते ॥
स स्नात सर्वतीर्थेषु सर्वयज्ञेषु दीक्षित ।
सालग्रामशिलातोयैर्योऽभिषेकं करोति च ॥
गङ्गा गोदावरी रेवा नद्यो मुक्तिप्रदास्तु या ।
निवसन्ति सदा तीर्थे सालग्रामशिलोद्भवे ॥
सालग्रामशिलाग्रे तु यः श्राद्धं कुरुते नृप ।
पितरस्तस्य तुष्यन्ति यावदाचन्द्रतारकम् ॥
ये पिबन्ति नरा नित्यं सालग्रामशिलाजलम् ।
ज्ञानाज्ञानकृतै पापैर्मुच्यन्ते नात्र संशय ॥
सालग्रामशिलाचक्रं यस्य तिष्ठन्ति मन्दिरे ।
तन्मन्दिरगता· सर्वे न पश्यन्ति यमालयम् ॥
सालग्रामशिलातोयं य पिबेद्बिन्दुमात्रकम् ।
सोऽपि दोषैर्न लिप्येत नरकेषु न मज्जति ॥
सालग्रामशिलाग्रे तु यो वा को वापि भूतले ।
मृतिं याति स धर्मात्मा सर्वलोकाधिपो भवेत् ॥
अहं पशुपतिश्चैव विश्वसृट् सकलामराः ।
सालग्रामशिलाचक्रे निवसाम यथासुखम् ॥
तत्तीर्थे ये नरा राजन्पिबन्त्यनुदिनं सुखम् ।
सालोक्यं देवताना तु लभन्ते नात्र संशयः ॥
सर्वतीर्थमयी राजन्सर्वदेवमयी ननु ।
सर्वधर्ममयं सारं सालग्रामशिलामला ॥
दर्शनात्स्पर्शनाद्भूणा पूजनाद्वन्दनादिभिः ।
सालग्रामशिला राजन्सर्वपापहरा शुभा ॥
पुरुषसूक्तेन मन्त्रेण यः स्नापयति नित्यश· ।
सालग्रामशिलां भूप स गच्छेद्ब्रह्मण पदम् ॥
पुरुषसूक्तविधानेन द्वारवत्या शिलायुताम् ।
तुलसीशङ्खपयसा पूजको मामुपैति हि ॥
षड्भि षड्भिश्चतुर्भिश्च चतुर्विंशतिवर्णया ।
द्विर्द्वयोर्द्विर्द्वितीया च सालग्रामप्रपूजका ॥
पातकैर्बहुभिः क्रूरैर्जन्मान्तरकृतैरपि ।
मुक्ता मम पदं यान्ति पुनरावृत्तिवर्जितम् ॥
किमत्र बहुनोक्तेन सालग्रामशिलार्चनम् ।
सदा कुरुष्व हे पार्थ सर्वतीर्थफल भवेत् ॥
गन्धर्वप्रमुखा देवा दिक्पालाश्चाप्सरोगणाः ।
वाञ्छन्ति पूजां सततं सालग्रामे भुव स्थले ॥

युधिष्ठिर उवाच ।

सालग्रामस्य गङ्गायास्तीर्थं तीर्थनिषेवितम् ।
फलमुक्तं विशेषेण श्रुत्वाहं पावनीकृत· ॥
त्वत्तोऽहं श्रोतुमिच्छामि भूय कमललोचन ।
तीर्थयोरुभयोस्तुल्यं व्रतं यत्तद्वदस्व मे ॥

श्रीभगवानुवाच ।

साधु पार्थ महाप्राज्ञ प्रसिद्धोऽसि जगत्त्रये ।
यस्माद्धर्मे सदा भक्तिर्महतामपि दुर्लभा ॥
त्रैकालिकज्ञानविदो मुनय· पूर्णदर्शनाः ।
एकादशीं प्रशंसन्ति व्रतानामुत्तमां शुभाम् ॥
एकादशीव्रतं पार्थ सर्वेषां पापनाशनम् ।
सर्वकामप्रद नृणां सर्वोपद्रवनाशनम् ॥
ब्रह्मक्षत्रविशां चैव शूद्राणां चैव योषिताम् ।
मोक्षद कुर्वतां भक्त्या मम प्रियकरं प्रभो ॥
एकादश्या न भुञ्जीत पक्षयोरुभयोरपि ।
यदि भुङ्क्ते स पापी स्याद्रौरवं नरकं व्रजेत् ॥
उपवासफलं लिप्सुर्जह्याद्भुक्तिचतुष्टयम् ।
पूर्वापरदिने रात्रावहोरात्रे तु मध्यमे ॥

रम् (for वत्स°) —(L. 3266) D_1 M_1 यमालयम् (for यमक्ष°) —(L 3267) G_2 स्थिता (for तथा). — After line 3267, G_2 ins

147** सालग्रामशिला यत्र य श्राद्ध कुरुते नर ।

— G_2 om lines 3268–3279. — After line 3273, D_1 G_1 ins. .

148** मातृत· पितृतश्चैव कुलकोटीशतान्वित ।
प्रियाया शतकोट्या च मम लोकं स गच्छति ॥

— D_1 om. lines 3280–3282 G_2 om lines 3282–3290 —(L. 3288) D_1 M_1 भूपते (for भूतले) —(L. 3291) G_1 G(ed) निवमामो ; G_2 °मि (for °म) —(L 3295) M_1 सर्वधर्ममयी सारा (for [a]) D_1 ·शिलार्चनम्, G_2 °जलम् (for °मला) —(L 3296) D_1 स्तवनान् (for स्पर्श°) G_2 मुक्तिद सर्वदेहिनाम् (for [b]).— G_2 om. lines 3297–3305 — After line 3299, G_2 ins .

149** सालग्राम तु यो राजंस्तुलसीदलपूजनात् ।
मामुपैति नरश्रेष्ठ सत्य सत्य वदाम्यहम् ॥

—(L 3302) D_1 G_1 M_1 षड्द्विषड्द्वि- (for षड्भि· षड्भिश्). —(L. 3303) D_1 G_1 विद्यया हि तृतीया हि , M_1 विद्यया द्वितृतीयाभि (for [a]) —(L 3308) D_1 अप्सरसां (for चाप्सरो-) G_2 सकिंनरमहोरगा (for [b]). —(L. 3309) G_2 G(ed.) राजेन्द्र (for सतत) D_1 शालग्रामस्य वै नृप (for [b]).—After line 3309, G_2 ins. ·

150** युधिष्ठिर· ।
सालग्रामशिलायास्तु गङ्गायास्तु महातले ।

— G_2 om. lines 3310–3312 —(L 3310) M_1 तीर्थानां तु विशेषित (for [b]). —(L. 3311) G(ed) श्रुत्वाह पापवर्जित· (for [b]). —(L 3314) G(ed) साधु (for पार्थ) —(L. 3316) D_1 मुनयः पुण्यकर्मिण (for [b]) —(L 3317) D_1 तिथीनामुत्तमा तिथिः (for [b]). —(L. 3320) M_1 ब्राह्मणानां

एकादश्यां दिने यस्तु भोक्तुमिच्छति सुव्रत ।
स भोक्तुं सर्वपापानि स्पृहयालुर्न संशय ॥
यानि कानि च पापानि ब्रह्महत्यादिकानि च ॥
अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकै. ।
एकादश्यां निराहारः स्थित्वा याति परां गतिम् ॥
एकादशी महापुण्या मम प्रियकरा तिथि· ।
संसेव्या सर्वदा विप्रैः संसारच्छेदलिप्सुभि· ॥
स्वर्गमोक्षप्रदा ह्येषा सर्वपापप्रणाशिनी ।
सर्वसंपत्करी ह्येषा सुकलत्रप्रदायिनी ।
सुपुत्रदायिनी ह्येषा सर्वविद्याप्रदायिनी ॥
बाल्ये वयसि वार्धक्ये यौवने वा नरेश्वर ।
उपोष्यैकादशीं भक्त्या गमिष्यन्ति दिवं हि ते ॥
किमत्र बहुनोक्तेन मोक्षदं पाण्डुनन्दन ।
तस्मात्त्वं सर्वकालेषु ह्येकादश्यां व्रतं कुरु ॥
इति ते कथितं सर्वं पुण्यमेकादशीव्रतम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुक्तोऽनन्तं समुश्नुते ॥

Colophon

सूत उवाच ।

एवं वदति विप्रेन्द्रा धर्मं कृष्णे जनार्दने ।
आज्ञप्तो बलदेवेन दूतोऽभ्येत्य वचोऽब्रवीत् ॥
नमस्ते सर्वलोकेश वासुदेव जगत्पते ।
शत्रुभि पीडितान्बन्धून्स्वकीयान्पाहि सुव्रत ॥
द्वारवत्युपकण्ठं तु निरुद्धं पौण्ड्रकेण ते ॥
बलेन महता देव सप्तलक्षशतेन हि ।
अहं योद्धाथ वा त्वं वा किं करोमि च तद्वद ॥
सन्मुखेन भवानित्थमुक्तस्त्वं सीरपाणिना ।
न शक्यमत्र वस्तुं मे यास्यामि भवदाज्ञया ।
ज्ञातुं तत्रोचितं कार्यं तद्भवान्गन्तुमर्हति ॥
एवमुक्तो जगन्नाथ. प्रहृष्ट सर्ववेदिता ।
दूतेन तं सहस्वेति गाङ्गेयं प्रत्युवाच ह ॥
देवव्रत महाभाग श्रूयतां वचनं मम ।
पाण्डूनां त्वं हितार्थाय शेषधर्मं वद प्रभो ॥
त्वया नाविदितं किंचिन्नारदादखिलं श्रुतम् ।
नारदाय मया पूर्वमिमं धर्मं सुविस्तरम् ॥
प्रोक्तं सुरनदीतीरे तस्मादेतत्त्वया श्रुतम् ।
तत्सर्वं वद तत्त्वेन पाण्डवेभ्यो बहुश्रुतम् ॥
धर्मेण रक्ष तान्सर्वानिमास्त्वं सततं प्रियान् ।
तव कीर्तिर्भवेच्छुद्धा लोकेऽस्यापि विसारिणी ।
अस्य शेष भवान्वेत्ति पाण्डुपुत्रान्प्रबोधय ॥
इत्युक्तो वै जगन्नाथो देवदेवो यदूत्तमः ।

(for अन्नक्षत्र-) —(L 3321) G_2 मोक्षदं सर्वदाभ्यर्च्य (for ^{a}) — G_2 om 3324-3325 — (L 3328) G_1 M_1 ब्रह्महत्यासमानि च (for ^{b}). — After line 3333, D_1 ins

151** आशौचादौ यथा श्राद्धमाशौचान्त विधीयते ।
तथैवैकादशीश्राद्ध द्वादश्यामेव कारयेत् ॥
अस्तास्तमिते सूर्ये यथा श्राद्धं परेऽहनि ।
तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत ॥
एकादश्यां न होतव्य तिथित्रयफलेप्सुभि· ।
जुहुयाद्यदि मूढात्मा स गोवधफल लभेत् ॥
कर्मलोपभयाद्यस्तु व्रतभङ्ग करोति य· ।
सोभयव्रतभङ्ग हि प्राप्नोत्येव न संशय ॥
श्रुतो हि राजधर्मश्च तिथित्रयफलेप्सुभि· ।
व्रतलोपभयाद्वापि कार्यं तत्फलदायकम् ॥
प्रायश्चित्तादिकं कर्म तथा मत्स्मरणं विभो ।
तेनैव सकल पापं विनश्यति न संशयः ।
तस्मात्तिथित्रय युक्ता कार्यैवैकादशी तिथि ॥

—(L 3334) G(ed) सर्वसपत्करी ह्येषा (for ^{b}). —(L. 3335) G(ed.) सर्वमोक्षप्रदा ह्येषा (for ^{a}) G_1 सर्वपापप्रकाशिनी ; G(ed.) पुत्रपौत्रप्रदायिनी (for ^{b}). — D_1 om line 3336 — (L. 3336) G(ed) कलत्र- (for सुपुत्र-) —(L 3337) D_1 यौवने च नृपोत्तम (for ^{a}). — For line 3337, G(ed) sust ;

152** बाल्ययौवनकौमारवार्धकेषु नरेश्वर ।

— After line 3340, G_2 ins. .

153** सर्वकामप्रदा ह्येषा मोक्षदा मुक्तिदा विभो ।

— After line 3341, D_1 G_2 ins

154** श्रोतॄणा सर्वपापघ्न चक्रिणां च तथा विभो ।

— (L 3342) G_2 मुक्ता नाकं व्रजन्ति हि (for ^{b}). — For line 3342, G(ed) subst

155** शृणोति य स पापेभ्यो मुक्त सन्नाकमश्नुते ॥

COLOPHON — *Sub-parvan* D_1 G_1 M_1 आश्चर्यपर्वणि शेषधर्मा , G_2 G(ed) शेषधर्मा — *Adhy name* · D_1 तीर्थानामेकादशीवर्णनम् , G(ed) भागीरथ्यादिमाहिमावर्णनम् .— *Adhy. no* D_1 G_1 2 M_1 G(ed) 25

— After the above, G(ed) reads lines 6550–6646. (L 3345) D_1 नमोऽस्तु ते (for जगत्पते). — (L 3347) D_1 पौण्ड्रकै सह , G(ed) °कादिना (for °केण ते). —(L. 3350) G_2 श्रीकृष्ण सन्मुखेनोक्तं , G(ed.) संमुखे भगवन्निस्थ (for ^{a}) — G_2 om. lines 3352–3355 —(L. 3352) M_1 वक्तुम् (for गन्तुम्). — Before line 3355, M_1 ins. श्रीभगवान् · —(L 3355) D_1 महाप्राज्ञ (for °भाग) — (L 3356) G(ed.) पाण्डवाना (for पाण्डूना त्व). — (L 3358) G(ed.) अयं धर्मं (for इम धर्मं) — (L. 3359) G(ed) प्रोक्त (for प्रोक्त). G(ed) तस्मादेव त्वया श्रुत· (for ^{b}) — (L 3361) G(ed.) धर्मे च निरतान्सर्वान् (for ^{a}) G(ed) विद्धि ते (for सतत) —(L 3362) G(ed) भीष्म (for ऽस्यापि) — Before line 3364, D_1 ins. सूत उवाच —(L 3365) G(ed) स्मित- (for मित-) — Before line 3366, D_1 ins, श्रीभग-

प्राह धर्मसुतं धीमान्सस्मितं मितभाषिणम् ॥
शृणु पार्थ महाभाग गाङ्गेयोऽयमरिंदम ।
यद्ब्रवीति च तत्सर्वं तस्मिन्वर्तय मा शुच ॥
भीष्मस्य चरितं वेद्मि भक्तो नान्योऽस्ति कश्चन ।
स एवाहं मनस्तापं मुञ्च सत्यव्रतो भव ॥
धैर्यं विपदि कर्तव्यमुदये च क्षमा विभो ।
विक्रमो युधि वै श्रेयान्व्यसनं च सदा श्रुतौ ॥
तस्माद्धर्मे मतिं कृत्वा परं श्रेयो गमिष्यसि ।
वर्तन्तां भ्रातरः सर्वे तवाज्ञां शिरसा ध्रुवम् ॥
राज्यं कुरूणां सततं सदा सत्यरतस्य ते ।
भवितव्यं चिरं भोक्तुं विशालं जितकण्टकम् ॥
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो मनुष्याणां रक्षिता शिक्षिता सखा ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥
अदृश्यो धर्मरूपेण पालयामि च धर्मिणम् ।
नाशं करोमि पापानां कर्तारं धर्मनन्दन ॥
कृष्णस्य वचनं श्रुत्वा पार्थानामग्रजो विभुः ।
आलिङ्ग्यालिङ्ग्य च पुनर्नत्वा हृदि पुनर्जगौ ॥
देवदेवारविन्दाक्ष शत्रूणामन्तकोपम ।
पाहि पाहि जगन्नाथ भक्तानस्मांस्त्वदाश्रयान् ॥
तत्र चात्र तवानन्त नास्ति भेदो हि सर्वग ।
वक्तव्यं नास्ति मेऽनन्त सर्वावस्थासु पालय ॥

सूत उवाच ।

तथा करोमीत्युक्त्वाथ फल्गुनं मरुतात्मजम् ।
आश्वास्य च यमौ धीमान्प्रतस्थे द्वारकां प्रति ॥
ब्राह्मणेभ्यो नमस्कृत्य ऋषिभ्यो वेदवादिनाम् ।
भीष्माय कुरुवृद्धाय ययौ द्वारवतीं प्रति ॥
मुमुहुः पाण्डवाः सर्वे विरहाच्छार्ङ्गधन्विन ।
निश्चेष्टाः सर्व एवैते निधिभ्रष्टा यथा नराः ॥
क्व पश्यामः क्व यास्यामः कृष्णं कमललोचनम् ।
इति जल्पन्ति ते सर्वे विसृष्टाः प्राणवल्लभाः ॥
आनन्दं परमं जग्मुर्यथा बहिस्तथा हृदि ।
दृष्ट्वा हरिं ब्रह्मविदो दीक्षिताः पाण्डुनन्दनाः ॥
पशवः पक्षिणश्चैव मृगाद्या ब्राह्मणोत्तमाः ।
अन्धा इव च दृश्यन्ते पतिहीना यथा स्त्रियः ॥
नृपहीनो यथा देशस्तोयहीना यथा सरित् ।
मित्रहीना यथा लोका मातृहीनो यथा शिशुः ॥
विद्याहीनो यथा विप्रो धर्महीनं यथा धनम् ।
अभ्राजमानाः सर्वे ते पाण्डवाश्च द्विजोत्तमाः ॥
दुःखिताः किमिदं चेति स्वप्नं दृष्ट्वेव विस्मिताः ।
गाथा मिथः प्रकुर्वाणास्तत्र तत्र च संस्थिताः ॥
तस्मिन्नवसरे देवैरम्बरं समुपागतैः ।
मुक्ता पुष्पमयी वृष्टिः पपात नृपमूर्धनि ।
यादवेन्द्रस्य सेनासु द्वारवत्यां तु सर्वतः ॥
ततो ध्यात्वा हृषीकेशं प्रत्यग्रजलदच्छविम् ।
नदीसुतं नमस्कृत्य धर्मसूनुरुवाच ह ॥
गाङ्गेय योगिनां श्रेष्ठ कृष्णभक्त महामते ।
त्वया वै दर्शनं लब्धमस्माकं जगतीपतेः ।
अन्यथा दर्शनं तस्य लभ्यते मादृशः कथम् ॥
अपालयद्यथा धर्मैरस्मान्वै यदुपुंगवः ।
तथैव धर्मश्रवणात्पाहि भागीरथीसुत ॥

भीष्म उवाच ।

यादवेन्द्रो महायोगी योगेशः सर्वगः प्रभुः ।
तं ध्यात्वा सर्वकालेषु पापात्मापि विमुच्यते ॥
स्रष्टा पालयिता हन्ता जगन्मूर्तिरमूर्तिमान् ।
सूर्यमण्डलमध्यस्थः कर्मसाक्षी जगद्गुरुः ॥
इन्द्रो वसुश्च रुद्रश्च मारुतो लोकपावनः ।
एतान्कृष्णमयान्विद्धि कर्मकर्तॄन्महामते ॥

युधिष्ठिर उवाच ।

कृष्णदेहांशभागेषु जज्ञिरे ये नरोत्तमाः ।
ऋषिदेवगणान्राज्ञो वद संप्रति मेऽनघ ॥

भीष्म उवाच ।

कृष्णांशसंभवान्वक्ष्ये पुण्यश्लोकान्नृपोत्तम ।
तेषां तु स्मृतिमात्रेण सर्वपापक्षयो भवेत् ॥

वान्. — (L. 3366) D1 गाङ्गेयोक्तम् (for ऽयम्). — (L. 3369) D1 हि संदेहं (for मनस्ताप). — (L 3371) G1 2 व्यवसायं (G2 °सनं न) तदा श्रुतम्; M1 व्यसनं तु सदा श्रुतम् (for b). — (L. 3373) G(ed) तवाज्ञावशवर्तिनः (for b). — (L 3374) G1 M1 -व्रतस्य (for -रतस्य) — (L 3375) D1 प्राप्त (for भोक्तु). G(ed.) हत- (for जित-). — For line 3376, G2 ins.

156** धर्मो एव रिपून्घ्नन्ति धर्मो रक्षन्ति रक्षितम् ।

— (L. 3381) G(ed) कर्तुर्वै (for कर्तार) G2 कर्तारं स्वेन कर्मणा (for b) — (L. 3383) G(ed) ध्यात्वा (for नत्वा) G1 देव, G2 नत्वा (for हृदि). — Before line 3384, D1 ins. युधिष्ठिरः. — (L 3389) M1 यमौ श्रीमान्, G(ed) यथान्याय (for यमौ धीमान्). — (L. 3390) G(ed.) ऋषिभ्यश्च गदाग्रजः (for b) — M1 om. lines 3396–3397. — (L 3396) G(ed) बाह्य (for बहिस्) G1 यथा बाल्ये तथा धृतिम् (for b). — (L 3398) D1 मृगाद्या ब्रह्मवित्तमा (for b). — (L. 3402) D1 M1 मित्रहीनो यथा लोको (for a) — (L. 3405) G2 M1 संश्रिताः (for संस्थिताः) — (L 3409) D1 नीलमेघच्छविं प्रभुम् (for b) — (L 3416) D1 महाभागो (for °योगी) — (L 3417) G2 G(ed) पापादपि (for °त्मापि). — (L 3420) D1 मरुतो लोकपावना (for b) — G2 om the ref — (L 3422) M1 -देहाङ्ग-, G(ed) -तेजोंश- (for -देहांश-). D1 कृष्णतेजोंशभागेन (for a). — G2 G(ed.) om the ref — (L 3424) G2 पुण्यश्लोका नृपोत्तमा (for b). — (L. 3427) G1 2 G(ed.) आङ्गिरो (for °रा). D1 सुमित्रश् (for सुमतिस्). — D1 om, lines 3431–3434. — (L,

अत्रिर्वसिष्ठोऽथ भृगु पुलस्त्यः पुलह क्रतुः ।
आङ्गिरा गौतमोऽगस्त्यो सुमतिस्त्वायुरात्मवान् ॥
विश्वामित्र स्थूलशिराः संवर्तं प्रमतिर्दम ।
रैभ्यो बृहस्पतिर्व्यासो च्यवन काश्यपो ध्रुवः ॥
दुर्वासा जमदग्निश्च मार्कण्डेयोऽथ गालवः ।
उशनाथ भरद्वाजो यवक्रीतस्त्रितस्तथा ॥
स्थूलाक्षश्च महाकक्ष कण्वो मेधातिथि· कुश ।
नारद पर्वतश्चैव सुशर्मा सोमशर्मवान् ॥
मित्रो भृगु सत्यकीर्ति· शतानन्द· कृतव्रण ॥
जामदग्न्यस्तथा राम सौम्य· संवर्तकस्तथा ।
मन्वादिस्मृतिकर्तारः कृष्णांशान्विद्धि भारत ॥
कृष्णः सर्वगुरु. साक्षाद्भक्ताना हितकृत्प्रिय ।
सर्वग सर्वभूतात्मा सर्वयोगीश्वरो विभु ॥
आदित्यश्चन्द्रमा राजन्नक्षत्राणि च भूतलम् ।
अमृत देवतानां च नराणा च नराधिप ॥
पितृणां च स्वधा सोम पशूनां तृणसंचय· ।
पुरुषाणां बलं रूपं धनं विद्या सुख महत् ॥
स्त्रीणा सौन्दर्यसौभाग्यं पातिव्रत्यं परं स्त्रिय. ।
यतात्मा मुनयो योगी विबुधाश्चाप्सरोगणा ।
इन्द्राद्या लोकपालाश्च कृष्णो हि जगतीपति ॥
यो राजा धर्मवाल्ँलोके याऽचेन्द्र तु विद्धि तम् ॥
पुराणधर्मशास्त्रेषु निष्ठा यस्य प्रवर्तते ।
तं विद्धि भरतश्रेष्ठ वृष्णीनां पतिमव्ययम् ॥
अगोचरोऽव्ययोऽनन्तो महीभर्ता महाद्युतिः ।
तीर्थरूपी शुभाचारस्तथा पुण्यतिथिर्गुरुः ॥
मत्स्यः कूर्मवराहश्च नारसिंहश्च वामन ।
रामो रामश्च कृष्णश्च बौद्ध. कल्की कलात्मक ॥
त्रिविक्रमो नरश्चैव नारायणसुरेश्वरौ ।
कृतत्रेताद्वापराश्च धर्मनाशकर· कलि· ॥
उद्धवो वासुदेवश्च सात्यकि साम्ब एव च ।
अनिरुद्धो गदश्चैव प्रद्युम्नो लोकनायकः ॥
वसुदेवो नन्दगोपो अश्वत्थामा कृपश्च सः ।
द्रोणो भीष्माभिधानोऽहं कर्णशल्यौ महाबलौ ॥
धृष्टद्युम्नः शिखण्डी च द्रौपदी यज्ञसम्भवा ।
भीमार्जुनौ यमौ कुन्ती विराटो विदुरस्तथा ।
त्वं च सर्वे नरेन्द्राश्च कृष्ण एव न संशयः ॥
भूभारहरणार्थाय एतान्सृष्ट्वा स्वमायया ।
वसुदेवकुले जातो लोकानुग्रहकाम्यया ।
हरिष्यति भुवो भारमल्पकाले नृपोत्तम ॥
धार्तराष्ट्रानिमान्सर्वानन्यान्वै पापकर्मिण ।
हरिष्यति नृपानद्य त्वदर्थं पाण्डुनन्दन ॥
महाभारतनाम्ना ते महद्युद्धं भविष्यति ।
राजंस्त्वं राज्यलाभाय कृष्ण पूजय भक्तित· ॥

वैशंपायन उवाच ।

विभूतिं वासुदेवस्य श्रुत्वा प्रीतो महीपति· ।
युद्धेप्सुभिश्च भीमाद्यै सहितो वाक्यमब्रवीत् ॥
किं करिष्यति गाङ्गेय कृष्ण· कपटवेषधृक् ।
पालयिष्यति नो देव संहरिष्यति वा वद ॥
भवान्वेत्ति हि तत्सर्वं तस्य भृत्योऽसि सुव्रत ।
तं ममाचक्ष्व गाङ्गेय पाहि मा शत्रुपीडितम् ।

भीष्म उवाच ।

पालयिष्यति धर्मात्मा कृष्णो युष्मान्न संशयः ।
तस्माद्धर्मे सदा भक्तिर्जायते ते नराधिप ॥
धर्मं भजस्व कौन्तेय सत्सङ्गं कुरु सर्वदा ।
तस्य पूजामहोरात्रं कृत्वा सिद्धिं गमिष्यसि ॥

युधिष्ठिर उवाच ।

धर्मप्रदानि तीर्थानि पुण्यक्षेत्राणि भारत ।
यानि पुण्यप्रदानीह तानि मे परिकीर्तय ॥

भीष्म उवाच ।

पुरा सनत्कुमारेण समेत्य गजसाह्वयम् ।
प्रज्ञाचक्षोस्तु गान्धार्या ममापि विदुरस्य च ।
द्रोणस्य सकलं धर्म प्रोक्तं तेन महात्मना ॥
पुरा भगवता प्रोक्तं लोकनाथेन विष्णुना ।
नारदाय ततस्तेन गदितं ब्रह्मसूनवे ।
सनत्कुमारमुनये तस्माच्छ्रुतमिद मया ॥
एवं परंपराप्रोक्तमिमं धर्मं हि पाण्डव ।
तत्तेऽह संप्रवक्ष्यामि यदुसिंहस्य चाज्ञया ॥
स वै नारायणो देव परमात्मा जगद्गुरुः ।
अन्तर्यामी जगद्रूपी वेदशिरतन्द्रित ॥
तं ध्यात्वा सर्वलोकेषु नत्वा चैव पुनः पुन. ।
प्रवक्ष्यामि कुरुश्रेष्ठ तदीयं धर्ममुत्तमम् ॥

वैशंपायन उवाच ।

एवं गदितुमुद्युक्तं धर्मं धर्मभृतां वराः ।

3433) M_1 सुवर्म (for सुशर्मा). G_2 सुधर्मा च सुशर्मवान् (for [b]). —(L. 3434) G_2 G(ed.) शतनन्दो कृ(G_2 धृ)तव्रत (for [b]). —(L 3435) D_1 उशना जामदग्न्योऽथ (for [a]). —(L. 3438) G(ed.) प्रिय· (for विभु) — For line 3444, D_1 subst

157** यक्षाश्च मुनयो योगा विबुधेन्द्रा स्त्रियो गणा ।

—(L 3450) D_1 महाचार· ; G_2 M_1 सदा° (for शुभा°). —(L 3452) $G_{1, 2}$ M_1 G(ed.) रामश्च (for कृष्णश्च). $G_{1\ 2}$ G(ed.) कृष्ण (for बौद्ध) M_1 कृष्ण. कल्की जनार्दन (for [b]) —(L 3454) D_1 M_1 कृत त्रेता द्वापरश्च (for [a]). —(L. 3457) G_1 उग्रसेनो , G(ed.) वासुदेवो (for व°). —(L. 3458) G_2 G(ed) भीमो (for द्रोणो). —(L 3460) D_1 द्रुपदस् (for विदुरस्) —(L 3463) G(ed) -काङ्क्षया (for -काम्यया) — G_2 om. the ref — Before line 3471, M_1 G(ed) ins युधिष्ठिर· —(L. 3478) G(ed) पूज्य सर्वम् (for तस्य पूजाम्). —(L. 3479) G_1 क्षेत्राणि (for तीर्थानि)

पाण्डवा श्रोतुकामास्ते प्रणम्य निभृताः स्थिताः ॥
ऋषयो द्विजमुख्याश्च दीक्षिता वनवासिन· ।
संप्रहृष्टा स्थिता· सर्वे श्रोतुं धर्मकथामृतम् ॥
कृते दृष्टे श्रुते धर्मे कीर्तिते चानुमोदिते ।
नाशयेत्सर्वपापानि कृष्ण एव जगन्मयः ॥

Colophon.

वैशंपायन उवाच ।

इति संप्रणताः पार्था धर्मे कृष्णे जनार्दने ।
श्रोतुकामाश्च ते सर्वे ब्राह्मणा ब्रह्मवित्तमाः ॥
वासुदेवं चिरं ध्यात्वा धर्मपुत्र प्रतापवान् ।
नत्वा पप्रच्छ धर्मात्मा धर्मं सुरनदीसुतम् ॥

युधिष्ठिर उवाच ।

कर्मणा येन मनुजा नरकं यान्ति दुःखिताः ।
केषां सङ्गेन वा तात लभते स्वर्गसंपदम् ॥
ऋणीनां च प्रदातॄणां ऋणस्थस्य गतिस्तु का ।
तत्सर्वं वद तत्त्वेन देवव्रत महामते ॥

भीष्म उवाच ।

शृणु राजन्पुरा वृत्तमाश्चर्यं पुण्यवर्धनम् ।
भद्रकस्य तु संवादं गोवृषस्य महात्मन· ॥
काश्मीरे पुण्यदेशे तु सर्वसंपत्समावृते ।
ब्राह्मणो भद्रको नाम सर्वाचारविवर्जित ॥
कृषिको दुःखभाङ्मूर्खो सदा वेदविरोधकृत् ।
पितृमातृकुलैस्त्यक्त· शूद्रभोजी तु कामुक. ।
राजदण्डभयाद्भीतो देशान्तरमुपागमत् ॥
तस्मिन्देशे चिरं कालं स्थित्वा राजेन्द्र दुर्मतिः ।
नीलवर्णमनड्वाहं महिषं समचोरयत् ।
तौ वञ्चयित्वा तद्रात्रौ स्वदेशं प्राप्तवान्पुन· ॥

वैशंपायन उवाच ।

पितामहस्य वचन श्रुत्वा विस्मयकारकम् ।
धर्मसूनुर्महाप्राज्ञ इद वचनमब्रवीत् ॥

युधिष्ठिर उवाच ।

किं कर्म कृतवांस्तात स्वदेशे ब्राह्मणाधमः ।
कया वृत्त्या प्रवृत्तोऽभूद्बान्धवेभ्यः किमब्रवीत् ॥
तत्सर्वं वद तत्त्वेन देवव्रत महामते ।
कृष्णो यदा मे कृपया ह्यवोचदखिलेश्वरः ॥

भीष्म उवाच ।

भद्रके ह्यागते तस्मिन्बान्धवाः परिशङ्किता. ।
ऊचुः परमधर्मज्ञा पुरस्तस्यातिकोपिता ॥
किमर्थमागतो भद्र पापरूप भयंकर ।
गच्छ गच्छ पुनस्तूर्णं बन्धूनामहितंकर ॥
परुष स्वजनस्येदं निशम्य वचनं तदा ।
भद्रकः प्राह तान्सर्वान्वञ्चयन्धर्मनन्दन ॥
भो भो बन्धुजनाः सर्वे शृणुध्वं वचनं मम ।
यदा भवद्भिर्निरस्तस्तदा गङ्गामुपागमम् ॥
तत्रत्या ब्राह्मणाः सर्वे मत्कर्मपरितोषिताः ।
युग्मावेतौ महाभागा मम सर्वे ददुश्च ते ॥
तच्छ्रुत्वा बान्धवा· सर्वे वचनं चेदमब्रुवन् ।
सुखी भव महाभाग गार्हस्थ्यं वै सदा कुरु ।
गार्हस्थ्येन तु धर्मेण मद्यच्छ्रेयो भवेद्ध्रुवम् ॥
तानेव वञ्चयित्वा स भद्रक पापनिश्चयः ।
युगंधरौ तु तौ कृत्वा ययौ कृषिभुवं प्रति ॥
किमिदं बन्धुभिः पृष्टो गूढरूपोऽतिपापकृत् ।
प्रारम्भं करवाणीति बान्धवेभ्यस्तदाब्रवीत् ।
संभ्रमं कृतवान्राजन्भद्रक. पापनिश्चयः ॥
ततो हलं समादाय दीर्घकूबरमद्भुतम् ।
उपानहौ चर्मरज्जुं वेणुदण्डसमन्वितम् ॥
स्कन्धे राजन्वहन्सीरं कम्बलेनावगुण्ठित ।
पूर्वपश्चिमलाङ्गूलः कौपीनपरिशोभितः ।
ययौ कृषिभुवं राजन्भद्रक पापनिश्चय ॥
गच्छ गच्छेति पापात्मन्पास्यामि रुधिरं तव ।
इति जल्पन्स मूर्खो वै तृष्णया परिपीडितः ।
भद्रकः पापकृत्क्रूरो द्रुतं भूमिं चकर्ष सः ॥
मध्याह्नसमये श्रान्तं महिषं समपीडयत् ।
गाढदु.खं विशेषेण भानुरश्मिप्रपीडितम् ॥
आश्वास्य वेदनां स्वेन रसनालम्बितानन. ।
अपतत्सहसा भूमौ मृतवद्घोरदर्शनः ॥
तं विलोक्य तृषायुक्तं विह्वलं भुवि चेष्टितम् ।

— (L. 3491) G1 M1 -कालेषु , G(ed) -लोकेश (for °षु) — G2 om the ref — (L. 3494) D1 निर्वृता (for निभृता·) — (L 3496) G2 श्रोतु धर्मामृतं द्विजा· (for ^{b}). — (L. 3497) G(ed) दृष्टे (for धर्मे). G2 कृतधर्मे श्रुते दृष्टे (for ^{a}).

Colophon — *Sub-parvan* D1 आश्चर्यपर्वणि शेषधर्माः ; G1, 2 M1 शेषधर्मा , G(ed) आश्चर्यपर्व — *Adhy. name* · G(ed.) श्रीकृष्णमहिमा — *Adhy no* · D1 G1, 2 M1 26 , G(ed) 27.

(L. 3500) G2 G(ed.) लोककामाश्(for श्रोतु°). — G1, 2 om. the ref — (L 3505) D1 G(ed) ऋणानां (for ऋणीना) — (L 3509) M1 G(ed) -समावृने (for °युते). — (L 3511) G2 -विरोधक. (for °कृत्). — (L 3512) G(ed) -भोगे (for -भोजी). — (L. 3516) G1 तद्राष्ट्रात् (for तद्रात्रौ) — (L 3517) G2 G(ed) तद्वाक्य (for वचनं). D1 श्रुत्वा विस्मयमागत (for ^{b}). — G2 M1 om. the ref. — (L. 3519) G(ed) स्वदेशे भद्रको द्विज (for ^{b}). — (L. 3520) M1 G(ed) प्रवर्तेन (for प्रवृत्तोऽभूद्) — (L. 3530) G(ed.) सत्यक्तस् (for निरस्तस्). G1 G(ed.) उपागतः (for °गमम्). — (L. 3532) M1 महासत्त्वौ (for °भागा). — (L.

द~डैरघट्टयन्मूर्खो रज्जुभि काष्ठमृत्तिकै ।
अश्मभिश्च तथा शाखै पादाभ्या च तथाहनत् ॥
ताडयित्वा बहुविधं मुष्टिना च विशेषत· ।
चिन्तयामास राजेन्द्र मुहुर्नि श्वस्य दु खित: ।
सिषेवे धरणी मूढ: क्षुधा च परिपीडित· ॥
तत: परं समुत्थाय कोपात्संरक्तलोचन ।
अब्रवीत्परुष वाक्यमनड्वाह सुदु खितम् ॥
काळमेघ महावीर्यं गच्छ त्वं स्वयमेव हि ।
महिषोऽयं जड· पापी त्वत्समो न विचक्षण. ॥
प्रज्ञाहीनस्य तद्वाक्यं युक्तिहीन भयंकरम् ।
आकर्ण्य परितो वीक्ष्य गोपतिर्वाक्यमब्रवीत् ।
भो भो ब्राह्मणदायाद वृथा पापं करोषि हि ।
अनित्येन शरीरेण नित्यत्वमवगच्छसि ॥
अणुमात्र त्वया मूढ न कृतं धर्मसंचयम् ।
कृतं पापं विशेषेण घोरजन्मान्तरप्रदम् ॥
लोके पातकिन: सन्ति त्वत्समो नैव पापकृत् ।
त्वया कृतेन पापेन त्वद्वंश्या निरयं गता: ॥
तानुद्धरस्व धर्मेण तपसा च दिवं व्रज ।
धर्म एव मनुष्याणां स्वर्गमोक्षप्रदायक. ॥

भीष्म उवाच ।

अत्याश्चर्यतमं वाक्य श्रुत्वासौ भीतिसंयुत· ।
रोमाञ्चिततनुर्भूत्वा भद्रको वाक्यमब्रवीत् ॥

भद्रक उवाच ।

पापोऽहं पापकर्माहं पापात्मा पापनिश्चय: ।
त्राहि मां कृपया देव सर्वधर्मविवर्जितम् ॥
इत्युक्त्वा सहसा राजन्दण्डवत्प्रणिपत्य तम् ।
क्षमस्वेति वदन्भूयो भद्रको वाक्यमब्रवीत् ॥
भो स्वामिन्सर्वधर्मज्ञ धर्मरूप वदस्व मे ।
तीर्थज्ञा: परिरक्षन्ति मूढबुद्धिं सकल्मषम् ॥

भीष्म उवाच ।

अतिदीनतरं वाक्यं श्रुत्वा भद्रस्य धर्मज ।
मेघगम्भीरया वाचा गोपतिर्वाक्यमब्रवीत् ॥

गौरुवाच ।

धर्माधर्मं प्रवक्ष्यामि शृणु नान्यमना: प्रभो ।
यस्य स्मरणमात्रेण पापान्मुक्तिर्भविष्यति ॥
सर्वेषामेव दानानामन्नदानं विशिष्यते ।
तस्मादन्नप्रदो नित्यं सायुज्यं लभते हरे· ॥
गोभूतिलहिरण्यानि गाव. पृथ्वी सरस्वती ।
कन्याकनकदानानि नृणां स्वर्गप्रदानि वै ॥
साळग्रामं तथा लिङ्गं क्षेत्रं कृष्णाजिनं महत् ।
यो दद्याद्ब्राह्मणेभ्यस्तु स विष्णो· पदमश्नुते ॥

भद्रक उवाच ।

दानप्रदाने योग्योऽहं नैवात्र खलु निर्धन: ।
विना दानेन यत्पुण्यमस्ति चेत्तद्वदस्व मे ॥

गोपतिरुवाच ।

प्रातःकाले समुत्थाय विष्णुं सर्वात्मकं प्रभुम् ।
कीर्तयेद्य: प्रसन्नात्मा स विष्णो: पदमश्नुते ॥
स्नाने जपे तथा होमे भोजने च विशेषत. ।
पूजायां देवदेवस्य मौनी स्वर्गपदं व्रजेत् ॥
तीर्थेऽतिथौ तथा विष्णौ मातापित्रोर्यतौ गुरौ ।
भक्तिं कुर्यात्प्रयत्नेन स गच्छेद्ब्रह्मण पदम् ॥
विष्णोश्च पूजने भक्ति: पुराणश्रवणे श्रुतौ ।
धर्मशास्त्रे तथा स्नाने यस्य नित्यं स मुक्तिभाक् ॥
द्रव्येण कर्मणा वाचा दानाद्विप्रहिते रत. ।
स याति ब्रह्मभवन पुनरावृत्तिवर्जितम् ॥
य सम सर्वभूतेषु तथा शत्रुसुहृत्सु च ।
सर्वत्र हितकारी य स विन्देद्वै सुरालयम् ॥
परदारपरद्रव्यपरनिन्दापराङ्मुखा: ।
सत्यवादरता ये च ते सर्वे त्रिदिवौकस ॥

भीष्म उवाच ।

इत्यद्भुततमं वाक्यं श्रुत्वा भद्र· कुरूत्तम ।
पुनरेव शुभं वाक्य नमस्कृत्येदमब्रवीत् ॥

भद्रक उवाच ।

भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
पापस्य कारण ब्रूहि यस्माच्च नरकं व्रजेत् ॥

अनड्वानुवाच ।

निर्दय· सर्वभूतेषु तथानिष्ठरवाचक: ।
स पापी नारकी ज्ञेयो योऽधर्मे वर्तते चिरम् ॥

3535) G_2 G(ed) भविष्यति (for भवेद्ध्रुवम्). — After line 3547, G_2 ins.

158** भद्रक पापकृत्क्रूरो द्रुतं भूमि चकर्ष स· ।

—(L. 3450) D_1 G_2 वेदन (for °नां). —(L. 3553) G(ed) लोष्ट (for काष्ठ-). —(L 3554) G(ed) अश्मभि: पञ्चशाखैश्च (for ^{a}). — G_2 om lines 3557–3559 —(L. 3563) G_2 M_1 गौर्वाक्यमिदमब्रवीत् (for ^{b}). —(L. 3564) G(ed) भो भद्र ब्राह्मणेदानीं (for ^{a}).—(L. 3566) G(ed) न कृतो धर्मसंचय. (for ^{b}).—(L 3572) M_1 श्रुत्वा भीतिसमन्वित: (for ^{b}). —(L. 3579) G(ed.) धर्मज्ञा: (for तीर्थज्ञा:). G(ed) धर्महीन (for मूढबुद्धि) —(L 3580) D_1 अतिकारुण्यवाक्यं तु , G_2 °दारुणतम वाक्य (for ^{a}). G_2 सुव्रत (for धर्मज) —(L. 3585) G_2 M_1 नर (for हरे·). — After line 3589, G_2 ins an addl colophon, mentioning शेषधर्म as sub-parvan and 27 as adhy no —(L 3592) M_1 शुभम् (for प्रभुम्). —(L 3593) G_2 सदा भक्त्या (for प्रसन्नात्मा) G_2 सर्वपापै प्रमुच्यते (for ^{b}). — G_2 om. lines 3594–3645 —(L. 3599) M_1 ज्ञाने यश्च स मुक्तवान् (for ^{b}). —(L 3603) D_1 स विन्देद्वैष्णव पदम् (for ^{b}). —(L. 3605) D_1 M_1 ते सर्वत्राधिका (M_1 °पा·) स्मृता (for ^{b}).

स्नानहीनः सदा पापी तथा पितृविदूषकः ।
गुरुदेवान्द्विजान्बन्धूनग्निं मित्रं गवां कुलम् ।
पुराणधर्मशास्त्राणि निन्दको नरकं व्रजेत् ॥
स्नाने जपे तथा होमे भोजने देवसंनिधौ ।
बहुभाषी नरो यस्तु दारुणं नरक व्रजेत् ॥
परदारपरद्रव्यपरक्षेत्रापहारका ।
परनिन्दापरा मूर्खास्ते वै निरयगामिनः ॥
ब्राह्मणेभ्य प्रतिश्रुत्य दास्यामीति धनादिकम् ।
पश्चान्नास्तीति यो ब्रूयात्तमाहुर्ब्रह्मघातकम् ॥
नास्ति नास्तीति यो ब्रूयादतिथौ गृहमागते ।
तस्य जिह्वा समुद्धृत्य घोरास्तु यमकिंकरा ।
दहन्ति युगपर्यन्त कुम्भीपाकेऽतिदारुणे ॥
पानीयमन्नदानं च तथा ताम्बूलभोजने ।
तृणकाष्ठाग्निशाकानां ह्यदाता नरकं व्रजेत् ॥
सर्वेषामेव पापानां पापमेक महत्तरम् ।
लाङ्गलाकर्षणं पार्थ महापापं प्रकीर्तितम् ।
यः सदा कर्षते मूर्खो ब्राह्मणो भ्रूणहा हि सः ॥
देवा पितृगणा विप्रास्तथा गन्धर्वचारणा ।
हलकर्म प्रकुर्वाणं तथा लक्ष्मीपतिः प्रभु ।
शेपुस्ते तु समुद्वीक्ष्य निर्भाग्यो भव नारकी ॥
युष्मत्कुलप्रसूता ये सर्वकर्मबहिष्कृताः ।
दरिद्रा अङ्गहीनाश्च सर्वे संतानवर्जिताः ।
बन्धुभि. संपरित्यक्ता गन्तारो नरकं ध्रुवम् ॥
कुम्भीरौरवकाकोलक्षेपयश्रासिपत्रकम् ।
तप्ततैलं तप्तकुम्भं घटीयन्त्रमधोमुखम् ॥
व्याघ्रशूल वज्रकीटं वृकराक्षसभक्षणम् ।
एतेषु नरकेष्वेते पतिष्यन्ति न संशय ॥
एवं शप्ताः पूर्वकाले स्वं स्वं धाम ययुस्तदा ।
तस्मात्सर्वेषु कालेषु कृती पापं न कारयेत् ॥
सर्वभूतहित शान्तो दान्तः परमबुद्धिमान् ।
स्वधर्मनिरतो यो वै स याति परमां गतिम् ॥

भीष्म उवाच ।

एवं निशम्य राजेन्द्र रुदन्भूमौ पपात ह ।
पापबुद्धिं विसृज्याशु किं करोमीति चाब्रवीत् ॥
कृतकृत्योऽसि भद्रं ते गच्छ सौम्य यथासुखम् ।
त्वत्प्रसादादहं मुक्तः पापात्खलु सुदारुणात् ॥

गोपतिरुवाच ।

न गच्छामि महाभाग पूर्वं तव ऋणं गतः ।
तद्धनं तव हस्ते च दत्त्वा यास्यामि निर्वृतिम् ॥

भद्रक उवाच ।

कथं त्वमृणवांस्तात महिषो वापि किं नु मे ।
ऋणप्रदः कथमहं तत्सर्वं कृपया वद ॥

गोपतिरुवाच ।

निष्कत्रयं गृहीत्वा तु तव हस्तान्महामते ।
ईदृशं जन्म संप्राप्तं ततो घोरं भयावहम् ॥
इदानीमुचितं ब्रूहि ऋणात्तस्माद्भयंकरात् ।
मुच्येय हि कथं तात तदुपायं वदस्व ह ॥

भद्रक उवाच ।

त्वयोक्तं तद्धनं दत्त्वा मम हस्ते महामते ।
महिषेण समं गच्छ ऋणान्मुक्तो न संशयः ॥

गोपतिरुवाच ।

पौरुषं कुरु विप्रेन्द्र यथातथ्यं ब्रवीमि ते ।
आवयोर्ऋणवान्कश्चिच्चतुर्थो ह्यागमिष्यति ।
निष्कत्रयं तस्य हस्ताद्गृहीत्वावां विसर्जय ॥

भीष्म उवाच ।

एवमुक्त्वा तु राजेन्द्र नमस्कृत्वा तु त द्विजम् ।
तूष्णीमास्ते गवा नाथो ब्राह्मणो विस्मयं वहन् ॥
एतस्मिन्नन्तरे शूद्रोऽप्याययौ विप्रसंनिधिम् ।
सोऽतीव त्वरया युक्तो वाक्यमेतदुवाच ह ॥
विप्राद्य श्रूयतामेतौ विक्रीयेते त्वया यदि ।
निष्कत्रयं प्रदास्यामि मूल्यमेतौ प्रदीयताम् ॥

विप्र उवाच ।

तथा करोमि ते शूद्र तद्धनं च ददस्व मे ।
गोपतिं महिष चेमौ तव दास्ये न संशयः ॥

भीष्म उवाच ।

ब्राह्मणस्य वच श्रुत्वा वृषलो दत्तवान्धनम् ।
स्वगृहं प्राप्तवान्राजंस्तावादाय ततः परम् ॥
बध्वा गोष्ठे दृढं शूद्रे भुञ्जमाने सुतै सह ।
अन्योन्यकलहाद्राजन्रज्जुभिः परिपीडितौ ।
अभूतां तत्क्षणादेव परासू पतितौ भुवि ॥

— After line 3607, D_1 G_1 M_1 G(ed.) ins an addl colophon [*Sub-parvan:* D_1 आश्चर्यपर्वशेपधर्मा., G_1 M_1 G(ed.) शेपधर्मा.. — *Adhy. name* D_1 G_1 M_1 27, G(ed.) 28]. — D_1 गोपतिर् (for अनड्वान्) —(L 3612) M_1 अस्नातः सर्वदा पापी (for ᵃ) — M_1 om. lines 3615-3616. — (L. 3620) G(ed) वक्ति (for ब्रूयाद्) G(ed.) दारुण नरक व्रजेत् (for ᵇ) — After line 3620, D_1 G_1 ins. :

159** पितृपूजा गृहार्चां च अग्नेर्मातुर्गुरो शुभाम् ।
शिष्टबन्धुगवां पूजामकृत्वा नरक व्रजेत् ॥

—(L. 3625) D_1 तृणकाष्ठानि शाकानि (for ᵃ) —(L. 3643) G_1 M_1 च रुदन् (for राजेन्द्र) and भूमौ भद्रः (for रुदन्भूमौ) — Before line 3646, G_2 ins. भद्रकः. — For line 3646, G_2 subst

160** तद्बन्धन च निर्मुच्य गच्छ गच्छ सुदारुणात् ।

— (L 3648) M_1 G(ed.) ऽह (for च). — (L. 3652) D_1 G(ed.) सुघोरं च (for ततो घोरं) — (L 3658) D_1 ऋणतः (for ऋणवान्) — (L. 3664) D_1 विप्राहं; G_2 हे विप्र (for विप्राद्य). — (L. 3665) G(ed.) प्रदेहि मे (for प्रदीयताम्).

हा हतोऽस्मि हतोऽस्मीति बन्धुभि· परिवेष्टित:
कृत्वा तु रोदनं दु खात्प्रपेदे धरणीतलम् ॥
एवं प्रवर्तमाने तु गोपतिर्महिषस्तथा ।
दिव्यं विमानमारूढावम्बरं समुपागतौ ॥
ऊचतुर्दु:खितं शूद्रं किमर्थं रुद्यते त्वया ।
त्वं हि न: पूर्वजनने ऋणवान्नात्र संशय ॥
ऋणवन्तौ द्विजस्यावामृणाद्धि परिमोचितौ ।
मोचितश्च ऋणात्त्वं हि व्रज शीघ्रं त्रिविष्टपम् ॥
एवं निशम्य वचनं मधुरं रोमहर्षणम् ।
सकुटुम्बो ययौ नाकं शूद्रो महिषगोपती ॥
गन्धर्वैं स्तूयमानास्ते सर्वे नाकं समाययु ॥

युधिष्ठिर उवाच ।

किं कर्म कृतवांस्तात ब्राह्मणो वेदवर्जित: ।
तत्सर्वं श्रोतुमिच्छामि कृपया वद सुव्रत ॥

भीष्म उवाच ।

द्रव्येणानेन विप्रोऽसौ प्रायश्चित्तं चचार ह ।
प्रायश्चित्तविशुद्धात्मा तपस्तेपे सुदुष्करम् ॥
कृष्णेति परमात्मेति सर्वलोकेश्वरेति च ।
विश्वरूप सदानन्द पाहि मां शरणागतम् ॥
एवं भक्त्या प्रार्थयन्तं ब्राह्मण गतकल्मषम् ।
हृदि स्थितो जगन्नाथस्तं प्रत्याह स्थितोऽम्बरे ॥

श्रीभगवानुवाच ।

यद्यदिष्टतमं वस्तु तत्तदेवेह भुज्य च ।
स्वर्गं गच्छ महाभाग सर्वान्कामानवाप्नुहि ।
इन्द्रस्य संनिधौ तिष्ठ यावदाचन्द्रतारकम् ॥
इति खे संगतां वाणी श्रुत्वा प्रीतिसमन्वित: ।
कर्मकाण्डमशेषेण यथावदकरोद्द्विज· ॥
पुत्रपौत्रै: परिवृतो बन्धुभिश्च समन्वित· ।
प्रपेदे सकलान्कामान्सत्सङ्गस्य प्रभावत ॥
ततः परं व्योमचरैरभिष्टुतो
गन्धर्वमुख्यैरुपसेव्यमानः ।
दिव्यं प्रपेदे स तु विप्रवर्य
सत्सङ्गतो नास्ति परं नरेन्द्र ॥
तस्मात्त्वमपि राजेन्द्र सत्सङ्गं कुरु सर्वदा ।
सत्सङ्गान्मुक्तिमाप्नोति नर पापरतोऽपि च ॥
सर्वेषामपि सङ्गानां सत्सङ्गो दुर्लभ· खलु ।
सत्सङ्गादिष्टकामान्वै संप्राप्नोति नरोत्तमः ॥
ऋणादाने सुखं पूर्वं प्रदाने प्राणसंकटम् ।
जनने च विपत्तौ च ऋणिनां न सुख खलु ॥
शाकाहार वरं पथ्यं पञ्चमेऽहनि भोजनम् ।
ऋणाद्राज्यप्रदाद्वापि निराहारोदभोजनम् ॥
एवं कष्टमृणं राजन्निह:मुत्र च जन्मसु ।
ऋणी न भूया सततं परं श्रेयो गमिष्यसि ॥
य इद पुण्यमाख्यान शृणुयाद्वै समाहित ।
ब्रह्मलोकमवाप्नोति नारदेन प्रभाषितम् ॥
य शृणोति ऋणी नित्यं भक्तिपूर्वं निरन्तरम् ।
षण्मासश्रवणादेव ऋणान्मुच्येत भूमिप ॥
तस्मात्सर्वेषु कालेषु धर्ममेव सदा कुरु ।
धर्मेण ते भवेद्वृद्धिरिह स्वर्गे च भूमिप ॥

Colophon

वैशंपायन उवाच ।

इत्येव धर्ममाश्चर्यं सत्सङ्गस्य ऋणस्य च ।
श्रुत्वा प्रीतो महाभागो धर्मसूनुरुवाच तम् ॥

युधिष्ठिर उवाच ।

कुरुवृद्ध नमस्तेऽस्तु वसूनामग्रयायिने ।
भक्तोऽसि देवदेवस्य समस्तजगतां पते ॥
दाता प्रतिग्रहीता च कि करिष्यति वर्तनम् ।
इह लोके ह्यभावे तु सुखदुःखं कथं भवेत ॥
वृद्धलाभे महालाभे ह्यथ वा मूलनष्टके ।
इह लोके परत्रापि किं करिष्यति तद्वद ॥

भीष्म उवाच ।

महत्ता ब्रह्मपुत्रेण नारदेन सुधीमता ।
तदहं संप्रवक्ष्यामि शृणु नान्यमनाः प्रभो ॥
पुण्यं पवित्रमायुष्यं सर्वपापहरं शुभम् ।

— D_1 भद्रक ; M_1 ब्राह्मण (for विप्र). — (L 3673) [इ]ति हा तात (for हतोऽस्मीति). — (L 3675) G_1 M_1 गोवृषो (for गोपतिर्). — (L. 3677) M_1 दुर्मति (for दु खित) — (L 3686) D_1 द्रव्येण तु ह्यसौ विप्र· , G_2 सोऽपि विप्रो महाभाग (for ^{a}) — (L 3687) M_1 -दुश्चरम् , G(ed) -दारुणम् (for -दुष्करम्) — (L 3691) G_1 G(ed.) ततो (for स्थितो) — (L 3695) M_1 संगादिता (for खे सगता). — (L 3697) D_1 G_2 बन्धुभि सह धर्मज (for ^{a}) — (L 3704) G_2 नर पापाद्विमुच्यते (for ^{b}). — (L 3706) D_1 न संशय ; G(ed) नरो नृप (for नरोत्तम) — (L 3708) M_1 G(ed.) ऋणिनो (for °ना) — (L. 3710) D_1 निराहारो वरो मत , M_1 °हारादभोजनम् ; G(ed.) °हार: पर स्मृत· (for ^{b}). — (L. 3715) G_1 य इद शृणुयान्नित्य (for ^{a}) — (L 3718) D_1 सिद्धिर् (for वृद्धिर्) G(ed) [अ]मुत्र (for स्वर्गे).

Colophon — *Sub-parvan* D_1 आश्चर्यपर्वणि शेषधर्मा· ; $G_{1\ 2}$ M_1 G(ed) शेषधर्मा — *Adhy name* ऋणप्रशसा· — *Adhy no* D_1 $G_{1\ 2}$ M_1 28, G(ed) 29

(L 3725) G_1 G(ed) महाबाहो (for °लाभे) — After line 3727, D_1 ins

161** गादेत लोकरहसि इतिहास पुरातनम् ।

While G(ed) ins after line 3727

162** कथित यत्पुरावृत्त मदनुग्रहकाङ्क्षया ।

—(L 3731) M_1 [अ]दानेन (for [अ]दत्तेन) —(L,

ऋणमोचनकं नाम सर्वेषां पुष्टिवर्धनम् ॥
दत्तेन धनवाँल्लोके ह्यदत्तेन च निर्धनः ।
सुकृतेन च पापेन भवत्येव न कारणम् ॥
ऋणकर्ता पिता शत्रुर्धनकर्ता पिता सखा ।
पतिव्रता च जननी ह्यसती च पिता तथा ॥
भार्या च वशिनी नित्यं पुत्रोऽपि श्रुतवान्सखा ।
ऋणी दु.खी सुखी दाता परलोके च पाण्डव ॥
तस्मात्सर्वप्रयत्नेन ऋणवान्न भवेन्नृप ॥

अत्र ते कथयिष्यामि इतिहासं पुरातनम् ।
श्रोतॄणां सर्वपापघ्नं वैराग्यजननं शुभम् ॥
आसीत्पुरा कृतयुगे ब्राह्मणो बन्धुवत्सलः ।
सर्वधर्मसमायुक्त कौशिको नाम शीलवान् ॥
वसुमान्बहुपुत्रश्च श्रुतधर्मो बहुप्रद ।
उपार्जयामास धनं विद्याकृषिमुखेन च ॥
प्रवृद्धमभवद्वित्तं विदुषो ब्राह्मणस्य हि ।
धर्मवृद्ध्या महाराज लक्षाणां तु सहस्रकम् ॥
सत्यशीलो महानासीत्सखा तस्य युधिष्ठिर ।
दरिद्रो बहुपुत्रश्च कृशाङ्गो व्याधितो भृशम् ॥
कौशिकः स तु धर्मात्मा ददाति च धनं स्वकम् ।
अन्नाभावात्तथा स्नेहान्निर्धनत्वाच्च सर्वथा ।
सख्यु स्नेहाद्बुद्धिलोभाद्धर्मत कुरुनन्दन ॥
ततो बहुतिथे काले द्विजौ तौ तु क्षयं गतौ ।
ततो यमभटैर्नीतौ दर्शितौ च विशेषतः ॥
ततो दाता यमं दृष्ट्वा सत्वरं प्रणिपत्य च ।
तदा निवेदयामास धर्मराजाय सत्वरम् ।
श्रूयतां धर्मराजेदं सत्यशीलेन यत्कृतम् ॥

दत्तापहारी भूलोके कृतघ्नो लोकदूषकः ।
अप्रदाय मया दत्तमिम लोकमुपागत ॥
असत्यवादी धर्मात्मन्सत्यशील इति श्रुतः ।
राजतस्करदुर्वृत्तैर्मया यत्संचितं धनम् ।
तत्सर्वं लयमायाति किं करिष्ये महामते ॥
शृङ्खलाशतसंयुक्त काष्ठपाषाणपीडित ।
बहुधा भज्यमानोऽपि तदा नो दत्तवान्धनम् ॥
स्ववित्तमस्य दत्त्वा तु रिक्तोऽहमभवं प्रभो ।
पुत्रदारास्तथा भृत्या सर्वे वै रिक्ततां गताः ॥

अयं चाप्यत्र संप्राप्तः किं करिष्यामि सूर्यज ।
अस्य वेषेण विश्वासं वाचि कर्मणि चेष्टिते ॥
कुरु दीनस्य पापस्य गोमुखव्याघ्ररूपिणः ।
कुटुम्बघातकस्यास्य सदा कार्पण्यभाषिणः ।
अभावे निन्दितस्यास्य विश्वासं वाचि मा कृथाः ॥
तस्य तद्वचन श्रुत्वा कौशिकस्य तु धर्मज ।
सत्यशीलो ऋणी प्राह प्रेतराजं भयंकरम् ।
पापोऽहं पापकर्माहं पापात्मा पापसंभवः ।
त्राहि मां वचन देव त्वदग्रे वक्तुमक्षमः ॥
पापिनो वचनं देव सर्वत्रापि विगर्हितम् ।
तथापि वक्ष्ये कार्पण्यं धर्मराजस्य तेऽग्रतः ॥
पापिना बहुपुत्रेण निर्भाग्येन मया खलु ।
कौशिकात्तु धनं गृह्य कुटुम्बभरणं कृतम् ॥
क्षेत्रोत्पत्त्यास्य दास्येऽहमिति मत्वा ऋणं कृतम् ।
ऋणं वै धर्मसाक्ष्या च न दत्तं धर्मराज हि ॥
तस्मिन्काले महापीडा राजचोरसमुद्भवा ।
आसील्लोकश्च दुर्भिक्षो व्याधिभिः परिपीडनम् ॥
कृषिभि फलिता भूमिर्नैव दण्डधरः प्रभो ।
क्षुद्बाधा ग्रामबाधा च चोरबाधातिदुःसहा ॥
गृहक्षेत्रं व्यपहृतं सुता देशान्तरं गता ।
व्याधिना पीडितोऽह तु ह्यपत्यानि मृतानि मे ॥
वेश्म दग्धं विशालं मे गोधनं तस्करैर्हृतम् ।
काले काले न वृष्टिश्च कृषिं कर्तु न हि क्षमः ॥
अनड्वाहश्च शकटास्तुरंगा दासदासिकाः ।
राजभृत्यैरपहृताः कराभावात्कथंचन ।
जीवामि भिक्षया देव व्याधिना परिपीडितः ॥
एवं स्थिते मयि कृशे ह्यन्तकाल समागतः ।
तस्मिन्नवसरे देव त्वद्भटाश्चातिदारुणा ॥
कालपाशैर्दृढं बध्वा प्रापयन्ति स्म मामिह ।
किं करिष्याम्यहं देव ह्यत्रायं मां प्रबाधते ॥
अन्यथा चिन्तितं कार्यं दैवेन कृतमन्यथा ।
अहमन्यत्र चिन्तामि दैवमन्यत्र चिन्तयेत् ॥
त्वमेव चिन्तयत्वद्य कृशो दीनो विवस्वक ।
शुष्ककण्ठोष्ठतालुश्च नित्यदु.ख्यतिदारुणः ॥
क्षुत्क्षामोऽहं मुमूर्षुश्च बाधितस्तव किंकरैः ।

3733) G(ed.) अन्नकर्ता पिता सुहृत् (for [b]). — For line 3734, G(ed.) subst.

163** पतिव्रता च भगिनी सती चैव सुता तथा ।

—(L 3744) G(ed) प्रवृद्धिमगमद्वित्तं, G_2 प्रवृद्धं वित्तमभवद् (for [a]). M_1 विपुल (for विदुषो). —(L 3749) D_1 निर्धनाच्च हि सर्वदा (for [b]) —(L 3751) G(ed) द्विजाती (for द्विजौ तौ) —(L 3757) M_1 अमु लोकमुपागमत् (for [b]) — After line 3762, G_1 ins ·

164** ऋणी च ब्रह्महा चैव तावुभौ तु लय गतौ ।
कम्पिते ब्रह्महा मुक्त ऋणी तु न कदाचन ॥

—(L. 3766) D_1 G_2 पाप- (for वाचि) —(L. 3778) G(ed) क्षेत्रादुत्पाद्य दास्येऽहम् (for [b]) —(L 3781) G(ed.) आसील्लोकस्य दुर्भिक्षं (for [a]). —(L. 3783) G(ed.) राज- (for ग्राम-) —(L. 3787) M_1 कालेन नष्टा वृष्टिश्च (for [a]). —(L 3788) D_1 G_1 M_1 शकटानानडुहश्चैव (for [a]), G_2 दासी दासश्च धर्मप (for [b]). —(L 3790). G(ed) भिक्षया चापि जीवामि (for [a]). G_2 त्वद्भक्ताश्चातिदारुणाः (for [b]). — G_2 om lines 3791–3792. — For line 3796, G(ed.) subst. .

165** चिन्तयाम्यहमन्यत्तु दैवमन्यत्त्वचिन्तयत् ।

किं करोमि च सूर्यात्मन्ऋणाद्वै मोचनं कथम् ॥
कौशिकोऽसौ महाप्राज्ञो देवनागणसेवित: ।
अप्सरोभि परिवृतो विमानशतसेविभि ।
वर्तते तव धर्मेश निकटे दीपयन्दिश: ॥
मम सख्युर्महाप्रीतिर्मयि नित्यं समाश्रिता ।
इदानी सर्वधर्मज्ञ विपरीताभवन्मयि ॥
वनानि दहतो वह्ने. सखा भवति मारुत ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥

धर्मराज उवाच ।

ऋणप्रदाता धनवान्दाता पात्रविशेषवित् ।
भूर्लोके सुरलोके वा पूज्य एव धनी सदा ॥
सुशीलो बन्धुमान्वाग्मी नित्यं चातिथिपूजक ।
कृतघ्नो ऋणवान्भृत्यो दु खी सर्वत्र निन्दक: ॥
कुचेल: कुत्सितो धूर्तो दुराचारी तु कामुक: ।
श्ववृत्ति· पिशुनो जारो ऋणी सर्वत्र दु खित: ॥
अदत्तदोषेण भवेद्दरिद्रो
दरिद्रदोषेण करोति पापम् ।
पापादवश्यं नरकं प्रयाति
पुनर्दरिद्र: पुनरेव पापी ॥
न्यायसारमिदं वच्मि लोकाना युवयो: कृते ।
शृण्वन्तु पितर· सर्वे राजवर्याश्च येऽनघा ॥
ऋणी दातुश्च पुत्रत्वं दास्यापत्यं पशुत्वताम् ।
अनड्वांश्च पशुत्वं च गमिष्यति न संशय ॥
ऋणाद्यावद्विमुक्तोऽसौ कृषिव्यापारजीवनै: ।
तावद्वै पुत्रदासत्वमल्पायुष्ट्वं गमिष्यति ॥
एवं निश्चित्य भगवान्ब्रह्मा लोकपितामह· ।
आज्ञां दत्त्वा ममेमां तु स्वर्लोके सुप्रतिष्ठित ॥

भीष्म उवाच ।

एवं निश्चित्य ऋणिनं विकर्तनसुतो वशी ।
पालयामास धर्मेण स्वं लोकं धर्मनन्दन ॥
एतद्विज्ञाय मतिमानृणवान्न भविष्यति ।
सुखी सर्वत्र भविता शाश्वतं लोकमेष्यति ॥
इदं पवित्रं पापघ्नं पुण्यं ऋणविमोचनम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते च ऋणाद्धि स: ॥

Colophon

जनमेजय उवाच ।

आश्चर्यमतुलं धर्मं श्रुत्वा प्रीतो युधिष्ठिर ।
किमपृच्छन्मुनिश्रेष्ठ ब्रूहि तन्मे पितामहम् ॥

वैशंपायन उवाच ।

आश्चर्यं पृष्टवान्धर्मं धर्मसूनु पितामहम् ।
सर्वभाग्यकरं पुण्यं सर्वलोकेषु विश्रुतम् ॥

युधिष्ठिर उवाच ।

केन व्रतेन मे राज्यं भविष्यति पितामह ।
तद्व्रतं तस्य माहात्म्यं वद प्रियकरं हरे: ॥
पितामह विशेषेण भक्तोऽसि जगतीपते· ।
त्वं सदा सर्वधर्मज्ञ ब्रूहि व्रतमनुत्तमम् ॥

भीष्म उवाच ।

व्रतानामपि सर्वेषामुत्तमं यद्विदुर्बुधा· ।
तद्व्रतं शृणु कौन्तेय नारदोक्तं मया श्रुतम् ॥
विख्यातं त्रिषु लोकेषु जयन्तीत्यभिधानत ।
तस्य व्रतस्य माहात्म्यं प्रवक्ष्यामि हिताय ते ॥
वक्ष्ये जयन्तीमाहात्म्यं शृणु राजकुलोत्तम ।
यस्य श्रवणमात्रेण वाजपेयफल लभेत् ॥
पुरा सनत्कुमारेण नारदाय प्रभाषितम् ।
आश्चर्यं नित्यमाख्यातं सर्वदानफलप्रदम् ।
जयन्त्या सदृशं पुण्यं त्रिषु लोकेषु नो नृप ॥
मोक्षदं कुर्वतां भक्त्या जयन्तीव्रतमुत्तमम् ।

—(L 3798) M_1 G(ed.) शुष्ककण्ठ· शुष्कतालुश् (for ᵃ). —(L. 3799) G(ed.) च मूर्खैश् (for मुमूर्षुश्) —(L 3801) M_1 महाभागो (for °प्राज्ञो) —(L 3802) G(ed) संतानशतसेवित: (for ᵇ). —(L 3803) G_2 निकटे दीपदर्शन (for ᵇ). —(L 3807) M_1 काश्यें (for कृशे) — G_1 om the ref G_2 यम (for धर्मराज) —(L 3810) G_1 आमीन् G(ed.) श्रीमान् (for वाग्मी) — After line 3810, D_1 G(ed.) ins :

166** मृदुभाषी सदा दान्त: कृपालुर्भूतसंचये ।
पुरुषो ह्यधनी यस्तु तत्राप्यत्र सुखी हि स: ॥

D_1 cont. .

167** अदाता कृपणो मूर्खो शास्त्रहीनोऽतिकामुक ।

—(L. 3812) $G_{1,2}$ मूर्खो (for धूर्तो) —(L 3816) G_1 पाप प्रकुर्वन् (for पापादवश्यं) —(L. 3819) $G_{1,2}$ नरा (for ऽनघा). —(L 3820) D_1 दास्या पुत्रत्वपुत्रताम्, G(ed.) दासापत्यकलत्रताम् (for ᵇ) —(L 3822) G_2 -जीविते (for -जीवनै) — M_1 om lines 3823–3825 —(L. 3825) D_1 स्वर्लोके स-, G_1 स्वलोकेषु ; G(ed) स्वर्गलोके (for स्वर्लोके सु-) — M_1 om the ref —(L 3827) D_1 G_2 M_1 भूलोक (for धर्मेण) D_1 G_2 M_1 धर्मतो (for स्व लोकं). G_1 पाण्डु- (for धर्म-)

Colophon — *Sub-parvan* D_1 G_1 M_1 आश्चर्यपर्वणि शेषधर्मा·, G_2 G(ed) शेषधर्मो — *Adhy name* . D_1 G_1 G(ed) ऋणविमोचनम् — *Adhy no* D_1 $G_{1,2}$ M_1 29 ; G(ed) 30.

M_1 om. lines 3833–3835 G_1 om (hapl) line 3834–3836 with the ref. —(L. 3834) G(ed) अतुल (for (for पृष्टवान्). —After line 3835, G(ed) ins. ·

168** वासुदेवं नमस्कृत्य पृष्टवान्द्विजसंनिधौ ।

—(L 3838) M_1 भक्तोऽतीव जगत्पते· (for ᵇ) —(L. 3841) D_1 पुरा लोकहितार्थाय (for ᵃ). D_1 M_1 नारदास्तु (for

जयन्तीं वै प्रशंसन्ति मुनय पुण्यकाङ्क्षिणः ।
व्रतानां चैव सर्वेषामुत्तमं तत्प्रचक्षते ॥
ब्रह्मक्षत्रविशां चैव शूद्राणां चैव योषिताम् ।
मोक्षदं कुर्वतां भक्त्या विष्णुप्रियकरं प्रभो ॥
जयन्त्यां नैव भुञ्जीत धर्मे बुद्धिर्यदि स्थिता ।
भुङ्क्ते यदि स पापी स्याद्रौरव नरकं व्रजेत् ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकैः ।
जयन्त्यां तु निराहार स्थित्वा याति हरेः पदम् ॥
श्रीजयन्ती महापुण्या विष्णोः प्रियकरा तिथि ।
संसेव्या सर्वदा विप्रैः संसारच्छेदलिप्सुभिः ॥
जयन्त्यां प्रातरुत्थाय निगृहीताखिलेन्द्रिय ।
स्नात्वा च विधिवद्विष्णुमर्चयेत्प्रयतेन्द्रिय ॥
विष्णोः समीपे शयीत नारायणपरायण ।
रात्रौ जागरणं कृत्वा हरिसायुज्यमश्नुते ॥
नृत्तगीतादिवाद्यैश्च पुराणश्रवणादिभिः ।
सेवां कृत्वा हरे रम्यां हरिसालोक्यमश्नुते ॥
पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम् ।
राज्यकामो लभेद्राज्यं जयन्त्यास्तु प्रभावत ॥
उपवासव्रतपरो धर्मकारी भवेन्नृप ।
चण्डालान्पतितान्वापि वाङ्मात्रेणापि नालपेत् ॥
श्रीजयन्त्या व्रतं ये तु कुर्वन्ति श्रद्धया नराः ।
ते यान्ति विष्णुभवनं परमानन्ददायकम् ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
कृत्वा यत्फलमाप्नोति जयन्त्यास्तत्फलं ध्रुवम् ॥
यदृच्छया कृता यैस्तु तेषां पापं छिनत्ति हि ।
सुपुत्रदायिनी ह्येषा शरीरारोग्यदायिनी ।
सुकलत्रप्रदा ह्येषा विष्णुलोकप्रदायिनी ॥
जयन्त्यां कुरुते यस्तु यत्किंचिद्दानमुत्तमम् ।
स वै ब्रह्म समाप्नोति साक्षात्कृष्णमुखोदितम् ॥
तिलकन्यागवां दानं यो ददाति नृपोत्तम ।
कोटिवंशसमायुक्तो विष्णुलोकं स गच्छति ॥
अष्टमी च जयन्ती च देवदेवस्य चक्रिण ।
शुभे ह्येते महाभाग विष्णोः प्रियकरे तिथी ।
जयन्ती मोक्षदा प्रोक्ता सर्वेषां व्रतकारिणाम् ॥
अष्टमी भुक्तिदा प्रोक्ता ब्रह्मलोकप्रदायिनी ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
धर्मव्रतस्य चरितं सर्वमङ्गलदायकम् ॥
कुरुक्षेत्रे पुरा राजन्सोमवंशसमुद्भवः ।
धर्मव्रतो महानासीच्चन्द्रकान्तसुतः प्रभु ।
धर्मेण पालितास्तेन जना जनपदास्तथा ॥
कालिन्दीतीरमाश्रित्य स राजा जनमेजय ।
राजसूयांश्चकारासौ पञ्चत्रिंशत्प्रतापवान् ।
अश्वमेधांश्च राजेन्द्र षट्त्रिंशन्नर्मदातटे ॥
पृथिवी पालिता तेन शरदामयुतं नृप ।
तावत्पुत्रसमायोगो नैवाभूत्तस्य भूपते ॥
शत्रुभिः पीडितो राजा राज्याद्भ्रष्टो महामना ।
पुरीं निवेश्य सचिवे वर्जितं सर्वसंपदा ।
वन जगाम धर्मात्मा तपस्तप्तुमपुत्रवान्
तत्राराध्य चिरं काल ब्रह्माणं भुवनेश्वरम् ।
सहस्रत्रयमब्दानामेकाहमिव सोऽभवत् ॥
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षतौं निष्कुटी नृप ।
हेमन्ते तु ह्रदेवासी कालिन्द्या सरितः प्रभो ॥
त्यक्ताहारस्त्यक्तनिद्रस्त्यक्तभोगः प्रतापवान् ।
आचरत्तप उग्रं तु रवौ संन्यस्तलोचन. ॥
तपसा तस्य राजेन्द्र देवा भीता दिवं गता ।
रम्भातिलोत्तमाभ्यां तु निवारयितुमक्षमाः ।
सत्यलोकं तदा जग्मुर्विज्ञप्तुं परमेष्ठिन ॥
तत्र स्थित्वा चिरं कालं स्तवैः स्तुत्वा पितामहम् ।
इदमूचुरनूचाना कृताञ्जलिपुटास्तदा ॥
पाहि लोकपते तात धर्मव्रतभयार्दितान् ।
वस्तुं त्रिविष्टपे शक्यं नैवास्माभिरकण्टकै. ॥
तस्य चित्तं भवान्वेत्ति न हि विन्दामहे वयम् ।
अस्मास्वपि च ते प्रीतिरस्ति चेत्पालयस्व ह ॥

ब्रह्मोवाच ।

शृणुध्वं मद्वचः पुत्रा युष्मद्धितकरं परम् ।
धर्मव्रतस्तु राजेन्द्रो मामेव स्तुवते प्रभु ।
तस्माद्भयमिदं नास्ति युष्माकं मम चैव हि ॥
सर्वेषामेव देवानां मा भूद्राज्ञो महद्भयम् ।

°दोक्तं) — (L 3844) G_1 -कुलोद्भव (for °त्तम). — (L. 3846) D_1 G_2 M_1 पुरा सनत्कुमाराय (for ^{a}) D_1 G_2 M_1 नारदेन (for °दाय) — (L. 3847) G(ed.) आख्यान (for °तं) D_1 आश्चर्यं पुण्यमाख्यानं (for ^{b}). — (L 3849) D_1 om. (hapl) lines 3849^b–3853^a G(ed) विष्णोः प्रियहितं हि तत् (for ^{b}) — (L. 3861) G(ed.) अर्चयेत्प्रयतो द्विजः (for ^{b}). — (L 3864) M_1 नृत्तगीतादिभिर्वाद्यै (for ^{a}). — (L 3866) D_1 G_1 M_1 हरिसालोक्यतां व्रजेत् (for ^{b}) — (L. 3870) G_1 G(ed) [अ]न्विता (for नरा.) — M_1 om (hapl.) lines 3875^b–3876^a. — (L. 3882) M_1 उभे ह्येते महाराज (for ^{b}). — (L. 3891) D_1 $G_{1,2}$ M_1 राजसूयं (for °यांश्). — (L 3892) D_1 G_2 M_1 अश्वमेधं (for °धांश्). — (L. 3895) G(ed) महीपति (for महामना). — (L. 3896) D_1 $G_{1,2}$ पुरीं निवेश्य सचिवैर् (for ^{a}). D_1 वर्जित , G_2 वञ्चिता (for वर्जित) — (L. 3899) G(ed) पार्थिव. (for सोऽभवत्). D_1 G_2 एकाह(G_2 °ग्र)मकरोत्तप (for ^{b}) — After line 3899, G(ed) ins.

169** गमयामास राजेन्द्र पुत्रकामो महामतिः ।

—(L. 3900) G_2 वर्षे जलनिवासक (for ^{b}) — (L. 3901) G_2 हेमन्ते जलधाराया (for ^{a}). M_1 कालिन्द्यां सरिति प्रभो (for ^{a}). — (L 3904) D_1 दिवि स्थिता (for दिव गताः). — (L. 3908) G(ed) विधातारं (for अनूचाना.). — (L. 3913)

गच्छध्वं पूर्ववत्तूर्णं त्रिविष्टपमरिंदमा ॥
इत्युक्ता देवताः सर्वाश्चन्द्रादित्यमरुद्गणाः ।
त्रिविष्टपं पुनः प्रापुर्मुक्तदुःखा महाबलाः ॥
तस्मिन्नवसरे धाता विश्वयोनिः समाधिमान् ।
आजगाम नृपस्याशु प्रदातुं वरमुत्तमम् ॥

ब्रह्मोवाच ।

धर्मव्रत महाभाग तपसा तोषितोऽस्म्यहम् ।
वरं वरय भद्रं ते वरदोऽहमिहागतः ॥

भीष्म उवाच ।

ब्रह्मणोदीरितं वाक्यं श्रुत्वा प्रीतो नृपोत्तमः ।
कृताञ्जलिपुटो धीमान्नमस्कृत्वा वचोऽब्रवीत् ॥
कृतार्थोऽस्मि महाभाग पुत्रं देहि पितामह ।
अपुत्राणां तु लोकोऽस्ति नैवेति यमतः श्रुतम् ॥
कृताञ्जलिपुटं दीनं कृशाङ्गं प्रेक्ष्य विश्वसृट् ।
स्पृशन्प्रोवाच राजेन्द्र वर्धयंस्तस्य मानसम् ॥
धर्मव्रत महाभाग पुत्रोत्पत्तेस्तु कारणम् ।
दिव्यभोगप्रदं नृणां यद्व्रतं तद्वदामि ते ॥
जयन्ती भवता सेव्या विशेषेण नृपोत्तम ।
हरिप्रिया तु सा देवी जयन्ती लोकविश्रुता ।
सा दास्यति च ते पुत्रं दिव्यरूपमरिंदम ॥

धर्मव्रत उवाच ।

शत्रुभिर्हृतराज्यस्य सपुत्रस्य च मेऽनघ ।
कथं वस्तुं मया शक्यं स्वपुरे देववल्लभ ॥

ब्रह्मोवाच ।

अस्युन्नतपदं राजन्काङ्क्षिणा ब्रह्मयोनिना ।
कृता मया जयन्तीयं यया प्राप्तमिदं पदम् ॥
इच्छता राज्यपुत्रौ च त्वया सेव्या प्रयत्नतः ।
जयन्ती राजशार्दूल सर्वसंपत्प्रदा नृप ॥
इत्युक्त्वा राजशार्दूलं परमेष्ठी जगत्प्रभुः ।
स प्रहृष्टो महाराज स्वप्नं दृष्ट्वेव धर्मज ॥
तिरोदधे स भूपालो विस्मयं परमं गतः ।
उत्तस्थौ स्वपुरीं प्राप चित्रध्वजपताकिनीम् ॥
ब्रह्मणोदीरितं वाक्यं मन्त्रिवृद्धे निवेद्य च ।
श्रीजयन्तीव्रतं भूपो अकरोद्भार्यया सह ॥
तेन पुण्यप्रभावेन सुतं चन्द्रप्रभं किल ।
लेभे राज्यं च कोशं च शत्रूणामन्तकोऽभवत् ।
रिपून्निर्जित्य संग्रामे राज्ञां चैवाग्रतोऽभवत् ॥
तस्मात्त्वमपि राजेन्द्र पुत्रकामो यदि प्रभो ।
राज्यकामोऽपि वा तात कुरु व्रतमनुत्तमम् ॥
ककुत्स्थस्य प्रिया साध्वी मागधी पद्मलोचना ।
तेन सार्धमिदं कृत्वा रघुं लेभे सुदक्षिणा ॥
आज्ञां दशरथस्यास्य रामोऽपि शिरसा वहन् ।
वैदेह्या सह धर्मात्मा सुमित्रातनयेन च ।
प्रपेदे दण्डकारण्य तत्रेदमकरोत्सुधीः ॥
खरादीन्राक्षसान्हत्वा लेभे राज्यं सुतं कुशम् ।
इन्द्राणी ह्यलभत्पुत्रं जयन्तं सुरनायकम् ॥
पार्वती षण्मुखं लेभे व्रतेनानेन सुव्रत ॥
गान्धारी चैव माद्री च कुन्ती च पतिना सह ।
युष्मान्वै सुषुवे कुन्ती माद्री गान्धारसंभवा ॥
पुत्रदं पुत्रकामानां राज्यदं राज्यकामिनाम् ।
जयप्रदमिदं तात पापिनामपि पापहृत् ॥
स्वर्गमोक्षप्रदं नृणां जयन्तीव्रतमुत्तमम् ।
त्वं राजन्सर्वपापघ्नं भुक्तिमुक्तिफलप्रदम् ।
कुरु वृद्धिं च पुत्रांश्च अचिरात्प्राप्स्यसे ध्रुवम् ॥

वैशंपायन उवाच ।

श्रुत्वेदं पुण्यमाख्यानं प्रीतो धर्मसुतो वशी ।
नत्वा कृष्णं जगन्नाथं पुनः श्रोतुं मनो दधे ॥
य इदं पुण्यमाख्यानं नारदेन प्रभाषितम् ।
श्रुत्वा पापविनिर्मुक्तो नरो नाकं समश्नुते ॥

Colophon

G(ed) शुभम् (for परम्). G_1 युष्मात्प्रियकरं शुभम् (for ^{b}). — (L. 3914) G(ed.) मामेव स्तौति वै सदा (for ^{b}) — (L 3918) G_2 इत्युक्ता अपि ते सर्वे (for ^{a}) — (L. 3919) G(ed) त्यक्त- (for मुक्त-). — (L. 3920) G_2 G(ed) एतस्मिन्नन्तरे धाता (for ^{a}). — (L. 3924) ब्रह्मणो गादितं वाक्यं (for ^{a}). — (L. 3925) G(ed) नमस्कृत्येदमब्रवीत् (for ^{b}). — After line 3926, D_1 ins.

170** शत्रुभिर्हृतराज्यस्य अपुत्रस्य च मेऽनघ ।
कथं वस्तुं मया शक्य स्वपुरे देववल्लभ ॥

— (L. 3927) M_1 अपुत्रिणा न लोकोऽस्ति (for ^{a}) D_1 नैवेति श्रुतित परम्; G_2 नैव चेति मया श्रुतम् (for ^{b}). — (L. 3929) G_1 वचनं (for राजेन्द्र). G(ed.) वेद्मयह तव मानसम् (for ^{b}). — (L. 3930) D_1 महाप्राज्ञ (for °भाग). — (L. 3931) G(ed.) सर्वकाम- (for दिव्यभोग-). — D_1 om the ref before line 3935 and that before line 3937. — (L. 3940) G_1 सर्वसंपत्प्रदा यथा, G(ed) °सपत्करी तव (for ^{b}) — (L 3943) G(ed.) सप्रहृष्टो महाराजः (for ^{a}). — (L 3944) G(ed) रथस्थः स्वपुरीं प्राप (for ^{a}) — (L 3946) M_1 जयन्तीय (for श्रीजयन्ती-) D_1 जयन्तीव्रतमिद भूयो; G_1 जयन्तीव्रतमेतच्च; G(ed.) स जयन्तीव्रदमिद (for ^{a}). — (L 3958) G(ed) लेभे पुत्रं तथेन्द्राणी (for ^{a}) — (L 3961) M_1 गान्धारी चैव सुव्रता (for ^{b}) — M_1 om line 3963 — (L 3963) G(ed.) श्रीजयन्तीव्रत तात (for ^{a}) G_2 पापिनां पापनाशनम् (for ^{b}) — G_2 G(ed) om. lines 3967–3968 — (L. 3970) G_1 विष्णुसायुज्यमाप्नुयात् (for ^{b}).

COLOPHON — *Sub-parvan* · D_1 आश्चर्यपर्वणि शेषधर्मा· ; G_1 M_1 G(ed) शेषधर्मा — *Adhy. name* : D_1 G_1 M_1 G(ed) जयन्तीमाहात्म्यम्. — *Adhy. no* · D_1 G_1 ः M_1 30 ; G(ed) 31.

वैशंपायन उवाच ।
देवदेवारविन्दाक्ष मायातीत महामते ।
त्वत्पादकमलं वन्द्यं नमामि सततं विभो ॥
इति निश्चित्य मनसा धर्मराजः पितामहम् ।
विनयावनतो भूत्वा प्राञ्जलिर्वाक्यमब्रवीत् ॥
युधिष्ठिर उवाच ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
मोक्षोपायं सतां सङ्ग यन्मे तद्ब्रूहि पापहम् ॥
भीष्म उवाच ।
पापिनो मनुजस्येह सत्सङ्गान्मुक्तिरिष्यते ।
परया हरिभक्त्या च शाश्वती भवति प्रभो ॥
शृणु पार्थ महाभाग माहात्म्यं शार्ङ्गधन्विन· ।
तस्य संनिधिमात्रेण नराणां मुक्तिरव्यया ॥
नारायणः पर ज्योतिर्ज्योतिषां ज्योतिरुत्तमम् ।
ये प्रपन्ना महात्मानस्तेषां मुक्तिर्हि शाश्वती ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
सर्वपापहरं पुण्यमायुर्वर्धनमुत्तमम् ॥
आसीत्पुरा महाराज क्षत्रियो लोककण्टक ।
नक्षत्रवर्मा बलवान्मूर्खो वै लोकपीडकः ॥
परदारपरद्रव्यग्रहणे सततोद्यत ।
अधर्मनिरतो नित्यं बहुधा जनपीडकः ॥
हतवान्ब्राह्मणान्गाश्च शतशोऽथ सहस्रशः ।
देवस्वहरणे नित्यं परस्वहरणे तथा ।
उद्युक्त सर्वदा राजंश्चोरव्याधैश्च सेवितः ॥
तेन पापान्यनेकानि कृतानि सुबहूनि च ।
न तेषां शक्यते वक्तुं संख्या वत्सरकोटिभिः ॥
स कदाचिन्महाभाग सर्वेषामन्तकोपम· ।
विदेहनगरं राजन्सर्वसंपत्समायुतम् ॥
योषिद्भिर्भूषिताभिश्च पुरुषै· पदसायुधै· ।
सर्वमङ्गलसंयुक्तैर्विविधैश्च पदातिभिः ॥
अलंकृतं विपणिभिस्तोरणैः सर्वतोमुखैः ।
ययौ पुरं बहुविधैः पूरितं धनराशिभि ॥
तस्योपकण्ठे देवस्य मन्दिरं मणिपूरितम् ।
हाटकैर्निर्मितै· कुम्भैः शलाकैः काञ्चनैश्चितम् ।
तप्तकाञ्चनसाहस्रैर्निर्मितैस्तोरणैर्युतम् ॥
एवंभूतं देवगृह नानागोपुरशोभितम् ।
नक्षत्रवर्मा बलवान्दृष्ट्वा तत्र मुदं ययौ ॥
हराम्यत्र सुवर्णानि बहूनीति विनिश्चितः ।
जगाम विष्णुभवन नक्षत्रश्चौर्यलोलुप· ॥
तत्रापश्यद्द्विजवरं शान्त तत्त्वार्थकोविदम् ।
परिचर्यापर विष्णोरुदङ्कं तपसां निधिम् ।
एकाकिनं दयालुं च नि स्पृहं ध्यानलोलुपम् ॥
दृष्ट्वा नक्षत्रवर्मासौ स्वचौर्यस्यान्तरायिनम् ।
देवताद्रव्यजालं तु समादातुमना निशि ।
उदङ्कं हन्तुमारेभे विवृतासिर्मदोद्धत ॥
पादेनाक्रम्य तद्वक्षो जटां संगृह्य पाणिना ।
हन्तुं कृतमतिं क्रूरमुदङ्क प्रेक्ष्य चाब्रवीत् ॥
भो भो साधो वृथा मा त्वं हनिष्यसि निरागसम् ।
मया किमपराद्धं ते कृतं तद्ब्रूहि सुव्रत ॥
कृतापराधिनं लोके शिक्षां कुर्वन्ति यत्नत ।
न हिंसन्ति वृथा सौम्य सज्जना अपि पापिनम् ॥
विरोधिष्वपि मूर्खेषु दृष्ट्वा वै चोत्तमान्गुणान् ।
विरोध नाधिगच्छन्ति सज्जनाः शान्तचेतसः ॥
बहुधा बाध्यमानोऽपि यो नर क्षमयान्वितः ।
तमुत्तमं नरं प्राहुर्विष्णोः प्रियकरः स्मृत· ॥
अहो विधिर्वै बलवान्बाधते विविधं जनान् ।
सर्वसङ्गविहीनोऽपि बाध्यते हि दुरात्मना ॥
अहो निष्कारणं लोके बाध्यन्ते पापिनो जनान् ।
तत्रापि साधून्बाधन्ते न समानान्कथंचन ॥
अहो माया बलवती मोहयत्यखिलं जगत् ।
पुत्रमित्रकलत्रार्थं सर्वदु.खे नियोक्ष्यते ॥
परद्रव्यापहरणे कळत्रं पोषितं त्वया ।
अन्ते तत्सर्वमुत्सृज्य एक एव प्रयाति हि ॥
मम माता मम पिता मम भार्या ममात्मजः ।
ममेदमिति जन्तूनां ममता बाधते वृथा ॥
यावदर्जयसि द्रव्यं तावदेव हि बान्धवाः ।
धर्माधर्मौ सहैवास्तां धनादीनां समार्जने ॥
यद्भावि तद्भवत्येव यन्न भावि न तद्भवेत् ।

(L. 3971) G_1 प्रपन्नार्तिहर प्रभो (for [b]) — D_1 om the ref. — (L 3976) G(ed) शुभं मे ब्रूहि पावनम् (for [b]). — G_2 om. the ref — (L 3977) G_2 पापिनो मनुजाः सर्वे (for [a]) — (L. 3980) D_1 स्मरण- (for सांनिधि-) — (L. 3981) D_1 ब्रह्म (for ज्योति·). — (L 3984) G_1 M_1 आयुर्वर्धनकारणम् (for [b]). — (L. 3987) G(ed) -हरणे सततोद्यत (for [b]). — (L 3998) D_1 G_1 M_1 G(ed) तोमरैः (for तोरणै). — (L. 4002) G(ed) -चित्रैश्च (for -साहस्रैर्). G_2 M_1 वृतम् (for युतम्) — (L 4004) G(ed)) सु- (for वि). G_1 बहून्यत्र सुनिश्चित (for [b]). — (L 4006) M_1 क्षत्रियश् (for नक्षत्रश्) — (L. 4009) G_2 निःस्पृहं धनलोलुप· (for [b]). — (L 4011) D_1 समादातुमगान्निशि (for [b]). — (L 4014) M_1 G(ed.) शूरम (for क्रूरम्). — (L. 4016) M_1 कृतापराध लोके हि (for [b]) — (L. 4020) G_2 साधु- (for शान्त·). — (L 4022) D_1 M_1 विष्णो प्रियकर नरा (for [b]) — (L. 4023) D_1 G_2 विदिताम् (for विविध) G_1 जनम् (for जनान्). M_1 बाधते विदितात्मना (for [b]). — (L 4025) G(ed) नरान् (for जनान्). G_1 बाध्यन्ते विविधा जनाः (for [b]). — (L 4028) $G_{1,2}$ सर्वदु.खं (for °दु खे). D_1 सर्वदुःखेन बाध्यते (for [b]) — (L 4029) M_1 G(ed) कलत्र पोषयस्यपि (for [b]). — (L. 4031) D_1 नृपात्मज (for ममात्मज·). — (L. 4034) D_1 समं जनैः (for

इति निश्चितबुद्धीनां न चिन्ता बाधते क्वचित् ॥
अहो दु खं मनुष्याणां ममताकुलचेतसाम् ।
महापापानि कृत्वापि परास्तुष्यन्ति यत्नत ॥
अर्जितं तु धनं सर्वं भुञ्जते बान्धवा· सदा ।
स्वयमेकस्तमोमूढस्तत्पापफलमश्नुते ॥
इति ब्रुवाणं तमृषिं विमुच्य भयविह्वलः ।
नक्षत्रः प्राञ्जलिः प्राह क्षमस्वेति पुन पुन· ॥
सता सङ्गप्रभावेन हरिसंनिधिमात्रत ।
गतपापो ववन्देऽथ ह्यनुतापीदमब्रवीत् ॥
मया मूढेन पापानि कृतानि सुबहूनि च ।
तानि सर्वाणि नष्टानि विप्रेन्द्र तव दर्शनात् ॥
अहोऽहं पापधीर्नित्यं महापापं समाचरन् ।
कथं मे निष्कृतिर्भूयात्कं यामि शरणं प्रभो ॥
पूर्वजन्मार्जितै पापैर्लुब्धकत्वमवाप्तवान् ।
क्षत्रियोऽपि च पापानि कृत्वा कां गतिमाप्नुयात् ॥
अहो ममायु· क्षयमेति सर्वं
पापान्यनेकानि समार्जितानि ।
प्रतिक्रिया नापि कृता मयैषां
गतिश्च का स्यान्मम जन्म किं वा ॥
अहो विधि पापशताकुलं मां
किं सृष्टवान्भारतरं च मह्या ।
कृतं च पापं च मया च भोज्य
कियत्सु जन्मस्वहमुग्रजन्मा ॥

भीष्म उवाच ।

एवं विनिन्द्य चात्मानं नक्षत्रो ह्यात्मना तदा ।
अन्तस्तापाग्निना दग्धः सद्य· पञ्चत्वमागत. ॥
उदङ्कः पतितं प्रेक्ष्य नक्षत्रं तु दयापरः ।
हरिपादोदकेनैव ह्यभ्यषिञ्चन्महामतिः ॥
हरिपादोदकस्पर्शान्नक्षत्रो गतकल्मष. ।
दिव्य विमानमारुह्य मुनिमेनमथाब्रवीत् ॥
उदङ्क मुनिशार्दूल गुरुस्त्वं मम सुव्रत ।
विमुक्तस्त्वत्प्रसादेन महापातककञ्चुकात् ॥
ज्ञानं त्वदुपदेशान्मे संजातं मुनिपुंगव ।
तेन मे पापजालानि विनष्टान्यतिवेगतः ॥
हरिपादोदकं यस्मान्मयि त्वं सिक्तवान्मुने ।
प्रापितोऽस्मि त्वया तस्मात्तद्विष्णो परमं पदम् ॥
त्वयाहं कृतकृत्योऽस्मि प्राप्तवानुत्तमं पदम् ।
तस्मान्नतोऽस्मि ते विद्वन्यत्कृतं तत्क्षमस्व मे ॥
इत्युक्त्वा देवकुसुमैर्मुनिमेनमवाकिरत् ।
प्रदक्षिणत्रयं कृत्वा नमस्कारं चकार ह ॥
ततो विमानमारुह्य सर्वकामसमन्वितम् ।
अप्सरोगणसंकीर्णं प्रपेदे हरिमन्दिरम् ॥
एतद्दृष्ट्वा विस्मयान्तो ह्युदङ्कस्तपसा निधिः ।
शिरस्यञ्जलिमाधाय अस्तौषीत्कमलापतिम् ॥
लोकनाथ नमस्तेऽस्तु सर्वभूतदयापर ।
पाहि मां पुण्डरीकाक्ष संसारभ्रमपीडितम् ॥
त्वयाहं तारितो देव सर्वजन्मकृतैरघै ।
त्वत्संनिधिं प्रविष्टस्य क्षत्रबन्धोर्दुरात्मन ।
पश्यतो मे महाभाग मुक्तिमद्य प्रदत्तवान् ।
त्वत्पादकमलादन्या गतिर्मेऽस्ति न विद्यते ॥
पाहि पाहि जगन्नाथ प्रणतार्तिप्रणाशन ।
त्वमेव जगता नाथ गतिर्मे भक्तवत्सल ॥

भीष्म उवाच ।

एवं वै कृतकृत्येन मुनिना प्रार्थितो हरि ।
दर्शयित्वा स्वकं रूपं तमादाय स्वकं पदम् ।
गत्वा तं स्थापयामास मुनिं सारूप्यतां गतम् ॥
तस्मात्त्वमपि राजेन्द्र सत्सङ्गं कुरु सर्वदा ।
सत्सङ्गान्मुक्तिमाप्नोति सत्यं नारदभाषितम् ॥
त्वया सर्वेषु कालेषु सन्त पूज्या युधिष्ठिर ।
तृप्तास्ते तु प्रदास्यन्ति भुक्तिं मुक्तिं च शाश्वतीम् ॥
य इदं पुण्यमाख्यानं नारदेन प्रभाषितम् ।
शृणोति सततं भक्त्या ब्रह्मलोकं स गच्छति ॥
विषयेषु विरक्ति. स्याद्विष्णुभक्तिर्दृढा भवेत् ।
केशवस्य पदं गत्वा सर्वान्वंशान्समुद्धरेत् ॥

Colophon

समार्जने). — After line 4041 D_1 ins. ·

171** जीवसद्भावमात्रेण कर्मभोगक्षयेण च ।

While G_2 ins. after line 4042 :

172** यानि सर्वाणि तिष्ठन्ति तानि विप्रेन्द्रशासनात् ।

— (L 4045) G_2 G(ed) पापेन (for पापानि). — (L 4047) D_1 पापयोनित्वान् (for °धीर्नित्यं) D_1 अकारिषम्, M_1 समाचरम् (for °रन्) G_1 मम पाप चिरं कृतम् (for [b]) — (L. 4054) G_1 गतिश्च काम मम जन्म उग्रम् — (4055) D_1 -गति कुलं (for -शताकुल). — (L. 4056) M_1 त्वमव्यय (for च मह्या·) G_2 किं सृष्टवान्भारतभूमिभागे — (L 4058) $G_{1,2}$ अयमुग्रजन्मना (G_2 °न्मन्) (for अहमुग्रजन्मा) — Before line 4065, D_1 ins. नक्षत्र:. G_2 om. lines 4069[b]–4070[a]; M_1 om. lines 4070–4071 — (L 4070) तस्माद्विष्णो· परं पदम् (for [b]). — (L 4072) G_1 M_1 यत्कृत्य तद्दस्व मे (for [a]) —(L 4078) D_1 तुष्टाव (for अस्तौषीत्). — Before line 4079, G_2 ins उदङ्क — After lines 4088, G_2 ins :

173** जगाम भगवान्विष्णुर्भक्तानामिष्टदायक ।

— G_2 om. lines 4089–4094, M_1 om. (hapl) lines 4093–4095 — (L 4096) M_1 G(ed) विरक्तस्य (for °क्तिः स्याद्) — (L 4097) G_2 सर्वं पश्यन्, G(ed.) सर्वान्वंश्यान् (for °शान्)

COLOPHON. — *Sub parvan:* D_1 G_1 आश्चर्यपर्वणि शेषधर्मा., G_2 M_1 G(ed) शेषधर्मा — *Adhy name* D_1 सत्सङ्गमाहिमा; M_1 G(ed.) सत्सङ्गप्रशसा.— *Adhy. no.:* D_1 $G_{1,2}$ M_1

वैशंपायन उवाच ।

श्रुत्वैतत्पुण्यमाख्यानं प्रसन्नवदनो नृप ।
कृष्णं भक्तप्रियं नत्वा पाहि पाहीति चाब्रवीत् ॥

युधिष्ठिर उवाच ।

शङ्खतीर्थमिति ख्यातं कावेर्या दक्षिणे तटे ।
कृष्णेन सूचितं देव तस्योत्पत्तिं वदस्व मे ॥
कावेर्याः पुण्यनद्यास्तु स्थानं यत्पुण्यवर्धनम् ।
यस्मिन्देशे ऋषिगणा देवताः सततं स्थिता ॥
पुण्याश्रमसमायुक्तमुभयोस्तीरयोरपि ।
प्रख्यातं पापहं स्थानं तात मे संप्रकीर्तय ॥
ब्रह्मक्षत्रियवैश्यानां शूद्राणां चैव योषिताम् ।
मुक्तिप्रदेति विख्याता कावेरीं तां प्रकीर्तय ॥

भीष्म उवाच ।

ब्रह्मणा हि पुरा गीतं नारदाय महात्मने ।
तेनेदं मम धर्मात्मन्कारुण्यादुदितं खलु ॥
भूप्रदक्षिणकाले तु मया वै सेविता पुरा ।
सर्वपापहरा देवी कावेरी कलिनाशिनी ॥
त्वदर्थं सप्रवक्ष्यामि ह्यनुभूतं मया श्रुतम् ।
तृप्त्यर्थं तव वक्ष्यामि शृणु नान्यमनाः प्रभो ॥
कावेर्या दक्षिणे पार्श्वे श्रीनिवासस्य पृष्ठत. ।
शङ्खतीर्थमिति ख्यातं तीर्थानामुत्तमं परम् ॥
पुरा सुधांशुर्धर्मात्मा चचार तप उत्तमम् ।
मधुकैटभहन्तुर्वै प्रसादात्कान्तिमाप्तवान् ॥

युधिष्ठिर उवाच ।

किमर्थं तप्यते तेन ताराणामधिपेन वै ।
तस्मै वरं कथं दत्तं विष्णुना सर्वजिष्णुना ॥
देवव्रत महाभाग कथ्यतां मे कुतूहलम् ।
अस्ति चेन्मयि कारुण्यं तव देवव्रत प्रभो ॥

भीष्म उवाच ।

पुरा बृहस्पतेर्भार्यां शीतांशुः सौम्यरूपवान् ।
अपहृत्य चिरं कालं तया सार्धं मुमोद ह ॥
विज्ञाय चरितं त्वेतद्भार्यायाः शशिनः प्रभो ।
मा मेति प्रार्थयित्वा तं पश्चाच्चैनं शशाप ह ॥
क्षयी भव दुराचारः सर्वलोकेषु निन्दित ।
इति शप्त्वा क्षमस्वेति देवैः स प्रार्थितो विभुः ।
सुरलोकं विसृज्यैव प्रपेदे ब्रह्मणः सभाम् ॥
तदाप्रभृति धर्मात्मा विसृज्य च वराननाम् ।
अस्मिन्क्षेत्रे तपश्चक्रे बृहस्पतिभयार्दितः ॥
वर्षाणामयुतं राजंश्चचार तप उत्तमम् ।
शापाच्च तपसा चैव कृशाङ्गो भाति चन्द्रमाः ।
अवशिष्टकलामात्रो देवानामग्रभुक्तदा ॥
वागीशं तुष्टुवुर्देवाः क्षम्यतां क्षम्यतां प्रभो ।
वृद्धिं ददस्व भूयस्त्वमस्माकं हितकाम्यया ॥

भीष्म उवाच ।

तथाकरोद्देवगुरुर्देवानां हितकाम्यया ।
तपसा कृपया चैव भूयो वृद्धिमवाप्तवान् ॥
तस्मिन्काले जगन्नाथमस्तौषीत्कमलापतिम् ।
स्रष्टारं सर्वलोकानां योगिध्येयमरिंदमम् ॥

चन्द्रमा उवाच ॥

नमस्ते लोकनाथाय नमस्ते धर्मरूपिणे ।
नमस्ते कमलाकान्त प्रणतार्तिप्रणाशन ॥
आद्यन्तशून्यं देवेशं सृष्टिस्थित्यन्तकारिणम् ।
वेदमूर्तिं सहस्राक्षं नौमि सर्वात्मकं हरिम् ।
जगद्रूपमुदाराङ्गं पीताम्बरधरं हरिम् ।
कौस्तुभेन विराजन्तं सर्वगं तं नमाम्यहम् ॥
पापघ्नं सर्वभक्तानां दिव्यमालाविभूषितम् ।
नीलजीमूतसंकाशं तं नतोऽस्मि रमापतिम् ॥
आकाशमध्यगं देवमनन्तमपराजितम् ।
वासुदेवं प्रपन्नोऽस्मि सर्वपापक्षयोऽस्तु मे ।
नमस्कारप्रभावेन नश्यत्वद्यामयः प्रभो ॥
स्तूयमानं सदा देवैर्वेदैश्च ब्रह्मवादिभिः ।
नतोऽस्मि तं हरिं सूक्ष्मं नाशं यातु च मे जरा ॥
अन्तर्यामिञ्जगत्साक्षिन्भक्तवत्सल सर्वग ।
मत्कल्मषाणि सर्वाणि यान्तु नाशं नतोऽस्मि ते ॥
इति स्तुतो जगन्नाथः सर्वसिद्धनिषेवितः ।
आययौ गरुडारूढो यत्रास्ते रोहिणीपतिः ॥
ध्यायन्तं सर्वगं देवं हृदि शङ्खादिभूषितम् ।
दृष्ट्वा सर्वगतो विष्णुर्विधुमाह सविस्मयः ॥
वरं वरय भद्रं ते निशाकर सुधाकर ।
स्तोत्रेण तपसा चैव तुष्टोऽहं नितरां प्रभो ॥

---

31 ; G(ed.) 32.

(L. 4099) D1 G1 कृष्णभक्ति- (for कृष्ण भक्त-). —(L. 4101) G(ed.) वदाद्य (for वदस्व) —(L 4106) G2 ब्राह्मणक्षत्रियविशां (for °) — For lines 4106–4109, D1 subst. :

174** भीष्म: ।
तताहं सप्रवक्ष्यामि शृणु नान्यमनाः प्रभो ।

—(L. 4110) D1 कावेर्या दक्षिणे कूले (for °) —(L. 4122) G(ed.) काम्य- (for सौम्य-). — (L. 4127) D1 शप्तः (for शप्त्वा). — (L 4131) D1 वायुभक्षः सदा श्रीमांश् (for °). — D1 om lines 4135–4137 — (L. 4139) D1 अरिंदम ; G1 अनुत्तमम् (for अरिंदमम्) — G1 M1 शशी (for चन्द्रमा). D1 om. line 4140. —(L. 4141) M1 नमस्ते लोकमूर्तये (for [b]) —(L. 4143) M1 सर्वार्थगं (for °त्मकं). — (L. 4149) D1 -क्षयं कुरु ; G1 -क्षयान्मम ; G2 -क्षयो मम (for -क्षयोऽस्तु मे) — (L 4151) G(ed.) मुनिभिर् (for वेदैश्च) — (L. 4153) D1 G1, 2 अन्तर्यामी जगत्साक्षी (for °). D1 G1 M1 सर्वगो(D1 °शो) भक्तवत्सलः). G2 श्रीपते पुरुषो-

इत्युक्तो देवदेवेन सुधांशुस्तं प्रणम्य च ।
ययाचे श्रीपतिं देवं वराणामुत्तमं वरम् ॥
पाहि पाहि जगन्नाथ कान्तिं मे वर्धयस्व ह ।
सौभाग्यमण्डलं देहि गुरोः शाप निवारय ॥
इत्युक्तो वै जगन्नाथ शङ्खपूतेन वारिणा ।
अभिषिच्य वरं तस्मै ददौ सर्वगत प्रभु ॥
तमाह शर्वरीनाथं नमन्तं सौम्यवर्चसम् ।
परिपूर्णा कला सर्वा ह्रासवृद्ध्या भवन्तु ते ॥
शृणु सौम्य महाभाग त्वया यत्सेवितं स्थलम् ।
शङ्खतीर्थमिति ख्यातिं गमिष्यति न संशय ॥
त्वया च यत्कृतं स्तोत्रं पठतां शृण्वतामपि ।
सर्वपापानि नश्यन्तु रोगाणि बलवन्ति च ॥
अस्मिन्वै मज्जनात्तीर्थे सर्वसंपद्भविष्यति ।
अस्नायिनां मनुष्याणां दारिद्र्यं भवति ध्रुवम् ॥
एवमुक्त्वा जगन्नाथ शीतांशुं धर्मनन्दन ।
अदूरे तस्य पुरत श्रीनिवासस्थलं गत ॥
स्थित्वा तत्र मुहूर्तं तु पूजितो देवतागणै ।
स्वधाम प्रययौ श्रीमान्नारदाद्यैरभिष्टुत ॥
निशाकरोऽपि धर्मात्मा मुनिभिः परिपूजित ।
तस्मादेशाद्ययौ स्वर्गं प्रपेदे च स्वकं पदम् ॥
सर्वे ऋषिगणा विद्वन्स्तत्र चक्रुरकल्मषाः ।
यज्ञैर्यज्ञपतिं केचिज्ज्ञानयोगविचक्षणाः ।
आराध्य तं चिरं कालं तत्पदं ते प्रपेदिरे ॥
पौलस्त्यनिधनं कृत्वा रामचन्द्र प्रतापवान् ।
अत्र स्नात्वा कपिगणै पुनीत स्वपुरं ययौ ॥
पुरा हि भार्गवो रामो राजवंश्यान्निहत्य च ।
स्नात्वात्रैव चिरं कालं प्रपेदे परमं पदम् ॥
सुत्रामा देवराजश्च अहल्यां काममोहित ।
गत्वा तु तत्फलं प्राप्य स्त्रीचिह्नं गौतमात्खलु ॥
तद्दोषपरिहारार्थं स्नात्वा चाब्दत्रयं प्रभो ।
अत्रैव प्राप्तवान्रूपं सर्वतेजोमयं शुभम् ॥
श्रीनिवासमिदं क्षेत्रं शङ्खतीर्थात्पुरः स्थितम् ।
स्नातानां सर्वपापघ्नं भुक्तिमुक्तिफलप्रदम् ॥
कावेरीमज्जनं पुण्यं दुर्लभं ह्यकृतात्मनाम् ।
पुरा संचितपुण्यानामप्रयत्नेन लभ्यते ॥
पुरा लोकहितार्थाय ब्रह्मणा निर्मिता त्वियम् ।
तस्मात्स्नातव्यमत्रैव नित्यशः पापभीरुभिः ॥
करोमि मज्जनं देव्यां कावेर्यां यो वदेत्सुधी ।
वदते तस्य पापौघो नाशकालो ममेति च ॥
आकल्पजन्मभिः पापं संचितं यन्नरै प्रभो ।
तत्सर्वं भस्मसान्माघे कावेरीमज्जनाद्भवेत् ॥
तेजोमयेषु लोकेषु भुक्त्वा भोगाननेकश ।
पश्चान्मोक्षमवाप्नोति कावेर्यां स्नाति यो नर ॥
कावेरी तु महापुण्या स्मृता पापप्रणाशिनी ।
संसेव्या सर्वदा विप्रै संसारच्छेदलिप्सुभिः ॥
पापक्षयकरं स्नानं सृष्टिकर्ता पितामहः ।
इय लोकहितार्थाय निर्ममे निपुण क्षितौ ॥
दक्षिणस्यां दिशि विभु कावेरीं कलिनाशिनीम् ।
गङ्गामुत्तरदिग्भागे नश्यन्ती पापिनामघम् ।
सृष्ट्वा मुदं ययौ श्रीमांस्तस्यां स्नात्वा तु नो भयम् ॥
विष्णुपादोद्भवा देवी कावेरी पापनाशिनी ।
मज्जतां सर्वपापानि छिनत्त्येव न संशय ॥
चन्द्रसूर्यग्रहे चैव संक्रान्तावयने तथा ।
सिद्धयोगे पुण्यदिने चन्द्रादित्यमरुद्गणा ॥
गन्धर्वा लोकपालाश्च यक्षविद्याधरा नृप ।
ब्राह्मी माहेश्वरी लक्ष्मी शची मेनादितिर्दितिः ॥
घृताची मेनका रम्भा ह्युर्वशी च तिलोत्तमा ।
अन्याश्चाप्सरसां संघाः कावेर्यां स्नानतत्पराः ।
माघे चैतासु तिथिषु स्नात्वा यान्ति सुरालयम् ॥
भस्मानि यत्र दृश्यन्ते कावेर्या पार्श्वयोरपि ।
सुराणां तु मखस्नान विद्धि तत्रैव भारत ॥
तपः कुर्वन्ति मुनयो ह्यद्यापि मनुजेश्वर ।
शान्ता जितारिषड्वर्गा ह्यदृष्टा पापकर्मभिः ॥
स्नातव्यं यत्नतो राजन्कावेर्यां धर्ममिच्छता ।
स्नातानां तु शुभो लोको भविष्यति न संशयः ॥
तस्मात्त्वमपि राजेन्द्र कावेरीस्नानमाचर ।
वाञ्छितार्थप्रदा देवी कावेरी पापनाशिनी ॥

वैशंपायन उवाच ।

या इदं पुण्यमाख्यानं नारदेन प्रभाषितम् ।
श्रुत्वा पापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥

Colophon.

सम (for [b]) —(L. 4159) D_1 महामते (for सुधाकर). —(L. 4163) D_1 कान्तिं मे वर्धय प्रभो (for [b]) — D_1 om. lines 4173–4174. —(L 4174) M_1 मज्जता (for °नात्). —(L. 4479) M_1 मुनिभि पूजितस्तदा (for [b]).—(L 4185) D_1 G_1 M_1 मुनि- ; G(ed.) ऋषि- (for कपि-) —(L 4186) G(ed) निगृह्य (for निहत्य). —(L. 4188) M_1 अहल्या-कामलोलुप (for [b]) — $G_{1,2}$ om lines 4192–4194 —(L. 4192) D_1 दैवतैरपि पूजितम् (for [b]) —(L 4195) G_2 प्रयत्नेन हि लभ्यते (for [b]).—(L 4197) G_1 स्नातव्यम् (for स्था°). D_1 तस्मात्संज्ञाप्य मन्त्रेण (for [a]). —(L. 4198) G(ed.) कावेर्यां रङ्गसंनिधौ (for [b]) —(L. 4199) $G_{1,2}$ M_1 G(ed.) वेपन्ते तस्य पापानि (for [a]). —(L 4201) D_1 M_1 -स्नानतो ; G_2 -संगतो (for -मज्जनाद्) —(L. 4208) G_1 G(ed) भुव (for विभु) —(L. 4216) G(ed.) धृतिर् (for दितिर्). G_1 धृति (for दिति). G_2 चण्डी मेना दितिः शुभा (for [b]). — After line 4219, D_1 ins :

175** स्नातव्यं सततं राजन्कावेर्यां धर्ममिच्छता ।

—(L 4223) D_1 ते प्रशान्तारिषड्वर्गा (for [a]). — D_1 om. line 4224. —(L 4224) G_2 सुखम् (for धर्मम्). —(L. 4229) G(ed.) शृणोति पापनिर्मुक्तो (for [a]).

गमिष्ये त्वत्प्रसादेन हरिं जेतुं पितामह ।
इत्युक्त्वा प्रययौ पार्थ क्षीरोद बलदर्पित ॥
तत्र सर्वगतं विष्णुमदृष्ट्वा विस्मयं गत. ।
किं करोमि क्व यास्यामि क्व च पश्यामि संप्रति ॥
कर्मणा फलदो विष्णुर्भूलोके स्थितिमेष्यति ।
इति निश्चित्य मनसा भूलोकं प्राप्तवान्प्रभु ॥
तस्य बुद्धिरियं जाता मदान्धस्यातिदुर्मतेः ।
विवेकं नैव पश्यन्ति बलिन. कामुकाः खलु ॥
अहो हरि सर्वगतो भूमौ संप्रति संस्थित ।
पातालं नेतुमिच्छामि ससद्वीपां वसुंधराम् ॥
इति निश्चित्य मनसा सागर समुपाविशत् ।
कण्ठमात्रमभूत्तोय तस्य दैत्यस्य धर्मज ॥
प्रसार्य हस्तं पाताले वाम दक्षिणमुत्तरे ।
चालयामास पृथिवीं कल्पान्ते दिग्गजा इव ॥
वसुधा लोकमातेयं कम्पमाना पुन. पुनः ।
अस्तौषीज्जगतामीश सर्वगं भक्तवत्सलम् ॥

वसुधोवाच ।

श्रीनिवास नमस्तेऽस्तु नमो विश्वकुटुम्बिने ।
नमो विश्वपते तुभ्यं नमस्ते जलशायिने ॥
नम क्षीराब्धिवासाय नमस्ते सूक्ष्मरूपिणे ।
नमो देवाधिदेवाय नमो विद्युत्प्रभाय च ॥
नमस्ते वसुधानाथ नमस्ते भक्तवत्सल ।
शङ्खचक्रगदापाणे नमो नन्दकधारिणे ॥
पाहि मां भयसंत्रस्तां पद्मनाभाय ते नमः ।
नमश्चैतन्यरूपाय पृथ्वीधर नमोऽस्तु ते ॥
मत्स्यवामनरूपाय कूर्मरूपाय ते नमः ।
नारसिंहाय रामाय नमो दामोदराय च ॥
कृष्णाय यादवेन्द्राय वासुदेवाय चक्रिणे ।
नमस्ते पुण्डरीकाक्ष पाहि लोकपते प्रभो ॥
इति स्तुतो जगन्नाथो धरण्या पाण्डुनन्दन ।
सांनिध्यमगमद्विष्णुरन्तर्यामी जगन्मय ॥
मा भैषीरित्युक्तमात्रे तु विद्युन्मण्डलवत्प्रभुः ।
चक्रमादाय चिच्छेद कैटभस्य शिरस्तदा ॥
धरामाश्वास्य विश्वात्मा तया सार्धमरिंदम ।
इद क्षेत्रं समागत्य सोऽतिष्ठत्प्रभुरव्यय ॥
अत्र स्थित हरिं ज्ञात्वा सर्वलोकधरः प्रभु ।
अनन्त प्रेषयामास स्वसुतं शङ्खपालकम् ॥

अनन्त उवाच ।

शृणु पुत्रक मद्वाक्यं श्रीनिवासो जगन्मय ।
कावेर्या दक्षिणे पार्श्वे कावेर्या च तरंगिते ॥
ऋषेरौद्दालकस्यैव ह्याश्रमे मुनिसेविते ।
सिद्धविद्याधरगणै सेविते पुण्यपादपै ।
श्वेततिन्त्रिणिबिल्वैश्च श्वेतजम्बूकपित्थकै ॥
एवं भूते जगन्नाथ श्रीनिवासो जगन्मयः ।
श्रिया च वसुमत्या च सेव्यमानस्तु तिष्ठति ॥
तमेव सेवमानस्तु वर्तयस्व तदन्तिके ।
अदृष्ट. सर्वमनुजैः परां सिद्धिं गमिष्यसि ॥
एवं प्रबोधितस्तेन ह्यनन्तेन महात्मना ।
शङ्खपालो नमस्कृत्य वचनं चेदमब्रवीत् ॥
भगवन्सर्वनागेन्द्र सर्वशास्त्रविशारद ।
किमर्थं तप्यते तेन ऋषिणा करुणात्मना ॥
तदहं श्रोतुमिच्छामि विस्तरेण महामते ।
यदर्थं सर्वनागेन्द्र कृपा मयि तवास्ति चेत् ॥
इत्युक्त शङ्खपालेन शेषो लोकधर प्रभु ।
औद्दालकस्य चरितमब्रवीत्कामदं शुभम् ॥

Colophon

अनन्त उवाच ।

ऋषिरौद्दालको नाम वेदवेदाङ्गपारगः ।
शान्तो जितेन्द्रियो मौनी सदा ध्यानपरायण ॥
अत्रैव सुचिरं कालं तपश्चक्रे महामतिः ।
चत्वारिंशद्युगं तात ह्यहोरात्रमिवाकरोत् ॥
तेनैव तपसा तुष्टो ब्रह्मा लोकपितामह ।
यत्र तिष्ठति धर्मात्मा ऋषिरौद्दालको मुनि ।
तं देशमधिगम्याशु वचनं चेदमब्रवीत् ॥
औद्दालक महाभाग तुष्टोऽहं तपसा हि ते ।
वरं वरय भद्रं ते वरदोऽहं प्रजापतिः ॥

आगम्य (for °त्य).—(L 4294) G_1 जिताश्च लोकास्त्वत्तोऽहं ; G_2 M_1 जिता स्म लोकास्ताताहं (for ^{a}) —(L 4298) G_2 दृष्ट्वा विस्मयमागत. , G_3 अदृष्ट्वा ध्यानमागत (for ^{b}). —(L 4310) G(ed) मुहुर्मुहु (for पुन पुन). —(L 4318) G(ed) -वित्रस्तां (for -सं°) —(L 4320) G_2 कूर्मवाराहरूपिणे , M_1 °रूप नमोऽस्तु ते (for ^{b}) —(L 4321) D_1 नमो दाशरथे नम. (for ^{b}) —(L 4322) D_1 वासुदेव त्रिविक्रम (for ^{b}). —(L 4325) G_3 अन्तर्धाम जगद्गुरु (for ^{b}). —(L 4326) G(ed) मा भैषीरिति तामुक्त्वा (for ^{a}).—(L 4328) M_1 धर्मात्मा (for विश्वात्मा) —(L 4333) D_1 कावेर्या चतुरान्तिके ; G_2 पुलिने च मनोरमे (for ^{b}) — G_2 om line 4334. —(L. 4336) G_3 G(ed.) श्वेतैश्च (G_2 केतकी) तिन्त्रिणीबिल्वै (for ^{a}) —(L 4339) D_1 तस्य वै सेवनार्थं तु ; G_2 तस्य वै सेव्यमानस्य (for ^{a}) —(L. 4343) M_1 कृपा मयि तवास्ति चेत् (for ^{b}) —(L 4346) D_1 तत्सर्वं वद नागेन्द्र (for ^{a}). M_1 सर्वशास्त्रविशारद (for ^{b}). —Before line 4347, M_1 ins. भीष्म

COLOPHON — *Sub-parvan* D_1 G_1 G(ed.) आश्चर्यपर्वणि शेषधर्मा , G_3 M_1 शेषधर्मा — *Adhy name* G(ed) कावेरीमाहात्म्यम्. — *Adhy no.* D_1 $G_{1,2}$ M_1 33 , G(ed) 34.

D_1 G_2 M_1 शेष (for अनन्त) —(L 4352). D_1 [अ]ग्निहोत्रम् , G_2 [अ]होरात्रिम् (for °त्रम्). —(L 4354) G(ed) महान् (for मुनि). — Before line 4356, M_1 ins. ब्रह्मा. —(L 4356) D_1 $G_{1,2}$ तृप्तो (for तुष्टो) D_2 तव

ब्रह्मणोदीरितं वाक्य श्रुत्वा मुनिवरोऽब्रवीत् ।
भगवन्देवदेवेश कृतार्थोऽस्मि त्वदागमे ।
यथा प्रीणाति मे विष्णुस्तथा कुरु महामते ॥
शृणुष्व मद्वचः पुत्र यदा लोकेश्वरो हरि ।
हनिष्यत्यसुरं मुख्यं तदा ते दर्शनं भवेत् ॥
स्थित्वात्र कतिचित्कालं श्रीनिवासो जगन्मयः ।
वेदान्तै सेव्यमान सन्स्वं धाम समुपष्यति ॥
राज्ञां तु दुर्विनीतानां पौलस्त्यस्य दुरात्मनः ।
कृत्वा तु निधनं तेषामत्रैव स्नातुमेष्यति ।
रामाख्यो भगवान्विष्णुः सत्यं सत्यं न संशयः ॥
पुरंदरमुखा देवा' स्थास्यन्त्यत्रैव नित्यशः ।
श्रीनिवासमिदं क्षेत्रं लोके ख्यातिं गमिष्यति ॥
इत्युक्त्वान्तर्दधे पार्थ देवानां प्रपितामहः ।
तदाप्रभृति धर्मिष्ठ ऋषिरौद्दालको बुध' ।
प्रसन्नं देवदेवस्य पश्यन्नास्ते मुखं द्विजः ॥
आविर्बभूव धर्मात्मा देवोऽपि जगतीपति' ।
श्रीनिवासस्य सेवार्थं गच्छ पुत्र कुरुष्व ह ॥
शेषेणैवं प्रयुक्तोऽसौ शङ्खपाल प्रतापवान् ।
अमुं क्षेत्रं समागत्य परिचर्यापरो मुनिः ।
विष्णो· सर्वात्मनो राजन्नद्यापि कुरुते सुखी ॥

युधिष्ठिर उवाच ।

पाताळात्कुत्र सांनिध्यमगमच्छङ्खपालक' ।
देवव्रत महाभाग तं देशं मे वदस्व ह ॥

भीष्म उवाच ।

अगस्त्ये पश्चिमे तीर्थे शङ्खाख्ये तु महाह्रदे ।
आविर्बभूव शेषेण चोदित' शङ्खपालक ॥
तदिदं चाभवत्क्षेत्रं क्षेत्राणामुत्तमं परम् ।
तीर्थानां चैव सर्वेषामुत्तमं तत्प्रचक्षते ॥
अगस्त्यो भगवानत्र लिङ्गभूतात्तु शंकरात् ।
तपस्तप्त्वा महातेजा ह्यणिमादिगुणी ह्यभूत् ॥

युधिष्ठिर उवाच ।

किमर्थमत्र दृश्यन्ते नैव ते द्रुमजातय ।
एको वसति बिल्वोऽसौ श्वेतः पुण्यतरुः किल ॥

भीष्म उवाच ।

कृते कपित्थस्त्रेतायां तिन्त्रिणी द्वापरे नृप ।
जम्बू कळौ युगे बिल्वो युगानां तु क्रमाद्धृताः ॥

श्रीनिवासपुरं ज्ञेयं कावेर्या दक्षिणे तटे ।
युगत्रयावधिस्तस्य ततो वै लयमेष्यति ॥
देवता श्रीनिवासस्य ऋषिरौद्दालकः स्मृतः ।
स्मर्तॄणां मुक्तिदं विद्धि गतानां वसतां किमु ॥
अद्यापि निर्जराः सर्वे परमस्थानकाङ्क्षया ।
वाञ्छन्ति वस्तुमत्रैव ऋषयश्च तपोधनाः ।
मृतानां सर्वपापानि छित्त्वा मुक्तिं ददाति च ॥

युधिष्ठिर उवाच ।

औद्दालको मुनिश्रेष्ठ किं कार्यमकरोत्ततः ।
तस्मै वर' कथं दत्तो विष्णुना प्रभविष्णुना ।
तत्सर्वं वद तत्त्वेन देवव्रत महामते ॥

भीष्म उवाच ।

तपः कुर्वति धर्मिष्ठे श्रीनिवासो जगन्मयः ।
सांनिध्यमगमद्राजञ्श्रिया सार्धमरिंदम ॥
स्पृशंस्तस्य शरीरं तु सर्वलोकेश्वरो हरि' ।
ददौ वरं तमाहूय ब्राह्मणं विगतस्पृहम् ॥

श्रीभगवानुवाच ।

तुष्टोऽस्मि तव धर्मज्ञ तपो निवर्त्यतां द्विज ।
द्विवारं ते मम ब्रह्मन्दर्शनं तु भविष्यति ॥
मम रामस्य रामस्य ततो मल्लोकमेष्यसि ।
त्वया स्थितमिदं स्थानं धर्मवृद्धिर्भविष्यति ॥
इत्युक्त्वान्तर्दधे देवो देवाना हितकृद्धरि. ।
तस्मात्त्वमपि राजेन्द्र श्रीनिवासं भजस्व ह ॥
स्नातव्यं यत्नतो जप्यं कावेर्यां हरिसंनिधौ ।
श्रीनिवासमिदं क्षेत्र दुर्लभं तु कलौ युगे ।
पुरा संचितपुण्यानामप्रयत्नेन वर्धते ॥
तत्र स्नाताः पापिनोऽपि पितृमातृकुलानि च ।
सहस्राणि समुद्धृत्य विष्णुलोकं व्रजन्ति हि ॥
सर्वपापक्षयकरी सर्वोपद्रवनाशिनी ।
स्मृतार्तिनाशिनी राजन्कावेरी पुण्यदायिनी ॥
दृष्टमात्रा हि कावेरी श्रीनिवासस्य संनिधौ ।
ददाति श्रीयुतं स्थानं नात्र कार्या विचारणा ॥
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
श्रीनिवासं च कावेरीं नित्यं स्मरति यो नरः ॥
स्वर्गलोकप्रदा नृणां ब्रह्मलोकप्रदा तु सा ।

(for हि ते) —(L 4357). M_1 उपागत' (for प्रजापतिः) — Before line 4359, M_1 ins औद्दालकि and before line 4361, D_1 M_1 ins ब्रह्मोवाच. —(L. 4361) G_1 यथा योगेश्वरो हरि' (for ^{b}). —(L 4365) G(ed) महात्मनः (for दुरा°) — D_1 om. line 4368. —(L 4372) G(ed) -देवेश (for -देवस्य). D_1 G_2 G(ed) द्विजोत्तम (for मुख द्विज) —(L 4376) D_1 G_2 ऽभवत् (for मुनि) —(L 4379) G_1 कथयस्व; G(ed.) मे वदाद्य (for मे वदस्व) —(L 4380) G_2 M_1 शङ्खाह्वे (for °ख्ये).—(L. 4383) G_1 G(ed) तीर्थानामुत्तम चैव (for ^{a}). G_1 G(ed.) सर्वेषा (for उत्तमं). —(L. 4385) G_2 महाघोर (for °तेजा). G_1 M_1 -गुणान्वितः; G(ed.) -गुणान्ययौ (for -गुणी ह्यभूत्).— G_2 om lines 4392–4396 —(L 4393) D_1 G_1 M_1 स्थिताना (for स्मर्तॄणां). —(L. 4401) G_2 श्रीनिवासो महामते (for ^{b}). — G_1 om. the ref —(L 4404) D_1 तृप्तो (for तुष्टो). —(L 4405) G(ed) द्वापरान्ते (for द्विवार ते) —(L. 4406) G_2 ततो लोकं गमिष्यसि, M_1 ततो लोकमुपे° (for ^{b}).—(L. 4407) D_1 धर्मवृद्ध, G(ed.) पुण्यवृद्धिर् (for धर्म°). —(L. 4408) M_1 शुभ-

सूर्यलोकप्रदा देवी चन्द्रलोकप्रदा तथा ।
सूर्याचन्द्रमसोर्लोकं शिवलोकप्रदायिनी ॥
स्नातानां संगमे चास्या. श्रीनिवासस्य चाग्रत. ।
विष्णुलोकप्रदा नृणा साक्षात्कृष्णेन भाषितम् ॥
षण्मासं पुत्रकामस्तु स्नाति तत्र हि यो नर ।
कृपया वासुदेवस्य पुत्रांश्च लभते ध्रुवम् ।
राज्यकामो लभेद्राज्यं धनकामो लभेद्धनम् ॥
अब्दत्रयं व्रत कृत्वा कावेर्या स्नाति यो नर ।
इह लोके सुखं भुक्त्वा वैकुण्ठे सोऽश्नुते सुखम् ॥
एवं प्रबोधितस्तेन कावेर्या स्नानवैभवम् ।
देवव्रतेन धर्मात्मा धर्मपुत्रो महामति. ॥
प्रणम्य वैभव देव्या कावेर्या विविधं स्थलम् ।
श्रोतुकामो महातेजा गाङ्गेय पुनरब्रवीत् ॥

युधिष्ठिर उवाच ।

पितामह नमस्तेऽस्तु पीत्वा तव वचोऽमृतम् ।
तृप्तिरद्य न मे जाता कावेर्यास्तीर्थसंश्रवे ॥
संगमे कपिलायास्तु कावेर्याश्च महामते ।
यत्फल तु भवेन्नृणां तन्मे त्वं कृपया वद ॥
चन्द्रार्कपुष्करिण्योस्तु वह्निपुष्करिणी तटे ।
कुम्भघोणे महाक्षेत्रे हेमवत्यास्तु संगमे ॥
विश्वेश्वरे भृगुक्षेत्रे गजारण्यस्य वैभवम् ।
तत्रेदं तस्य विवरं ऋषीणा तत्र वर्तनम् ॥
अन्यच्चैव भवान्वेत्ति कावेर्या स्नानवैभवम् ।
कीर्तयस्व महाभाग कीर्तनादघनाशनम् ॥

सूत उवाच ।

प्रार्थितो धर्मपुत्रेण भीष्म· कुरुकुलोत्तमः ।
चिरं ध्यात्वा नमस्कृत्य गङ्गां यदुकुलोत्तमम् ।
अब्रवीन्मधुरं वाक्यं धर्मसूनुमरिंदमम् ॥
परोपकारिण सन्तो धर्मार्थैं स्वकलेवरै· ।
वाचा किमुत सर्वेषां कुर्वन्ति प्रीणयन्ति च ॥

ये लोके भूसुरा विप्रा धर्मान्वक्ष्यन्त्यमिथ्यया ।
ते सर्वे पापनिर्मुक्ता प्रयान्ति ब्रह्मण पदम् ॥
रात्रौ दिनमुखे विप्रा निरुद्योगमना प्रभो ।
शृण्वन्ति सत्कथा ये ते यान्ति विष्णो परं पदम् ॥
कावेर्या· कीर्तनं ये तु कुर्वन्ति ह्यनिशं नरा· ।
ते सर्वे पापनिर्मुक्ता प्रयान्ति ब्रह्मण पदम् ॥
श्रीनिवासस्य माहात्म्यं कावेर्या स्नानवैभवम् ।
शृणोति य सदा भक्त्या सर्वान्कामान्समश्नुते ॥
य इद पुण्यमाख्यानं शृणोति श्रद्धया नरः ।
सर्वपापविर्मुक्तो ब्रह्मलोकं स गच्छति ॥

Colophon

वैशंपायन उवाच ।

श्रीनिवासस्य माहात्म्य श्रुत्वा प्रीतो महामतिः ।
धर्मराजः पुन. प्राह कावेरी कीर्तयेति च ॥

भीष्म उवाच ।

अहो वक्ष्यामि माहात्म्य कावेर्या कुरुनन्दन ।
यस्य श्रवणमात्रेण सर्वपापै प्रमुच्यते ॥
वह्न्यर्कपुष्करिण्योश्च माहात्म्यं प्रवदामि ते ।
पुष्करिण्योस्तयोर्मध्ये पापिनामघनाशनम् ॥
वह्निपुष्करिणी गत्वा नरा· पापावृता अपि ।
प्रयान्ति विष्णुभवनं परमानन्ददायकम् ॥
वह्निपुष्करिणीस्नानं ईश्वरस्यावलोकनम् ।
कुर्वन्ति ये नरा भक्त्या ज्वलनार्कसमप्रभाः ।
हंसयुक्तेन यानेन यान्ति विष्णो परं पदम् ॥
वह्निपुष्करिणी राम आदित्यकुलसंभवः ।
अकरोद्भार्यया सार्धं लक्ष्मणेन महात्मना ॥
ब्राह्मणेभ्यो धनं दत्त्वा सहरिः सविभीषण ।
गायत्र्याख्यां शिला राजन्नधिरुह्य जजाप च ॥
देवानां चैव सर्वेषां मातर भुवनेश्वरीम् ।
आराध्य मनसा राजन्कावेरीं वै ननाम च ॥

(for हित-). — G2 om lines 4410–4414 —(L 4410) G(ed.) स्नानं यद्यत्तपो जप्यं (for ᵃ). — (L 4412) G(ed) लभ्यते (for वर्धते).— G2 om lines 4419–4429 M1 om. line 4422.— (L. 4423) G(ed) सकृत्स्मरणमात्रेण (for ᵃ). D1 शिवलोकं ददाति सा (for ᵇ) — (L. 4425) G(ed) विष्णुलोको भवेन्नृणां (for ᵃ) —(L 4427) D1 M1 देवदेवस्य (for वासु°) —(L 4428) G1 G(ed) धनलाभो (for °कामो) — D1 G1 2 M1 om line 4429 — After line 4430, G(ed.) ins. .

177** इह लोके सुखं भुक्त्वा वैकुण्ठ सोऽश्नुते सुखम् ।

— Before line 4431, D1 G1 ins सूत and G(ed) वैशंपायन — —(L 4433) G(ed) शिरसा (for वैभवं) G1 कावेर्यां स्नानवैभवम् , G(ed.) °र्यां विविधस्थलम् (for ᵇ) — G2 om. the ref.— (L. 4438) G2 यद्भवेत्तु फलं नृणां (for ᵃ) — (L 4439) D1 चन्द्र- (for वह्नि-) —(L 4441) G(ed) गजारण्ये च वैभवम् (for ᵇ) — (L 4446) G1 हरिं (for गङ्गा). — (L 4447) D1 अरिंदम , G1 अनुत्तमम् (for अरिंद°). — (L 4448) D1 धनैरर्थैं (for धनार्थैः स्व-). — G1 M1 om (hapl) 4452–4455 — (L 4452) D1 निरुद्योगे महात्मसु , G(ed) °गा जितेन्द्रिया (for ᵇ). — (L. 4454) D1 कुर्वन्तेऽहर्निश नरा (for ᵇ)

COLOPHON — *Sub-parvan* D1 G1 M1 आश्चर्यपर्वणि शेषधर्मा , G2 G(ed) शेषधर्मा .— *Adhy name* M1 G(ed.) कावेरीमाहात्म्यम् — *Adhy no.* D1 G1 2 M1 34 , G(ed.) 35

(L 4460) G(ed) महीपाति (for महामाति) — (L. 4461) G1 G(ed) धर्मपुत्र (for °राज) — (L 4462) D1 कावेर्या स्नानवैभवम् (for ᵇ) — (L. 4463) G2 M1 नरः

आहूय सीतया सार्धं तत्र विश्रवसः सुतम् ।
अब्रवीन्मधुरं वाक्यं सर्वलोकोपकारकम् ॥
विभीषण महाभाग ब्राह्मणेभ्यो ददस्व ह ।
सौवर्णानि च रत्नानि धनानि विविधानि च ॥
रावणो निहतः संख्ये सीतार्थं सर्वराक्षसै' ।
राक्षसाना च सर्वेषां तृप्तिरद्य भविष्यति ॥
यत्त्वया सेविता देवी कावेरी पापनाशिनी ।
निवापः क्रियतामत्र युष्मत्पितृगणं प्रति ॥
अत्र कुर्वन्ति ये श्राद्धं पितॄणा मुक्तयेऽनघ ।
तेषां पुरातनास्तात प्रयान्ति हरिमन्दिरम् ॥
जप कुर्वन्ति ये विप्रा ह्यत्र पापविवर्जिता ।
प्रयान्ति हरिसालोक्यं नारदात्तु मया श्रुतम् ॥
सङ्गात्तु यत्कृतं पापमग्रजेन त्वयापि वा ।
तत्सर्वं लयमायातु ह्यगस्त्यानुग्रहात्प्रभो ॥
सत्सङ्गात्प्राप्यते स्वर्गो दु'सङ्गान्निरयो ध्रुवम् ।
तस्मात्त्वया कृत' सङ्गस्तेनैव लयमेष्यति ॥
कृतकृत्यो भवानेको राक्षसानां दुरात्मनाम् ।
सत्सङ्गतोऽप्यसङ्गित्वं तव जातं महामते ॥
अगस्त्येन पुरा तात कावेरी पुण्यदायिनी ।
सर्वलोकहितार्थाय निर्मिता पुण्यकर्मणा ॥
वैदेहि पश्य कावेरी गङ्गाद्यां सर्वतोमुखाम् ।
कवेरकन्यां सर्वासां नदीनां प्रवरां शुभाम् ॥
अगस्त्यपत्नी पापघ्नीं ब्रह्मणो मानसीं सुताम् ।
स्नातव्यमत्र वै भीरु त्वया दानानि यत्नतः ॥
दातव्यानि च विप्रेभ्यो वासांसि विविधानि च ।
रत्नानि विप्रमुख्येभ्यो भूमिदानमनुत्तमम् ॥

भीष्म उवाच ।

राघवेन्द्रस्य तद्वाक्यं श्रुत्वा परमपावनम् ।
पौलस्त्यप्रमुखाः सर्वे स्नाताश्च कपिराक्षसाः ॥
वैदेही च महाभागा स्नात्वा दत्त्वा वसूनि च ।
कान्तिं लेभे स्वकां तत्र सर्वतेजोमयीं शुभाम् ॥
एतस्मिन्नन्तरे धीमान्मुनीनामग्रणीः प्रभुः ।
मुनीनामपि सर्वेषामगस्त्यो भगवानृषि' ।
सेव्यमानो मुनिगणैराययौ रामसंनिधिम् ॥
बोधायनस्तु भगवानापस्तम्बोऽथ गालव ।
शातातपो मयः शङ्ख कात्यायनबृहस्पती ॥
संवर्तौ यमकण्वौ च गौतम पुलहः क्रतु' ।
विश्वामित्र. स्थूलशिरा कचश्च्यवनभार्गवौ ॥
सत्याषाढ शतानन्दो देवलो लोमश प्रभुः ।
व्यास. पराशरश्चैव याज्ञवल्क्यश्च भारत ॥
एवमाद्या महात्मानो मुनय. संशितव्रताः ।
राममालोकितुं जग्मुर्दर्शनान्मुक्तिदं प्रभुम् ।
अगस्त्यमग्रतः कृत्वा सर्वे वै मुनिपुंगवाः ॥
कृताशिषं राममुदीक्ष्य सर्वे
संत्यक्तकृच्छ्रं सह लक्ष्मणेन ।
निरीक्ष्य सेनां महतीं विमानं
सविस्मयं पुष्पकमाजगाम ॥
अथ रामो महातेजा गाधन्याख्यशिलातले ।
नत्वा मुनीनां सर्वेषामर्घ्यं पाद्यं चकार ह ॥
विनयावनतो भूत्वा रामो धर्मभृता वर ।
सस्मित वचन चेदमुवाच वदतां वरः ॥
कुशलं वो मुनिश्रेष्ठा. पुनीतो भवदागमे ।
सौमित्रिर्जानकी चाहं ऋक्षवानरराक्षसा ॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ।
अद्य मे पापजालानि ध्वस्तानि भवदागमे ॥
इत्युक्त्वा तु मुनीन्सर्वान्पुनर्नत्वा महामति ।
प्राञ्जलि सीतया सार्धमुत्तस्थे लक्ष्मणेन च ॥
गृहीतार्घ्यैर्मुनिगणैर्निषीदेत्यनुसञ्ज्ञितम् ।
अगस्त्योऽप्याह धर्मात्मा रामचन्द्रमकल्मषम् ॥
काकुत्स्थ करुणासिन्धो राम राम हितंकर ।
दिष्ट्या प्राप्तोऽसि वैदेह्या लक्ष्मणेन महात्मना ॥
त्वया संरक्षितो लोको अद्य वै करुणाकर ।
निहत्य रावणं संख्ये यज्ञशत्रुं दुरासदम् ॥
ऋषीणामग्निकल्पानां रक्षितानि तपांसि ते ॥
अस्माभिर्यानि कर्माणि कृतानि सुबहूनि च ।
सफलानि भवन्त्यद्य राम त्वद्दर्शनात्प्रभो ॥

पापात् (for सर्वपापै) — (L 4470) D1 हसयुक्तविमानेन (for ^{a}) — (L. 4471) G(ed) वह्निपुष्करिणीस्नानम् (for ^{a}) — (L 4481) M1 सीतार्थे तव राक्षसै (for ^{b}). — G2 om line 4484 — (L 4486) G2 नष्टा' स्यु पापकर्मण' (for ^{b}) — (L. 4488) G2 नात्र कार्या विचारणा (for ^{b}). — (L 4491) G2 दु सङ्गान्नरक व्रजेत् (for ^{b}). — G2 om lines 4492–4498 D1 om line 4494 — (L. 4500) D1 संतर्प्य चात्र वैदेहि (for ^{a}) — G2 om lines 4502–4504 M1 om the ref — (L 4507) D1 G(ed) योगिनाम् (for मुनी°) — D1 G2 M1 om line 4508 — (L 4509) D1 M1 ऋषि- (for मुनि-) — (L 4512) G2 संवर्तकश्च कण्वश्च (for ^{a}). — (L 4514) D1 सत्यायुप. (for °षाढ) — (L 4516) G2 महाभागा (for °त्मानो) D1 ऋषयश्च मुनीश्वरा. (for ^{b}), — (L 4520) M1 संत्यज्य सर्वं (for °क्तकृच्छ्रं) — (L 4522) D1 सविरिग १ तस्थुग्कल्मषा द्विजाः ; M1 °य ते गतकल्मषा जनाः ; G(ed.) °यास्तस्थुरकल्मषाः पुरः — Before line 4527, G(ed.) ins. श्रीरामः .— (L. 4527) G1 कुल च मे ; M1 कुशलं वै (for °लं वो). — (L. 4529) G2 अद्य मे जन्मसाफल्यं (for ^{a}) — (L 4532) D1 उत्तस्थौ (for °स्थे) — For line 4533, G2 subst. :

178** गृहीतार्घ्यै मुनिगणे ऋषि' परमपावन' ।

— (L 4533) D1 [उ]क्तमञ्जसा (for [अ]नुसंज्ञितम्. — Before line 4535, D1 ins. अगस्त्य . — D1 om. (hapl) lines 4544–4545. M1 om. (hapl.) lines 4544^{b}–4545^{a}. — After line 4547, D1 ins. :

हिताय सर्वलोकानां जातं रघुकुले शुभे ।
विष्णुं पुरातनं वेद्मि त्वामद्य रघुनन्दन ॥
संशास्ता सर्वलोकानां रक्षिता शिक्षितानघ ।
आवासः सर्वभूतानां त्वमेव रघुनन्दन ॥
ब्रह्मविष्णुमहेशानां सृष्टिस्थित्यन्तकारिणम् ।
विदुस्त्वां राजशार्दूल रघुवंशविवर्धन ॥
इक्ष्वाकूणामयं वंशस्त्वया राम महामते ।
दिवो मार्गो यथा नूनं सवित्रा पावनीकृत. ॥
एव ब्रुवाणं तं रामो मुनिं नत्वा पुनः पुन ।
अब्रवीन्मधुरं वाक्यं विनयावनतो नृप ॥
अगस्त्य मुनिशार्दूल ब्रह्मन्साक्षात्पिता यथा ।
संरक्षिता वयं सर्वे युष्माभिर्दण्डकावने ॥
कृपया तव विप्रेन्द्र पौलस्त्यं जितवानहम् ।
त्वया दत्तौ मुनिश्रेष्ठ तूणी चाक्षयसायकौ ॥
खड्गो दत्तो जितामित्रो लक्ष्मणस्य महात्मनः ।
तेनैवेन्द्रजितं हत्वा त्वया संरक्षितो रणे ॥
सीता संरक्षिता तात राक्षसीगणसेविता ।
अदृष्टा राक्षसैर्मूर्खैः कृपया तव सुव्रत ॥
भूयोऽपि दर्शनं प्राप्ता त्वया मुनिवरोत्तम ।
अत्र किं करणीयं मे तद्ब्रूहि करवाण्यहम् ॥

वैशंपायन उवाच ।

सुधासारमयं वाक्यं श्रुत्वा प्रीतो मुनीश्वरः ।
उवाच रामं धर्मज्ञं वदतां वरमव्ययम् ॥
गायत्र्याख्या शिला चेयं सर्वपापप्रणाशिनी ।
अस्यास्तु पुरतो राजन्कर्तव्या तु गवाकृति· ।
कुरु गोप्रसरं तस्या. कुक्षौ सिद्धिं गमिष्यसि ॥
तथेति मुनिवाक्येन प्रीतो रघुकुलोत्तमः ।
गां तु स्वर्णमयीं कृत्वा तस्या. कुक्षौ प्रविश्य च ।
दानानि च बहून्यत्र ब्राह्मणेभ्यो ददौ नृप. ॥
ऋषयोऽपि कपीन्द्राश्च राक्षसा भीमदर्शनाः ।
कृत्वा गोप्रसरं सर्वे पापैस्तत्र विमोचिता· ॥
शिवलिङ्गप्रतिष्ठां च कृत्वा तत्र मुनीश्वरैः ।
पूजयित्वा तु धर्मात्मा गायत्र्याख्यां शिलां गत ॥
लक्ष्मण पूजयामास शंकर दक्षिणे तटे ।
वानराश्चैव रक्षांसि पूजयामासुरव्ययम् ॥
दक्षिणे लक्ष्मणक्षेत्रमुत्तरे राघवस्य च ।
सेव्यमानं सदा देवैर्मुक्तिभुक्तिफलप्रदम् ॥
गायत्र्युपलमध्यस्थो रामो रघुकुलोत्तम· ।
अगस्त्यं प्राह धर्मात्मा कृताञ्जलिपुटस्तदा ॥
भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
इयं शिला तु गायत्र्या नाम्ना ख्यातिं कथं ययौ ।
नूनं तत्तु भवान्वेत्ति कृपया वद सुव्रत ॥

अगस्त्य उवाच ।

पुरा वृत्रवधं कृत्वा सुत्रामा रघुनन्दन ।
तद्दोषपरिहारार्थं कावेर्यां स्नातुमागत ॥
ब्रह्मणो वचनाद्राम गायत्री वेदमातरम् ।
अस्यां शिलायामारुह्य जजाप च चतुर्युगम् ॥
सान्निध्यमकरोद्देवी गायत्री द्विजवन्दिता ।
तमब्रवीन्महाभाग मरुत्वन्तमरिंदमम् ॥
तुष्टाहं तव सुत्रामंस्तपसा तोषितास्म्यहम् ।
वरं वरय भद्रं ते वरदाहमिहागता ॥

इन्द्र उवाच ।

वृत्रस्य निधनाद्देवि महापापमुपस्थितम् ।
तद्दोषपरिहारार्थं त्वं मयोपासितानघे ॥
अघं मे नाशय क्षिप्रं पाहि मा स्वपुरे शुभे ।
बुद्धिस्वास्थ्यं मन स्वास्थ्यं कुरु मे सर्वमङ्गले ॥

गायत्र्युवाच ।

तथा भवतु धर्मिष्ठ त्वया या सेविता शिला ।
गायत्री नामतो वज्रिँल्लोके ख्यातिं गमिष्यति ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकै. ।
अत्र जप्त्वा दिवं याति गतपापो महामते ॥
इति तस्मै वरं दत्त्वा गायत्री तु तिरोदधे ।

179** ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूप शिवे स्थित· ।
स्वय हि भगवान्विष्णु· पालयत्यखिलं जगत् ॥

— (L. 4549) D1 नृणा (for नूनं). — Before line 4550, D1 G1 G(ed.) ins. भीष्म — (L 4553) D1 त्वया वै दण्डके वने (for ᵇ). — (L 4558) G1 M1 G(ed) -संवृता (for -सेविता) — (L 4559) G2 M1 रक्षिता (for अदृष्टा). — G2 om lines 4560–4561 — G2 om. the ref. G1 भीष्म (for वैशंपायन). — (L 4562) G2 -धारामृत, M1 -धारामय (for -सार°). — (L. 4563) G1 राजन्, G(ed.) वाक्य (for रामं). D1 उवाच मधुरं वाक्य (for ᵃ) — For line 4563, G2 subst.

180** उवाच राजशार्दूलं धर्मज्ञं वदतां वरम् ।

— Before line 4564, D1 G1 G(ed.) ins. अगस्त्य· and before line 4567, D1 M1 ins भीष्मः — (L 4569) G2 ददौ नत्वा पुन पुन (for ᵇ) — (L 4570) G2 ऋषयः कपयश्चैव (for ᵃ) — (L. 4572) D1 शिवलिङ्गं प्रतिष्ठाप्य (for ᵃ) — (L 4573) G(ed) पूजयामास धर्मात्मा (for ᵃ). —M1 om (hapl) line 4575.— (L 4575) G(ed) ईश्वरम् (for अव्ययम्) — (L 4576) D1 दक्षिणे लक्ष्मण तीर्थम् (for ᵃ) D1 उत्तरे रामतीर्थकम्, G1 M1 °रे राममव्ययम, G(ed) °रे रामसेविते (for ᵇ) — (L 4581) D1 नाम्ना सेय च गायत्र्या; G1 नाम्ना गायत्र्याख्या चेयं (for ᵃ) D1 G1 M1 कथ ख्यातिमगात्प्रभो, G2 कथ ख्यातिं गमिष्यति (for ᵇ) — (L 4586) G1 आरोप्य; G2 M1 आरूढो (for आरुह्य) — (L 4591) D1 अवस्थितम्, G(ed) समुत्थि° (for उपस्थि°) — (L.4593) G2 पाहि मा शुभदर्शने (for ᵇ). — After line 4602, D1

तस्माद्राघव जप्या सा गायत्री लोकवन्दिता ॥
ब्रह्मपुत्रो हि पौलस्त्यस्त्वया वै निहतो रणे ।
तद्दोषपहारार्थं गायत्र्यास्तु जप कुरु ॥

राम उवाच ।

तथा करोमि भगवस्त्वद्वचो मे हितं शुभम् ।
अयोध्यामृषिभि· सार्धं गन्तुमद्य त्वमर्हसि ।
यास्ये वानरमुख्यैश्च सार्धं रक्षोगणैः प्रभो ॥

भीष्म उवाच ।

इत्युक्त्वा तं नमस्कृत्य पुन. स्नात्वा युधिष्ठिर ।
छन्दसा मातरं जप्त्वा पुनर्दानानि दत्तवान् ॥
अगस्त्यो भगवानाह धर्मज्ञं सत्यसंगरम् ।
हरन्तं सर्वसंतापं देहिनामीश्वरं शुभम् ॥
तथा कुरु रघुश्रेष्ठ यास्ये पश्चाद्द्विजै सह ।
स्नात्वात्र ऋषिभिः सार्धं जप्त्वा वै वेदमातरम् ॥
इति मुनिवचनं निशम्य रामो
भुजविजितं विमानमेत्य सर्वैः ।
सपदि समुपगतवानयोध्यां
मुनिवरनिकरैरभिष्टुतात्मा ॥
स्नाता नरा ह्यत्र महाघसंयुता
दिवं प्रयान्त्येव कुमार्गगा अपि ।
तस्मादियं पाण्डव दुर्लभा भुवि
गङ्गा यथा ह्युत्तरदेशगामिनी ॥
अश्वमेधसहस्रं हि सविता त्वजयन्नप ।
तेन पुण्यप्रभावेन सहस्रांशुरभूत्प्रभुः ॥

युधिष्ठिर उवाच ।

श्रीमता राघवेणेयं तप्तहाटकनिर्मिता ।
दृषद्रूपं समास्थाय दृश्यते धेनुरुत्तमा ।
एतन्मे कथ्यतां तात पापघ्नी पापनाशिनी ॥

भीष्म उवाच ।

क्रूराः कलौ युगे राजन्प्रभविष्यन्ति हिंसकाः ।
मत्वैवं मतिमान्विद्वानगस्त्यः कृतवान्दृषत् ।
तस्मादगस्त्यशापेन दृषद्रूपमुपागता ॥
पापानां नाशिनी धेनुर्दुर्लभा पापिनां कलौ ॥
वाञ्छितार्थप्रदा देवी कावेरी पापनाशिनी ।
शिला मोक्षप्रदा ह्येषा गायत्र्याख्या युधिष्ठिर ॥
महापातकयुक्तो वा यो वा को वा नृपोत्तम ।
मुच्यते सर्वपापेभ्यो रामलिङ्गस्य दर्शनात् ॥
य इद पुण्यमाख्यानं राघवेन्द्रस्य चेष्टितम् ।
श्रुत्वा पापविनिर्मुक्तो यानारूढो दिवं व्रजेत् ॥

Colophon

भीष्म उवाच ।

अत ऊर्ध्वं प्रवक्ष्यामि ह्यर्कपुष्करिणीं नृप ।
यस्या' श्रवणमात्रेण नर पापै प्रमुच्यते ॥
अर्कपुष्करिणीतीरं गतानां सर्वदेहिनाम् ।
नश्यन्ति सर्वपापानि स्नातानां किमिहोच्यते ॥
पुरा विभावसुर्धीमांस्तपस्तेपे सुदुश्चरम् ।
तपसा तोषितो रुद्र सांनिध्यमगमत्प्रभु ॥
तं निरीक्ष्य तपस्यन्त दिवाकरमरिंदमम् ।
प्राह गम्भीरया वाचा पार्वतीपतिरव्ययः ॥
सवित पश्य मा देवमुमापतिमरिंदमम् ।
वाञ्छितार्थप्रद विद्धि तपसा तोषितं तव ॥
एवमुक्तो महातेजाश्चण्डांशुश्च महामति· ।
प्रणम्य शूलिनं देवं सविता स्तौति शंकरम् ॥

आदित्य उवाच ।

नम शिवाय रुद्राय देवाना पतये नमः ।
ईशाय विष्णुरूपाय शूलिने परमात्मने ॥
नम शर्वाय देवाय शंकराय नमो नमः ।
भूतेशाय नमस्तुभ्यं गिरीशाय नमो नमः ॥
मृत्युंजय विरूपाक्ष नमस्ते वेदरूपिणे ।
नमः पिनाकहस्ताय कृत्तिवासाय ते नमः ॥
भूताय भूतरूपाय भूतेशाय नमो नम· ।
उग्राय भीमरूपाय श्रीकण्ठाय नमो नमः ॥

(marg.) ins.

181** इति तस्य वच श्रुत्वा राघवो मुनिरब्रवीत् ।

— G_2 om lines 4603^b–4604^a — (L. 4604) G_2 गन्तुमर्हसि सुव्रत (for ^{b}) — (L 4605) G_2 अयोध्यां राक्षसैः सह (for ^{b}). — G(ed.) om the ref. — (L. 4622) G_2 M_1 राघवेन्द्रेण (for °णेय) — (L. 4624) G_2 पापघ्न पापनाशनम्, G(ed.) [illegible] (for ^{b}) — (L 4625) G_2 M_1 शूरा (for क्रूरा) D_1 तस्करा (for हिंसका) — (L. 4626) G(ed) अगस्त्यश्च शशाप गाम् (for ^{b}) — G_2 om. lines 4630–4632 — (L 4632) D_1 G_1 M_1 कोटि- (for सर्व-). — (L. 4634) G_2 M_1 G(ed) तु पाप- (for पापवि-).

Colophon — *Sub-parvan :* D_1 M_1 आश्चर्यपर्वणि शेषधर्माः ; $G_{1,2}$ G(ed.) शेषधर्माः. — *Adhy. name :* D_1 G(ed.) वह्निपुष्करिणीप्रशंसा. — *Adhy. no.* : D_1 $G_{1,2}$ M_1 35 ; G(ed.) 36.

(L 4636) G_1 सर्व- (for नर'). — G_2 om. lines 4637–4638. — (L. 4638) G(ed.) स्नातानां किमुतानघ (for ^{b}). — (L, 4643) D_1 अवस्थितम् (for अरिंदमम्). — G_1 om. the ref G_2 सविता (for आदित्य). — (L. 4649) $G_{1,2}$ शिवाय (for शर्वाय) — D_1 om. (hapl.) line 4650' G_1 M_1 om (hapl.) lines 4651–4656. — (L. 4651) D_1 G(ed) -मूर्तये (for -रूपिणे). — (L. 4652) D_1 G(ed.) नमस्ते कृतिवाससे (for). — M_1 om. (hapl) lines 4653–

चन्द्रचूडामणे तुभ्यं वामदेवाय ते नमः ।
कृशानुरेतसे तुभ्य सर्वज्ञाय नमो नम ॥
त्रिपुरान्तक नमस्तेऽस्तु मृत्युरूपाय ते नमः ।
धर्माय धर्मरूपाय सुधर्मपतये नम. ॥
यज्ञाय यज्ञरूपाय यज्ञानां फलदायिने ।
वेदमूर्ते नमस्तुभ्यं ब्रह्मविष्णुशिवात्मने ॥
एवं स्तुत्वा वर वव्रे नन्दिवाहनमव्ययम् ॥
आदित्य उवाच ।
त्रयाणामपि मूर्तीनां शार्ङ्गे मे शंकर प्रभो ।
देहि देहभृतां मोक्ष मामेव स्तुवतां सदा ॥
मया कृतमिदं स्तोत्र शृण्वतां वदतामपि ।
सर्वपापक्षयं देव कुर्वस्यास्तीरवासिनाम् ॥
स्नातानामत्र कावेर्यामाख्यान शृण्वतामपि ।
एतान्सर्वान्पशुपते देहि मे करुणाकर ॥
इति स्तुतो महादेवो दत्त्वा तस्मै वरान्बहून् ।
तथास्त्विति तमामन्त्र्य भूतै' सह तिरोदधे ॥
स भानुस्तत्र तं देवं चिरमाराध्य भक्तित ।
क्रतुं पशुपतेरिष्ट्वा ह्यश्वमेधमनेकश ॥
प्रीणयित्वा तदा देवान्पुरंदरपुरोगमान् ।
त्रिदशैः प्रार्थ्यमानोऽसौ पुरंदरपुरं ययौ ॥
सर्वतेजोमय दृष्ट्वा ह्यदितेरात्मसंभवम् ।
यष्टुं तत्र समाजग्मुः कावेर्यास्तटमुत्तमम् ॥
अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा बहुलदक्षिणै' ।
ईशानं प्रीणयित्वा ते द्योतमाना दिवं ययुः ॥
भस्मानि तत्र दृश्यन्ते ह्यद्यापि मनुजेश्वर ।
तैरालेपितसर्वाङ्गः सर्वपापै' प्रमुच्यते ॥
आराध्य तत्र वै देवं बहवो मनुजेश्वर ।
स्वर्गं प्रपेदिरे पूर्वमद्यापि मनुजेश्वर ॥
शूलपाणिनमुद्दिश्य मुक्त्यर्थं मनुजोत्तमाः ।
जमदग्निर्भरद्वाजः कच कण्वो युधिष्ठिर ॥
एते वै द्विजमुख्याश्च तप' कुर्वन्ति चाधुना ।
शान्ता जितारिषड्वर्गा ह्यदृष्टा' पापकर्मभि' ॥
करोति यः सदा स्नानमर्कपुष्करिणीतटे ।
मासमेकं नृपश्रेष्ठ तस्य मोक्षो भवेद्ध्रुवम् ॥
कावेर्यां स्नाति यो विद्वानर्कनाथस्य संनिधौ ।
सूर्यलोकमवाप्नोति ह्यादित्यकृपया नृप ॥
अत्र स्नाताः पापिनोऽपि ज्वलनार्कसमप्रभा' ।
पितृमातृकुलै सार्धं ब्रह्मलोकं व्रजन्ति हि ॥
तत्र स्नानप्रभावेन तपसा परमेष्ठिना ।
प्रापिता सूर्यलोकं तु सूर्यरक्षार्थमादृताः ।
त्व चासौ मारुतिर्भीम' सव्यसाची यमौ नृप ॥
अर्कपुष्करिणीस्नान कुरुध्व वै द्विजै' सह ॥
प्रीतोऽसौ भास्करो देव सर्वदेवाभिपूजित ।
स्वस्थानं स्नानमात्रेण सर्वान्कामान्प्रयच्छति ॥
कलौ तु दुर्लभं नृणां पापिनां मनुजेश्वर ।
अर्कपुष्करिणीस्नानं प्राप्यते पुण्यकर्मभिः ॥
यज्ञभुक्सर्वगो विष्णु कर्मणां फलदायक' ।
स्नानेन तपसा यज्ञै रवेस्तुष्टो जनार्दन ॥
कालमूर्तिधरं दिव्य ब्रह्मण कालकारकम् ।
उदयान्तकरं दिव्य वेदमण्डलमध्यगम् ॥
सप्ताश्वयुग्यं देवालिसेवितं ब्रह्मकोटिभिः ।
तप्तहाटकरत्नैश्च चित्रित ब्रह्मसूत्रिमत् ॥
स्वरथं लोकरक्षार्थं ददौ तस्य जनार्दन' ।
स एव वेत्ति भगवान्स्नातानामत्र वै फलम् ।
न वेद्मि राजशार्दूल नारदोऽप्येवमब्रवीत् ॥
अथ वै सप्रवक्ष्यामि कावेर्यास्तीर्थमुत्तमम् ।
यस्य श्रवणमात्रेण नर' पापै प्रमुच्यते ॥
कण्वतीर्थं प्रवक्ष्यामि कावेर्याश्चोत्तरे तटे ।
कण्वस्य चरितं राजन्सर्वमङ्गळदायकम् ॥
कण्वाश्रमसमीपे तु कावेर्यां स्नाति यो नरः ।
स मुक्त सर्वपापेभ्यो यानारूढो दिवं व्रजेत् ॥
अत्राश्चर्यतमं पुण्यमितिहासं पुरातनम् ।
वक्ष्यामि भरतश्रेष्ठ सर्वपापप्रणाशनम् ॥
कावेर्यास्तु नदीतीरे हैमवत्यास्तु संगमे ।
पुरं हैमवतं नाम सर्वैश्वर्यसमन्वितम् ॥
चित्रकेतुसुत श्रीमान्व्याघ्रकेतु प्रतापवान् ।
रैवतस्य मनोर्वंशे संजातो हेमभूषण ॥
वह्न्यर्कपुष्करिण्योऽस्तु मध्य परमपावनम् ।
यज्ञवाट चकारासौ व्याघ्रकेतुर्महामति ॥
राजसूयशतं धीमानश्वमेधशत नृप ।
अकरोद्भृगुणा सार्धं गुरुणा वशिना वशी ॥
कण्वाय ब्रह्मविदुषे स राजा वदतां वर ।
ग्रामाणामेकपञ्चाशद्दक्षिणार्थं प्रदत्तवान् ॥
तस्य भृत्यो वसुर्नाम ब्राह्मणो वेदपारग' ।

4658. $G_{1,2}$ om (hapl) lines 4653–4656 — For line 4655, D_1 subst. :

182** चन्द्रमूर्धमणे तुभ्य सर्वज्ञाय नमो नम. ।

—D_1 om (hapl.) line 4656 — (L 4657) G_2 त्रिपुरघ्नाय देवाय ; G(ed) पुरान्तक नमस्तेऽस्तु (for ^{a}) — G_1 G(ed.) om. the ref G_2 om lines 4665–4666 — (L 4671) D_1 G_2 M_1 क्रतुं पशुपतिं इष्ट्वा (G_2 यज्ञम् , M_1 यष्टुम्) (for ^{a}). G(ed.) ह्यश्वमेधान् (for °मेधम्). — (L 4675) D_1 स्नातु (for यष्टु) — (L 4676) G(ed) अश्वमेधादिभिर्यज्ञैर् (for ^{a}) G_2 द्योतमान दिव गताः (for ^{b}). — G(ed.) om lines 4680–4681 — (L 4681) D_1 मनुजोत्तमा (for °जेश्वर) — G_1 om line 4682 — (L. 4687) G_2 नरश्रेष्ठ G(ed) द्विज° (for नृप°) — G_2 om lines 4690–4710 G_1 M_1 om (hapl) lines 4695^b–4699^a. — (L 4704) M_1 स्थापित ब्रह्मसूत्रिमत (for ^{b}). — M_1 om line 4705 — (L. 4709) D_1 कावेर्याश्चौत्तरे तटे ; G_1 M_1

बाल्यात्प्रभृति शिष्यश्च ह्यनुकूलार्थविद्बुधः ।
ग्रामाणां चैव सर्वेषामाधिपत्यं चकार ह ॥
वञ्चयित्वा मुनिवरं निष्काणां तु शतत्रयम् ।
कृष्यंशैरर्जयामास महत्स्व राजसत्तम ॥
चोरतस्करदुर्वृत्तैस्तद्धन तु विनाशितम् ।
पापानां पाण्डवश्रेष्ठ पात्रमासीद्द्विजोत्तमः ।
तथापि मन्युं न प्राप कण्वो वेदविदां वर· ॥
स निर्जितेन्द्रियग्राम समलोष्टाश्मकाञ्चनः ।
शिष्याणां चैव सर्वेषां ददौ ग्रामान्पृथक्पृथक् ।
सोऽतिष्ठत्सर्वधर्मज्ञो निर्द्वन्द्वो गतकल्मषः ॥
स वसुश्चाल्पकालेन गुरुद्रोहात्कुबुद्धिमान् ।
पञ्चत्वमगमद्राजंस्तेषु तेषु स्थितेषु च ॥
विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात् ।
आदौ पपात तामिस्रे व्याघ्रशूलं तत· परम् ॥
तप्तकुम्भं तप्तशूलं तप्तसैकतमञ्जनम् ।
कृमिभोजनमत्युग्रं वृकराक्षसभक्षणम् ॥
एतान्सर्वान्महाघोरान्नरकाननुभूय च ।
षष्टिवर्षसहस्राणि तदन्तं ब्रह्मराक्षस ॥
तत्रापि युगपर्यन्तं तदन्ते वृषलोऽभवत् ।
जातिस्मरणसंपन्न· सदा देवप्रपूजक ।
उद्युक्तः सर्वथा राजन्कण्वं पुनरथागमत् ।
नमस्कृत्य द्विजवरं प्राञ्जलिः पुरत· स्थितः ॥
तमब्रवीन्महाभाग पाहि मां मुनिपुंगव ।
त्वत्पादकमलादन्या गतिर्मम न विद्यते ॥
रक्ष मां नरके मग्नं दैवयोगाद्विनिर्गतम् ।
दीनं कृतघ्नं दुर्वृत्तं ब्रह्मद्रव्यापहारकम् ॥

भीष्म उवाच ।

एतच्छ्रुत्वा द्विजश्रेष्ठः शूद्रस्य करुणां गिरम् ।
दृष्ट्वा तमब्रवीद्विद्वांस्तस्य निर्वेदकारणम् ॥

कण्व उवाच ।

अवैमि तेऽधुना वृत्तं भो शूद्रः प्राकृतः खलु ।
तद्दोषपरिहारार्थमुपायं ते वदामि च ॥
ईश्वरं सर्वभूतानां कर्तारं भुवनेश्वरम् ।
अमुं पुरातनं देवं शूलपाणिमरिंदमम् ॥
त्रिकालमर्चयन्नित्यं प्रदक्षिणपुर सरम् ।
जन्मान्तरशतैः पापैर्विमुक्तो ध्रुवमेष्यसि ॥
तथेति तं नमस्कृत्य नाम्ना वै शूद्रशूलकः ।
त्रिंशदब्दत्रयं राजन्कुर्वाणो देवपूजनम् ॥
स्नात्वा स्नात्वा पुन स्नात्वा कावेर्यां भक्तिमान्दृढम् ।
पूजयामास राजेन्द्र तदा निष्कल्मषोऽभवत् ।
पूजयित्वा चिरं कालं धर्मतो धर्मनन्दन ॥
स्नात्वा कदाचित्कावेर्यां देवदेवस्य चाग्रतः ।
दिष्टान्तमाययौ शूद्रो नमस्कारात्प्रकाशितः ॥
दिव्यं विमानमारुह्य देवगन्धर्वसेवित' ।
अप्सरोगणसंकीर्णो मुनिमेनमथाब्रवीत् ॥
भगवन्मुनिशार्दूल सिद्धोऽहं त्वत्प्रसादतः ।
ते कीर्तिर्लोकविख्याता भविष्यति नमोऽस्तु ते ॥
एकाहमपि यः कुर्वन्पूजनं तु पिनाकिन ।
स्नात्वा प्रदक्षिणं कृत्वा तस्य मोक्षो भविष्यति ॥
देवस्यास्य पुरो विद्वान्कावेर्यां स्नाति यो नरः ।
तस्य मुक्तिर्भवेच्छुद्धा मया दृष्टा हि संप्रति ॥
मया वसूनि सर्वाणि पूर्वं त्वपहृतानि ते ॥
तत्सर्वं क्षम्यतां विप्र भूयो भूयो नमोऽस्तु ते ॥
इत्युक्त्वा देवकुसुमैरभिषिच्य मुनिं प्रभुम् ।
भूतसंघैः परिवृत. शिवसायुज्यमाप्तवान् ॥
प्रदक्षिणनमस्कारं य· कुर्यात्स्नानपूर्वकम् ।
तस्य मुक्तिर्भवेत्पार्थ कावेर्यां नात्र संशय· ॥
वह्न्यर्कपुष्करिण्योस्तु स्नातानां तीर्थ उत्तमे ।
मुक्तिरेव भवेद्राजन्हैमवत्यास्तु संगमे ॥
संगमे हैमवत्यास्तु कावेर्याश्च महाजले ।
स्नातानां ब्रह्मणो लोकं स्थिरमाह च नारदः ॥
एकवारं तु य स्नायात्कावेरीहैमसंगमे ।
जन्मान्तरकृतैः पापैर्मुच्यते नात्र संशयः ॥
यज्ञदत्त· पुरा विद्वान्निर्धनो ब्रह्मवित्तमः ।
सर्वतीर्थेषु स स्नात्वा पितॄन्संतर्प्य वारिणा ॥
पितरो मे न तृप्ताः स्युरिति मत्वा सुबुद्धिमान् ।
कावेरीहैमवत्योस्तु संगमं प्राप्तवान्द्विज' ॥
स्नात्वा जप्त्वा तथा देवान्प्रीणयित्वा तु तर्पणैः ।
उद्दिश्य स्वपितॄंस्तत्र निवापं दत्तवान्किल ॥
गोत्रनामानि संकीर्त्य निवापे दत्तमात्रके ।
मूर्तिमन्त· पितृगणा ह्यग्रे तस्थुश्च संगमे ॥
अब्रुवन्विप्रशार्दूलं यज्ञदत्तमकल्मषम् ।

°र्या· स्नानवैभवम् (for ^{b}). — D_1 om line 4710–4711 —(L 4715) D_1 अत्राश्चर्यमयं पुण्यम् (for ^{a}) —(L 4717) D_1 महाभाग (for नदीतीरे) —(L 4727) G(ed) शिष्यो (for भृत्यो) —(L 4740) M_1 -कारणात् (for पातकात्). —(L 4754) G_1 मुनि- (for द्विज-) —(L. 4759) G_2 महेश्वरम् (for अरिंदमम्) —(L. 4761) G_1 G(ed) °कृतै (for शतै). G(ed) दिवम् (for ध्रुवम्) —(L 4762) G(ed) तदा वै स तु शूद्रक (for ^{b}) —(L 4764) D_1 स्नात्वा च तर्पण कृत्वा (for ^{a}). D_1 स्थित, G_1 दृढ (for दृढम्) —(L 4768) D_1 नमस्कारप्रदर्शित: ; G(ed.) °रान्प्रकाशयन् (for ^{b}) — D_1 om lines 4769–4773. —(L. 4774) D_1 च तर्पणं (for प्रदक्षिणं). G(ed) भवेद् ध्रुवम् (for भविष्यति) —(L. 4776) G_2 शुद्धिर्; G(ed.) दृष्टा (for शुद्धा) G(ed) सृष्टा (for दृष्टा) —(L 4777) G(ed) पूर्वं तव हृतानि वै (for ^{b}) —(L. 4779) G(ed.) अभ्यर्च्य मुनिपुगवम् (for ^{b}) — Before line 4781, G_1 ins. भीष्म:. G_2 om- lines 4783–4788. —(L. 4788) M_1 °-शतैः (for -कृतै·). — $G_{1,2}$ om. lines 4791–4793. —(L, 4794) G_2 भिवा:

पितरः प्रीतिमापन्ना दिव्यरूपधरामला ॥
पितर ऊचुः ।
अथ तृप्ताः स्म वत्स त्वं कावेरीहेमसंगमे ।
निवापं दत्तवानस्मानुद्दिश्य हि शुभे जले ॥
तस्मात्प्रीता स्म ते वत्स सर्वसंपद्भविष्यति ।
ब्रह्मणो लोकमायामो यत्र गत्वा न शोचति ॥
इत्युक्त्वा पितरः सर्वे यज्ञदत्तमकल्मषम् ।
तिरोऽभवन्स विप्रेन्द्रो विस्मयं परमं गतः ॥
देहावसानपर्यन्तं स विप्रो भार्यया सह ।
पुत्रपौत्रैः परिवृतः सर्वान्कामानवाप्तवान् ॥
देहावसानसमये सुरलोकेषु पूजितः ।
ततो वै भुवमासाद्य चक्रवर्ती ह्यजायत ॥
स विप्र पुत्रपौत्रैश्च भुक्त्वा स्वर्लोकमाप्तवान् ।
ततो वै भुवमासाद्य चक्रवर्तीह जायते ॥
हेमभूषणनाम्नासौ विख्यातो भुवि भूपते ।
पुरं हैमवतं नाम चक्रे राजन्स्वनामतः ॥
तत्र दिव्यक्रतूनिष्ट्वा सर्वान्देवान्प्रपूज्य च ।
वर्षाणामयुतं श्रीमान्प्रजा धर्मेण पालयत् ॥
इष्ट्वा तु विविधान्यज्ञान्प्रजा धर्मेण पालयन् ।
अन्ते जगाम भवनं विष्णोः सर्वात्मनः प्रभो ।
तत्र भोगांश्चिरं भुक्त्वा तत्रैव स प्रमुच्यते ॥
तस्मात्सेव्या त्वया राजन्कावेरी हैमसंगमे ।
पितरस्तृप्तिमेष्यन्ति तव मुक्तिर्भविष्यति ॥
य इदं पुण्यमाख्यानं कावेरीहेमसंगमे ।
श्रुत्वा पापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥

Colophon

वैशंपायन उवाच ।
प्रहृष्टात्मा महातेजा धर्मपुत्रो महामतिः ।
पुनरेव शुभं वाक्यं नमस्कृत्वेदमब्रवीत् ॥
ब्रूहि मे कपिलायाश्च कावेर्याः संगमे फलम् ।
यस्य श्रवणमात्रेण तृप्तिर्मे भवितानघ ॥
भीष्म उवाच ।
कावेर्याः कपिलायाश्च माहात्म्यं स्नानजं फलम् ।
वक्ष्यामि तव संप्रीत्यै शृणु नान्यमनाः प्रभो ॥
कावेर्याः कपिलायाश्च संगमे वासिनः प्रभो ।
श्रीकण्ठस्य शिवस्यास्य कीर्तनं प्रवदामि ते ॥
कावेरी पाविता येन नीलकण्ठेन शंभुना ।
स्नातानामग्रतस्तस्य कैवल्यं भवति प्रभो ॥
कवेरकन्या कपिला स्मृता पापप्रणाशिनी ।
स्नातानां मोक्षदा देवी कपिला सर्वकामदा ॥
क्षेत्राणामुत्तमं क्षेत्रं तीर्थानां च तथोत्तमम् ।
कावेरीकपिलायोगं वदन्ति परमर्षयः ॥
कावेरीकपिलातीरं ब्रह्माद्याः सर्वदेवताः ।
मुनयो मानवाश्चैव सेवन्ते पुण्यकाङ्क्षिणः ॥
कावेरी पुण्यदा ज्ञेया निर्मिता परमेष्ठिना ।
पापहा कपिला ज्ञेया तयोर्योगस्त्वनुत्तमः ॥
स्मृतार्तिनाशिनी देवी कावेरी पुण्यदायिनी ॥
सर्वपापक्षयकरी सर्वोपद्रवनाशिनी ॥
यानि क्षेत्राणि पुण्यानि दक्षिणस्यां दिशि प्रभो ।
तेषां पुण्यतमं ज्ञेयं कावेरीकपिलाव्रजम् ॥
यन्मज्जनं महापुण्यं दुर्लभं ह्यकृतात्मनाम् ।
साधूनां सुलभा देवी प्रीता मोक्षप्रदायिनी ॥
ईजे च विश्वसृग्धीमान्नीलकण्ठं प्रति प्रभो ।

पान् (for °प). — (L. 4795) G_2 सकल्य (for सकीर्त्य). — (L. 4797) G_2 अब्रुवन्राजशार्दूल (for ^{a}) M_1 यज्ञमूर्तिम् (for °दत्तम्) — G_1 om the ref — (L 4802) D_1 ब्रह्मलोकमितो यामो (for ^{a}) — G_2 om lines 4805–4808 G_1 M_1 G(ed.) om line 4809 — (L 4811) G_2 विख्यातो भुवनत्रये (for ^{b}) — G_1 om. lines 4813 — (L 4814) G_1 M_1 (also in text) इष्ट्वा तु विविधान्यज्ञान् (for ^{a}). — G_2 om. lines 4816–4818. — (L 4821) G(ed) शृणोति पापनिर्मुक्तो (for ^{a}). D_1 M_1 व्रजेद् ध्रुवम् (for स गच्छति).

Colophon. — *Sub-parvan* D_1 M_1 आश्चर्यपर्वणि शेषधर्माः, $G_{1,2}$ G(ed) शेषधर्मा.. — *Adhy name* D_1 कावेरीहैमवतीसंगमे अर्कपुष्करिणीप्रशंसा, M_1 G(ed) अर्कपुष्करिणीप्रशंसा (M_1 °सनम्) — *Adhy. no* D_1 $G_{1,2}$ M_1 36; G(ed.) 37

D_1 om lines 4822–4823 with the ref — (L 4822) G(ed) सप्रहृष्टो (for प्रहृष्टात्मा). — Before line 4824, D_1 ins. युधिष्ठिर — (L 4824) G(ed) प्रब्रूहि (for ब्रूहि मे).

D_1 माहात्म्यं स्नानज फलम् (for ^{b}). — D_1 om. lines 4826–4827. — (L 4826) G(ed) स्नानवैभवम् (for °जं फलम्). — (L 4830) G(ed) कपिला (for पाविता). G(ed.) भूषिता (for शंभुना). — (L 4831) D_1 M_1 G(ed) ध्रुवम् (for प्रभो) — G_2 om lines 4832–4841 — (L. 4832) G(ed) कावेरीकपिलासंगे (for ^{a}) — (L 4833) G_1 कावेरी पुण्यदायिनी (for ^{b}) — (L 4834) G(ed) तीर्थानामुत्तमं तीर्थं (for ^{a}) G(ed.) क्षेत्राणा (for तीर्थानां). — (L. 4839) D_1 M_1 तयोर्योगमनुत्तमम् (for ^{b}). — (L. 4842) G_1 दिव्यानि (for पुण्यानि) G(ed) यानि पुण्यानि तीर्थानि (for ^{a}) — After line 4842, G_2 ins. :

183** तानि मुक्तिप्रदायीनि सत्य सत्य वदाम्यहम् ॥
अधुना किं प्रलापेन कावेरी सरितां वरा ।
दर्शनात्स्पर्शनात्पानात्कीर्तनस्नानमुक्तिदा ॥
अन्नादिसर्वदानानि कावेर्यास्तु तटे शुभे ।
मोक्षदायीनि सर्वाणि सत्य सत्यं मयोदितम् ।
समस्तदेवताः सर्वे ऋषिसिद्धाप्सरास्तथा ।

तथा च मुनयः सर्वे चक्रुश्च विविधान्मखान् ॥
कावेरी कपिला लोकं त्रायते पुण्यवारिणा ।
स्नातानां सर्वपापानि छित्त्वा मुक्तिं ददाति च ॥
यत्र स्नाताः पापिनोऽपि पितृमातृकुलानि च ।
सहस्राणि समुद्धृत्य प्रयान्ति परमं पदम् ॥
कावेर्या कपिलायाश्च महिमा केन गण्यते ।
नाहं शक्रोमि गदितुं स्नातानां संगमे फलम् ॥
तुलामासे महाराज गङ्गाद्याः सकलापगाः ।
कावेर्यावर्तनं तात कुर्वन्त्यात्मविशुद्धये ॥
याः पुण्यतिथयः प्रोक्ता शास्त्रेषु मुनिपुंगवैः ।
तासु स्नाति नरो भक्त्या ब्रह्मलोकं प्रयाति वै ॥
मकरस्थे रवौ माघे संगमे स्नाति यो नर ।
सर्वाँल्लोकान्विनिर्जित्य विष्णुलोकं व्रजेद्ध्रुवम् ॥
यस्या दर्शनमात्रेण कावेर्या संगमे नृणाम् ।
सर्वपापानि नश्यन्ति जन्मान्तरकृतानि च ॥
मकरस्थे रवौ माघे यो वा स्नाति त्र्यहं नृप ।
स मुक्त सर्वपापेभ्यो यानारूढो दिवं व्रजेत् ॥
माघमासे महाराज पक्षमात्रमतन्द्रितः ।
स्नाति यः सकलान्वंश्यानुद्धार्य स दिवं व्रजेत् ॥
मासमात्रं नरो माघे कावेर्यां कपिलागमम् ॥
कोटिवंशसमायुक्तो ब्रह्मलोकं स गच्छति ॥
अश्वमेधसहस्राणि वाजपेयायुतानि च ।
कृत्वा यत्फलमाप्नोति स्नातानामत्र तद्भवेत् ॥
कावेरीं स्मरतो नित्यं लोकानां हितकृत्तमाम् ।
सर्वदानफलं तस्य भवेत्तत्र स्थितस्य च ॥
ददाति संगमे यस्तु सौवर्णं रजतं तु वा ।
कोटिकोटिगुणं तस्य भवेत्फलमनुत्तमम् ॥
यो ददाति च गोदानं कावेरीकपिलातटे ।
एकस्य कोटिगुणितं फलमाप्नोति धर्मज ॥
अन्नं ददाति यो राजन्कावेरीकपिलातटे ।
पितरस्तस्य तृप्यन्ति तृप्ता स्युः सर्वदेवताः ॥
कन्यादानं महाराज कावेरीकपिलातटे ।
ददाति ब्राह्मणेभ्यो य स विष्णोः पदमश्नुते ॥
जपं दानं च होमश्च सर्वं कोटिगुणं भवेत् ।
कुर्वतस्तस्य कावेर्यां पापं च कुरुनन्दन ॥
चन्द्रसूर्यग्रहे चैव संक्रान्तावयने तथा ।
व्यतीपाते वैधृतौ च तथा पर्वणि धर्मज ॥
य स्नाति संगमे देव्याः कपिलाया शुभे दिने ।
मातृतः पितृतश्चैव तथा श्वशुरवंशतः ।
त्रिकोटिकुलसंयुक्तो विष्णुलोकं स गच्छति ॥
ब्रह्मादयः सुरा सर्वे योगिनः सनकादयः ।
गन्धर्वा लोकपालाश्च ऋषयश्च तपोधनाः ।
अणिमादिगुणैर्युक्ता ये चान्ये तत्त्वदर्शिनः ॥
ब्राह्मी माहेश्वरी लक्ष्मीः शची मेनादितिर्दितिः ।
घृताची मेनका रम्भा उर्वशी च तिलोत्तमा ॥
गणाश्चाप्सरसां सर्वे पितॄणां च गणास्तथा ।
स्नातुमायान्ति ते सर्वे कावेर्या कपिलागमे ॥
किमत्र बहुनोक्तेन ब्रह्मणा निर्मिता पुरा ।
प्रजानां पापभीरूणां शुद्धये मुक्तये नृप ॥
अत्र वर्षसहस्राणि तपः कृत्वा सुदारुणम् ।
नीलकण्ठप्रसादेन पुरा विश्रवस. सुत ॥
धनानामाधिपत्यं च सखित्वं शूलपाणिनः ।
प्राप्तवानलकां राजन्देवगन्धर्वसेवित ॥
चन्द्रकान्तमहामेघविजया ब्राह्मणोत्तमा ।
तपः कृत्वा चिरं कालमत्र मुक्तिं प्रपेदिरे ॥

युधिष्ठिर उवाच ।

चन्द्रकान्तमहामेघविजया ब्राह्मणोत्तमा ।
कथं मुक्तिं गताः स्नातास्तन्मे त्वं कृपया वद ॥

भीष्म उवाच ।

याज्ञवल्क्यसुता राजन्नेते वै लोकविश्रुताः ।
चन्द्रकान्तमहामेघविजयाश्चन्द्रभूषणा ॥
ज्येष्ठं गृहे प्रतिष्ठाप्य चन्द्रभूषमकल्मषम् ।
कावेरीकपिलामध्यवर्तिनं भुवनेश्वरम् ॥
आराध्य सुचिरं कालं तपसा ब्राह्मणोत्तमाः ।
मुक्तिकामा महात्मानस्तपः कुर्वन्ति च स्म ते ॥
चतुर्दशसहस्राणि शिष्यास्तेषां महात्मनाम् ।
अद्वैतवादिन. सर्वे तपसा दीर्घदर्शिनः ॥
ध्यायन्त· पुरुषं शंभुं सृष्टिस्थित्यन्तकारिणम् ।
आराधयन्तस्तं देवमजमक्षरमव्ययम् ।
स्तुवन्ति विविधै· स्तोत्रैर्नमस्यन्ति हि केचन ॥
ध्यायन्त· पुरुषं केचित्तिष्ठन्ति च निरङ्कुशाः ।
अत्युग्रमतुलं राजन्कुर्वन्तस्तप उत्तमम् ॥
पार्वतीवल्लभस्तेषां सांनिध्यमकरोत्प्रभुः ।
अष्टमूर्तिधरः श्रीमान्प्रहसन्वाक्यमब्रवीत् ॥

स्नातुमायान्ति भूपाल अद्यापि मनुजेश्वर ॥
— G_2 om. lines 4843-4893 — (L. 4845) D_1 सेव्यता मोक्षदायिनी (for ^{b}). — (L. 4846) M_1 इयाज विश्वसृग्धीमान् (for ^{a}). — (L. 4862) D_1 य स्नाति त्रिदिनं नृप (for ^{b}) — (L 4869) G_1 M_1 यत्फल समवाप्नोति (for ^{a}). — (L. 4873) लभते फलमुत्तमम् (for ^{b}). — M_1 om (hapl) lines 4875–4876 — (L 4884) D_1 M_1 शुभप्रदे (for शुभे दिने). — (L 4899) D_1 -सेविताम् (for °तः) — (L 4901) D_1 G_1 तत्र (for अत्र) — (L. 4902) M_1 तात (for स्नाता स) — (L. 4904) $G_{1,2}$ M_1 G(ed.) त्रयो (for एते). — (L. 4906) D_1 गृह (for गृहे). D_1 चन्द्रभूषणकल्मषम् (for ^{b}) — (L. 4907) G_2 -वर्तिन परमेष्ठिनम् (for ^{b}) — (L 4913) D_1 आराधयस्तु तं देव (for ^{a}). — (L. 4915) D_1 G_2 M_1 निराकुला (D1 °लम्) (for निरङ्कुशाः). — (L. 4916) G(ed.) कुर्वन्ति (for °न्तस्). G_2 कुर्वन्ति स्तोत्रमुत्तमम् (for ^{b}). — (L. 4917) D_1 -नन्दनस् (for -वल्ल-

किमर्थमिदमारब्धं तद्ब्रूत द्विजसत्तमा· ।
दास्यामि किमहं सर्वमिति सर्वान्वचोऽब्रवीत् ॥
सर्वे ते द्विजमुख्याश्च सशिष्या पाण्डुनन्दन ।
संसारविषवृक्षस्य छेत्ता भव महेश्वर ॥

शंकर उवाच ।

अहो वाक्यं कटुतरं युष्मद्वक्त्रात्समुत्थितम् ।
तस्माद्व· क्रूररूपेण देहेन भविता मृतम् ॥
विष्णुर्दाशरथिर्भूत्वा मोक्षयिष्यति सुव्रताः ।
युष्माभिर्यादृशं प्रोक्तं तादृशं स करिष्यति ।
वचसा सदृशं रूपं यूयमत्र गमिष्यथ ॥
तादृशं रूपमास्थाय पालयिष्यति स प्रभु ।
इत्युक्त्वान्तर्दधे देवो भूतै सह महेश्वरः ॥
ततो विष्णुर्देवदेवो रामत्वमगमत्प्रभु ।
चन्द्रकान्तमहामेधविजया ब्राह्मणोत्तमा ॥
खरश्च दूषणश्चैव त्रिशिरा ब्राह्मणोत्तमा ।
आसन्नेषां प्रशिष्याश्च चतुर्दशसहस्रधा ॥
तत्र रामो महातेजा महादेवप्रचोदितः ।
जटावल्कलधारी च प्रययौ दण्डकावनम् ।
पैनाकं तु धनुर्गृह्य चिच्छेद सकलाञ्शरै· ॥
ते मुक्ता· पुण्यकर्माणः संसारात्पाण्डुनन्दन ।
तत्पादकमलं दिव्यं तत्क्षणात्तु प्रपेदिरे ॥
ईशस्य संगमे यस्य पूजनात्फलमीदृशम् ।
तस्मादद्यैव मुनय· स्नात्वा कपिलसंगमे ।
पूजां कुर्वन्ति यत्नेन मुक्त्यर्थं भरतर्षभ ॥
कावेर्याः कपिलायाश्च संगमे भुवि दुर्लभे ।
स्नात्वा नत्वा स पापोऽपि तत्रैव परिमुच्यते ॥
दुर्लभो माघमासस्तु कावेरी च सुदुर्लभा ।
दुर्लभः शंकरो देव कपिलासंगमध्यगः ॥
त्रयमेतन्मनुष्याणां पापिनां पाण्डुनन्दन ।
किमत्र बहुनोक्तेन कावेरी दुर्लभा कलौ ॥
य इदं पुण्यमाख्यानं नारदात्तु मया श्रुतम् ।
श्रुत्वा पापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥

Colophon

भीष्म उवाच ।

शृणु विश्वेश्वरस्थान वक्ष्यामि भरतर्षभ ।
दाक्षिणे भार्गवक्षेत्रं कावेर्याः सरितः शुभम् ॥
ऐशान्ये श्रीनिवासस्य न्यूने योजनमात्रके ।
संवर्तकस्य विप्रर्षे स्थानं परमपावनम् ॥
तत्रैव चयनं चक्रे महाचयनमेव च ।
इष्टकाभिरनेकाभिर्वेदिं संस्थाप्य शाश्वतः ॥
संवर्तकस्तु भगवानापस्तम्बसखा मुनिः ।
कात्यायनस्तु भगवानापस्तम्बसमन्वितः ।
भरद्वाजो मुनिवरो यज्ञकर्माण्यकारयत् ॥
ब्राह्मणा वृत्तसंपन्नाः कुलीना वेदपारगाः ।
राजानो धर्मशीलाश्च ते चक्रुर्विविधान्मखान् ।
कारयामासुरन्यांश्च मुक्तिकामाननेकश ॥
तत्र यज्ञशिला नाम गायत्र्यास्तु शिलोपमा ।
तत्रैव तु शिलापृष्ठे नाम्ना संवर्तकस्य च ॥
लिङ्गं वै लोकविख्यातं रमणीयं नृपोत्तम ।
नळेन स्थापितं पूर्वं ऋषिनाम्ना जयेच्छया ।
तमाराध्य नळो राजा राज्यं लेभे युधिष्ठिर ॥
संवर्तकस्य लिङ्गस्य दक्षिणे चोत्तरा नदीम् ।
अल्पतोयसमृद्धा च शिला परमपावनी ॥
संवर्तकस्य लिङ्गस्य त्वाग्नेय्यां दिशि सुव्रत ।
कावेरी द्विविधा भिन्ना तन्मध्ये गालवाश्रमः ॥
दक्षिणे चोत्तरे चैव कावेरी पूर्वगामिनी ।

भस्). — Before line 4919, M1 ins. शंकरः. — (L. 4922) D1 छेत्ता स भव न· प्रभो ; G1 2 M1 छेत्ता त्वं भुवनेश्वर (for ^{b}). — After line 4922, G(ed) ins. .

184** इति तेषां वच· श्रुत्वा भगवानिदमब्रवीत् ।

— G2 M1 ईश्वरः (for शंकरः). — (L 4923) G1 G(ed.) विनिःसृतम् (for समुत्थि°). D1 युष्माकं च वच·स्थितम् (for ^{b}). — (L. 4924) D1 G2 युतम् (for मृतम्). D1 यूयमद्य भविष्यथ (for ^{b}). — After line 4927^{a}, G(ed.) ins. :

185** भूतै· सह महेश्वर ।
ततो विष्णुर्देवदेवो

— D1 om. line 4932 — (L 4931) G(ed) त्रिशिरा राक्षसोत्तमा (for ^{b}). — (L. 4934) D1 महादेवो (for °तेजा). D1 ब्रह्मणा च (for महादेव-) — (L. 4935) G1 G(ed.) प्राविशद् (for प्रययौ) — (L. 4937) G2 M1 सत्स-ङ्गात् (for संसारात्). — (L 4940) G(ed) स्नात्वा तु कपिला-गमे (for ^{b}). — (L. 4942) G2 कपिला भुवि दुर्लभा (for ^{b}). — After line 4944, D1 ins. :

186** दुर्लभ वैष्णव ज्ञानं मुक्तिर्भक्त्या तु दुर्लभा ॥

— (L 4946) G(ed.) पापिना दुर्लभ खलु (for ^{b}) — (L. 4947) G(ed) कपिला (for दुर्लभा). — After line 4947, G(ed) ins. .

187** तत्संगमध्यग शंभुर्मुक्तिमुक्तिप्रद स्मृत ॥

— (L. 4949) G(ed) शृणोति पापनिर्मुक्तो (for ^{a})

COLOPHON — *Sub-parvan* D1 G1 आश्चर्यपर्वणि शेष-धर्मा , G2 M1 G(ed) शेषधर्मा — *Adhy name* : D1 कावेरी-कपिलासंगमप्रशंसा , G(ed) कावेरीकापिलासगमप्रभाव. . — *Adhy. no.* . D1 G1 2 M1 37 , G(ed) 38

(L 4951) G2 स्थान ; M1 -क्षेत्रे (for -क्षेत्र) G2 कावेरी-सरितस्तटे (for ^{b}) — (L 4956) G1 -महामुनि (for -सखा-मुनिः). — For lines 4959–4960, D1 G1, 2 M1 subst. .

188** ब्राह्मणान्वृत्तसपन्नान्कुलीनान्वेदपारगान् ।
राज्ञश्च धर्मशीलास्ते ते चक्रुर्विविधान्मखान् ।
[(L 2) D1 ऽन्याश्च (for ते चक्रुर्).]

— (L. 4962) G(ed.) गायत्र्याख्य- (for °त्र्यास्तु). — D1 om.

तत्रैव मुनय· सर्वे तप· कुर्वन्ति धर्मज ॥
संवर्तकस्य लिङ्गस्य पश्चिमे पुण्यमाश्रमम् ।
पादपैः फलितैर्युक्तं पनसैः फलमण्डितै· ।
कौशिकस्याश्रमो राजन्क्रोशमात्रे युधिष्ठिर ॥
पुरा राजर्षिमुख्यश्च सेवितो ब्रह्मवादिभि· ।
चचार तप उग्रं तु कौशिको मुनिसत्तमः ॥
तत्र दीर्घशिला नाम रमणीया पवित्रदा ।
तत्र दानं जपं स्नानं कृतं कोटिगुणं भवेत् ॥
स्नानं प्रकुर्वतस्तत्र सदा तु जपशीलिनः ।
भवन्ति संपदस्तस्य यस्य कस्यापि च प्रभो ॥
कुशलिङ्गमिति ख्यातं कौशिकेन प्रतिष्ठितम् ।
स्नात्वा तत्र महादेवं पूजयित्वा तु नित्यशः ।
स वै गोत्रऋषिर्लोके पूजितोऽभूद्द्विजन्मभिः ॥
वसिष्ठस्याश्रमं पश्चात्तस्याश्रमसमीपतः ।
कुण्डिनो नाम विप्रेन्द्रश्चचार तप उत्तमम् ॥
तपसा तोषितो रुद्रो वृषमारुह्य सत्वरम् ।
तत्र गत्वा भूतगणै· शाङ्कं तस्योपदिष्टवान् ॥
तव गोत्रऋषिर्ब्रह्मन्ख्यातिमत्र गमिष्यसि ।
इत्युक्त्वान्तर्दधे देवः स विप्रो विस्मयं गतः ॥
नन्दिवाहननाम्ना वै प्रतिष्ठाप्य महेश्वरम् ।
सिद्धोऽभूद्ब्राह्मणश्रेष्ठ· कावेर्या स्नानवैभवात् ॥
नन्दिवाहनलिङ्गस्य कृपया तीरवासिनाम् ।
कुशनाभस्य लिङ्गस्य तथा संवर्तकस्य च ।
स्नातानां तत्र वै काले सर्वसंपद्भविष्यति ॥
इत्युक्त्वा देवता. सोमः स्नाति नित्यं तु भक्तित ।
संवर्तकस्य लिङ्गस्य पुरस्तात्पनसाश्रमे ॥
तत्र राजा हरिश्चन्द्रः सुरलोकस्य काङ्क्षया ।
राजसूयशतं चक्रे वसिष्ठमुनिनेरितः ॥
चक्रुश्च विविधान्यज्ञानृषयो ब्राह्मणोत्तमा ।
महाध्वरविदो विप्राः कावेर्या· स्नानतत्परा ।
तोषयित्वा यज्ञपति सुरलोकं प्रपेदिरे ॥
कृतवीर्यकुमारश्च कार्तवीर्यो महामतिः ।
भौमस्याश्रममासाद्य पनसाख्यमिति श्रुतम् ।
राजसूयशतं कृत्वा मुख्योऽभूच्चक्रवर्तिनाम् ॥
भूसुतस्तत्र तपसा यज्ञैर्विविधदक्षिणै ।
आदावाराध्य धातारं ग्रहाणामग्रगोऽभवत् ॥
पुरस्तादस्ति कावेर्या विश्वेश्वर उमापति. ।
बोधायनो मुनिस्तत्र तप कुर्वन्महामतिः ॥
आराध्य त भूतपतिं भूतेशं भक्तवत्सलम् ।
आप्तवान्सर्वशास्त्राणि वेदार्थांश्च महामति ॥
सर्वेषा सूत्रकर्तृणामग्रणीर्मुनिसत्तम ।
चकार सूत्रं मतिमाञ्श्रौतस्मार्तविदां वर· ।
तद्धि विश्वेश्वरस्थानमद्यापि परिदृश्यते ॥
वटवृक्षोत्तरे भागे सर्वपुष्पफलप्रद. ।
निर्मितस्तपसा तेन मुनिना धर्मनन्दन ॥
आग्नेय्यामरविन्दाक्ष दक्षिणे सरसस्तटे ।
विष्णुं सर्वगतं ध्यायन्नास्ते भृगुमुनीश्वरः ॥
तेनारोपितमश्वत्थं सेवन्ते स्वर्गकाङ्क्षिणः ।
तस्य मूले चिरं स्थित्वा चचार तप उत्तमम् ॥
याज्ञवल्क्यो मुनिः पार्थ कृपया तस्य सुव्रत ।
अवाप योगसामर्थ्यमणिमादिगुणांस्तथा ॥
विश्वेश्वरं सदा ध्यायंस्तत्र योगेश्वरं विभुम् ।
वर्तने शास्त्रमार्गं च दर्शयन्ब्रह्मचारिणाम् ॥
अगस्त्यो भगवांस्तत्र लिङ्गं विश्वेश्वराख्यया ।
प्रतिष्ठाप्य सदा भक्त्या भजते मुक्तिकाङ्क्षया ॥
शिवश्च रुद्रश्च हरिः स एव
ब्रह्मा च देव्यश्च दिशां पतिश्च ।
राजा च राज्यं च विराट् स एव
धनप्रदो वै लयकृत्स एव ॥
बन्धुश्च विद्याविभवः स एव
स्वामी समस्तस्य गुरु स एव ।
उर्वी शरच्चन्द्रदिवाकरौ च
तीर्थानि चाग्निर्वियदादिदेव ॥
नक्षत्रतारामुनय स एव
ग्रहाः समुद्राश्च तदन्तराश्च ।
शैला द्रुमा पार्थिव एव विष्णु·
स्तस्मात्परं नास्ति समस्तलोके ॥
तस्य विश्वेश्वरस्याहं नमस्कृत्य च तानृषीन् ।

---

line 4963. — (L 4967) G(ed) [उ]त्तरे (for °रा). — (L 4968) G(ed) अल्पतोया हि तत्रैव (for ^{a}). — G_2 om lines 4969^{b}–4981^{b} — (L 4973) D_1 पादपै· फलसंयुक्तै (for ^{a}) — (L. 4985) D_1 G(ed) [आ]त्मज· (for [आ]श्रमं) — (L 4988) G_2 ऋषि- (for भूत-) — For line 4989, M_1 subst

189** तव गोत्रमिति ख्यातिं भवानत्र गमिष्यति ।

— (L 4990) G_2 सोऽपि विस्मयमागत· (for ^{b}). — After line 4990, $G_{1.2}$ ins :

190** किमत्र बहुनोक्तेन स्थानं विश्वेश्वरस्य तु ।
एवमन्ये महात्मान न त्वा स्तुत्वा दिव गताः ॥

— G_2 om. lines 4991–5039 —(L 4995) G(ed.) कावेर्यां (for वै काले). — (L. 4997) M_1 पुरस्ताद्ब्राह्मणोत्तमा· (for ^{b}). — M_1 om (hapl.) lines 4998–5000. — (L. 5006) G_1 विपुल- (for विविध-) — (L. 5008) D_1 G_1 M_1 विश्वेश्वरमरिंदमम् (for ^{b}) — (L 5010) D_1 भूतेशं (for विश्वेशं). —(L. 5013) D_1 -विशारदः (for -विदा वरः) — (L. 5015) G(ed) तदुत्तरे वटतरुः (for ^{a}). — M_1 om. lines 5028–5032 — (L. 5029) D_1 G_1 हरि (for विराट्). — After line 5039, G_2 ins .

191** किमत्र बहुनोक्तेन स्थानं विश्वेश्वरस्य तु ।
एवमन्ये महात्मानो नत्वा स्तुत्वा दिवं गताः ।

गजारण्यस्य माहात्म्यं वक्ष्यामि कुरुनन्दन ॥
आसीत्पुरा महीपाल ब्राह्मणो वृत्तिकर्शित· ।
सोमदत्त इति ख्यातो वसिष्ठस्य कुलोद्भवः ।
शंकरं तोषयामास तपोभिर्विविधैर्मखैः ॥
काशीक्षेत्रे महाराज देवर्षिगणसेविते ॥
स तुष्टोऽपि विरूपाक्षो देवो दिव्यपराक्रमः ।
दर्शयित्वा स्वकं रूपं सस्मितं वाक्यमब्रवीत् ॥
सोमदत्त महाभाग तपसा तोषितोऽस्म्यहम् ।
क्रतुभिश्च विशेषेण भक्त्या चैव द्विजोत्तम ॥
एकमेव वरं दास्ये द्वितीयं तव न प्रभो ।
इत्युक्तो देवदेवेन शम्भुना पाण्डुनन्दन ।
ध्यात्वा चिरं त्रिकालज्ञो वचनं चेदमब्रवीत् ॥
अनेककोटिजन्मानि संभ्रान्तस्य च मे शिव ।
यद्गत्वा न निवर्तन्ते तद्ददस्व च मे शिव ॥
तथास्त्विति तमामन्त्र्य वचनं चेदमब्रवीत् ।
कावेरी कपिला यत्र संगता ब्राह्मणोत्तम ।
पुरत संगमस्यास्य योजनार्धेऽस्ति वै स्थलम् ।
गजारण्यमिति ख्यातिं सर्वसिद्धनिषेवितम् ॥
आश्रमं तद्यचोकस्य शान्तैर्मृगगणैर्वृतम् ।
तत्र ते भविता मुक्ति· शिष्याणामपि सत्तम ॥
अहं तत्र गमिष्यामि त्वं तु बन्धुजनै. सह ।
दारिद्र्याद्दु.खितो ह्यत्र भुक्त्वा भोगान्यथेच्छया ॥
याहि पश्चाद्द्विजश्रेष्ठ तव मुक्तिर्भविष्यति ।
इत्युक्त्वान्तर्दधे देवो भूतैः सह युधिष्ठिर ॥
ब्राह्मणोऽपि कुरुश्रेष्ठ भुक्त्वा भोगाननेकशः ।
अनेकैर्द्विजमुख्यैश्च प्रतस्थे मुक्तिकाङ्क्षया ॥
विन्ध्यं प्रयातो विप्रेन्द्रो द्विजानामग्रणीर्बली ।
मदोन्मत्तो महानागो ब्राह्मणांस्तानमर्दयत् ॥
मर्दिता ब्राह्मणा· सर्वे तद्भावेन समन्विता· ।
गजा जातिस्मरा जाता· प्रवृद्धबलदर्पिताः ॥
कृपया नीलकण्ठस्य तं देशं ते प्रपेदिरे ॥
तत्र स्नात्वा जगन्नाथं प्रणतार्तिप्रणाशनम् ।
स्नात्वा स्नात्वा तु कावेर्यां जीवन्ति निरहंकृता· ॥
नीलकण्ठो महादेवो नन्दिमारुह्य तान्द्विजान् ।
आत्मन्यारोपयामास मुनीनां पश्यतां प्रभो ॥
सशरीरं गता सर्वे ब्राह्मणा गजरूपिणः ।
तिरोऽभूत्तत्र देवेशस्तत्स्थानं दृश्यतेऽधुना ॥
तदाप्रभृति तत्क्षेत्रं गजारण्यमिति श्रुतम् ॥
लिङ्गं तत्रायुतं राजन्प्रतिष्ठाप्य नृपोत्तमा ।
आराध्य मुनिभिः सार्धं तत्पदं ते प्रपेदिरे ॥
गजारण्यस्य माहात्म्यमहं वक्तुं हि न क्षमः ।
स एव भगवान्वेत्ति तत्फलं स्नानवैभवम् ॥
गजारण्यमिति क्षेत्रं दुर्लभं तु कलौ युगे ।
पुरा सञ्चितपुण्यानामनायासेन लभ्यते ॥
य स्नाति वै ह्यहं राजन्निगृहीताखिलेन्द्रिय· ।
सर्वदानफलं तस्य सर्वक्रतुफलं भवेत् ॥
गजारण्यस्य माहात्म्यं य पठेच्छृणुयादपि ।
सर्वान्कामानवाप्नोति स्वर्गलोके सुखी भवेत् ॥

Colophon

भीष्म उवाच ।

कावेरीमहिमा केन वर्ण्यते युगकोटिभि. ।
नारायणस्तु भगवान्वेत्ति नान्यो महीतले ॥
तीरयोरुभयो क्षेत्रं मुनीनां शुद्धचेतसाम् ।
योजने योजनार्धे च क्रोशमात्रे तु चाश्रमः ॥
आ समुद्रात्तु सह्याद्रेर्मध्य देवैर्निषेवितम् ।
कावेरीमाश्रयन्त्यत्र सुगोचरजले शुभे ॥
सर्वलोकहितार्थाय सर्वत्र हितकारिण ।
ऋषयो मुनिविप्राश्च कावेरीं समुपासते ॥
सर्वत्र सुलभस्थाने पुण्याश्रमसमन्विते ।
वसन्ति लोकरक्षार्थं कावेर्यां तु मुनीश्वरा ॥
दैत्यदानवरक्षांसि ह्यसुरा मृगजातिषु ।
उग्रेषु रूपमास्थाय चरन्ति सरितस्तटे ॥
मुख्यस्थानं प्रवक्ष्यामि कावेर्या मध्यवर्तिनाम् ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥
कावेर्या· पुण्यनद्यास्तु तीरयोरुभयोरपि ।
देवा ऋषिगणाश्चैव सिद्धाश्चारणगुह्यकाः ।
गन्धर्वा लोकपालाश्च सेवन्ते पुण्यकाङ्क्षया ॥

—(L. 5041) G_1 M_1 महाराज (for महीपाल). —(L. 5043) G_1 तपोभिर्विनयोज्ज्वलै (for ^{b}). —(L. 5049) G(ed.) द्विज (for प्रभो). G_2 द्वितीयं तपनप्रभ (for ^{b}). —(L. — G_1 M_1 om. line 5059 — For line 5059, G_2 subst.:

192** याहि पूर्वं द्विजश्रेष्ठ ततो मुक्तिर्भविष्यति ।

—(L. 5062) G_2 मम पादाम्बुजद्वयम् (for ^{b}). —(L 5071) D_1 गत्वा तत्र; G(ed.) तत्र गत्वा (for तत्र स्नात्वा). —(L. 5074) G_1 प्रवरः (for पश्यतां). —(L. 5075) D_1 अशरीरा गणाः सर्वे (for ^{a}). —(L. 5077) G(ed.) शिवलोकं (for तत्पदं ते). —(L 5084) D_1 त्रिदिनं (for वै ह्यहं). —(L. 5087) D_1 M_1 स्वर्लोके तु (for स्वर्गलोके). G_2 कैलासे सुखमश्नुते (for ^{b}).

Colophon — *Sub-parvan*: D_1 G_1 आश्चर्यपर्वणि शेषधर्मा; G_2 M_1 G(ed) शेषधर्मा. — *Adhy name* D_1 नारदोपदेशः, G(ed) गजारण्यप्रशंसा — *Adhy. no.*: D_1 G_1 M_1 38, G(ed) 39

After line 5092, D_1 G_1 M_1 ins.:

193** मृगभूरुहपक्षीणा मूर्तिमद्भिर्नृणां क्वचित् ।
देवाः पर्वततीरेषु निर्जने तु महावने ॥

—(L. 5093) G_2 कावेरीमाश्रयन्नित्यं (for ^{a}). D_1 अगोचरजने शुभे (for ^{b}). —(L. 5097) G(ed.) ·रात्रिषु

तरुरूपधरा देवाश्चारणा पक्षिरूपिण ।
ऋषयो विप्ररूपाश्च वर्तन्ते तीरमाश्रिताः ॥
शास्त्रज्ञा लोकविख्याताः सदा सत्कर्मशीलिनः ।
वेदशास्त्रसुसंपन्ना सदा ध्यानपरायणाः ।
कावेर्यां मरणं यान्ति ते गच्छन्ति हरे पदम् ॥
ये तत्र पापकर्माणश्चण्डाळाद्या युधिष्ठिर ।
दानवासुररक्षांसि तान्विद्धि भरतर्षभ ॥
पापानां लयहेतोऽस्तु सदा क्रीडन्ति राक्षसाः ।
तत्कलेवरमुत्सृज्य प्रयान्ति ब्रह्मण पदम् ॥
त्रिरात्रं जाह्नवितीरे पञ्चरात्रं तु यामुने ।
सद्यः पुनाति कावेरी पापमामरणान्तिकम् ॥
गौतम्या सप्तरात्रं तु नर्मदाया चतुर्दिनम् ।
तुङ्गायां दशरात्रं तु हेमकूटे दशार्धकम् ॥
तुलामासे तु संप्राप्ते गङ्गाद्याः सकलापगा ।
स्नातुमायान्ति ताः सर्वा ह्यात्मदोषजिगीषया ॥
गजारण्यपुरोभागे कावेर्या योजनद्वये ।
भीमेश्वरेति विख्याते सर्वसिद्धनिषेविते ॥
प्रसन्नसलिला देवी कावेरी पादपैर्वृता ।
भीमरूपी शिव साक्षात्तत्र तिष्ठति भूमिप ॥
पुरा वै कलिदोषेण नळः परमदारुणः ।
अज्ञातवासमापेदे कान्तिनिर्यासकारणात् ॥
श्वशुरस्तस्य विख्यातो भीमराजो महामतिः ।
लब्धुं कन्यां नळं शंभुं तत्र चाराधयत्प्रभुम् ॥
नीलकण्ठप्रसादेन कावेर्या स्नानवैभवात् ।
शुद्धात्मा स्तोत्रमकरोच्छंकरं प्रति धर्मज ॥
नीलकण्ठविरूपाक्ष विश्वेशाय च शूलिने ।
सदाशिवाय लोकानामीश्वराय नमो नमः ॥
मृत्युंजय सदानन्द नन्दिवाहन विश्वदृक् ।
मनोभवहरायेति सर्वज्ञाय नमो नमः ॥
भस्मोद्धूलितसर्वाङ्ग नागचर्मधराय च ।
नागभूषण लोकेश शंकराय नमो नमः ॥
कैलासवासनिलय पार्वतीवल्लभ प्रभो ।
त्रिपुरान्तक भूतात्मन्गङ्गाधर नमोऽस्तु ते ॥
त्रिशूलपाणिने तुभ्यं कपालाभरणाय च ।
गिरीश गिरिजानाथ मृत्युंजय नमोऽस्तु ते ।
त्वमेव गतिरस्माकं पाहि पाहि जगत्पते ॥
इति स्तुतो जगन्नाथो भीमराजेन शंकर ।
अष्टमूर्तिधरो भूत्वा राजानमिदमब्रवीत् ॥
अभीष्टसिद्धिर्भविता जामाता च तवात्मजा ।
आगमिष्यन्ति भद्रं ते तनुजा पतिमेष्यति ।
तव नाम्ना भवेल्लिङ्गमत्र वै ख्यातिमेष्यति ॥
नामसंकीर्तनं मेऽद्य त्वया कृतमरिंदम ।
यः पठेत्सततं भक्त्या मम लोको भविष्यति ॥
भीमेश्वरमिदं स्थानं कावेर्या मध्यमं शुभम् ।
सर्वपापप्रशमन भुक्तिमुक्तिफलप्रदम् ।
अत्र स्नाताः पापिनोऽपि पितृमातृकुलानि च ।
सहस्राणि समुद्धृत्य ब्रह्मलोकं प्रयान्ति वै ॥
दानं श्राद्धं तथा होमं जपं स्नानमकल्मषम् ।
यः कुर्यात्पितरस्तस्य प्रविशन्ति त्रिविष्टपम् ॥
अद्य नो भविता मुक्तिरद्य नो वैष्णवं पदम् ।
भविता नः पदं शंभोर्ब्रह्मणो मरुतां पतेः ॥
हृष्यन्त्येवं पितृगणा देवगन्धर्वकोटिभिः ।
पुण्यलोकान्प्रयान्त्येव सेविताः पितरोऽमला ॥
अत्र स्नातं नर दृष्ट्वा पापिनो वा नरेश्वर ।
पुनीताः स्वर्गमायान्ति सेवितं पुण्यकर्मभिः ॥
अत्र भूतगणान्विद्धि भूरुहान्वेणुकीचकान् ।
ये च कण्ठकिनो वृक्षाः पिशाचान्विद्धि पाण्डव ॥
अहमत्र चिर स्थित्वा गतानामत्र कर्मिणाम् ।
क्षयं करोमि पापानां पुण्यलोकं ददामि च ॥
अत्र स्नात्वा च मां दृष्ट्वा कावेरीमध्यवर्तिनम् ।
नत्वा दिवं नरो याति मम लोकं च शाश्वतम् ॥
इत्युक्त्वान्तर्दधे देवो भूतैः सह सदाशिवः ।
भीमराजो महातेजा विस्मयं परमं गतः ॥
प्रणिपत्य जगन्नाथ मनसा च पुनः पुनः ।
प्रययौ नगरं पार्थ पुण्यं मित्रनिषेवितम् ॥
अत्राद्भुततमं दृष्ट्वा शंकरं लोकशंकरम् ।
भृगुस्तत्र समासीनो जपन्नास्ते स वै मुनिः ॥
कदा पश्यामि देवेशं कदा तं नौमि निर्गुणम् ।
कदा मे जन्मसाफल्यं भविता शाश्वतं तपः ॥
इत्युक्त्वा स्नाप्य सलिलैः स्वयं स्नात्वा सदाशिवम् ।

(for जातिषु). —(L 5104) G(ed) मोक्ष- (for पुण्य-). G2 वसन्ते मुक्तिकाङ्क्षया (for ^{b}) — G2 om. lines 5105^{b}–5108^{a} —(L 5116) M1 गोदावर्यां; G(ed.) कृष्णवेण्यां (for नर्मदाया) D1 कृष्णाया तु दिनत्रयम् (for ^{b}). —(L. 5122) D1 -कमला (for -सलिला). —(L 5126) M1 महाद्युति- (for °मति) — Before line 5130, D1 ins. भीमराजोवाच M1 om lines 5132–5134. —(L. 5134) G1 नागचर्मधराव्यय (for ^{b}) — M1 om. lines 5136–5137 —(L. 5134) D1 -निरत (for -निलय).— D1 om. lines 5138–5139. —(L. 5140) G1, 2 देवदेव सदाशिव (for ^{b}) —(L 5141) G1 G(ed.) जगन्नाथ (for भूतनाथो) — D1 om lines 5142–5143. —(L. 5148) D1 इति ख्यातं; G2 इदं लिङ्गं (for इदं स्थानं). — After line 5148^{a}, G2 ins. :

194** नत्वा स्नात्वा समाहितः ।
मम सायुज्यमाप्नोति सत्य सत्यं वदाम्यहम् ॥

— G2 om. lines 5148^{b}–5165^{a}. —(L 5152) D1 श्राद्धम् (for स्नानम्) —(L. 5153) M1 प्रशंसन्ति त्रिविष्टपे (for ^{b}). —(L 5155) M1 भवितव्य शुभं शंभोः (for ^{a}). —(L. 5162) D1 अपामत्र चिर पीत्वा (for ^{a}). — G2 om. lines

रुद्रसूक्तमहामन्त्रैस्तोषयामास शंकरम् ॥

वैशपायन उवाच ।

तस्मिन्नवसरे राजन्नळो नाम महामति ।
कलिना पीडित सम्यगाययौ भीमसंनिधिम् ॥
स्नात्वा नत्वा च कावेर्यां भीमनाथं तु शूलिनम् ।
जपं प्रदक्षिणं कुर्वन्संददर्श च भार्गवम् ॥
प्रणिपत्य मुनिश्रेष्ठं त्रिकालज्ञमकल्मषम् ।
निवेदयामास मुने कलिबाधां सुदु'सहाम् ॥
ज्ञात्वा तदद्भुतं रूपमीदृशं घोरदर्शनम् ॥
प्रोवाच कृपया विद्वान्नैषधं प्रति धर्मवित् ॥
राजंस्तवेदृशं रूप कुत्सितं लोकनिन्दितम् ।
भीमेश्वरस्य कृपया स्वच्छतामेष्यति ध्रुवम् ॥
तपसा भीमराजस्य कृपया शूलिनः प्रभोः ।
जगन्मोहनकं रूपमचिरात्त्वं समेष्यसि ॥
लोकेषु पञ्च विख्यातं सद्य' कलिमलापहम् ।
काशीभीमेश्वरमिदं तच्च पुष्करिणीत्रयम् ॥
अत्र त्वं कृतकृत्योऽसि पापैरद्य विमोचित ।
नत्वा देवं विरूपाक्षं त्रिकाल स्नानमाचर ॥
ऋतुपर्णो महाराज स्नात्वात्र सुचिरं नृप ।
कृपया नीलकण्ठस्य कलिदोषहरोऽभवत् ॥
तक्षकस्य कुले जातः कार्कोटक इति श्रुतः ।
शाकल्यस्य तु शापेन महानजगरोऽभवत् ॥
प्रापितो दैवयोगेन भीमनाथस्य संनिधिम् ।
स्नात्वा तल्लिङ्गमचलं नत्वा नत्वा तु वेष्टते ॥
अतिक्रूरतरं रूपं विहाय कृपया नृप ।
भूषणत्वमवापाशु सर्वं च कलिदोषहा ॥
तवाङ्गस्पर्शनाद्देवी भैमी सुरसुतोपमा ।
कलिदोषहरा ख्याता भविष्यति न संशयः ॥
कर्कोटकस्य नागस्य दमयन्त्या नळस्य च ।
ऋतुपर्णस्य राजर्षे' कीर्तनं कलिनाशनम् ॥
स्नात्वा संपूज्य विधिवद्भीमेशमघनाशनम् ।
ऋतुपर्णपुरं गच्छ तेन स्वस्थानमेष्यसि ॥

भीष्म उवाच ।

इत्युक्तो मुनिना तेन नळो वै गतकल्मष' ।
स्थित्वा तु कतिचित्कालं तेन सार्धं युधिष्ठिर ।
स्वस्थानं प्राप्य धर्मात्मा भैम्या सह ननन्द ह ॥
त्वं च गच्छ महाराज पूजयित्वा महेश्वरम् ।
अचिरात्प्राप्स्यसे स्थान मनसा यद्यदिच्छसि ।

Colophon

वैशंपायन उवाच ।

श्रुत्वा राजा महातेजा कावेर्या' स्नानवैभवम् ।
चन्द्रपुष्करिणीस्नानात्फलं पप्रच्छ धर्मजः ॥

युधिष्ठिर उवाच ।

चन्द्रपुष्करिणीस्नानं कुर्वतां किं फलं प्रभो ।
कावेर्या रङ्गनाथस्य दर्शने किं फल भवेत् ॥
चकार वासं लोकानामीश्वरः प्रभवोऽव्ययः ।
नारायणो जगद्योनिर्भक्ताधीनो जगन्मय' ।
दर्शनं यत्फलं ब्रूहि पितामह महामते ॥
किमर्थं वासमकरोज्जगदानन्दकारणम् ।
एतानन्यांश्च गाङ्गेय विस्तराद्वक्तुमर्हसि ॥

भीष्म उवाच ।

चन्द्रपुष्करिणीक्षेत्रं क्षेत्राणामुत्तमं विदु' ।
योगीश्वरो हरि. साक्षाद्यस्मात्प्रत्यक्षतां गतः ॥
तस्य विष्णोः प्रसन्नस्य महिमानं तु यो नर' ।
कीर्तयेत्सकलान्वंशानुद्धरिष्यति स द्रुतम् ॥
चन्द्रपुष्करिणीस्नानं रङ्गमण्डपदर्शनम् ।
मानुष्यं जन्म राजेन्द्र दुर्लभ तु कलौ त्रयम् ॥
मनुष्यजन्म संप्राप्य रङ्गेश ये नमन्ति नो ।
जायन्ते मरणायैव ते नरा पापकर्मिणः ॥
चन्द्रपुष्करिणीं गत्वा य स्नाति प्रयतेन्द्रिय. ।
रङ्गेश्वर नमस्कृत्वा स विष्णुपदमश्नुते ॥

5170–5175 — (L. 5171) D_1 M_1 महेश्वरम् (for स्म वै मुनिः). — (L. 5174) D_1 G M_1 पुरा शिवम् (for सदाशिवम्). — G_2 om the ref. — (L. 5176) G_1 महाद्युतिः, M_1 महीपति' (for महामतिः). — (L. 5178) M_1 स्नानं कृत्वा (for स्नात्वा नत्वा) — (L. 5181) G_2 दुरत्ययाम् M_1 दुरुत्सहाम् (for सुदुःसहाम्). — Before line 5184, G(ed.) ins. भार्गवः. — (L. 5184) G_2 कुत्सित घोरदर्शनम् (for [b]). — (L. 5185) G_2 स्वच्छन्दमेति च ध्रुवम् (for [b]). — (L. 5192) D_1 स्नात्वात्र शुचिरेव च (for [b]). — (L. 5199) G_1 -दोषजम् ; M_1 दोषहम् (for °हा).

. COLOPHON. — *Sub-parvan :* D_1 आश्चर्यपर्वणि शेषधर्मा'. $G_{1,2}$ M_1 G(ed.) शेषधर्मा . — *Adhy name* . D_1 भीमेश्वरमहिमावर्णनम् ; G_1 भीमेश्वरमाहात्म्यम् , G(ed.) भीमेश्वरप्रशसा — *Adhy. no. ;* D_1 $G_{1,2}$ M_1 39, G(ed.) 40.

— (L. 5213) G_2 कावेरीरङ्गनाथयो' (for [b]) — G_2 om. lines 5214–5216 — (L 5216) D_1 महामुनि·, G_1 M_1 मुनेर्मुनि (for जगन्मय') G_2 किमर्थमकरोद्व्यास (for [a]). — G_2 om line 5219 — (L 5220) G_2 क्षेत्राणामुत्तमोत्तमम् (for [b]), — G_2 om lines 5222–5223 — (L 5222) D_1 M_1 निश्चितम् (for स द्रुतम्). — (L 5224) M_1 -मन्दिर-; G(ed) -नाथस्य (for -मण्डप-) — G_1 om lines 5225–5227. — (L. 5227) G_2 जायन्ते च म्रियन्ते च (for [a]) G(ed.) -कारिण (for -कर्मिण) D_1 G_1 M_1 G(ed) रङ्गेश्वरं तत्र नत्वा (for [a]). — After line 5229, G_2 ins

195** चन्द्रपुष्करिणीतीरे देवर्षिपितृमानवा ।
स्व स्व काममभीप्सन्तो वसन्ति पितर सदा ॥
अत्र वक्ष्ये महापुण्यमादितेश्चरितं महत् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥

चन्द्रपुष्करिणीस्नानं कुर्वन्ति ह्यनिशं नराः ।
गन्धर्वा लोकपालाश्च मुनयस्त्वृषयस्तथा ॥
सिद्धाश्च वसवश्चैव चन्द्रादित्यमरुद्गणाः ।
अणिमादिगुणैर्युक्ता ये चान्ये तत्त्वदर्शिन ॥
वसन्ति ह्यनिश पार्थ ब्रह्मरूपाः सुरोत्तमाः ।
मुक्तिकामा महाराज केचिद्वै भोगकामिन· ।
केचिद्वैराग्यकामाश्च वर्तन्ते भूमिलिप्सवः ।
अस्य क्षेत्रस्य माहात्म्य वक्ष्यामि कुरुपुंगव ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र सशयः ॥
शृणु राजन्पुरा तत्र ह्याश्चर्यं पुण्यवर्धनम् ।
अतिलेश्चरितं साक्षान्नारदेन प्रभाषितम् ॥
अदिति' पुत्रकामा तु कश्यपस्य प्रिया सती ।
धर्मिष्ठा लोकविख्याता तपश्चक्रे चिरं नृप ॥
चन्द्रपुष्करिणीतीरे ह्यनन्तमपराजितम् ।
ध्यायन्ती लोकमाता सा लोकानां हितकाम्यया ॥
अयुतत्रयमब्दाना कुर्वती तप उत्तमम् ।
तत्रास्ते देवकल्याणी चन्द्रपुष्करिणीतटे ॥
विज्ञाय चरित्त तस्या देवदेवो जनार्दनः ।
आययौ गरुडारूढो यत्रास्ते देववल्लभा ॥
पीताम्बरधर श्रीमान्दिव्यमालाविभूषितः ।
स्वरूपं दर्शयामास योगिनामपि दुर्लभम् ॥
स्पृशन्करेण पुण्याङ्गी बोधयित्वा पुन पुनः ।
सस्मितं वचनं चेदमुवाच मधुरं तदा ॥
किमर्थं देवि कल्याणि करोषि तप उत्तमम् ।
तुष्टोऽस्मि तपसा तेन किं ददामि तवानघे ॥

भीष्म उवाच ।

अदितिर्देवमाता सा देवदेवेन चक्रिणा ।
स्पृष्ट्वा परमकल्याणी ह्युक्ता वचनमब्रवीत् ॥

अदितिरुवाच ।

देवदेवारविन्दाक्ष पुराणपुरुषोत्तम ।
पाहि मां सर्वलोकेश भक्तानामभयंकर ॥
लक्ष्मीपते नमस्तुभ्यं निःस्पृहाय नमो नमः ।
ब्रह्मणे विष्णुरूपाय रुद्ररूपाय चक्रिणे ।
आदित्याग्निस्वरूपाय चन्द्रकान्ताय ते नम. ॥
भूधराय सुवर्णाय मेरुमूर्ध्नि स्थिताय च ।
रजताद्रिनिवासाय सदा सागरवासिने ।
चन्द्रपुष्करिणीनाथ पाहि मां भक्तवत्सल ॥
इति स्तुतो देवमात्रा देवयोनिरतीन्द्रियः ।
भगवान्पुण्डरीकाक्षः प्रसन्नो वाक्यमब्रवीत् ॥
स्तोत्रेण तपसानेन तुष्टो दक्षसुते शुभे ।
वरं वृणीष्व भद्रं ते वरदोऽहमिहागतः ॥
त्वया कृतमिदं स्तोत्र शृण्वतां वदतामपि ।
चन्द्रपुष्करिणीस्नानाद्यत्फलं तद्भविष्यति ॥

अदितिरुवाच ।

पुत्रं मे त्वादृशं देहि दैत्यानां विजयक्षमम् ।
पुरंदरस्य पुत्रस्य स्वर्गं दास्यसि मेऽनघ ॥
त्रैलोक्यसंपदं देहि दैत्यानेतानध कुरु ।
एतान्सर्वान्ममानन्त तव दास्यं सुरेश्वर ॥
दातुमर्हसि भूतेश भूयो भूयो नमोऽस्तु ते ॥
संप्रार्थितो देवमात्रा भगवान्मधुसूदन· ।
क्षणं ध्यात्वा दक्षसुतामाह लोकेश्वरो हरिः ॥
स्वपुत्रमसुरं जेतुं शक्तं ते लोकवन्दिते ।
न तं पश्यामि लोकेऽस्मिन्मामन्यत्र मनस्विनि ॥
तस्मात्त्वाहं पुत्रत्वं यतिष्ये गन्तुमव्यय ।
अत्रैव मे चिरं वासो भविष्यति न संशयः ॥
स्थितानामत्र कैवल्यं दिनमेकमपि क्वचित् ।
भविष्यतीति तामुक्त्वा तत्रैवान्तरधीयत ॥
देवमाता ततो देवी सती कश्यपवल्लभा ।
नत्वा हरिं जगद्योनिं स्वाश्रमं प्रययौ नृप ॥
निवेद्य वृत्तं स्वं भर्तु सुषुवे लोकनायकम् ।
शङ्खचक्रधरं देवं वनमालाविभूषितम् ॥
चतुर्भुजमुदाराङ्गं कोटिसूर्यसमप्रभम् ।
चन्द्रादित्यदृशं देवं वामनं जगतां पतिम् ।
वेदराशिं विशालाक्षं चन्द्रकोटिसुशीतकम् ॥
तं दृष्ट्वा कश्यपो विष्णुं स्तुत्वा नत्वा पुनः पुनः ।
अब्रवीन्मधुरं वाक्यं कृताञ्जलिपुटो नृप ॥
देवदेव जगन्नाथ प्रणतार्तिप्रणाशन ।
पाहि देवान्समस्तांस्त्वं त्वत्पादकमलाश्रयान् ॥

भीष्म उवाच ।

प्रार्थितो देवमात्रा च विश्वयोनिर्बलेर्मखम् ।
गत्वा यज्ञफलं तस्य दत्वा वचनमब्रवीत् ॥
कैवल्यं तव दास्यामि ह्यागच्छागच्छ सुव्रत ।

— (L. 5232) D_1 ऋषयो , G_1 M_1 मनवो (for सिद्धाश्च). — (L. 5239) D_1 -वृत्त (for तत्र) — (L 5248) G(ed) यत्रास्तेऽदितिरुत्तमा (for ᵇ) — G_2 G(ed) om the ref. — (L. 5256) D_1 दृष्ट्वा , G_1 सृष्टा , G_2 इष्टा , M_1 हृष्टा (for स्पृष्ट्वा) — G_1 M_1 G(ed) om the ref G_1 om. lines 5261–5264 — (L 5265) G_2 अरिंदम (for अतीन्द्रिय·). — (L 5267) G_2 उग्रेण (for स्तोत्रेण) — G_2 om lines 5269–5270. — (L. 5271) D_1 M_1 विजये , G_2 निधने (for विजय-). — (L. 5272) G(ed.) अर्थदातारमञ्जसा (for ᵇ). — (L 5280) G_2 गमिष्यामि सुशोभने (for ᵇ). — **After** line 5280, G_2 ins .

196** अत्रैव कुरु वासस्य इत्युक्त्वान्तर्दधे हरिः ॥
देवी स्वमाश्रमं प्राप्य भर्तुर्वृत्तं निवेदयत् ।
कालेन सुषुवे देवं शङ्खचक्रगदाधरम् ॥

— G_2 om lines 5282–5290 — (L 5287) D_1 -गदायुक्तं (for धरं देव) — (L. 5291) G_2 नमस्कृत्वा (for स्तुत्वा नत्वा). — After line 5292, G_2 ins. :

197** कृष्ण कृष्ण जगन्नाथ त्वद्भक्तान्पाहि सुव्रत ।

मम सेवापरो नित्यं मम ध्यानपरायणः ॥
चन्द्रपुष्करिणीतीरे मामर्चय सदानघ ।
आसुरं भावमुत्सृज्य ब्राह्मणी तनुमाश्रितः ।
मम पूजां सदा कुर्वन्परं श्रेयो गमिष्यसि ॥
दिव्य ददामि ते चक्षुर्मम रूपमनुत्तमम् ।
पश्य पश्येति तं चोक्त्वा दर्शयामास भैरवम् ॥
ब्रह्माण्डकटहं यावत्पूरित तन्नृपोत्तम ।
तावत्कृत्वा स्तुतो देवैर्मानुष्यं रूपमाश्रितः ॥
इक्ष्वाकुपूजितो देवो जगद्रूपी सुरेश्वरः ।
चन्द्रपुष्करिणीतीरं गन्तुं समुपचक्रमे ॥
पौलस्त्यकुलसंजातो बली दैत्यपतिर्नृप ।
विभीषणोऽभूद्धर्मात्मा भक्तानामग्रग प्रभु ॥
विष्णुर्नृणां स्वभक्तानामपवर्गप्रदो विभु ।
संप्रार्थितो देवगणैर्भूत्वा रघुकुलोत्तम ।
विनिहत्य दशग्रीवमयोध्यां प्राप धर्मवित् ॥
श्रीरामचन्द्रो भगवान्सीतया लक्ष्मणेन च ।
सुग्रीवप्रमुखैर्वीरैर्वानरै स्वपुरं ययौ ॥
तत्राहूय रघुश्रेष्ठो विभीषणमरिंदमम् ।
ददौ पूजा स इक्ष्वाको हरेरंशात्तु मुक्तिदाम् ॥
सोऽपि पूजां समादाय गच्छंस्तस्मै प्रणम्य च ।
चन्द्रपुष्करिणीतीरं प्राप्तवान्धर्मनन्दन ॥
तत्र शङ्कानिवृत्यर्थं तं देव तु शुभे तटे ।
निक्षिप्याचम्य वै गन्तुं शुद्धात्मा ह्यन्वियेष स ॥
तमुत्थापयितुं गृह्य न शशाक विभीषण ।
पुन पुनस्तमालिङ्ग्य श्रममाप विभीषणः ॥
तस्मिंश्चिन्ताकुले नाथो देवदेवो विभीषणे ।
अदृश्यखेचरो भूत्वा तमाहूयेदमब्रवीत् ॥
विभीषण महाभाग शृणु मे परमं वच ।
अत्र मेऽस्तु वने वासः कावेर्या परिवेष्टिते ॥
रक्षोभिर्दूषितं देशं नाहं गच्छामि सुव्रत ॥
अत्रैवागत्य मां नित्यमर्चयित्वा विभीषण ।
षण्मासे वापि पौलस्त्य प्रत्यब्दमथ वा कुरु ।
अस्मिञ्जन्मनि ते मुक्तिर्भविष्यति न संशयः ॥
रङ्गस्थानमिदं विद्धि भुक्तिमुक्तिफलप्रदम् ।
अस्य क्षेत्रस्य सदृशं पृथिव्यां नास्ति किंचन ॥
इत्युक्त्वा भगवा राजन्रङ्गस्थानं प्रविश्य च ।
श्रीरङ्गशायी भगवानत्रास्ते कमलापतिः ॥
अथ पूजा प्रयत्नेन कृत्वा तं प्रणिपत्य च ।
ययौ लङ्कां स पापिष्ठैर्विहीनां समलंकृताम् ॥
तदाप्रभृति देवाश्च देवमाता युधिष्ठिर ।
पूजां कुर्वन्ति यत्नेन रङ्गेशं मुक्तिकाङ्क्षया ॥
रङ्गमित्यब्रवीद्धीमान्यो वा को वा नृपोत्तम ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं भजेद्ध्रुवम् ॥
रङ्गं रङ्गमिति ब्रूयात्संप्राप्ते पापकर्मणि ।
दूरे तिष्ठन्ति पापौघा यद्येवं समुदीरयेत् ॥
चन्द्रपुष्करिणीस्नानं रङ्गमण्डपदर्शनम् ।
पुरा सचितपुण्यानामप्रयत्नेन लभ्यते ॥
ब्रह्मादय सुराः सर्वे योगिन सनकादयः ।
पूजां कुर्वन्ति यत्नेन प्रत्यब्दं पाण्डुनन्दन ॥
संसारसागरं तर्तुं य इच्छेत्पाण्डुनन्दन ।
स भजेद्रङ्गमध्यस्थं देवदेवं चतुर्भुजम् ॥
दृष्ट स्मृत पूजितो वा ध्यातो वा नमितोऽपि वा ।
समुद्धरति रङ्गेशो दुस्तराद्भवसागरात् ॥
रङ्गभक्तिपरा ये तु रङ्गनामपरास्तु ये ।
दुर्वृत्ता वा सुवृत्ता वा तेषा मुक्तिर्भविष्यति ॥
य इदं पुण्यमाख्यान शृणोति सततं नरः ।
रङ्गेशे विद्यते भक्ति पातकै स न लिप्यते ॥

Colophon

युधिष्ठिर उवाच ।

चन्द्रपुष्करिणी ह्येषा केनादौ सेवितानघ ।
तन्मे कथय तत्त्वेन गङ्गासुत नमोऽस्तु ते ॥

भीष्म उवाच ।

चन्द्रपुष्करिणीस्नानं रङ्गेशस्य च दर्शनम् ।
डम्भाल्लोभाद्वञ्चनाद्वा यः करोति स मुक्तिमान् ॥
ते वन्द्यास्ते प्रपूज्याश्च नमस्कार्या विशेषत ।
येऽर्चयन्ति च रङ्गेशं प्रणतार्तिप्रणाशनम् ॥

— (L. 5294) D1 त्वत्पादकमलाश्रितान् (for [b]). — G2 om line 5296 — (L. 5298) D1 M1 मदर्चन- (for मम ध्यान-) G2 मदर्चनपरायणम् (for [b]). — G2 om lines 5300–5301 — (L. 5300) G(ed.) आसुरीं तनुमुत्सृज्य (for [a]) — After line 5302, G2 ins .

198** बलिं बध्वा महातेजा वैकुण्ठं संप्रपद्यत ॥
पुरा दाशरथिः श्रीमान्हत्वा रावणमाहवे ।
चन्द्रपुष्कारिणी स्नात्वा अयोध्यां पुनराप ह ॥

— G2 om. lines 5303–5342 — (L 5306) M1 महेश्वर (for सुरे°) — (L. 5321) D1 उत्थापयाति तं गृह्य (for [a]) —Before line 5324, M1 ins. श्रीभगवानुवाच.— (L. 5325) M1 शृणु मे वचनं परम् (for [b]). — (L 5333) G1 M1 इत्युक्त्वा देवमार्गे तु (for [a]) — (L. 5340) G1 स गच्छति (for भजेद् ध्रुवम्) — (L 5341) G1 रङ्गरङ्गेति यो ब्रूयात् (for [a]). — (L 5342) M1 यदेव समुदीरयन् (for [a]). — For line 5342, D1 subst. ·

199** दूरे तिष्ठति पापौघो यद्येव समुदीर्यते ।

— G2 om lines 5345–5360 — (L 5354) G(ed) जायते (for विद्यते) D1 पातकैस्तु न विद्यते (for [b])

COLOPHON — *Sub-parvan* D1G1 2 M1 G(ed.) शेषधर्मा — *Adhy name*. D1 M1 G(ed) श्रीरङ्गमाहात्म्यम् G1 रङ्गेशमाहात्म्यम्. — *Adhy no.*. D1 G1, 2 M1 40;

स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
चन्द्रपुष्करिणीस्नानं यः करोति नराधिप ॥
तीर्थस्नानतपोभिश्च व्रतदानमखैरपि ।
यजन्ति कर्मयोगेन रङ्गेशं मुक्तिदं विभुम् ॥
शान्ता जितारिषड्वर्गा योगेनाप्यनहंकृता ।
यजन्ति ज्ञानयोगेन रङ्गेशं मनुजेश्वर ॥
दुर्वृत्तानां भवेन्मोक्षः सुवृत्तानां किमुच्यते ।
रङ्गभूमिगतानां च सर्वेषां च नृपोत्तम ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शृण्वतां वदतां चैव सर्वपातकनाशनम् ॥
आसीत्पुरा महीपालः सोमवंशसमुद्भवः ।
धर्मकेतुरिति ख्यातो नारायणपरायणः ॥
चन्द्रपुष्करिणीतीरे देवेशं पूज्य भक्तितः ।
अकरोद्यज्ञसाङ्गं मातापित्रोश्च पूजनम् ।
हेमवस्त्रान्नदानानि गोभूतिलवराणि च ॥
तेन पुण्यप्रभावेन सर्वैर्बन्धुजनैः सह ।
प्राप्तवान्वैष्णवं लोकं योगिनामपि दुर्लभम् ॥
तस्मिन्काले महाभाग ब्राह्मणो यज्ञवत्सलः ।
वेदवेदाङ्गतत्त्वज्ञस्तथा वै ग्रामयाजकः ॥
अयाज्ययाजकश्चैव धनार्जनपरः सदा ।
पिशुनो निष्ठुरः क्रूरो ह्यपण्यानां च विक्रयी ।
निषिद्धकर्माचरणात्परित्यक्तश्च बन्धुभिः ।
कृषिको दुःखितो दीनो हीनाङ्गो व्याधिपीडितः ॥
स कदाचिद्धनार्थं तु पृथिव्यां पर्यटन्नृप ।
जगाम नर्मदातीरं श्वासकासप्रपीडितः ।
तत्र पञ्चत्वमापन्नो न लेभे चौर्ध्वदेहिकम् ॥
तस्मिन्गते तस्य भार्या सुरूपा च सुयौवना ।
कामचाररता भूत्वा परित्यक्ता च बन्धुभिः ॥
तस्यां जातो महाराज चण्डालात्तु नराधमः ।
पापबुद्धिरिति ख्यातो जन्तूनामन्तकोपमः ॥
महापापरतो नित्यं ब्रह्मद्वेषपरस्तथा ।
परदारपरद्रव्यलोलुपो बन्धुवर्जितः ॥
गावश्च बहवो नित्यं निहत्य बहुपक्षिणः ।
चतुर्लक्षसुवर्णानि बहून्यपहृतानि च ।
मद्यमांसरतो नित्यं बहुशो मार्गरोधकृत् ॥
स कदाचिद्धनार्थं तु पृथिव्यां सचरन्नृप ।
कावेरीमध्यगां देवीं चन्द्रपुष्करिणीं गतः ॥
छादितं हेमकलशैर्दिव्यालंकारशोभितम् ।
रङ्गेशस्य निवासं तु दृष्ट्वाथ निशि धर्मज ॥
त दृष्ट्वा मुदमापन्नश्चोराणामधिपो नृप ।
हराम्यत्र सुवर्णानि बहूनीति मुदं ययौ ॥
स्नात्वा तत्र महाराज नत्वा तं भक्तिमानिव ।
विलोक्य बहुधा रत्नकाञ्चनानि बहूनि च ।
अपहर्तुमना रात्रौ वासं तत्राकरोन्नृप ॥
एतस्मिन्नन्तरे देवी कावेरी पापनाशिनी ।
जलौघैः प्लावयामास निशि चोरांस्तटे स्थितान् ।
चौरैः सह स्वकैः सोऽपि पापबुद्धिर्लयं गतः ॥
तस्मिन्नवसरे देवा विमानानां सहस्रकम् ।
आदाय तान्समारोप्य दिवं जग्मुः सहस्रशः ॥
सेव्यमानास्तु गन्धर्वैः पूज्यमानास्तु वज्रिणा ।
ब्रह्मलोकं गताश्चोरा यस्य संनिधिमात्रतः ॥
पापबुद्ध्या गता ह्येते पापिनोऽपि नरेश्वर ।
भक्त्या तु कुर्वतां नृणां सेवामात्रं किमुच्यते ॥
सहस्रयुगपर्यन्तं भुक्त्वा भोगाननेकशः ।
तस्माच्च ब्रह्मणो लोकाद्विष्णुलोकं प्रयान्ति ते ।
वैष्णवे तु स वै लोके तावद्भुक्त्वा दिवं गतः ॥
प्रवृद्धज्ञानसंपन्नो बन्धुमान्नाम भूपतिः ।
सोमवंशोद्भवः श्रीमान्सप्तद्वीपैकराडभूत् ॥
आसन्पदातयश्चोराः प्रभवस्तेऽतिधर्मिणः ॥
जातिस्मरत्वमापन्नो विशेषेण हरिप्रियः ।

G(ed) 41.

(L. 5355) G_2 निर्मिता (for सेविता). G(ed.) पुरा (for [अ]नघ). — (L. 5357) G_2 रङ्गनाथस्य दर्शनम् (for ^{b}). —(L. 5358) G_2 लोभान्मोहाद् (for डम्भाल्लोभाद्).— G_2 om. lines 5359–5364. — (L 5368) G(ed.) पुनर्जन्म न विद्यते (for ^{b}). — (L 5370) D_1 G_1 M_1 सद्यः (for सर्व-).— (L. 5376) G_1 G(ed.) स नृपः स्व- (for सर्वैर्बन्धु-) — (L. 5379) D_1 -सपन्नस् (for -तत्त्वज्ञस्). — (L 5380) G_1 मूर्खो (for चैव). D_1 $G_{1\cdot 2}$ M_1 तथा च (for दुर्वृत्तो). — After line 5388, G(ed) ins.:

200** अधर्मनिरतो मूर्खो दुर्वृत्तो वृषलीपति ।

— (L. 5387) M_1 सुलोचना (for सुयौवना) — (L. 5390) G_2 जनानाम् (for जन्तू°). — (L. 5393) D_1 G(ed) गावश्च तेन वै (D_1 निहता) राजन् (for ^{a}). D_1 G(ed) निहता (for °त्य). M_1 -भक्षकः (for -पक्षिणः). — (L 5399) G_1 G(ed) विमानं (for निवास). — (L. 5404) G_1 G(ed.) अपहर्तुमहो-रात्रं (for ^{a}). — After line 5404, G_1 ins.:

201** तत्र स्नानप्रभावेन चौर्यबुद्धिर्लयं गता ।
मनो विकृतिमापेदे पश्चात्स अभून्नृप ॥

— (L. 5406) M_1 पूरयामास (for प्लाव°) — (L. 5407) M_1 स्वसेवकैः (for सह स्वकैः) D_1 चोरैः स्वसेवकैः पापी (for ^{a}). — (L 5412) G_2 दिवं गताः (for नरेश्वर). — After line 5412, D_1 ins:

202** पापबुद्धिर्लयं गत्वा संप्राप्य ज्ञानमुत्तमम् ।
यस्या वै स्नानमात्रेण उत्तमा सद्गतिं ययुः ॥

— G_2 om. lines 5413–5414 — (L. 5416) D_1 तत्र भुक्त्वा भुव गतः (for ^{b}). — For line 5416, G_2 subst.:

203** विष्णुलोके बहून्भुक्त्वा भुवि राजा हि जायते ।

G_2 cont.:

204** बन्धुमानिति विख्यातो सोमवंशः प्रतापवान् ।

विष्णोर्देवालये नित्यं संमार्जनपरायण ।
दीपदानरतश्चैव रङ्गेशे भक्तिमानभूत् ॥
स कदाचिन्महीपालो रङ्गेशं प्राप्य धर्मवित् ।
विचित्रकलशोपेतं प्राकारमकरोत्प्रभु ॥
तन्मध्ये मण्डपं विद्वान्विस्तीर्णं चतुरस्रकम् ।
कारयामास धर्मात्मा चित्रस्थानविराजितम् ॥
तन्मध्ये पुण्डरीकाक्ष रङ्गेशं बन्धुमान्नृप ।
पूजयामास विविधैर्महारजतभूषणै ॥
चन्द्रपुष्करिणीस्नानं कावेर्याश्च तथामलम् ।
स्वभृत्यै पूजनं कुर्वंस्तत्र स परिमुच्यते ॥
एतद्दृष्ट्वा विस्मयानो ब्रह्मपुत्रोऽथ नारदः ।
अब्रवीन्मे कृपां कृत्वा गङ्गातीरे मनोरमे ॥

वैशंपायन उवाच ।

चन्द्रपुष्करिणीस्नानं रङ्गेशस्य च दर्शनम् ।
कुर्वन्ति ये कलौ भक्त्या तेषां मुक्तिर्हि शाश्वती ॥
रङ्गेशो देवदेवेशश्चन्द्रपुष्करिणीतटे ।
तिष्ठन्ददाति भूतानां मोक्षमक्षयमव्ययम् ॥
जन्मकोटिसहस्रेषु पुण्यं यै समुपार्जितम् ।
तेषां भक्तिर्भवेच्छुद्धा रङ्गेशे तत्सरोवरे ॥
जन्मकोट्ययुत पुण्यं यत्करोति नरो भुवि ।
तत्सर्वं दिनमेकं तु रङ्गेशे वसतो भवेत् ॥
य इदं पुण्यमाख्यानं शृणोति सततं नरः ।
रङ्गेशदर्शनफलं भवेत्तस्य न संशय. ॥

Colophon

वैशंपायन उवाच ।

श्रुत्वैतद्रङ्गनाथस्य वैभवं भाग्यवर्धनम् ।
विस्मयानं महाप्राज्ञं भीष्मो धर्मसुतं जगौ ॥

भीष्म उवाच ।

अथात संप्रवक्ष्यामि रङ्गनाथस्य वैभवम् ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥
चन्द्रपुष्करिणी नाम शाश्वती मुक्तिदायिनी ।
तत्रास्ते जगतां नाथः सर्वकालमरिंदम ॥
तां विसृज्य च धर्मात्मा भगवानव्ययः प्रभु ।
भक्तानां कामदः श्रीमांस्तत क्वापि न गच्छति ॥
सर्वानन्दकरी राजन्सर्वभाग्यप्रदायिनी ।
चन्द्रपुष्करिणी रम्या प्रीता सारूप्यदायिनी ॥
चन्द्रपुष्करिणी दिव्या यत्र तिष्ठति केशवः ।
स्नातानामत्र सा देवी संसारभयनाशिनी ॥
पुत्रदा पुत्रकामानां पापहा पापकारिणाम् ।
ऋतूनां फलदा देवी सर्वेषां भरतर्षभ ॥
तीर्थानां भुवि मुख्यानां क्षेत्राणां च नृपोत्तम ।
चन्द्रपुष्करिणी मुख्या यत्र तिष्ठति केशव ॥
सिद्धचारणगन्धर्वयक्षविद्याधरान्वितः ।
दिव्यस्त्रीनिकरै सेव्यो भुक्त्यर्थं च विमुक्तये ॥
सा राजन्दुर्लभा लोके विशेषेण कलौ युगे ।
हिमांशुस्तत्र धर्मात्मा तपस्तेपे सुदुश्चरम् ।
आराध्य देवदेवेशं ग्रहाणामधिपोऽभवत् ॥

युधिष्ठिर उवाच ।

किमर्थं तप्यते तेन ताराणामधिपेन वै ।
एतन्मे विस्तराद्ब्रूहि कृपा मयि तवास्ति चेत् ॥

भीष्म उवाच ।

आदौ तावन्महाभाग सविता च त्रयीमय ।
तपसा हरिमाराध्य लोकचक्षुस्तथाभवत् ॥
ज्ञात्वा तं सर्वभूतानां जीवभूतं दुरासदम् ।
अत्रिनेत्रोद्भवः श्रीमांतपस्तप्सुं मनो दधे ॥
तपसा लोकविख्यातो देवान्सेन्द्रानकम्पयत् ।
वायुभक्षो निराहारो जितक्रोधो महामतिः ॥
चन्द्रमा देवदेवेशं चन्द्रपुष्करिणीतटे ।
ध्यायन्स्तुवन्नमस्यंश्च चचार तप उत्तमम् ॥
ग्रीष्मे पञ्चाग्निमध्यस्थं हेमन्ते जलवासिनम् ।
जलधाराकुले राजन्वर्षतौ हि निराश्रयम् ॥
ध्यायन्तमतुलं देवं वासुदेवं जनार्दनम् ।
नीलजीमूतसंकाशं पीताम्बरधरं शुभम् ॥

— G_2 om lines 5417–5418. — (L. 5417) D_1 धर्मसेतुश्च भूपतिः (for ^{a}). — (L 5421) G(ed) स तु विष्णवालये नित्यं (for ^{a}). — G_2 om line 5422. M_1 om. lines 5423–5427. — (L 5424) G(ed) नृपः (for प्रभुः). — (L. 5427) D_1 भक्तिमान्, G_1 बुद्धि° (for बन्धु°). G_2 रङ्गेश पूजयेत्सदा (for ^{b}). — (L. 5429) G_2 कावेर्यां रङ्गदर्शनम् (for ^{b}) — For line 5430, G_2 subst. .

205** कृत्वा तत्रैव राजेन्द्र मुक्तिमाप सुदुर्लभाम् ॥

— G_2 om. the ref — (L 5434) G_1 G(ed) कलियुगे (for कलौ भक्त्या) — G_2 om lines 5435–5440. — (L 5436) D_1 इष्टं (for तिष्ठन्) M_1 मुक्तिम् (for मोक्षम्). D_1 पुनरावृत्तिवर्जितम् (for ^{b}) — (L. 5437) G_1 पुण्यं यत्सुसमार्जितम्; M_1 पुण्यं वै सुमहा° (for ^{b}) — D_1 G_1 om. lines 5438–5439. M_1 om. lines 5439–5440.

Colophon — *Mention of the Epic* · G_1. — *Subparvan* $G_{1, 2}$ M_1 G(ed) शेषधर्मा . — *Adhy name* : D_1 श्रीरङ्गमाहात्म्यम्, G G(ed) श्रीरङ्गेशमाहात्म्यम्, M_1 चन्द्रपुष्करिणीमाहात्म्यम् — *Adhy no* D_1 $G_{1, 2}$ M_1 41, G(ed) 42

(L 5444) G(ed) महाप्राज्ञो (for °प्राज्ञ) $G_{1, 2}$ विस्मयानो महाप्राज्ञो (for ^{a}). G_2 भीष्मो धर्मजमब्रवीत् (for ^{b}). — G_2 om the ref G_2 om line 5447–5461. — (L. 5447) G(ed) पुण्या (for नाम) — D_1 om lines 5448–5457. G_1 M_1 om. line 5453 M_1 om line 5458. — (L. 5461) M_1 सुलभा (for दुर्लभा). — For line 5462, G_2 subst. :

चन्द्रार्कनेत्रममलं विद्युच्चञ्चललोचनम् ।
सहस्रादित्यसकाशो वेदमूर्तिमकल्मषम् ॥
अणिमादिगुणोपेतमार्तत्राणपरायणम् ।
कल्पवृक्षतरोर्मूलं स्वर्गिणामास्पदं शिवम् ॥
कामधेनोर्मूलधनं सनकादिनिषेवितम् ।
जीवभूतमशेषाणां लोकाना पाण्डुनन्दन ।
सर्वगं तु सहस्राक्षं सहस्रकिरणं प्रभुम् ॥
एवं भक्त्या प्रार्थयन्तमन्तर्यामी जगन्मयः ।
आविर्बभूव धर्मात्मन्गरुडोपरि संस्थितः ॥
तमुवाच कुरुश्रेष्ठ देवगन्धर्वसेवितः ।
अत्रिनेत्रोद्भव श्रीमान्किमर्थं तप्यते त्वया ॥
तोषितस्तपसानेन तद्ददामि तवेप्सितम् ।
वरदं पश्य मां तात यत्ते मनसि रोचते ॥
लोकनाथवच श्रुत्वा शीतांशुस्तं प्रणम्य च ।
वरदं पुण्डरीकाक्षमस्तौषीत्कमलापतिम् ॥
नमो भगवते तुभ्यं सर्गस्थित्यन्तकारिणे ।
गुणत्रयस्वरूपाय तस्य भेदकराय च ॥
विश्वयोने जगन्नाथ सहस्रशिरसे नमः ।
सहस्रचक्षुषे तुभ्यं सहस्रभुजशालिने ॥
सहस्रपादमूलाय कर्मणां फलदायिने ।
यज्ञाय यज्ञरूपाय यज्ञानां पतये नमः ॥
पाहि पाहि जगन्नाथ प्रणतार्तिप्रणाशन ।
ध्रुवं पदमसामान्यं देहि मे भक्तवत्सल ॥
सौभाग्यमण्डलं देहि कान्तिं शीतकरीं प्रभो ।
अत्र तिष्ठ सदा देव चन्द्रपुष्करिणीतटे ।
मम नाम्ना पुष्करिण्या नामधेयं कुरु स्वयम् ॥
स्नातानामत्र देवेश भुक्तिं मुक्तिं प्रयच्छ ह ।
मां पाहि सर्वलोकेश भूयो भूयो नमोऽस्तु ते ॥

भीष्म उवाच ।

तथास्त्विति तमामन्त्र्य पुनर्वचनमब्रवीत् ।
ग्रहाणामग्रणीः श्रीमानादित्योऽयं हुताशनः ।
भवितासि द्वितीयो मे त्वमेवाहं न संशयः ॥
चन्द्रपुष्करिणी ह्येषा लोके ख्यातिं गमिष्यति ।
स्नातानामत्र सायुज्यं भविष्यति च मेऽनघ ॥
लोकमातुर्महालक्ष्म्या वरं दत्त्वा ततः परम् ।
अत्रैव स्थिरमेष्यामि तत्रांशेन सुधाकर ॥

सोम उवाच ।

अशेषजननी सा तु कुत्रास्ते मापते सती ।
लोकनाथ नमस्तेऽस्तु वद तत्कारणं प्रभो ॥

श्रीभगवानुवाच ।

पुराहं लोकरक्षार्थं संभवामि पुन· पुन ।
परित्राणाय साधूनामसतां निधनाय च ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥
तपश्चरति सा देवी सोढुं विरहमक्षमा ।
कुम्भघोणे महाक्षेत्रे सर्वसिद्धनिषेविते ॥
लक्ष्मीसरोवरे देवी स्वर्णपङ्कजकानने ।
ध्यायन्ती मां सदा देवी सर्वगं भक्तवत्सलम् ॥
सदा सेवितुमिच्छन्ती योगिध्येयं महामते ।
युगान्तां षट्शतं सोम ध्यायन्त्या मां तपः कृतम् ॥
तत्कारणात्तु यास्यामि चन्द्र संप्रति तत्र वै ।
गच्छ त्वं लोकमतुलं ज्योतिर्गणनिषेवित ॥
पतिस्त्वं सर्वऋक्षाणामद्यप्रभृति चन्द्रमाः ।
तरुगुल्मलतादीनामोषधीना द्विजन्मनाम् ॥

चन्द्र उवाच ।

कियद्दूरे स्थिता देवी तत्क्षेत्रस्य फलं तु किम् ।
एतद्वेदितुमिच्छामि लोकनाथ नमोऽस्तु ते ॥

श्रीभगवानुवाच ।

प्राचीभागे तपस्यन्ती योजनानां चतुष्टये ।
आस्ते तत्र सरस्तीरे स्वर्णपङ्कजकानने ।
कुम्भघोणमिति ख्यातं क्षेत्राणामुत्तमं विदु· ॥
लक्ष्मीसरोवरं नाम तत्र तिष्ठति संप्रति ।
निर्मितं तपसा देव्या परिशुद्धहृदा तया ॥
आदावपि च तत्क्षेत्रं देवर्षिगणसेवितम् ।
धर्मवृद्धिकरं क्षेत्रं कुम्भघोणं विदुर्बुधाः ॥
कुम्भकोणे मृतिर्यस्य तस्य लोको ममैव हि ।
ब्रह्मणा सेवितं स्थानं लोकानां सृष्टिमिच्छता ॥
गङ्गादिसर्वतीर्थानि संगृह्य च पुरा रमा ।
निर्ममे लोकरक्षार्थं पावनं तत्सरोवरम् ॥

206** चन्द्रपुष्करिणीतीरे हिमांशुस्तप आस्थित· ।
— After line 5470, G2 ins :

207** लोकानामीश्वरं देव स्तोत्रै श्रुतिमनोहरैः ।
स्तुत्वा लक्ष्मीपतेरेवं तूष्णीमास महामना· ।

— G2 om lines 5471–5485. — (L. 5477) G(ed.) शुभम् (for हरिम्) — (L. 5484) M1 सहस्रकिरणप्रभम् (for ^{b}), — (L 5488) G(ed.) सर्वात्मा (for धर्मात्मन्). — (L. 5489) D1 ददामि च यथेप्सितम्; G1 वरदोऽहमिहागत· (for ^{b}). — (5490) D1 वरयस्व च मां तात (for ^{a}). — G2 om. lines 5491–5501. Before line 5493, D1 ins. चन्द्रमा· — (5498) M1 भूतानां (for यज्ञानां). — Before line 5502, G2 ins. चन्द्र· — (L 5503) G2 मम नाम्नः पुष्करिणीं (for ^{a}) — M1 om. lines 5504–5506. — Before line 5507, M1 ins. श्रीभगवान् — (L 5507) D1 अमत:; G1 M °ग. (for °णी.). G(ed.) सुधाकर (for हुताशनः). — G2 om. line 5509 — (L. 5512) M1 सिद्धिम्; G(ed.) स्थितिम् (for स्थिरम्). M1 निशाकर (for सुधा°). — G(ed.) चन्द्र (for सोम) — (L. 5514) G2 भगवन्वद विस्तरात् (for ^{b}) — (L 5515) G2 G(ed.) युगे युगे (for पुनः पुन·) — G2 om. lines 5521–5531. — (L. 5527)

वर्षे वर्षे समागम्य ब्रह्माद्यास्तत्र देवताः ।
स्नात्वा मुनिवरा सर्वे यान्ति स्थान स्वक पुनः ॥
एकाहमपि य कुर्यात्स्नानं तत्र सुधाकर ।
प्राप्नोति सुरलोकं स पूजित सिद्धचारणै ॥
त्रिरात्रं वसता तत्र कुम्भघोणे सुरालये ।
ब्रह्मलोको भवेत्तेषा यावदाभूतसंप्लवम् ॥
लक्ष्मीसरोवरे स्नात्वा पूज्य मां भक्तिसयुतः ।
यो ददाति च यद्दानं तद्दानं पितृमुक्तिदम् ॥
पुण्यक्षेत्राणि सर्वाणि तीर्थानि सुमहान्ति च ।
वसन्ति तत्र वै सोम ह्यनिश पुण्यकाङ्क्षया ॥
तस्यैव सदृशं नास्ति त्रिषु लोकेषु सुव्रत ।
अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति ॥
पुण्यक्षेत्रे कृतं पाप वाराणस्या विनश्यति ।
वाराणस्या कृतं पाप कुम्भघोणे विनश्यति ।
कुम्भघोणे कृतं पाप कुम्भघोणे विनश्यति ॥
तस्याः सकाशं गच्छामि सुखी भव सुधाकर ।
तत्रापि मा भजस्वेति तत्रैवान्तरधीयत ॥
इति श्रुत्वा हरेर्वाक्यं हिमांशुर्विस्मयान्वित ।
ध्यायंस्तत्रापि देवेशमास्ते चिरतरं नृप ॥
भूसुतोऽपि च तं दृष्ट्वा हिमांशुं च सुधाकरम् ।
उग्रेण तपसा तत्र स तृतीयो ग्रहोऽभवत् ॥
पितुराज्ञां पुरस्कृत्य सौम्योऽपि तपसात्र च ।
अवाप रविसालोक्यं ग्रहाणा मध्यमेव च ॥
गुरु. कमलपत्राक्षीं स्वका भार्यां हिमांशुना ।
हृतां परमकल्याणीमवापात्र च सेवनात् ॥
दैत्यमन्त्री चिरं कालं तत्र तप्त्वा तप परम् ।
अवाप्य मध्यं तेषा तु ग्रहाणां शुभदोऽभवत् ॥
शनिस्तु रविजः श्रीमान्राहुकेतू च तावुभौ ।
ते सर्वे सुचिरं तप्त्वा ग्रहसख्यामुपागताः ॥
इन्द्रो यमः प्रचेताश्च कुबेरनलकूबरौ ।
कुम्भघोणे महाविष्णुमाराध्य प्रययुर्दिवम् ॥
दिशां पतित्वमापन्ना नित्यं देवै प्रपूजिता ।
आराध्य देवदेवेशं दिक्पालत्वमुपागताः ॥
हरिश्चन्द्रो नलो राजा पुरुकुत्स पुरूरवा ।
सगर. कार्तवीर्यश्च षडेते चक्रवर्तिन ॥
ख्यातिं लोके महत्सत्त्वं धर्मश्रद्धां महद्धनम् ।
अवापुस्तस्य कृपया तपसा च शुभव्रताः ।
शृण्वता वदता चेदमेतद्भाग्यं भवेद्ध्रुवम् ॥

Colophon.

युधिष्ठिर उवाच ।

देवदेवो जगन्नाथ प्रणतार्तिप्रणाशन ।
शिवमूर्ति प्रसन्नात्मा लोके प्रत्यक्षतां गत: ॥
कथ शंभुरिति ख्यात. पूज्यते विधिवद्द्विजै. ।
कथं ददाति भक्तानां प्रसन्नात्मा वरं परम् ॥
तस्य देवस्य पूजाया फल किं केन पूजितः ।
क. प्राप्नोति शुभाल्लोकानेतान्सर्वान्वदस्व मे ॥
देवव्रत महाभाग कृपा मयि तवास्ति चेत् ।
तस्मात्त्वां प्रार्थयाम्यद्य पातुं धर्मामृतं प्रभो ।

भीष्म उवाच ।

अहो वक्ष्यामि ते पार्थ भूतनाथस्य वैभवम् ।
यस्य श्रवणमात्रेण सर्वपापै· प्रमुच्यते ॥
आद्यन्तशून्यो देवेशः सृष्टिस्थित्यन्तकारकः ।
ब्रह्मा रुद्रस्तथा विष्णु कुबेरो देवराट् प्रभुः ॥
इन्द्रोऽग्निर्यमधर्मेशो निर्ऋतिर्वरुण प्रभु. ।
वायुः सूर्यः सहस्राक्षः सर्वेशो भूर्भुव.सुव ॥
कालरूपस्य धर्मस्य लोकनाथस्य धर्मज ।
नाहं वक्तुमशक्तोऽस्मि तत्स्वभावमशेषतः ॥

युधिष्ठिर उवाच ।

तेषामीश्वरभक्तानां विष्णुलोकः कथं भवेत् ।

G(ed.) तृण· (for तरु-) — G2 om. lines 5534–5535. G2 om. lines 5537–5542. —(L. 5540) G1 पापाना नाशकं परम् (for [b]). — (L. 5543) D1 G2 M1 स्नानमात्र (for स्नानं तत्र). — (L. 5544) D1 G2 M1 सर्वपापविवर्जित: (for [b]), — G2 om. lines 5545–5548. —(L. 5549) G2 सुबहूनि (for सुमहान्ति). — (L 5560) G2 M1 सुधामयम् (for °करम्). — After line 5560, G2 ins. :

208** गुरुरुग्रं च तप्त्वाथ तप· परमदारुणम् ।

— G2 om. lines 5562–5566. — (L. 5562) G1 बुधो (for सौम्यो). — (L. 5567) G2 एतेषां (for तेषां तु). — After line 5567, G2 ins

209** भृगु· सौम्य· शनि केतू राहुर्देवगुरुस्तथा ।
एव तप्त्वा तप क्रूर लेभिरे ग्रहदेवताम् ।
एवमन्ये महाराज अत्र तप्त्वा दिदृक्षव· ॥
इदं पवित्रं पापघ्नं शृण्वतां पठतामपि ।
य· शृणोति नरो भक्त्या सर्वपापै· प्रमुच्यते ॥

— D1 om lines 5570–5573 — (L. 5578) M1 सत्यं (for भाग्य).

COLOPHON —*Sub parvan* D1 G1 आश्चर्यपर्वणि शेषधर्मा: ; G2 M1 G(ed) शेषधर्मा — *Adhy name* · D1 G1 M1 G(ed.) कुम्भघोणमाहात्म्यम् — *Adhy. no.* · D1 G1, 2 M1 42 ; G(ed) 43

(L 5581) M1 G(ed) विधिना (for °वद्). — G2 om. lines 5585–5586. —G2 देवव्रत (for भीष्म) —(L 5590) M1 कृष्ण (for विष्णु) D1 G2 ब्रह्मा विष्णुस्तथा कृष्ण (G2 रुद्र) — G2 om lins 5591–5592 —(L. 5591) D1 इन्द्रोऽग्निर्धर्मराजश्च (for [a]). —(L. 5594) D1 अहं वक्तुं न शक्तोऽस्मि (for [a]). — After line 5598, D1 ins. :

210** भीष्मः ।
अयं हि भगवान्पूर्वं सृष्टिस्थित्यन्तहेतवे ।

एतन्मे संशयं तात छेत्तुमर्हस्यशेषतः ॥

भीष्म उवाच ।

ब्रह्माविष्णुमहेशानां भेदः कुत्रापि न प्रभो ।
कर्तारो ह्यद्य लोकानां सृष्टिस्थितिलयेषु च ॥
त्वया दृष्टः पुरा कृष्णो लोकनाथो जगन्मयः ।
कैलासयात्रामकरोत्पुत्रार्थं भरतर्षभ ॥
तत्राराध्य चिरं कालं भूतनाथमुमापतिम् ।
ईप्सितं प्राप्तवान्पुत्रं तस्माद्भेदो न विद्यते ॥
शंकरो विष्णुमव्यक्तं चिरमाराध्य भक्तिमान् ।
षण्मुखं लभते पुत्रं देवतार्थमरिंदमम् ॥
ब्रह्मा च जनयामास विष्णुमाराध्य भक्तितः ।
लोकान्प्रजापतीन्सर्वांस्तस्माद्भेदो न विद्यते ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शृण्वता सर्वपापघ्नमायुरारोग्यवर्धनम् ॥
पुरा कृतयुगे राजन्सुशान्तो नाम वै द्विजः ।
शान्तो जितेन्द्रियो मौनी सदा ध्यानपरायणः ॥
वेदेषु धर्मशास्त्रेषु वेदान्तेषु विचक्षणः ।
गार्हस्थ्ये सकलान्कामाननुभूय द्विजोत्तम ।
मोक्षकामो हि राजेन्द्र विशेषेण शिवव्रतः ॥
किष्किन्धां समुपागम्य ब्रह्मदत्तेन पालिताम् ।
पम्पासरोवरे स्नानं कृत्वा तु शिवमर्चनम् ।
तपस्तप्तुमना राजंस्तत्रास्ते शंकरं स्तुवन् ॥
पम्पानाथं विरूपाक्षं नीललोहितमव्ययम् ।
मृत्युंजयं कृत्तिवासं पिनाकिनमरिंदमम् ॥
सहस्राक्षं सदानन्दं नीलमेघनिभं हरम् ।
शूलपाणिं महादेवं सृष्टिस्थित्यन्तकारिणम् ॥
ध्यायन्स्तुवन्नमस्यंश्च तत्रास्ते ब्राह्मणोत्तमः ।
त्रैयम्बकं महामन्त्रं रुद्रसूक्तादिभिः शिवम् ॥
स्नापयित्वा तु तं पूज्य त्रिकालं स्नानतत्परः ।
शाकमूलफलाहारः शान्तः परमबुद्धिमान् ॥
अत्र तिष्ठति राजेन्द्र तस्मिन्नास्ते द्विजोत्तमः ।
शूद्रो वै धर्मकुशलो नामतः संगतो बुधैः ।
शिवभक्तो जितक्रोधः शुश्रूषुश्च द्विजन्मनाम् ॥
विरूपाक्षस्य देवस्य वन्दनार्थं ययौ च सः ।
सुशान्तस्य तदा कुर्वञ्शुश्रूषां राजसत्तम ।
तत्रास्ते सरसस्तीरे जिताहारः शतं समाः ॥
तस्मिन्काले विरूपाक्षो भूतनाथो जगन्मयः ।
आविर्बभूव राजेन्द्र ततो वाचमुवाच ह ॥
सुशान्त शृणु मद्वाक्यं तपसा तोषितोऽस्म्यहम् ।
वरं वरय भद्रं ते विद्धि भूतपतिं च माम् ॥
एतद्वचस्तदा श्रुत्वा ब्राह्मणो विस्मयान्वितः ।
नत्वा पुनः पुनर्देवमस्तौषीज्जगतां पतिम् ॥
नमस्ते पार्वतीकान्त नमस्ते चन्द्रशेखर ।
नमश्चैतन्यरूपाय पशूनां पतये नमः ॥
विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव ।
शरणं भव भूतेश करुणाकर शंकर ॥
नमो धर्माय देवाय विश्वरूपाय शूलिने ।
भूतनाथाय धर्मात्मन्नमस्ते नागभूषण ।
भस्मोद्धूलितसर्वाङ्ग जटाधर सदाशिव ॥
मृगनाभिसुगन्धाय मृगचर्मधराय च ।
कपालमालिने तुभ्यमक्षसूत्रधराय च ।
भूयो भूयो नमस्तुभ्यं पुरान्तक जगन्मय ॥

भीष्म उवाच ।

एवं स्तुतः प्रसन्नात्मा पार्वतीवल्लभः प्रभुः ।
अष्टमूर्तिधरः श्रीमान्देवगन्धर्वसेवितः ॥
वरं ब्रूहीति तं चोक्त्वा शूद्रं भक्तिसमन्वितम् ।
अतिष्ठत्तस्य पुरतः पूर्वाद्रिरंशुमानिव ॥
वरेण्यं वरयामास ब्राह्मणो लोकविश्रुतः ।
चतुर्थोऽपि च मे श्रेयो ददस्वेति वरं तदा ॥
नीलकण्ठस्तदाकर्ण्य स्मितपूर्वमभाषत ।

त्रिरूपाणि चकारासौ त्रिरूपेषु व्यवस्थितः ॥

—(L. 5602) D_1 च लभेत्, $G_{1,2}$ M_1 लभते (for प्राप्तवान्). D_1 om. (hapl.) lines 5602^{b}–5604^{a}. —(L. 5604) G(ed.) लब्धवान् (for लभते). G_1 अनिन्दितम् (for अरिंदमम्). — After line 5606, D_1 ins.:

211** ईश्वरो विष्णुमव्यक्तं शिवमाराध्य भक्तितः ।
षण्मुखं लभते पुत्रं देवपुत्रमरिंदम ॥

—(L. 5608) G_2 G(ed.) आयुर्वर्धनकारणम् (for ^{b}). — G_2 om. lines 5611–5612. —(L. 5611) M_1 विशारदः (for विचक्षणः). G_1 वेदाङ्गेषु विशारदः (for ^{b}). —(L. 5613) D_1 G_2 शिवप्रियः (for °व्रतः). —(L. 5615) $G_{1,2}$ G(ed.) अर्च्य च, M_1 अव्ययम् (for अर्चनम्). —(L. 5616) G_1 M_1 चर्तुमना, G(ed.) कर्तुं° (for तप्तुं°). G(ed.) स्म शिवं (for शंकरं). — G_2 M_1 om. lines 5619–5620. —(L. 5625) G(ed.) अतिष्ठत्तत्र राजेन्द्र (for ^{a}). G_1 काले (for आस्ते). —(L. 5626) D_1 G(ed.) रुद्रो (for शूद्रो). G_2 रुद्रो वै तत्र कुशलो (for ^{a}). —(L. 5627) G_1 जितवाक्कायमानसः (for ^{b}). —(L. 5628) D_1 M_1 सरः (for च सः). —(L. 5629) D_1 सुशीलस्य (for सुशान्तस्य). — After line 5630, D_1 ins.:

212** भीष्मः ।
इमां विद्यां शृणुष्वाद्य लोकवन्द्योऽसि मेऽनघ ।

— D_1 om. lines 5631–5712. —(L. 5633) G_1 ब्रह्मञ्शृणुष्व मे वाक्यं (for ^{a}). —(L. 5636) M_1 दोर्भ्याम् (for देवम्). —(L. 5637) G_1 G(ed.) पार्वतीनाथ (for °कान्त). — M_1 om. lines 5639–5644. — After line 5640, G(ed.) ins.:

213** शिव शंभो महादेव विश्वेश्वरामरवल्लभ ।

शृणु विप्रवरश्रेष्ठ तव दास्ये तदीप्सितम् ।
अन्यजन्मनि शूद्रस्य दास्यामि वरमुत्तमम् ॥
एवं शिववचः श्रुत्वा ब्राह्मणो हितकृत्सताम् ।
उवाच शंकरं नत्वा मृद्वक्षरममन्वितम् ॥
विश्वंभर तथैवास्तु ममापि न हि तं विना ।
कथं यास्यामि ते लोकं शुश्रूपुश्च सखा मम ॥
इत्युक्त्वा मौनमास्थाय पादौ नत्वा शिवस्य च ।
शुभं पञ्चाक्षरं मन्त्रं जपन्नास्ते तपोवने ॥
नीलकण्ठ पुनश्चेदमुवाच तपतां वरम् ।
तथाहं तु करिष्यामि युवयोर्ब्राह्मणोत्तम ॥
शूद्रस्य शत्रुभावं त्वमेष्यसि त्वन्यजन्मनि ।
दर्शनाच्च वधाच्चैव युवयोर्मुक्तिरस्त्विति ॥

ब्राह्मण उवाच ।

कथं शत्रुत्वप्राप्नोति शूद्रो मे ह्यन्यजन्मनि ।
एतद्भूतेश मे ब्रूहि मम जन्म च शंकर ॥

ईश्वर उवाच ।

मतङ्गो नाम विप्रर्षिर्भवितासि द्विजोत्तम ।
इन्द्रपुत्रो ह्यय शूद्रो वालीति ख्यातिमेष्यति ॥

ब्राह्मण उवाच ।

किं च ते भवता रूपमीदृश पावन परम् ।
ब्रूह्येतत्सर्वभूतेश भूयो भूयो नमोऽस्तु ते ॥

शकर उवाच ।

रामो दाशरथिर्भूत्वा जटावल्कलवान्रणे ।
हनिष्यति शरेणाशु विदूरे दृष्टिगोचरे ।
इत्युक्त्वा सहसा देव सहसा तु तिरोदधे ॥
कस्यचित्त्वथ कालस्य द्विजशूद्रौ लयं गतौ ।
तत्र भोगान्दिविस्थान्वै यथावदनुभूय च ।
भुवस्थलं प्रपन्नौ तौ तपोबलसमन्वितौ ॥
मतङ्गोऽभूत्सुशान्तोऽथ सर्वधर्मपरो नृप ।
शूद्रोऽसौ वालित्वमापन्नो ह्यसख्येयबलस्तदा ॥
कुर्वतस्तप अत्युग्रं मतङ्गस्य विरोधकृत् ।
किष्किन्धां समुपागम्य हरीणामधिपोऽभवत् ॥
तप कुर्वति धर्मिष्ठे मतङ्गमुनिपुंगवे ।
शंकर· सर्वभूतानां तदा रामत्वमाप्तवान् ।
प्राप्तवान्वनमत्युग्र पितुर्वचनगौरवात् ॥
पम्पासरोवरं गत्वा रामाख्यो भगवान्हरः ।
आदित्यसूनोर्व्याजेन हत्वा वालिनमग्रत ।
स्वपदं दत्तवान्राजन्दर्शनाद्ब्राह्मणस्य च ॥
धर्मशीलसुशान्तौ च सप्राप्तौ च शिवालयम् ।
पूजितौ भूतपतिना ह्यनुभूय सुखान्बहून् ।
ययतुर्विष्णुलोकं तौ कोटिवंशसमन्वितौ ॥
तस्माच्छिवार्चनं नित्य भुवि मुक्तिफलप्रदम् ।
हरिशंकरयोर्भेदं नास्ति नास्ति जनाधिप ॥
य इदं पुण्यमाख्यानं नारदेन प्रभाषितम् ।
शृणुयात्तस्य वै नाको भेदबुद्धिर्न जायते ॥

Colophon.

युधिष्ठिर उवाच ।

पितामह नमस्तेऽस्तु साक्षात्त्वं धर्ममूर्तिमान् ।
केन पुण्यप्रभावेन वाणी वदसि धर्मजाम् ॥
शृण्वन्ति सर्वे मनुजा· कथाममृतसंमिताम् ।
न क्षमस्त्वदृते वक्तुमेवमन्यो वदस्व मे ॥

भीष्म उवाच ।

व्रतदानेषु निरता ये द्विजा धर्मतत्परा ।
ते जानन्ति कथां रम्यां धर्मगर्भां बहुप्रदाम् ॥
अरिषड्वर्गजेतारो ब्राह्मणा गतकल्मषाः ।
पुराणधर्मशास्त्रज्ञास्ते जानन्ति नृपोत्तम ॥

युधिष्ठिर उवाच ।

केन व्रतेन वाक्सिद्धिः सर्वसपत्तथा भवेत् ।
व्रतं तत्तादृशं ब्रूहि करिष्ये वचनात्तव ॥

भीष्म उवाच ।

कृपया वासुदेवस्य सर्वं जानामि धर्मज ।
यथा ह्यञ्जितनेत्रस्तु निधिं पश्यति भूगतम् ॥

हर शकर विश्वात्मन्नीलकण्ठ नमोऽस्तु ते ॥

— G(ed.) om the ref. — (L 5649) G_2 विप्र (for शूद्रं). — (L. 5651) G_1 -वन्दित: (for -विश्रुतः). — (L. 5661) G_2 जपन् (for शुभं) M_1 G(ed.) तपोधन (for °वने). — (L. 5665) $G_{1,2}$ M_1 उभयोर्मुक्तिरस्तु हि (for [b]). — (L. 5668) M_1 ब्रह्मर्षिर् (for महर्षिर्)· G_1 त्व (for [अ]सि). — (L. 5670) M_1 G(ed) मे भविता (for ते भवता). — G_2 ईश्वर (for शकर). — After line 5672, G_1 ins

214** किष्किन्धाया बहिर्देशे वालिन हेममालिनम् ।

— (L. 5673) G_1 G(ed) हनिष्यामि (for °ष्यति). — (L. 5674) M_1 इत्युक्त्वा स महादेव: (for [a]). M_1 कुरुश्रेष्ठ; G(ed.) देवैः सह (for सहसा तु) — (L 5676) G_2 दिवि भुक्त्वा (for दिविस्थान्वै). — (L. 5678) G_2 M_1 स(M_1 स्व)-धर्मकुशलो नृप (for [b]). — (L 5679) G_1 सोऽपि शूद्रत्व-मापन्नो (for [a]) G_2 M_1 ह्यसह्यबलदर्पित (for [b]). — (L. 5683) M_1 G(ed) -भक्ताना (for -भूताना). — (L 5689) G(ed) सुखं बहु (for सुखान्बहून्) — (G. 5690) G_2 -समुद्भवौ (for -समन्वितौ) — (L 5691) G_2 भक्ति- (for भुक्ति-). — (L 5694) G_1 नाकं, M_1 राजन् (for नाको).

COLOPHON om in D_1 — *Sub-parvan* $G_{1,2}$ M_1 G(ed) शेषधर्मा — *Adhy name*. G_2 शिवरामावतार·; G(ed) हरिहराभेदप्रशसा· — *Adhy no* $G_{1,2}$ M_1 43; G(ed) 44

(L 5695) G_2 महाप्राज्ञ (for नमस्तेऽस्तु). G_2 साक्षाद्धर्म इवापरः (for [b]) — (L 5698) $G_{1,2}$ एवमन्ये वदस्व तत्; G(ed) °न्ये वदाद्य तत् (for [b]) — (L. 5699) G(ed) -वत्सलाः

शृणु वेदविदां श्रेष्ठ सर्वज्ञस्त्वं मतोऽसि मे ।
कृष्णस्य यादवेन्द्रस्य कृपापात्रोऽसि पार्थिव ॥
अत्रैवागन्तुमिच्छन्वै द्वारवत्यां स तिष्ठति ।
रिपूंस्तान्क्षणमात्रेण निर्जित्य युधि केशव. ॥
सोऽब्रवील्लोकपूज्याया भारत्यास्तु शुभं व्रतम् ।
भारती सर्वदा पूज्या लोकवन्द्येति मेऽनघ ॥
तदर्थमद्य ते वच्मि सर्वसिद्धिप्रद शुभम् ।
कृष्णप्रियकर विद्धि लोकमातुश्च तत्प्रियम् ।
तत्प्रियं सर्वदेवानां नवरात्रिव्रतं शुभम् ॥
गजाश्वरथशस्त्रादीनलंकृत्य शुभे दिने ।
कल्पोक्तहोमकर्मादि कृत्वा चान्ते पठेदिमम् ।
शृण्वतां सर्वपापघ्न मर्वसंपत्करं शुभम् ॥
कोशवृद्धिर्भवेत्तेषां राज्यवृद्धिश्च भूभृताम् ।
वाक्सिद्धिर्बहुपुत्राश्च भारत्यास्तु प्रसादतः ।
तस्मात्तवापि राजेन्द्र राज्यप्राप्तिर्भवेद्ध्रुवम् ॥

युधिष्ठिर उवाच ।

कस्मिन्काले महादेवी पूज्या पुस्तकधारिणी ।
विद्यामूर्तिर्वदास्माकमाख्याहि त्वं विधिं शुभम् ॥

भीष्म उवाच ।

अहो वदामि ते देव्या पूजां सर्वसमृद्धिदाम् ।
सर्वदा पूजयेद्देवीं भारतीं सर्वमातरम् ॥
महानवम्यां प्राप्तायां पूजां कुर्वीत यत्नतः ।
प्राप्ते चाश्वयुजे मासे शुक्लपक्षे समुद्भवा ।
या तिथिर्नवमी प्रोक्ता सा महानवमी स्मृता ॥
उषस्युत्थाय संकल्पमाचरेत्तत्तिथौ सुधी ।
अर्चयिष्ये जगत्पूज्यां शारदां विशदप्रभाम् ।
सितपद्मासनां देवीमक्षरां शशिभूषणाम् ॥
विद्यामूर्तिं विशालाक्षीं मौक्तिकादामभूषिताम् ।
वज्रवैडूर्यवलयां ज्योतिर्मणिविराजिताम् ॥
इति ध्यात्वा तु संकल्प्य स्नात्वा तु सुसमाहितः ।
आवाह्य पूजयेद्देवीं विद्यापुस्तकमण्डले ॥
मेधादेव्यनुवाकेन ह्युपचारान्प्रकल्पयेत् ।
व्रते महति नैवेद्यमर्पयेत्प्रयतेन्द्रियः ॥
स्वसूत्रविधिना वेद्यां प्रतिष्ठाप्य हुताशनम् ।
होमं प्रकल्पयेद्विद्वांस्तिलपायससर्पिषा ॥
मेधादेव्यनुवाकेन प्रत्यृच जातवेदसि ।
हुनेद्गोष्ठेऽश्वशालायां गृहमध्ये च वा बुधः ॥
पूजितायां तु भारत्या ह्यनेन विधिना नृप ।
पूजकस्य च ये कामास्ते सर्वे वशवर्तिनः ।
सेवन्ते तं नृपश्रेष्ठ सेवका इव हि ध्रुवम् ॥
ब्राह्मणान्भोजयेद्भक्त्या प्रीणयेद्वसुदानतः ।
विप्राग्निहुतशेषेण तुरगान्भोजयेद्व्रती ॥
कुञ्जरान्स्यन्दनान्वाहान्यानानि विविधानि च ।
आयुधानि विचित्राणि धनुर्बाणादिकान्यपि ।
अर्चयेदात्मरक्षार्थं शुभैर्नीराजनादिभिः ॥
अस्य व्रतस्य माहात्म्यं को वेत्ति हरिणा विना ।
सोमदत्ते पुरा दृष्टं व्रतस्य सुमहत्फलम् ॥

युधिष्ठिर उवाच ।

सोमदत्तो यथा दृष्टं भवता व्रतमुत्तमम् ।
तदेतदखिलं श्रोतुं पर कौतूहल हि मे ॥

भीष्म उवाच ।

सोमदत्तो महानासीत्पुरा सोमकुलोद्भवः ।
राजा परमधर्मज्ञो बन्धुमाननहंकृति ॥
सत्यवादी सदा मौनी ह्यातिथेयो बहुप्रजः ।
सत्सु पूजां प्रकुर्वाण सन्नशत्रु पराक्रमैः ।
बुभुजे भुवमव्यग्र. सरत्नाकरमेखलाम् ॥
तेन संपीडिता राज्ञा समेताः शत्रव परे ।
माहिष्मतीपुरं गत्वा तैर्मत्तै पीडितो रणे ॥
अक्षौहिणीसहस्रैश्च ह्ययुतै करिणां व्रजैः ।
अश्वैः काश्मीरजैस्तात लक्षकोटिसमन्वितैः ॥
संग्रामस्तुमुलस्तत्र सोमदत्तस्य तैरभूत् ।
शक्तितोमरखड्गैश्च भिण्डिपालैस्तथाश्मभिः ।
यथा देवासुरं युद्धं तथाभूत्किं नु वर्ण्यते ॥
परैर्हतबलः संख्ये निशि संगृह्य वेदिकाम् ।

(for -तत्पराः). — G2 om. lines 5701–5704. — G2 om. the ref — (L. 5705) M1 सर्वज्ञानानि धर्मज (for [b]). — (L. 5707) G1 सर्वज्ञानी; G2 °दा त्व (for °ज्ञस्त्वं). — (L 5708) G(ed) कृपापात्रमसीश्वर (for [b]) — After line 5713, G(ed) ins.:

215** राज्यलाभकर तात सर्वत्र सुखद शुभम् ।

— M1 G(ed) om. (hapl) lines 5716–5718 G1 om line 5718 — (L. 5718) D1 शृण्वतामायुरारोग्यं (for [a]). — (L. 5722) G1 2 G(ed) -रूपिणी (for -धारिणी) — (L. 5726) G2 पूजां कुर्यात्समाहित (for [b]) — (L 5728) G2 सद्भिः (for प्रोक्ता) — (L 5731) D1 श्रियं शशिनिभाननाम्; G2 G(ed) त्र्यक्षा (G2 तीक्ष्णा) शशिविभूषणाम् (for [b]). — (L. 5732) G2 G(ed.) मुक्तादामविभूषिताम् (for [b]). — (L. 5733) D1 भूषणैश्च समन्विताम् (for [b]). — For line 5737, D1 subst ·

216** गन्धधूपादिमाल्यैश्च अर्चयेत्प्रयतेन्द्रिय ॥

— (L. 5738) D1 विद्वान् (for वेद्यां). — (L. 5741) D1 अग्नि संस्थाप्य शालायां; M1 जुहुयाद्गोष्ठशा° (for [a]). D1 G(ed.) पुन (for बुधः). — (L 5745) D1 षड्रसान्नैः प्रयत्नतः (for [b]). — D1 G1 2 M1 om. line 5748 — (L. 5756) D1 M1 बहुप्रद· (for °प्रज). — (L 5759) G2 तेन संपीडितो राजा (for [a]). — (L. 5760) D1 त्रैगर्तैः; G2 समेतैः (for तैर्मत्तैः). M1 तैर्मुक्तैः पूजितो रणे (for [b]). — (L. 5765) G2 M1 देवासुरैर् (for °रं) G1 तथासीद्रोमहर्षणम् (for [b]). — (L. 5767) D1 वेदिकासहितः श्रीमान् (for [a]). — (L. 5768) G2 षण्मासान्; M1 मासानि (for -मासांश्च). — After

स्त्रियमन्तस्थसत्त्वां च प्रागाद्गर्गाश्रमं प्रति ॥
तत्रैव पञ्चमासांश्च स्थित्वा शोकसमन्वितः ।
पङ्गुत्वमथ मूकत्वमन्धत्वमगमन्नृप ॥
राज्यभ्रष्टं पतिं पत्नी प्राप्तुकामं पुनः श्रियम् ।
प्रलपन्तं मुहुः पुत्रान्हतान्युद्धे सुदुर्लभान् ॥
श्रियं राज्यं च भोगं च समुद्दिश्य पुनः पुनः ।
आश्वासयन्ती सा देवी जगौ श्लोकचतुष्टयम् ॥

वेदिका उवाच ।

धैर्यं विपदि कर्तव्यं संपत्तौ च क्षमा परा ।
वाचालत्वं सतां मध्ये तद्धि शास्त्रपुरःसरम् ॥
विक्रमो युधि कर्तव्यः स्थिरत्वं स्त्रीसमीपतः ।
ऐश्वर्ये च सदा क्षान्तिर्भक्तिः शश्वत्तु भूसुरे ॥
भवितव्यं भवत्येव नाळिकेरफलाम्बुवत् ।
गन्तव्यं गच्छति सदा गजभुक्तकपित्थवत् ॥
यद्भावि तद्भवत्येव यदभावि न तद्भवेत् ।
इति निश्चितबुद्धीनां न चिन्ता बाधते क्वचित् ॥
एवं मनीषिणः प्राहुर्नीतिशास्त्रविदो नृप ।
मुञ्च शोकं च मोहं च चिन्तां देहविनाशिनीम् ॥
गर्गाश्रममिदं राजन्प्रापयिष्ये तदन्तिकम् ।
स ते दास्यति धर्मात्मा सर्वान्कामान्सुदुर्लभान् ॥
सान्त्वयित्वा तदा वीरं स्वपतिं राष्ट्रवर्जितम् ।
अशक्तं गमने देवी बिभ्रती निजकन्धरे ।
प्रापयामास मुदिता गर्गाश्रममकल्मषम् ॥
पतिं तत्र प्रतिष्ठाप्य मुनिं नत्वा पुनः पुनः ।
कम्पमाना तदा साध्वी पीनोन्नतपयोधरा ॥
चन्द्रानना सुकेशी च बिम्बोष्ठी मञ्जुभाषिणी ।
कर्णान्तनयना बाला चन्द्रिकामलसुच्छविः ॥
वेदिका वेदिमध्या सा पञ्चविंशतिवार्षिकी ।
कोमलाङ्गी तु सा देवी श्यामा सा पुण्यलक्षणा ।
मुनिं प्रोवाच धर्मिष्ठा पाहि पाहीति मे पतिम् ॥
भगवन्पतिना सार्धमागता शत्रुपीडिता ।
राज्यभ्रष्टो ह्ययं राजा त्वामेव शरणं गतः ॥
मुनिस्तत्र चिरं ध्यात्वा ध्यानमार्गेण चक्षुषा ।
दृष्टवान्सर्वमेवैतद्राज्ञस्तस्य महात्मनः ।
उवाच मुनिशार्दूलो राजानं महिषीसखम् ॥

गर्ग उवाच ।

युवयोः कष्टमत्युग्रं सर्वाभावं सुदुःसहम् ।
येनेदमीदृशं प्राप्तं तद्ब्रवीमि हि तेऽधुना ॥
देवीनामुत्तमा देवी व्रतानां प्रवरा शुभा ।
सर्वकामप्रदा देवी भारती नैव पूजिता ।
तस्मात्त्वमीदृशीं प्राप्तो गतिं दुरवबोधनाम् ॥
अहो मूर्खा नराः सर्वे ऐश्वर्यमदगर्विताः ।
धर्म्यं व्रतं न कुर्वन्ति पीडां गच्छन्ति दुःखिताः ॥
व्रतोपवासः कर्तव्यो ह्यात्मनः श्रेय इच्छता ।
श्रेयसा सुखमाप्नोति परत्रामुत्र च प्रभो ॥
किमत्र बहुनोक्तेन दृष्टमाश्चर्यमुत्तमम् ।
शुभव्रतेन भारत्या नळो वै प्राप्तवान्पुरम् ॥
विरूपाक्षस्य कृपया पम्पातीरनिवासिनः ।
प्राप्तवानचलां लक्ष्मीं नळो राजा विचक्षणः ॥
इत्युक्ता सहसा देवी वेदिका शुभलोचना ।
नत्वा पुनः पुनः प्राह ऋषिं परमधार्मिकम् ॥
विरूपाक्षस्य माहात्म्यं पम्पातीरनिवासिनः ।
तीर्थस्य वैभवं मेऽद्य विस्तराद्वक्तुमर्हसि ॥

गर्ग उवाच ।

शृणु देवि प्रवक्ष्यामि पम्पानाथस्य वैभवम् ।
तुङ्गभद्रा शुभं तीर्थं कोटिशकरसंभवम् ॥

भीष्म उवाच ।

एवं प्रसन्नहृदयं मुनिं नत्वा पुनः पुनः ।
एकाग्रमनसौ भूत्वा दम्पती तावतिष्ठताम् ॥

गर्ग उवाच ।

अहो वक्ष्यामि माहात्म्यं विरूपाक्षस्य शूलिनः ।
यस्य श्रवणमात्रेण वाजपेयफलं भवेत् ॥
विरूपाक्षं शिवं दृष्ट्वा नराः पापवृता अपि ।
विमुक्तकिल्बिषास्ते तु रुद्रलोकाधिवासिनः ॥
सकृच्चापि नमेद्यस्तु विरूपाक्षं नराधिप ।

---

line 5768, G_1 ins.:

217** तया सह सुचार्वङ्ग्या प्रालपत्त मुहुर्मुहुः ।
हतपुत्रश्च तैर्युद्धे परित्यक्तश्च बन्धुभिः ॥
राजा चिन्ताकुलो भूत्वा कालोऽयमिति विह्वलः ।

— G_1 om. line 5769. — (L. 5769) G(ed) पञ्चत्वम् (for पङ्गु°). — $G_{1\ 2}$ M_1 धीरा; G(ed) धीर (for पत्नी). — G_1 om. line 5771. — (L. 5772) D_1 पुत्राश्च राज्यभोगाश्च (for ^{a}). — G_2 om. the ref. — (L. 5776) D_1 धीरत्वं (for स्थि°). — (L. 5783) G_2 मुञ्च भो राजशार्दूल (for ^{a}). — Before line 5786, D_1 ins. भीष्म. — (L. 5787) G(ed.) कंधरायां निधाय वै (for ^{b}). — (L. 5794) D_1 उत्पलेक्षणा (for पुण्यल°). — Before line 5796, G_2 ins. वेदिका. — (L. 5798) G_1 G(ed) ह्यात्म-, M_1 [अ]ध्यात्म- (for ध्यान-). — (L. 5800) G_2 राजानं च महीपतिम् (for ^{b}). — D_1 G(ed) om. the ref. — (L. 5801) M_1 राज्याभावं (for सर्वा°). — For line 5803, G_2 subst.:

218** देवानां मुनिनां चैव व्रतानां परमं शुभम् ।

— (L. 5805) D_1 G_2 गतिं दुरवबोधिनीम् (for ^{b}). — (L. 5806) G_2 G(ed) -मोहिताः (for -गर्विताः). — Before line 5812, G_2 ins. देवी. — G_2 om. lines 5813–5816. — (L. 5814) D_1 वचः श्रुत्वा मुनेर्देवी (for ^{a}). — (L. 5818) D_1 सर्वपापप्रणाशनम् (for ^{b}). — (L. 5819) M_1 नदीतीर्थं; G(ed.) -भव कोटि- (for शुभं तीर्थं). G(ed) तीर्थं (for कोटि-). — D_1 G_2 om. the ref. — (L. 5824) D_1 पापरता; G_1

कोटिवंशसमायुक्तो रुद्रलोकं स गच्छति ॥
एकोऽपि यस्य वंशे वा विरूपाक्षं नमेद्यदि ।
तस्यैव वंशजाः सर्वे रुद्रलोकाधिवासिनः ॥
तस्मिन्ब्रह्मशिलामध्ये देववृन्दैरभिष्टुतम् ।
तं नत्वा तु विरूपाक्षं सर्वलोकाधिपो भवेत् ॥
स्वभाद्वा कैतवाद्वापि विरूपाक्षेति यो वदेत् ।
गङ्गास्नानफलं तस्य भवेत्पापक्षयो नृप ॥
पित्रोर्यदि नृपास्थीनि नखकेशानि वा पुनः ।
वामभागे महानद्या देवदेवस्य चाज्ञया ॥
प्रक्षिप्तमात्रे तद्वंश्यास्तेषां येऽपि च तत्पदम् ।
भविष्यति नृपश्रेष्ठ किमु तत्तीरवासिनाम् ॥
कृतकृत्या नरा ये तु तेषां देवस्य दर्शनम् ।
अप्रयत्नेन भविता तत्पदं च नृपोत्तम ॥
तुङ्गभद्रा महादेवी पापघ्नी पुण्यदायिनी ।
मज्जन्ति ये नरा राजंस्तेषां पापं छिनत्ति हि ॥
सरयूर्नर्मदा गङ्गा गौतमी शारदा नृप ।
तुङ्गभद्रा च कावेरी लोके पुण्यतमाः स्मृताः ॥
पुरा नळो महाराज कलिना संप्रपीडित ।
स्वदेशं संपरित्यज्य प्राप्तवानत्र बन्धुमान् ॥
स्नात्वा तत्र त्रिकालेषु निगृहीताखिलेन्द्रिय ।
शंकरं तोषयामास विरूपाक्षं महामतिः ॥
स्नानात्तु तपसा भक्त्या श्रीलाद्राज्ञो महामतेः ।
तस्य प्रसन्नो देवेशः कृपां चक्रे सुशोभनाम् ॥
अशरीरो विरूपाक्षो दिवि स्थित्वा गणैर्वृतः ।
प्रोचे नळं विरूपाक्षो जगदीशो जगन्मयः ॥
कृतार्थोऽसि महाभाग तपसा तोषितोऽस्म्यहम् ।
वरं वरय भद्रं ते विद्धि मां पार्वतीपतिम् ॥

नळ उवाच ।

किमर्थं देवदेवेश प्रार्थनादानतत्परः ।
अदृष्टरूपी भगवानाकाशे वर्ततेऽधुना ॥
अहं पापीति विदितः पूर्वस्मिन्नपि जन्मनि ।
सर्वपापहरं देवं द्रष्टुं त्वामक्षमोऽभवम् ॥
किं नु कर्म कृतं देव कर्तव्यं किं नु पापिना ।
वद भूतेश चित्तेश तत्करोमि तवाज्ञया ॥

ईश्वर उवाच ।

मरुद्भिः प्रेरितो मूर्खो दुःखपापविवर्धन ।
कलिः कलेवरे प्रीत्या देवनान्तेऽनुवर्तते ॥
तद्दोषपरिहारार्थं भारतीव्रतमुत्तमम् ।
कुरुष्व नरशार्दूल प्रत्यक्षोऽस्मि ततः परम् ॥
सहस्रमायुर्दास्यामि तव राज्यं च शाश्वतम् ।
कीर्तिं च विपुलां लोके स्वर्लोकं तेऽपि शाश्वतम् ॥
कीर्त्या तव कलेर्नाशं यावच्चन्द्रदिवाकरम् ॥
इत्युक्त्वा पार्वतीकान्तो विरूपाक्षो जगन्मयः ।
तुङ्गभद्रातटे रम्ये भ्राजते मरुतां गणैः ॥
नळोऽपि तं नमस्कृत्य विरूपाक्षं पिनाकिनम् ।
ऋतुपर्णपुरं श्रीमान्ययौ ध्यायन्महेश्वरम् ॥
तुङ्गभद्रासमं लोके नास्ति किंचिन्नृपोत्तम ।
सर्वपापक्षयकरी सर्वोपद्रवनाशिनी ॥
स्वर्लोकं सूर्यलोकं च चान्द्रं सत्यं पिनाकिनम् ।
एषा दास्यति लोकांस्तु स्नातानां पापनाशिनी ॥
स्नातव्यमत्र यत्नेन माघमासे विशेषतः ।
स्नातानां पितरः सर्वे ब्रह्मलोकनिवासिनः ॥
इति श्रुतः पुरा गीता नारदेन महात्मना ।
श्रीशैलशिखरे स्थित्वा तस्मादाश्रावितं मया ॥
इति देवेन संदिष्टो नळो नाम महीपतिः ।
तुङ्गभद्रां समागम्य ऋतुपर्णेन धीमता ॥
देवस्य संनिधौ कृत्वा विधिना नवमीव्रतम् ।
स्वपुरं प्रययौ श्रीमान्दमयन्त्या च संगतः ।
सर्वान्कामानवाप्यैव स्वर्लोकेऽद्यापि वर्तते ॥
तस्मात्त्वमपि राजेन्द्र तत्र गत्वा व्रतं कुरु ।
इत्युक्तमात्रे मुनिना सर्वरोगविवर्जितः ।
तुङ्गभद्रां समागम्य सस्नौ वेदिकया सह ॥
विरूपाक्षं महादेवं नत्वा संपूज्य भक्तिमान् ।
मुनिनोक्तं व्रतं कृत्वा मुदमाप बलान्वितः ॥
विरूपाक्षप्रसादेन पुण्यतीर्थनिषेवणात् ।
प्राप्तवान्स्वपुरं श्रीमाञ्शत्रुहन्ताभवत्तदा ॥
तस्मात्त्वमपि राजेन्द्र शत्रुहन्ता भविष्यसि ।
गच्छ गच्छ विरूपाक्षमत्र त्वं किं करिष्यसि ॥
सीतामदृष्ट्वा रामोऽपि रावणेन हृतां प्रियाम् ।
पम्पासरोवरं गत्वा श्रमं शोकं जहौ तदा ॥
मतङ्गमुनिना तत्र ब्रह्मज्ञेन जितक्रुधा ।
संगतस्तत्र धर्मात्मा ववन्दे तं सलक्ष्मणः ॥
पूजाभिः सत्कृतो रामो मुनिं नत्वा पुनः पुनः ।
मुदमाप स राजेन्द्रस्तुङ्गां दृष्ट्वा सभद्रकाम् ॥

°व्रता (for °वृता). — D1 M1 om. lines 5826–5829.—(L. 5832) G1 स स्नात्वा; G2 स्वभावात् (for स्वभाद्वा). — For line 5834, G(ed) subst. :

219** पित्रोर्यद्यस्थि राजेन्द्र नखकेशादिकेऽथ वा ।

— (L. 5848) G1 महीपते; G2 महामते (for °तेः). —(L 5851) D1 प्रोवाच त, G2 उवाचैन (for प्रोचे नल) G1 विशालाक्षी, G(ed.) देवरूपी (for विरूपाक्षो). — (L. 5853) M1 वरदोऽहमिहागत (for ^{b}). —(L. 5859) D1 G1 चित्तेश (for चि°). —(L. 5860) M1 दुष्ट (for दुःख-). G2 दुष्ट पापो विवर्धते (for ^{b}). —(L. 5861) G2 कलेवरं (for °रे). —(L. 5866) D1 प्रीत्या (for कीर्त्या). G1 M1 G(ed.) -दिवाकरौ (for °रम्). —(L. 5869) D1 जगन्मयम् (for पिनाकिनम्). — For line 5873, G2 subst. :

220** स्वर्गलोकं सूर्यलोकं चन्द्रलोक पिनाकिनम् ।

— G2 om. lines 5874–5876. M1 om. lines 5876–5878. — (L. 5877) D1 देवर्षिणा (for इति श्रुतः). —(L. 5884) M1 चेत्त्वं (for गत्वा). —(L 5887) M1 स्नात्वा तस्यां विरूपाक्षं (for ^{a}). —(L. 5890) G1 गत्वा (for श्रीमाञ्). G1

स्ववृत्तमस्मै विनिवेद्य सम्य-
क्सीतावियोगं वनवासहेतुम् ।
विसृज्य चाश्रूणि मुनेर्वचोभि
संबोधितो राघवनन्दनोऽभूत् ॥
वैशंपायन उवाच ।
श्रुत्वैतदाख्यानमशेषमाद्यं
धर्मात्मजः शोकविमुक्तदेहः ।
मुदं प्रपेदे सह विप्रवर्यैः
सहानुजो वै गतकल्मषोऽभूत् ॥

Colophon

वैशंपायन उवाच ।
शुद्धान्तःकरणो राजा धर्मसूनुः सहानुजैः ।
पप्रच्छ वरधर्माणि पुनरेव नदीसुतम् ॥
युधिष्ठिर उवाच ।
देवव्रत महाप्राज्ञ पाण्डूनां हितकृत्तम ।
राम किमकरोत्तत्र पम्पातीरे मनोरमे ॥
भवान्वेत्ति हि तत्सर्वं कृपया वद सुव्रत ।
रामस्य चरितं श्रोतुं परं कौतूहलं हि मे ॥
भीष्म उवाच ।
अहो ते विमला बुद्धिर्धर्मसूनो महामते ।
आश्चर्यमतुलं वृत्तं रामचन्द्रस्य धीमत ।
यस्य श्रवणमात्रेण नरः पापैः प्रमुच्यते ॥
तुङ्गभद्रामहानद्यामथ स्नात्वा युधिष्ठिर ।
कृतमाध्याह्निको रामो मुनिं प्रोचे सलक्ष्मणः ॥
मतङ्ग मुनिशार्दूल प्रसिद्धोऽसि जगत्त्रये ।
श्रुत्या वृत्तेन तपसा धर्मेण विनयेन च ॥
कृतकृत्यो मुनिश्रेष्ठ तुङ्गा संसेव्यते त्वया ।
सर्वपापक्षयकरी सर्वोपद्रवनाशिनी ॥
तुङ्गभद्रा शुभकरी पुण्यतोया शुभावहा ।
सेवितासौ त्वया ब्रह्मन्देवानामपि दुर्लभा ॥
अत्र स्नाताः पापिनोऽपि पितृमातृकुलानि च ।
सहस्राणि समुद्धृत्य ब्रह्मलोकं व्रजन्ति हि ॥
दुर्लभा मनुजैः क्रूरैः कृतघ्नैः पापकर्मभि ।
स्वाढ्यैः पुण्यशीलैश्च सदा सेव्या महामते ॥
विरूपाक्षं महादेवं कोटिशंकरमव्ययम् ।
पुण्यशीलं सदानन्दं मुने दर्शय मे शिवम् ॥
त्वं नत्वा कृतकृत्योऽहं कृपया तव सुव्रत ।
सीताविरहजं दुःखं त्यजामि त्वत्प्रसादतः ॥
भीष्म उवाच ।
तं नत्वा मनसा रामं विष्णुरूपिणमव्ययम् ।
ऋषिर्मतङ्गः प्रोवाच धर्मज्ञो राघवं प्रति ॥
राम राम महाबाहो जाने त्वां विष्णुमव्ययम् ।
सत्यप्रतिज्ञं देवेशमार्तत्राणपरायणम् ॥
न त्वयाविदितं किंचित्सर्वलोकेषु शाश्वत ।
मयि कारुण्यभावेन शंकरं परिपृच्छसि ॥
कोटिशंकरविख्याते स्थानेऽस्मिन्देवसंततिः ।
शंकरं तोषयामास प्रत्येकं रघुनन्दन ॥
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
गन्धर्वा लोकपालाश्च ऋषयश्च तपोधनाः ।
शंकरं तोषयामासु शाश्वतस्थानकाङ्क्षया ॥
अनेककोटिसाहस्रं लिङ्गमत्र निवेश्य च ।
युगानां त्रीणि चत्वारि पूजयामासुरव्ययम् ॥
उमापतिर्विरूपाक्षः प्रसन्नोऽभूद्दिवौकसाम् ।
कोटिशो रूपमास्थाय प्रत्येकं तु पिनाकधृक् ॥
किमर्थं तप्यते देवैश्चिरं कायविशोषिभिः ।
नन्दिस्तान्परिपप्रच्छ नन्दीशश्चेत्युवाच तम् ॥
आज्ञया नीलकण्ठस्य कोटिमूर्तेः प्रतापवान् ।
वरं वृणीध्वं भो देवा इत्युवाच वृषध्वजात् ॥
उक्तास्ते नन्दिना देवा दिवमालोक्य विस्मिताः ।
अनेकाञ्शंकरान्दृष्ट्वा भीता प्रोचुः शिवं प्रति ॥
नो वयं विभ्र देवेश दिव्यरूपं भयंकरम् ।
आकाशं भूतलं व्याप्तं कथं याचामहे वरम् ॥
एकरूपधरो भूत्वा सुखासीनो महेश्वरः ।
दातुमर्हसि विश्वात्मन्वरमस्मत्सुखावहम् ॥
ईश्वर उवाच ।
अष्टमूर्तिधरो भूत्वा शिलायां ब्रह्मण. सुराः ।
चिरं वस्तुमिहेच्छामि वरयध्वं वरं मयि ॥
इत्युक्त्वा पार्वतीकान्तो नन्दिना भृङ्गिणा सह ।
दिव्यरूपधरो भूत्वा शिलायां ब्राह्मणोऽवसत् ॥
तत्र देवाः सगन्धर्वा दिक्पालैः सह संगताः ।
विरूपाक्षं नमस्कृत्य वचनं चेदमब्रुवन् ॥
पाहि पाहि विरूपाक्ष प्रणतार्तिप्रणाशन ।
त्वत्पादकमलादन्यदस्माकं नैव विद्यते ॥

श्रमं शोकं जहौ तदा (for ^{b}). — (L. 5896) D_1 च स- ; $G_{1,2}$ सह (for त स-). — (L. 5904) G_2 -हेतुम् (for -देह). — (L. 5905) G_2 G(ed.) विप्रवर्यैः (for °वर्गैः).

Colophon. — *Sub-parvan* : D_1 G_2 M_1 G(ed) शेषधर्मा , G_1 आश्रयपर्वणि शेषधर्मा. . — *Adhy. name* D_1 विरूपाक्षमहिमावर्णनम् ; G_1 G(ed) महानवमीव्रतम् , G_2 महानवमीप्रशंसा. — *Adhy no.* D_1 $G_{1,2}$ M_1 44 , G(ed.) 45.

(L. 5907) D_1 धर्मशीलैः G_1 °पुत्रः (for °सूनुः). G_2 सहानुजः (for °जैः) — (L. 5908) D_1 -धर्मं च ; G_2 -धर्मांश्च (for -धर्माणि). — (L. 5909) M_1 महाभाग (for °प्राज्ञ). — (L. 5911) D_1 भगवान्वेत्ति तत्सर्वं (for ^{a}) — (L. 5922) D_1 G_2 M_1 शुभाशया (for °वहा) — D_1 om. lines 5929–5932. G_2 om lines 5936–5938 — (L. 5946) G_2 कोटिरूप समास्थाय (for ^{a}). — (L. 5947) G_1 प्रत्येकं कायकोपिभिः (for ^{b}). — D_1 om. line 5948. — (L. 5949) G_2 प्रभावतः (for प्रतापवान्). — (L. 5950) D_1 G_2 वृषध्वजः (for

अनन्तभोगमायुष्यं चिरं वासं महेश्वर ।
देहि स्वर्गे जगन्नाथ नीलकण्ठ नमोऽस्तु ते ॥
ईश्वर उवाच ।
ब्रह्मावसानपर्यन्तं युष्माकं स्वर्गवासिनाम् ।
अस्तु वास सुराः मर्वे ह्यत्र वत्स्याम्यहं चिरम् ॥
रामोऽहं तु भविष्यामि विष्ण्वंशेन समन्वितः ।
दशाननपुरोगांश्च हनिष्ये तानि संयुगे ॥
ऋक्षवानररूपेण यूयमत्र जनिष्यथ ।
विहराम वने पुण्ये गोलाङ्गूलनिषेविते
तुङ्गाजलसमूहेन तृसा मूलफलेन च ॥
इत्युक्ता भूतनाथेन देवदेवेन राघव ।
संप्रहृष्टाः सुरगणा दिवं जग्मुर्यथासुखम् ॥
स त्वं राम महाबाहो शकरो लोकशंकरः ।
वधार्थं रावणादीनां जातो रघुकुले शुभे ।
ते सुरा वानरा जाता ह्यागमिष्यन्ति संप्रति ॥
तैः सार्धमङ्ग नगरीं राक्षसेन्द्रस्य दुर्मतेः ।
लङ्कां गन्तासि धर्मात्मन्हनिष्यसि निशाचरम् ॥
इत्युक्तो मुनिना तेन मतङ्गेन महात्मना ।
रामो धर्मविदां श्रेष्ठो मुमोद च ननाम च ॥
पुनः प्रोवाच धर्मात्मा रामचन्द्रो महामनाः ।
मतङ्ग मुनिशार्दूल कृतकृत्योऽसि संप्रति ॥
केयं ब्रह्मशिला प्रोक्ता देवगन्धर्वसेविता ।
ब्रूहि तां मुनिशार्दूल यत्तन्मुख्यस्थलं शुभम् ॥
मतङ्ग उवाच ।
ब्रह्मादयः सुराः सर्वे योगिनः सनकादयः ।
गन्धर्वा लोकपालाश्च स्नान्ति नद्यां शुभव्रताः ॥
शिलामारुह्य सस्नेहं विरूपाक्षस्य पार्श्वतः ।
जपध्यानपरा नित्यमासते ब्रह्मवित्तमाः ॥
दक्षिणे पूर्वदिग्भागे पश्चिमे रघुनन्दन ।
या शिला सुभगा प्रोक्ता सा वै ब्रह्मशिला स्मृता ॥
तस्यां स्थित्वा जपं चक्रुर्दिव्यमन्त्रविदः सुराः ।
माघमासे विशेषेण स्नात्वा तत्रोपविष्टिताः ॥
गायत्र्यादिमहामन्त्रैर्जपं कुर्वन्ति ते सुराः ॥
तस्माद्ब्रह्मशिला प्रोक्ता ब्रह्मानुष्ठानतो नृप ।
ये कुर्वन्ति जपं दानं तेषा लोकस्तु शाश्वतः ॥
ये नराः पुण्यकर्माणो ह्यत्र मजन्ति नित्यशः ।
तेषां लोकास्तु काकुत्स्थ देवगन्धर्वसेविताः ॥
विख्यातं त्रिषु लोकेषु विरूपाक्षस्य पश्चिमे ।
वसिष्ठस्याश्रमं विद्धि सर्वपापप्रणाशनम् ॥
तप' कुर्वन्ति मुनयो मनव ऋषयस्तथा ।
वसिष्ठस्याश्रमे पुण्ये सर्वपापविवर्जिते ॥
पुरत' पूर्वदिग्भागे कोटिशंकरसंज्ञिते ।
ये मज्जन्ति नरश्रेष्ठास्तेषां लोक कपर्दिन· ॥
स्थापनात्कोटिलिङ्गानां दैवतैर्देववल्लभः ।
कोटिशकरनाम्ना तत्प्रथितं पृथिवीतले ॥
तत्र कुर्वन्ति मुनयो जप परमपावनम् ।
अद्यापि राघवश्रेष्ठ ह्यषिभिरभिगूहिते ॥
तत्र देवास्त्रयस्त्रिंशत्कोटिलिङ्गप्रपूजनात् ।
शाश्वतं परमं स्थान जग्मुस्ते भरतर्षभ ॥
अत्र मज्जन्ति मुनयो मानवा मनुजेश्वर ।
सिद्धयोगे पुण्यदिने माघमासे विशेषतः ॥
कोटिशंकरविख्यातं लिङ्गं परमपावनम् ।
नत्वा स्पृष्ट्वा दिवं याति पापवानपि राघव ॥
अभिषेकादिनैवेद्यै शंकरं य प्रपूजयेत् ।
स मुक्तः सर्वपापेभ्यो यानारूढो दिवं व्रजेत् ॥
यः स्नाति दिनमेकं तु शंकरस्य च सनिधौ ।
स कोटिकुलसंयुक्तः शिवलोके महीयते ॥
तस्माद्वै पूर्वदिग्भागे क्रोशमात्रे तु राघव ।
कपिलस्याश्रमं विद्धि सर्वपापप्रणाशनम् ॥
शंकरं तु विरूपाक्षं कपिलेश्वरमव्ययम् ।
त्रिकालं पूजनं कुर्वंस्तिष्ठामि रघुनन्दन ॥
तस्य पूजाप्रभावेन त्वामहं दृष्टवान्किल ।
कृतकृत्योऽस्मि भद्रं ते मा पालय रघूत्तम ॥
संसारविषवृक्षस्तु महारूढो दुरत्यय ।
छेत्तुमर्हसि तं राम स्वस्ति स्यात्तु नमोऽस्तु ते ॥
एवमुक्त्वा मुनिवरस्तूष्णीमास्ते रघूत्तमम् ।
कृताञ्जलिपुटो धीमानानन्दाश्रुपरिप्लुतः ॥
रामोऽपि तं नमस्कृत्य वचनं चेदमब्रवीत् ।
मतङ्ग मुनिशार्दूल तथास्तु तव भाषितम् ।
कृपया तव धर्मात्मन्हनिष्ये राक्षसेश्वरम् ॥
तुङ्गास्नानफलाद्दिष्ट्यन्विरूपाक्षस्य दर्शनात् ।
मन·प्रसादमगमत्पापाच्च परिमोचितः ।
स्वस्ति तेऽस्तु गमिष्यामि किष्किन्धां नगरीं शुभाम् ॥
इत्युक्त्वा तं नमस्कृत्य प्रययौ रघुनन्दनः ।
तस्मात्त्वमपि तां पम्पां गन्तुमर्हसि सुव्रत ॥
तुङ्गास्नाने विरूपाक्षे धर्मदे कोटिशंकरे ।
मतिं कुरु महाराज महापातकनाशिने ॥
सर्वत्र सुलभा तुङ्गा त्रिस्थानेषु तु दुर्लभा ।

°भ्रजात्) — (L 5954) G1 2 G(ed.) प्राप्त (for °व्याप्त). D1 वास्यामहे (for याचा°) — (L 5957) D1 मूर्तय· कोटिश शुभाः (for °). — (L. 5967) G(ed) -गामिनाम् (for -वासि°). — After line 5968, D1 ins.:
221** आगमिष्यति रामोऽत्र विष्णवशो लोकपालक' ॥
— (L. 5975) D1 हृष्टा सुरगणा· सर्वे (for °). G1 G(ed.) मुदागतम् (for °सुखम्). — G1 om. the ref. — (L. 5995) G2 भूसुराः; M1 ते नरा· (for ते सुरा'). — (L. 6001) D1 -विवर्जितम् (for -प्रणाशनम्). — M1 om. lines 6006–6008 — (L. 6007) G2 पृथिवीपते (for °तले). — (L. 6008) G1 तपः परममास्थिता' (for °). — (L. 6015) G1 दृष्ट्वा (for स्पृष्ट्वा) — (L 6019) M1 स्वर्ग- (for शिव-). — (L. 6025) G1 श्रीराम करुणानिधे (for °). — G2 om. lines 6038–6040. D1 om. lines 6044–6045. M1 om. lines

मार्कण्डेये गुहारण्ये विरूपाक्षे विशेषतः ॥
दुर्लभं सर्वलोकानां विरूपाक्षस्य दर्शनम् ।
कथंचिद्दर्शनं लब्ध्वा सर्वपापैः प्रमुच्यते ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकैः ।
सकृत्तुङ्गाम्भसि स्नात्वा नरः पापैः प्रमुच्यते ॥
पिबेद्य कणमात्रं तु तुङ्गाम्भः सोऽपि मानवः ।
ज्ञानाज्ञानकृतैः पापैर्मुक्तो नाकं समश्नुते ॥
य इदं पुण्यमाख्यानं शृणुयादपि मानवः ।
सोऽपि पापविनिर्मुक्तस्तुङ्गास्नानफलं लभेत् ॥

Colophon

युधिष्ठिर उवाच ।

राजाज्ञां शिरसा कृत्वा रामो धर्मभृतां वरः ।
कं देशं समनुप्राप्तः पुण्यं परमपावनम् ॥
तन्मे कथय तत्त्वेन गङ्गासुत नमोऽस्तु ते ।
तस्मात्कीर्तिश्रवात्सद्यो नरः पापैः प्रमुच्यते ॥

भीष्म उवाच ।

शृणु पार्थ प्रवक्ष्यामि श्रोतॄणामघनाशनम् ॥
रामस्य चरितं पुण्यं सर्वमङ्गलदायकम् ॥
सीतामन्वेष्टुकामोऽसौ रामो रघुकुलोत्तमः ।
यं पुण्यदेशं संप्राप्तस्तं ब्रवीमि हि तेऽधुना ॥
औगलं वेङ्कटाद्रिं च श्रीशैलमथ शाश्वतम् ।
काञ्चीं तु कामदां राजंश्चचार रघुसत्तमः ॥
तत्र तत्र च राजेन्द्र दानं ब्राह्मणतर्पणम् ।
गोभूतिलहिरण्यादि कन्यादानशतानि च ।
दत्त्वा तद्देशजान्विप्रान्स्थापयामास सात्त्विकान् ॥
औगलं नारसिंहं च गत्वा रामः प्रतापवान् ।
नमस्कृत्वा नारसिंहमस्तौषीत्कमलापतिम् ॥

गोविन्द केशव जनार्दन वासुदेव
विश्वेश विश्व मधुसूदन विश्वरूप ।
श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष
नारायणाच्युत नृसिंह नमो नमस्ते ॥

देवाः समस्ताः खलु योगिमुख्या
गन्धर्वविद्याधरकिंनराश्च ।
यत्पादमूलं सततं नमन्ति
तं नारसिंहं शरणं गतोऽस्मि ॥
वेदान्समस्तान्खलु शास्त्रगर्भा-
न्विद्याबलं कीर्तिमतीं च लक्ष्मीम् ।
यस्य प्रसादात्पुरुषा लभन्ते
तं नारसिंहं शरणं गतोऽस्मि ॥
ब्रह्मा शिवस्त्वं पुरुषोत्तमश्च
नारायणोऽसौ मरुतां पतिश्च ।
चन्द्रार्कवाय्वग्निमरुद्गणाश्च
त्वमेव तं त्वा सततं नतोऽस्मि ॥
स्रष्टा च नित्यं जगतामशेष-
स्त्राता च हन्ता विभुरप्रमेयः ।
एकस्त्वमेव त्रिविधा विभिन्न-
स्तं त्वा नृसिंहं सततं नतोऽस्मि ॥

इति स्तुत्वा रघुश्रेष्ठः पूजयामास तं हरिम् ।
पुष्पवृष्टिः पपाताशु तस्य देवस्य मूर्धनि ।
साधु साध्विति तं ब्रूयुर्देवा ऋषिगणैः सह ॥
राघवेण कृतं स्तोत्रं पीत्वामृतमनुत्तमम् ।
पठन्ति ये द्विजवरास्तेषां स्वर्गस्तु शाश्वतः ।
इत्युक्त्वा प्रययुः सर्वे देवा ऋषिगणैः सह ॥
रामोऽपि तत्र वै तिष्ठन्मुनिं नत्वाथ गालवम् ।
कृताञ्जलिपुटो राजन्प्रोवाचेदं महामतिः ॥
ब्रह्मंस्त्वं मुनिशार्दूल सर्वं वेत्सि भवान्खलु ।
नारसिंहस्य देवस्य माहात्म्यं वक्तुमर्हसि ॥
यदि ते मयि चेत्प्रीतिरस्ति मे तद्वदस्व ह ।
क्षेत्रस्यास्य द्विजश्रेष्ठ तीर्थस्यास्य च वैभवम् ॥

गालव उवाच ।

आश्चर्यं राघवश्रेष्ठ त्वत्कृतं पूर्वजन्मनि ।
त्वमेव वेत्सि तत्सर्वं न हि विन्दामहे वयम् ।
तथापि शृणु वक्ष्यामि ह्याज्ञया तव सुव्रत ॥

6047–6048.

Colophon. — *Sub-parvan* D1 G1 आश्चर्यपर्वणि शेषधर्माः ; G2 M1 G(ed) शेषधर्माः. — *Adhy name* D1 सग्रह ; G1 तुङ्गभद्राकोटिशकरमाहात्म्यम्. — *Adhy no.* D1 G1, 2 M1 45 ; G(ed) 46.

G2 राजा (for युधिष्ठिर) — (L. 6050) D1 तदाज्ञां (for राजाज्ञां). — (L. 6052) D1 G2 M1 तत्त्वज्ञ (for तत्त्वेन). — (L. 6053) D1 तत्कीर्तिश्रवणात्सद्यो (for ᵃ) D1 G2 पापात् (for पापैः). — (L. 6055) G2 (*inf lin*) सर्वपापप्रणाशनम् (for ᵇ). — (L. 6058) D1 अहोबलं पन्नगाद्रिं, M1 G(ed.) अहोबि(M1 °ब)लं वेङ्कटाद्रिं (for ᵃ). G(ed) श्रीशैलमचलेश्वरम् (for ᵇ). — (L. 6060) G2 स्नानं (for दानं). — M1 om. line 6063 — (L. 6063) G2 G(ed.) अहोबि(G2 °ब)लं नारसिंह (for ᵃ). — Before line 6065, D1 ins. श्रीरामः — (L. 6072) D1 G2 प्रपद्ये (for गतोऽस्मि) — (L. 6074) G2 आयुः स्थिरां कीर्तिमतीव लक्ष्मीम् — After line 6076, D1 ins.

222** विरिञ्चिनाम्ना हि विरिञ्चिमस्थितः
शिवेति नाम्ना शिवसंस्थितो हि ।
स्वयं हि विष्णुर्भुवनस्य गोप्ता
चन्द्रार्कवाय्वग्निमरुद्गणानाम् ॥

— (L. 6080) G2 M1 नान्यत् (for तं त्वां). — (L. 6081) G2 M1 अधीशस् (for अशेषस्) G(ed.) स्वप्नेऽपि नित्यं जगतामशेष. — (L. 6083) G(ed) त्राता त्वमेकस्त्रिविधो विभिन्नस्. — (L. 6084) D1 M1 त्वां सिंहमूर्तें ; G1 त्वां सिंहरूपं, G(ed.) तं त्वां नृसिंहं (for त्वां सिंहमूर्ति). — M1 om. (hapl.) lines

पुरा योगीश्वरो राम नारसिंहो जगन्मयः ।
हिरण्यनिधनं कृत्वा ह्यत्र प्रत्यक्षतां गतः ॥
देवदेवो जगन्नाथः प्रणतार्तिप्रणाशनः ।
दिक्पालैर्देववृन्दैश्च सदा संसेव्यतेऽत्र वै ॥
पदा स्पृशन्ति ये राम भुवमत्र प्रयत्नतः ।
विमुक्ताः सर्वपापेभ्यः प्रयान्ति हरिमन्दिरम् ॥
भवनाशीति विख्याता गङ्गा पापप्रणाशिनी ।
सुप्रसन्ना च लोकानां पापिनां मुक्तिदायिनी ॥
अत्र देवास्त्रयस्त्रिंशत्सदा तिष्ठन्ति राघव ।
चिन्तयन्त सदा देवं नारसिंहं जगन्मयम् ॥
अयमेव हरिः साक्षाद्वामनत्वमुपागतः ।
बलिनिग्रहणं कृत्वा दिवं प्रादाद्दिडौजसे ॥
राज्ञां तु दुर्विनीतानां निधनाय सुरोत्तमः ।
जमदग्निसुतो भूत्वा कार्तवीर्यं तथाहनत् ॥
स एव त्वं हि रामोऽभूदिक्ष्वाकूणां शिरोमणिः ।
पौलस्त्यस्य वदन्ति त्वां हन्तारं लोकवैरिण ॥
अप्रमेयमनालोक्यमचिन्त्यं भक्तवत्सलम् ।
सर्वज्ञं त्वां विदुर्देवाः संप्रत्यत्र महावने ॥
देवान्पश्य रघुश्रेष्ठ त्वदालोकनतत्परान् ।
दिविस्थान्स्तुवतस्त्वां तु हन्तारं लोकवैरिणः ॥
त्वं तु वै द्वापरस्यान्ते यदुवंशे कृतोदयः ।
कृष्णो विश्रुतकर्मा त्वं भविष्यसि न संशयः ।
एवं वदन्ति विबुधास्त्वामेकं सर्वभूतगम् ॥
त्वामाराध्य चिरं कालमत्र पर्वतमूर्धनि ।
ऋषयो ब्राह्मणाश्चैव त्वत्पादं ते प्रपेदिरे ॥
अत्र व्याघ्रा मृगगणा पशुपक्षिद्रुमादयः ।
व्याधा वनचरा राम तान्विद्धि सुरपुंगवान् ।
सेवन्ते मुक्तिकामास्ते त्वत्पादकमलं शुभम् ॥
पुरा संचितपुण्यानां सुखदं सूर्यवंशज ।
पापेप्सूनां भयकरं स्थानमस्य विभोर्हरे ॥

भीष्म उवाच ।

इति श्रुत्वा रघुश्रेष्ठो गालवं तं प्रणम्य च ।
नारसिंहं नमस्कृत्य प्रययौ च श्रियोऽचलम् ॥
धर्मराज त्वमेवाशु गत्वा विगतकल्मष ।
नारसिंहप्रसादेन सर्वान्कामानवाप्स्यसि ॥
औवलेशमहो गत्वा पतितोऽपि विमुच्यते ।
त्रिरात्रमुषितानां तु किं पुनः पुण्यवैभवम् ॥
यस्त्वेतच्छृणुयान्नित्यं नारसिंहस्य वैभवम् ।
स मुक्तः सर्वपापेभ्यो ब्रह्मलोकं व्रजेद्ध्रुवम् ॥

युधिष्ठिर उवाच ।

श्रीशैलशिखरे रामो राजपुत्रो महामतिः ।
देवं पिनाकिनं नत्वा ततः किमकरोत्प्रभुः ।
वद देवव्रत त्वं मे भूतनाथस्य वैभवम् ॥

भीष्म उवाच ।

देवदेवो विरूपाक्षो नीलकण्ठो महाद्युतिः ।
श्रीशैलाख्ये गिरिवरे सर्वकालं प्रवर्तते ॥
श्रीशैलेन्द्रं प्रविष्टानां नराणां पापिनामपि ।
नास्ति नास्ति पुनर्जन्म नारदेन प्रभाषितम् ॥
स्थानानि भुवि देवस्य विख्यातानि महीतले ।
कैलासो हिमशैलश्च ह्युत्तरे जाह्नवीतटे ॥
विश्वेश्वरो विरूपाक्षो महाकालो महामते ।
श्रीशैलश्चैकचूतश्च मार्कण्डेयो महामते ।
एतानि बहुमुख्यानि स्थानानि स्मरवैरिणः ॥
तत्र तत्र महादेवं प्रसन्नं भक्तवत्सलम् ।
नत्वा नरः पापवृतो विमुक्तो दिवमश्नुते ।
कैलासे श्रीगिरौ देवः प्रसन्नः समतां गतः ॥
तत्र वै देवतानां च मनुष्याणामथात्र च ।
सदा प्रसन्नो देवेश पार्वतीरमणः प्रभुः ।
गतानामत्र वै मुक्तिं ददाति भुवनेश्वरः ॥
श्रीशैलशिखरे दृष्टे मनुजैः पापकर्मभिः ।
छित्त्वा सर्वाणि पापानि तेषां मुक्तिं ददाति च ॥
एकयामं द्वियामं वा त्रियामं वा वसन्ति ये ।
नास्ति नास्ति पुनर्जन्म साक्षात्कृष्णेन भाषितम् ॥
एकरात्रोषितानां तु पितृमातृकुलानि च ।

6088–6090, — (L. 6095) M_1 वदस्व मे ; G(ed) वदाधुना (for वदस्व ह) —(L. 6101) G(ed.) हिरण्यकशिपुं हत्वा (for ^{a}) —(L. 6106) G_1 G(ed.) गङ्गा सौम्यगुणा शुभा (for ^{b}).— (L 6107) D_1 M_1 अत्र प्रसन्ना लोका(M_1 देवा)-नां ; G_2 अत्र स्थितानां लोकानां (for ^{b}) — G(ed) om lines 6108–6109 — (L 6111) G_1 स बलेर्निग्रहं कृत्वा (for ^{a}). — (L. 6114) D_1 M_1 स त्वं रामाभिरामोऽभूद् (for ^{a}).— (L 6115) G_1 हन्ता युधि च रावणम् (for ^{b}). — (L 6119) D_1 दिविष्ठास्तु स्तुवन्ति त्वा (for ^{a}) — D_1 om line 6120. —(L 6120) G_2 M_1 यदुवंशशिरोमणिः (for ^{b}). — (L. 6122) D_1 त्वामेकं सर्वदा सुरा (for ^{b}) —(L. 6125) G_1 महासत्त्वा, G(ed.) मृगेन्द्राश्च (for मृगगणा). G_2 M_1 -मृगादय (for -द्रुमा°) — (L. 6127) D_1 दिवं संत्यज्य देवताः (for ^{b}). — (L. 6129) D_1 G_3 M_1 पापेच्छूनां (for °प्सूनां). D_1 G_3 M_1 स्थानं मुनिनिषेवितम् (for ^{b}). — (L 6131) D_1 प्रययौ पार्वतीपतिम् (for ^{b}). — (L. 6132) D_1 तस्मात्त्वमपि राजेन्द्र (for ^{a}). — After line 6133, G_1 ins. :

223** सर्वपापप्रसक्तोऽपि पतितोऽपि विमुच्यते ।

— (L 6134) G_2 G(ed.) अहोबलम् (for औवलेशम्). D_1 अहोबलेश गत्वैव (for ^{a}).— (L 6136) D_1 G_2 M_1 पुण्यं (for नित्यं). — After line 6136, D_1 ins. an add. colophon mentioning sub-parvan as आश्चर्यपर्वणि शेषधर्माः, adhy. name as अहोबलमाहात्म्यम् and adhy. no. as 46. —(L. 6143) G_2 M_1 श्रीशैल स- (for °लेन्द्रं) — (L. 6148) D_1 चैकरूपश्च ; चक्रचूतश्च (for चैक°). — (L. 6149) D_1 G(ed.)

सिद्धा बन्धुजनाश्चैव प्राप्नुवन्ति हि तत्पदम् ॥
तत्रागतं रघुवरं ज्ञात्वा तत्र महर्षय ।
द्रष्टुकामास्तथा जग्मुर्नारायणमरिंदमम् ॥
जामदग्न्यस्तथा रामो भृगुश्च्यवनभार्गवौ ।
सत्यजित्सत्यकीर्तिश्च शतानन्दो दृढव्रत ।
शङ्खो यमश्च सन्मेधा कपर्दी चाथ कङ्कणः ॥
एते चान्ये च बहवो मुनय संशितव्रता ।
रामं दृष्ट्वा मुदं जग्मुरतुला रघुनन्दनम् ॥
राम, संपूज्य तान्सर्वानर्घ्यपाद्यैररिंदम ।
नमस्कृत्य च तानाह प्राञ्जलिर्मुनिपुंगवान् ॥
कुशलं वो मुनिगणा धन्यो व' पादसेवया ।
श्रीशैलेशो मया दृष्टः पूजितश्च विशेषत ।
अत्र किं करणीयं मे तद्वदन्तु महर्षय ॥
तेऽपि रामं पुरस्कृत्य जामदग्न्यं बहुश्रुतम् ।
चिरंजीवी भवेत्युचुर्जामदग्न्यस्ततोऽब्रवत् ॥
रामाभिराम भगवन्हिताय जगता विभो ।
कृतावतारो भवता लोके खलु सुदुर्लभः ॥
पाहि लोकानृषिगणान्राक्षसाञ्जहि राघव ।
त्वद्दर्शनात्सुतसं मे तपस्तेषां महात्मनाम् ॥
दातव्यमत्र भवता ब्राह्मणेभ्यो धनं बहु ।
अन्नपानीयदानानि कर्तव्यानि महामते ॥
अत्रैव दानात्पितरस्तु सर्वे
तृप्ता दिवं यान्ति सुशोभमाना' ।
गन्धर्वमुख्यैरुपसेव्यमाना-
स्तथा समस्तैर्मुनिदेवसंघैः ॥
गीतानि देवाः सततं गृणन्ति
कदा नु शैलेशमहं व्रजामि ।
प्रत्येकमित्येवमुमापतिं तं
भजन्ति नित्य परिपूर्णचित्ता ॥
कुर्वन्ति दानानि महत्सु सेवां
तीर्थेषु मज्जन्ति शुभं वदन्ति ।
ये चापि पूर्वं कृतिनो महान्त-
स्तैरेव वन्द्य सततं गिरीश' ॥
सुरेन्द्रः पूर्वदिग्भागे स्थित्वा देवगणैः सह ।
पूजां करोति यत्नेन मुक्त्यर्थं रघुनन्दन ॥
दक्षिणस्यां दिशि यमस्तिष्ठन्पितृगणैः सह ।
श्रीशैलेशं महाभक्त्या स्तौति प्रीतो रघूत्तम ॥
प्रचेताः पश्चिमद्वारे तिष्ठञ्श्रीशैलवासिनम् ।
पाहि मां पार्वतीकान्तेत्येव स्तौति पुन पुनः ॥
यक्षराडुत्तरे भागे सदा क्रीडति शंभुना ।
तस्य दिव्यां तनुं पश्यन्स्तुवन्ध्यञ्जपन्स्तुवन् ॥
मध्यं तेषां सुराणां तु सिद्धानां साध्यरक्षसाम् ।
कदम्बै पूरिते स्थाने स्थातुमन्यैर्न शक्यते ।
भूलोकस्य तु सेवार्थं दत्तं त्रिदिवसं किल ॥
श्रुत्वैव राघवश्रेष्ठो जामदग्न्यात्कुरूद्वह ।
दत्त्वा दानानि विधिवद्दक्षिणद्वारतो ययौ ॥
श्रीशैलं गच्छति पुमान्यो वा को वा नृपोत्तम ।
तस्यैव वंशजा सर्वे मुक्ता एव न संशयः ॥
य इदं पुण्यमाख्यानं नारदेन प्रभाषितम् ।
शृणोति सततं भक्त्या शिवसायुज्यमश्नुते ॥

Colophon

युधिष्ठिर उवाच ।

देवव्रत महाबुद्धे सुरसिन्धुसुत प्रभो ।
श्रीनिवासस्य माहात्म्यं वद नो वदता वर ॥
वैकुण्ठवासी लोकेशो विष्णुः सर्वगत' प्रभुः ।
कथं प्राप्तो वृषगिरिं तन्मे त्व कृपया वद ॥

भीष्म उवाच ।

पुरा वै नारद' श्रीमान्ब्रह्मपुत्रो महाद्युतिः ।
हरिं द्रष्टुमनास्तात वैकुण्ठं समुपागत' ॥
तत्र दृष्ट्वा हरिं पार्थ क्षीरोदस्योपकण्ठत ।
आयान्त ऋषयो दृष्ट्वा मुदमापुश्च नारदम् ।
अगस्त्यप्रमुखा' सर्वे पाराशर्यपदानुगा ॥
अनुज्ञातो मुनिगणै' पाराशर्यो महाद्युति' ।
व्यासो वचनमक्लीब नारदं प्रत्युवाच ह ॥
कृतकृत्यो मुने ब्रह्मंस्त्वमेको जगतीतले ।
विष्णुभक्तोऽसि नान्योऽस्ति सदा कीर्तयसे यतः ॥
अहो खलु मनुष्याणां मोक्षदो विष्णुरव्ययः ।
स त्वया सेवितो नित्यं कृतकृत्यो भवानत' ॥
स्रष्टा पालयिता हन्ता एक एव जनार्दन ।
स त्वयां पूजितो नित्यं तस्मात्खलु कृती भवान् ॥
योऽनन्तः सर्वभूतानां सेतुभूतो जगन्मयः ।

सुवि (for बहु-). —(L. 6155) G(ed) नतानाम् (for ग°). —(L. 6158) D1 G3 M1 वसतस्तत्र भूपते (for ^{b}) —(L 6161) D1 G(ed.) स्निग्धा (for सिद्धा) M1 सुस्निग्धा बन्धुजाश्चैव (for ^{a}). —(L. 6162) D1 महत्स्थलम् (for महर्षय). —(L. 6165) D1 M1 कृतव्रत', G3 [उ]त्तमव्रत', G(ed) च सुव्रतः (for दृढव्रत.). —(L. 6168) G3 G(ed) अतुला कुरुनन्दन (for ^{b}).— Before line 6171, M1 ins श्रीराम —(L. 6172) D1 श्रीशैलोऽसौ (for °लेशो). —(L. 6175) D1 M1 स्थिरजीवी ; G2 स्थिरवीर (for चिरंजीवी). D1 ऽ[ब्र]वी[त्] (for ऽब्रवत्) —Before line 6176, D1 ins. जामदग्न्य'. —(L 6189) G2 -चित्तम् (for -चित्ता'). —(L 6190) D1 देवास् (for सेवा) —(L. 6198) D1 -पालकम् (for -वासिनम्) —(L. 6207) G2 [अ]पि मानव (for नृपोत्तम). —(L 6210) सालोक्यम् (for सायुज्यम्).

Colophon — *Sub-parvan* · D1 G1 आश्चर्यपर्वणि शेषधर्मा , G2 G(ed) शेषधर्मा. —*Adhy name* G(ed) श्रीशैलमाहात्म्यम्. —*Adhy no* D1 G(ed) 47 , G1, 2 46

G2 om. the ref —(L 6211) G(ed.) महाभाग (for

संसारपाशविच्छेदी स त्वया पूजितो हरिः ॥
एते वयं मुनिश्रेष्ठ द्रष्टुकामा जनार्दनम् ।
तन्निवेशितचित्ता हि प्राज्ञा परमधार्मिकाः ॥
ईदृशं वचनं श्रुत्वा व्यासस्य जगतीपते ।
प्रोवाच नारदो धीमान्वाग्मी वेदविदां वरः ॥
कृतकृत्योऽस्मि भद्रं वो यूयं भूतहिते रताः ।
शास्त्रैर्धर्मैः सदा लोकान्भक्त्या रक्षितुमिच्छथ ॥
वैकुण्ठलोके संभूता वार्ता परमपावना ।
श्रुताऽपि सा मया सन्तो वक्ष्ये शृण्वन्तु तां शुभाम् ॥
मायावी परमानन्दस्त्यक्त्वा वैकुण्ठमुत्तमम् ।
स्वामिपुष्करिणी तीरे रमया सह मोदते ॥
इत्यद्भुतमिदं वाक्यं श्रुत्वा सेन्द्रा मरुद्गणाः ।
तत्र सेवितुमुद्युक्ता गन्ताऽहं च जगद्गुरुम् ॥
किं करिष्यथ विप्रेन्द्रा दर्शनं ह्यत्र दुर्लभम् ।
तस्मात्तत्र गमिष्याम इत्युक्त्वा खं समारुहत् ॥
अगस्त्यप्रमुखाः सर्वे ऋषयश्च तपोधनाः ।
जग्मुस्ते व्योममार्गेण यत्र धर्मगिरौ हरिः ॥
स्वामिपुष्करिणीतीरं गत्वा ते ऋषयः सुराः ।
स्नात्वा पीत्वा शुभं तोयं हरिं द्रष्टुं विचेरतुः ॥
पश्चिमं भागमासाद्य मुनयो विष्णुतत्पराः ।
तत्रापश्यन्महाभूतं मेरुमन्दरसंनिभम् ॥
सहस्रादित्यसंकाशं विद्युच्चञ्चललोचनम् ।
सर्वायुधधरं देवं दृष्ट्वा विस्मयमागताः ॥
दक्षिणां दिशमाजग्मुः स्वामिपुष्करिणीतटात् ।
तत्रासुरान्दानवादीन्राक्षसान्पिशिताशनान् ॥
ध्यायन्तश्च जपन्तश्च नमस्यन्तश्च तान्बहून् ।
दृष्ट्वा विस्मयमापन्नाः पूर्वां दिशमुपाययुः ॥
तत्रासीनं देवपतिं त्रिदशैरुपसेवितम् ।
यक्षकिंनरकिंपुरुषचारणाद्यैरभिष्टुतम् ॥
सिद्धगन्धर्वदेवाद्यैर्ऋषिभिश्चाप्सरोगणैः ।
स्तूयमानं हरिं साक्षाच्छ्रीनिवासं जगद्गुरुम् ॥
कदा द्रक्ष्यामि तद्रूपं योगिनामपि दुर्लभम् ।
कदा मे जन्मसाफल्यं भविष्यति सुरार्चितम् ॥
देहि मे दर्शनं देव प्रणतार्तिप्रणाशन ।
त्वं गतिः सर्वभूतानां देवानामपि मोक्षदः ।
पाहि पाहि जगन्नाथ भूयो भूयो नमोऽस्तु ते ॥
इति स्तुवन्तं देवेशं देवराजं पुरंदरम् ।
वेङ्कटाद्रेः पुरोभागे स्वामिपुष्करिणीतटे ।
देवताभिः समासीनं ध्यायन्तं पुरुषोत्तमम् ॥
तं दृष्ट्वा विस्मिता सर्वे ह्यगस्त्यप्रमुखा द्विजाः ।
कौबेरीं दिशमाजग्मुर्द्रष्टुकामा जनार्दनम् ॥
तत्रापश्यन्द्विजवरान्सप्तद्वीपनिवासिनः ।
राज्ञो मुनिगणांश्चैव भूसुरान्वेदवादिनः ॥
भूलोकवासिनश्चैव मनुजान्मनुजेश्वर ।
मुदमापुर्महात्मानो मुनयः शुद्धबुद्धयः ॥
स्तुवन्ति नृत्यन्ति नमन्ति केचि-
दानन्दजाश्रूणि सृजन्ति केचित् ।
आप्लुत्य चाप्लुत्य वदन्ति केचि-
द्धरे मुरारे पुरुषोत्तमेति ।
लुण्ठन्ति केचित्परिरम्भयन्ति
तूष्णीं तु तिष्ठन्ति हसन्ति केचित् ॥
ध्यायन्ति केचित्कलशं वहन्ति
पूर्णं मुरारेरभिषेकहेतोः ।
पुष्पाणि सौरभ्ययुतानि गन्धं
कर्पूरकस्तूरिसमग्रवन्ति ॥
आदाय सर्वे वृषभाद्रिनाथं
ते मार्गमाणा विचरन्ति तत्र ॥
एवं कृतेषु देवेषु ऋषिगन्धर्वकोटिषु ।
पुष्पवृष्टिः पपाताशु पर्वतोपरि सर्वतः ॥
भेरीमृदङ्गपटहैर्निःसाणाद्यैश्च डिण्डिमैः ।
शङ्खकाहळसंनादैः संकुलं समजायत ॥
तस्मिन्नवसरे विष्णुः प्रादुरासीत्सरित्तटे ।
मेरुमन्दरसंकाशैर्जाम्बूनदपरिष्कृतैः ।
नानारत्नचितैर्दिव्यैर्विमानैरुपशोभितः ॥
कोटिसूर्यप्रतीकाशश्चन्द्रकोटिसुशीतलः ।
स्वर्लोकाद्भूमिपर्यन्तं प्रादुरासीच्छ्रियः पतिः ॥

°बुद्धे). — (L 6213) G(ed) देवेशो (for लोकेशो). — (L 6221) G_2 वाचा (for व्यासो). — Before line 6222, D_1 ins व्यासः. — G_2 om. lines 6227–6228. —(L 6227) M_1 सेवितो (for पूजितो). —(L. 6240) G(ed) [अ]द्भुततम (for °तमिदं). — (L. 6241) G_2 तत्र स्नातुं समुद्युक्ता (for ᵃ). —(L 6242) D_1 G_1 M_1 ह्यत्र दर्शनदुर्लभः; G(ed) ह्यत्र दुर्लभदर्शना (for ᵇ) —(L. 6251) D_1 G_2 अदृष्ट्वा (G_2 दृष्ट्वा त) विस्मयं गताः (for ᵇ). — For line 6254, G(ed) subst. :

224** नमस्यतो ध्यायतश्च जपतश्चापि तान्बहून् ॥

—(L. 6257) Hypermetric. G(ed) -गन्धर्व- (for -किंपुरुष-) —(L 6258) G(ed) सिद्धकिंपुरुषाद्यैश्च (for ᵃ). —(L. 6259) G(ed) जगत्पतिम् (for जगद्गुरुम्). —(L. 6263) G(ed.) मोक्षद (for °दः). — (L. 6271) M_1 -पारगान् (for -वादिनः). — (L. 6273) G_2 मुनयः शुभदर्शनाः (for ᵇ). —(L. 6276) G_2 उत्प्लुत्य चोत्प्लुत्य (for आप्लुत्य चाप्लुत्य). G(ed.) नदन्ति (for व°). — After line 6276, G(ed.) ins. :

225** गायन्ति गीतं परितो महान्तः

— After the above, G(ed) reads lines 6303–6322. — (L 6282) G_2 -गुणानि (for -युतानि). G(ed.) गन्धान् (for गन्धं). — After line 6285, G_1 G(ed.) ins. :

226** देवा मनुष्या अपि योगिनश्च

G_1 cont. :

227** गायन्ति गीतान्महतो महात्मनः ॥

स्वामिपुष्करिणीतीरे रविमण्डलसंनिभे ।
विमाने सेवितो देवै श्रीनिवासोऽवसत्प्रभुः ॥
ब्रह्मा शिवश्चन्द्रदिवाकरश्च
सेन्द्रो यम पाशधरेश वाणी ।
रक्षोधिपो वायुवसू च दस्रौ
विरिञ्चकोटीगणदानवाश्च ॥
पिता पितॄणां जनकः सुराणां
माता शिशूनां महता महात्मा ।
राज्या शशी देहभृतां च चक्षु-
रध्यात्मचक्षुर्दिनकृद्दिवासु ॥
एको विष्णुर्बहुधा विभिन्नः
शुद्धो जनानां दिवि देवतानाम् ।
कृपातिथिस्तत्र बभूव लक्ष्म्या
सर्वस्य लोकस्य हिताय नूनम् ॥
वन्यपुष्पफलैः केचित्स्तोत्रैश्च विविधैर्जपैः ।
वेदपारायणैः केचित्पूजयन्ति जनार्दनम् ॥
धूपदीपैर्गन्धमाल्यैरन्यैर्नामादिकीर्तनै ।
बहुहाटककुम्भैश्च तोरणैर्ध्वजराजिभि ॥
विचित्रकुसुमैः केचित्पूजयन्ति जनार्दनम् ।
तुलसीमञ्जरीभिश्च करवीरैश्च जातिभिः ।
मल्लिकाकेतकै पुष्पैश्चम्पकैः पूजयन्ति ते ॥
भूसुरा ऋषयश्चैव कलशै परिपूरितै ।
पुण्योदकैर्मन्त्रपूतै कमण्डलुगतै शुभै ॥
तत्र कुम्भाहृतैः केचित्पूजयन्ति जनार्दनम् ।
पत्रशाकैर्मूलफलैर्नैवेद्यं कल्पयन्ति हि ।
शुद्धोदकैरन्नपुष्पैर्ध्यानैः स्तोत्रैर्जपै परे ॥
एवं तेषां पूजनाभिः पूजितो मधुसूदन ।
आस्ते तत्र जगन्नाथः स्वामिपुष्करिणीतटे ॥
तस्मात्पूजयितुं राजञ्श्रीनिवासं जगद्गुरुम् ।
गच्छ सौम्य सदानन्दं भुक्तिमुक्तिफलप्रदम् ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकैः ।
यस्य श्रवणमात्रेण नर पापै प्रमुच्यते ॥
श्रीनिवासस्य सेवार्थं यो वा को वा व्रजेद्यदि ।
तस्यैव वंशजा सर्वे मुक्ता एव न संशय ॥
यानि क्षेत्राणि पुण्यानि तीर्थान्यायतनानि च ।
तानि सर्वाणि सेवन्ते श्रीनिवासं जगन्मयम् ॥
इदं ये पुण्यमाख्यानं शृण्वन्ति श्रद्धया नराः ।
तेषां मुक्तिः करस्थैव गतानां किमु वैभवम् ॥

Colophon

युधिष्ठिर उवाच ।

देवव्रत महाभाग नम सुरनदीसुत ।
यदुनाथो भवानेको रक्षिता मम सुव्रत ॥
काञ्ची दिव्यपुरी ज्ञेया तस्यामास्ते जगन्मय ।
श्रीहस्तिशिखरे तत्र प्रादुरासीत्कथ प्रभु ॥
एतदिच्छाम्यहं श्रोतुं महत्कौतूहलं हि मे ।
वक्तुमर्हसि सर्वज्ञ प्रादुर्भावं हरेः प्रभो ॥

भीष्म उवाच ।

पुरा सनत्कुमाराय नारदेन प्रभाषितम् ।
शृण्वतां सर्वपापघ्नमायुरारोग्यवर्धनम् ॥
शृणुष्व नरशार्दूल ब्रह्मा लोकपितामहः ।
सृष्ट्वा लोकांश्चिरं कालमास्ते चिन्ताकुलो भृशम् ॥
तस्मिन्नवसरे वाणी समुद्भूता नृपाम्बरे ।
शृणुष्वेति जगादेदं ब्रह्माणं भुवनेश्वरम् ॥

—(L. 6292) G_2 -मणिमयैर् (for -रत्नचितैर्) G_2 चामरै-रुपसेवितः (for [b]). —(L 6297) D_1 M_2 -दिवाकरौ (for °करश्). —(L. 6298) G_1 पाशिधनेश- (for पाशधरेश-) M_1 सेन्द्रो यमः पाशधनेशवह्नि ; G(ed) सेन्द्रौ यमाग्नी धनराँट् च पाशी (for [b]). —(L 6302) G_1 जगता च पाता (for महता महात्मा). — After line 6302, G(ed) ins.

228** पतिः प्रियाणां तरणिर्जनानां
निधि कृशानामिव निर्धनानाम् ।
आविर्बभूवात्र महोज्ज्वलाङ्ग
प्रियायुत श्रीवृषभाद्रिनाथ ॥
प्रसन्नमूर्तिर्जगदेकबन्धु
प्रसन्नधामाथ जगन्निवास ।

—(L. 6303) G_1 राज्यां (for राज्या). —(L 6306) G_2 वृष्टो (for शुद्धो).—(L. 6307) M_1 कृतातिथिस् (for कृपा°) G(ed.) कृपानिधिस्तत्र बभूव लक्ष्मी — M_1 om. lines 6309–6313.—(L. 6309) D_1 वनपुष्प-, G_1 वन्यै पुष्पै, G(ed) वन्यै पुष्प- (for वन्यपुष्प-). —(L. 6311) G(ed.) अन्ये सामादि-कीर्तनैः (for [b]). — G_2 G(ed.) om. lines 6314–6318.

—(L 6317) M_1 -परै (for -गतै). —(L 6318) D_1 M_2 पत्र- (for तत्र) —(L. 6320) G_1 M_1 मन-; G(ed) मन्त्र- (for अन्न-) G_2 जपैर्वरै, G(ed) जनै परे (for जपै परे) —(L 6321) M_1 G(ed) तु पूजाभि (for पूजनाभि). — After line 6322, D_1 (marg) ins

229** समाश्रितानामापादमूरुदघ्नो भवाम्बुधि ।
इति वै दर्शयन्नास्ते हस्ताभ्या वेङ्कटेश्वर ॥
वैकुण्ठमेतत्करपल्लवेन
सदर्शयन्सर्वसुरासुराणाम् ।
आस्ते ह लक्ष्म्या सह विश्वमूर्ति-
राद्य पुमानञ्जलशैलशृङ्गे ॥

—(L 6326) M_1 स्मरण- (for श्रवण-) —(L. 6331) D_1 सतत (for श्रद्धया) G_2 [अ]न्विता (for नरा)

COLOPHON — *Sub-parvan* G_1 आश्चर्यपर्वणि शेषधर्मा, G_2 M_1 G(ed) शेषधर्मा. — *Adhy name :* D_1 श्रीनिवासमाहात्म्यम् ; G(ed) वेङ्कटाद्रिमाहात्म्यम् — *Adhy. no.* D_1 G(ed) 48; $G_{1,2}$ M_1 47

G_2 om. line 6334.—(L. 6338) G_1 धर्मज्ञ (for सर्वज्ञ),

अश्वमेधसहस्रं त्वं कुरु चित्तविशुद्धये ।
अन्यथा निर्मला बुद्धिर्न भविष्यति पद्मज ॥
एतच्छ्रुत्वा चिन्तयानो ब्रह्मा लोकपितामहः ।
न शक्यः कर्तुमेकोऽपि कथमेतदिहाब्रवीत् ॥
पुनश्चोवाच सा वाणी धातारं व्याकुलेन्द्रियम् ।
मेघगम्भीरया वाचा शृणुष्वेति पितामह ॥
गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पञ्चयोजनमात्रेण पूर्वाम्भोधेस्तु पश्चिमे ॥
वेगवत्युत्तरे तीरे पुण्यकोट्या हरिः स्वयम् ।
वरदः सर्वभूतानामद्यापि परिदृश्यते ॥
कर्तव्यस्तत्र वै यज्ञस्त्वया चित्तविशुद्धये ।
सहस्राणां फलं तेऽस्तु ह्येकेन स्थानवैभवात् ॥
श्रुत्वा तत्प्रीतिसंयुक्तो धाता देवगणैः सह ।
गन्तुं मनो दधे ब्रह्मा यज्ञं कर्तुं च सुव्रत ॥
दिक्पालैर्देवगन्धर्वैर्वसुरुद्रादिभिः सह ।
हयमेधं महायज्ञमकरोदृषिभिः सह ॥
हवींषि भुञ्जमानानां पश्यतां मरुतां प्रभुः ।
प्रादुरासीन्महावेद्यामुत्तरस्यां महाद्युतिः ॥
शङ्खचक्रधरः श्रीमान्नीलजीमूतसंनिभः ।
वेदैरुपनिषद्भिश्च मूर्तिमद्भिः प्रसेवितः ॥
इन्द्रादिलोकपालैश्च ब्रह्मादिभिरनेकशः ।
यक्षविद्याधरगणैः किंनरैश्चारणैरपि ॥
नदीनदसहस्रैश्च गङ्गाद्यैरुपसेवितः ।
सप्तसागरपृथ्वीशैः सप्तद्वीपनिवासिभिः ॥
ऋषिदेवगणैर्देवः प्रादुरासीन्महाद्युतिः ।
पीताम्बरधरः श्रीमान्विद्युत्कञ्जललोचनः ॥
कौस्तुभेन विराजन्तं श्रीवत्साङ्कितवक्षसम् ।
नत्वा पुनः पुनर्ब्रह्मा लोककर्ता जगन्मयः ।
अस्तौषीत्कमलाकान्तमपवर्गफलप्रदम् ॥

ब्रह्मोवाच ।

श्रीपते पुण्डरीकाक्ष सर्वलोकहितंकर ।
पाहि मां कमलाकान्त त्वत्पादकमलं गतम् ॥
वरदं सर्वभूतानामीश्वरं पुरुषोत्तमम् ।
नमामि पुण्डरीकाक्षं गरुडासनमव्ययम् ॥
पीताम्बरधरं देवं वनमालाविभूषितम् ।
चतुर्बाहुमुदाराङ्गं नमामि कमलापतिम् ॥
येनेदं भुवनं व्याप्तं देवतिर्यङ्नरादिकम् ।
तं वासुदेवममलं प्रणतोऽस्मि जनार्दनम् ॥
नित्यानन्दाय शुद्धाय शूरायानाथपालिने ।
सर्वज्ञाय नमस्तुभ्यं सर्वभूतान्तरात्मने ॥
यज्ञभोक्त्रे नमस्तुभ्यं यज्ञकर्त्रे सुरोत्तम ।
हविर्मन्त्रस्वरूपाय यजमानस्वरूपिणे ॥
देवतिर्यङ्मानुष्याणां जनयित्रे नमोऽस्तु ते ।
पाहि मां देवदेवेश भूयो भूयो नमोऽस्तु ते ॥

भीष्म उवाच ।

इति स्तुवन्तं देवेशं पद्मयोनिमरिंदमम् ।
प्रसन्नवदनो विष्णुर्ब्रह्माणं प्रत्युवाच ह ॥
प्रीतिमानस्मि भद्रं ते स्तोत्रेणानेन पुत्रक ।
हयमेधेन महता भक्त्या विश्राणनेन च ।
त्रिकालमर्चय त्वं मां कृते ह्यस्मिन्युगोत्तमे ॥
त्रेतायां तु गजेन्द्रेण प्रार्थितो मुक्तिकामिना ।
कृतकृत्येन विदुषा भक्तेन तु महात्मना ॥
द्वापरे देवगुरुणा मुनिशापाच्च भीरुणा ।
भक्त्या परमया चैव पूजितो द्वापरे चिरम् ॥
वर्तयिष्ये मुनिगणैः सेन्द्रैः सुरगणैर्वृतः ।
यक्षकिंनरसंघैश्च गन्धर्वैश्चाप्सरोगणैः ॥
कलौ तु पूजितः पूजाद्रव्यैः शेषेण पूजितः ।
मनुजैः पूजनादिभिश्च भूसुरैश्च विशेषतः ।
स्त्रीशूद्रैः पूजितो नित्यं वत्स्यामि कमलासन ॥
इत्युक्त्वा देवदेवोऽसौ तत्रैवान्तरधीयत ।
विस्मयं परमं जग्मुर्देवाः सर्वे दिवि स्थिताः ॥
हयमेधेन विधिना ब्रह्मा लोकपितामहः ।
इष्ट्वा विध्युक्तमार्गेण ब्राह्मणान्पर्यपूजयत् ॥
अन्नदक्षिणवस्त्राद्यैर्वृत्तिक्षेत्रगृहादिभिः ।
देवानृषिगणांश्चैव पूजयामास भूसुरान् ॥
तस्मिन्नवसरे देवाश्चक्रुश्च विविधान्मखान् ।
वाजपेयादिभिर्यज्ञैरिष्टकाचयनादिभिः ॥
ऋषयो मनवश्चैव लोकपालाः कुरूद्वह ।

—(L. 6342) G(ed.) आस्ते चिन्ताकुलेन्द्रियः (for ^{b}). —(L. 6348) G_2 न शक्यं वक्तुमेकोऽपि (for ^{a}). G(ed.) सहस्रं कथम॰ ब्रवीत् (for ^{b}) —(L. 6352) M_1 एक- (for पञ्च-). —(L. 6357) D_1 G_2 श्रुत्वा प्रीतिसमायुक्तो (for ^{a}) G(ed.) स देवर्षि- (for धाता देव-). — After line 6358, G(ed.) ins.:

230** ततः काञ्चीं समासाद्य सृष्टिकर्ता तु तत्र वै ।

—(L. 6367) D_1 M_1 नदीनां शतसाहस्रैर् (for ^{a}), G_1 M_1 -सेवितम् (for °तः), —(L. 6369) G_1 देवैः (for देवः) — G_2 om. lines 6378–6380. — After line 6379, G_2 ins.:

231** आनन्दं परमं व्याप्तमवतीर्य नरादिकम् ।

—G_2 om. line 6380. —(L. 6381) G(ed.) अतुलं (for अमलं). —(L. 6383) G_1 M_1 सर्वभूतान्तरायिने ; G_2 °तनिवासिने (for ^{b}). — G_2 om. the ref. —(L. 6390) G_1 सुव्रत ; G_2 पद्मज (for पुत्रक). — (L. 6391) D_1 भवतो (for महता). —(L. 6392) G_2 कृत्यो ह्यस्मिन्जगोत्तमे (for ^{b}) —(L. 6397) D_1 मुनिवरैर् (for °गणैर्). D_1 G_2 M_1 देवैः सेन्द्रैर्म (G₂ सोमम) रुद्गणैः (for ^{b}). — D_1 om (hapl.) lines 6398–6399. M_1 om. line 6398. —(L. 6399) G_1 M_1 पूजितः पूजनाद्रव्यैः (for ^{a}). G_1 कलौ (for द्रव्यैः). —(L. 6404) G(ed.) यज्ञेन (for विधिना) —(L. 6405) M_1 ब्राह्मणान्परिपूजयन् (for ^{b}). —(L. 6406) G(ed.) दक्षिणान्नसुवस्त्राद्यैर् (for ^{a}). G(ed.)

वसिष्ठो जमदग्निश्च त्रिक· कण्वोऽथ गालवः ॥
विश्वामित्रो देवरात कचः काश्यपसंभव. ।
रामो बृहस्पतिर्व्यासो धौम्यो रोमश एव च ॥
कात्यायनो भरद्वाजः पुलस्त्य पुलह क्रतु ।
एते चान्ये च बहवश्चक्रुश्च विविधान्मखान् ॥
काञ्चीभुवं प्रविष्टाना नास्ति नास्ति पुनर्भव. ।
तस्मात्त्वं सेव्यसे विप्रै संसारच्छेदलिप्सुभि ॥
जनने मरण नृणा मरणे जन्मसाधनम् ।
तन्नाशं कुरुते सद्य काञ्चीनाथोऽद्य सेवया ॥
अत्रैव वरदस्यास्य पादसेवापरा शुभा ।
वेगवतीति विख्याता शारदा कलिदोषहा ॥
तस्यां तु मज्जता नृणां वाग्विभूतिर्भवेद्ध्रुवम् ।
आरोग्यं पावनं तीर्थं जन्मान्तरमलापहम् ॥
कामाक्षीति च विख्याता सर्वलोकेषु भारती ।
मूकं वा शास्त्रकर्तारं करोति भुवि विश्रुतम् ॥
त्रिपुरारिर्महादेव. पार्वतीसहित प्रभु ।
चूतमूले वसन्नृणां सेव्यते दैवतैर्नृभि ॥
काञ्चीनाथः प्रपन्नानां संसारभयनाशनम् ।
एकाम्रनाथसेवाभिर्विद्याबन्धुविवर्धनम् ॥
सेवया देवराजस्य नरा पापरता अपि ।
ब्रह्मलोकं प्रयान्त्येव नारदेन प्रभाषितम् ॥
काञ्चीनाथं स्मरेद्यस्तु नमेद्वा तद्दिशं प्रति ।
तस्यालोक्यं समायाति नारदेन प्रभाषितम् ॥
यस्त्वेतच्छृणुयान्नित्यं काञ्चीनाथस्य वैभवम् ।
स कोटिकुलसंयुक्तो ब्रह्मलोके सुखं वसेत् ॥

Colophon.

युधिष्ठिर उवाच ।

सिंहाद्रिनाथो देवेशः साक्षान्नरहरिः स्वयम् ।
कथं तत्र वसत्येष औबले चात्र माधव· ॥
वेत्स्येतत्तु भवानद्य वसूनां प्रवरोऽसि मे ।
कथां कथय तत्त्वज्ञ तत्स्थानस्य च वैभवम् ॥

भीष्म उवाच ।

शृणु पार्थ प्रवक्ष्यामि श्रोतॄणामघनाशनम् ।
संसारपाशविच्छेदं नारसिंहस्य कीर्तनम् ॥
सिंहाद्रिनाथस्य कथां सर्वमङ्गलदायिनीम् ।
द्विजो वा पतितो वापि श्रुत्वा पापै· प्रमुच्यते ॥
स एव भगवान्विष्णुर्यज्ञमूर्ति शिव· प्रभु ।
ब्रह्मा रुद्र शशी चार्कं शचीपतिपुरोहितः ॥
देवराजो रवेः सूनुर्वरुणो धनपालक ।
स एको बहुधा भूत्वा पालयत्यखिलं जगत् ॥
पुरा दैत्यवधं कृत्वा नारसिंहो जगत्पति ।
देवैरभिष्टुतो भीतैर्दिव्यं योगमथागमत् ॥
औबलाख्ये गिरिवरे दिव्यरूपी भयंकरः ।
स वासमकरोद्धीमानेक एव जगन्मयः ॥
योगारूढं तमालोक्य जितशत्रुबलं हरिम् ।
मरुतो मरुतां नाथं तुष्टुवुर्जगतीपतिम् ॥

देवा ऊचुः ।

श्रीपते पुण्डरीकाक्ष पुराणपुरुषोत्तम ।
नारसिंह जगद्योने वेदराशे नमोऽस्तु ते ॥
लोकनाथ नमस्तेऽस्तु मायिने जलशायिने ।
सर्वलोकस्य कर्त्रे वै पालकाय नमोऽस्तु ते ॥
संहर्त्रे मापते तुभ्यं सुयज्ञफलदायिने ।
निर्गुणाय नमस्तुभ्यं बीजरूपिन्सुरेश्वर ॥
पाह्यस्माञ्जगतीनाथ त्वत्पादकमलं गतान् ।
त्वं पिता सर्वलोकानामस्माकं तु विशेषतः ॥
नानामोहसमायुक्तान्नानाशत्रुनिपीडितान् ।
पाहि नस्त्रिदशाधीश भूयो भूयो नमोऽस्तु ते॥

भीष्म उवाच ।

नारसिंह· स्तुतो देवैरिति नत्वा पुनः पुनः ।
प्राह तांस्त्रिदशाधीशः प्रसन्नो भक्तवत्सलः ॥

भगवानुवाच ।

किमर्थं प्रार्थ्यते देवैर्महाभयसमन्वितैः ।

-समाधिभिः (for -गृहादिभिः) —(L. 6410) M_1 मानवाश्च (for मनवश्च). —(L 6412) G_2 शुक्रः M_1 त्रित· ; G(ed) [अ]सितः (for त्रिक·) —(L. 6413) G_2 रैभ्यो (for धौम्यो). —(L. 6416) G_1 काञ्चीपुर ; M_1 °पुर- (for °भुवं). G_2 काञ्चीभुवः प्रतिष्ठाना (for ᵃ) D_1 महद्भय (for पुनर्भवः). —(L. 6420) D_1 अत्र वै ; G_2 मूर्त्यैव (for अत्रैव) M_1 अत्र वै वरदा ह्यस्य (for ᵃ) —(L 6422) $G_{1\,2}$ विजृम्भते (for भवेद्ध्रुवम्). —(L. 6424) $G_{1\,2}$ कमलाक्षीति विख्याता (for ᵃ). —(L 6427) G_2 आम्रमूले (for चूत°). G(ed.) दाता (for नृणा). —(L 6428) G_2 -भव- (for -भय-). —(L. 6429) G(ed.) -विवर्धन (for °र्धनम्). —(L. 6430) G_1 -देवस्य (for -राजस्य).—(L. 6432) G(ed) नमेद् (for स्मरेद्). G(ed.) स्तौति (for नमेद्). —(L. 6435) D_1 चिर , G(ed) सुखी (for सुखं)

COLOPHON. —*Sub-parvan* D_1 G_1 आश्चर्यपर्वणि शेषधर्मा' ; G_2 M_1 G(ed) शेषधर्मा — *Adhy. name* · D_1 G_1 काञ्चीमाहात्म्यम् , G(ed) हस्तिगिरिमाहात्म्यम् — *Adhy. no* : D_1 G(ed) 49 , G_2 40 , G_2 M_1 48

(L 6438) G(ed.) वेत्ति तत्तु महानद्य (for ᵃ) G(ed) भवान् (for ऽसि मे) —(L 6439) तस्य स्थानस्य वैभवम् (for ᵇ) —(L 6441) G_1 -पादप- (for पाशवि-). — G_2 om lines 6444–6461. — (L 6445) शिवश्च (for शशी). —(L 6447) D_1 [अ]निशं बली , G_1 M_1 [अ]निशं महीम् (for [अ]खिलं जगत्) —(L 6450) D_1 अहोबले औबलाख्ये (for ᵃ). —(L 6457) D_1 M_1 सर्वलोकप्रभूताय (for ᵃ). — M_1 om lines 6459^b–6461^b. D_1 om lines 6461–

मया वः करणीयं किमिति तान्प्रत्युवाच ह ॥
देवा ऊचुः ।
योगमूर्तिं विसृज्यैव दिव्यभोगसमन्वितः ।
अस्मान्वै पातुमिच्छामो ह्यनिशं परमेश्वर ॥
भगवानुवाच ।
सिंहाद्रिरिति विख्यातः पुरस्तात्पर्वतोत्तमः ।
तत्र वत्स्यामि जगतां हिताय त्रिदशेश्वराः ॥
ऋषिविप्रगणैः सार्धं युष्माभिः सह पुत्रकाः ।
अत्राश्चर्यसमायुक्तो वर्ते तत्र महागिरौ ॥
अत्र योगेश्वरो नित्यं तत्र भोगसमन्वितः ।
पालयिष्ये तथा लोकांस्त्रिदशान्मनुजानपि ।
भवन्तस्तत्र गच्छन्तु सदा भोगेप्सवोऽमलाः ॥
इत्युक्ता हरिणा देवा विमानशतशोभितम् ।
सिंहाद्रिं प्रययुः शीघ्रं बहुजन्तुनिषेवितम् ॥
तत्र स्थित्वा जगन्नाथं चिरं देवं जनार्दनम् ।
नापश्यंस्त्रिदशा सर्वे योगिध्येयमरिंदमम् ॥
एकविंशे युगेऽतीते तपोभिर्बहुविस्तरैः ।
नारसिंहमदृष्ट्वैव दुःखिता देवसंततिः ॥
सिंहरूपी स भगवान्विचचार नगोत्तमे ।
सहस्रादित्यसंकाशो विद्युज्ज्वललोचनः ॥
तप्तहाटककेशान्तो विद्युद्दामतनुच्छदः ।
दीप्तहाटकजिह्वाग्रो रक्तलाङ्गूलशोभितः ॥
विचित्रमणिपादैश्च दन्तपङ्क्तिमरीचिभिः ।
भासयन्सर्वककुभो दिव्यसिंहश्चचार ह ॥
कम्पमानाः सुरेन्द्रास्ते किमेतदिति शङ्किताः ।
तत्र तत्र निलीयन्ते गिरिगह्वरकोटरे ॥
अथ तस्मिन्नवसरे दिव्ययोगिगणामलाः ।
शङ्खचक्रधरा वन्द्याः स्तूयमाना महर्षिभिः ॥
पद्माक्षसूत्रवलयाः प्रलम्बिवनमालिकाः ।
दिव्यायुधधरा वीरा दिव्यकुण्डलशोभिताः ॥
तप्तहाटकवस्त्रैश्च रत्नकेयूरशोभिताः ।
केयूरमकुटैर्दिव्यैर्नूपुरैः कनकाङ्गदैः ॥
रशनाभिर्विचित्राभिर्दिव्यरत्नमयैः शुभैः ।
शोभमाना मुनिवरा योगीन्द्रा पर्वतोपमाः ॥
सनत्कुमारो भगवान्सनकश्च सनातनः ।
सनत्सुजात शान्तात्मा महायोगी सनन्दनः ॥
नारदः पर्वतश्चैव कुमुदो लोकपालकः ।
जयो विजयशेषाद्या कुम्भयोनिमुखा द्विजाः ॥
अणिमादिगुणोपेता योगीन्द्राः सचतुर्मुखा ।
एते चान्ये च बहवो वैकुण्ठपुरवासिनः ॥
विमानकोटिसाहस्रैर्जाम्बूनदपरिष्कृतैः ।
कोटिसूर्यप्रतीकाशास्तं देशमुपजग्मतुः ॥
सिंहरूपधरं देवं हरिं दृष्ट्वा मुनीश्वराः ।
दिव्यैः पुष्पैः प्रकीर्याथ प्रणेमुर्देववल्लभम् ॥
ध्यायन्तः प्रमदायुक्ता सुखासीनाः सुरोत्तमाः ।
प्रसीदेति जगन्नाथमुपतस्थुर्महर्षय ॥
अथान्तरिक्षे जगतामधीशः
सुपर्णमारुह्य सुपर्णकेतुः ।
तस्थौ गिरौ देवगणैः स्तुतोऽसौ
सिंहाद्रिनाथो नरसिंहमूर्तिः ॥
मायामृगोऽसौ मनुजेन्द्रसूनो
सिंहो महानाविरभूत्किलाग्रे ।
स एव देवो जगतां विनेता
जगद्गुरुर्दिव्यमृगेन्द्रमूर्तिः ॥
तत्राविरासीद्गिरिवर्यपृष्ठे
विमानवर्ये बहुमेरुरूपः ।
तन्मध्यवर्ती हरिरव्ययात्मा
त्रस्तान्सुरान्पाति गिरौ प्रलीनान् ॥
देवैरनेकैः परिपूजितोऽसौ
चिरं वसानीति गिरौ नगेन्द्रे ।

6462. — (L. 6462) G_2 नानाशस्त्रनिपीडिताः (for ^{b}) — (L. 6463) D_1 पाहि नस्त्रिदशान्वीमन् (for ^{a}). — D_1 G_2 M_1 om. the ref. — (L. 6467) M_1 वा (for वः). — After line 6469, G(ed) ins. :

232** पालयस्व तथा लोकांस्त्रिदशान्मनुजानपि ।

— (L 6472) M_1 गणाः सर्वे (for -गणैः सार्धं). G_2 युष्माकं हितकाम्यया (for ^{b}) — (L 6473) G(ed) -समायुक्ते (for °युक्तो) D_1 वर्ते तस्मिन्, G_2 वर्तेमहि, M_1 वर्तयेयं (for वर्ते तत्र). — (L 6476) G(ed) भोगेच्छवो (for °प्सवो). — (L. 6477) D_1 M_1 -शोभिन (for °तम्). — For line 6477, G_1 subst :

233** इत्युक्त्वा सर्वदेवाना देवो विश्वात्मकः प्रभु ।

— (L 6478) D_1 M_1 बहुजन्तू(M_1 °रत्नो)पशोभितम्, G_2 °जन्तूपसेवितम् (for ^{b}) — (L. 6482) G_1 -संशिताः (for -संतति) D_1 M_1 दुःखिते देवसंघके (M_1 °संततौ), G_2 °ते देवतागणे (for ^{b}) — (L. 6483) G(ed) नृसिंहरूपी भगवान् (for ^{a}). G_1 M_1 चचार च (for विचचार). — (L. 6485) G_3 -विभूपितः (for -तनुच्छदः) — (L. 6486) D_1 G_1 त(G_1 दी)प्तपावकजिह्वाग्रो (for ^{a}). G(ed) -शोभनः (for -शोभित.) — (L. 6489) G_2 सुरेन्द्राश्च ; M_1 सुराः सर्वे (for सुरेन्द्रास्ते) — (L. 6490) D_1 विलीयन्ते ; G(ed.) निलीनास्ते (for °यन्ते) D_1 गिरेः शिखरकोटरे (for ^{b}). — (L. 6493) M_1 प्रलम्बिहरिमालिकाः (for ^{b}). — D_1 om. line 6495. — (L. 6496) G(ed.) उज्ज्वलैर् (for केयूर-). — (L. 6497) D_1 G_2 M_1 -रत्नचितैः (for °मयैः) — (L 6498) G_2 पर्वतोत्तमे (for °पमा) — (L 6499) D_1 सनन्दन- ; $G_{1,2}$ M_1 सनन्दश्च (for °कश्च). — (L. 6500) D_1 G_2 महामतिः ; G_1 M_1 बृहन्मतिः (for सनन्दनः). — (L. 6502) G(ed.) -शेषौ च (for -शेषाद्याः) M_1 जयेशविजयेशाद्याः (for ^{a}). G(ed.) कुम्भयोनिर्बृहस्पति (for ^{b}). — (L 6506) G(ed) तं देशं जग्मुरञ्जसा (for ^{b}). — (L 6509) G(ed) च मुदा- (for प्रमदा-). — (L. 6515) $G_{1,2}$ -मयोऽसौ ; M_1 -मृगेन्द्रो (for -मृगोऽसौ).

दिव्यैश्च भोगैरुपसेव्यमानो
निवेशयामास मुनीन्द्रवर्यान् ॥
दिव्यभोगसमायुक्तो दिव्यगन्धर्वकोटिभिः ।
आराध्यमानो नृपते तत्रास्ते मुनिरव्यय ॥
तं नत्वा गरुडारूढं देवदेवमरिंदमम् ।
ध्यात्वा च त्रिदिवं याति नर पापकृतोऽपि च ॥
तस्य देवस्य पुरतः सदा देवैरभिष्टुतः ।
मरुत्वान्स्तौति देवेशं मुक्त्यर्थं पाण्डुनन्दन ॥
सूर्यात्मज प्रचेताश्च धनदो यक्षजातिभि. ।
स्वां स्वां दिशमधिष्ठाय सेवन्ते त विदूरत ॥
विश्वसृग्वामदेवश्च नारसिंहं जगद्गुरुम् ।
सिंहाद्रिनाथ चक्राते सेवा जगति शोभनाम् ॥
देवैः समस्तैरुपसेव्यमानं
नत्वा नरा यान्ति दिवं सुरेशम् ।
पापानि कृत्वा पितृभक्तिहीना
सदा दुराचाररताश्च सर्वे ॥
श्रुत्वा कथां तस्य हरेरनीशं
सिंहाद्रिनाथस्य शुभप्रदां च ।
दिवं प्रयान्त्येव नराः सुशीलाः
पुराणमूर्तेः पुरुषोत्तमस्य ॥
तस्मात्त्वं प्रार्थयस्वेह सिंहाद्रेरीशमव्ययम् ।
अथ वा गच्छ धर्मात्मन्देवदेवं प्रपूजय ।
अचिरात्प्राप्स्यसे स्थानं श्रियं चैवोज्ज्वलां स्थिराम् ॥
यस्त्वेतच्छृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः ॥

Colophon.

जनमेजय उवाच ।

एवं प्रबोधितस्तेन धर्मपुत्रो महामतिः ।
कृष्णेन लोकनाथेन किमपृच्छत्पुनर्द्विज ॥
व्यासप्रसादात्तत्सर्वं भवान्वेत्ति न संशय· ।
श्रोतुकामस्य मे ब्रह्मन्वैशंपायन कीर्तय ॥

वैशंपायन उवाच ।

काम्यके पर्णशालायामुपविष्टं कुशासने ।
उपदेष्टुं महद्धर्ममागतं विष्णुवल्लभम् ॥
ईश्वरं सर्वलोकानां कृष्णं कमललोचनम् ॥
कृताञ्जलिपुटाः सर्वे पाण्डवा धर्मतत्परा ।
नमस्कृत्य जगन्नाथं पप्रच्छुर्धर्मसंहिताम् ॥
यादवेन्द्र जगन्नाथ पाण्डूनां हितकृद्धरे ।
ब्रह्मलोकप्रदं धर्मं शाश्वतं लोकविश्रुतम् ॥
सर्वभाग्यकरं पुण्यमायुरारोग्यवर्धनम् ।
कथयस्व जगन्नाथ पाण्डूना हितकृद्धरे ॥

भगवानुवाच ।

शृणुष्व धर्मं भूपाल विचित्रं शाश्वतं महत् ।
प्रख्यातं त्रिषु लोकेषु द्विजानां स्थापनं महत् ॥
सर्वभाग्यकरं पुंसां बहुपुत्रप्रदं शुभम् ।
अनाथं वा सनाथं वा ब्रह्मपुत्रमरिंदम ।
कारयेद्योपनयन स मुक्तो ब्रह्म चाश्नुते ॥
विवाहं मौञ्जिबन्धं च कारयेद्यो नरोत्तमः ।
स मुक्तः सर्वपापेभ्यो सर्वैश्वर्यं लभेन्नृप ।
अपुत्री च सुपुत्री स्यात्सुपुत्री संपदं व्रजेत् ॥

युधिष्ठिर उवाच ।

अपुत्रिणस्तु बहवो नरा पुण्यकृतोऽपि च ।
अभवन्पापिनो मर्त्या बहुपुत्रा कथं हरे ॥
एतन्मे संशयं देव छेत्तुमर्हसि सुव्रत ।
त्वद्वचो देवदेवेश सत्यं परमपावनम् ॥

भगवानुवाच ।

मौञ्जीबन्धनमुद्वाहं कृतं येनान्यजन्मनि ।
स नरः पुण्यवाँल्लोके भविष्यति न संशयः ॥
दानेन धनवान्राजन्पुत्रवान्मौञ्जिबन्धनात् ।
उद्वाहाच्छ्रुतवृत्त· स्याद्भवत्येव द्विजन्मन ॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
पुत्रदं भरतश्रेष्ठ चारित्रं सोमतेजसः ॥

—(L. 6516) D_1 $G_{1, 2}$ शिलाग्रे (for कि°) —(L. 6524) D_1 स्थाग्रे (for नगेन्द्रे).—(L. 6530) G(ed.) नरा पापव्रता अपि (for ^{b}). —(L 6536) G_1 चक्रुस्ते; G(ed.) त्वनिश (for चक्राते). G(ed.) सेवेते स्म शुभप्रदम् (for ^{b}) —(L 6543) M_1 व्रजन्ति (for प्रयान्ति) —(L 6546) G_2 अथ वाद्दोबलेशं वा (for ^{a}). —(L 6549) G_2 परत्रेह (for सोऽमु°)

COLOPHON —*Sub-parvan*. D_1 आश्चर्यपर्वणि शेषधर्मा° $G_{1, 2}$ M_1 G(ed) शेषधर्मा. —*Adhy name*. D_1 G(ed.) सिंहाद्रिमाहात्म्यम् G_2 सिंहाद्रिनाथमाहात्म्यम् —*Adhy no.*. D_1 G(ed) 50, $G_{1, 2}$ 49

G(ed.) reads lines 6540–6646 after the colophon (preceded by line 3342). —(L. 6553) G_1 वृत्तमेतत्प्रकीर्तय (for ^{b}). —(L. 6554) G(ed.) उपाविष्टा· सुखासने (for ^{b}) —(L 6557) G(ed) वत्सला· (for -तत्परा). —D_1 om lines 6559–6561. G_2 om. 6559–6560 —(L 6561) G_1 बहुपुत्रप्रद शुभम् (for ^{b}). —(L. 6562) D_1 यादवेन्द्र (for कथयस्व) G(ed) पाण्डूना हित-कृत्तम (for ^{b}) —D_1 om (hapl) line 6564. —(L. 6565) G_2 M_1 -भाग्यप्रदं (for °कर). —(L 6566) D_1 D_1 विप्रात्मजम्, G_1 वृद्धात्मजम् (for ब्रह्मपुत्रम्) —(L. 6567) G(ed) य कारयत्युपनय (for ^{a}).—(L 6570) D_1 G(ed) अपुत्रश्च सपुत्र स्यात् (for ^{a}) —(L 6571) G(ed.) -व्रता अपि (for -कृतोऽपि च) —M_1 om line 6572. —(L. 6573) D_1 G_1 M_1 [अ]शेषत (for सुव्रत) —(L 6574) M_1 तद्वदस्व च देवेश (for ^{a}) —(L 6575) G(ed) मौञ्जी-बन्धं समुद्वाह (for ^{a}). —(L. 6577) D_1 G_1 धर्मवान् (for धन°) D_1 पुत्री तु (for पुत्रवान्) —(L. 6578) G_2 द्विज-

सोमकान्तः पुरा राजा सोमवंशे महामतिः ।
सदा दानपरो नित्यं यज्ञकर्मसु निश्चितः ॥
बन्धुप्रियो महातेजा गुणवान्धर्मतत्परः ।
आतिथेयः सदा विष्णोः परिचर्यापरो नृप ॥
सप्तद्वीपवतीं पृथ्वीं प्रशशास महीपतिः ।
धर्मेण पालिताः सर्वाः प्रजास्तेन महात्मना ॥
वाजपेयशतं तेन ह्यश्वमेधशतं तथा ।
कृतं तेनैव महता देवास्तृप्तास्तथाभवन् ॥
एकदा चिन्तयामास प्रासादे देवसंनिभः ।
बहुकालो ह्यतीतो मे पुत्रा नैवाभवन्बत ॥
अपुत्रिणा मया लोकः परोऽपि च तथा न हि ।
पितृसंततिविच्छेदमभून्मे पापकर्मिणः ।
अद्यप्रभृति ते सर्वे किं करिष्यन्ति पूर्वजाः ॥
मया कृतानि धर्माणि बहूनि विविधानि च ।
तेषां प्रत्यक्षता दृष्टा न मया किं कृतं पुरा ॥
कमहं शरणं गत्वा किं नु पृच्छामि धर्मिणम् ।
कालक्षेपो न कर्तव्यो जरया चावृता तनुः ॥
इति संचिन्त्य राजेन्द्र सोमकान्तिः प्रतापवान् ।
त्रिविष्टपं ययौ विद्वान्दीप्यमानः स्वतेजसा ॥
सुधर्मामण्डपे देवं पुरंदरमरिंदमम् ।
ददर्श देवताभिश्च सेव्यमानमनेकधा ॥
स्वात्मजेन जयन्तेन साधु दृष्ट्वा विशां पतिम् ।
इत एहीति राजेन्द्र स वज्री समभाषत ॥
दत्त्वा चार्धासनं राज्ञे ह्यकाले भवदागमः ।
किमर्थमागमो राजन्नहं किं करवाणि ते ।
तद्ब्रूहि सांप्रतं वीर करिष्ये वचनं तव ॥
एवं पृष्टस्तु भूपालः शक्रेण तु महात्मना ।
धर्मवित्कथयामास स्वमागमनकारणम् ॥
अपुत्रिणो मे देवेश पुत्रं त्वं दातुमर्हसि ।
नापुत्रस्य च लोकोऽस्ति त्वया वै गदितः पुरा ।
तस्मात्त्वां प्रार्थयाम्यद्य कामदं सर्वदेहिनाम् ॥

इन्द्र उवाच ।

ममापि च ह्यपुत्रस्य ब्रह्मा लोकपितामहः ।
जयन्तं दत्तवान्पूर्वं प्रयत्नेन नृपोत्तम ॥
तत्सकाशं व्रज त्वं हि स वै दास्यति पुत्रकम् ।
काङ्क्षन्ति च दिशापालास्तैः सार्धं तु त्वया सह ।
गच्छामि ब्रह्मणो लोकमद्य त्वं यातुमर्हसि ॥

भगवानुवाच ।

दिक्पालैः सह राजेन्द्र राज्ञा तेन महात्मना ।
मरुत्वानाययौ शीघ्रं ब्रह्मणो ह्यविशङ्कया ॥
नमस्कृत्वाब्रवीद्राजन्ब्रह्माणं प्रपितामहम् ।
राजायं सार्वभौमश्च देवकार्यरतः सदा ।
धर्मविद्धर्मनिरतो ह्यपुत्री च इमे सुराः ॥
सर्वेषां पुत्रसंपत्तिं प्रयच्छ सुरनेश्वर ।
अस्ति चेत्तव कल्याण स्पृहा देवेषु भूमिप ॥

ब्रह्मोवाच ।

ब्रह्मप्रतिष्ठां कुरुत ततो वैवाहिकं शुभम् ।
राजा दिक्पतयः सर्वे कुर्वन्तु मम चाज्ञया ।
तेन पुण्यप्रभावेन पुत्रप्राप्तिर्भवेद् ध्रुवम् ॥
अहमेव शुभं कर्म धर्माणां धर्ममुत्तमम् ।
कृत्वा वै सर्वलोकानां सृष्टिकर्ता भवामि च ॥
इत्युक्त्वान्तर्दधे देवो ब्रह्मा लोकपितामहः ।
राजा च देवताः सर्वाः स्वं स्वं स्थानं ययुस्तदा ॥
कृत्वा वै द्विजपुत्राणां मौञ्जीबन्धनिवेशनम् ।
राजा पुत्रमवाप्तुं वै पितॄणां मुक्तयेऽनघ ॥
ब्रह्मप्रतिष्ठामकरोत्काले पुण्यतमे नृप ।
उद्वाहमङ्गलैर्दिव्यैः कारयामास सर्वदा ॥
धर्मव्रतो महानासीत्सुतो वै देवसंनिभः ।
तेनैव पितरो मुक्तिमगमन्पुण्यकर्मणः ॥
तस्मात्त्वं भूभृतां श्रेष्ठ युष्मत्संततिपालने ।
पितॄणां मुक्तये तात कुरु वै ब्रह्मवर्धनम् ॥

°त्मता ; M_1 न संशयः (for द्विजन्मन°) —(L. 6579) G_1 M_1 [उ]द्वाहरिष्यामि (for °रन्तीमम्) —(L. 6580) $G_{1.2}$ चारित्रं सोमजोद्भवम् (for ^{b}). —(L. 6581) $G_{1.2}$ सोमवंशसमुद्भवः (for ^{b}) —(L. 6582) D_1 G(ed.) निष्ठितः (for निश्चितः). —(L. 6585) D_1 G_1 प्रशशंस महाद्यु(G_1 °म)तिः (for ^{b}). —(L. 6589) G(ed) प्रभया (for प्रासादे). —(L. 6591) D_1 अपुत्रिणस्त्वयं लोक , D_1 G(ed) °णामय लोकः (for ^{a}) —(L. 6594) D_1 धर्मांश्च , G_1 सर्वाणि , M_1 कर्माणि (for ध°). —(L. 6597) G(ed) व्याहता (for व्यावृता). —(L. 6600) D_1 सुमण्डपे देवदेव (for ^{a}). G_2 G(ed) दृश्यमान (G_2 देवराजं) पुरदरम् (for ^{b}).—(L 6602) D_1 M_1 G(ed.) सार्धं (for साधु). $G_{1.2}$ M_1 G(ed.) दृष्ट्या (for दृष्ट्वा). —(L. 6603) D_1 M_1 वज्री तु तमभाषत , G_1 वज्री चेदम° ; G_2 वज्री नृपम° (for ^{b}) —(L. 6607) G_2 उक्तस् (for पृष्टस्). —(L. 6608) G_1 स्वर्गागमनकारणम् (for ^{b}).—(L. 6612) $G_{1.2}$ M_1 ब्रह्म- (for च हि-). — G_2 om. lines 6615–6617. —(L. 6621) G_2 ह्यपुत्रश् ; M_1 अपुत्रश् (for ह्यपुत्री). —(L. 6622) G(ed.) सर्वेषां त्वं देवदेव (for ^{a}). —(L. 6623) G(ed.) नित्यदा (for भूमिप). —(L. 6627) G(ed.) च शुभदं (for एव शुभं). G_2 G(ed) धर्मिणा (for धर्माणां). —(L 6630) G_1 M_1 सर्वे (for सर्वाः). G_2 समाययुः (for ययुस्तदा). G(ed) स्वं स्वं धाम प्रपेदिरे (for ^{b}).—(L. 6631) G_2 मौञ्जीबन्धनमुत्तमम् (for ^{b}). —(L. 6632) G_1 समाप्नोति (for अवाप्तुं वै), G_2 राजा च पुत्रकामोऽसौ (for ^{a}). —(L. 6634) D_1 M_1 G(ed.) उद्वाहमङ्गलं द्रव्यैः (for ^{a}). D_1 M_1 स कारयति सर्वदा ; G_2 कुर्वतस्तस्य भूपतेः (for ^{b}). —(L. 6636) D_1 G_1 M_1 -कर्मणा (for °णः). —(L. 6639) D_2 सुधर्मत्वं , M_1 °र्मं च (for °र्म्यं च). —(L. 6641) D_1 -लोक-

आयुष्करं सुधर्म्यं च प्रजावृद्धिकरं शुभम् ।
यशस्य लोकविख्यातं सर्वलोकेषु पूजितम् ॥
पुण्यलोकप्रदं पार्थ विवाहोपनयन परम् ।
मम लोकप्रदं धर्मं सर्वमङ्गलदायकम् ॥
यः शृणोति सदा भक्त्या प्रातःकाले नृपोत्तम ।
पुत्रप्राप्तिर्भवेत्तस्य सत्य सत्यं मयोदितम् ॥
स्त्रीसंनिधौ निशायां तु पठेत्प्राप्नोति पुत्रकम् ।
आरोग्यं बलवृद्धिं च कान्तिं च निरुपद्रवाम् ॥

Colophon.

द्रौपद्युवाच ।

गङ्गासुत नमस्तेऽस्तु कुरुवृद्ध महामते ।
केनोपायेन मे तात सर्वसंपद्भविष्यति ॥
स्त्रीणां तु किं व्रतं प्रोक्तं सर्वसंपत्करं परम् ।
विख्यात त्रिषु लोके तन्मे ब्रूहि पितामह ॥
पाञ्चाल्या वचन श्रुत्वा यज्ञपत्नीजनैः सह ।
भीष्मो वेदविदां श्रेष्ठो द्रौपदी वाक्यमब्रवीत् ॥
वक्ष्ये परमकल्याणि सर्वसंपत्करं शुभम् ।
आदौ भगवता प्रोक्तं नारदाय महात्मने ।
नारदो ब्रह्मपुत्रस्तु ममावोचच्छुभं व्रतम् ॥
चातुर्मास्यव्रतं पुण्यं सर्वमङ्गलकारणम् ।
अपवर्गप्रदं नृणां सर्वेषामघनाशनम् ।
स्त्रीणां पतिव्रतानां तु सर्वमङ्गलदं शुभम् ॥
श्रावणे मासि शुक्ले तु दशम्यां तु शुभे दिने ।
स्वगृहं लेपयेद्भक्त्या कृष्णे निर्विष्टचेतसा ॥
स्नात्वालंकारयेद्देहं गन्धपुष्पाक्षतादिभि॰ ।
पतिसेवापरा भूत्वा नत्वा नारायण प्रभुम् ॥
नत्वा पतिव्रता सम्यक्पतिं परमपावनम् ।
प्रार्थयेत्परया भक्त्या करिष्ये त्वत्प्रसादत॰ ॥
दशम्यामेकभुक्ता तु पादसेवां करोमि ते ।
यथा प्रीणाति भगवांस्तथानुज्ञां ददस्व ह ॥
प्रार्थयेत्पुण्डरीकाक्षं प्रसीदेति तत. परम् ।
प्रसन्नो भव देवेश सर्वज्ञं त्वां नमाम्यहम् ॥

त्वत्प्रसादात्तु भगवन्करिष्ये व्रतमुत्तमम् ।
अविघ्नं कुरु मे नाथ सर्वलोकनमस्कृत ।
कृपया तव देवेश करिष्ये व्रतमुत्तमम् ॥
नमस्ते पुण्डरीकाक्ष नमस्ते गरुडध्वज ।
नमस्ते कमलाकान्त भूयो भूयो नमोऽस्तु ते ॥
इदं मन्त्रं समुच्चार्य प्रार्थयेत्कमलापतिम् ।
त्वत्प्रसादाद्व्रतं सम्यक्सफलं भवति ध्रुवम् ॥
एवं गृहार्चनं सम्यक्प्रार्थयित्वा पुन पुनः ।
पतेरनुज्ञया रात्रौ भद्रदीपं प्रकल्पयेत् ॥
कृत्वैकभुक्तं पूर्वेद्युरन्येद्युरपि सुव्रते ।
कर्तव्यं यद्धरेः सम्यक् तत्प्रवक्ष्ये शृणुष्व ह ॥
एकादश्यां समुत्थाय स्नात्वा च प्रार्थयेत्पतिम् ।
कृतस्वस्तिकविन्यासा गृहदेवस्य संनिधौ ॥
एकादशीव्रतं कर्तुमनुज्ञां दातुमर्हसि ।
त्वत्प्रसादादह कर्तुं यतिष्ये नाथ संप्रति ॥
त्व मे हरिर्गुरुर्बन्धुरपवर्गप्रदो विभु ।
त्वया संरक्षिता नित्यं त्वत्पादकमल गता ।
भोक्ता मे शिक्षिता च त्व त्वदन्यो न गतिर्मम ॥
रात्रौ जागरणं कृत्वा उपोष्यैकादशीदिनम् ।
द्वादश्यां प्रातरुत्थाय स्नानं कुर्वीत वाग्यत. ॥
भक्तिमाम्यजमानस्तु विष्णुसूक्तादिमन्त्रकैः ।
स्नापयेत्परया भक्त्या गन्धोदककुशोदकैः ॥
पुरुषसूक्तविधिना गायत्र्या वा सुरेश्वरम् ।
अष्टाक्षरविधानेन ह्यथ वा द्वादशाक्षरैः ॥
पूजयेद्देवदेवेशं घण्टानादसमन्वितम् ।
क्षत्रिय॰ सर्ववाद्यैश्च शङ्खदुन्दुभिकाहलैः ॥
एवं प्रपूजयेद्देवमपवर्गप्रदं प्रभुम् ।
नामत्रयैर्महामन्त्रैर्योषित्कुर्वीत वन्दनम् ।
स्पर्शने नाधिकारोऽस्ति स्त्रीशूद्राणा विशेषतः ॥
एवं कृत्वा हरे पूजां बन्धुमान्भक्तिमान्गृही ।
पौरुषैस्तु महामन्त्रै संनिधौ पायसं हुनेत् ॥
परमान्न हरे. प्रीत्यै द्वादश्यां हेमपात्रतः ।

॰प्रदौ (for ॰प्रदं). D1 विवाहोपनयौ शुभौ ; G2 ॰ह मौञ्जिबन्धनम् (for ॰).

COLOPHON.— *Sub-parvan :* D1 G1 आश्चर्यपर्वणि शेषधर्माः ; G2 G(ed) शेषधर्मा॰, M1 आश्चर्यपर्वणि हरिवंशे शेषधर्माः. — *Adhy. name :* G2 ब्रह्मप्रतिष्ठापनम् ; G(ed.) ब्रह्मप्रतिष्ठाप्रशसा. — *Adhy. no* D1 51, G1, 2 M1 50.

D1 G2 युधिष्ठिर (for द्रौपदी). —(L 6647) G2 M1 पितामह (for महामते) —(L 6649) G1 तद्व्रतं संप्रचक्ष्व त्वं (for ॰). — After line 6650, D1 ins. .

234** तेषां पत्नी ह्येतदर्थं द्रौपदी प्रणयान्विता ।
कौतूहलादपृच्छत्त महापुण्यप्रद शुभम् ॥

— Before line 6651, D1 M1 ins वैशंपायन उवाच. —(L. 6651) G(ed.) सर्वधर्मार्थसाधनम् (for ॰). — Before line 6653, G1 M1 ins भीष्म उवाच —(L 6656) G1, 2 -दायकम् (for -कारणम्) —(L 6659) G(ed) आषाढे (for श्रावणे). —(L 6762) D1 शुभम्, G1 G(ed.) विभुम् ; M1 परम् (for प्रभुम्) —(L. 6670) D1 G2 देव (for नाथ). D1 -देव- (for -लोक-). —(L 6676) G(ed) लोकेश्वरं (for गृहार्चन). —(L 6679) D1 भवेत् (for हरे॰) —(L. 6680) G2 स्तुत्वा, G(ed) नत्वा (for स्नात्वा). —(L. 6686) D1 G1 M1 भोक्ता मा शिक्षकस्त्वं च (G1 ॰क कर्ता, M1 ॰कर्ता च) ; G2 बोद्धा शिक्षाकरस्त्व हि (for ॰). — After line 6686, G(ed) ins.

235** इति संप्रार्थ्य भर्तारं तस्यानुज्ञामवाप्य च ।

— G2 om lines 6688–6691 —(L. 6694) D1 G2 -कोणकैः ; M1 -निस्वनै. (for -काहलै॰) —(L. 6695) D1 G2 M1 देवं

यद्यद्व्रतादिकं कर्म हरिसंनिधिमाव्रत ।
सफलं याति राजेन्द्र सर्वान्कामानवाप्स्यसि ॥
पुण्याहं वाचयित्वाथ विप्रैर्बन्धुजनैः सह ।
शान्ति पौरुषसूक्तानि पठेद्देवं प्रणम्य च ॥
औपासनादिकान्कृत्वा ब्राह्मणानभिवादयेत् ।
पादप्रक्षालनं कृत्वा भोजयेत्परमान्नतः ॥
हरेर्नैवेद्यशेषं तु स्वयं भुञ्जीत वाग्यत ॥
तदन्ते यजमानस्य वल्लभा मङ्गळव्रता ।
प्रणम्य विप्रान्स्वपतिं कृत्वा पादविशोधनम् ।
तीर्थभूतं पयः पीत्वा स्वयं भुञ्जीत बन्धुभि ॥
एवं कृते व्रते सम्यक् दंपतिभ्यां हरिः स्वयम् ।
प्रीतिं गच्छति पाञ्चालि कर्मणां फलदो विभुः ॥
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ।
कृपया लोकनाथस्य व्रतेनानेन सुव्रते ।
एकादशीव्रतं कुर्याच्चातुर्मास्ये विशेषतः ।
शुद्धश्रावणमारभ्य कार्त्तिकान्तं समर्चयेत् ॥
एवं कृते विशेषेण पुत्रपौत्रादिबन्धुभिः ।
स्त्रीभिः परिजनैः सार्धं यत्काम्यं तत्प्रपद्यते ॥
सुरलोकप्रदा ह्येषा जीवपुत्रप्रदायिनी ।
अपवर्गप्रदा ह्येषा सर्वपापप्रणाशिनी ।
आरोग्यदायिनी ह्येषा सर्वभाग्यकरी शुभे ॥

द्रौपद्युवाच ।

भगवन्सर्वधर्मज्ञ सर्वलोकेश्वरस्य हि ।
भक्तप्रियो विशेषेण रक्षिता मम सुव्रत ॥
संवाह्य शिरसा भक्त्या भव राज्ञां शुभप्रद ।
करिष्ये पतिभिः सार्धं धर्मव्रतपरायणैः ॥
श्रुतं मया विशेषेण चातुर्मास्यस्य वैभवम् ।
उद्यापनं तु कार्त्तिक्यां वद संप्रति मेऽनघ ॥

भीष्म उवाच ।

व्रतानामपि सर्वेषामुद्यापनविधिं बुधाः ।
वदन्ति च व्रतस्यास्य नैवेद्यापनकर्म च ॥
नित्या ह्येकादशी पुण्या सर्वभाग्यप्रवर्धनी ।
उपवासव्रतमिदं नित्यमेव वदन्ति हि ॥
यथा तु गुळपिण्डस्य रसभेदो न विद्यते ।
एकादश्युपवासस्य तथा सर्वस्य चानघे ॥
शृणु पाञ्चालि वक्ष्यामि चातुर्मास्यस्य वैभवम् ।
फलातिशयहेतोस्तु कारणं कलिनाशनम् ॥
एकादश्यां शुक्लपक्षे श्रावणस्य सुरोत्तमः ।
स्वमायया पवित्रात्मया निद्रया वर्तते विभुः ॥
तथा योगेन महता विग्रहेण सुशोभनः ।
प्रसन्नमूर्तिर्भगवान्कार्त्तिक्यां भवति प्रभुः ॥
तस्य प्रसन्नदिवसमुत्थानाख्यं विदुर्बुधाः ।
उत्थिते देवदेवेशे शेषपर्यङ्कशायिनि ।
पूजयेत्तं प्रयत्नेन पूजाभिस्तत्पदं व्रजेत् ॥
योगोत्थितत्वात्स विभुर्जगद्योनिर्जगन्मयः ।
चराचरेषु लोकेषु ह्युत्थानद्वादशी स्मृता ॥
द्वादश्यां तु हरिं भक्त्या पूजां कुर्वन्ति ये नराः ।
तेषां मुक्तिर्भवेत्सम्यग्देवदेवस्य चेक्षणात् ॥
एकादशीं तथा सर्वामुपोष्य विधिवद्धरेः ।
पूजां कृत्वा प्रयत्नेन ह्युत्थानान्तं समर्चयेत् ॥
उत्थाने विधिना पूजां यः करोति विशेषवित्
स मुक्तः सर्वपापेभ्यो हरिसालोक्यतां व्रजेत् ॥

द्रौपद्युवाच ।

कीदृशी पूजना प्रोक्ता देवदेवस्य शार्ङ्गिणः ।
तन्मे कथय तत्त्वज्ञ सर्वलोकेषु पूजित ॥

भीष्म उवाच ।

शृणु भद्रे प्रवक्ष्यामि नारदाय महात्मने ।
हरिः प्रोवाच जलधौ क्षीराख्ये संस्तुतो विभुः ॥
व्रतानामपि सर्वेषां मुख्यमेकादशीव्रतम् ।
मयि सुप्ते भक्तजनाः कुर्वन्ति मयि तत्पराः ॥
तस्मात्पुण्यतमं प्रोक्तं चातुर्मास्यव्रतं परम् ।
शेषा भक्तिकरी प्रोक्ता चातुर्मासी तु मुक्तिदा ॥
भक्तिं विना ते मुक्तिश्च कथमद्य भविष्यति ।
भक्त्या मुक्तिप्रदं कर्म साधयेद्बुद्धिमान्नरः ॥
तस्मादेकादशी पुण्या त्वया सेव्या मुनीश्वर ।
भक्त्या परमया शान्त्या चातुर्मास्ये विशेषतः ॥
इत्युक्त्वा भगवान्नूनं नारदं मुनिसत्तमम् ।
तिरोऽभूत्तत्र विश्वात्मा नारदो विस्मयं गतः ॥
तस्मात्सर्वप्रयत्नेन पूज्या नारायणात्मिका ।
उत्थानद्वादशी ह्येषा सर्वपापप्रणाशिनी ॥
सुप्तोत्थितो हरिः साक्षाद्व्रतेन परितोषितः ।
व्रतेन सर्वकामान्वै संप्रयच्छति शोभने ॥

प्रपूजयेद्भक्त्या (for [a]). D_1 M_1 शुभम् (for प्रभुम्). — (L. 6699) M_1 सन्निधौ जुहुयात्पुन· (for [b]) — (L. 6700) G_1 विशेषेण (for हरे प्रीत्यै) D_1 G_2 M_1 परमान्नैर्हरे' प्रीतिर् (for [a]). D_1 G_2 M_2 द्वादश्या होममाव्रत (for [b]). — (L 6701) G_2 यद्यद्व्रतानि कर्माणि, M_1 कियद्व्रतानि किं कर्म (for [a]). — (L 6709) G_1 भक्त्या (for विप्रान्). — (L. 6713) D_1 M_1 कर्ता (for काम). — (L 6714) G_1 कृपया वासुदेवस्य (for [a]). — (L. 6716) G(ed) आषाढशुद्धमारभ्य (for [a]). — G_2 पाञ्चाली (for द्रौपदी). — (L. 6722) M_1 सर्वलोकेश्वरः सखा (for [b]). — (L. 6724) G_1 भवदाज्ञां सुख(M_1 शुभ)-प्रदाम् (for [b]). — (L 6730) G(ed.) सर्वभोग्यविवर्धनी (for [b]). — G(ed) om. lines 6735-6736. — (L. 6737) M_1 प्रीयते (for वर्तते) — (L. 6743) G(ed.) योगोत्थितो हि स विभु' (for [a]) — (L. 6747) D_1 एकादशी सदा सेव्या (for [a]). — (L 6748) G_2 G(ed.) ह्युत्थानं तत्समर्चये(G_2 °माचरे)त् (for [b]). — (L 6750) G_1 हरिसालोक्यमश्नुते (for [b]). — $G_{1,2}$ M_1 पाञ्चाली (for द्रौपदी). — (L. 6751) G(ed.) पूजा तु कीदृशी प्रोक्ता (for [a]). — (L. 6756) G(ed.)

रात्रौ जागरणं कुर्यात्पुराणश्रवणादिभिः ।
नृत्तगीतादिनैवेद्यैर्जपवेदानुकीर्तनै ॥
एकयामं तु य कुर्याज्जागरं हरिसंनिधौ ।
जन्मान्तरकृतै पापैर्मुच्यते नात्र सशय ॥
द्वियामात्स्वर्गसपत्तिस्त्रियामाद्ब्राह्मण पदम् ।
मुक्तिं याति नरो भक्त्या स्थित्वा यामचतुष्टयम् ॥
जागराच्चातुर्मास्यात्तद्यत्फलं तद्ब्रवीमि ते ।
मातृतः पितृनश्चैव द्विकोटिकुलसंयुत ।
शार्ङ्गिणो लोकमाप्नोति यद्गत्वा न निवर्तते ॥
द्वादश्यां प्रातरुत्थाय स्नात्वा पुण्यजलाशये ।
पुरुषसूक्तविधानेन हरिं सम्यक्प्रपूजयेत् ॥
शार्ङ्गिणः पुरतः स्थाप्य पावकं तु स्वशास्त्रत ।
पुरुषसूक्तऋचा सम्यक्परमान्नं हुनेद्व्रती ॥
ध्यात्वा सर्वगतं विष्णुमपवर्गफलप्रदम् ।
इष्टप्रद तमुद्दिश्य पावके जुहुयादिति ॥
अष्टाक्षरेण मन्त्रेण द्वादशाक्षरकेण वा ।
अथ वा राममन्त्रेण गोपालेन हुनेद्व्रती ॥
गायत्र्या वाथ शिवया पञ्चाक्षरसुविद्यया ।
उपदिष्टं तु यन्मन्त्रमेषां मध्ये सुशोभने ।
अष्टोत्तरशतं चाग्नौ तेन मन्त्रेण होमयेत् ॥
योषिद्वैश्यस्तथा शूद्रस्त्वमन्त्रो विकलाङ्गवान् ।
कारयेद्वेदविदुषा व्रतस्य परिपूर्तये ॥
गोभूतिलहिरण्यानि वासो दुग्धगुडानि च ।
प्रदद्याद्ब्राह्मणेभ्यश्च गुरवे तु विशेषत ॥
ब्राह्मणान्भोजयेद्भक्त्या प्रीत्या क्रोधविवर्जितः ।
भक्ष्यभोज्यादिभिः सम्यक्स्वयं भुञ्जीत वाग्यत ॥
एवं कृते विधानेन ह्युत्थानद्वादशीव्रते ।
देवदेवो जगन्नाथ सुप्रीतो भवति ध्रुवम् ॥
भ्रष्टराज्यप्रदा ह्येषा सर्वभाग्यकरी तथा ।
अपवर्गप्रदा ह्येषा चातुर्मासी विशेषतः ॥
इन्द्राण्येतत्पुरा कृत्वा गुरोरक्लिष्टकर्मणः ।
वाक्येन स्वपतिं लेभे राज्यभ्रष्टमरिंदमम् ॥
अदितिर्देवमाता हि बलिनेन्द्र प्रपीडितम् ।
पुत्रं वीक्ष्य तदा साध्वी कश्यपं वाक्यमब्रवीत् ॥
अनुज्ञां देहि मे ब्रह्मंश्चरिष्ये व्रतमुत्तमम् ।
कुरुष्वेत्युक्तमात्रे तु ह्यकरोदीदृशं व्रतम् ।
एकादशीप्रभावेन सुतं लेभे सुरोत्तमम् ॥
यस्त्वेतच्छृणुयान्नित्यं चातुर्मास्ये विशेषत ।
सर्वान्कामानवाप्नोति सफलं तु व्रतं भवेत् ॥

Colophon.

वैशंपायन उवाच ।

इत्येवं बोधिते धर्मे धर्मपुत्रे महात्मनि ।
राज्यभ्रष्टा च पाञ्चाली दध्यौ कृष्णमभीष्टदम् ॥
शङ्खचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्द पुण्डरीकाक्ष रक्ष मा शरणागताम् ॥
इति संप्रार्थ्य पाञ्चाली गङ्गासुतमथाब्रवीत् ।
कुरुवृद्ध नमस्तेऽस्तु सर्वशास्त्रविशारद ।
यादवेन्द्रो भवानेको गोप्तारौ मम सुव्रतौ ॥
शत्रुणा हृतराज्याहं कार्पण्यं परमं गता ।
स्निग्धबन्धुजना सर्वे मया त्यक्ता परिच्छदाः ॥
राज्यलाभो भवेद्येन व्रतेन तपसाधुना ।
कर्मणा केन दानेन तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

व्रतं कृतवती नूनं पार्वती मेनकात्मजा ।
पुत्रदं पुत्रकामानां भ्रष्टराज्यप्रदं शुभम् ॥
तत्तेऽहं संप्रवक्ष्यामि सर्वमङ्गलदायकम् ।
पार्वत्याश्चरितं पुण्यमनन्ताभीष्टदायकम् ॥
कैलासनाथं भूतेशं शंकरं लोकशंकरम् ।
पार्वती तोषयामास तपसा कृतनिश्चया ॥
परीक्षार्थं स देवोऽपि पार्वत्या तोषितो विभु ।
कन्दर्पनिधनं कृत्वा तिरोऽभूल्लोकशंकरः ॥
विनिन्द्य च स्वलावण्यमनुज्ञाप्य स्वमातरम् ।
उग्रं तपः सा तु कृत्वा तोषयामास शंकरम् ॥
तस्मिन्काले शची देवी द्रष्टुकामा च पार्वतीम् ।
अरुन्धत्यनसूयाभ्यां सेव्यमाना महर्षिभिः ।
तत्सकाशं ययौ देवी मरुतां पतिना सह ॥
तामागतां तदा वीक्ष्य पार्वती मेनकात्मजा ।
प्रत्युत्थानाभिवादाभ्यां पूजयामास सत्वरम् ॥
तामुवाच ततो वाक्यं पार्वती मेनकात्मजा ।

कुर्वन्तीदं हि मत्परा (for [b]) — (L 6773) G2 द्वियामात्स्वर्गमाप्नोति (for [a]) — (L 6775) D1 G1 M1 जागरात्तु चतुर्यामाद् (for [a]). — (L 6777) M1 यत्र गत्वा न शोचति (for [b]). — M1 om (hapl) lines 6782–6785 — (L. 6782) G(ed.) -प्रदं शुभम् (for -फलप्रदम्) — (L 6784) D1 G1, 2 अष्टाक्षरेण अथ वा द्वादशाक्षरविद्यया. — (L. 6787) D1 तु शोभनम् (for सुशोभने). — (L 6789) D1 G2 योषिद्वैश्यास्तथा शूद्रास् (for [a]). D1 नैव होमाधिकारिण (for [b]). — (L. 6791) D1 धान्यानि सफलानि च; G1 2 धनानि विविधानि च; M1 धान्यानि वसनानि च (for [b]). — (L. 6794) D1 G2 M1 बन्धुभिः (for वाग्यत.). — G2 om. lines 6797–6798 — (L 6801) D1 G1 बलीन्द्र- (for -बलिना). G2 बलिना परिपीडित (for [b]) — (L 6804) M1 G2 -मात्रेण (for -मात्रे तु) — (L 6807) G(ed) फलदं तु व्रत चरेत् (for [b]).

COLOPHON — *Sub-parvan*. D1 G1 M1 आश्चर्यपर्वणि शेषधर्मा-; G2 G(ed) शेषधर्मा. — *Adhy. name* D1 उत्थानद्वादशीमाहात्म्यम्, G2 चातुर्मास्यमहिमानुवर्णनम्, G(ed.) चातुर्मास्यैकादशीव्रतमाहात्म्यम् — *Adhy no* D1 52; G2 51.

(L. 6809) D1 G1 2 M1 गङ्गासुतमथाब्रवीत् (for [b]). — (L 6811) D1 G1 2 M1 शरणागतम् (for °गता). — D1 G1, 2 M1 om. line 6812 — (L. 6814) G2 गोप्ता काममनुव्रत (for [b]). — (L. 6834) D1 G2 M1 पार्वती कमलेक्षणा

अथ मे सफलं जन्म जीवितं च सुजीवितम् ।
तपश्च सफलं चासीद्युष्माकं प्रियदर्शनात् ॥
अरुन्धत्युवाच ।
किमर्थं तप्यते वत्से त्वया पेशलगात्रया ।
त्वया वक्तुं रहस्यं चेद्वद सम्प्रति नान्यथा ॥
सख्या निवेदयामास तच्छ्रुत्वा शंकरं प्रति ।
सलज्जा तरुणी कामं सा वक्तुं न शशाक ह ॥
अरुन्धत्युवाच ।
भद्रे विदितमेवाद्य त्वद्वृत्तमतिशोभने ।
व्रतेन तोषयस्वेह क्षीराब्धितनयां शुभाम् ॥
उमोवाच ।
किं व्रतं तद्विधानं मे कथयस्व नमोऽस्तु ते ।
करिष्ये वचनादद्य मातस्तव पतिव्रते ॥
अरुन्धत्युवाच ।
प्रोषिते गौतमभयाद्देवराजे शचीं तदा ।
व्रतेन दुःखितां जीवो विशोकामकरोत्तदा ॥
तद्व्रतं सम्प्रवक्ष्यामि कृतमेतन्मयाधुना ।
व्रतेनानेन सुभगे तवेष्टार्थो भविष्यति ॥
पुरंदरवियोगार्तां शचीं चारुविलोचनाम् ।
जीवो वचनमक्लीबमुवाच वदतां वरः ।
बृहस्पतिरुवाच ।
राशिं कर्कटकं भानौ गते परमपावने ।
भृगुवारे महापुण्ये स्नात्वा नद्यां शुचिस्मिते ॥
सैकतं पूर्णकुम्भं च तज्जलात्परिगृह्य च ।
धौतवस्त्रसमायुक्ता वटस्याश्वत्थपल्लवान् ॥
आदाय तान्गृहे रम्ये सैकते तु समर्पयेत् ।
तत्सैकतं समादाय त्रीन्पिण्डानथ कारयेत् ॥
वटाश्वत्थैस्तु तानर्च्य तत्पार्श्वे पूर्णकुम्भकम् ।
सुवर्णपुष्पगन्धाद्यैर्वस्त्रतण्डुलराशिभिः ।
हरिद्रालवणाभ्यां च पूगताम्बूलकर्पूरैः ॥
उपस्थितं तमभ्यर्च्य लक्ष्मीनारायणात्मकम् ।
माभूभ्यां सह तं विष्णुं सनकादिनिषेवितम् ॥
तं देवमर्चयेद्विद्वांस्तत्तन्मन्त्रैस्तु शार्ङ्गिणम् ।
मोदकान्गुळसंपूर्णान्मुद्गैश्च परिपूरितान् ।
नैवेद्यमर्पयेद्विद्वानेकविंशतिसंख्यया ॥
विप्राय वेदविदुषे वायनं तु समर्पयेत् ।
माभूभ्यां सहितो विष्णुः श्रीमान्वै लोकनायकः ।
मोदकानां प्रदानेन वाञ्छितार्थप्रदो भवेत् ॥
विप्राय वायनं दत्त्वा मन्त्रेणानेन सुव्रत ।
एकविंशतिभिर्वापि सप्तभिर्वा प्रकल्पयेत् ॥
एवं संपूज्य विधिवत्कथां श्रुत्वा सुशोभनाम् ।
भुञ्जीयाद्बन्धुभिः सार्धं स्वयं भुञ्जीत मोदकान् ॥
दक्षिणां गुरवे दद्यात्सवस्त्रफलतण्डुलाम् ।
आशिषं तु ततः प्राप्य गृह दीपैः प्रपूजयेत् ।
एवं कृते विधानेन सद्य सिद्धिर्भविष्यति ॥
पुत्रपौत्रांस्तथा विन्देत्पतिं विन्देत्पतिव्रता ।
राजा च राज्यलाभं च दरिद्रो धनसंपदम् ॥
दीर्घमङ्गलमायुष्यमारोग्यं चापि भामिनि ।
भवेद्व्रतेन कीर्तिश्च सर्वसंपच्च शाश्वती ।
यं यं कामयते कामं तं तमेति न संशयः ॥
स्त्रीणां व्रतमिदं मुख्य पतिपुत्रविवर्धनम् ।
तस्मात्पतिव्रते त्वं तु कुरु व्रतमनुत्तमम् ॥
आचार्यस्य वच श्रुत्वा शची कमललोचना ।
तथाकरोद्व्रतमिदं ब्राह्मणान्परिपूज्य च ॥
पतिं लेभे विशालाक्षि सहस्राक्षमरिंदमम् ।
कृपया वासुदेवस्य लक्ष्म्याश्चापि नगात्मजे ॥
अरुन्धत्या वचः श्रुत्वा गौरी कुटिलकुन्तला ।
अकरोत्प्रीतिसंयुक्ता लक्ष्मीनारायणात्मकम् ॥
व्रतं कृत्वा विधानेन व्रतानां पतिमव्ययम् ।
गौरी लेभे महादेवं पतिं परमपावनम् ॥
भीष्म उवाच ।
कार्कटे तु भृगोर्वारे व्रतेऽस्मिंस्तु मया कृते ।
अन्धकारिः प्रसन्नोऽभूत्पार्वत्यास्तु तपोव्रतैः ॥
अष्टमूर्तिधरो भूत्वा कपर्दी वाक्यमब्रवीत् ।
परितुष्टोऽस्मि भद्रं ते पवित्रे मेनकात्मजे ।
तव दास्यं गतोऽहं वै तपसा च व्रतेन च ॥
देवता च व्रतस्यास्य क्षीराब्धितनया शुभा ।
अथ देवो हरिः साक्षात्सर्वलोकेश्वरो विभुः ॥
अद्यप्रभृति लोकानां फलदा शुभदा रमा ।
राज्यदा भोगदा चैव पतिदा धनदा शुभा ॥
हरिं लक्ष्मीं विना नान्या व्रतदानफलप्रदा ।

(for [b]). —(L. 6836) D1 जातं (for चासीद्). —(L 6837) G2 बाले, M1 भद्रे (for वत्से) —(L 6838) G2 न शक्यं (for रहस्यं). —(L 6840) G2 कामा (for कामं). — G2 om lines 6841–6844 — D1 पार्वती (for उमा). —(L. 6854) G1 G(ed) वटाश्वत्थसु(G1 °स्य)पल्लवान् (for [b]). —(L 6859) G(ed.) -चन्द्रकैः (for -कर्पूरैः). —(L. 6862) D1 G2 तत्तन्मन्त्रैश्च चेतसा (for [b]). —(L. 6865) M1 पायस (for वायन). —(L. 6868) M1 [उ]पायन (for वा[a]) G1 G(ed.) विप्राय दद्याच्छुचये (for [a]). —(L 6871) G1 G(ed) ब्राह्मणान्भोजयित्वाथ (for [a]). — After line 6872, G1 G(ed) ins.

236** दक्षिणा तु यथाशक्ति दद्याद्विप्रेभ्य एव च ।

—(L. 6875) G1 पुत्रं विन्देद्विशालाक्षी (for [a]). —(L. 6877) D1 G2 दीर्घमायुष्यमारोग्यं (for [a]). G2 मङ्गलं चापि भामिनी (for [b]). —(L. 6879) G2 तं तं प्राप्नोत्यसंशयम् (for [b]). —(L. 6880) D1 G1, 2 M1 -बन्धु- (for -पुत्र-). — G2 om. line 6886. —(L. 6886) D1 गौरी कमललोचना (for [b]). —(L. 6890) D1 G1, 2 M1 विधिना सोमया कृते